THE

KĀSHI SANSKRIT SERIES

91.

(Vyākaraṇa Section, No. 11)

THE

VAIYĀKARAṆA

SIDDHĀNTA CHANDRIKĀ

By

RĀMĀS'RAMA

With

The Subodhinī Commentary by Sadānanda

&

The Tattvadīpikā Commentary, by Lokes'akara

EDITED WITH

THE AVYAYĀRTHAMĀLĀ & NOTES

By

KĀVYA-VYĀKARANA TĪRTHA

Pandit S'ri Navakishora Kara

Kāvya Sâhitya S'âstrâchârya Nyâya Vais'es'ika

Vedânta S'astri.

(PART I)

PRINTED PUBLISHED & SOLD BY

JAYA KRISHNA DAS HARIDAS GUPTA

The Chowkhamba Sanskrit Series Office,

Vidya Vilas Press, Benares City.

Second Editon] [1945.

काशी—संस्कृत—सीरिज़ग्रन्थमाला

९१

व्याकरणविभागे (११) एकादशपुष्पम्।

पदवाक्यप्रमाणपण्डितश्रीरामाश्रमप्रणीता वाणीप्रणीतसूत्राणां वृत्तिर्नाम

वैयाकरण-सिद्धान्तचन्द्रिका

श्रीमत्पण्डितसदानन्दकृतसुबोधिन्या श्रीमद्रामकरपौत्र-
श्रीक्षेमकरसूनु—श्रीलोकेशकरकृततत्त्वदीपिकया
व्याख्यया च सहिता।

सा च

पण्डितप्रवरश्रीबिम्बाधरकरव्याकरणसांख्यवेदान्ततीर्थचरणसेवकेन करशर्मो-
पाधिकेन कवितार्किकवैयाकरणश्रीनवकिशोरशास्त्रिणा निर्मितया
चक्रधराख्यटिप्पण्या अव्ययार्थमालया चालङ्कृता।

[पूर्वार्द्धम्]

प्रकाशकः

जयकृष्णदास—हरिदास गुप्तः,
चौखम्बा संस्कृत सीरिज़ आफिस,
बनारस सिटी।

द्वितीयसंस्करणम्] [वि० संवत् २००२

भूमिका

यदम्बुसङ्गात्त्रिजगत्पवित्रितं विशेषजन्मार्जितकल्मषाकुलम् ।
स्वयंभुवः शीर्षनिवासिनी चिरं पुनातु मे विष्णुपदी सदा गिरम् ॥१॥

जगत्पारावारे जननमरणग्राहनिकरैः कुकर्मव्यूहानां परिणतिवशादन्तिकगतैः ।
धृतानां जीवानामथ विधिनिषेधात्मगहना परेशोक्तिः पुण्या भवति खलु निःश्रेयसकरी ॥२॥

तदर्थव्याख्यायै धृतपरिकरो वैदिकगणस्त्रिलोक्याः कल्याणं व्यतत निगमादेः प्रणयनात् ।
क्रियासौकर्य्यं हि स्वपरजनसाधारणकृते सतामात्मज्ञानां प्रभवति विधिः प्राकृत इति ॥३॥

ननु तदर्थव्याख्यार्थं केन केन वा किं किं प्रोक्तमित्युच्यते—

श्रीनारदादिमुनिभिः स्वरवर्णभेदो दात्तानुदात्तसमवृत्ततिप्रयुक्ता ।
पाठप्रकारकथनेन समं प्रणीता शिक्षा धरातलमलङ्कुरुतेऽनवद्या ॥४॥

बौधायनेन विदुषा मुनिपुङ्गवेनाऽऽपस्तम्बनामयतिनाऽऽत्मविदां वरेण ।
वेदोक्तमन्त्रविनियोगपथप्रदर्शी ग्रन्थः कृतोऽस्ति नितरां भुवि कल्पनामा ॥५॥

यास्केन वैदिकवरेण निरुक्तमुक्तं वेदस्थशब्दनिवहार्थविनिर्णयाय ।
श्रीपिङ्गलेन विबुधेन महर्षिणा च छन्दःस्वरूपमखिलं व्यरचि स्वतन्त्रम् ॥६॥

अर्केन्दुभादिमहसामवलम्बनेन स्वाध्याययागविधिकालविनिश्चयाय ।
प्रोवाच नातिविततं लगधो विधिज्ञस्तन्त्रं हिताय जगतां किल गाणितं तत् ॥७॥

वेदस्याङ्गं प्रधानं मुखमिव निखिलज्ञानराशेर्निदानं
वाचां व्युत्पादकं व्याकरणमतिशयं क्षेमदं पण्डितानाम् ।
शास्त्रारण्येऽप्यगम्ये कथमपि चलितुं तद्विहीनस्य पुंसः
सामर्थ्यं नैव कस्यापि भवति नितरां पाठ्यमेतत्सदैव ॥८॥

प्रथमं के प्रसिद्धा व्याकरणकर्त्तारो बभूवुरित्युच्यते—

"इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः । पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ॥"

कतिविधानि तानि प्रसिद्धानि च ? इत्युच्यते—

"ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् । सारस्वतं चापिशलं शाकलं पाणिनीयकम् ।"

इति तत्त्वनिधावुक्तेनैवविधं तत्प्रसिद्धम् ।

तेषु मध्ये केयं सिद्धान्तचन्द्रिकेत्युच्यते—

सारस्वतीयसूत्राणामपरा वृत्तिरस्ति या । रामाश्रमकृता रम्या सा हि सिद्धान्तचन्द्रिका ॥९॥

सिद्धान्तचन्द्रिकाग्रन्थे द्वे टीके स्तो मनोहरे ।
एका सुबोधिनी नाम्ना तदन्या तत्त्वदीपिका ॥१०॥
प्राच्यपुस्तकमतान्तरगर्भा पाठभेदसहिता सुगमात्र ।
टिप्पणी कथितचक्रधराख्या योजिता सकलबालहिताय ॥११॥
यदत्र विकलं चासीत् प्रक्रियायां विशेषतः ।
पाणिनीयादिपद्धत्या पूरितं तत् विभाव्यते ॥१२॥
काशीसंस्कृतसीरिजादिसकलग्रन्थप्रकाशेन यः प्राप्तो भूसुरसेवयात्र विमलां कीर्त्तिं विदेशे तथा ।
श्रीलश्रीहरिदासगुप्ततनयो धीमानिदं पुस्तकं धीरः श्रीजयकृष्णदास इति नामासावमुद्रापयत् ।१३
हेमाननीयविबुधाः ! कृतशास्त्रचर्चाः ! यद्यत्र लेखनगता मम दोषसंधाः ।
जाता भवद्भिरनिशं परिमार्जनीयाः दोषाश्चरन्ति महतामपि ये हि दुष्टाः ॥१४॥

विदुषामनुचरः—

कूरशर्मोपाधिकः--श्रीनवकिशोरशास्त्री ।

सिद्धान्तचन्द्रिकापूर्वार्द्धगतप्रकरणानां सूची ।

विषयाः ।	पृष्ठाङ्काः	विषयाः ।	पृष्ठाङ्काः
संज्ञाप्रकरणम्	५-१८	हसान्तस्त्रीलिङ्गाः	१६२-१६५
परिभाषाप्रकरणम्	१८-२०	हसान्तनपुंसकलिङ्गाः	१६५-१७१
स्वरसन्धिः	२१-३४	युष्मदस्मत्प्रक्रिया	१७१-१८५
प्रकृतिभावः	३४-४०	अव्ययानि	१६८-१९६
हल्सन्धिः	४०-५२	स्त्रीप्रत्ययाः	१९६-२१८
विसर्गसन्धिः	५२-६१	विभक्त्यर्थाः	२१९-२५८
स्वरान्तपुँल्लिङ्गा	६१-१११	समासप्रकरणम्	२५८-३१०
स्वरान्तस्त्रीलिङ्गा	१११-१२३	तद्धितप्रकरणम्	३१०-३५९
स्वरान्तनपुंसकलिङ्गा	१२३-१३२	तिङन्तप्रकरणम्	३५९-३६५
हसान्तपुँल्लिङ्गा	१३२-१६१	अव्ययमाला (परिशिष्टे)	३६६-३७१

वैयाकरण-
सिद्धान्तचन्द्रिका

सटिप्पण-सुबोधिनी-तत्त्वदीपिकाव्याख्यासंवलिता ।

[पूर्वार्द्धम्]

श्रीगणेशाय नमः ।

नमस्कृत्य महेशानं मतं बुद्ध्वा पतञ्जलेः ।
वाणीप्रणीतसूत्राणां कुर्वे सिद्धान्तचन्द्रिकाम् ॥ १ ॥(क)

सुबोधिनी-

पुराणपुरुषं ध्यात्वा नत्वा चार्हन्तनायकम् ।
सिद्धान्तचन्द्रिकावृत्तिं चर्करीमितरामहम् ॥ १ ॥
विद्यारत्नपयोनिधौ खरतराम्नाये जगत्पूज्यके
श्रीभट्टारकसंपदं गुणगणैः स्तुत्यां धरन्पुण्यवान् ।
पूज्यश्रीजिनभक्तिसूरिरधिपो वर्वर्ति विद्यानिधिः
सोऽयं शीतकरायते च यशसा सूरायते तेजसा ॥ २ ॥
श्रीकीर्तिरत्नः सूर्याह्वो यतीन्द्रोऽभूत्तरां ततः ।
श्रीमत्सुमतिरङ्गाख्यः पाठकप्रवरस्ततः ॥ ३ ॥

(क) यं चिन्तयन्ति यतयो भवलङ्घनाय, भुक्त्यैकगम्यमनघं विगताभिलाषाः ।
भक्तेष्टसाधनजनुस्तनुधीषणस्य भ्रान्तिं ममापनुदतां त्रिपुरान्तकोऽसौ ॥ १ ॥
जननीं जनकं ध्यात्वा दुर्गां विम्बाधरं तथा ।
विद्वांसं विदुषीं काश्यां कुर्वे टिप्पणकं मुदा ॥ २ ॥

अथ श्रीमद्रामाश्रमाचार्योऽधिकारिविषयसम्बन्धप्रयोजनानि सूचयन्मङ्गलाचरणमुखेन पद्यं निबध्नाति-**नमस्कृत्येति** ।

तथाहि-वाणीप्रणीतसूत्राणां सिद्धान्त इति सूत्रार्थबलाद्वैयाकरणसिद्धान्ताः प्रतिपाद्यत्वेन विषयाः । अनायासेन तदवगमः प्रयोजनम् । तस्य ग्रन्थस्य च जन्यजनकभावः सम्बन्धः सिद्धान्तजिज्ञासुरधिकारी ।

मतं बुद्ध्वा पतञ्जलेरिति । एतेनास्य व्याकरणस्य प्रयोगसाधनपद्धतयो महाभाष्यसरण्येति लभ्यते, अपि च भाष्यविरुद्धा ये प्रयोगास्ते चात्र न निवेशिताः । यथा वत्सार्णमित्यादय इति ॥

श्रीपाठकाः श्रीसुखलाभसंज्ञा जगत्प्रभावा विलसत्प्रतिज्ञाः ।
तच्छिष्यवर्याः कृतिराजिधुर्याः श्रीपाठकाः पाठकवारणेन्द्राः ॥ ४ ॥
श्रीभागचन्द्रा गणिसंप्रवर्हाः संवेगरङ्गाङ्गनिमग्नगात्राः ।
श्रीभक्तिपूर्वं विनयं हि येषां तन्नामधेयं गुरवो वदन्ति ॥ ५ ॥
तेषां हितेषां विनयप्रधानोऽनवद्यविद्याभ्यसनैकतानः ।
प्राज्ञः सदानन्दगणिः सुशिष्यः सुबोधिनीं संविदधाति वृत्तिम् ॥ ६ ॥

ग्रन्थादौ ग्रन्थमध्ये ग्रन्थान्ते च मङ्गलमाचरणीयमिति शिष्टाचारः। तत्र मङ्गलं त्रिविधम्। आशीर्वादात्मकं नमस्कारात्मकं वस्तुनिर्देशात्मकं चेति (क) अथ ग्रन्थादौ ग्रन्थकर्ता रामाश्रमो नमस्कारात्मकं मङ्गलं शिष्यशिक्षार्थं निबध्नाति॥ नमस्कृत्येति। अहं सिद्धान्तचन्द्रिकां कुर्वे। प्रमाणेन प्राप्तोऽर्थः सिद्धान्तः (ख) 'षिधू शास्त्रादौ' अस्माद्गत्यर्थादिति क्तः। सिद्धो निष्पन्नोऽन्तो निश्चयोऽत्रेति सिद्धान्तः। सिद्धान्ते चन्द्रिकेव चन्द्रिका, शाकपार्थिवादित्वान्मध्यमपदलोपः, सिद्धान्तचन्द्रिका ताम्। चन्द्रज्योतिरिव प्रकाशिकामित्यर्थः। सकलजनाह्लादकत्वसाम्येन चन्द्रिकाशब्दप्रयोगः। चन्द्रोऽस्यस्यामिति चन्द्रिका। 'अतइनिठनौ' इति ठन्। चन्द्रं कायति प्रतिपादयतीति वा चन्द्रिका। आतो कः। चन्द्रमाचष्टे इति वा चन्द्रिका। ण्यन्ताद्वुञ्। "चन्द्रिका कौमुदी ज्योत्स्ना" इत्यमरः॥ कुर्वे इति लट् उत्तमपुरुषस्यैकवचनम्। आख्यातप्रत्ययस्तु कर्तर्यस्ति। कर्तुराख्यातेनोक्तत्वादाख्यातवाच्यकारकवाचकः प्रथमान्तोऽहमिति कर्ता संगृह्यते। कुर्वे इत्यत्र 'र्वोरुपधाया दीर्घ इकः' इति दीर्घस्तु न भवति कुर्छुरोर्नेति निषेधात्॥ ननु करिष्यमाणायाश्चन्द्रिकायाः कथं कुर्वे इति वर्तमाननिर्देशः। उच्यते। वर्तमानसमीपे भूते भविष्यति चेति भविष्यदर्थे लट्। केषां सिद्धान्त इत्यत आह। वाणीप्रणीतसूत्राणामिति। वाण्याप्रणीतानि वाणीप्रणीतानि वाणीप्रणीतानि सूत्राणि वाणीप्रणीतसूत्राणि तेषाम्। 'वण शब्दे' पचाद्यच्। वणो ब्रह्मा 'देवतेदमर्थे' इत्यण्। ततो ङीप्। वाणी। 'वाणयति प्रेरयति जीवानिति ण्यन्तात्पचाद्यच्। नदादेरिति ङीष्वा। 'गीर्वाग्वाणी

(क) ननु 'मङ्गलमाचरणीयमिति, शिष्टाचारेऽपि किं तस्य फलमिति चेदुच्यते, विघ्नध्वंस इति। न च समाप्तिरेव फलं किमिति नोपेयते, मङ्गलं विनापि नास्तिकादिग्रन्थपरिसमाप्तिप्रदर्शनात्, कृतमङ्गलाचरणस्यापि ग्रन्थस्य कचित् समाप्त्यदर्शनात् व्यभिचारात् समाप्तिं प्रति तस्य हेतुत्वासम्भव इति चेन्न, यत्र हि कृतेऽपि मङ्गले न समाप्तिस्तत्रागत्या विघ्नप्राचुर्यं कल्प्यते, यत्र च मङ्गलं विनापि समाप्तिस्तत्र जन्मान्तरीयमेव मङ्गलं कल्प्यते इति वाच्यम्, विघ्नध्वंसद्वारा मङ्गलस्य समाप्तिं प्रति हेतुत्वकल्पनामपेक्ष्य विजातीयविघ्नध्वंसं प्रत्येव तस्य हेतुत्वकल्पनाया लाघवादावश्यकत्वात् न्याय्यत्वाच्च। यत्र दुरदृष्टमेव नास्ति तत्र मङ्गलस्यादृष्टजनकस्यैव स्वीकारात्। भवन्मतेऽपि विघ्नध्वंसद्वारा तत्र तस्य हेतुत्वसम्भवाच्च। आशु विनाशिनो मङ्गलस्य समाप्तिं प्रति साक्षाद्धेतुत्वासम्भवेन विनिगमनाविरहस्यासम्भवाच्च। कृतमङ्गलस्य ग्रन्थस्य कचिदसमाप्तिश्च बुद्धिप्रतिभादिकारणान्तरविरहादेव। नास्तिकादीनां च समाप्तिप्रतिबन्धकीभूतदुरदृष्टमेव न कल्पते इति सर्वं सुस्थमधिकमन्यत्रानुसन्धेयम्।

(ख) प्रमाणपदेन केषां मते चतुर्विधं केषांचिन्मते तदधिकं प्रत्यक्षानुमानोपमानशब्दादीति। किन्त्वत्र व्याकरणतन्त्रे भाष्यं वार्तिकं सूत्रं चेति प्रमाणमागमप्रमाणान्तर्गतमेव तेन प्राप्तोऽर्थः सिद्धान्तः। शास्त्रितार्थनिश्चय इत्यर्थः।

सरस्वती" इत्यमरः । नियः कर्मणि क्तः । 'सूत्र वेष्टने' चुरादिः । सूत्रयन्ति बहूनर्थानल्पाक्षरैरिति सूत्राणि (क) । पचाद्यच् । किं कृत्वा । महेशानं नमस्कृत्य । महांश्चासावीशानश्चेति महेशानः शम्भुस्तम् । सहादित्वान्महच्छब्दस्य महादेशः । ईष्टे इतीशानः । कर्तरि शानः ॥ नमस्कृत्येति ॥ पूर्वकाले क्त्वेति क्त्वास्थाने समासे क्यबिति भावे क्यप् । वाचस्पत्यादित्वाद्विसर्गस्य सः । महेशानमिति । अनुक्तत्वात्कर्मणि द्वितीया । एककर्तृकयोर्द्वयोः कृत्ययोः कर्तरि प्रथमाऽस्ति । विशेष्यया आख्यातक्रियया कर्तुरुक्तत्वात् । 'गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः' इति न्यायादाख्यातक्रियया कर्तुरभिसंबन्धः ॥ ननु महेशानमित्यत्र 'नमआदियोगे' इति चतुर्थी स्यात् । मैवं वद । नमस्करोति देवानित्यत्रेव द्वितीयैव युक्ता । 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इत्युक्तत्वात् । स्वयंभुवे नमस्कृत्येत्यत्र तु स्वयंभुवमनुकूलयितुमित्यर्थविवक्षायां 'तुमोऽप्रयुक्तस्य कर्मणि' इत्यनेन चतुर्थी । किं च जहत्स्वार्थावृत्तिपक्षे नमःशब्दस्यात्र निरर्थकत्वान्नमोयोगे चतुर्थी न भवति 'अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्' इत्युक्तत्वात् (ख) । पुनः किं कृत्वा । पतञ्जलेर्मतं बुद्ध्वा ज्ञात्वा । पतञ्जलिना मन्यते यत्तन्मतम् । 'मतिबुद्धि' इति वर्तमाने कर्मणि क्तः । वर्तमानाधारार्थस्य क्तस्य इत्यनेन पतञ्जलेरिति कर्तरि षष्ठी । 'बुध अवगमने' भावे क्त्वाप्रत्ययः । पतन्तोऽञ्जलयो यस्मिन् स पतञ्जलिः शेषनागः। तस्य पतञ्जलेः । 'हलादेरीषादौ' इति टिलोपः । किंच "आसनं ब्रह्मणस्तस्य तपसामुत्तमं तपः ॥ प्रथमं छन्दसामङ्गमाहुर्व्याकरणं बुधाः ॥ १ ॥ अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम् ॥ तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते" ॥२॥ इत्युक्तत्वात्सर्वत उत्तमं व्याकरणम् । तद्व्याकरणं सूत्रम् , सूत्रव्याख्यानम् , वाक्याध्याहारः, उदाहरणम् , प्रत्युदाहरणं चेति समुदितं भवति । तस्यैकदेशः सूत्रम् । तद्व्याख्यानं पञ्चधा । यथा—'पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना । आक्षेपस्य समाधानं व्याख्यानं पञ्चधा स्मृतम्' इति ॥

तत्त्वदीपिका ।

प्रणम्य जगतां नाथं महेशं साम्बमव्ययम् ॥
सिद्धान्तचन्द्रिकाव्याख्या क्रियते तत्त्वदीपिका ॥ १ ॥

प्रारिप्सितनिरन्तरायपरिसमाप्तये विहितं मङ्गलं शिष्यशिक्षायै निबध्नन् चिकीर्षितं प्रतिजानीते । नमस्कृत्येत्यादिना ॥ अहं रामचन्द्राश्रमः वाणीप्रणीतसूत्राणां सिद्धान्तचन्द्रिकां कुर्वे । किं कृत्वा । महेशानं नमस्कृत्य । पुनः पतञ्जलेर्मतं बुद्ध्वेत्यन्वयः । नमो नतिं कृत्वा इति नमस्कृत्य । कृञः 'समासे क्यप्' इति पूर्वकाले क्यप् । ह्रस्वस्येति तुक् । वाचस्पत्यादित्वाद्विसर्गस्य सः । नतिजन्यप्रीत्याश्रयत्वेन महेशानस्य कर्मत्वम् । ईष्टे इति ईशानः । ईश ऐश्वर्ये । शतृशानाविति शानप्रत्ययः । शिति चतुर्वदिति चतुर्वत्त्वादप् कर्तरीत्यप् । तस्यादादेरिति लुक् । ईशानाः सातिशयाः बहवः सन्ति तद्व्यावृत्त्यर्थं विशेषणं महांश्चासावीशानश्चेति महेशानः । सहादित्वान्महत आत्वम् । सर्वापेक्षयोत्तमो यः

(क) तदुक्तम्—'लघूनि सूचितार्थानि स्वल्पाक्षरपादानि च, सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः ।
'अल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखं । अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः' इति च ।

(ख) शक्यावृत्तिधर्मावच्छिन्नलक्षणा जहत्स्वार्था ।

परमेश्वरस्तम् । अनेन व्याकरणस्य सिद्धान्तः सूचितः । ध्वनिविशेषावच्छिन्नं ब्रह्मैव प्रतिपाद्यमिति । मन्यते इति मतम् । मतिबुद्धिपूजार्थेभ्यश्चेति वर्तमाने मन्यतेः कर्मणि क्तः । इच्छाविषयभूतं ज्ञानविषयभूतं वा बुद्ध्वा ज्ञात्वेत्यर्थः । बुध अवगमने । पूर्वकाले क्त्वा । पूर्वकालत्वञ्च क्त्वाल्यपोः कुर्वेक्रियापेक्षया । खले कपोतन्यायेन द्वयोस्तत्र सम्बन्धः (क)। विशेषणानां परस्परं संबन्धानभ्युपगमात्, आख्यातान्तवाच्यायाः क्रियाया विशेष्यत्वस्वीकारात् । पतन्नञ्जलिर्यस्मिन् सर्वेषां नमस्कार्यत्वात् पतञ्जलिः तस्य पतञ्जलेरिति । मननक्रियाऽपेक्षया कर्तृकार्ययोरिति कर्तरि षष्ठी । न क्तादाविति निषेधः क्तस्य स निषेधो न तु तकः । अनेन प्रक्रियामात्रं दृष्ट्वाऽयं ग्रन्थो न द्रष्टव्यः, किन्तु भाष्यपर्यन्तं ज्ञात्वेति सूचितम् । वणति वेदशब्दमुच्चारयति इति वणो ब्रह्मा । 'वण शब्दे' पचाद्यच् । तस्येयं शक्तिर्वाणी सरस्वती । 'देवतेदमर्थे' इत्यण् । ङीप् । यद्वा वाणयति सर्वान् जीवान् शब्दोच्चारणे प्रेरयतीति ण्यन्तात्पचाद्यच् । नदादेरिति ङीप् । प्रणीयन्ते इति प्रणीतानि । णीञः कर्मणि क्तः । वाण्या प्रणीतानि वाणीप्रणीतानि । अमादाविति तत्पुरुषः । सोव्यन्तेऽन्तर्भाव्यन्ते अस्मिन्नर्था यैस्तानि सूत्राणि । षिवु तन्तुसन्ताने । सिवेरुच्चेत्यौणादिकष्ट्रन्प्रत्ययः । यद्वा सूत्रयन्ति वेष्टयन्ति अल्पाक्षरैर्बहूनर्थानिति सूत्राणि । 'सूत्र वेष्टने' चुरादिः । पचाद्यच् । अल्पाक्षरैर्बह्वर्थसूचकानि । वाणीप्रणीतानि च तानि सूत्राणि चेति कर्मधारयस्तेषाम् । संबन्धसामान्ये षष्ठी । कुर्वे इति कृञो वर्तमाने ञित्त्वादात्मनेपदम् । उत्तमपुरुषस्यैकवचनम् । तनादेरुप् । गुणः । ङित्यदुरित्युत्वम् । य्वो र्विहस इति दीर्घस्तु न संभवति संज्ञापूर्वकत्वात् । संज्ञापूर्वको विधिरनित्यः । द्विमात्रो दीर्घ इति संज्ञा । असेधीदिति सिद्धः । षिधू शास्त्रादौ । गत्यर्थेति क्तः । सिद्धो निष्पन्नोऽन्तो निश्चयोऽत्रेति सिद्धान्तः । अन्यार्थे बहुव्रीहिः । चन्द्रोऽस्त्याश्रयत्वेनास्या इति चन्द्रिका । अङ्कादितीकः । सिद्धान्तानां चन्द्रिका सिद्धान्तचन्द्रिका । सा यथा कुमुदानां प्रकाशिका तथेयं सरस्वतीसूत्रार्थप्रकाशिकेति सादृश्याद्गौणप्रयोगः । सिद्धान्तशब्दः सम्बन्धित्वात्सूत्राणामिति विशेषणसापेक्षोऽपि चन्द्रिकाशब्देन समस्यते । देवदत्तस्य गुरुकुलमित्यत्र गुरुशब्दो यथा । एतेन पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति नियमात्सूत्रशब्दस्य कथं सिद्धान्तशब्देनान्वय इत्युक्तिः परास्ता । वस्तुतस्तु साकाङ्क्षत्वनिराकाङ्क्षत्वे एवान्वयानन्वयप्रयोजके न तु पदार्थत्वतदेकदेशत्वे । ननु नमस्कृत्य महेशानमित्यत्र नमःस्वस्तीत्यादियोगे चतुर्थीति सूत्रेण चतुर्थ्या भवितव्यमिति चेन्न, उपपदविभक्तेः कारकविभक्तिर्बलीयसीति वचनात् द्वितीयैव । अथ कथं स्वयंभुवे नमस्कृत्येति चतुर्थीति चेत्स्वयंभुवमनुकूलयितुमित्यर्थे तुमोऽप्रयुक्तस्य कर्मणीति कर्मणि चतुर्थीदर्शनादित्यवेहि । यत्तु कुर्वे इत्यत्र आत्मगामिफलाभावात्कथमात्मनेपदमित्याशङ्क्य ग्रन्थकरणोत्पन्नपुण्यस्य दानफलवदात्मगामित्वात्मनेपदमिति समाहितं तन्न, आत्मगामि चेत्फलमात्मनेपदं परगामि चेत्फलं परस्मैपदमित्यस्या सार्वत्रिकत्वात् । तथा च मयूरभट्टः 'कमलवनोद्घाटनं कुर्वते ये ।' मयूखा इति शेषः । कमलवनोद्घाटनरूपफलस्य कर्तृभूतमयूखगामित्वेपि कुर्वते इत्यात्मनेपदमुदाजहार ॥ १ ॥

(क) न्यायो यथा—वृद्धा युवानः शिशवः कपोताः खले यथामी युगपत्पतन्ति ।
तथैव सर्वे युगपत्पदार्थाः परस्परेणान्वयिनो भवन्तीति ॥

अथ संज्ञाप्रकरणम् ॥ १ ॥

(अइउऋऌ समानाः) अनेन क्रमेणैते वर्णा ज्ञेयाः । ते च समानसंज्ञाः स्युः ॥ नैतेषु सूत्रेषु संधिरनुसंधेयोऽविवक्षितत्वात् । विवक्षितस्तु संधिर्भवतीति नियमात् ॥ १ ॥

(सु०) अइउऋऌ समानाः । संज्ञासूत्रमिदम् । आद्यन्ताभ्यामित्यनेन संज्ञाविधायकसूत्रेण सहैकवाक्यत्वात् । तेनावेल इत्यादिप्रत्याहारसंज्ञा सिध्यति । अत्राकारादिष्वर्थवत्त्वे सत्स्वपि स्वरूपग्रहणस्येष्टत्वेनार्थवत्त्वस्याविवक्षितत्वमस्ति । अर्थवत्त्वाभावान्न प्रातिपदिकसंज्ञा (क) । प्रातिपदिकत्वाभावान्न स्यादिविभक्त्युत्पत्तिः । अविभक्तिकानां समासो न भवति पदानामेव समास इत्युक्तत्वात् । समासाभावाद्वाक्यमात्रतः साङ्केतिकं षट्पदमिदं सूत्रम् (ख) ॥ ननु संधिः कथं न कृतः । उच्यते । वर्णानामसंदिग्धत्वेन बोधनायाविवक्षितत्वादेतेष्वसंधिः । उक्तं च—"संहितैकपदे नित्या नित्या धातूपसर्गयोः ॥ नित्या समासे वाक्ये तु सा विवक्षामपेक्षते" ॥ १ ॥ इति ॥ संहिताऽत्र संधिः । एकमेव पदमित्येकपदम् , तत्र संहिता नित्या । यथा । देवौ ॥ धातूपसर्गयोरुभयोः संहिता नित्या । प्रेक्ष्यते ॥ समासे संहिता नित्या अवान्तरपदविभागाभावात् समासे ह्येकपदत्वात् । यथा देवेन्द्रः ॥ सा संहिता वाक्ये विवक्षां वक्तुमिच्छामपेक्षते । यथा 'हे रोहिणि त्वमसि शीलवतीषु धन्या एनं निवारय पतिं सखि दुर्विनीतम् ।' इत्यादिषु विवक्षाधिना संहिता ज्ञेया (ग) । तेन वाक्ये विवक्षितः संधिर्भवति न त्वविवक्षित इति ॥ स्वराणां चादिषु पाठान्निपातसंज्ञा । ओ निपात इति प्रकृतिभावान्न संधिरित्यन्ये वदन्ति ॥ ननु वर्णात्कारः इत्यनेनैभ्यः कारप्रत्ययः कथं न स्यात् । उच्यते । वार्तिकं दृष्ट्वा सूत्रकृतः प्रवृत्त्यसंभवान्न कारप्रत्ययः । ननुअकाराद्युपदेशेन यथा तत्सवर्णानामाकारादीनां लाभात्पृथगाकारादयो नोपदिष्टास्तथा ऋऌवर्णयोरपि सावर्ण्यात् ऋकारोपदेशेनैवोभयग्रहणसिद्धेः किं पृथगुपदेशः । उच्यते । ऋऌवर्णयोः सावर्ण्यस्यानित्यतां ज्ञापयितुमुभयोरुद्देशः । तत्फलं तु क्लृप्ता शिखा यस्य स क्लृप्तशिखस्तस्य दूरात्संबोधने क्लृप्तशिखेत्यत्र प्लुतभञ्जनम् । ऋऌवर्णयोः सावर्ण्यस्य नित्यत्वे तु गुरोरनृतोऽनन्त्यस्याप्यीत्यत्रानृत इति निषाधाहकारस्येव ऌकारस्यापि प्लुतो न स्यादित्यर्थः । इदं सूत्रं कार्यद्वयं वक्ति । तत्किम् । अकारादिक्रमं तेषां समानसंज्ञां च । समानं मानं परिमाणं येषां ते समानाः । समानशब्दः संज्ञा । अकारादयः संज्ञिन इति । इह प्रत्येकमकारादीनां संज्ञा न समुदायस्य तस्य युगपल्लक्ष्ये

(क) अर्थवत्त्व । वासुदेवादिरूपार्थयुक्तेष्वित्यर्थः । न प्रातिपदिकसंज्ञा । न नामसंज्ञा प्रातिपदिकत्वाभावान्न स्यादिविभक्तिरित्यत्र मानं तु 'तस्मादिस् औ जस्' इत्यादि ।

(ख) 'सूत्रे विभक्तिर्नैवास्ति वृत्तौ सा यत्र दृश्यते, एकद्विबहुवाक्येषु तत्साङ्केतिकमुच्यते' । वस्तुतस्तु अनुभूतार्थयोगित्वं साङ्केतिकत्वम् ।

(ग) सम्पूर्णश्लोको यथा—

हे रोहिणि त्वमसि शीलवतीषु धन्या एनं निवारय पतिं सखि दुर्विनीतम् ।
जालान्तरेण मम वासगृहं प्रविश्य श्रोणीतटं स्पृशति किं कुलधर्म एषः ॥ इति ॥

प्रयोगाभावात् । समानसंज्ञाप्रदेशाः समानाद्वेर्लोपो धातोरित्यादयः । किंच एतेषूक्तवक्ष्यमाणेषु सूत्रेषु संधिः संहिता नानुसंधेयो न कर्तव्यः । कस्मात् वक्तुमिच्छा विवक्षा विवक्षा जाताऽस्येति विवक्षितः । वक्तुमिष्टो विवक्षित इति वा । विवक्षितस्य भावो विवक्षितत्वं न विवक्षितत्वमविवक्षितत्वं तस्मादविवक्षितत्वात् वक्तुरनिष्टत्वात् । तथा हि 'वाक्ये तु सा विवक्षामपेक्षते' इति ॥ १ ॥

(त०) प्रकृतोपयुक्तमाह ॥ **अइउऋऌसमानाः** ॥ अत्र प्राञ्चः । षट्पदमिदम्, *न तु द्विपदम् । द्विपदत्वे हि पूर्वपदं पञ्चवर्णात्मकम् । तथा च समाहारद्वन्द्वः । स च अश्च इश्च उश्च आ च अइउऋऌ । एवं समासे संहिता स्यादिति ।* तथा चोक्तम्—"संहितैकपदे नित्या नित्या धातूपसर्गयोः । नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥" इति ॥ समासे वाक्यत्वाभावेन विवक्षाया असम्भवादविवक्षितत्वादित्यादिकमनर्थकं संपद्येत । अतो न द्विपदमित्याहुः । वस्तुतस्तु नैतेषु संधिः सूत्रत्वादित्येव वक्तुमुचितम् । तथा च द्विपदत्वेऽपि न दोषः । उक्तं च–भोभगोअघोअपूर्वस्य योऽशीति पाणिनिसूत्रे असंधिः सौत्रः इति भट्टोजिदीक्षितैः । औ निपात इति सूत्रेण संधिविरहात् । अत्राहुः । अत्राकारादीनां स्वरूपेणानुकार्येण वाऽर्थस्य सतोऽप्यविवक्षणान्नामत्वाभावाद्विभक्त्यनुत्पादादसमासेनैकपदत्वाभावात्पञ्च पदानीति । तत्रेदमवधेयम् । पञ्च पदानीति तावद्व्याहतम् । विभक्तेरनुत्पादेन पदत्वासम्भवात् । विभक्त्यन्तं पदमिति पदसंज्ञाविधानात् । किंतु सूत्रत्वादेव विभक्तेर्लुक् । वर्णपरिगणनस्य संज्ञोपयोगित्वेन तत्पूर्वकं संज्ञाविधानमिति दर्शयति । **अनेनेति** । अमि पूर्वं इत्यादावविवार्थद्वयकथनेन विभागः ॥ १ ॥

(**ह्रस्वदीर्घप्लुतभेदाः सवर्णाः**) एतेषां ह्रस्वदीर्घप्लुताः सजातीयाः परस्परं सवर्णा भण्यन्ते (क) ॥ २ ॥

(छ०) **ह्रस्वदीर्घप्लुतभेदाः सवर्णाः** ॥ एतेषाम् अइउऋऌवर्णानां ये भेदा विशेषव्यक्तयो ह्रस्वदीर्घप्लुतरूपाः सजातीयाः समाना चासौ जातिश्च सजातिः सहादित्वात्समानस्य सादेशः सजातौ भवाः सजातीयास्ते मिथः सवर्णसंज्ञका आचार्येण कथ्यन्ते ॥ ह्रस्वश्च दीर्घश्च प्लुतश्च ते ह्रस्वदीर्घप्लुताः ह्रस्वदीर्घप्लुताश्च ते भेदाश्च ह्रस्वदीर्घप्लुतभेदाः जातिस्थानाभ्यां समानाः वर्णाः सहादित्वात्समानस्य सः ॥ २ ॥

(त०) **ह्रस्वदीर्घप्लुतभेदा इति** ॥ ह्रस्वश्च दीर्घश्च प्लुतश्च तेषां ये भेदा उदात्तादयस्तेषां सवर्णसंज्ञा इत्यर्थः ॥ ह्रस्वादिभिर्भेदशब्दस्य कर्मधारयो वा । यत्तु वासुदेवेन ह्रस्वादिभेदान्तस्य द्वन्द्वं कृत्वा व्याख्यातं तदसत् । अनन्तरग्रहणस्य वैयर्थ्यप्रसङ्गात् ॥ **एतेषामिति** ॥ अनन्तरोक्तानाम् । अइउऋऌवर्णानामेवाङ्गुल्या निर्देशः । समानो वर्णो येषां ते सवर्णा इत्यन्वर्थसंज्ञाश्रयणात्सजातीया इति । तथा चाकारस्याकारेणैव सावर्ण्यं न तु विजातीयैरीकारादिभिरिति बोध्यम् ॥ ननु अन्वर्थसंज्ञाबलादेवात्र सवर्णसंज्ञासिद्धौ तद्वि-

(क) ननु परिगणितानां पञ्चानामेव समानत्वे गङ्गानामित्यादौ दीर्घवर्णादीनां समानकार्यं न स्यादित्यतः सूत्रान्तरमवतारयति—**ह्रस्वदीर्घप्लुतभेदा इति** । एवञ्च हरये इत्यादौ दीर्घत्वाप्रसङ्गः । समानो वर्णो धर्मो येषां ते सवर्णा इति अन्वर्थसंज्ञातः सजातीया इति लब्धम् । वृद्धकुमारीवरन्यायाद्ध्रस्वादिसंज्ञालाभः ।

धायकं सूत्रं किमर्थमिति चेन्न । सन्ध्यक्षराणामप्यन्वर्थसंज्ञया सवर्णसंज्ञा स्यादिति तन्निरासार्थमिदं सूत्रम् । यदि त्वैऔ इति पृथग्निर्देशो ज्ञापकस्तदेदं मन्दप्रयोजनम् ॥ २ ॥

(ऋऌवर्णौ च) एकमात्रो ह्रस्वः । द्विमात्रो दीर्घः । त्रिमात्रः प्लुतः (क) ॥ ३ ॥

(सुबो०) ऋऌवर्णौ च ॥ जातिस्थानाभ्यां भिन्नत्वेन सावर्ण्याप्राप्तौ विध्यर्थवचनम् । पदान्तानां समानानामिति प्रकृतिभावः । एतावपि सवर्णसंज्ञकावाचार्येण कथ्येते । सवर्णसंज्ञाप्रदेशाः सवर्णे दीर्घः सहेत्यादयः ॥ तेषां भेदानाह ॥ एकमात्रो ह्रस्व इति ॥ मात्राशब्देनाक्षिस्पन्दनप्रमाणः काल उच्यते । "मात्रं त्ववधृतौ स्वार्थे कात्स्न्ये मात्रा परिच्छदे । अक्षरावयवे द्रव्ये मानेऽल्पे कर्णभूषणे ॥ काले वृत्ते च" इति हेमचन्द्रः । एका मात्रोच्चारणकालो यस्य स एकमात्रो ह्रस्वसंज्ञः कथ्यते । ह्रसति ह्रसते वा दीर्घापेक्षयेति ह्रस्वः ॥ द्विमात्रो दीर्घः । द्वे मात्रे उच्चारणकालो यस्य स द्विमात्रो दीर्घसंज्ञः कथ्यते । दृणाति दीर्यते वा मुखमिति दीर्घः । त्रिमात्रः प्लुतः ॥ तिस्रो मात्रा उच्चारणकालो यस्य स त्रिमात्रः प्लुतसंज्ञः कथ्यते । प्लवते लङ्घते ह्रस्वदीर्घाविति प्लुतः ॥ ३ ॥

(त०) ऋऌवर्णाविति ॥ आ च आ च ऋऌौ तौ च तौ वर्णाविति । यद्वा आ च ऌवर्णश्च तौ ॥ ननु ऋऌवर्णावित्यनेनैव ऋवर्णऌवर्णयोः सावर्ण्यादेव ऋकारोपदेशेनैव ऌकारोपदेशे सिद्धे 'अइउऋऌ समानाः' इति सूत्रे ऌकारग्रहणं व्यर्थमिति चेत्सत्यम् । ऋवर्णऌवर्णयोः सावर्ण्यस्यानित्यत्वज्ञापनाय पृथक् ऌकारग्रहणम् इत्यवधेयम् । तत्फलं तु 'हे क्लृप्तशिख' इत्यत्र 'गुरोरनृतः' इत्यनेन प्लुतत्वे कर्तव्ये ऋकारपर्युदासेन ऌकारस्य न पर्युदासः । ह्रस्वादिसंज्ञाश्च लोकप्रसिद्धा इत्याह ॥ एकमात्र इति ॥ मीयते इति मात्रा उच्चारणकालः । एका मात्रा यस्येति विग्रहः । एवमन्यदपि ॥ ३ ॥

(एऐओऔ संध्यक्षराणि (ख) ॥ ४ ॥

(सुबो०) एऐ ओऔ संध्यक्षराणि ॥ पूर्ववद्वाक्यत्वात्पञ्चपदमिदं सूत्रम् ॥ अत्रापि संध्यभावोऽविवक्षितत्वात् । इदमपि कार्यद्वयं वक्ति । तत्किम् ॥ एकारादिक्रमं संध्यक्षरसंज्ञां च । संधौ जातान्यक्षराणि संध्यक्षराणि । संध्यक्षरसंज्ञाप्रदेशाः संध्यक्षराणामित्यादयः ॥ ४ ॥

(त०) एऐओऔ संध्यक्षराणीति ॥ ननु सन्धेर्जातान्यक्षराणि सन्ध्यक्षराणीत्यन्वर्थसंज्ञाबलादेव सन्ध्यक्षरसंज्ञासिद्धौ तत्संज्ञाविधायकं सूत्रं व्यर्थमिति चेन्न । यकारादीनामपि सन्धिजत्वाविशेषेण सन्ध्यक्षरसंज्ञा स्यादिति तन्निरासार्थमिदं सूत्रम् । एषु च

(क) तदुक्तम्—"एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते, त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्द्धमात्रकम्" इति ॥ अपि च—"चाषस्तु वदते मात्रां द्वितीयां वायसोऽब्रवीत् । तृतीयान्तु शिखी ब्रूयान्नकुलश्चार्धमात्रकम्" इति ॥ पाणिनिनाप्युक्तम्—ऊकालोऽज्झ्रस्वदीर्घप्लुत इति ॥ अयमर्थः—उश्च ऊश्च ऊ ३श्च वः वां काल इव कालो यस्य सोऽच् क्रमाद्ध्रस्वदीर्घप्लुतसंज्ञः स्यादिति । ऊशब्दोऽत्र कुक्कुटरुतानुकरणम् ॥

(ख) सन्धेर्जातानीवाक्षराणि सन्ध्यक्षराणीति योगरूढ्या पङ्कजादिवदवयवव्युत्पत्तिसद्भावादन्वर्थता । अतो नाकारादिसंकरः । द्विमात्रत्वेनैषां संध्यक्षराणां ह्रस्वाः न सन्ति । किन्तु दीर्घप्लुतोदात्तादयो भेदाः सन्ति ॥

भागद्वयसत्त्वेऽपि नरसिंहवत् जात्यन्तराक्रान्तत्वेन न भागकार्यम् (क) तेनाग्ने इदं 'वायो उदकमित्यत्र सवर्णदीर्घत्वं न । अत्र वर्णपरिगणनसंज्ञाविधानरूपकार्यद्वयस्य वृद्धकुमारीवरन्यायेन सिद्धेर्न वाक्यद्वयम् । एवं पूर्वसूत्रेऽपि बोध्यम् ॥ ४ ॥

(उभये स्वराः) अकारादय एकारादयश्च स्वरा उच्यन्ते ॥५॥

(सु०) उभये स्वराः । उभाववयवौ येषां ते उभये तयडयटौ सङ्ख्याया अवयवे इत्ययट् । "स्वरो नासासमीरे स्यान्मध्यमादिस्त्रिकस्वरे । उदात्तादावकारादौ षड्जादौ च ध्वनौ पुमान् ॥"इत्याद्यकारादिभिन्नार्थान्तरवारणायेदम् (ख) । ह्रस्वदीर्घप्लुता भेदा विशेषव्यक्तयो येषां ते ह्रस्वदीर्घप्लुतभेदाः एतादृशा अकारादय एकारादयश्चाचार्येण स्वरसंज्ञकाः कथ्यन्ते । स्वयं राजन्ते शोभन्ते इति स्वराः । 'राजृ दीप्तौ' अस्माद्नाम्नीति डप्रत्ययः । एकाकिनोऽपि प्रायोऽर्थप्रतिपादने समर्था इत्यर्थः ॥ स्वरा इति बहुवचनं तु प्रत्येकं संज्ञाविधानार्थं ज्ञेयम् । ननु 'उभये' इति ग्रहणं व्यर्थम् । अकारादीनामेकारादीनां चानुवृत्त्यैव लब्धत्वात् । उच्यते । 'अनन्तरस्य विधिर्वा प्रतिषेधो वा' इति न्यायोऽनेन ज्ञाप्यते । अनन्तरत्वादेकारादीनामेवानुवृत्तिः स्यात् न त्वकारादीनामन्तरितत्वादिति । स्वरसंज्ञाप्रदेशाः 'इ यं स्वरे' इत्यादयः ॥ ५ ॥

(त०) उभय इति ॥ ननु ते स्वरा इत्येव किमिति न सूत्रितम् , तच्छब्दस्य पूर्वपरामर्शित्वेनाकारादीनामेव लाभादिति चेन्न अनन्तरोक्तसन्ध्यक्षराणामेव तच्छब्देन परामर्शः स्यादिति शङ्काया निवृत्तये उभयग्रहणस्यावश्यकत्वात् । यद्वा स्वरा इत्येवास्तु अकारादीनामनुवृत्त्यैव लाभादिति चेन्न उक्तयुक्तेः । यदि तूत्तरसूत्रेऽवर्णपर्युदासेनाकाराद्यनुवृत्तिस्तदोभयग्रहणे सर्वादिप्रयोजनार्थमेवेति ध्येयम् । बहुवचनं प्रत्येकसंज्ञार्थमपि त्यक्तुमुचितं समुदायस्य युगपल्लक्ष्ये प्रयोगाभावादेव तल्लाभात् । एवं पूर्वोत्तरसूत्रेष्वपि बोध्यम् । यत्तु अकारादयः पञ्च चत्वार एकारादय इति तन्न अकारादिषु न्यूनाधिकसंख्याया असम्भवेन तद्ग्रहणस्यानर्थकत्वात् ॥ ५ ॥

(अवर्जा नामिनः) अवर्णवर्जाः स्वरा नामिन उच्यन्ते (ग) ॥६॥

(क) एषु सन्ध्यक्षरस्वरेष्वित्यर्थः । भागद्वयसत्त्वेऽपीति । एकारे एकोऽकारभाग एक इकारभागश्च तथैवैकारौकारादिषु । नरसिंहवदिति । कल्पभेदेन नृसिंहशरीरस्य नानात्वेन नरसिंहजातिसिद्धिः । सन्ध्यक्षराणां प्रत्येकं भिन्नतया तथैव जात्यन्तरत्वम् ॥

(ख) अयमत्राशयः—'स्वरो नासासमीरे स्यादिति' कोषप्रमाणेन स्वरशब्दार्थबोधेऽपि बह्वर्थवाचकतया 'उभये स्वराः' इति विशेषं निर्दिश्योक्तम् । तथा चात्र स्वरपदेनाकारादीनां ग्रहणम् । न तु नासासमीरादिरूपस्यार्थस्य ।

(ग) नन्वत्र किमर्थमवर्जा इत्युक्तम् । उच्यते । अवर्णस्य नामिसंज्ञावारणायेति । अवर्णस्य नामिसंज्ञायां सत्यां को दोष इति चेत् । देव इहेत्यादौ 'नामिनो रः' इति रः स्यात् । अनवकाशेन 'आदवे लोपश्' इति लोपशासौ रत्वविधिर्बाध्यते इति चेत् । कुले इत्यत्र 'नामिनः स्वरे' इति नुम् प्रसङ्गादवर्जा इत्युक्तम् ।

अत्र केचित्-चतुर्दशस्वराः, दश समानाः, द्वादशनामिन इत्याहुः । तदयुक्तम् । उभयशब्दस्य सर्वनामत्वात् तेषां च बुद्धिस्थप्रकारवाचित्वात् पूर्वोक्तसमानसंज्ञकपञ्चवर्णसन्ध्यक्षरसंज्ञकचतुर्वर्णपरामर्शकत्वेन वृत्तिकृद्व्याख्यानात्, तदभेदनामुपादानाच्चतुर्दशत्वे द्वादशत्वेऽपरभेदपरित्यागे मानाभावात् । तस्मात् पञ्चसमाना नव स्वरा अष्टौ नामिन तत्तद्भेदाश्च तत्तत्संज्ञका । इति प्रसादकृत् ॥

(सु०) **अवर्जा नामिनः** ॥ अश्च आश्च तयोः समाहारः अमिति केचित्तन्मन्दम् । अ इत्यनेनात्वजातेरेवाभिमतत्वात् । अं वर्जयन्तीत्यवर्जाः "वृजी वर्जने" चुरादिः । अस्मात् कार्येऽणित्यण्प्रत्ययः । पूर्वसूत्रादुभये इत्यनुवर्तनीयम् । अवर्णवर्जा उभये इकारादय एकारादयश्च स्वरा नामिसंज्ञका आचार्येण कथ्यन्ते ॥ नमनं नामः। भावे घञ् । नामोऽस्यास्तीति नामी । नामिसंज्ञाप्रदेशा 'नामिनो रः' इत्यादयः । किं च स ह्रस्वदीर्घप्लुतरूपस्वरः प्रत्येकमुदात्तादिभेदेन त्रिधाऽस्ति । ह्रस्वस्वर उदात्तः १ ह्रस्वस्वरोऽनुदात्तः २ ह्रस्वस्वरः स्वरितः ३ । दीर्घस्वर उदात्तः १ दीर्घस्वरोऽनुदात्तः २ दीर्घस्वरः स्वरितः ३। प्लुतस्वर उदात्तः १ प्लुतस्वरोऽनुदात्तः २ प्लुतस्वरः स्वरितः ३ । एवं नवविधोऽपि प्रत्येकमनुनासिकाननुनासिकभेदाभ्यां पुनः स द्विधाऽस्ति । तदित्थम् । अ इ उ ऋ एषां चतुर्णां वर्णानां प्रत्येकमष्टादश भेदाः सन्ति । ऌवर्णस्य द्वादश भेदास्तस्य दीर्घाभावात् । संध्यक्षराणामपि प्रत्येकं द्वादश भेदास्तेषां ह्रस्वाभावात् । अ इत्यष्टादशानां संज्ञा । तथैवेकारोकारौ । ऋकारस्त्रिंशतः संज्ञा ऋऌवर्णयोः सावर्ण्यात् । एवम् ऌकारोऽपि । ए इति द्वादशानां संज्ञा । तथैकारोकारौकाराः । एदैतोरोदौतोश्च न मिथः सावर्ण्यं भिन्नजातित्वात् ६

(त०) **अवर्जा नामिन** इति ॥ अं वर्जयतीत्यवर्जा । कार्येऽण् ॥ ननु यौ नामिन इत्येव किमिति नोक्तमौ निपात इतिवत् इकारमारभ्य औकारान्तस्य प्रत्याहारेण ग्रहणादवर्णवर्जानां लाभात् । न च इकरौकारयोः संज्ञाशङ्कानिरासाय तदिति चेन्न। पूर्वसूत्रोक्तस्वरानुवृत्त्या तन्निरासात् इति चेत्सत्यम् । नामिसंज्ञायाः पूर्वं प्रत्याहारसंज्ञाया अनुक्तत्वेन यावित्यनेनेकाराद्यौकारान्तस्वरबोधस्यानुदयात् । यदि तु व्याकरणस्यानादितामाश्रित्य प्रत्याहारादिसिद्धिस्तदैवमेव न्याय्यमित्यलं पल्लवितेन (क) ॥ ६ ॥

(हयवरल ॥ ञणनङम ॥ झढधघभ ॥ जडदगब ॥ खफछठथ ॥ चटतकप ॥ शषस ॥) (ख) ॥ ७ ॥

(सु०) हयवरल १ ञणनङम २ झढधघभ ३ जडदगब ४ खफछठथ ५ चटतकप ६ शषस ७ एतेऽपि वर्णा उक्तक्रमेणैव ज्ञेयाः । अन्यथा प्रत्याहारासिद्धेः ॥ एतानि नव संज्ञासूत्राणि सन्ति । आद्यन्ताभ्यामित्यनेनैकवाक्यत्वात् । एषां वर्णानामर्थस्याविवक्षितत्वादेभ्यो विभक्तेरनुत्पत्तिर्ज्ञेया । किं च सवर्णा इत्यनुवर्त्य वाक्यभेदेन व्याख्यातव्यम् ।

(क) वस्तुतस्तु यौ नामिन इत्युक्तौ सन्देहो भवति किं 'य' इत्यस्य, अकारादारभ्यौकारान्तरस्य प्रत्याहारस्य च नामिसंज्ञास्ति, अथवा यथाविहितस्येति भ्रान्तिनिरासाय 'अवर्जा नामिन' इत्युक्तम् ॥

(ख) **हयवरल इत्यादीति** । अयं व्यञ्जनानामनुक्रमः । एष्वकार उच्चारणार्थः । अनेन क्रमेणै, ते वर्णा ज्ञेयाः इहापि पूर्ववद्विभक्त्यनुपपत्तिः॥ **माधवस्तु**।-इहाप्यर्थस्याविवक्षितत्वाद्विभक्तेरनुत्पत्तिर्लुग्वा छान्दसः । एवं सर्वत्राप्यविभक्तिको निर्देशो ज्ञेयः, इत्याह-संज्ञासूत्राण्येतानि।आद्यन्ताभ्याम्' इत्यनेनैकवाक्यत्वात् अवावद्वेलेषु ग्रहणमादौ हकारोपदेशस्य फलम् ॥

सारस्वतव्याकरणे उक्तम्-"प्रत्याहाराणां संख्यानियमो नास्तीति ॥ प्रतिकार्य्यमाहरणात्कार्य्याणामानन्त्याच्च नियमाभाव इत्यर्थः ॥ केचिदिदमेवं व्याख्यानं चक्रुः—अनियमः आनन्त्यं नास्ति विंशतित्वेन नियमात् । तदुक्तम्-"अवतल एकैकस्माद्द्वाभ्यां मः स्यात्पबौ चतुर्भ्यस्तः ॥ स षड्भ्यः स्यादित्थं प्रत्याहाराश्च विंशतिर्ज्ञेयाः ॥" इति॥ तथाहि-अस् अत्, छत् , इल् , यम् , ञम् , कप् , चप् , खप् , यप् , अव्, हव् , झव् , जव् , झस् , हस् , वस् , रस् , शस् , खस् , इति ॥

तद्यथा । भिन्नजातीया अप्येते वर्णास्तुल्यस्थानप्रयत्नाः सन्तः सवर्णा आचार्येण कथ्यन्ते इत्यर्थः ॥ हकारादिष्वकार उच्चारणार्थः ॥ न तु प्रयोजनार्थः ॥ ननु रेफस्य यपप्रत्याहारान्तर्भावात् कुण्डं रथेनेत्यादौ वा पदान्तस्येति पक्षे रेफः स्यात् । भद्रहृद इत्यत्र रहाद्यपो द्विरित्यनेन रस्य द्वित्वे कृते रि लोपो दीर्घश्चेति रलोपे च पूर्वस्य हकारस्य स्वरत्वाभावान्न दीर्घ इति । कुण्डं रथेनेत्यत्र त्वनुनासिकस्यानुस्वारस्य स्थानेऽनुनासिका एव यमा भवन्ति इत्यर्थकथनात् रेफस्याननुनासिकत्वादनुनासिकस्यानुस्वारस्य रकारो न भवतीत्यर्थः (क)।७।

(त०) हयवरलेत्यादि ॥ हकारादिष्वकार उच्चारणार्थः ॥ ७ ॥

(आद्यन्ताभ्याम्) आद्यन्तौ वर्णौ मध्यगानामाभ्यां सहितानां संज्ञाः स्युः ॥ अव इल जब झभ चप । एवमन्येऽपि ॥ ८ ॥

(सु०) **आद्यन्ताभ्याम्** ॥ संज्ञासूत्रमेतत् । आदिश्च अन्तश्च आद्यन्तौ ताभ्याम् आद्यन्ताभ्यां कृत्वा मध्यस्था अक्षरा ग्राह्या इत्युक्तेः आद्यन्तवर्णरूपा मध्यगानां संज्ञा भवतीत्याद्यन्तयोरप्राप्तायां तत्र वृत्त्यन्तरस्य ग्रहणमाश्रित्य व्याख्येयम् । तद्यथा । आद्यन्ताभ्यां सहितानामिति । किंच आद्यन्तौ तावदवयवौ ताभ्यामवयवी समुदाय आक्षिप्यते । तस्य च युगपल्लक्ष्ये प्रयोगाभावात्तदवयवेष्ववतरन्ती संज्ञा मध्यगेषु विश्राम्यति न त्वाद्यन्तयोः । संज्ञास्वरूपान्तर्भावेन तयोः पारार्थ्यनिर्णयादित्याशयेनाह ॥ **आभ्यां सहितानामिति** ॥ आद्यन्ताभ्यां वर्णाभ्यां सहितानां मध्यगानामाद्यन्तवर्णरूपाः संज्ञा भवन्तीत्यर्थः ॥ एतत्सूत्रेण कृताः संज्ञाः प्रत्याहारशब्देन व्यवह्रियन्ते । प्रत्याह्रीयन्ते संक्षिप्यन्ते वर्णा यत्र स प्रत्याहारः । साधनाधारयोर्युडिति युटि प्राप्ते संज्ञायामकर्तरि चेति अधिकरणे घञ् प्रत्ययः ॥ ८ ॥

(त०) **आद्यन्ताभ्यामिति** ॥ आदिश्च अन्तश्च आद्यन्तौ । आवादेशे वकारस्य 'य्वोर्लोपश्' इति सूत्रस्य छान्दसत्वात्पुनः संधिरित्यभिप्रेत्याह ॥ **आद्यंतौ वर्णाविति** ॥ साङ्केतिकं वा पदम् ॥ ८ ॥

(कार्यायेत्) कार्यं विधातुमुच्चार्यमाणो वर्ण इत्संज्ञो भवति ॥ या या संज्ञा सा सा फलवती । यस्येत्संज्ञा तस्य लोपः ॥ ९ ॥

(सु०) **कार्यायेत्** ॥ वर्णानामाद्योच्चारणं द्विधा । कार्यार्थं श्रवणार्थं चेति । कार्यं विधातुं कर्तुमुच्चार्यमाण आचार्येण कथ्यमानो वर्ण इत्संज्ञकोऽस्ति ॥ क्रियते संपाद्यते तत्कार्यं प्रयोजनमित्यर्थः । कार्यार्थो यथा । ङेर्ङसिङस्ङीनां ङकारो ङिति ङितां यडित्या-

---

(क) अत्रायमाशयः ।—रेफस्य यपप्रत्याहारान्तर्वर्तित्वात् कुण्डं रथेनेत्यादौ 'वापदान्तस्य' इति सूत्रे णानुनासिकस्यानुस्वारस्य स्थाने 'अस्य यपस्य सवर्णाः' इति प्रमाणेन रकारस्य परसवर्णत्वाभावेऽपिरकार एव स्यात् , इत्याशङ्का ॥ अस्योत्तरमिदम्—अनुनासिकस्यानुस्वारस्य स्थाने अनुनासिका एव यमा भवन्तीत्यर्थकथनात् रेफस्यानुनासिकत्वाभावान्नानुस्वारस्थाने रकारः । अतो रेफस्य यपप्रत्याहारान्तर्भावेऽपि न काचित् क्षतिरिति ॥ पुनराशङ्कते—भद्रहृद इत्यत्र 'रहाद्यपोद्विरि'ति सूत्रेण स्वरपूर्वाद्धकारात्परस्य रेफस्य द्वित्वं स्यात् तस्य यपप्रत्याहारान्तर्वर्तित्वमस्तीति ॥ अस्योत्तरमिदम्—रेफस्यद्वित्वे कृतेऽपि "रि लोपो दीर्घश्च" इति सूत्रेण पूर्वरफस्य लोपे कृते हकारस्य स्वरत्वाभावान्न दीर्घत्वप्रसङ्गः । अतोऽवैकृत्येन भद्रहृद इति यथाप्रकृत्येव भवतीति । एवञ्च रेफस्य यपप्रत्याहारान्तर्वर्त्तित्वविषये आशङ्कयालम् ॥

दिकार्यार्थः । श्रवणार्थो यथा । इकारादिष्वकार इति । एति गच्छतीति इत् । आशुवि-नाशीत्यर्थः । तुमोऽप्रयुक्तस्य कर्मणीत्यनेन कार्यायेति चतुर्थी ॥ ९ ॥

(त०) **कार्यायेदिति** ॥ "तुमोऽप्रयुक्तस्य कर्मणि" इति कर्मणि चतुर्थीत्याशयेनाह (क) ॥ **कार्यं विधातुमिति** ॥ यत्तु प्रत्ययाद्यतिरिक्त इति प्रत्ययादयः प्रत्ययागमादेशास्तदतिरिक्त इति तद्विवरणं च तत्सर्वमापाततः । यत्तु प्रत्ययः परस्य बोधस्तदादिकारणमुत्तमवृद्धवाक्यप्रयोगस्तदतिरिक्त इति तदपि प्रकृतानुपयुक्तत्वादुपेक्षितम् । यथाग्रहस्तदेत्थं योज्यः । प्रत्यादिषु अतिरिक्तः लौकिकः सिद्धप्रयोगोच्चारणादधिक इति कथं चित्प्राचो गन्थः ॥ **यस्येदिति** ॥ एति गच्छति प्रयोगेण समवैति 'इण् गतौ' अस्मात्क्विपि 'ह्रस्वस्य पिति कृति' इति तुक् । इत् । आशुविनाशीत्यर्थः । इदिति महासंज्ञाकरणादितो लोपः ॥ ९ ॥

(प्रसक्तादर्शनं लोपः) (ख) ॥ १० ॥

(सु०) **प्रसक्तादर्शनं लोपः** ॥ अदर्शनं सामान्यं लोप इत्यस्यार्थः । प्रसक्तानुच्चारणरूपविशेषस्तु लक्षणया ज्ञातव्यः । प्रसक्तस्य प्रसङ्गप्राप्तस्य वर्णस्यादर्शनमश्रवणमनुच्चारणं लोपसंज्ञं भवति ॥ लोपसंज्ञाप्रदेशाः 'हसेपः सेर्लोपः' इत्यादयः। लोपसंज्ञा फलं तु प्रत्ययलोपे प्रत्ययलक्षणमिति ॥ प्रसक्तस्येति किम् । दधि मध्वित्यादौ ह्रस्वस्य पिति कृति तुगिति तुक् मा भूत् । अस्ति हि तत्र क्विपोऽदर्शनम् । तच्च लोप इति प्रसक्तविशेषणाभावे प्रत्ययलक्षणेन तुक् स्यादेवेति ॥ १० ॥

(त०) लोपस्वरूपमाह ॥ **प्रसक्तेति** ॥ प्रसक्तस्य प्राप्तस्यादर्शनमनुच्चारणं लोप इत्यर्थः ॥ प्रसक्तेति किम् । दधि अत्रापि क्विपोऽनुच्चारणस्य सत्त्वात्तस्य लोपत्वे प्रत्ययलक्षणेन तुक् प्रसज्येत ॥ १० ॥

(प्रत्ययादर्शनं लुक्) ॥ ११ ॥

(सु०) **प्रत्ययादर्शनं लुक्** ॥ प्रत्ययस्यादर्शनमश्रवणमनुच्चारणं लुक्संज्ञं भवति । लुगिति पूर्वाचार्यसंज्ञा । लुक्संज्ञाप्रदेशाः 'नपुंसकात्स्यमो लुक्' इत्यादयः । लुक्संज्ञाफलं तु लुकि न तन्निमित्तमिति ॥ ११ ॥

(वर्णविरोधो लोपश्) ॥ १२ ॥

(सु०) **वर्णविरोधो लोपश्** ॥ स्वानुच्चारणप्रवृत्त्यनन्तरं कार्यान्तरप्रवृत्तिप्रतिबन्धको वर्णविरोधो लोपश्संज्ञो भवति ॥ वर्णं विरुणद्धीति वर्णविरोधः । लोपश्संज्ञाप्रदेशाः 'य्वोर्लोपश् वा पदान्ते' इत्यादयः । लोपश्संज्ञाफलं तु लोपशि पुनर्न संधिरिति । नस्य लोपशि न विभक्तिकार्यमिति च ॥ १२ ॥

(त०) लोपश्स्वरूपमाह ॥ **वर्णेति** ॥ वर्णं विरुणद्धीति स तथा । स्वप्रवृत्त्यन-

---

(क) केचित्तु कार्य्यायेति तादर्थ्ये चतुर्थीमामनन्ति ॥ तदयुक्तम् । वृत्तौ 'कार्य्यं विधातुमिति' दर्शनात् "तुमोऽप्रयुक्तस्य कर्मणी" ति कर्मणि चतुर्थ्येव भाव्या ॥

(ख) **प्रसक्तादर्शनमिति** । शब्दानुशासनप्रस्तावाच्छब्दविषयकं श्रवणमिह दर्शनं विवक्षितं दर्शनस्याभावोऽदर्शनम् । शास्त्रतः शब्दस्य कस्यचिच्छ्रवणप्रसङ्गे सति यदश्रवणम् , तल्लोपसंज्ञं स्यादित्यर्थः तदाह, **प्रसक्तेति** ॥

न्तरं कार्यान्तरप्रवृत्तिप्रतिबन्धकरूपमुच्चारणमित्यर्थः ॥ १२ ॥

(स्वरानन्तरिता हसाः संयोगः) ॥ १३ ॥

(सु०) **स्वरानन्तरिता हसाः संयोगः** ॥ अन्तर्मध्यमगुरित्यन्तरिताः, नान्तरिता अनन्तरिताः स्वरा अनन्तरिता येषां ते स्वरानन्तरिताः ॥ अथवा अन्तरमवकाशो जातो येषां तेऽन्तरिताः तद्भिन्ना अनन्तरिताः स्वरैरनन्तरिताः अव्यवहिताः स्वरानन्तरिताः । स्वररहितानां हसानां संयोगसंज्ञा भवतीत्यर्थः ॥ संयुज्यन्तेऽस्मिन् समुदाये हसा इति संयोगः । तेनात्र समुदाये वाक्यपरिसमाप्तिर्न तु गुणवृद्ध्यादिसंज्ञावत् प्रत्येकम् । यदि प्रत्येकं स्यात्तर्हि दृषद्विभर्तीत्यत्र बकारसन्निधौ दकारस्य संयोगत्वात् संयोगान्तस्य लोपः स्यात् । स्वरानन्तरिता इति किम् । पनसमित्यत्राकारेण व्यवधानेऽपि सकारमकारयोः संयोगसंज्ञा स्यात्तदा स्कोराद्योश्चेत्यनेन सस्य लोपः स्यादिति । हसा इति बहुवचनमविवक्षितं तेन द्वयोरपि संयोगसंज्ञाऽस्ति । अतः 'शिक्ष शिक्षणे' अस्माद् गुरोर्हसादित्यङ्प्रत्यये शिक्षेति सिद्ध्यति ॥ १३ ॥

(त०) **स्वरानन्तरिता** इति ॥ अन्तरम् इतः अन्तरितः न अन्तरितः अनन्तरितः स्वरोऽनन्तरितो येषां ते । अत्र स्वरशब्दः इतशब्दश्च व्यर्थः अनन्तरा इत्यनेनैव तद्बोधात् । तथा हि । न अन्तरं छिद्रं येषां ते हसाः संयोगः । छिद्रं तु विजातीयस्वरस्य प्रवेशेन भवति । संयोग इत्येकवचनं तु वृक्षा वनमितिवत्समुदायस्य संज्ञालाभार्थम् (क) ॥१३॥

(कुचुटुतुपु वर्गाः) (ख) ॥ १४ ॥

(सु०) **कुचुटुतुपुवर्गाः** ॥ एपूकारः 'उदित् सवर्णं गृह्णाति न तु वर्णमात्रम्' इति परिभाषाज्ञापनार्थः । अस्यार्थस्त्वयम् । उत् उकार इत् यस्य स उदित् स्वसवर्णस्य ग्राहको भवति । तेन चोः कुरित्युक्ते पञ्चानां ग्रहणमस्ति ॥ ननु कादीनां पञ्चानां सवर्णसंज्ञा केनेति चेच्छृणु अस्मादेवोदित्करणात् ज्ञापकाज्जानीहि । त एते वर्गसंज्ञा स्युः । वर्गसंज्ञाप्रयोजनं तु वर्ग्यो वर्ग्येण सवर्ण इति ॥ ४ ॥

(त०) **कुचुटुतुपु** इति ॥ 'अकारात्पञ्चमो वर्णस्तमाहुः पञ्चकग्रहे । उकारस्तत्र विख्यातो नान्यो भवितुमर्हति ॥" १४ ॥

(अरेदो नामिनो गुणः) अर् ए ओ गुणसंज्ञकाः ते च नामिस्थाने भवन्ति (ग) ॥ १५ ॥

(क) वृक्षाः वनमित्यत्र सर्वेषां वृक्षाणां यथा वनमिति संज्ञा तथैव स्वरानन्तरितहसानां संयोग इति संज्ञा । अत्र तु उद्देश्यविधेयभावः । उद्देश्यविधेयभावेषु न समानलिङ्गता तन्त्रं नवा समानवचनता तन्त्रमिति॥

(ख) वर्ज्यते सुखग्रहणार्थं विजातीया एषु प्रसारवर्जनाद्वा वर्गाः सजातीयवर्णसमूहाः, तद्ग्राहक इत्यर्थः । उकारः पञ्चवर्णपरिग्रहणार्थः । तदुक्तम्—अकारात्पञ्चमो वर्णस्तमाहुः पञ्चकग्रहे । उकारस्तत्र विख्यातो नान्यो भवितुमर्हति इति ॥

(ग) **अरेदो इति** ॥ तपरत्वं त्रिमात्रनिवृत्तये । तेन चेता स्तोतेत्यादौ द्विमात्र एव । 'गुणः' इत्यस्य स्थाने 'अरेदो नामिनः' इति वक्तव्ये यत्संज्ञाप्रणयनं तद्गुणविधेरनित्यत्वज्ञापनार्थम् । तेन क्षिणोतीत्यादौ पक्षे गुणाभावः सिद्ध्यति । यद्वा-अनेकप्रयोजनमुद्दिश्य संज्ञाविधानमुचितं तेन 'मिदेर्गुणः' 'उक्षेर्गुणः' इत्यादीनि प्रयोजनान्तराण्यनुमीयन्ते । लघुभाष्यकृत्त-वाक्यद्वयरीत्या व्याख्यां चकार । अरेदो गुणः' ।

(सु०) **अरेदो नामिनो गुणः** ॥ अर् च एच्च ओश्च एषां समाहारः अरेदो । समाहारस्यैकत्वादेकत्वे द्विगुद्वन्द्वाविति नपुंसकत्वेऽपि ह्रस्वो न भवत्यत्र 'संज्ञापूर्वको विधिरनित्यः' इत्युक्तत्वात् ॥ अर् ए ओ इति ॥ नामिन इति षष्ठ्यन्तमस्ति । नामिनः स्थाने गुणो भवतीत्यर्थः ॥ ननु गायति ग्लायतीत्यादौ संध्यक्षराणां गुणः स्यात् ॥ उच्यते । एकारोपदेशसामर्थ्यान्न भवति । अन्यथा एकारमेवोपदिशेत् । एकारस्यैकारस्य च सत्यसति वा गुणे विशेषो नास्ति औकारान्तस्तु धातुर्नास्ति अस्तु वा औकारोपदेशसामर्थ्यान्न भविष्यतीति । न चैवमायादेशोऽपि न स्यादिति वाच्यम् । 'यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ बाध्यते' इति न्यायात् । गुणं प्रति हि ऐकारोपदेशोऽनर्थकः ग्लै इत्यस्यापि सुपठत्वात् । आयादेशस्य तु निमित्तमेवास्ति । अतः परिशेषात् ऋवर्णेवर्णोवर्णानां स्थाने अर् ए ओ यथाक्रमं गुणसंज्ञका भवन्ति (क) । तपरत्वं तु स्पष्टार्थमिति । गुणसंज्ञाप्रदेशाः गुणः, नूपः, इत्याशयः ॥ १५ ॥

(त०) **अरेदो नामिनो गुण इति** ॥ विपरीतनिर्देशादकारावधिकास्त्रय एव नामिनो गृह्यन्ते । अत्र प्राञ्चः । नामिषु इउऋ इति त्रयाणामेव ग्रहणं ऌकारस्य तु सावर्ण्यात् र अन्यथा गायतीत्यत्र गुणः स्यादित्याहुः । वस्तुतस्तु 'गै शब्दे' इत्यैकारोच्चारणसामर्थ्यादेव गुणो न । न च भवतीत्यादावपि गुणो न भवेदिति भ्रमितव्यं तस्य बभूवेत्यादिषु चरितार्थत्वात् ॥ १५ ॥

(आरैऔ वृद्धिः) आ आर् ए औ वृद्धिसंज्ञाः स्युः (ख) ॥१६॥

(सु०) **आरैऔ वृद्धिः** ॥ आश्च आर् च ऐश्च औश्च एषां समाहारः आरैऔ समाहारस्यैकत्वादेकत्वे द्विगुद्वन्द्वाविति नपुंसकत्वेऽपि ह्रस्वो न संज्ञापूर्वकत्वेन तस्यानित्यत्वात् । समासेऽपि संहिताभावोऽत्र 'अइकौ च मत्वर्थे' इति लिङ्गात् । अथवा असमासेऽविभक्तिकोऽयं निर्देशः । तद्भिन्नत्वे सति तत्सदृशकरणमनुकरणम् । अनुकरणात् विभक्तिर्नास्तीति समासाभावाच्चत्वारि पदानि । एवमरेदो इत्यत्रापि त्रीणि पदानि । अकारस्य आ वृद्धिः । ऋवर्णस्य आर् वृद्धिः । इवर्णस्य एकारस्य चैकारो वृद्धिः । उवर्णस्य ओकारस्य च औ वृद्धिः । एते वृद्धिसंज्ञकाः । वृद्धिसंज्ञायाः प्रदेशाः 'धातोर्नामिनः' इत्यादयः॥

(त०) **आरैऔ वृद्धिरिति** ॥ ननु माऽस्तु वृद्धिसंज्ञा आदिस्वरस्य ञ्णित्यारैऔ इति सूत्र्यताम् । तदेवोत्तरत्राप्यनुवर्त्यतामिति चेन्न संज्ञापूर्वको विधिरनित्यो यथा स्यादित्येतदर्थं संज्ञाविधानम् । तत्फलं तु अभवीदित्यादौ पाक्षिको वृद्ध्यभाव इति ॥१६॥

(अन्त्यस्वरादिष्टिः) अन्त्यो यः स्वरस्तदादिर्वर्णाष्टिसंज्ञको भवति॥

अर् एत ओ एते गुणसंज्ञाः स्युः । **नामिनः** । यत्र ब्रूयाद्गुणो भवतीति तत्र नामिन इति षष्ठ्यन्तमुपस्थितं बोध्यम् ।

(क) अयमाशयः—गायति ग्लायतीत्यादौ ऐकारोपदेशसामर्थ्यात् सन्ध्यक्षराणां गुणो न भवति । यदि गुणकरणं स्यात्तर्हि एकारमेवोपदिष्टं स्यात् । यतो गुणविषये एकारस्यैकारस्य च सत्यसति वा विशेषो नास्ति । ननु गुणे कर्त्तव्ये आयादेशो न स्यात् । अयेव तत्र भाव्यः । उच्यते—**यं विधिं प्रतीति**॥

(ख) **आरै औ इति** । आ इति द्विमात्रग्रहणसामार्थ्यात् न ह्रस्वस्य वृद्धिसंज्ञा ॥

(छ०) अन्त्यस्वरादिष्टिः ॥ अन्ते भवोऽन्त्यः । यः । अन्त्यश्चासौ स्वरश्चेत्यन्त्यस्वरः अन्त्यस्वर आदिर्यस्य सः अन्त्यस्वरादिः । स्वराणां मध्येऽन्त्यस्वर आदिर्यस्य समुदायस्य स टिसंज्ञो भवति ॥ यत्र तु तदादिरन्यो वर्णो नास्ति तत्र स्वरस्यैवान्त्यादित्वं व्यपदेशिवद्भावेन भवति । यत्र चैक एव स्वरस्तत्रापि व्यपदेशिवद्भावादन्त्यत्वमस्ति । यथा त्यदादिषु(क) । व्यपदेशिवद्भावस्तु लौकिको न्यायः । तथा यस्य बहवः पुत्रास्तस्य तस्मिंस्तस्मिन् ज्येष्ठमध्यमकनिष्ठव्यपदेशोऽस्ति यस्य त्वेकः पुत्रस्तस्य ज्येष्ठादिव्यपदेशस्तस्मिन्नेवेति । टिसंज्ञाप्रदेशा यथा 'पथां टेः' इत्यादयः । सोऽन्त्यस्वर आदिवर्णो यस्य स तदादिवर्ण इति ॥ १७ ॥

(त०) अन्त्यस्वरादिरिति ॥ अन्त्यस्वर आदिर्यस्य स तथा । नन्वेवं हलीषेत्यादौ कथं टिसंज्ञाऽन्त्यस्वरस्यादित्वाभावादिति चेत्सत्यम् । व्यपदेशिवद्भावेनेति गृहाण १७

(अन्त्यात्पूर्व उपधा) अन्त्याद्वर्णमात्रात्पूर्वो यो वर्णः स उपधासंज्ञो भवति ॥ १८ ॥

(सु०) अन्त्यात्पूर्व उपधा ॥ अन्ते भवोऽन्त्यस्तस्मात् अन्त्याद्वर्णात्पूर्वो वर्ण उपधासंज्ञोऽस्ति । वर्ण इति कस्मात् लब्धं, न्यायात् । तद्यथा अवध्यवधिमद्भावः सजातीयानामेव भवतीत्युत्सर्गः । लोके हि अमीषां ब्राह्मणानामन्त्यात्पूर्वमानयेत्युक्ते एक एवान्त्यादव्यवहितपूर्व आनीयते न तु समुदायः तथेहापि वर्णादव्यवहितः पूर्वो वर्ण एव संज्ञी न तु समुदाय इति । उपधासंज्ञाप्रदेशाः 'नोपधायाः' इत्यादयः ॥ १८ ॥

(त०) अन्त्यात्पूर्व उपधेति ॥ ननु वर्णादिति सूत्रे अनुक्तं कस्माल्लब्धमिति चेन्न पराण्यादिति ज्ञापकात् गृहाण । अन्त्यादुपधेत्युक्तेऽपि पूर्वशब्दस्याक्षेपः सम्भवति । न च परशब्दस्याक्षेपः सम्भवति इति वाच्यम् अन्त्यत्वभङ्गप्रसङ्गात् । नहि परस्मिन्वर्णे सति पूर्वस्य अन्त्यत्वं सम्भवति । एवं सिद्धे यत्पूर्वग्रहणं तदव्यवहितपूर्वस्यैव ग्रहणार्थम् १८

(ह्रस्वो लघुः ॥ १९ ॥

(सु०) ह्रस्वो लघुः । ह्रस्वस्वरो लघुसंज्ञो भवति ॥ लघुसंज्ञाप्रदेशाः उपधाया लघोरित्यादयः ॥ १९ ॥

(विसर्गानुस्वारसंयोगपरो गुरुर्दीर्घश्च)(ख) ॥२०॥

(सु०) विसर्गानुस्वारसंयोगपरो गुरुर्दीर्घश्च ॥ विसर्गश्चानुस्वारश्च संयोगश्च ते विसर्गानुस्वारसंयोगाः विसर्गानुस्वारसंयोगाः परे यस्माद्ध्रस्वात्स विसर्गानुस्वदारसंयोगपरो ह्रस्वो गुरुसंज्ञः दीर्घश्च गुरुसंज्ञः ॥ २० ॥

(क) त्यदादिष्विति । त्यदादिगणे 'त्यदादेष्टेरः' इति सूत्रेण व्यपदेशिवद्भावमाश्रित्य टेरत्वं क्रियते न्यायं दर्शयति—तथेति । सूत्रव्याख्यानं यथा—अन्त्यस्वर आदिः आदिभूतोऽवयवो यस्य स इति तद्गुणसंविज्ञानेन तत्सहितो वर्णष्टिसंज्ञः । "सामीप्ये च व्यवस्थायां प्रकारेऽवयवेऽपि च । आदिशब्दं तु मेधावी चतुर्ष्वर्थेषु लक्षयेत्" ॥

(ख) तदुक्तम्—"संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गसंमिश्रम् । विज्ञेयमक्षरं गुरु पादान्तस्थं विकल्पेन" इति ॥

(त०) विसर्गेति ॥ विसर्गश्च अनुस्वारश्च संयोगश्च ते परे यस्य स तथा । वस्तुतस्तु विसर्गानुस्वारयोरत्रानुपयोगात्संयोगपर इत्येव वक्तुमुचितम् ॥ २० ॥

(मुखनासिकावचनोऽनुनासिकः) ॥ २१ ॥

(मु०) मुखनासिकावचनोऽनुनासिकः ॥ मुखेन सहिता नासिका मुखनासिका (क) । शाकपार्थिवादित्वान्मध्यमपदलोपः । उच्यतेऽसाविति वचनः । युट् । मुखनासिकया वचनः(ख) मुखनासिकावचनो वर्णोऽनुनासिकसंज्ञो भवति ॥ २१ ॥

(त०) मुखनासिकेति ॥ मुखसहिता नासिका मुखनासिका । अन्यथा मुखं च नासिका चेति विग्रहे प्राण्यङ्गत्वादेकवद्भावे मुखनासिकमिति स्यात् । वस्तुतस्तु एकवद्भावेऽपि न क्षतिः आङः प्रश्लेषेण तथा सिद्धेः । मुखनासिकावचनमस्यास्तीति सः तथा । 'अर्शआदिभ्योऽच्' इति अप्रत्ययः ॥ २१ ॥

(विभक्त्यन्तं पदम्) ॥ २२ ॥

(मु०) विभक्त्यन्तं पदम् ॥ विभक्तिरन्ते यस्य तद्विभक्त्यन्तं पदसंज्ञमस्ति ॥ पद्यतेऽनेनेति पदम् (ग) । विभक्त्यन्तमित्यन्तग्रहणात् 'संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति' इति ज्ञाप्यते ॥ २२ ॥

(त०) विभक्त्यन्तमिति । विभक्तिरन्ते यस्य तत् ॥ २२ ॥

(तपरः) स्वसमानकालस्य सवर्णस्य ग्राहकः ॥ २३ ॥

(मु०) तपरः ॥ स्वसमानकालस्य सवर्णस्य ग्राहकः । तकारः परो यस्मात्स तपरः । तकारात्परो यः स तपरश्चेति ॥ तन्त्रादिनोभयं विवक्षितम् । अत्र उच्चार्यमाणस्तपरः स्वसमानकालस्य सवर्णस्यैव संज्ञा भवति । स्वेनात्मना सह समानस्तुल्यकाल उच्चारणकालो यस्य स स्वसमानकालस्तस्येति । तेनादित्यादयः षण्णां षण्णां संज्ञाः(घ) । ऌदिति द्वादशानां संज्ञा । ह्रस्वतपरस्तु ह्रस्वभेदानेव गृह्णाति । दीर्घतपरस्तु दीर्घभेदानेव गृह्णाति नान्यानित्यर्थः (ङ) ॥ २३ ॥

(त०) तपर इति ॥ तः परो यस्मात्तात्परश्च तपरः । यत्तु संध्युपयोगीति कैश्चिदुक्तं तन्न संधिभिन्नोपयोगितया संकोचे मानाभावात् । अथवा संधिपदमुपलक्षकम् ॥ २३ ॥

श्रीविद्यानगरस्थायिलोकेशकरशर्मणा । विहितायां हि टीकायां संज्ञासंधिरगात्सुखम् ॥

(विरामोऽवसानम्) वर्णानामभावोऽवसानसंज्ञः स्यात् ॥ इति संज्ञाप्रकरणम् ॥

(क) मुखेन सहितेति । अन्यथा मुखं च नासिका चेति द्वन्द्वे कृते प्राण्यङ्गत्वादेकवद्भावे च मुखनासिकं स्यात् । उच्यतेऽसाविति वचनः, इत्यत्र कर्मणि युट्प्रत्ययो बोध्यः । तत्त्वदीपिकाकारेण यदुक्तम्—एकवद्भावेऽपि न क्षतिः, आङः प्रश्लेषेण तथासिद्धेरिति । तदयुक्तम् । आङः प्रयोजनाभावात् ।

(ख) मुखनासिकया वचनो यस्य स इति व० वा० पुस्तके पाठः ।

(ग) पद्यते गम्यतेऽर्थोऽनेनेति पदम् । (घ) ०नादिदिति व० वा० पुस्तके पाठः ।

(ङ) 'तपरः' इति सूत्रमतत्कालनिवृत्त्यात्मकपरिसंख्यार्थम् । वैयाकरणास्तु परिसंख्याविधिमेव नियमविधिरिति व्यवहरन्ति । तदिदं सर्वमभिप्रेत्य व्याचष्टे—**तः परो यस्मादित्यादिना** । नियमविधानस्य फलमाह—**तेनेत्यादिना** । तेन नियमविधानेन । आदिपदेन ऌदित्यादिसंग्रहः । अत् , इत् , उत् , ऋत् , एत् , ऐत् ओत् , औत् , इत्येतेऽष्टौ तपराः । **ऌदिति द्वादशानामिति** । ऋऌवर्णयोः सावर्ण्यविधानादिति भावः ।

(सू०) विरामोऽवसानम् । विरम्यतेऽनेनेति । विरामः । बाहुलकात्करणे घञ् । यदुच्चारणात्तरं वर्णान्तरं नोच्चार्य्यते सोऽन्त्यवर्णो विरामोऽवसानसंज्ञको भवतीत्यर्थः । सम्यक्ज्ञायते शब्दादिव्यवहारो यया सा संज्ञा ॥

(कादयोमावसानाः स्पर्शाः) लोकप्रसिद्धपाठापेक्षमिदं सूत्रे मावसानत्वायोगात् । कादयः पञ्चविंशतिवर्णाः स्पर्शसंज्ञकाः सन्ति(क) ॥

(ञमङणना अनुनासिकाः) एते पञ्च वर्णा अनुनासिकसंज्ञकाः सन्ति । नासिकामनुगता इत्यनुनासिकाः ॥

(यरलवा अन्तस्थाः) एते चत्वारो वर्णा अन्तस्थसंज्ञकाः सन्ति (ख) ॥

(शषसहा ऊष्माणः) एते चत्वारो वर्णा ऊष्मसंज्ञकाः सन्ति ॥

(≍ क इति प ≍ इति कपाभ्यां खफाभ्यां प्रागर्द्धविसर्गसदृशो जिह्वामूलीयोपध्मानीयसंज्ञकौ भवतः) अर्द्धविसर्गसादृश्यमुच्चारणे लेखने च बोध्यम् ।

(अं इति अः इति स्वरात्परावनुस्वारविसर्गसंज्ञकौ भवतः)

(अकुहविसर्जनीयानां कण्ठः) एषामष्टानां वर्णानामुत्पत्तेः स्थानं कण्ठोऽस्ति । द्वन्द्वसमासो बोध्यः सर्वत्र (ग) ॥

(इचुयशानां तालु) एषामष्टानामुत्पत्तेः स्थानं तालु भवति(घ) ॥

(उपूपध्मानीयानामोष्ठौ) एषां सप्तानामुत्पत्तेः स्थानमोष्ठौ भवतः ॥

(ऋटुरषाणां मूर्द्धा) एषामष्टानामुत्पत्तेः स्थानं मुर्द्धा मस्तकोस्ति(ङ) ॥

(ऌतुलसानां दन्ताः) एषामष्टानामुत्पत्तेः स्थानं दन्ताः सन्ति(च) ॥

(क) **कादय इति** । कः आदिः येषां ते कादयः । मः अवसाने येषां ते मावसानाः । **लोकप्रसिद्धपाठापेक्षमिति** । यथा लोके 'क ख ग घ ङ च छ' इत्यादिपाठः, तत्परकमिदं सूत्रम् । व्याकरणेऽस्मिन् कादिमावसानत्वरूपेण मातृकागणनाभावात् ॥

(ख) एतेषामन्तस्थानामध्ये रेफवर्जिता यवलाः सानुनासिका निरनुनासिकाश्च भवन्ति ।

(ग) कस्य कानि स्थानानि इत्याशङ्कायां तद्यथाक्रस्थानानि पाणिन्यादिशिक्षावचनान्यर्थतः संगृह्णाति—**अकुहेत्यादिना** । अ इत्यष्टादशभेदा गृह्यन्ते । कु इति कादिपञ्चकात्मकः कवर्गः । लौकिकप्रसिद्धिमाश्रित्यैव एतत्प्रवृत्तेः । एवमग्रेऽपि कथञ्चित् समाधानं बोध्यम् । अश्च कुश्च हश्च विसर्जनीयश्चेति विग्रहः । विसर्जनीयशब्दो विसर्गपर्य्यायः ।

(घ) इ इत्यष्टादशभेदाः । चु इति चवर्गः । इश्च चुश्च यश्च शश्चेति विग्रहः । तालु हनुः ।

(ङ) **ऋटुरषेति** । ऋ इत्यष्टादश भेदाः । टु इति टवर्गः । ऋा च टुश्च रश्च षश्चेति विग्रहः ।

(च) **ऌतुलसेति** । दन्तशब्देन दन्तमूलप्रदेशो विवक्षितः । अन्यथा भग्नदन्तस्य तदुच्चारणानुपपत्तेः । समासस्तु पूर्ववद्बोध्यः ।

(**एदैतोः कण्ठतालु**) इत्यादौ तपरत्वमसंदेहार्थं न स्वसमानकालसवर्णग्रहणार्थम् ॥ तेन प्लुतस्यापि ग्रहणमत्र भवति। एकारैकारयोरुत्पत्तेः स्थानं कण्ठश्च तालु च कण्ठतालु भवति। प्राणितूर्यसेनाङ्गानामित्येकवद्भावः ॥

(**ओदौतोः कण्ठोष्ठम्**) तपरत्वमसंदेहार्थम्। अनयोरुत्पत्तेः स्थानं कण्ठश्च ओष्ठौ च कण्ठोष्ठमस्ति। प्राण्यङ्गत्वादेकवद्भावः ॥

(**वकारस्य दन्तोष्ठम्**) वस्योत्पत्तेः स्थानं दन्ताश्च ओष्ठौ च दन्तोष्ठमस्ति। ओत्वोष्ठयोः समासे वेत्योकारः ॥

(**जिह्वामूलीयस्य जिह्वामूलम्**) जिह्वामूलीयवर्णस्य जिह्वाया मूलमुत्पत्तेः स्थानमस्ति।

(**नासिकानुस्वारस्य**) अनुस्वारस्योत्पत्तेः स्थानं नासिकाऽस्ति ॥

"हकारं पञ्चमैर्युक्तमन्तस्थाभिश्च संयुतम्।
उरस्यं तं विजानीयाः कण्ठ्यमाहुरसंयुतम् ॥१॥

तं हकारमुरसि भवमुरस्यम्। भवार्थे ण्यः। णितो वेति न वृद्धिः ॥ त्वं विजानीयाः बुध्याः। कीदृशं तम्। पञ्चमैर्ञमङणनैर्युक्तम् ॥ पुनः कीदृशं तम्। अन्तस्थाभिर्यरलवैः संयुतं मिलितम् ॥ पञ्चमैरसंयुतमन्तस्थाभिश्चासंयुक्तं हकारमाचार्याः कण्ठे भवं कण्ठ्यं कण्ठस्थानोद्भवमाहुर्ब्रुवन्ति ॥१॥

वर्णानामुत्पत्तेरष्टौ स्थानानि सन्ति। तद्यथा—

"अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ॥२॥"

मातृकायामेवमनेन प्रकारेण द्विपञ्चाशद्वर्णा आचार्येणोदाहृता दर्शिताः। ते के। 'व्यञ्जनानि त्रयस्त्रिंशत्' इत्यादयः (क) ॥३-४॥ इति **स्थानानि**।

प्रयत्नो द्विधा। आभ्यन्तन्तरो बाह्यश्च। आभ्यन्तरः पञ्चधा। तद्यथा। स्पर्शानां स्पृष्टं प्रयतनम् ॥१॥ अन्तस्थानामीषत्स्पृष्टं प्रयतनम् ॥२॥ स्वराणां विवृतं प्रयतनम् ॥३॥ ऊष्मणामीषद्विवृतं प्रयतनम् ॥४॥ ह्रस्वस्याकारस्य संवृतं प्रयतनम् ॥५॥ बाह्यस्त्वष्टधा। ≍क≍ पविसर्गशषसानां विवारः श्वासोघोषश्च प्रयत्नः ॥३॥ हवानां संवारो नादो घोषश्च प्रयत्नः ॥६॥ वर्गाणां

(क) व्यञ्जनानि इति। सम्पूर्णश्लोकोयम्—
व्यञ्जनानि त्रयस्त्रिंशत्स्वराश्चैव चतुर्दश। अनुस्वारो विसर्गश्च जिह्वामूलीय एव च।
गजकुम्भाकृतिर्वर्णः प्लुतश्च परिकीर्त्तितः। एवं वर्णाद्विपञ्चाशन्मातृकायामुदाहृतः ॥

प्रथमतृतीयपञ्चमानामन्तस्थानां चाल्पप्राणः प्रयत्नः ॥७॥ वर्गाणां द्वितीयचतुर्थानामूष्मणां महाप्राणः प्रयत्नः ॥८॥ इति प्रयत्नाः (क) ॥

इति सुबोधिन्यां संज्ञाप्रकरणम् ॥

अथ परिभाषाप्रकरणम् ॥ २ ॥

(सु०) (**षष्ठीनिर्दिष्टस्यादेशस्तदन्तस्य ज्ञेयः**) स्थानषष्ठ्या निर्दिष्टस्य शब्दस्य य आदेश उच्यते स आदेशोऽन्त्यस्य वर्णस्य स्थाने भवतीत्यर्थः ॥ ऐ सख्युरित्यैकारः सखिशब्दस्यान्त्यस्येकारस्य भवति ॥ स्थानषष्ठीति किम् । कृत इति इडागमस्तृप्रत्ययस्य ऋवर्णात्पूर्वो मा भूदिति ॥ जश्शसोः शिरित्यादीनां शित्त्वं परिभाषां ज्ञापयति । तद्यथा । तत्र हि शित्त्वमन्त्यादेशं बाधित्वा सर्वादेशो यथा स्यादित्येतदर्थं कृतम् । यदि षष्ठीनिर्दिष्टस्यादेशोऽन्त्यस्य न स्यात्तर्ह्यन्तरेणापि शित्त्वं सर्वादेशः सिद्धः किं तेनेति व्यर्थेन सता शित्त्वेन ज्ञापयति ॥

(**ङिदन्तस्य वक्तव्यः**) ङिदादेशोऽप्यन्तस्य स्यात् ॥ गुरुः शिच्च सर्वस्येत्यस्यापवादोऽयम् ॥ 'त्रेरयङ्' इत्ययङादेशोऽन्त्यस्येकारस्य भवति । त्रयाणाम् । अनुङादीनां ङित्त्वेन ज्ञापितेयम् । ङित्वस्य फलान्तरादर्शनात् ॥

(**गुरुः शिच्च सर्वस्य**) अनेकवर्ण आदेशः शिदादेशश्च सर्वस्य स्यात् ॥ षष्ठीनिर्दिष्टस्येत्यस्यापवादोऽयम् । अन टौसोरित्यनादेशस्त्रिवर्णात्मको गुरुरस्ति स सर्वस्येदमः स्थाने भवति यथा अनेनेति । जश्शसोः शिरिति शिदादेशः सर्वस्य जसः शसश्च स्थाने भवति । यथा वारीणीति ॥ उच्चरितप्रध्वंसिनोऽनुबन्धाः स्मर्यमाणाः सन्त एव कार्यं निर्वाहयन्तीति ॥ ततः—

(**अनुबन्धकृतमनेकवर्णत्वं न स्वीक्रियते**) अत्र संध्यक्षराणि पराणीत्यादिनिर्देशेन शिदंशे ज्ञाप्यते इयं परिभाषा । तथा हि जश्शसोः शिश्चेत् सर्वस्य न स्यात्तदोक्तं निर्देशोऽनुपपन्नः स्यादिति ॥ 'साधनाधारयोर्युट्' कारकात्क्रियायुक्ते' इत्यादिनिर्देशेनानेकवर्णांशे ज्ञाप्यते इयम् ॥

(क) **प्रयत्नो द्विधेति** । यत्नानामाभ्यन्तरत्वं बाह्यत्वं च वर्णोत्पत्तेः प्रागूर्द्ध्वभावित्वमिति पाणिन्यादिशिक्षासु स्पष्टम् । पञ्चप्रकारं दर्शयति—**तद्यथेति** । केचिदाभ्यन्तरं चतुर्धेति वदन्ति। तेषां मते स्वराणामूष्मणां च विवृतमेव प्रयतनम् । ईषद्विवृतमूष्मणामिति नाङ्गीकुर्वन्ति । **प्रयतनमिति** । प्रयत्न इत्यर्थः । **ह्रस्वस्याकारस्येति** । ननु दण्ड आढकमित्यत्र अकारस्य आकारस्य च विवृतसंवृतप्रयत्नभेदेन सावर्ण्याभावात् सवर्णदीर्घो न स्यादित्यत आह पाणिनीयादौ ह्रस्वस्यावर्णस्य प्रक्रियादशायां विवृतं प्रयोगे तु संवृतमेवेति । तथा हि—शास्त्रीयप्रक्रियाभिः परिनिष्ठितानां रामः कृष्ण इत्यादिशब्दानां प्रयोगे क्रियमाणे ह्रस्वस्यावर्णस्य संवृतमित्यर्थः शास्त्रीयकार्य्यप्रवृत्तिसमये तु ह्रस्वस्याप्यवर्णस्य विवृतत्वमेवेत्यर्थः । तेन ह्रस्वस्याप्यवर्णस्य विवृतत्वेन दण्डाढकमित्यादौ सवर्णदीर्घादिकार्य्यं निर्बाधमेवेति भाष्ये स्पष्टम् ।

बाह्यस्त्वष्टधेति । अत्र कौमुदी—बाह्यप्रयत्नस्त्वेकादशधा । विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति । अत्रोदात्तोऽनुदात्तः स्वरितः शब्दाः धर्मपराः ।

कस्य को बाह्यप्रयत्न इत्याकांक्षायां संगृह्णाति—ᳵकᳵपेति । तदुक्तम्—

खयां यमाः खयः ᳵकᳵपौ विसर्गः शर एव च । एते श्वासानुप्रदाना अघोषाश्च विवृण्वते ॥ १ ॥

कण्ठमन्ये तु घोषाः स्युः संवृता नादभागिनः । अयुग्मा वर्गयमगाः यणश्चाल्पासवः स्मृताः ॥२॥ इति ॥

(**टित्किताबाद्यन्तयोर्वक्तव्यौ**) टित्कितौ यस्योक्तौ तस्य क्रमादाद्यन्तावयवौ भवतः ॥ सिसतासीस्यपामिडितीट् स्यादीनामाद्यवयवो भवति ॥ अभविष्टेति। रातो णौ पुगिति तुक् आत इत्यस्यान्तावयवो भवति। यापयतीति। अन्यार्थटित्किल्स्वियं परिभाषा न प्रवर्तते। यथा। अटाविति टकारस्य ङ्वित इतीप् प्रयोजनमस्ति। कुल्चरीति। यक् चतुर्ष्विति ककारस्य गुणाप्रवृत्तिः प्रयोजनमस्ति। भूयते इति। प्रत्ययविधौ नेयं प्रवर्तते इति वा। टिदंशे तस्मादित्यत्रात्। इति स्मट्। रः संख्याया इत्यत्र यट्। नवानामित्यत्र नुट्। किदंशे तु कार्यित्यत्र 'ङेः अक्' इत्यक्। ऐ सख्युरित्यत्र 'ऋङ्के' इत्युक्। वर्तमाने इत्यत्र मुगानेत इति मुगिमां परिभाषां ज्ञापयति॥

(**मिदन्त्यात्स्वरात्परो वक्तव्यः**) स्वराणां मध्ये योऽन्त्यस्वरस्तस्मात्परस्तस्यैवान्तावयवो मित्स्यात्॥ 'नुमयमः' इति नुमः पूर्वान्तत्वान्नोपधाया इति दीर्घः सिध्यति। कुलानि, यशांसीति। नुमः परादित्वे तु नोपधाया इति दीर्घो न स्यात्। वारिणे इत्यादौ ङितीत्येकारश्च स्यादिति। अस्याः संध्यक्षराणीति निर्देशो ज्ञापकः॥

(**सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यहितस्य पूर्वस्यैव वक्तव्यम्**) नियमार्थमिदम् 'इ यं स्वरे' इत्यत्र स्वरे इति भावे सप्तमी। अश्रूयमाणक्रियत्वाद्यान्तरङ्गस्यास्त्यर्थस्य लाभो भवति। तेन स्वरे सति यकारो भवतीत्यर्थः॥ व्यवहितेऽव्यवहिते च प्राप्तमव्यवहित एवेति पूर्वस्य परस्य च प्राप्तं पूर्वस्यैवेति च नियम्यते॥ पूर्वस्येति किम्। ननु इदमत्रेकारस्य मा भूत्॥ अव्यवहितस्येति किम्। अग्निचिदत्रेत्यत्र सान्तरस्य मा भूत्। अस्याः ष्वादे नृणः लिप्युपादेः सखिपत्योरित्यादिनिर्देशो ज्ञापकः।

(**पञ्चमीनिर्देशेन क्रियमाणं कार्यमव्यवहितस्य परस्य वक्तव्यम्**) उदः स्थास्तम्भोः सलोपः इत्यत्रोद इति पञ्चमीनिर्देशेन क्रियमाणो लोपः सोऽव्यवहितस्य परस्य स्थास्तम्भोः सकारस्य भवति। उत्थानम् उत्तम्भनमिति। अव्यवहितस्येति किम्, उत्संस्थानम् उत्संस्तम्भनमित्यादौ मा भूत्॥ परस्येति किम्। अस्था उदासने स्तम्भ उद्गच्छत्यत्र मा भूत्॥ अस्याज्ञापकः स नपुंसकं स धातुरित्यादिनिर्देशः॥ तत्र हि सैषादिति विसर्गलोपः कृतोऽतो ज्ञाप्यते।

(**ह्रस्वदीर्घप्लुतशब्दैर्यत्र स्वरो विधीयते तत्र स्वरेति षष्ठ्यन्तं पदमुपतिष्ठते**) षष्ठीनिर्दिष्टस्येत्यस्य नायमपवादः किं तु तच्छेष एव॥ स्वरस्येति षष्ठ्यन्तं पदं सति सम्भवे सामानाधिकरण्येनैव सम्बध्यते न वैयधिकरण्येन। तेन नपुंसकस्येत्यत्र स्वरान्तस्यैव नाम्नो ह्रस्वो भवति। सोमपमिति। नेह सुवाक् ब्राह्मणकुलम्। स्वरान्तत्वाभावान्न ह्रस्व इत्यर्थः। शमां दीर्घ इत्यत्र तु सामानाधिकरण्यस्यासम्भवात्। शमादीनां स्वरस्येति सम्बद्ध्यते। तेन शाम्यतीत्यादि सिद्धम्॥ से दीर्घ इत्यत्र स्वरान्तस्य धातोर्दीर्घः। सञ्जिगीषतीति। नेह। बीभित्सतीति। दूराद्धाने टेः प्लुतः इत्यत्र सामानाधिकरण्यस्य संभवेऽपि टिग्रहणसामर्थ्यात् टेरवयवस्य स्वरस्य प्लुतो भवति। आयुष्मान् एधोन्द्रवर्मन्। ज्ञापकसिद्धेयम्। तथा हि—यजां यवराणाम्, रुदादेश्चतुर्णामित्यत्र नामीति दीर्घस्य प्रवृत्त्यप्रवृत्तिभ्यां स्वरान्तेषु नामीति दीर्घो भवति न हसान्तेषु इति ज्ञापितम्॥ एकदेशानुमितिद्वारा ह्रस्वप्लुतयोरप्येवम्।

(वर्णानां प्रसङ्गे सति सदृशतम आदेशो वक्तव्यः) सादृश्यं चतुर्विधमस्ति स्थानार्थगुणप्रमाणभेदात् । स्थानतो यथा—दध्यानयेत्यत्र तालुस्थानस्येकारस्य तालुस्थानो यकारः । अर्थतो यथा-रूपवती भार्या यस्येत्यत्र पुंवद्वेत्यनेन पूर्वपदस्य स्थानेऽतिदिश्यमानः पुंशब्दो रूपवत्त्ववाचिनो रूपवतीशब्दस्य स्थाने तदर्थवाची एव रूपवच्छब्दो भवतीत्यर्थः । गुणतो यथा—वाग्घरिरित्यत्र घोषवतो नादवतो महाप्राणस्य संवारवतो हस्य तादृशो वर्गचतुर्थो घकारो भवतीत्यर्थः । प्रमाणतो यथा—अमुम् , अमू , अमून् इत्यत्र मादू इत्यनेन पूर्वपदस्य स्थाने ह्रस्वस्य ह्रस्वो दीर्घस्य दीर्घ उवर्णो भवतीत्यर्थः ॥ न्यायसिद्धेयम् । तथा हि । सभायामास्यतामित्युक्ते हि पण्डिताः पण्डितैः सहासते शूराः शूरैः कवयः कविभिर्न तु संकरेण । किञ्च गवां संघं प्रति गौर्धावति अश्वोऽश्वानामित्यादिव्यवस्था तिर्यक्ष्वपि दृश्यते ॥

(लोपशि पुनर्न सन्धिर्वक्तव्यः) लोपशि कृते सति सन्धिर्न भवति ॥ यथा—त आगताः ॥

(नस्य लोपशि तु संन्धिर्वक्तव्यः) श्वादेरिति निर्देशात् । यथा राजाश्वः ॥

(नस्य लोपशि न विभक्तिकार्यम्) पञ्चस्विति निर्देशात् ॥ किकैास्षः स इति षत्वं तु भवत्येव तस्य वर्णमात्राश्रितत्वात् । यथा—पथिषु । अस्याः ज्ञापक आचार उपमानात् अत उपधाया इत्यादिनिर्देशः ॥

(विशेषणं तदन्तस्य स्वस्य च रूपस्योपस्थापकं वक्तव्यम्) अप्रधानमात्मान्तस्य रूपस्य ग्राहकं भवति । स्वस्य रूपस्य चेत्यर्थः ॥ स्वराद् इत्यत्र धातोरिति विशेष्यं स्वरादिति विशेषणं तदन्तग्राहकं भवति ॥ स्वरान्ताद्धातोरप्रत्ययो भवतीति । स्वस्य रूपस्य च ग्राहकं स्वररूपाद्धातोश्चाप्रत्यय इति ॥ चयः, अयः । अस्या ज्ञापकोऽतिशये हसादेः अन्वये नाम्नामित्यादिनिर्देशः । न ह्यत्र तदन्तविधिं विना स्वराद् इति विधीयमानोऽप्रत्ययः शीङा भवेत् । स्वरग्रहणं विना च इधातोरप्रत्ययो न लभ्यतेति इयं परिभाषा ॥

(यदादेशस्तद्वद्भवति) न तु वर्णमात्रविधौ आदेशे कृते स्वरूपभेदात् । स्थानिप्रयुक्तकार्याणामप्रवृत्तावतिदेश आरभ्यते । आदेशः स्थानिवद्भवति । यथा लक्ष्म्यामित्यत्र ङ्यामादेशे कृते तस्यामो ङित्त्वात् ङितामडित्यट् भवति । वर्णमात्रविधौ स्थानिवद्भावो न भवति । वर्णश्च स्थान्यवयव एवात्र गृह्यते । यश्च वर्णमात्रेण विधिः यश्च वर्णमात्रात् परस्य विधिर्यश्च वर्णमात्रं स विधिर्यस्य वर्णमात्रे विधिस्तत्र मा भूत् । तत्र वर्णमात्रेण विधौ यथा । व्यूढोरस्केनेत्यत्र सकारस्य स्थानिवत्त्वेन विसर्गत्वमाश्रित्यावकुप्वन्तरेऽपीति णत्वं प्राप्तमिति तन्न भवति ॥ वर्णमात्रात्परस्य यथा । द्यौरित्यत्र दिव औरित्यौकारस्य स्थानिवत्त्वेन पन्था इत्यत्र आसावित्याकारस्य स्थानिवत्त्वेन च हसत्वमाश्रित्य हसेप इति सिलोपो न भवतीति ॥ वर्णमात्रस्य विधौ यथा-द्युकाम इत्यत्र ऊ रसे इत्युकारस्य स्थानिवत्त्वेन यवयोर्वसे हकारे च लोपो न भवतीति ॥ वर्णमात्रे विधौ यथा । क इष्ट इत्यत्र 'यज देवपूजादौ' इति धातोः क्तप्रत्यये परतः संप्रसारणस्य स्थानिवत्त्वेन यकारमाश्रित्य 'ह्वे' इत्युकारो न भवतीति ॥ क्रियायां स्त्रियामित्यादिनिर्देशो ज्ञापकः ॥

इति परिभाषा ॥ २ ॥

अथ स्वरसन्धिः ॥ ३ ॥

(इ यं स्वरे) इवर्णो यत्वमापद्यते स्वरे परे (क) ॥ १ ॥

(सु०) **इ यं स्वरे** ॥ इ इत्यनेन इत्वजातिर्निर्दिश्यते न तु ह्रस्वव्यक्तिरेव । प्लुत इति निषेधसामर्थ्यात् । यमिति द्वितीयान्तं कर्म । तस्य योग्यत्वात् । प्राप्नोतीत्यस्याध्याहारः कर्तव्यः । अथ-इ इति क्लीबे कर्तृपदमस्ति । यमिति प्रथमान्तं क्लीबे । अकार उच्चारणार्थः । तदा सत्तार्थवाचकं क्रियापदमध्याहार्यमिति । स्वरे इति किम् । दधि पश्य । स्थानी आदेशो निमित्तं चेति त्रयं सर्वत्र बोध्यम् ॥ किंच अर्थवद्ग्रहणे नानर्थकस्येति परिभाषया अस्यापत्यमिः स्त्री च ई इत्यत्रैव यकारः स्यात् न तु दध्यानयेत्यादौ । उच्यते-स्यादावित्यादिनिर्देशेन तस्यानित्यत्वज्ञापनान्न निषेधः(ख) । दध्यानयेत्यत्र नामिनः स्वरे इति नुम् न स्यादिस्वरत्वाभावात् । दध्य् इति स्थिते ॥ १ ॥

(त०) **इ यं स्वर** इति ॥ इश्च ईश्चेति समाहारद्वन्द्वे एकवद्भावे नपुंसकत्वे च इ इति । एतेन सांकेतिकत्वनिर्विभक्तिकत्वाद्युक्तिः परास्ता(ग) । ऋजुमार्गेण सिद्ध्यतोऽर्थस्य वक्रेण प्रदर्शनायोगात् । अर्थवद्ग्रहणे नानर्थकस्य इति परिभाषया केवलाया इव्यक्तेरेव ग्रहणं न तु दध्यादिस्थाया इति नाशङ्कनीयं स्यादावित्यादिनिर्देशेन तस्या अनित्यत्वज्ञापनात् । यमिति भावप्रधानो निर्देशः द्व्येकयोरितिवत् इत्याशयेनाह-इवर्णो यत्वमापद्यत इति । ननु 'इयं स्वरे' इत्यत्र इकारग्रहणं किमर्थमिति । उकारादीनां यत्ववारणायेति चेन्न उ वमित्यादिसूत्रप्राबल्यात् । न च षडत्रेत्यादौ टकारादीनां यत्वनिषेधार्थं तदिति चेत् तत्रापि पूर्ववत् 'चपा अबे जबा' इत्यादिसूत्रप्राबल्यात् । अथ पचतीत्यत्र चकारस्य तद्वारणायेति-चेत् 'ङ्णनो ह्रस्वात्' 'दीर्घात्' इति सूत्राभ्यां ह्रस्वदीर्घग्रहणमनुवर्त्य ह्रस्वदीर्घयोरेव यत्वविधानाद् इति चेत्सत्यम् । चिनुह्यत्रेत्यादौ प्लुतस्यापि पक्षे यत्वविधानार्थमिग्रहणस्यावश्यकत्वात् । दध्यानयेत्यत्र स्यादिस्वरत्वाभावात् 'नामिनः स्वरे' इति नुमागमो न ।

(क) उपोद्घातसङ्गत्या संज्ञां निरूप्य संधिसूत्रोपजीवकत्वाच्छब्दनिरूपणात्प्राक् सन्धिनिरूपणं प्रतिजानीते-**अथेति** । ननु किं नाम संधित्वमुच्यते पूर्वोत्तरान्योन्यमिलितत्वं कार्यत्वमिति ॥ **'इ यं स्वरे' इति** । ननु सूत्रपाठक्रमेणाकारस्याभ्यर्हितत्वादकारसंधिमनभिधाय प्रथमं कथमिकारसंधिरभिहितः । उच्यते । इकारः सावित्रीरूपः । शक्तिरूपः । सा च सर्वजगत्सृष्टिकर्त्री, तस्मात्पूर्वमिकारस्यसंधिरभिहितः । इति चन्द्रकीर्त्तिः । अत्र केचित्—ननु "अकारादिसकारान्ता, वर्णाश्च ब्रह्मरूपिणः । इकारस्य यकारत्वं, ब्रह्मनाशाय कल्पते" ॥ इत्यनेन इकारस्य यकारकरणे ब्रह्मवधः स्यादिति चेन्न, "इकारस्तु परंब्रह्मस्वररूपाक्षरे परे । इस्वरूपं परित्यज्य यत्वमेति नटो यथा ॥" इत्युक्तेरिति ॥ इ इत्युच्चारणप्रसक्तौ य इत्युच्चारणीय इति रहस्यम् । एवं शब्दात्मकवर्णानां नित्यत्वमप्युपपद्यते" इ इति किम्, गोदुहौ, स्वरे किम्, दधि पश्य ।

(ख) समुदायो हि अर्थवान् तदेकदेशोऽनर्थकः । अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् । इति परिभाषया केवलेकारस्य यत्वं प्राप्नोति न तु दधिपदघटकीभूतेकारस्य यत्वप्राप्तिरस्ति तस्य तु एकदेशत्वेनानर्थकत्वादिति शङ्कां प्रदर्शयति-**किं चेति** । केवलं 'ई' पदं साध्नोति-**अस्यापत्यमिति** । अस्य वासुदेवस्य । 'अत इञनृषे' इति सूत्रेण अपत्यार्थे इञ्प्रत्यये सति इरिति स्यात् । ततः "इतो मनुष्यजातेरीप्" इति सूत्रेण ईप्कृते 'ई' इति सिध्यति । निरुक्तशङ्काया उत्तरमाह—**उच्यत इति** । सि-आदाविति 'स्यादौ' इति सूत्रनिर्देशेने 'अर्थवत्' परिभाषाया अनित्यत्वज्ञापनात् दधि आनयेति 'दध्यानय' इत्यादौ न यकारस्य निषेधः । (ग) **उक्तिः परास्तेति** । उक्तिरियं माधववासुदेवयोः ।

तद्धितस्वरत्वाभावात् यस्य लोप इति यस्य लोपोऽपि न । नन्वत्र 'संयोगान्तस्य लोपः' इत्यनेन यलोपःकथं न स्यादिति चेत्सत्यम् । 'असिद्धं वहिरङ्गमन्तरङ्गे' इति न्यायेनान्तरङ्गं लोपं प्रति बहिरङ्गस्य यादेशस्य असिद्धत्वादिति गृहाण ॥ १ ॥

(हसेऽर्हृहसः) स्वरात्परो रेफहकारवर्जितो हसो हसे परे अवसाने च वा द्विर्भवति (क) ॥ २ ॥

(सु०) **हसेऽर्हृहसः** ॥ र् च ह् च र्हौ न र्हौ यस्मिन् सोऽर्ह अत्र संयोगान्तस्येति हलोपो न सभिन्नस्येति निषेधात् । रकारहकारभिन्नः स्वरात्परो हसो द्विर्वा स्यात् अवसाने हसे च ॥ स्वरादिति किम् । तस्मिन् स्नातः । हसे किम् । भवानत्र । हसः किम् । तितउच्छत्रम् । अर्हिति किम् । हर्य्यनुभवः । नह्यस्ति । अवसाने यथा । वाक्क्-वाग्ग् दध्य्य् इत्यत्रयकारस्य स्थानिवद्भावेन स्वरत्वमाश्रित्य हसेऽर्ह हस इति द्वित्वनिषेधो ना शंक्यो न तु वर्णमात्रविधाविति स्थानिवद्भावनिषेधात् (ख) ॥ २ ॥

(त०) **हसेऽर्हृहस** इति । अत्र 'ङ्णनो ह्रस्वात्' इति पूर्वसूत्रात् ह्रस्वादित्यस्यानुवृत्तस्य च लक्षणया स्वपरत्वं बोध्यम् । यत्तु दात्रं पात्रमित्यादौ दीर्घाद्द्वित्वनिवृत्त्यर्थं ह्रस्वादित्येव वक्तुं योग्यमिति तन्न तत्र विकल्पेनैव तद्वारणसम्भवात् (ग) । अत्र 'संयोगान्तस्य लोपः' इत्यनेन हलोपो न रात्सस्यैव लोप इति नियमात् । र् च ह् च र्हौ ताभ्यामन्यः स तथा । अस्वरेऽर्हहस इति तु सुवचम् ॥ २ ॥

(झबे जबाः) झसानां झबे परे जबा भवन्ति ॥ ३ ॥

(सु०) **झबे जबाः** ॥ झसानां जबाः स्युर्झबे ॥ झसानामिति किम् , गीर्भ्याम् ॥ झबे किम् ॥ खञ्जौ ॥ दध्ध्य् इत्यत्रानेन धस्य दः ॥ ३ ॥

(त०) **झबे जबा** इति ॥ यत्तु झभे जबा इति तन्न भृज्जते भृज्जतोत्यादावव्याप्तेः ॥३॥

(वर्ग्यो वर्ग्येण सवर्णः) स्वरहीनं परेण संयोज्यम् ॥ दद्ध्यानय ॥४॥

(सु०) **वर्ग्यो वर्ग्येण सवर्णः** ॥ वर्गे भवो वर्ग्यो वर्णो वर्ग्येण वर्णेन सह सवर्णो भवतीत्युक्तत्वात् । संयोगान्तस्येति यलोपे प्राप्ते अन्तःस्थानां प्रतिषेधो वाच्य इति

(क) अत्रेदं पूरणीयम्—"**नादिन्याक्रोशे पुत्रस्य**" । पुत्रशब्दस्य न द्वे स्त आदिनीशब्दे परे आक्रोशे गम्यमाने। पुत्रादिनी त्वमसि पापे । आक्रोशे किम्, तत्त्वकथने द्विर्वचनं भवत्येव । पुत्रादिनी सर्पिणी।

'तत्परे च' । आदिनीशब्दपरके पुत्रशब्दे च परे पुत्रशब्दावयवस्य न द्वित्वम् । पुत्रपुत्रादिनी त्वमसि पापे ।

'वा हतजग्धयोः' । हतशब्दे जग्धशब्दे च परे पुत्रशब्दावयवस्य हसस्य द्वित्वं वा भवति । पुत्रहती, पुत्रहती । पुत्रजग्धी, पुत्रजग्धी ।

'त्रिप्रभृतिषु शाकटायनस्य' । त्र्यादिषु वर्णेषु संयुक्तेषु वा द्वित्वम् । इन्न्द्रः, इन्द्रः । राष्ष्ट्रम्, राष्ट्रम् ।

'दीर्घादाचार्य्याणाम्' । केषांचिदाचार्य्याणां मते दीर्घात्परस्य हसस्य न द्वित्वं भवति । दात्रम् । पात्रम् ।

(ख) दधि—आनयेत्यत्र, दध्य्—आनयेति अवस्थायां 'यदादेशस्तद्वद् भवति' इति परिभाषया यकारस्य इकारत्वात्तेन च हसपरत्वाभावात् "हसेऽर्ह हसः" इति सूत्रेण धकारस्य द्वित्वं न स्यादिति शङ्कते—**दध्ध्य् इत्यादिना** । अस्या उत्तरं दर्शयति—**नत्विति** । अयमर्थः—वर्णमात्रविधौ स्थानिवद्भावो न भवतीति यकारस्य स्थानिवद्भावनिषेधात् धकारस्य द्वित्वं निरबाधमेव ।

(ग) यत्त्विति वासुदेवस्योक्तिः । वस्तुतस्तु ह्रस्वादित्येव वक्तुं योग्यम् । वैकल्पेन कृतेऽपि पक्षे द्वित्वप्रसङ्गात् ।

असिद्धं बहिरङ्गम् इति परिभाषया वा यलोपाभावः(क) ॥ स्वरेण हीनं स्वरहीनं व्यञ्जनं परेण वर्णेन सह संयुज्यते इत्यर्थः ॥ ४ ॥

(त०) वर्ग्यो वर्ग्येणेत्यादि ॥ वर्गे भवो वर्ग्यः ॥ ४ ॥

(अपाद्यवला वा द्विर्वाच्याः) दध्यानय ॥ द्वित्वं धस्यैव यस्यैव नोभयोरुभयोरपि । दध्यानयादिषु प्राज्ञैर्बोध्यं रूपचतुष्टयम् ॥ ५ ॥

(सु०) अपाद्यवला वा द्विर्वाच्याः ॥ अपप्रत्याहारात्परा यवला वा द्विः स्युः ॥ धकारयकारयोर्द्वित्वविकल्पाच्चत्वारि रूपाणि ॥ इह धकारस्य द्वित्वे जश्त्वे च कृते पुनर्दस्य द्वित्वं न भवति सकृच्छास्त्रं प्रवर्तते इत्युक्तत्वात् (ख) । अन्यथा द्वित्वानन्त्यापत्तिः ॥ द्विधं द्वियम् १ एकधं द्वियम् २ द्विधमेकयम् ३ एकधमेकयम् ४ दद्ध्य्यानय १ दध्य्यानय २ दद्ध्यानय ३ दध्यानय ४ ॥ ५ ॥

(त०) अपादिति ॥ इति यकारस्य द्वित्वम् । तथा च धयवयोर्द्वित्वविकल्पाच्चत्वारि रूपाणि ॥ यत्तु नरोत्तमः । वणीप्रणीतसूत्राणामिति प्रतिज्ञाय तदतिरिक्तविधानेन प्रतिज्ञाभङ्ग इत्याशङ्क्यात्र रामो बभ्रामेत्युक्तवान् तत्स्वमतिभ्रमादेव(ग) । यतः पतञ्जलेर्मतं बुद्ध्वेत्युक्त्वा पतञ्जलिमतावबोधपूर्वकत्वेन पतञ्जलिमतानुसरणविशिष्टवाणीप्रणीतसूत्रसंबन्धिसिद्धान्तचन्द्रिकाकरणप्रतिज्ञाया उद्देश्यत्वेन प्रतिज्ञाभङ्गाभावात् ॥ तथा च "रामाभिप्रायमज्ञात्वा तदुक्तौ दूषणार्पणम् । चकारानवबोधेन स्वयं भ्रान्तो नरोत्तमः ॥ नरोत्तमतया तस्य न नाम विहितं बुधैः । तृणोत्तमतया किं तु रलयोरक्यभावनात् ॥" ६ ॥

(रहाभ्यां द्विः) स्वरपूर्वाद्रेफात् हकाराच्च परो यपो वा द्विर्भवति ॥ जलतुम्बिकान्यायेन रेफस्योर्ध्वगमनम् ॥ गौर्य्यत्र । हर्य्यनुभवः । नह्य्यस्ति । व्यवस्थितविभाषया शसस्यापि द्वित्वम् ॥ पाश्श्वम् । पश्श्वा इवण् । सस्स्यं वष्ष्मेत्यादौ ॥ ६ ॥

(सु०) रहाभ्यां द्विः ॥ स्वरात्पराभ्यां रेफहकाराभ्यां परा यपो द्विर्वा स्यात् ॥ स्वरादिति किम् । किं ह्नुते ॥ ननु मह्ह्रद इत्यत्र स्वरात्परात् हकाराद्रेफस्यापि द्वित्वप्रसंगः स्यादिति चेन्न, विशेषेण सामान्यस्य बाधात् । विशेषे हि रस्य निमित्तत्वं सामान्ये तु कार्यित्वम् । माठरकौण्डिन्यन्यायेन । तद्यथा—ब्राह्मणा भोज्यन्तां माठरकौण्डिन्यौ परिवेविषातामिति ब्राह्मणभोजने निमित्तभूतयोस्तयोर्भोजनं बाध्यते । तद्वद्यपस्य द्विरुक्तौ निमित्तस्य द्वित्वं बाध्यते(घ) । व्यवस्थितविभाषया शसस्यापि द्वित्वम् । कुत्रचिन्नवति

(क) 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषया संयोगान्तस्य लोपे कर्त्तव्ये बहिरङ्गस्य यादेशस्यासिद्धत्वान्न यलोप इति भावः । (ख) 'लक्ष्ये लक्षणं सकृदेव प्रवर्तते' इत्यप्युक्तत्वात् ।

(ग) रामो बभ्रामेति । रामो रामाश्रमाचार्य्यः । अस्य ग्रन्थस्य कर्त्ता । स्वमतिभ्रमादेव नरोत्तममतिभ्रमादेव ।

(घ) यपप्रत्याहारस्यानवत्तित्वाद्रेफस्य द्वित्वमाशङ्कते—नन्विति ॥ शंकां निरस्यति—नेति । विशेषेण समान्यस्य बाधस्तु सार्वत्रिकः । तदुक्तम्—"सामान्यशास्त्रतो नूनं विशेषो बलवान् भवेत्" इति । रस्य निमित्तत्वमिति यस्य द्वित्वं प्रतीति शेषः । रस्य कार्य्यित्वं तु स्वस्य द्वित्वापेक्षया । निमित्तत्वकार्य्यित्वयोर्दृष्टान्तमाह—माठरकौण्डिन्यन्यायेनेति ।

न्यायं व्याचष्टे-ब्राह्मणा इति ॥ प्रकृते सङ्गमयति-तद्वदिति ॥ यपस्य द्विरुक्तौ निमित्तस्य रस्येत्यर्थः

कुत्रचिन्न भवतीयं व्यवस्थितविभाषा तथा । स्वरात्पराभ्यां रहाभ्यां परः शसो द्विः स्यादित्यर्थः ॥ पार्श्वम् । वर्म्म ॥ ६ ॥

(त०) रहाद्यपो द्विरिति । रश्च हश्चेति द्वन्द्वः । हकाराधिक्यं तु 'अचो रहाभ्यां द्वे' इति पाणिनिसूत्रानुसारात् ॥ मद्ह्रद इत्यादौ स्वरात्पराद्धात्परस्यापि रेफस्य न द्वित्वं माठरकौण्डिन्यन्यायेन तद्बाधात् । तद्यथा । ब्राह्मणा भोज्यन्तां माठरकौण्डिन्यौ परिवेविष्टामिति ब्राह्मणभोजने निमित्तभूतयोस्तयोर्भोजनं बाध्यते । एवमत्रापि यब्द्वित्वनिमित्तस्य रेफस्य न यपान्तर्गतत्वेन द्वित्वकार्यित्वम् । व्यवस्थितविभाषया शसस्यापि द्वित्वम् । पार्श्वं वर्म्मेत्यादौ । पार्श्वा इवण् । णित्वाद्वृद्धिः । डित्वाट्टिलोपः ॥ ६ ॥

(उ वम्) मद्ध्व्वत्र-मध्व्वत्र—मद्ध्वत्र—मध्वत्र ॥ सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयम्(क) ॥ ७ ॥

(सु०) उ वम् । यपा अबे जबा इत्यतः प्राक् स्वरे इत्यनुवर्तते । सूत्रेषु यत्पदं न दृष्टं तत् पदमन्यत्सूत्रं सूत्रान्तरं तस्मात्सूत्रान्तरादनुवर्तनीयमित्युक्तत्वात् । पूर्वसूत्राद् ग्रहणमनुवृत्तिः । उ वत्वं प्राप्नोति स्वरे परे ॥ एवम् ऋ रम् ऌ लमत्रापि पूर्ववत्सर्वं व्याख्येयम् । धस्य द्वित्वं जबत्वं च । मद्ध्व्वत्र ॥ ७ ॥

(त०) उ वमिति ॥ वत्वमापद्यत इति पूर्ववत् ॥मध्व्वत्रेति ॥ अत्राति धकारवकारयोर्द्वित्वविकल्पाच्चत्वारि रूपाणि ॥ ७ ॥

(ऋ रम्) पित्त्रर्थः (ख) । (ऌ लम्) लनुबन्धः ॥ ८–९ ॥

(सु०) ऋ रम् । ऋ रत्वं प्राप्नोति स्वरे ॥ रत्वं तकारस्य द्वित्वम् ॥ पित्त्रर्थः ॥ ऌ लम् ॥ ऌ लत्वं प्राप्नोति स्वरे परे ॥ ९ ॥

(त०) ऋ रमित्यादि पूर्ववत् ॥ पित्त्रर्थः इति ॥ अत्रापि तकारस्य द्वित्वविकल्पाद्रूपद्वयम् ॥ ऌ लमिति ॥ लनुबन्ध इति ॥ ऌ अनुबन्धो यस्येति विग्रहः ॥ ८–९ ॥

(ए अय्) नयनम् (ग) । (ओ अव्) भवनम् (घ) ॥१०–११॥

(सु०) ए अय् ॥ एरय् स्यात्स्वरे ॥ ओ अव् ॥ ओरव् स्यात्स्वरे ॥ १०–११ ॥

(त०) ए अयिति ॥ प्रथमान्तं पदद्वयमपि । एवमुत्तरसूत्रेऽपि । नयनमिति ॥ 'णीञ् प्रापणे' इत्यस्माल्युटि 'युवोरनाकौ' इति अनादेशे । एवं भवनमपि भूधातोः॥१०-११॥

(गोरग्वा पदान्ते स्वरे) टिकितावाद्यन्तयोवक्तव्यौ ॥ गोअग्रम् गोऽग्रम् गवाग्रम् (ङ) । पदान्ते किम् । गवि । स्वरे किम् । गोहितम् ॥१२॥

(सु०) गोरग् वा पदान्ते स्वरे ॥ पदान्ते ओदन्तस्य गोरग् वा स्यात् स्वरे । कित्वादन्ते ॥ पदान्ते किम् । गवि ॥ ओदन्तस्य किम् । चित्रग्वग्रम्(च) ॥१२॥

(क) उवर्ण इति किम्, ककुभौ । स्वरे इति किम् मधु हरति । सूत्रेष्वदृष्टमिति । यत्र सूत्रान्तरैर्न कार्य्यसिद्धिस्तत्र सूत्रान्तरात्पदान्तरात्पदान्तरादनुवृत्तिर्ज्ञातव्या । ग्रन्थभूयस्त्वभयान्न तत्तैर्लिख्यते ।

(ख)ऋ इति किम् , सुगणौ । स्वरे किम् , कर्त्तु पश्यत् । ऌ इति किम् , मरुतौ । स्वरे किम् , ऌकारः ।

(ग)ए किम् , रायौ । स्वरे किम , नेता । (घ) ओ किम् , लावौ । स्वरे किम् , भोक्ता ॥

(ङ) अत्र पक्षे असन्धिः । पक्षे अगागमः । पक्षे अलोपश्च बोध्यः ।

(च)चित्रा गावो यस्य यस्मिन् वेति विग्रहः । एकदेशविकृतमनन्यवदिति न्यायेन गोशब्दसद्भावेऽपि समस्तपदतया पदान्ततासत्वेऽपि च ओदन्तत्वाभावान्न अगागमः ।

(त०) गोरग्वेति ॥ पदान्ते किम् । गवि । स्वरे किम् । गोहितम् । तथा च पाणिनिसूत्रे 'अवङ् स्फोटायनस्य' इत्यत्र 'अक् स्फोटायनस्य' इत्युचितम् । अगागमे कृते सति 'एचोऽयवायावः' इत्यवादेशे गवाग्रमित्यादिरूपसिद्धेः(क) ॥ १२ ॥

(इन्द्राक्षयोः परतो गोरङ्नित्यम्) गवेन्द्रः । गवाक्षः ॥१३॥

(सु०) **इन्द्राक्षयोः परतो गोरङ् नित्यम्** ॥ पदान्ते ओदन्तस्य गोर्नित्यमङ् स्यात् इन्द्रेऽक्षे च परे ॥ गवां किरणानामक्षीव यः स गवाक्षः । टाङका इत्यप्रत्ययः । वातायने रूढोऽयम् । पुंस्त्वं लोकात् ॥ १३ ॥

(त०) व्यवस्थितविभाषा चेयमित्याशयेनाह ॥ **इन्द्राक्षयोः परत इति** ॥१३॥

(ऐ आय्) नायकः । **(औ आव्)** पावकः ॥ १५ ॥

(सु०) **ऐआय्** ॥ ऐराय् स्यात् स्वरे ॥ **औ आव्** ॥ औराव् स्यात् स्वरे ॥१५॥

(त०) नायकः पावक इत्यत्र णीञ्पूञ्धातुभ्यां ण्वुल्तृचाविति वुणि णित्वाद्वृद्धौ अकादेशे च रूपसिद्धिः ॥ १५ ॥

(क्वचित्स्वरवद्यकारः) गव्यूतिः स्त्री क्रोशयुगम् । अन्यत्र गोयूतिः ॥ १६ ॥

(सु०) **क्वचित्स्वरवद्यकारः** ॥ क्वचित्स्वरेण तुल्यं स्वरवद्यकारः स्यात् ॥ स्वरे परे यत्कार्यं भवति तद्यकारे परेऽपीत्यर्थः ॥ तेन गव्यूतिरित्यत्राध्वनः परिमाण एवाव् । "गव्यूतिः स्त्री क्रोशयुगम्" इत्यमरः ॥ अध्वपरिमाणाभावे गोयूतिर्गवां मिश्रीभाव इत्यर्थः॥ ननु गव्यूतिरित्यत्र व्योर्लोपशित्यनेन वकारस्य लोपश् कस्मान्न । उच्यते । व्यवस्थित-विभाषाश्रयणात् संज्ञापूर्वकविधेरनित्यत्वाद्वा(ख) ॥ १६ ॥

(त०) गव्यूतिरिति ॥ "गव्यूतिः स्त्री क्रोशयुगम्" इत्यमरः ॥ 'व्योर्लोपश् वा पदान्ते' इत्यत्र व्यवस्थितविभाषाश्रयणात् गव्यूतिरित्यादौ वलोपो न ॥ १६ ॥

(क्षय्यं जय्यं शक्यार्थे) क्षेतुं शक्यं क्षय्यं जेतुं शक्यं जय्यं सैन्यम् ॥ अन्यत्र क्षेयं पापम् । जेयं मनः ॥ १७॥

(सु०) **क्षय्यं जय्यं शक्यार्थे** ॥ सामर्थ्यार्थे क्षय्यं जय्यमित्यत्राय् निपात्यते । क्षेतुं शक्यं क्षय्यम् । जेतुं शक्यं जय्यम् ॥ 'क्षि क्षये' 'जि जये' आभ्यां तव्यादयोऽर्हेऽर्थे विधौ शक्तौ चेति यः प्रत्ययः । शक्यार्थाभावे तु क्षेतुं योग्यं क्षेयं जेतुं योग्यं जेयम् । नात्राय्॥

(त०) **क्षय्यमित्यादि** ॥ क्षेतुं शक्यं क्षय्यम् । जेतुं शक्यं जय्यम् । क्षि क्षये जि जये इत्यतः स्वराद्यः इति यप्रत्यये गुणे च क्षेयं जेयमिति ॥ १७ ॥

(क्रयार्थे प्रसारितं क्रय्यम्) क्रेयमन्यत् ॥ १८ ॥

(सु०) **क्रयार्थे प्रसारितं क्रय्यम्** ॥ द्रव्यविनिमयार्थेऽय् निपात्यते ॥ अत्र प्रा-

---

(क) पाणिनीयसूत्रे गौरवदोषं प्रदर्श्य लघुमार्गेण प्रक्रियामाह–**तथा चेति** । वस्तुतस्तु सूत्रेमेत स्फोटायनस्य मतेनातो नात्र लाघवगौरवयोर्विचारणा समीचीना । आर्हतमते गौरवस्य ग्रन्थकर्तुरदोषात्।

(ख) व्यवस्थितविभाषा तु कुत्रचिद्भवति कुत्रचिन्न भवतीत्येवं रूपा । तर्हि अत्र यलोपो न भवतीत्युक्तैवादिनो मतेनात्र भवतु इतोऽन्यत्र न भवत्विति शंकया पक्षान्तरं व्याचष्टे **संज्ञापूर्वकेति** ।

ह्का गृह्णीयुरिति बुद्ध्या हट्टे प्रसारितं वस्तु क्रय्यम् । द्रव्यविनिमयाभावे तु क्रेतुं योग्यं क्रेयं क्रयणार्हमित्यर्थः ॥ 'डुक्रीञ्, द्रव्यविनिमये' इत्यस्मात्तव्याद्योऽर्हेऽर्थे इति यः ॥ १८ ॥

(त०) क्रयार्थं प्रसारितं क्रय्यमिति ॥ क्रेतारः क्रीणीयुरिति बुद्ध्या आपणे प्रसारितं क्रय्यं । क्रेयमन्यत् क्रयणार्हमित्यर्थः ॥ १८ ॥

(**अक्षादेरूहिन्यादावग्वक्तव्यः**) अक्षौहिणी सेना । प्रौढः । प्रौढिः । स्वैरम् । स्वैरी । स्वैरिणी ॥ १९ ॥

(सु०) **अक्षादेरूहिन्यादावग् वक्तव्यः** ॥ अक्षादेरक् स्यादूहिन्यादौ परतः ॥ ऊहः समूहोऽस्त्यस्याः सा ऊहिनी अक्षाणामूहिनी अक्षौहिणी । परिमाणविशेषविशिष्टा सेना । संज्ञायां णत्वम् । "सा सेनाऽक्षौहिणी नाम खागाष्टैकद्विकैः २१८७० गजैः । रथैश्चैव २१८७० भाद्व्यौश्विरनैः ६५६१० पञ्चघ्नैश्च पदातिभिः १०९३५० ॥ प्रमाणमिति ॥ प्रौढः । प्रौढिः । अर्थवद्ग्रहणे नानर्थकस्येति उढग्रहणे क्तान्तमेव गृह्यते न तु क्तवत्वन्तस्यैकदेशस्तेन प्रोढवानत्र नाक्(क) । स्वैरम् । स्वेन ईरितुं शीलमस्येति स्वैरी । णिन्यन्तः । अथवा ईरणमीरो घञन्तः । ततो मत्वर्थीय इनिः । स्वैरिणी ङीबन्तः ॥ १९ ॥

(त०) **अक्षादेरूहिन्यादा**विति ॥ अक्ष प्र स्व इत्यक्षादयः । ऊहिनी ईर ईरिणी ऊढः ऊढि इत्यूहिन्यादयः । अग्विधिसामर्थ्यादादौ सवर्णदीर्घो न ॥ **अक्षौहिणीति** ॥ सेनाविशेषस्य संज्ञा । तथा हि । "अक्षौहिण्यामित्यधिकैः सप्तत्या ह्यष्टभिः शतैः । संयुक्तानि सहस्राणि गजानामेकविंशतिः ॥ २१८७० ॥ एवमेव रथानां तु संख्यानं कीर्तितं बुधैः २१८७० । पञ्चषष्टिसहस्राणि षट्शतानि दशैव तु ॥ संख्यातास्तुरगास्तज्ज्ञैर्विना रथतुरङ्गमैः ६५६१० । नृणां शतसहस्राणि सहस्राणि नवैव तु ॥ शतानि त्रीणि चान्यानि पञ्चाशत्तु पदातयः १०९३५० ॥" सप्ततिसहिताष्टशताधिकैकविंशतिसहस्राणि गजाः । इत्यन्त एव रथाः । दशोत्तरषट्शताधिकानि पञ्चषष्टिसहस्राणि अश्वाः । पञ्चाशदुत्तरशतत्रयसहितं नवसहस्राधिकमेकलक्षं पदातय इत्यक्षौहिणीलक्षणम् ॥ १९ ॥

य्वोर्लोपश्वा पदान्ते (ख) । पदान्ते स्थितानामयादीनां यकारवकारयोर्लोपश् वा भवति ॥ त आगताः—तयागताः । पट इह—पटविह । हे सखयिति—हे सख इति । तस्मा इदम्—तस्मायिदम् । ता इह—ता विह ॥ लोपशि न संधिः । नलोपाशि तु भवति छन्दसि च श्वादेरिति निर्देशात् ॥ दामोदरः राजाश्वः ॥ २० ॥

(सु०) **य्वोर्लोपश् वा पदान्ते** ॥ य् च व् च य्वौ तयोर्य्वोः । पदस्यान्तः

(क) अत्रेयमाशंका । प्र—उढवान्—प्रोढवानित्यत्र 'अक्षादेरूहिण्यादावक' इत्यादिना अगागमः कथंनेति। अस्योत्तरमिदम् । ऊहिन्यादावित्यादिपदेन क्तान्तोढपदग्रहणात् 'अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्, इति परिभाषया न क्तवत्वन्तस्य ग्रहणम् । तेन प्रोढवानित्यत्र न अक् । तदुक्तम्—समुदायो हि अर्थवान् तदेकदेशोऽनर्थक इति ।

(ख) 'वापदन्ते' इत्यत्र पदान्ते इत्येव च्छेदः न त्वपदान्त इति अन्यथा—अग्रिमसूत्रेऽप्यपदान्त इत्यनुवृत्तौ हरेर्भानोरित्यादिसिद्धौ ङस्येति सूत्रस्य व्यर्थत्वापत्तेः । वान्त इत्येव वक्तव्ये पदान्त इति तु पर्यायशब्दानां गौरवं लाघवं नाद्रियत इति ।

पदान्तः अन्तशब्दोऽवयववाची । पदं तु विभक्त्यन्तमेव गृह्यते । पद्यते गम्यतेऽर्थोऽनेनेति व्युत्पत्तेः(क) । पूर्वसूत्रेभ्योऽय् अव् आय् आव् इत्यनुवर्तते । अनुवृत्तं च षष्ठ्या विपरिणम्यते । पदान्ते स्थितानामयादीनां य्वोर्लोपश् वा स्यात् । दाम उदरे यस्य स दामोदरः । राज्ञोऽश्वः राजाश्वः । नाम्नो नो लोपशिति लोपशि कृतेऽपि पुनः सन्धिजातः । समासे नलोपशि तु भवतीत्युक्तत्वात् । पदान्ते किम् । नायकः । पावकः । अयादीनां किम् । दध्यानय । मध्वत्र । ननु वृक्षं वाति वेति वा वृक्षवाः वृक्षवीः । वा गतिगन्धनयोः । वी गतिव्याप्तिप्रजननादौ । आभ्यां क्विप् , वृक्षवां वृक्षव्यं वा करोतीति जिडिल्करणे इति जिप्रत्यये टिलोपे च सति स धातुरिति धातुत्वम् । ततः क्विपि जिलोपे च वृक्षव् इति । वृक्षव् इहेत्यादावव्रूपस्य सत्त्वात् वकारस्य लोपश् कस्मान्न । उच्यते । अव् इति रूपस्य लाक्षणिकत्वान्न(ख) । अयादीनां रूपमव्युत्पन्नमेव ॥ २० ॥

(त०) य्वोर्लोपश् वेति । य् च व् च य्वौ तयोः । अनन्तरोक्तत्वादयादीनामेव यकारवकारौ गृह्येते इत्याशयेनाह । अयादीनामिति । अयादयश्च अय् आय् अव् आव् । पदस्यान्तः पदान्तः । अन्तशब्दोऽवयववाची । पदं च विभक्त्यन्तमेव । अयादयश्चैतत्सूत्रभाषिता एव गृह्यन्ते । तेन वृक्षं वातीति वृक्षवाः तं करोति जिडिल्करणे इति 'जिप्रत्यये' टिलोपे च सति 'स धातुः' इति धातुत्वम् । ततः क्विपि जिलोपे च वृक्षविति भवति । वृक्षविहेत्यत्र लोपो न ॥ पदान्तं किम् , नयनम् ॥ श्वादेरिति ॥ श्वा आदिर्यस्य सः श्वादिः तस्य । बहुव्रीहिरन्यार्थे इति समासे 'नाम्नो नो लोपशधौ' इति नलोपशि सवर्णे दीर्घः ॥२०॥

(एदोतोऽतः) पदान्ते स्थितादेकारादोकाराच्च परस्याकारस्य लोपश् भवति ॥ तेऽत्र । पटोऽत्र ॥ २१ ॥

(सु०) एदोऽतोतः ॥ अयवोरपवादः । एच्च ओच्च तयोः समाहारः एदोत् तस्मात् एदोतः । तपरकरणं स्पष्टार्थम् । प्लुतव्यावृत्तिः प्लुत इत्यादिना बोध्या । तेन आगच्छाग्ने३ अत्र तिष्ठ । एहि विष्णो ३ अत्र हविर्भुङ्क्ष्वेत्यादौ न संधिः । प्लुतस्य निषेधादिति(ग) । पदान्ते एदोतः परस्यातो लोपश् स्यात् ॥ पदान्ते किम् । नयनम् । भवनम् ॥ एदोतः किम् । तस्मै अन्नम् । तौ अत्र ॥ अतः किम् । ते आगताः ॥ २१ ॥

(त०) एदोतोऽत इति ॥ एच्च ओच्च एदोत् तस्मात् । तपरकरणं सुखमुखोच्चारणार्थम् ॥ अत इति तपरकरणं दीर्घादिनिवृत्त्यर्थम् । तेन हरे आगच्छेत्यादौ लोपो न ॥ तेऽत्रेति ॥ अत्रापवादत्वाल्लोप एव न त्वयादयः ॥ २१ ॥

(क) अन्तशब्दस्य शेषादिरूपबह्वर्थवाचित्वादन्यार्थप्रतिषेधाकाङ्क्षयाह—**अवयववाचीति ।**

विभक्त्यन्तमेवेति । एवशब्देन न तु नैयायिकानामिवात्र 'शक्तं पदम्' इति तद्व्यवच्छेदः । पदस्य विभक्त्यन्तस्वरूपग्रहणे को हेतुरित्याह-**पद्यते गम्यत इति ।** तथा च वैयाकरणानां विभक्त्यन्तस्यैवार्थवाचकत्वमिति ध्येयम् ।

(ख) **लाक्षणिकत्वादिति ।** लक्षणेन सूत्रेणोक्तो लाक्षणिकः सूत्रानुसम्बन्धद्वारेण कृत इत्यर्थः । वृक्षव् इहेत्यादाववादिरूपस्य लाक्षणिकत्वाभावाल्लोपशोऽभावः ।

(ग) अत्र केचित्—एदोत इति तपरकरणं दीर्घव्यक्तेरेव निर्देशार्थं तेनागच्छाग्ने ३ अत्र तिष्ठेत्यादौ च स्पष्टार्थं वा पूर्वत्र 'प्लुत' इत्यनेन सन्धिनिषेधात् । माधवस्तु—क्वचित् प्लुतस्यपि सन्धिर्भवतीति ज्ञापनार्थं तत् । तेन सुश्लोक ३ इति सुश्लोकेतीत्यादौसिद्धमित्याहेत्याहः ।

(गोर्वा) तेन गोअजिनम्-गोऽजिनम्-गवाजिनम् ॥ २२ ॥

(सु०) गोर्वा ॥ पदान्ते ओदन्तात् गोशब्दात् परस्यातो लोपश्च पक्षे प्रकृतिभावश्च ॥ ओदन्तात्किम् । चित्रग्वग्रम् ॥ पदान्ते किम् । गोः ॥ प्रकृतिभावे गो अजिनम् ॥ अल्लोपे गोऽजिनम् । गोरवेत्यगागमे गवाजिनम् ॥ २२ ॥

(त०) गोर्वेति । गोशब्दादकारस्य लोपो वेत्यर्थः । तेन गोजिनमित्यत्र रूपत्रयम् २२

(सवर्णे दीर्घः सह) समानस्य सवर्णे परे सह दीर्घोभवति ॥ दैत्यारिः । श्रद्धाऽत्र । दधीह । भानूदयः । श्रीशः । होतॄकारः । होत्ॡकारः (क) ॥

"सामान्यशास्त्रतो नूनं विशेषो बलवान् भवेत् ॥
परेण पूर्वबाधो वा प्रायशो दृश्यतामिह" ॥ २३ ॥

(सु०) सवर्णे दीर्घः सह ॥ सवर्णशब्दस्य च ससंबन्धिकत्वात्सवर्णादिति लभ्यते । वर्णशब्दोऽक्षरेऽस्ति । "वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णं तु वाक्षरे ॥" इत्यभिधानात् ॥ सशब्देन तु समानशब्दो लक्ष्यते । नामैकदेशेनापि नामग्रहणस्य संमतत्वात् सगोत्रः सनामेत्यादाविव समानशब्दस्यादेशः स इति वा । ततः समानं च तद्वर्णं च सवर्णं तस्मात् । सवर्णसंज्ञकस्य सवर्णस्यात्रग्रहणं नास्ति किंतु यौगिकस्य ग्रहणं तेन समानसंज्ञात्मको वर्णः समानशब्देन ग्राह्यो न तु तुल्यार्थकः । समानसंज्ञकाद्वर्णात्सवर्णे परे सह दीर्घो भवतीत्यर्थः ॥ सहग्रहणं तूभयोः स्थानित्वलाभार्थं कृतम् । तच्च नामी इति यावदनुवर्तते ॥ ननु विना सहेत्यनेन सहशब्दयोगे तृतीया किं न स्यात् । उच्यते । उपपदविभक्तेः कारकविभक्तिर्बलीयसीत्युक्तत्वात् (ख) सहशब्दयोगे विधीयमाना तृतीयोपपदविभक्तिः । सवर्णे इति सप्तमी तु भावे सामीपिकाधारे वा विहिता कारकविभक्तिः क्रियान्वयित्वात् क्रियापदमध्याहृतं भवति । भवतिनायोगे दीर्घ इत्यत्रान्योक्ते इत्यनेन प्रथमाऽपि कारकविभक्तिः । सवर्णे किम् ॥ दध्यत्र मध्वेतत् । दधीह भानूदयः श्रीशः वधूपमेत्यादौ उकारादौ वकरादिप्राप्तिः सवर्णे दीर्घ इत्यस्य प्राप्तिश्चास्ति तत्र किं भवतीत्यत आह । **सामान्यशास्त्रतो नूनं विशेषो बलवान् भवेत्** ॥ नूनमित्यव्ययं निश्चये विचारे वा । बहुव्यपकं शास्त्रं सामान्यशास्त्रम् । शासनाच्छास्त्रं लक्षणं सूत्रमित्यर्थः ॥ तस्मादल्पव्यापकोऽपवादो भवतीत्यर्थः । यथा रामोऽत्रेत्यादौ लोपशोऽपवाद उत्वम् ॥ सर्वस्मै इत्यादौ ङेरगित्यस्यापवादः स्मट् ॥ कार्येऽणित्युत्सर्गः आतो ङ इत्यपवादः ॥ नुडागम इत्युत्सर्गः सुडागम इत्यपवादः ॥ एवं यत्ववत्वरत्वादिविधिरुत्सर्गः दीर्घविधि-

---

(क) तथा च सवर्णविधौ प्राचामुक्तिः—"क्रमेण वैपरीत्येन गुरूणां गुरुभिः सह । लघूनां लघुभिः सार्द्धं लघूनां लघुभिः—सह ॥ गुरूणां लघुभिः सार्द्धं चतुर्द्धेति सवर्णता ॥" इति ॥ केचित्तु—'अदीर्घो दीर्घतां याति नास्ति दीर्घस्य दीर्घता । पूर्वदीर्घस्वरं दृष्ट्वा परलोपो विधीयते' ॥ इत्युक्तेः श्रद्धात्रेत्यादौ परवर्त्तिनोऽकारस्य लोप इत्याहुः । तन्न । पर्जन्यवल्लक्षणप्रवृत्तिरिति दीर्घस्यापि दीर्घो भवितुमर्हति । अथवा मतं बुद्ध्वा पतञ्जलेरित्युक्तत्वाद् भाष्यविरुद्धत्वेन तदुपेक्ष्यम् । **सामान्येति** । बहुव्यापदं सामान्यमल्पव्यापको विशेषः ।

(ख) पदान्तरयोगनिमित्तिका विभक्तिरुपपदविभक्तिः, कारकनिमित्तिका विभक्तिः कारकविभक्तिः क्रियान्वयित्वस्य कारकत्वात् । तयोर्मध्ये कारकविभक्तिर्लघीयसी भवति । 'अन्तरान्तरेण इति सूत्रे भाष्ये पठितमिदं वचनम् ।

रपवादः ॥ पुनः परिहारान्तरमाह ॥ **परेण पूर्वबाधो वा** ॥ वेति पक्षान्तरे । सूत्रपाठे परेण परपठितेन विधिना पूर्वबाधः क्रियते पूर्वपठितो विधिर्बाध्यत इत्यर्थः ॥ इदं परिहारान्तरं च नित्यान्तरङ्गापवादव्यतिरिक्तस्थले एव द्रष्टव्यम् । तत्र नित्यं बाधकमावश्यकत्वात् ॥ अन्तरङ्गं तु बाधकं लाघवात् । अपवादस्तु बाधको भवति वचनप्रामाण्यात् । नुमागम-इआदेशयोः यथा प्रधीनीत्यादौ परेण नुमा य्वौ वेति यत्वं बाध्यते तथा दीर्घविधिना यत्वादिविधिर्बाध्यते ॥ ननु वारीणां स्त्रीणामित्यादौ परत्वान्नुमियोः सतोर्नुडागमो न स्यादित्यत आह—**प्रायशो दृश्यतामिह** ॥ प्रायश इत्यव्ययं बाहुल्येऽर्थे । इह शास्त्रे पूर्वोक्तो न्यायो बाहुल्येन भवन्निदृश्यतां ज्ञायतां न सर्वत्र(क) । दृशिर्ज्ञापनार्थः । 'दृशिर्ज्ञानेऽक्षिण दर्शने' इत्युक्तत्वात् । कर्मणि लोट् । प्रायश इति कथनात् क्वचित्पूर्वेणापि परविधिर्बाध्यते इति दृश्यताम् । यथा स्त्रीणां वारीणामित्यादावियुनुमौ परावपि पूर्वेण नुटा बाध्येते ॥ २३ ॥

(त०) **सवर्णे दीर्घः सहेति** ॥ सवर्णशब्दस्य ससंबन्धिकत्वात्सवर्णस्येति लब्धम् । सवर्णसंज्ञा च समानस्यैव नान्यस्येति स्पष्टार्थम् ॥ **समानस्येति** । सहयोगे तृतीया तु न उपपदविभक्तित्वात् । सप्तम्यास्तु सामीपिकाधारे विहितत्वात्कारकविभक्तित्वम् । दीर्घ इति प्रथमायाश्चाध्याहृतभवतिना योगादन्योक्त इत्यनेन विहितत्वात्कारकविभक्तित्वम् ॥ 'उपपदविभक्तेः कारकविभक्तिर्बलयसी' इति वचनात् । समानस्येति किम् । हरये॥ **श्रद्धाऽत्रेति** ॥ पर्जन्यवल्लक्षणप्रवृत्तिरिति दीर्घस्यापि दीर्घः ॥ 'यत्तु अदीर्घो दीर्घतां याति' इत्यादि कलापानुसारिभिरुक्तं तद्भाष्यविरोधादुपेक्ष्यम् । 'अलोऽलि दीर्घः' इत्येव सुवचम् ॥ **सामान्यशास्त्रत** इत्यादि ॥ बहुव्यापकं सामान्यम् । अल्पव्यापको विशेषः ॥ २३ ॥

(हलादेरीषादौ टेर्लोपो वक्तव्यः) हलीषा । लाङ्गलीषा । मनीषा । मघोम् । शकन्धुः । कर्कन्धुः । कुलटा । पटत् इति पटिति ॥ सारङ्गः पशुपक्षिणोः । साराङ्गोऽन्यः ॥ सीमन्तः केशवेशे । सीमान्तोऽन्यः(ख) ॥ २४ ॥

(सु०) **हलादेरीषादौ टेर्लोपो वक्तव्यः** ॥ हलादेष्टेर्लोपः स्यादीषादौ परे ॥ 'ईष उञ्छे' 'ईष गत्यादिषु' च । आभ्यां गुरोर्हसादित्यङ्प्रत्यये ईषाशब्दः । हलस्य ईषा हलीषा । लाङ्गलदण्डः । लाङ्गलस्य ईषा लाङ्गलीषा ॥ मनसः ईषा मनीषा ॥ शकानां देशविशेषाणामन्धुः कूपः शकन्धुः ॥ कर्कार्णा राज्ञामन्धुः कर्कन्धुः ॥ अटतीत्यटा । पचाद्यप्रत्ययः । कुलस्याटा कुलटा । यदा तु कुलमटतीति विगृह्येत तदा कार्येऽणित्यण्—

(क) वेदान्तशास्त्रादावयमेव श्लोकार्थो भूतसृष्ट्यादिक्रमे विनियुज्यते । यथा—भूतसृष्टौ प्रथमभूतं बाधित्वा परं महाभूतं समुत्पद्यते । प्रमाणं चात्र—"तस्माद्वा एतस्मादात्मन आकाशः संभूतः, आकाशाद्वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी, पृथिव्या ओषधयः, ओषधिभ्योऽन्नम् , अन्नाद्रेतः, रेतसः प्रजाः, इत्येष भूतसर्गः" इत्यादिषु पूर्वं पूर्वं बाधित्वा उत्तरोत्तरं प्रवर्तत एवोत्तरं पूर्वस्माद्बलवत् ।

(ख) हलादिरीषादिश्चाकृतिगणः, तेन पतञ्जलिर्मार्तण्डश्चेत्यादि सिद्धम् । तथा चोक्तम्—
हलीषा लाङ्गलीषा च मनीषा च तथैव च । शकन्धुरथ कर्कन्धुः सीमन्तः कुलटा तथा ॥
पतञ्जलिश्च सारङ्गो मार्तण्डः पटितीति च । एवं हलादावुन्नेयो यथा पाठो मनीषिभिः ॥

प्रत्यये ईपि च कुलटीनि स्यात् ॥ अन्यस्मिन् अर्थे साराणि प्रधानान्यङ्गानि यस्य स सारङ्गः । टिलोपो न ॥ केशवेशे केशरचनायामर्थे टिलोपो भवति । सीमन्तः । अन्यस्मिन् अर्थे सीमाया अन्तः । सवर्णे दीर्घः । सीम्नो अन्तः सीमान्त इति वा । नाम्नो नो लोपशिति नलोपे कृते दीर्घोऽत्र । 'सीमसीमे स्त्रियामुभे इत्यमरः ॥ २४ ॥

(त०) **हलादेरिति** ॥ हलादेरीपादेश्च आकृतिगणत्वं बोध्यम् । तेन पतञ्जलिःमार्तण्ड इत्यादि सिद्धम्(क) ॥ **हलापेति** ।‌ 'ईषा लाङ्गलदण्डः स्यात्' इत्यमरः ॥ **मनापेति** ॥ 'बुद्धिर्मनीषा धिषणा' इत्यपि च ॥ **शकन्धुरिति** ।‌ शकानां देशविशेषाणामन्धुः कूप इत्यर्थः ॥ **सीमान्तोऽन्य इति** । सीम्नः अन्तः सीमान्तः ॥२४॥

(ओत्वोष्ठयोः समासे वा) ओओ औ अवर्णादोकारे औकारे च परे सह औकारो भवति ॥ बिम्बोष्ठः–बिम्बौष्ठः । स्थूलोतुः–स्थूलौतुः । समासे इति किम् । तवोष्ठः ॥ २६ ॥

(सु०) **ओत्वोष्ठयोः समासे वा** । समासे अकारस्य लोपो वा स्यादोतुशब्दे ओष्ठशब्दे च परे ॥ बिम्बवदोष्ठौ यस्य स बिम्बोष्ठः । स्थूलश्चासौ ओतुश्च स्थूलोतुः । 'ओतुर्बिडालो मार्जारः' इत्यमरः ॥ एकस्मिन्समासे इदं प्रवर्तते । तेनेह न । हे वृषलसुतौष्ठव्रणस्ते इति(ख) । पक्षे औत्वम् ॥ **ओऔ औ** ॥ आद्यौ सप्तम्यन्तौ प्रथमान्तोऽन्त्यः॥२६॥

(त०) **ओत्वोष्ठयोरिति** ॥ ओतुश्च ओष्ठश्च तौ तयोः । अत्र स्वराद्यन्तत्वादोष्ठशब्दस्य पूर्वनिपाते न्याय्ये स्वराद्यदन्तम् इत्यस्यानित्यत्वज्ञापनायेदम् । **स्थूलोतुरिति**॥ स्थूलश्चासौ ओतुश्च स तथा । ओतुर्मार्जारः । ननु वृषलसुतौष्ठव्रणस्ते इत्यत्र कथं न टिलोपः स्यादिति चेत्सत्यम् । ओत्वोष्ठयोश्चैकत्र समासे स्थिताविदं बोध्यम् ॥ २६ ॥

(एदोदादौ धातौ) अवर्णान्तोपसर्गस्य लोपः॥ प्रेजते । उपोषति॥२७॥

(सु०) **एदोदादौ धातौ** ॥ अवर्णोऽन्ते यस्य स अवर्णान्तः अवर्णान्तश्चासौ उपसर्गश्च अवर्णान्तोपसर्गस्तस्य अवर्णान्तोपसर्गस्य लोपः स्यात् ॥ एच्च ओच्च एदोतौ एदोतावादौ यस्य स एदोदादिस्तस्मिन् एदोदादौ जातौ परे ॥ एजृ दीप्तौ कम्पने च । कम्पनार्थस्तु परस्मैपदी प्रेजतीति । प्रेजते इति दीप्त्यर्थः ॥ २७ ॥

(त०) **एदोदादाविति** ॥ एच्च ओच्च एदोत् स आदिर्यस्य स तथा तस्मिन् ॥ प्रेजत इति ॥ एज् दीप्तौ । न तु एजृ कम्पने भ्वादिः तस्य परस्मैपदित्वात् ॥ **उपोषतीति**।

(क) पतञ्जलिरिति । पतन् अञ्जलिर्यस्मिन्नमस्कार्यत्वादिति विग्रहः । अत्र टेरतोलोपः ।

केचित्तु—गोनर्दाख्यदेशे कस्यचिदृषेः सन्ध्योपासनासमये अञ्जलेर्निर्गत इत्यैतिह्यात् अञ्जलेः पतन्निति विगृह्णन्ति । मयूरव्यंसकादित्वात् समासः । **मार्तण्ड इति** । मृतं अण्डं यस्य स मृतण्डः कश्चिदृषिः मृतं अण्डं इति स्थिते सवर्णदीर्घं बाधित्वा अनेन सूत्रेण टेर्लोपः । ततः 'अपत्ये अण्' इत्यणि मार्त्तण्डः । 'परामार्त्तण्डमास्यत्' इति सवर्णदीर्घस्तु च्छान्दसः ।

(ख) वृषल्या सुत इति वृषलसुतः तत्सम्बोधने हे वृषलसुत । ओष्ठयोर्व्रण इति ओष्ठव्रणः । हेवृषलसुत ओष्ठव्रणस्ते–हे वृषलसुतौष्ठव्रणस्ते । इत्यादौ उभयदलयोः समाससद्भावेऽपि ओष्ठशब्दस्य परवर्त्तित्वेऽपि एकसमासाभावान्न टकारस्य लोपः किं तु 'ओ ओ औ' इति औकार एव । तथा च यच्छब्दोत्तरवर्त्तिवर्णमात्रेण सह यच्छब्दपूर्ववर्त्तिवर्णमात्रस्य सन्धिर्विवक्षितस्तयोर्यदि एकसमासमात्रित्वं स्यात् तदा ओष्ठशब्दे ओतुशब्दे च परे टेर्लोपः स्यादित्यर्थः ।

उपदाहे । एदोदादिकं कृत्रिममकृत्रिमं च ग्राह्यं विशेषानुपादानात् एत्येधत्योरिति निषेधाज्ज्ञापनाच्च(क) ॥ २७ ॥

(एदोदादौ नामधातौ वा) उपेडकीयति-उपैडकीयति । प्रोषी-यति–प्रौषीयति ॥ २८ ॥

(सु०) **एदोदादौ नामधातौ वा** ॥ अवर्णान्तोपसर्गस्य वा लोपः स्यात् । एदोदादौ नामधातौ परे ॥ आत्मन एडकमिच्छतीत्येडकीयति । नाम्नो य ई चास्येति यः । आत्मन ओषमिच्छतीत्योषीयति ॥ २८ ॥

(त०) **उपेडकीयति इति** ॥ एडकमिच्छति इति वाक्ये नाम्नो य ई चास्येति सूत्रेण यप्रत्ययेऽकारस्येकारादेशे रूपसिद्धिः । एवं प्रोषीयतीत्यादि ॥ २८ ॥

(एत्येधत्योर्न) उपैति । उपैधते ॥२९॥

(सु०) **एत्येधत्योर्न** ॥ अवर्णान्तोपसर्गस्य लोपो न भवति एतिश्च एधतिश्च इति एत्येधती तयोरेत्येधत्योः परतः ॥ संध्यक्षराद्योरेत्येधत्योरेव । तेनेह न । उपेतः (ख) । मा भवान्प्रेदिधदिति ॥ प्रपूर्वस्य एधतेर्ण्यन्तस्य लुङि परे अङि परे अङि लघाविति ह्रस्वे कृते पश्चाद् द्वित्वे मेट इत्यडागमाभावे रूपम् ॥ २९ ॥

(त०) **एत्येधत्योरिति** ॥ इण् गतौ । एध वृद्धौ ॥ २९ ॥

(प्रस्यैष्यैषयोर्न) एष्यः-एषः । प्रैष्यः-प्रैषः । प्रस्य किम् । अपेषः॥३०॥

(सु०) **प्रस्यैष्यैषयोर्न** ॥ प्रोपसर्गस्याकारस्य लोपो न स्यादेष्यशब्दे एषशब्दे च परे ॥ एदोदादौ धाताविति प्राप्तेऽयं निषेधः । इषु इच्छायां तुदादिः । इष गतौ दिवादिः । इष आभीक्ष्ण्ये क्र्यादिः । एषां धातूनां घञ्प्रत्यये घ्यण्प्रत्यये च एषः एष्यः इति रूपे भवतः । किंच एषसाहचर्यादेष्योऽप्यनव्ययं गृह्यते । तेन ण्यन्तादिषेः क्यपि कृते एष्ये-त्यव्ययम् (ग) । तत्राकारस्य लोपो भवतीत्यर्थः । प्रेष्य गतः इति ॥ ३० ॥

(त०) **प्रैष इति** ॥ इषु इच्छायां तुदादिः । इष गतौ दिवादिः । इष आभी-क्ष्ण्ये क्र्यादिः । घञि घ्यणि च एष एष्य इति रूपे सिद्धे । तत्र लोपे प्राप्तेऽनेन निषेधः । यत्तु ईष उञ्छे यश्च ईष गतिहिंसादानेषु तयोर्दीर्घोपधत्वादीष, ईष्यस्तत्रैत्वे प्रेष्यः ॥३०॥

(एवेऽनवधारणे) अद्येव । अवधारणे त्वद्यैव ॥ ३१ ॥

(सु०) **एवेऽनवधारणे** ॥ अकारस्य लोपः स्यादनिर्धारणे एवशब्दे परे ॥ अद्येव कुरु । अनिश्चयार्थे एवशब्दोऽत्र । निश्चयेऽर्थे त्वकारस्य लोपो न । अद्यैव ॥३१॥

(त०) **एवेऽनवधारणे इति** ॥ एवशब्दे परे अनवधारणेऽर्थे अकारान्तपूर्वपदस्य लोप इत्यर्थः ॥ ३१ ॥

(क) प्रेजत इत्यत्र एजृधातोरेकारस्याकृत्रिमत्वम् यथाप्रकृत्यैव स्थितत्वात् । उपोषतीत्यत्र उषधा-तुसम्बन्धिन ओकारस्य कृत्रिमत्वम् , गुणविधानेन उकारस्य ओकाररूपत्वात् ।

(ख) उपेत इति उपोपसर्गादिते रूपम् ।

(ग) **अव्ययमिति** । क्त्वाद्यन्तं चेत्यादिनाव्ययत्वम् । साहचर्य्यवशादव्ययस्य प्रतिसिद्धत्वात् प्रेष्यगत इत्यादौ लोपनिषेधाभाव एव ।

(अ इ ए) अवर्णादिवर्णे परे सह ए भवति(क) ॥ ममेदम् ॥३२॥

(सु०) अ इ ए ॥ अ इति पञ्चम्यन्तम् । इ इति सप्तम्यन्तम् । ए इति प्रथमान्तं संकेतितम् ॥ ३२ ॥

(त०) अ इ ए इति ॥ अ इति पञ्चम्यन्तमित्यभिप्रेत्याह ॥ अवर्णादिति ॥ इ इति सप्तम्यन्तम् । यत्तु प्राचा अ इत्यस्य प्रथमान्तत्वमङ्गीकृत्य अवर्णे इवर्णे पर इति विवृतं तत्पाणिनीयग्रन्थानुसारित्वादुपेक्षितम् (ख) ॥ ३२ ॥

(उ ओ) अवर्णादुवर्णे परे सह ओ भवति(ग) ॥ गङ्गोदकम् ॥३३॥

(सु०) उ ओ ॥ उ इति सप्तम्यन्तम् । ओ इति प्रथमान्तं संकेतितम् ॥३३॥

(त०) उ ओ इति ॥ उ इति सप्तम्यन्तम् ॥ ३३ ॥

(ऋ अर्) अवर्णादृवर्णे परे सह अर् भवति(घ) ॥ ३४ ॥

(सु०) ऋ अर् ॥ ऋ इति सप्तम्यन्तम् । अर् इति प्रथमान्तं संकेतितम् ॥३४॥

(त०) ऋ अरिति ॥ ऋ इति सप्तम्यन्तम् ॥ ३४ ॥

(हसात्परस्य झसस्य लोपो वा सवर्णे झसे) तवर्धिः । तवर्द्धिः॥३५॥

(सु०) हसात्परस्य झसस्य लोपो वा सवर्णे झसे । हसात्किम् । प्रत्तम् ॥ झसस्येति किम् । शार्ङ्गम् ॥ झसे इति किम् । प्रियपञ्चानाम् ॥ सवर्णे किम् । तर्प्ता ॥ तव ऋद्धिरित्यत्रार् । ततो 'रहाद्यपो द्विः' इत्यनेन पक्षे ऋद्धेर्धस्य द्वित्वम् । द्वित्वाभावे लोपे सति एकधम् । तवर्धिः । लोपाभावपक्षे द्वित्वलोपयोर्वा द्विधम् तवर्द्धिः । द्वित्वे सति लोपे चासति त्रिधम् । तवर्द्द्धिः । यवलाद्यपो द्विर्वेति लक्षणान्तरेण पुनर्द्वित्वे चतुर्द्धमपि बोध्यम् ॥३५॥

(त०) तवर्द्धिरिति ॥ रूपत्रयम् । तथा च द्वित्वाभावे लोपे सत्येकधम् । असति लोपे द्वित्वलोपयोर्वा द्विधम् । सति द्वित्वे लोपे चासति त्रिधम् ॥ ३५ ॥

(ऌ अल्) अवर्णात् ऌवर्णे परे सह अल् भवति(ङ) ॥ ३६ ॥

(सु०) ऌ अल् ॥ ऌ इति सप्तम्यन्तम् । अल् इति प्रथमान्तम् ॥ 'हसेऽर्हे हसः' इत्यनेन लस्य द्वित्वम् ॥ ३६ ॥

(त०) ऌ अलिति ॥ ऌ इति सप्तम्यन्तम् ॥ ३६ ॥

(यवलाद्यपो द्विर्वा) तवल्कारः—तवल्ल्कारः तवल्ल्कारः तवल्ल्ल्कारः॥३७॥

(सु०) यवलाद्यपो द्विर्वा ॥ अर्थवशाद्विभक्तिविपरिणाम इत्यनेन यपाद् यवला

(क) अ इति किम् , मध्विति । इ इति किम् , अद्यात्र । अ इति पञ्चम्यन्तं सांकेतिकम् । अविभक्तिकनिर्देशो वा । इ इति सप्तम्यन्तं तथैव ए इत्यपि प्रथमान्तमेवमुत्तरत्रापि बोध्यम् । अत इत्यनुवृत्त्यैव सिद्धेः अकारग्रहणेन तपरस्तत्कालव्यक्तेरेव ग्राहको न भिन्नकालव्यक्तेरिति प्रमाणदार्ढ्यायेति ।

(ख) प्राचेति । अनुभूतिस्वरूपाचार्यादिभिः । सारस्वतादौ 'अवर्ण इवर्णे पर' इति विवृतिर्दृश्यते ।

(ग) उ किं देवात्र । गङ्गोदकमिति षष्ठीतत्पुरुषे पूर्वपरयोरोकारः ।

(घ) केचिदत्र 'क्वचिदार्' इति वार्त्तिकं पठन्ति तन्नादरणीयम् , वेत्यनुवृत्त्यैवेष्टसिद्धेः । 'प्रवत्सतर' ऋदादौ' इत्यादिशास्त्रस्य जागरूकत्वाद्वा ।

(ङ) कैश्चिदत्र 'क्वचिदाल्' इति वक्तव्यमित्युक्तं तदप्यरुचिकरम् । वेत्यनुवृत्त्यैवेष्टसिद्धेः 'ऌदादौ नामधातौ वाऽऽल्' इति जागरूकत्वाद्वा ।

वा॰द्विरित्यस्य स्थाने यवलादिति पञ्चमी । यप इति प्रथमेति पक्षे ककारस्यापि द्वित्वे तवल्कार इत्यत्र रूपचतुष्टयं भवति ॥ " द्वित्वं लस्यैव कस्यैव नोभयोरुभयोरपि। तवल्कारादिषु बुधैर्बोध्यं रूपचतुष्टयम् ॥ ३७ ॥

(त०) यवलाद्यपो द्विर्वेति 'हसेऽर्द्धहसः' इति द्वित्वविकल्पाच्चत्वारि रूपाणि । एवं प्राल्कारीयतीत्यादावपि बोध्यम् ॥ ३७ ॥

(एऐ ऐ) अवर्णादेकारे ऐकारे च परे सह ऐकारो भवति ॥ तवैषा । देवैश्वर्यम् ३८

(सु०) एऐ ऐ ॥ आद्यौ सप्तम्यन्तौ प्रथमान्तोऽन्त्यः ॥ ३८ ॥

(प्रवत्सतरकम्बलवसनार्णदशभ्य ऋणे) प्रार्णम् । वत्सतरार्णम् । कम्बलार्णम् । वसनार्णम् । ऋणार्णम् । दशार्णः ॥ ३९ ॥

(सु०) प्रवत्सतरकम्बलवसनार्णदशभ्य ऋणे ॥ एषामृणशब्दे परे आर् भवति ॥ इह केचित् वत्सशब्दं प्रक्षिपन्ति(क) । भाष्ये तु वत्सशब्दो नोक्तः । ऋणस्यापनयनाय यदन्यदृणं क्रियते तदृणार्णम् । वत्सतरस्य ऋणं वत्सतरार्णमित्यत्र 'हसेऽर्द्ध हसः' इत्यनेन तकारसकारयोर्द्वित्वविकल्पाच्चत्वारिरूपाणि । 'खपात् शसस्य द्विः' इति वार्तिकेन वा सकारद्वित्वे चतुर्विंशतिः । रेफात्परस्य णस्य तु 'रहाद्यपोद्विः' इत्यनेन द्वित्वे 'यवलाद्यपो द्विर्वा' इति वचनान्तरेण पुनर्द्वित्वे एकणं द्विणं त्रिणमिति द्वादश । दशार्णो देशः ॥ दशार्णा नदी च ॥ ३९ ॥

(त०) प्रवत्सतरेत्यादि ॥ प्रादिभ्यः षड्भ्यः ऋणशब्दे परे सह आर् भवतीत्यर्थः । प्रार्णमित्यादि ॥ प्रकृष्टम् ऋणमिति विग्रहः ॥ वत्सतरार्णमित्यादि ॥ वत्सतरेण देयमृणमित्यादि । एवं कम्बलार्णमित्याद्यपि ॥ ऋणार्णमिति ॥ ऋणस्यापनयनाय यदृणं क्रियते तदृणार्णमित्यर्थः ॥ दशार्णो देशः । नदी च दशार्णा । ऋणशब्दो दुर्गभूमौ जले च । अत्र कालापानुसारिणः वत्सशब्दमपि पठित्वा वत्सेन देयम् ऋणं वत्सतरार्णमित्युदाहरन्ति । तत्सर्वं भाष्यादिविरुद्धम् ॥ ३९ ॥

(ऋदादौ नामधातौ वा) प्रार्षभीयति–प्रर्षभीयति ॥ ४० ॥

(सु०) ऋदादौ नामधातौ वा ॥ अवर्णान्तादुपसर्गादृदादौ नामधातौ परे सह वाऽऽर् भवति ॥ आत्मन ऋषभमिच्छतीति ऋषभीयति । यप्रत्ययः ॥ ४० ॥

(त०) ऋदादावित्यादि ॥ प्रार्षभीयतीत्यादि । ऋषभमिच्छति ऋषभीयति । नाम्नो य ई चास्येति यप्रत्ययः । अवर्णस्येकारः ॥ ४० ॥

(अवर्णान्तादुपसर्गादृकारादौ धातावार्) उपार्छति ॥ ४१ ॥

(सु०) अवर्णान्तादुपसर्गादृकारादौ धातावार् ॥ उपसर्गादिति किम् । खट्वर्छति ॥ ऋकारादौ किम् । उपेतः ॥ धातौ किम् । उपर्कारः ॥ ४१ ॥

(त०) उपार्छतीति ॥ ऋ गतौ भ्वादिः । ऋशादेः पश्यादिरित्यनेनास्य ऋच्छादेशः । ननूपार्च्छतीत्यत्र 'स्नोर्विसर्गः' इत्यनेन रेफस्य विसर्गोऽस्त्विति चेन्न पदान्तत्वाभावात् । न चोपेत्यस्याम्स्यावयवेन सहाविधानात्कथं न पादान्तत्वेति वाच्यम् । ऋच्छ-

(क) केचिदिति कलापानुसारिणः ।

तीत्यस्याप्याद्यावयवत्वेन पदान्तत्वाभावात् (क) ॥ ननूपसर्गग्रहणेनैव धातोराक्षेपे सिद्धे धाताविति ग्रहणं व्यर्थमिति चेन्न(ख) । पदान्तानां समानानामृति ऌति च वा ह्रस्वः इति पाक्षिकह्रस्वस्यापि बाधनार्थं धातुग्रहणम् ॥ ४१ ॥

(अवर्णादृते परे तृतीयासमासे) सुखार्तः । शीतार्तः ॥ तृतीयासमासे किम् । परमर्तः ॥ ४२ ॥

(सु०) अवर्णादृते परे तृतीयासमासे ॥ अवर्णादृते परे सह आर् स्यात् ॥ सुखेन ऋतः सुखार्तः । शीतेन ऋतः शीतार्तः ॥ तृतीयासमासाभावे तु परमश्चासौ ऋतश्च परमर्तः ॥ "ऋतं शिलोञ्छे पानीये पूजिते दीप्तसत्ययोः" इति हेमचन्द्रः ॥ तृतीयासमासार्थवाक्येऽपि न(ग) । तृतीयासमासोऽर्थः प्रयोजनं यस्य तत् तृतीयासमासार्थं तृतीयासमासार्थं च तद्वाक्यं च तृतीयासमासार्थवाक्यं तस्मिन् तृतीयासमासार्थवाक्ये अवर्णादृकारे सह आर् न भवति किं त्वर् ॥ ४२ ॥

(त०) अवर्णादृते पर इति ॥ अवर्णादृतशब्दे परे तृतीयासमासे आर् भवति ॥ इत्यर्थः ॥ सुखार्त इति ॥ सुखेन ऋत इति विग्रहः ॥ समासे किम् । सुखेनर्तः ॥ तृतीयेति किम् । परमर्तः ॥ ४२ ॥

(ऌदादौ नामधातौ वाऽऌ) प्राल्कारीयति—प्राऌकारीयति—प्राल्ल्कारीयति—प्राऌल्कारीयति ॥ ४३ ॥ इति स्वरसन्धिः ३ ॥

(सु०) ऌदादौ नामधातौ वाऽऽऌ ॥ अवर्णान्तादुपसर्गाद् ऌकारादौ नामधातौ सह आल् वा स्यात् ॥ आत्मनः ऌकारमिच्छतीति ऌकारीयति । यप्रत्ययः । प्राल्कारीयति इत्यादावपि पूर्ववद्रूपचतुष्टयं बोध्यम् ॥ ४३ ॥ इति सुबोधिन्यां स्वरसंधिः ३ ॥

(त०) श्रीविद्यानगरस्थायिलोकेशकरशर्मणा । विहितायां हि टीकायां स्वरसंधि रगादयम् ॥

इति तत्त्वदीपिकायां स्वरसंधिः ३ ॥

अथ प्रकृतिभावः ॥ ४ ॥

(नामी) (घ) अदसोऽमीशब्दः संधिं न प्राप्नोति ॥ अमी आदित्याः । अदसः किम् । अम्यत्र ॥ १ ॥

(क) उपाच्छर्छतीत्यत्र रेफं विसर्गं विधातुमाशङ्कते—नन्विति । पदान्तस्थितस्य रेफस्य विसर्गविधानसत्त्वादत्र तु पदान्तत्वाभावात् रेफस्य न विसर्गत्वमित्याह—नेत्यादिना । अव्ययानां विभक्तिलोपेऽपि प्रत्ययलोपे प्रत्ययलक्षणमित्युक्त्या उपस्याकारस्य विभक्त्यन्तत्वेन पदान्तत्वात्तद्घटकीभूतस्य रेफस्य पदान्तत्वमस्तीति शङ्कते—न चेत्यादिना । उपान्तत्वयवत्वेन रेफस्य पदान्तत्वेऽपि ऋच्छतेराद्यवयवत्वेन पदान्तत्वाभावान्न विसर्गं इत्याह—ऋच्छतीत्यादिना ।

(ख) 'प्राग्धातोः' 'उपसर्गा धातोः प्राक् प्रयोक्तव्या' इति वचनेन उपसर्गग्रहणेन धातोराक्षेपसिद्धिरिति बोध्यम् ।

(ग) अयं पाठो मूले निवेशनीयः व्याख्यायां तद्व्याख्यादर्शनात् । उदाहरणं यथा—सुखेनर्तः इति ।

इति टिप्पण्यां स्वरसन्धिः ।

(घ) 'इयं स्वरे' इत्यादिसूत्रस्यापवादकोऽयम्—नामीति । इत आरभ्य एतत्प्रकरणसमाप्तिपर्य्यन्तं प्रकृतिभावो ज्ञेयः । प्रकृत्या यथावस्थितरूपेण भवनं प्रकृतिभावः ।

(छु०) **नामी** ॥ अदस इति वक्तव्यमत्र व्यवस्थार्थे वाऽनुवृत्तेः । अदस्शब्दस्यामीरूपं स्वरे परे संधिं न प्राप्नोति ॥ अदस इति वचनादमो रोगोऽस्यास्तीत्यमी इत्यत्र संधिर्भवत्येव । नामीति ज्ञापकादकारस्य न निषेधः(क) ॥ १ ॥

(त०) **नामी** ॥ अदसोऽमीशब्दस्येकार एव संधिं न प्राप्नोति न त्वकारोऽपि नामीति सूत्रज्ञापकादिति भावः ॥ अमू असाते इत्यत्र य्वे द्वित्वे इत्यनेनैव संधिनिषेधः ॥ अदसः किम् । अम्यत्र । अर्थवद्ग्रहणपरिभाषयाप्येतद्वारयितुं शक्यते तदा(ख)अम्यत्रेति प्रत्युदाहरणं बोध्यम् ॥ अमो रोगः सोऽस्यास्तीत्यमी । अदस एवेति तु वेत्यस्य व्यवस्थितस्यानुवृत्तेः १

य्वे द्वित्वे ॥ ईकारान्त ऊकारान्त एकारान्तश्च शब्दो द्वित्वे वर्तमानः संधिं न प्राप्नोति ॥ अमी अत्र । पटू अत्र । माले आनय । पचेते इमौ ॥२॥

(सु०) य्वे द्वित्वे ॥ ईश्च ऊश्च एश्च एषां समाहारो य्वे । 'एकत्वे द्विगुद्वन्द्वौ' इति नपुंसकस्येति ह्रस्वो न द्विग्वादिसंज्ञापूर्वकत्वेनानित्यत्वात् ॥ अथवा भिन्नमेवेदं पदम् ॥ सर्वत्राविभक्तिकनिर्देशश्च ॥ ननु ईदूतोः स्थाने यवयोः कृतयोः संदेहो भवति किं ह्रस्वयोर्निर्देश उत दीर्घयोरिति । उच्यते । दीर्घयोरेवात्र ग्रहणं न ह्रस्वयोः दीर्घस्यैकारस्य साहचर्यात्(ग) । तेनाकुर्वह्यावामित्यादौ प्रकृतिभावो न । पदग्रहणमित्यनुवर्त्यते । तस्य य्वे इति विशेषणं तदन्तविधिराश्रीयते ईदूदेदन्तं पदमिति । तेन पचेते इमावित्यादौ प्रकृतिभावः सिद्ध्यति । न ह्यत्रैदू द्वित्वेऽस्ति । द्वित्वे इति तु य्वे इत्यस्य विशेषणम् । किंभूतम्, ईदूदेदन्तम्, द्वित्वे वर्तमानम् । ननु कुमार्योरगारं कुमार्यगारं वध्वोरगारं वध्यगारमित्यत्रौसि लुप्ते ईदूदन्तं द्वित्वे वर्तते ततः प्रकृतिभावः स्यात् । उच्यते । ईकारादीनां प्रत्ययत्वस्यासिद्धेर्न प्रकृतिभावः । न ह्यत्र प्रत्ययत्वोपस्थापकं किंचिदस्तीति । यद्वा समासे कृते समुदायस्यैवार्थवत्त्वेन पूर्वोत्तरपदयोरनर्थकत्वान्न प्रकृतिभावः(घ) ॥ "मणी वोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम" इति भारतप्रयोगे तु इवार्थे वशब्दो वा शब्दो वाबोध्यः॥ "वा विकल्पोपमानयोः' इति । "वं प्रचेतसि जानीयादिवार्थे च तदव्ययम् ।"इति मेदिनी(ङ)॥२॥

(क) ननु न अमी नामीत्यत्र कथं सन्धिरिति चेन्न, अदसोऽमीशब्दस्यैकार एव सन्धिं न प्राप्नोति नत्वकार इत्येतत्सूत्रज्ञापकादित्याह—**नामीति** ।

(ख) अयं पाठो 'मुम्बय्याः' कपुस्तक नास्ति का० पुस्तके दृश्यते वस्तुतः समीचीनः ।

(ग) अयम्भावः—'य्वे द्वित्वे' इत्यत्र ईश्च ऊश्च, एश्च य्वे' । अथवा—इश्च उश्च एश्च 'य्वे' इति सन्दिह्यते । सहचरितासहचरितयोः सहचरितस्य ग्रहणमित्युक्तेरेकारसाहचर्य्याद्दीर्घाणामेव ग्रहणं न तु ह्रस्वानामिति । ह्रस्वग्रहणस्य फलमाह—**तेनेति** । अकुर्वह्यावामित्यत्र द्विवचनान्तत्वेऽपि ईकारान्तत्वाभावान्न प्रकृतिभावः । किन्तु 'इयं स्वरे' इत्यादिना यत्वमेवेति भावः ।

(घ) कुमार्य्योरगारं कुमार्य्यगारमित्यादौ 'समासप्रत्यययोः, इति विभक्तिलोपो भवतीत्याह—**औसि लुप्ते इति** । उत्तरमाह—**ईकारादीनामित्यादिना** । प्रत्ययलोपे प्रत्ययलक्षणबलात् प्रत्ययत्वोपस्थितौ सन्ध्यभावः प्रसज्येतेति तत् परित्यज्याह—**यद्वेति** । **अनर्थकत्वादिति** । अर्थवद्ग्रहणे नानर्थकस्य ग्रहणमिति परिभाषयाऽनर्थकत्वं पूर्वोत्तरपदयोर्बोध्यम् ।

(ङ) ननु 'मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम ह्रीयमाणौ हि तौ दम्यौ मकिस्तत्रेदमब्रवीत्'। इति महाभारतश्लोके मणी इवेति द्वित्वेनैत्वेन च प्रकृतिभावे सवर्णदीर्घो न स्यादित्याह—**मणीवोष्ट्रस्येत्यादिना** । अमरोप्याह—'वंवा यथा तथैवैवं साम्य' इति । केचित्तु—'मणीवादिवर्जम्' इति वदन्ति। तेन मणी इव मणीव । रोदसी इव रोदसीव । दम्पती इव दम्पतीवेति । तच्च मुनित्रयानुक्तत्वादप्रमाणमिति तत्त्वदीपिका ।

(त०) ङ्वे द्वित्वे इति ॥ ईकारान्तत्वादिकं च परिनिष्ठितत्वे सति बोध्यम् ॥ ननु कुमार्योरगारं कुमार्यगारं वध्वगारमित्यत्रापि संधिनिषेधः प्राप्नोति ॥ ईकाराद्यन्तस्य द्वित्वे वर्तमानत्वात् प्रत्ययलक्षणेनेति चेन्न । ईकारादिभिर्द्विवचनस्य विशेषितत्वात् ईकाराद्यन्तं द्विवचनमिति निष्कर्षात् । समासे कृते समुदायस्यैवार्थवत्वेन पूर्वोत्तरपदयोरनर्थकत्वाद्वा ॥ नन्वेवमपि अशुक्ले वस्त्रे शुक्ले संपद्येतां शुक्लयास्तां वस्त्रे अत्र प्राप्नोति । अत्र हि ईकारादिमद्द्विवचनान्तत्वं च भवति प्रत्ययलक्षणं नेति चेत्सत्यम् । अत्राप्यकृते ईभावे लुग्भविष्यति च्व्यन्तस्याव्ययत्वेनासंख्यत्वादर्थवत्त्वाद्वा । यत्तु मणीवादिवर्ज्यमिति पठित्वा मणीवाद्युदाहृतं प्राचा तच्च मुनित्रयानुक्तत्वादप्रमाणमिति सन्तः(क) । एवं "मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम" इति भारतप्रयोगसमर्थनाय इवार्थे वशब्दो वाशब्दो वा बोध्यः । "व वा यथा तथैवैवं साम्ये" इत्यमरग्रन्थव्याख्यावसरे ॥ "शात्रवं व पपुर्यशः" इति कालिदासप्रयोगस्याभियुक्तैरुदाहृतत्वात् । "कादम्बखण्डितदलानि व पङ्कजानि" इत्यादिदर्शनाच्चेति भावः ॥ २ ॥

औ निपातः ॥ स्वरो निपातश्च संधिं न प्राप्नोति ॥ अ अपेहि । इ इन्द्रं पश्य । उ उत्तिष्ठ । आ एवं मन्यसे ॥ ३ ॥

(सु०) औ निपातः ॥ औ इति अकारादारभ्य औकारेण प्रत्याहारो ग्राह्यः । ततः स्वरा निपातसंज्ञकश्च स्वरे परे सन्धिं न प्राप्नोति ॥ अ अपेहि । अ इति निषेधाक्षेपयोः ॥ इ इन्द्रं त्वं पश्य । इ इति विस्मये ॥ उ उत्तिष्ठ । उ इति जुगुप्सासंतापान्वर्थाद्यर्थेषु ॥ आ एवं त्वं मन्यसे । पूर्वप्रक्रान्तवाक्यार्थस्यान्यथात्वद्योतकोऽयमाकारः । पूर्वमित्थं न त्वममंस्था इदानीं त्वेवं मन्यसे इत्यर्थः । आ एवं किल तत् । स्मरणद्योतकोऽयमाकारः । ङित आकारस्य तु निपातसंज्ञा नास्ति प्रादिषूपसर्गेषु आङः पाठात् निपातसंज्ञाऽप्रादीनामेवास्ति न तु प्रादीनाम् । ततो ङित आकारस्य प्रकृतिभावो न । आ ईषदुष्णं ओष्णम् । किंच "ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः । एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित्" इति भाष्ये उक्तम् ॥ आङनाङोरर्थ एव भेदकोऽस्ति । स्वराणामपि निपातानिपातविवेकोऽर्थाधीन एव ॥ निपातग्रहणं किम् । अकारो वासुदेवस्तस्य धौ अ इति रूपम् । अ आगच्छ आगच्छेति । उः शम्भुस्तस्य धौ ओ इति रूपम् । औ आगच्छ अवागच्छेति । इः कामस्तस्य धौ ए इति रूपम् । ए आगच्छ अयागच्छेति । स्वररूपनिपातस्य परेण स्वरेण सह संधिनिषेधोऽस्ति । पूर्वेण स्वरेण सह तु संधिर्भवत्येव । जानु उ अस्य रुजतीत्यत्र उकारोकारयोः सवर्णे दीर्घे कृते निपातस्य विकृतत्वात् परेणापि संधिर्भवत्येव जान्वस्येति(ख) ॥ ३ ॥

(त०) औ निपात इति ॥ अकारादिरौकारान्त औप्रत्याहार इत्यभिप्रेत्याह—

(क) मुनित्रयमिति । पाणिनिः, कात्यायनः, पतञ्जलिश्च ।

(ख) इयमत्राशङ्का—ननु जान्वस्य रुजतीत्यत्र उकारस्य निपातत्वात् प्रकृतिभावे कथं सन्धिरिति। इदमस्या उत्तरम्—निपातस्वराणां परवर्तिस्वरेण साकं प्रकृतिभावोऽङ्गीकृतः, नतु पूर्ववर्तिना । तेन च जानूत्तरवर्त्युकारेण सह निपातोकारस्य सवर्णदीर्घे कृते पश्चादुकारनिपातस्य दीर्घोकाररूपेण विकृतत्वात् परवर्तिनाऽस्याकारभागेन सार्द्धम् 'उवम्' इति सूत्रेण सन्धिः ।

स्वर इति ॥ स्वरोऽप्येक एव बोध्यः न तु स्वरान्तः । चार्थे । वेडयोः इत्यादिनिर्देशात् । तेन प्रेदं ब्रह्मेत्यत्र न संधिनिषेधः ॥ निपात इति किम् । चकारात्र जहाराप्राङो न निषेधः । तस्य प्रादिषु पाठेनानिपातत्वात् । चादिर्निपातः इति चादेरेव तत्त्वात् । ङित्वं च भाष्यात् । "इषदर्थे क्रियायोगे मर्यादाभिविधौ च यः । एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित्" इति ॥ आ एवमिति ॥ पूर्वप्रक्रान्तवाक्यार्थस्यान्यथाद्योतकोऽयमाकारः । पूर्वमित्थं नासंस्थाः इदानीं त्वेवं मन्यसे इत्यर्थः ॥ ३ ॥

(ओदन्तो निपातश्च) अहो ईशाः । अहो आगताः ॥ ४ ॥

(सु०) **ओदन्तो निपातश्च** ॥ ओदन्तो निपातश्च सन्धि न प्राप्नोति । निपातः किम् । देवोऽसि ॥ ४ ॥

(त०) **ओदन्त** इति । अत्र भाष्यम् । ओतश्च प्रतिषेधः । ओदन्तो निपात इत्यत्र च्व्यन्तस्य प्रतिषेधो वक्तव्यः । अनदः अदः अभवत् अदोभवत् । तिरोभवत् । इव यथा न स्यात् । स च वक्तव्यो न वक्तव्यः । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्य इत्येव भविष्यति । एवमपि अगौर्गौः समपद्यत गोऽभवत् अत्र प्राप्नोति । एवं तर्हि गौणमुख्ययोर्मुख्ये कार्यसंप्रत्यय इति । तद्यथा—गौरनुबध्यते इत्यत्र न वाहीकोऽनुबध्यते । च्व्यन्तस्य क्त्वाद्यन्तर्गतत्वेन निपातत्वाभावान्नेत्यपरे । निपातः किम् । सुद्योग्रम् । यत्तु मनोरमायां निपातः किम् । देवोऽसि वायवायाहि इति प्रत्युदाहृतं तद्भाष्यविरोधादुपेक्ष्यम् ॥ ४ ॥

(ओदन्तो धौ वेतौ) विष्णो इति-विष्णविति ॥ ५ ॥

(सु०) **ओदन्तो धौ वेतौ** ॥ सम्बोधननिमित्तक ओकारः संधिं वा प्राप्नोति इति शब्दे परे ॥ इतौ किम्, पटोऽत्र ॥ धौ किम्, अहो इति ॥ प्रकृतिभावे विष्णो इति । पक्षे अवादेशः व्योर्लोपशिति वलोपे विष्ण इति । पक्षे विष्णविति ॥ ५ ॥

(त०) **ओदन्तो धाविति** ॥ अवैदिके इतौ बोध्यम्(क) ॥ धाविति किम् । अहो इति । अत्र विकल्पो मा भूत् ॥ ५ ॥

(य्वृणामसवर्णे स्वरेऽसमासे पदान्ते वा ह्रस्वः) चक्रि अत्र—चक्यत्र । मधु एतत्—मध्वेतत् । कर्तृ इदम्—कर्त्रिदम् । ह्रस्वविधानसामर्थ्यान्न सन्धिः । समासे तु हर्यर्थः । पदान्ते किम् । गौर्यौ ॥ ६ ॥

(सु०) **य्वृणामसवर्णे स्वरेऽसमासे पदान्ते वा ह्रस्वः** ॥ इश्च उश्च आ च ते य्वरस्तेषां य्वृणाम् । असमासे पदान्ते स्थितानामिवर्णोवर्णऋवर्णानां प्रकृतिभावो ह्रस्वश्च वा भवत्यसवर्णे स्वरे परे ॥ ह्रस्वपक्षे चक्रि अत्र । प्रकृतिभावे चक्री अत्र । पक्षे यत्वम् । चक्र्यत्र । इह स्कोरिति कस्य लोपो न यत्वस्य बहिरङ्गपरिभाषयासिद्धत्वात्स्थानिवद्भावाच्च । हरेरर्थं इति हर्यर्थः । समासत्वादत्र ह्रस्वप्रकृतिभावौ न ॥ ६ ॥

(त०) **य्वृणामिति** ॥ इश्च उश्च आ च य्वरस्तेषाम् ॥ ६ ॥

(पदान्तानां समानानामृति लृति च वा ह्रस्वः) ब्रह्म ऋषिः

(क) अत्र कौमुदी प्रमाणं तथा च—सम्बुद्धौ शाकल्यस्येतावनार्षे सम्बुद्धिनिमित्तक ओकारो वा प्रगृह्योऽवैदिक इतौ परे । अनार्षे किम् , ब्रह्मबन्धवित्यब्रवीत् इति ।

ब्रह्मर्षिः । दण्डि ऋषिः दण्डयृषिः । वधु ऋकारः वध्वृकारः । होतृ ऌकारः होतॄकारः ॥ पदान्तानां किम् । आर्च्छत् ॥ ७ ॥

(सु०) पदान्तानां समानानामृति ऌति च वा ह्रस्वः ॥ पदान्ते स्थितानां समानानां प्रकृतिभावो ह्रस्वश्च वा भवति ऋकारे ऌकारे च परे ॥ होतृ ऌकारः, ब्रह्माऋषिरित्यादौ प्रकृतिभावार्थमिदम् । टवृगां तु पूर्वेणैव प्रकृतिभावः सिद्ध्यति । समासेऽप्ययं प्रकृतिभावोऽस्ति । तेन सप्तऋषीणामिति । प्रकृतिभावे ब्रह्मा ऋषिः । ह्रस्वे ब्रह्म ऋषिः । संधौ ब्रह्मर्षिः ॥ पदान्ते किम् । आ ऋच्छदित्यत्र आ इत्यस्य ह्रस्वो न । ऋकारे परेऽपि पदान्तत्वाभावात् । ऋच्छदित्यस्य लङि तुदादेरित्य प्रत्यये दिवादावडिति स्वरादेरिति चाडागमयोः कृतयो रूपम् ॥ ७ ॥

(अपादुओ वो वा स्वरे) किम्वुक्तम्—किम् उक्तम् ॥ ८ ॥

(सु०) अपादुओ वो वा स्वरे ॥ अपात्परस्य उञ्निपातस्य वो वा स्यात्स्वरे परे ॥ किमु उक्तम् । वत्वपक्षे किम्वुक्तम् । वस्यासिद्धत्वान्नानुस्वारोऽत्र ॥ ८ ॥

(त०) अपादुञ इति ॥ किम्वुक्तमिति । वत्वस्यासिद्धत्वान्नानुस्वारः । ओदन्तो निपात इत्यारभ्यैतत्पर्यन्तं वेत्यस्य व्यवस्थितस्यानुवृत्तेर्लभ्यत इति बोध्यम् ॥ ८ ॥

दूराद्दाह्वाने टेः प्लुतः ॥ दूरात्संबोधने यद्वाक्यं तस्य टेः प्लुतो वा ॥ प्लुतः संधिं न प्राप्नोति । एहि देवदत्त ३ अत्राधीष्व(क) ॥ ९ ॥

(सु०) दूराद्दाह्वाने टेः प्लुतः ॥ दूरत्वमिहाह्वानापेक्षं बोध्यते न देशापेक्षं पुरुषापेक्षं च गृह्यते । आह्वाने इति सम्बोधनमात्रोपलक्षणम् । तेनाह्वानादन्यत्रापि भवति । सक्तून्पिब देवदत्त ३ इति । आह्वाने इत्याधारे सप्तमी । आधारश्चाधेयमपेक्षते । आधेयं च वाक्यमेव । तेनैवाह्वानसंभवात् । सम्बोधने वाक्यस्य टेः प्लुतो वा स्यादित्यर्थः । ह्रस्वदीर्घव्यक्त्योरुच्चारणात्स्वरूपलिखनाच्च भानं प्लुतव्यक्तेरुच्चारणादेव ॥ ९ ॥

(त०) दूराद्दाह्वान इति ॥ दूरत्वमिहाह्वानापेक्षं न तु देशापेक्षं पुरुषापेक्षं वा । वाक्यस्य टेरिति ॥ वाक्यं च सामर्थ्याल्लभ्यते ॥ आह्वाने इत्याधारे सप्तमी । आधारश्चाधेयमपेक्षते । आधेयं च वाक्यमेव । तेनैवाह्वानसंभवात् इति नव्याः । सम्बोधनमात्रोपलक्षकम् इत्यभिप्रेत्याह ॥ दूरात्संबोधन इति ॥ ९ ॥

(हैहेप्रयोगे हैहयोः प्लुतो वा) है अम्ब—हायम्ब । हे ईश-हयीश १०

(सु०) हैहेप्रयोगे हैहयोः प्लुतो वा ॥ हैहेप्रयोगे दूरात्संबोधने यद्वाक्यं तत्र हैहयोरेव प्लुतो वा स्यात्(ख) ॥ प्लुताभावे आय् । हायम्ब । हयीशेत्यत्र अय् ॥ १० ॥

(क) दूरादिति । दूराद्दाह्वाने गाने रोदने विचारे च गम्यमाने टेः प्लुतः स्यादिति सारस्वतम् । यद्यपि दूरत्वमव्यवस्थितं तथापि प्राकृतप्रयत्नाधिक्यप्रयत्नाश्रयणेन यत्र भवति तज्ज्ञेयम् । आह्वानस्य रोदनाद्युपलक्षणत्वाद्गाने इत्याद्युक्तिरिति तत्र वासुदेवः । इह गानरोदनयोः प्रसिद्धम् । विचारे अधःस्विदासीदुपरिस्विदासीदित्यादौ ।

(ख) "गुरोरनृत" इत्यनेन च सिद्धे किमर्थमिदमित्याशंक्य नियमार्थमिदं व्याचष्टे–हैहयोरेवेति । हैहयोरेवेति नियमार्थमिति भावः । देहि है ३ अम्ब, देहि हे ३ अम्बेत्यत्र हैहयोरेव प्लुतः । न तु गुरोरनृतोः'इत्यन्यस्यापीत्येतत् हैहयोरित्यनेन लभ्यत इति यावत् । प्रयोगग्रहणाभावे वाक्यस्य टेरित्यधिकाराद् अम्ब है ३ अम्ब हे ३ इत्यत्रैव स्यात् । अतः प्रयोगग्रहणम् । ततश्च अनन्त्ययोरपि तयोः प्लुतो भवति ।

(सप्तम्यर्थे ईत् संधिं न याति) वातप्रमी आस्ते । ययी इदम् । पपी एषः(क) ॥ ११ ॥

(सु०) **सप्तम्यर्थे ईत्संधिं न याति** ॥ सप्तम्यर्थे संसिद्धमीकारान्तं पदं संधिं न प्राप्नोति ॥ अर्थग्रहणात्समासे मा भूत् । वाप्यामश्वो वाप्यश्व इत्यत्र वापीशब्दो वाप्यधिकरणकद्रव्ये उपसंक्रान्तो न तु सप्तम्यर्थे(ख) । वातप्रमीययीपपीशब्दा औणादिकेकारान्ताः सन्ति तेषां सप्तम्येकवचने सवर्णे दीर्घे रूपम् ॥ ११ ॥

(त०) **सप्तम्यर्थे** इति ॥ अर्थग्रहणं किम् । वाप्यामश्वो वाप्यश्वः । इह यथा न स्यात् । अथ क्रियमाणेऽप्यर्थग्रहणे कस्मादेवात्र न भवति जहत्स्वार्था वृत्तिरिति सप्तम्यर्थाभावात् । अथाजहत्स्वार्थायां वृत्तौ दोष एवेति चेन्न । समुदायार्थोऽभिधीयते ॥ ११ ॥

(इतौ वा उञ्) उ इति–विति ॥ १२ ॥

(सु०) **इतौ वा उञ्** ॥ उञ् निपातः सन्धिं वा प्राप्नोति इतिशब्दे परे ॥ ओ निपात इति नित्यं प्राप्ते विकल्पोऽयम् ॥ १२ ॥

(त०) **इतौ** वेति ॥ उभयत्र सानुबन्धक एव गृह्यते ॥ १२ ॥

(अप्लुतवदितौ) देवदत्तेति ॥ १३ ॥

(सु०) **अप्लुतवदितौ** ॥ प्लुतोऽप्लुतवद्भवति इतिशब्दे परे ॥ अप्लुतवत्कार्यं यत्वादिकं करोतीत्यर्थः ॥ १३ ॥

(त०) **अप्लुतवदिति** ॥ अत्रापि अवैदिके इतौ बोध्यम्(ग) । वत्किम् । अग्नी इति इत्यत्र यथा न स्यात् ॥ १३ ॥

(गुरोरनृतोऽनन्त्यस्यापि वा पर्यायेण प्लुतः) दे ३ वदत्त–देवद ३ त्त । अपिशब्दादन्त्यस्याप्यगुरोर्वा पर्यायेण प्लुतः । देवदत्त ३॥ गुरोः किम् । वकारादकारस्य मा भूत् ॥ अनृतः किम् । कृष्ण ३ गौश्वरति ॥ १४ ॥ इति प्रकृतिभावः (घ) ॥ ४ ॥

(क) **सप्तम्यर्थे ईदिति** । अत्र ऊदित्यपि पाठ्यम् । तेन मामकी तनू इतीति । तथोक्तं पाणिनिना-**ईदूतौ च सप्तम्यर्थे** । १–१–१९ । सप्तम्यर्थे पर्यवसन्नमीदूदन्तं प्रगृह्यं स्यात् । सोमो गौरी अधिश्रितः । मामकी तनू इतीति कौमुद्यां स्पष्टम् ।

(ख) **वाप्यामश्वो वाप्यश्व इति** । वाप्यामश्व इति विग्रहे सुप्सुपेति समासे वाप्यश्व इति रूपमित्यर्थः। अत्र वाप्यामिति सप्तम्या अधिकरणत्वमवगतम् । तच्चाधिकरणकारकं क्रियापेक्ष्यम् । तत्र वाप्यामश्वो वर्त्तते इति क्रियाध्याहारे वर्त्तमानक्रियायां वाप्या अधिकरणत्वेन अश्वस्य कर्तृत्वेनान्वयात्तयोः परस्परमन्वयाभावादसामर्थ्यात्समासो नोपपद्यते वाप्यां विद्यमानोऽश्व इति विद्यमानपदस्याध्याहारेऽपि अश्वपदेनासामर्थ्यात्समासो न सम्भवति । अतः वाप्यामित्यत्र वाप्यां विद्यमानेऽश्वे लक्षणया प्रवृत्तिं पुरस्कृत्य समासो वक्तव्यः । एवं च समासे लुप्तसप्तमीकस्य वापीशब्दस्य सप्तम्यर्थमतिलंध्य तत्संसृष्टे आधेयभूतेऽश्वेऽपि प्रवृत्तेः सप्तम्यर्थमात्रविश्रान्त्यभावान्न प्रगृह्यत्वमिति भावः ।

(ग) **अवैदिक इति** । तथा च पाणिनीये—'**अप्लुतवदुपस्थिते**' । उपस्थितोऽनार्ष इति शब्दः, तस्मिन् परे प्लुतोऽप्लुतवद्भवतीति । अनार्ष अवैदिक॥ (घ) प्रकृतिभावे एतल्लोकाद्बोध्यम्–यथा पाणिनीये,

"**प्रत्यभिवादेऽशूद्रे** । अशूद्रविषये प्रत्यभिवादे यद्वाक्यं तस्य टेः प्लुतः स्यात् । स चोदात्तः । अभिवादये देवदत्तोऽहम् । आयुष्मान् भव देवदत्त ३ । **स्त्रियां न**' अभिवादये गार्ग्यहम् । आयुष्मती भव

(सु०) गुरोरनृतोऽनन्त्यस्यापि वा पर्यायेण प्लुतः ॥ दूरात्संबोधने यद्वाक्यं तस्य ऋन्भिन्नस्यानन्त्यस्यापि गुरोर्वा पर्यायेणानुक्रमेण प्लुतः स्यात् ॥ एकत्र दे इत्येकारस्य प्लुतता । अन्यत्र द इत्यकारस्य प्लुतता । त इत्यकारस्य तु 'दूराद्धूते टेः प्लुतः' इत्यनेन प्लुतसंज्ञा । प्रकृतेर्मूलरूपस्य भवनं प्रकृतिभावः ॥ १४ ॥

इति सुबोधिन्यां प्रकृतिभावः ॥ ४ ॥

(त०) गुरोरनृत इति ॥ अपि शब्दो गुरोरगुरोश्च टेः प्लुतार्थः ॥ १४ ॥

श्रीविद्यानगरस्थायी क्षेमङ्करसुतोऽकरोत् । श्रीलोकेशकरो व्याख्यां संध्यभावस्य सत्तमाम् ॥

इति तत्त्वदीपिकायां प्रकृतिभावः ॥ ४ ॥

अथ हससन्धिः ॥ ५ ॥

चपा अबे जबाः ॥ पदान्ते वर्तमानाश्चपा जबा भवन्त्यबे परे ॥ षडत्र । वाग्यथा (क) ॥ १ ॥

(सु०) **चपा अबे जबाः** ॥ पदान्त इत्यनुवर्तते(ख) । पदान्ते वर्गप्रथमास्तृतीया भवन्त्यबे परे ॥ पदान्ते किम् ॥ वाचौ । भवन्तौ । बहुवचनं सर्वव्यक्तिषु तात्पर्यबोधनार्थम् ॥ १ ॥

(त०) **चपा अबे जबाः** ॥ अत्र लघुभाष्यम् । झपा इति पाठ्यम् । समिदत्र ककुबत्र अग्निमद्मानमित्यादावव्याप्तिर्यथा न स्यात् । यद्वा अबे जबा इत्येव कर्तव्यम् । पदान्त इत्यनुवर्तते । पदान्ते वर्तमानस्य जबा भवन्त्यबे परे इत्यर्थः ॥ स्वराणां पूर्वविधयो बाधकाः । हसानां तूत्तरविधय इति । अत्रोच्यते । तयागताः पटविद्देत्यादौ अतिप्रसङ्गवारणाय तावत् अन्यतरद्वक्तव्यम् । तत्र व्यक्तिलाघवाच्चपग्रहणमेव कर्तव्यम् । न चोक्तदोषः 'वाऽवसाने' इतीष्टसिद्धेः । अवसानं किमिति चेत् , अन्त एवेति गृहाण ॥ विद्यावसानमित्यादिप्रयोगदर्शनात् । अत्रार्थे चपग्रहणस्यापि मानत्वात् इति । अत्रेदमवधेयम् । 'वाऽवसाने' इत्यत्रावसानशब्दस्यान्तवाचकता नोचिता । 'विरामोऽवसानम्' इत्यनेन वर्णाभावस्यावसानसंज्ञां कुर्वता सूत्रकारेण विरुद्धत्वात् । किं चैवं भवत्पुत्रः बृहत्फणी महत्खण्डनं इत्यादिषु 'वाऽवसाने' इत्यनेन पक्षे दकारश्रवणापत्तेः । न चेष्टापत्तिः, तदसाधुत्वस्य सर्वत्र दर्शनात् । न च ककुबत्रेत्यादौ अव्याप्तिपरिहारः कथमिति चेत् । इत्थम् । 'ञमे ञमा वा' इत्यत्र व्यवस्थितविभाषाश्रयणात् झपानामपि जबा ञमाश्च

गार्गि । नाम गोत्रं वा यत्र प्रत्यभिवादवाक्यान्ते प्रयुज्यन्ते तत्रैव प्लुत इष्यते । नेह । आयुष्मानेधि । भोराजन्यविशां वेति वाच्यम् । आयुष्मानेधि भोः ३ । आयुष्मानेधीन्द्रवर्मन् ३ । आयुष्मानेधीन्द्रपालित"॥

एवं च—"ई ३ चाक्रवर्मणस्य । ई ३ कारः प्लुतोऽचि (स्वरे) परेऽप्लुतवद् वा स्यात् । चिनु हि ३ इति चिनुहीति । चिनु हि ३ इदम्—चिनुहीदम् । उभयत्र विभाषेयम्" ।

ऊँ । उञ इतौ दीर्घोऽनुनासिक प्रगृह्यश्च ऊँ इत्ययमादेशो वा स्यात् । ऊँ इति—विति ।'

इति श्रीनवकिशोरकरकृतचक्रधराख्यटिप्पण्यां स्वरसन्ध्यन्तर्गतप्रकृतिभावप्रकरणम् ॥ ४ ॥

(क) **चपा इति** । अत्र वासुदेवः । यद्यपि खसे चपा इति विशेषविधेः प्राक् इत्यादाववसाने च पक्षे चपविधानसामर्थ्यादिव तदप्राप्तौ परिशेषादवपरत्वप्राप्तौ अबग्रहणं व्यर्थम् । तथापि 'चपाच्छः शः' इत्युत्तरसूत्रेऽनुवृत्त्यर्थं । ततश्च वाक्श्चोतति इत्यादौ तदभावः । चपानां झपोपलक्षणाद्विपरीतनिर्देशाद् वा समिध इन्धनं यस्येति समिदिन्धनम् अग्निमञ्जानमित्यादावपि जबाः ।

(ख) 'ख्योर्लोपश्च वा पदान्ते' । इत्यतः पदान्त इत्यनुवर्तते ।

भवन्तीति व्याख्यानात् । तन्मयमित्यादौ ञमकरणार्थं प्रत्यये ञमे जबस्यापीति भवद्भिरपि व्यवस्थितविभाषाश्रयणस्य स्वीकृतत्वात् । अथ भवत्पुत्र इत्यादौ 'खसे चपा झसानाम्' इति सूत्रेण पाक्षिकदकारस्यापि तत्त्वेन रूपसिद्धिरिति चेत्सत्यम् । 'खसे चपा झसानाम्' इति सूत्रं प्रति तु 'वाऽवसाने' इत्यस्य बहिरङ्गत्वेनासिद्धत्वात् । किं च तच्छिव इत्यत्र तदो 'वाऽवसाने' इति चर्त्वे कृते पश्चाच्छिव इत्यनेन सम्बन्धे 'झलां जशोऽन्ते' इति जश्त्वे 'खरि च' इति चर्त्वमिति व्याकुर्वतां कृष्णपण्डितानां मते भाविन्यवसानभङ्गे अकृतव्यूहपरिभाषया कृतमपि शास्त्रं निवर्तयन्तीत्यनया वा 'वाऽवसाने' इत्यस्याप्रवृत्तेरित्युक्त्या दूषयतां भट्टोजिदीक्षितानां मतेनातिविरोधात् इति दिक् ॥ अवग्रहणं किम् । जगत्सर्वमित्यादौ खसे मा भूत् । अथ तत्र 'खसे चपा झसानाम्' इत्यस्यैव प्रवृत्तिरिति चेत्तर्हि उत्तरार्थमवग्रहणं स्पष्टार्थमिहैव कृतम् ॥ पदान्त इति किम् । त्वचौ ॥१॥

ञमे ञमा वा ॥ पदान्ते वर्तमानाश्चपा ञमे परे ञमा वा भवन्ति ॥ षण्मम–षड्मम । वाङ्मधुरा–वाग्मधुरा(क) ॥२॥

(सु०) **ञमे ञमा वा** ॥ पदान्ते इत्यनुवर्तते । पदान्ते वर्गप्रथमाः पञ्चमाः स्युः पञ्चमे परे ॥ पदान्ते किम् । वच्मि । पाप्मा । यत्नः । पक्षे तृतीयाश्चपा अबे जबाः इत्यनेनैव २

(त०) **ञमे ञमा वेति** ॥ अत्रापि पदान्त इत्यनुवर्तते । तेन वच्मीत्यादौ न । वाशब्दोऽत्र व्यवस्थावाची । तेन क्वचित् झपानामपि ञमा भवन्ति । प्रत्यये च नित्यतालाभः । यत्तु कश्चिन्मयटि नित्यमित्युक्तं तद्भाष्यविरोधादुपेक्ष्यम् (ख) ॥ चपा इति किम् । विष्णो मां रक्षेत्यादौ स्वरस्य मा भूत् ॥ २ ॥

(प्रत्यये ञमे जबस्यापि नित्यम्) तन्मयम् । चिन्मात्रम् ॥३॥

(सु०) **प्रत्यये ञमे जबस्यापि नित्यम्** ॥ वर्गतृतीयानां पञ्चमा भवन्ति प्रत्ययसम्बन्धिनि ञमे परे ॥ अपिशब्दाद्वर्गप्रथमानामपि ॥ कथं तर्हि रघुकाव्ये 'मदोदग्राः ककुद्मन्तः' इति । उच्यते । यवादिगणे दकारस्य निपातनान्न ञमो भवतीति कौमुदी ॥ क्वचिज्जबस्यापि ञमो भवति 'त्वन्मदेकत्वे' इति ज्ञापकात् ॥ तत्स्वरूपमस्येति तन्मयम् । प्राचुर्यविकारप्राधान्यादिष्विति मयट् ॥ चित्प्रमाणमस्येति चिन्मात्रम् । प्रमाणे द्वयसट्दघ्नट्मात्रटः इति मात्रट् ॥ ३ ॥

चपाच्छः शः ॥ पदान्ते वर्तमानाच्चपादुत्तरस्य शकारस्य छो वा भवत्यबे परे ॥ वाक्छूरः वाक्शूरः ॥ अबे किम् । वाक्श्च्योतति ॥४॥

(सु०) **चपाच्छः शः** ॥ चपादुत्तरः शकारः छकारो वा भवत्यबे परे ॥ चपादिति किम् । प्रशान् शेते ॥ अबे इति किम् । वाक्श्च्योतति ॥ शः किम् । वाक्साधुः ॥ ननु चपाच्छऽ श इत्युक्ते सन्देहो भवति किं शस्य छः छस्य शो वेति । लोका-

---

(क) **ञमे इति** । अत्र वासुदेवः । वा शब्दस्य व्यवस्थिताव्यवस्थितविकल्पार्थत्वान्मयटि नित्यम् । चिन्मयम् । यत्तु प्रत्ययेऽञमे नित्यविधेर्वाङ्मात्रमित्येकमेव रूपमिति । तदयुक्तम् । एवं विधे नियामकाभावात् मयटि नित्यं वाच्यमित्युक्तेः कलापादिषु प्रत्ययग्रहणं विशेषपरं ज्ञेयम् । अपा अबे जबा इत्यतो झपोपलक्षितचपानुवृत्तेर्मृन्मयं ककुन्मयमम्ममन्नयनमित्यादौ झपानामपि ञमाः ॥

(ख) **यत्तु** । इति मतं पूर्वमुपदर्शितम् ।

च्छेषस्येति निर्देशान्न सन्देह इति (क) ॥ ४ ॥

(त०) चपाच्छः श इति ॥ पदान्त इति किम् । विरप्शम् । रपेर्विपूर्वादौणादिकशप्रत्यये रूपमेतत् इति प्राञ्चः । तच्चिन्त्यम् । विरप्शमित्यस्य छान्दसत्वलाभात् । छन्दसि दृष्टानुविधिस्वीकारात् इत्युक्तं लघुभाष्ये । तत्रेदमवधेयम् । विरप्शमित्यस्य पदान्तप्रत्युदाहरणत्वमेवोचितं पतञ्जलिसंमतत्वात् ॥ किं च 'शच्छोऽटि' इत्यस्य हि पदान्ताज्झयः परस्य शस्य छ इत्यर्थ आकरे स्थितः । विपूर्वाद्रपेरौणादिकशप्रत्यये 'मध्वश्च्योतन्त्यभितो विरप्शम्' इत्यादौ यथेति मनोरमायामुक्तवतां दीक्षितानां मतेन विरोधात् छान्दसत्वादित्यस्यागतित्वेनोपेक्षितत्वात् ॥ चपादिति किम् । प्रशान् शेते ॥ अचे इति किम् । वाक्श्च्योतति ॥ शः किम् । वाक्साधुः । ननु चपा इत्यनुवर्त्यार्थवशाद्विभक्तिविपरिणामं कृत्वा चपादिति व्याख्याऽऽश्रीयते इति चेत् तदुत्तरार्थं तच्च 'हो झभाः' इत्यत्र वक्ष्यते । इहार्थं च । अत्र तन्त्रादिना वाक्यद्वयमाश्रीयते । तत्राद्य उक्त एव । द्वितीयस्तु चपमततीति चपात् चेन सहितः छः तस्य शो अमे । तेन च प्राङ्मात्यादौ शत्वम् । विधेयस्य पूर्वनिर्देशस्त्वसन्देहार्थः । 'चपाच्छः छः' इत्युक्ते सन्देहः स्यात् ॥ ४ ॥

हो झभाः । चपादुत्तरस्य हकारस्य झभा वा भवन्ति ॥ यद्वर्गगश्चपस्तद्वर्गगश्चतुर्थो भवति ॥ तद्धविः–तद् हविः । वाग्घरिः–वाग्हरिः (ख) ॥ ५ ॥

(सु०) हो झभाः ॥ 'चपाच्छः शः' इत्यतश्चपादित्यनुवर्तते । चपात्परस्य हस्य स्थाने झभाः स्युर्वा ॥ निमित्तादेशयोश्चपझभयो समसंख्ययोर्यथाक्रमं वक्ति । यद्वर्गगश्चपस्तद्वर्गगश्चतुर्थो भवतीति ॥ चात्परस्य हस्य झः । टात्परस्य हस्य ढः । तात्परस्य हस्य धः । कात्परस्य हस्य घः । पात्परस्य हस्य भः इति । उपादिति किम् । भगवन् हरे ॥ हस्येति किम् । तत् षष्ठम् ॥ वाग्घरिः । वर्गचतुर्थाभावे वाग्हरिः । उभयत्र जश्त्वम् ॥ ५ ॥

(त०) हो झभा इति ॥ चपादित्यनुवृत्तेर्नेह । भगवन् हरे ॥ हकारस्येति किम् तत्षष्ठम् ॥ चपानां झपानां च यथाक्रमं प्रवृत्तिरित्याह ॥ यद्वर्गग इति ॥ ननु उद्दिश्यमानविधीयमानयोर्यथाक्रमं प्रवृत्तिर्भवतीति वचनं विना कथं यथाक्रमं लभ्यत इति चेन्न ज्ञापकाद्वचनमस्तीति अनुमानात् । ज्ञापकं तु 'सैषाद्धसे' इति सूत्रे तकारात्परस्य धकारकरणम् ॥ ५ ॥

स्तोः श्चुभिः श्चुः ॥ सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ भवतः (ग) । उद्दिश्यमानप्रतिनिर्दिश्यमानयोर्यथाक्रममिति वाच्यम् ॥ कश्चरति । कश्शूरः । तच्चित्रम् । तच्छादयति ॥ ६ ॥

(क) अत्र वासुदेवः । विपरीतनिर्देशोऽसन्देहार्थः । अन्यथा कार्यान्तरवृत्त्यर्थं छस्यैव छविधिरिति सन्देहः स्यात् । इति ॥ (ख) यद्वर्गग इति । अयं भावः । घोषवत्त्वनादवत्त्वमहाप्राणत्वसोष्मत्वादिधर्मैश्चपचतुर्थहस्यान्तरतमत्वाज्जुहोतीत्यादौ हस्थाने वर्गचतुर्थादेशार्थमिदं प्रसङ्गादत्रोक्तम् । अत्र निमित्तनैमित्तिकयोर्यथासङ्ख्येनाप्युपपत्तेरिति । (ग) स्तोरिति । स् च तुश्चेति समाहारद्वन्द्वे छान्दसो लिङ्गव्यत्ययः । 'अनित्यमागमानुशासनम्' इति वा नुमभावः । इतरेतरयोगे वा तत एव वचनव्यत्ययः ॥ यद्यप्यकारान्तत्वेन तोः पूर्वनिपातत्वं प्राप्नोति तथापि श्लिष्टोच्चारणेन लाघवात्सस्य सोष्मत्वादिगुणेन प्राधान्यात् पूर्वनिपातनियामकस्य वक्तव्यत्वात् सौत्रत्वाद्वा पूर्वम् ।

(सु०) स्तोः श्चुभिः श्चुः ॥ स् च तुश्चानयोः समाहारः स्तु तस्य स्तोः आगमजमनित्यम् इत्युक्तत्वान्न नुम्। अथवा सा सहितः तुः स्तुः तस्य स्तोः। शाकपार्थिवादित्वान्मध्यमपदलोपः(क)। श् च चश्च श्चवस्तैः श्चुभिः। श्चुरिति पुंलिङ्गनिर्देशोऽयमित्येके। नपुंसकनिर्देशोऽयमित्यन्ये। श्चुभिरिति सहादियोगं विनाऽपि सहार्थे तृतीया। सिनेति निर्देशात्। अत्र स्थान्यादेशयोर्यथासंख्यमस्ति। निमित्तस्थानिनोस्तु न यथा संख्यम् 'न शात्' इति ज्ञापकात्। उद्दिश्यते इति उद्दिश्यमानः स्थानी। निर्दिश्यते विधीयते यः सः निर्दिश्यमानः आदेशस्तयोर्यथाक्रमं यथा-सख्यं वक्तव्यम्। चवर्गयोगे कश्चरतीति ॥ कश्शूर इत्यत्र शसे वेत्यस्य पाक्षिकत्वाद्विसर्जनीयस्य सस्तस्य शकारेण योगे शः। तच्चित्रमित्यत्र चवर्गयोगे तवर्गस्य चुत्वम्। तच्छिव इत्यत्र शकारेण योगे तोश्चुत्वम् ॥ ६ ॥

(त०) स्तोः श्चुभिः श्चुरिति ॥ स् च तुश्च अनयोः समाहारः स्तुः तस्य स्तोः। एकत्वे द्विगुद्वन्द्वावित्यस्यानित्यत्वान्न क्लीबत्वम्। तज्ज्ञापकं चेदमेव। सा सहित इति वा शाकपार्थिवादिः श् च चवश्च श्चवः तैः श्चुभिः। श्चुना इत्यत्रार्द्धमात्रागौरवाद्बहुवचनम्। अत्र स्थान्यादेशयोर्यथासंख्यं निमित्तकार्यिणोस्तु न 'न शात्' इति ज्ञापकात् इत्यभिप्रेत्याह—**संख्यासाम्य** इति। समस्य भावः साम्यं संख्यायाः साम्यं संख्या साम्यम्, तस्मिन् ॥ क्रममनतिक्रम्य यथाक्रमम्। यावत्संख्याकस्योद्दिश्यमानस्य तावत्संख्याकमेव प्रतिनिर्दिश्यमानं भवतीत्यर्थः। स्तोः श्चौ श्चुरीत्येव सुवचम् ॥ नच 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति परिभाषोपस्थानेन यज्ञः याच्ञा इत्यादि न सिद्ध्येत्। 'न शात्' इति लिङ्गेन तस्या अनुपस्थानाभ्युपगमात् ॥ ६ ॥

न शात् ॥ शकारात्परस्य तवर्गस्य चुत्वं न भवति ॥ प्रश्नः। विश्नः ७

(सु०) **न शात्** ॥ स्तोः श्चुरित्यनुवर्तते। शात्परस्य सस्य शकारप्रसङ्गो नास्त्यतः शात्परस्य तोश्चुत्वं न ॥ 'प्रच्छ ज्ञीप्सायाम्' विच्छ गतौ आभ्यां नङ्। इसि नङ्प्रत्ययः। किङ्ति ञसे क्वौ ममे चेति छस्य शत्वम्। नङो ङित्वाद् गुणाभावः। प्रच्छेस्तु सम्प्रसारणं न भाष्येऽनुक्तत्वात् ॥ ७ ॥

(त०) **न शादिति** ॥ शात्परस्य सस्य शकारप्रसङ्गो नास्ति अतः शात्परस्य तवर्गस्य चवर्गो निषिध्यते ॥ शादिति किम्। याच्ञा ॥ ७ ॥

ष्टुभिः ष्टुः ॥ सकारतवर्गयोः षकारटवर्गाभ्यां योगे षकारटवर्गौ भवतः ॥ कृष्षष्ठः। तट्टीकते ॥ ८ ॥

(सु०) **ष्टुभिः ष्टुः** ॥ स्तोरित्यनुवर्तते। ष् च टवश्च ष्टवस्तैः ष्टुभिः। ष् च टुश्चानयोः समाहारः ष्टुः। नपुंसकनिर्देशोऽयमित्येके। षा सहितः टुः ष्टुः। शाकपार्थिवादित्वान्मध्यमपदलोपः। इति पुंल्लिङ्गनिर्देशोऽयमित्यन्ये। इहापि स्थान्यादेशयोर्यथासंख्यम्। निमित्तस्थानिनोस्तु न 'नषि' इति निषेधात्। स्तोः ष्टुभिर्योगे ष्टुः स्यादिति ॥ ८ ॥

(त०) **ष्टुभिः ष्टुरिति** ॥ स्तोरित्यनुवर्तते। समासः पूर्ववत्। अत्रापि ष्टौ

(क) अत्र वासुदेवः। यत्तु सा युतस्तुरिति तत्पुरुषाश्रयणमिति। तदप्ययुक्तम्। तत्पुरुषे परपदप्राधान्यात् सकारयुतस्यैव तवर्गस्य चुत्वविधिप्रसङ्गात्।

ष्टुरित्येव सुवचम् ॥ ८ ॥

न षि ॥ षकारे परे तवर्गस्य ष्टुत्वं न भवति ॥ भवान्षष्ठः ॥ ९ ॥

(सु०) **न षि** ॥ तोष्टुर्न स्यात् षकारे परे ॥ तोरिति किम् । कष्षष्ठः । षीति किम् । तट्टीका ॥ षीति सप्तमीनिर्देशात्पूर्वं षकारे ष्टुत्वं स्यादेव । रोष्टेति ॥ ९ ॥

(त०) **न षीति** ॥ अत्र तोरित्यनुवर्तते ॥ षीति किम् । तट्टीकते । षीति सप्तमीनिर्देशात्पूर्वस्य शकारस्य ष्टुत्वं योगे स्यादेव क्रोष्टा ॥ ९ ॥

टोरन्त्यात् ॥ पदान्ते वर्तमानाट्टवर्गात्परस्य स्तोः ष्टुर्न भवति । षण्नरः षड्नरः । षट् सीदन्ति ॥ १० ॥

(सु०) **टोरन्त्यात्** ॥ स्तोरित्यनुवर्तते । अन्ते भवोऽन्त्यस्तस्मादन्त्यात् । अन्त्यशब्देन पदान्तं कथ्यते । भवार्थे ण्यः । 'णितो वा' इति णित्वविकल्पाद्वृद्ध्यभावः । पदान्ते स्थिताट्टोः परस्य स्तोः ष्टुत्वं न भवति ॥ पदान्तात् टोः किम् । इट्टे ॥ टोः किम् । सर्पिष्टमम् ॥ 'ञमे ञमा वा' इति ञमे षण्नरः । ञमभावपक्षे षड् नरः । नर इति बहुवचनम् ॥ १० ॥

(त०) **टोरन्त्यादिति** ॥ स्तोरित्यत्रानुवर्तते न तोरिति ॥ टोरिति किम् । सर्पिष्टमम् ॥ अन्त्यः । भवार्थे ण्यः । 'णितो वा' इति वृद्धिविकल्पाद्वृद्ध्यभावः ॥ १० ॥

(**नवतिनगर्योर्न**) षण्णवतिः । षण्णगर्यः ॥ ११ ॥

(सु०) **नवतिनगर्योर्न** ॥ पदान्ताट्टवर्गात्परयोर्नवतिनगरीशब्दयोर्न ष्टुत्वनिषेधो भवति टोरन्त्यादिति निषेधो न प्रवर्तते इत्यर्थः । षड्भिरधिका नवतिरित्यत्र षस्य डत्वे कृते नस्य ष्टुत्वम्, ततः षण्णवतिः ॥ षट् नगर्यः इत्यत्र नस्य ष्टुत्वम् । षण्णगर्यः ॥ ११ ॥

(त०) पदान्त इत्यनुवृत्तेः पदान्तादिति लब्धे अन्त्यादिति ग्रहणमस्यानित्यत्वज्ञापनायेत्यभिप्रेत्याह—**नवतिनगर्योर्नेति** ॥ **षण्णवतिरिति** ॥ षट् च नवतिश्च षडधिका नवतिरिति वा ॥ ११ ॥

(**सुपो न**) लिट्सु । टनात्सस्य वा धुट् । लिट्त्सु ॥ १२ ॥

(सु०) **सुपो न** ॥ टवर्गात्परस्य स्यादीनां सुपः सकारस्य ष्टुत्वं न भवति ॥ १२ ॥

(त०) 'न शात्' 'न षि' इत्यत्र नञ्द्वयोपादानं ष्टुत्वस्यानित्यत्वज्ञापनार्थमित्याशयेनाह—**सुपो नेति** ॥ सुपः सकारस्य ष्टुत्वं नेत्यर्थः ॥ १२ ॥

तोर्लि लः ॥ तवर्गस्य लकारे परे लकारः स्यात् ॥ तल्लुनाति । भवाँल्लिखति । अनुनासिकाननुनासिकत्वेन द्विधा यवलाः । तत्र नकारस्यानुनासिको लकारः(क) ॥ १३ ॥

(सु०) **तोर्लि लः** ॥ तोरिति किम् । शक्नोतीति शक् लुनातीति ॥ लि इति किम् । तदन्नम् ॥ यकारवकारलकाराः सानुनासिका निरनुनासिकाश्च । तत्र सानुनासिक-

---

(क) **तोरिति** । 'एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः' सह वा निवृत्तिः' इति पूर्वतः स्तोरनुवृत्तेः तोरित्युक्तम् । लकारस्य द्वैविध्यात् स्थानेऽन्तरतम इति निरनुनासिकस्थाने निरनुनासिकः सानुनासिकस्थाने सानुनासिको लकार इत्यर्थः ।

स्य नकारस्य स्थाने सानुनासिक एव लो भवतीत्यर्थः ॥ १३ ॥

(त०) तोर्लि ल इति ॥ अत्र लघुभाष्यम् । स्तोरित्यनुवर्तमाने तोर्ग्रहणं सकारनिवृत्त्यर्थमित्येके तन्न, लकारपरस्य सकारस्याभावात् । न च को लुनातीत्यादावन्तरङ्गेण विसर्गेण भाव्यम् । सल्लावक इत्यत्रापि परत्वादन्तरङ्गत्वाच्च दत्वे कृते लः । तोर्ल्लि इति द्विलकारं पाठ्यम् । ल् लि चेति छेदः । एवं सार्द्धमात्रा न्यूना भवति । 'अत्रेदमवधेयम् । तोर्लि इत्युक्ते रकारात्परत्वात्तन्निमित्तकद्वित्वमाशङ्क्य विधेयसंदेहस्यानिवार्यत्वात् । किंच स्तोः श्चुभिः श्चुरित्यत्र प्रकृतस्य श्चुरित्यस्य विधेयत्वेनोपन्यासाद्वा ॥ भवाँल्लिखति इति ॥ अत्रानुनासिको लकारः ॥ १३ ॥

(उदः स्थास्तम्भोः स लोपः) उत्थानम् । उत्तम्भनम् ॥१४॥

(सु०) **उदः स्थास्तम्भोः स लोपः** ॥ उदः परयोः स्थास्तम्भोः सकारस्य लोपो भवति ॥ ष्ठा गतिनिवृत्तौ । स्तम्भु निरोधने । सलोपे कृते 'खसे चपा झसानाम्' इति दस्य तः । उत्थानम् ॥ १४ ॥

(त०) **उदः स्थास्तम्भोरिति** ॥ उदः परयोः स्थास्तम्भोः सकारस्य लोपः स्यादित्यर्थः ॥ **उत्थानम् उत्तम्भनमिति** । स्थीयत इति स्थानम् । भावे युट् । युवोरनाकावित्यनादेशः सलोपे कृते 'खसे चपा झसानाम्' इति दकारस्य तकारः ॥ १४ ॥

नः सक् छते ॥ नान्तस्य पदस्यावपरे छते समागमो भवति ॥ राजँश्चित्रम् । भवाँस्तनोति । अवपरे किम् । सन्त्सरुः ॥ १५ ॥

(सु०) **नः सक् छते** ॥ नान्तस्य पदस्य सक् स्यात् अवः परो यस्मात्सः अवपरस्तस्मिन् अवपरे छते ॥ कित्वादन्ते । सकोऽकारस्तूच्चारणार्थः । कस्यान्ते इत्याकांक्षायां पदस्यान्ते भवति । नस्यापदान्तत्वात् 'नश्चापदान्ते झसे' इत्यनुस्वारः । नस्य सगागमो भवतीति वचने तु नस्यानुस्वारो न स्यात् । सको नकारस्य भक्तत्वात् नस्य पदान्तत्वानपायात् । आगमाष्टित्किन्मितस्ते यद्गुणीभूता यस्य गुणीभूता यस्य विशेषणीकृतास्तद्ग्रहणेन विशेष्यग्रहणेन कृत्वा ते आगमाः आचार्यैर्गृह्यन्ते अभ्युपगम्यन्ते । तद्यथा । सगागमः पदस्य विहितः । पदं विशेष्यम् । सगागमो विशेषणम् । पदग्रहणेन सक् गृह्यते । सक्पर्यन्तं पदमित्यर्थः(क) ॥ पदस्येति किम् । हन्ति ॥ नान्तस्येति किम् । तद्दीकते ॥ छते किम् । भगवन् कुरु ॥ अवपरे छते किम् । सन्त्सरुः खड्गमुष्टिः ॥ १५ ॥

(त०) **नः सक् छते इति** ॥ अत्र पदस्य सगागमः न तु नस्य । तथा सति नस्यानुस्वारो न स्यात अपदान्तत्वाभावात् इत्याशयेनाह—**नान्तस्येत्यादि** ॥ पदस्येति किम् । हन्ति ॥ न इति किम् । तद्दीकते । छते किम् । भगवन्कुरु ॥ अवपरे किम् । सन्त्सरुः । 'त्सरुः खड्गादिमुष्टिः स्यात्' इत्यमरः ॥ १५ ॥

(न प्रशानः) प्रशान्तनोति ॥ १६ ॥

(क) इयमत्राशङ्का—

राजँश्चित्रमित्यत्र राजन्नित्यस्य पदत्वेन नकारस्य पदान्तत्वात् 'नश्चापदान्ते झसे' इत्यनुस्वारो न स्यादिति । अयं समाधिः—'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते' इति परिभाषया नान्तपदविहितस्य सगागमस्य पदत्वेन गृहीतस्मात् न कारस्यापदान्तत्वं समायात्यतोऽनुस्वारो निरबाध एवेति ।

(सु०) न प्रशानः ॥ प्रशानिति नान्तस्य पदस्य सग् न भवत्यवपरे छते ॥ प्रपूर्वात् शाम्यतेः क्विप् । 'अमान्तस्योपधाया दीर्घः' इत्यनेन दीर्घः । 'मो नो धातोः' इति नः । नस्यासिद्धत्वात्तलोपो न प्रशाम्यतीति प्रशान् ॥ १६ ॥

(त०) अव इत्यपकृष्य तस्य व्यवस्थितत्वाश्रयणात् । मत्स्थानिकस्य नस्य सत्वनेत्याशयेनाह-न प्रशान इति ॥ प्रशान्तनोतीति ॥ 'शमु उपशमे' इत्यस्मात् क्विपि 'अमान्तस्य क्वौ' इति दीर्घे 'मो नो धातोः' इत्यनेन नत्वे रूपम् ॥ १६ ॥

शे चक् वा ॥ नान्तस्य पदस्यावपरे शे वा चगागमो भवति । भवाञ्छूरः-भवाञ्चूछूरः—भवाञ्चूशूर–भवाञ्शूरः(क) ॥ १७ ॥

(सु०) शे चक् वा ॥ न इत्यनुवर्तते । नान्तस्य पदस्य चक् स्याद्वा शे ॥ पदस्येति किम् । दंश । शे इति किम् । भवांश्चिनोति ॥ चक् वा इत्यत्र 'वाक्ये तु सा विवक्षामपेक्षते' इत्युक्तत्वाजवाभावः ॥ भवान् शूर इत्यत्र चगागमस्य कित्त्वात् पूर्वान्तत्वेन 'चपाच्छः शः' इति छत्वविकल्पः । पक्षे हसात्परस्य झसस्येति चलोपः । नकारस्यानुस्वारपरसवर्णौ अपदान्तत्वात् । भवाञ्छूरः भवाञ्चूछूरः भवाञ्चूशूरः ॥ भवाञ्शूरः ॥ "अछौ अचछा अचशा अशाविति चतुष्टयम् । रूपाणामिह चक्छत्वचलोपानां विकल्पनात् ॥" कुर्वंस्तष्ठ । कुर्वञ्चूछेते । इत्यत्रापदान्तनकारस्य स्थानेऽनुस्वारश्चुत्वाभ्यां परत्वात्प्राप्तं णत्वं न । कस्मात् । अनन्ते इत्यन्तरङ्गे णत्वनिषेधे सति 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषया बहिरङ्गयोःसक्चकोरसिद्धत्वात्(ख) ॥ तच्छास्त्रम् , मञ्चशंभुरित्यादौ चोः कुरिति कुत्वमपि न । अन्तरङ्गे कुत्वे कर्तव्ये चुत्वचकारासिद्धत्वात् । कुत्वविधिस्तु वाग्भ्यां वक्ष्यतीत्यादावेक पदस्थे चवर्गे सावकाशः । 'चपाच्छः' अम्वयुक्ताच्छसादौ' इत्यादिनिर्देशात् ॥ १७ ॥

(त०) शे चक् वेति ॥ भवाञ्छूर इत्यादि ॥ 'अछौ अचछा अचशा अशाविति चतुष्टयम् । रूपाणामिह चक्छत्वचलोपानां विकल्पनात् ॥" पदस्येति किम् । दंशः ॥ नान्तस्य किम् । पञ्चशः ॥ शे इति किम् । भवांश्चिनोति ॥ अत्र शीत्येव वक्तुमुचितम् । मात्रालाघवात् । ननु कुर्वंस्तिष्ठ कुर्वञ्छेते इत्यत्र अपदान्तत्वान्नस्य चुत्वादनुस्वाराच्च परत्वान् णत्वं प्राप्नोति । सत्यम् । अनन्त इत्यन्तरङ्गं निषेधं प्रति बहिरङ्गयोश्चक्सकोरसिद्धत्वाश्रयणात् । तच्छास्त्रमित्यत्रापि चुत्वे कृते कुत्वमप्यसिद्धत्वादेव न ॥ १७॥

ङ्णनो ह्रस्वाद् द्विः स्वरे ॥ ङकारणकारनकारा ह्रस्वादुत्तरा द्विर्भवन्ति स्वरे परे पदान्ते (ग) ॥ प्रत्यङ्ङिदम् ॥ सुगण्णिह । राजन्निह ॥ ह्रस्वात्किम् । प्राङास्ते ॥ पदान्ते किम् । परमदण्डिनौ ॥ १८ ॥

(क) भवान् अग्रे शूरः । अत्र 'चपाच्छः शः' इति सूत्रस्य विकल्पेन प्राप्त्यर्थं रूपद्वये चगागमः । च पदत्रयेऽपि । 'स्तोः श्चुभिश्चुः' नस्य ञः । प्रथमरूपे 'चपाच्छः शः शस्य छः सर्वत्र । स्वर०० । भावाञ्छूरः, भवाञ्शूरः भवाञ्शूरः । तृतीयरूपे चगागमाभावे भावाञ्छूरः । इति चन्द्रकीर्त्तिः ।

(ख) अत्र वासुदेवः । ननु कुर्वन् शेते इत्यादौ चकि नस्य अपदान्तत्वात् परत्वाण्णत्वं स्यादिति चेत , सत्यम् , परशब्दस्येष्टवाचित्वात् क्वचित्पूर्वेणापि परबाधादनुस्वारपरसवर्णाविति ।

(ग) ङ्णन इति । यद्यपि कुर्वन्नास्ते इत्यादौ नस्य द्वित्वे पूर्वस्यापदान्तत्वाण्णत्वप्राप्तिस्तथापि 'अवकुप्वन्तरेऽपि' इत्यत्र 'वाव्योरि'त्यतो वानुवृत्तेर्नं । केचित्तु पदान्तस्यैव द्वैधाभावाद्दलितमुद्गादिदले तदीयव्यपदेश इवात्रापि पूर्वस्यापि पदान्तत्वाण्णत्वं नेत्याहुः ।

(सु०) ङ्णनो ह्रस्वाद् द्विः स्वरे ॥ ङ् च ण् च न् च ते ङ्णनः । पदान्ते इत्यनुवर्तते । ह्रस्वात्पराः पदान्ते स्थिताः ङ्णनः द्विः स्युः स्वरे परे ॥ ह्रस्वादिति किम् । प्राङ् आस्ते । प्राण् आस्ते । भवान् आस्ते ॥ ङ्णन इति किम् । किम् आस्ते ॥ स्वरे किम् । प्रत्यङ् करोति । सुगण् वदति । पचन्वदति ॥ पदान्ते किम् । दण्डिनौ ॥ ननु समिद्दण्डिनावित्यादौ पूर्वपदस्येव चोत्तरखण्डस्यापि प्रत्ययलक्षणेन पदत्वात् नस्य द्वित्वं स्यात् । उच्यते । उत्तरखण्डस्य प्रत्ययलक्षणेन पदान्तकार्यं न 'एदोतोऽतः' 'वत्विनौ' इत्यादिनिर्देशात् । अत एव परमवाचौ परमगोदुहौ परमलिहावित्यादौ कुत्वघत्वढत्वादीनि न भवन्ति ॥ ननु अनश्च इत्यादौ नस्य द्वित्वं स्यात् । उच्यते । अनन्ते अनपोत्यादिज्ञापनान्न द्वित्वम् ॥ १८ ॥

(त०) ङ्णनो ह्रस्वाद् द्विः स्वरे इति ॥ ङ् च ण् च न् च ते ङ्णनः । ह्रस्वादिति किम् । प्राङ् आस्ते । स्वरे इति किम् । प्रत्यङ् करोति । पदान्ते इति किम् । दण्डिनौ ॥ ननु समिद्दण्डिनावित्यत्र पूर्वपदस्येवोत्तरखण्डस्यापि प्रत्ययलक्षणत्वेन पदत्वात् नस्य द्विर्वचनं प्राप्नोतीति चेन्न । उत्तरपदस्य प्रत्ययलक्षणेन न पदान्तकार्यितेति 'एदोतोऽतः' इति ज्ञापनात् । अत एव नलोपोऽपि न । अनश्च इत्यादौ तु अनपीत्यादिज्ञापकाद्विद्वत्वं न । नलोपस्तु अमूविधिसामर्थ्यान्न द्विरिति क्रियावृत्तौ 'द्वित्रिचतुर्भ्यः सुः' इति स्वन्तत्वादव्ययम् । क्रिया चात्रोच्चारणमेव तथा च द्विरुच्चार्या इत्यर्थो बोद्धव्यः ॥ १८ ॥

छः ॥ ह्रस्वात्परश्छकारो द्विर्भवति ॥ १९ ॥

(सु०) छः ॥ ह्रस्वादित्यनुवर्तते । छकारे अकार उच्चारणार्थः तेन विच्छिन्नमित्यादि सिद्ध्यति ॥ १९ ॥

(त०) छ इति ॥ अत्र स्वरे इत्यनुवर्त्य विभक्तिव्यत्ययेन स्वरात् इति बोध्यम् । पदान्ते वेत्यनुवर्तते । तच्च वाक्यभेदेन सम्बध्यते । विकल्पस्तु व्यवस्थितः । तेन पदान्ते दीर्घादाङ्माङ्वर्जिताद्वा ॥ स्वरादिति किम् । छत्रम् ॥ १९ ॥

(खसे चपा झसानाम्) तव छत्रम्—तव च्छत्रम् ॥ २० ॥

(सु०) खसे चपा झसानाम् ॥ झसानां चपाः स्युः खसे परे ॥ झसानामिति किम् । खन्सु ॥ खसे किम् । वेद्मि ॥ २० ॥

(दीर्घाच्च) ह्रीच्छः ॥ २१ ॥

(सु०) दीर्घाच्च ॥ दीर्घात्परश्छकारो द्विः स्यात् ॥ २१ ॥

(पदान्ताद्दीर्घाद्वा) लक्ष्मीच्छाया—लक्ष्मीछाया ॥ २२ ॥

(सु०) पदान्ताद्दीर्घाद्वा ॥ पदान्ताद्दीर्घात्परश्छो वा द्विः स्यात् ॥ २२ ॥

(आङ्माङ्भ्यां नित्यम्) आच्छादयति । माच्छिदत् ॥ २३ ॥

(सु०) आङ्माङ्भ्यां नित्यम् ॥ पदान्ताद्दीर्घादित्यस्यापवादोऽयम् । आङ्माङ्भ्यां परश्छो द्विः स्यान्नित्यम् ॥ २३ ॥

(पुंसोऽवपरे खपे संयोगान्तस्य लोपो न) पुंस्कोकिलः । पुंस्पुत्रः ॥ अवपरे किम् । पुङ्क्षीरम् ॥ खपे किम् । पुन्दासः ॥ २४ ॥

(सु०) **पुंसोऽवपरे खपे संयोगान्तस्य लोपो न** ॥ पुंस्शब्दस्य सस्य लोपो न भवति । अवः परो यस्मात्सः अवपरस्तस्मिन् अवपरे खपे ॥ 'संयोगान्तस्य लोपः' इति प्राप्तावयं निषेधः । अवपरे किम् । पुंक्षीरम् । सलोपोऽत्र ॥ खपे किम् । पुंदासः । अत्रापि सलोपः ॥

(त०) संयोगान्तस्य लोप इत्यत्र वाऽवसाने इत्यतो वेत्यपकृष्य तस्य व्यवस्थितत्वाश्रयणात् क्वचिन्न इत्याशयेनाह-**पुंसोऽवपर** इत्यादि ॥ तेन ख्यातौ वा सभिन्नस्य रान्न इत्यादि सिद्धम् । **पुंस्कोकिल** इति ॥ पुमांश्चासौ कोकिलश्च सः ॥ २४ ॥

(**ख्याधातौ वा**) पुंस्ख्यानम्–पुङ्ख्यानम् ॥ २५ ॥

(सु०) **ख्याधातौ वा** । पुंशब्दस्य सकारस्य लोपो वा भवति । 'चक्षिङः ख्याङ्' इति ख्याधातौ परे ॥ पुख्यानमिति । चक्षिङो युटि रूपम् ॥ २५ ॥

मोऽनुस्वारः ॥ मकारस्यानुस्वारो भवति हसे पदान्ते ॥ तं हसति । पटुं वृथा ॥ पदान्ते किम् । गम्यते ॥ हसे किम् । किमत्र(क) ॥ २६ ॥

(सु०) **मोऽनुस्वारः** ॥ पदान्ते इत्यनुवर्तते । पदान्ते मोऽनुस्वारः स्यात् हसे परे ॥ पदान्ते किम् । गम्यते ॥ म इति किम् । भवान्हसति ॥ हसे किम् । फलमस्ति ॥ म इत्यत्राकार उच्चारणार्थः ॥ अनुस्वार इति पूर्वाचार्याणां संज्ञा ॥ २६ ॥

(त०) **मोऽनुस्वारः** इति ॥ पदान्ते किम् । गम्यते ॥ मकारस्य किम् ॥ भवान् हसति ॥ हसे इति किम् । फलमस्ति ॥ अत्र लघुभाष्यम् । ननु 'मोम्' इति सूत्र्यताम् । अत्राकार उच्चारणार्थः । ततः परस्यादेशः स्यादिति चेन् सत्यम् । संज्ञापूर्वको विधिरनित्यो यथा स्यादित्येवमर्थमिदम् । अनुस्वार इति प्राचां संज्ञा । तेन सम्राडिति सिद्धम् । वस्तुतस्तु 'मोम्' इति कर्तुं शक्यम् 'अम्शसोः' इत्यादिनिर्देशेनास्यानित्यत्वज्ञापनात् सम्राडित्यादि सिद्धम् ॥ अत्रेदमवधेयम् । 'मोम्' इति कृते ओ अवित्यादिष्विव म इत्यस्य प्रथमान्तत्वमाशङ्क्य ओकारस्य विधेयत्वशङ्काया अनिवार्यत्वादनुस्वारस्य तत्संदेहनिराकरणायावश्यं वक्तव्यत्वात् । यत्तु अत्र म् इति योगं विभज्य तत्र सकं चानुवर्त्य क्वचिन्मस्य सगागम इति व्याख्येयम् । तेन पुंस्कोकिलः पुंस्पुत्र इत्यादि सिध्यतीत्युक्तम् । तत्तु पुंसोऽवपरे खपे संयोगान्तस्य लोप इति स्वोक्त्या विरोधादुपेक्ष्यम् ॥ २६ ॥

नश्चापदान्ते झसे ॥ नस्य मस्य चापदान्ते वर्तमानस्यानुस्वारो भवति झसे हकारे च परे (ख) ॥ यशांसि । पुंभ्याम् । स्वनड्वांहि ॥ अपदान्ते किम् । ब्रह्मन् पाहि ॥ झसे किम् । तन्यते ॥ २७ ॥

(सु०) **नश्चापदान्ते झसे** ॥ चकारो मकारस्य समुच्चयार्थः । अपदान्ते नस्य मस्य चानुस्वारः स्यात् झसे परे ॥ अपादान्ते किम् । भवान् भाति ॥ झसे किम् । मन्यते । यम्यते ॥ २७ ॥

(क) **म इति** । मकारस्यानुस्वारो भवति हसे पदान्ते चेति० व० पु० पाठः । व० मू० पु० पाठः, का० पु० पाठः । कौमारास्त्ववसानेऽप्यनुस्वारं चेच्छन्ति । तेन देवं, देवम् ।

(ख) 'नश्चापदान्ते झसे' इत्यत्र चो मानुकर्षणार्थ इति मत्वा वृत्तावाह–**नस्य मस्य चेति** । हो झभाः' इत्यतो ह इत्यनुवर्त्तते स च विभक्तिविपरिणामेन सप्तम्यन्तोऽवसेयः । तेन हकारेऽपि नस्य मस्य चानुस्वारो भवतीत्युक्तम् ।

(त०) नश्चापदान्ते झलि इति ॥ चकारो मकारस्य समुच्चयार्थः । अन्यथा अपदान्ते नस्यैव स्यात् ॥ अपदान्ते किम् । भवान् याति । अत्रापदान्तग्रहणादेतत्सूत्र-पर्यन्तः पदान्त इत्यधिकारो बोध्यः ॥ झल इति किम् । मन्यते । यम्यते । अत्र हो झभा इत्यतो हकारोऽनुवर्त्यः स च विभक्तिविपरिणामेन सप्तम्यन्तो बोध्य इत्याशयेनाह-हकारे चेति ॥ २७ ॥

यमा यपेऽस्य ॥ अपदान्ते वर्तमानस्यानुस्वारस्य यमा भवन्ति यपे परे ॥ अस्य यपस्य सवर्णाः ॥ शान्तः । अङ्कितः । अञ्चितः । कुण्ठितः । गुम्फितः (क) ॥ २८ ॥

(सु०) यमा यपेऽस्य ॥ अस्येति यपपरामर्शार्थम् । अनुस्वारस्यानुवृत्त्यैव लाभात् । अपदान्ते अनुस्वारस्य यमा यमा भवन्ति यपे परे । ते यमा अस्य यपस्य सवर्णा भवन्तीत्यर्थः । सानुनासिकस्यानुस्वारस्य सानुनासिका एव यमाः स्युः । यमा इति बहुवचनं जातौ ज्ञेयम् । कुण्डं रथेनेत्यत्रानुस्वारस्य पाक्षिको यमो न रकारस्यानुनासिकत्वाभावात्(ख) ॥ यपे किम् । आक्रंस्यते । स्वनड्वांहि ॥ अनुस्वारस्येति किम् । राजन् गच्छ । गम्यते ॥ 'अङ्क पदे लक्षणे च' इति चुरादिण्यन्तात् क्तः । सेटोक्तक्तवत्वोर्णिलोप इति णिलोंपः अनेनानुस्वारस्य ङः । अकि लक्षणे इत्यस्माद्वा क्तः । नुमोऽनुस्वारे परसवर्णेन ङः । अङ्कितः ॥ अञ्चेः पूजायामिट् इतीट् । पूजार्थस्याञ्चर्नेति नलोपो न । अञ्चितः ॥ 'कुठि प्रतिघाते' क्तः । नुमोऽनुस्वारे परसवर्णेन णः कुण्ठितः ॥ 'शमु उपशमे' क्तः । 'दान्तादयो वा निपात्यन्ते' इति निपातनादिडभाव । 'जमस्य क्ङिति झसे इति' दीर्घः । मस्यानुस्वारे परसवर्णेन नकारः । शान्तः ॥ गुम्फ ग्रन्थे' क्तः । मस्यानुस्वारेपरसवर्णेन मः । गुम्फितः ॥ ननु कुर्वन्तीत्यत्रानेन कृतस्य नस्य णत्वं कस्मान्न । उच्यते । 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परसवर्णस्यासिद्धत्वान्न णत्वम् (ग) ॥ २८ ॥

(त०) यमा यपेऽस्येति ॥ अस्येति किमर्थम् । अनुस्वारपरामर्शार्थं चेन्न । तस्यानुवृत्त्यैव लाभात् । न च प्रथमान्तस्यानुवृत्तस्य अनुस्वार इत्यस्य षष्ठीविपरिणामार्थमिति वाच्यम् । यमा इत्यादेशापेक्षया अर्थात् षष्ठीविपरिणामसंभवात् । एवं तर्हि यपपरामर्शार्थम् । इत्यभिप्रेत्याह-अस्य यपस्य सवर्णा इति ॥ अनुनासिकस्यानुस्वारस्य सदृशयपस्य सवर्णा जमा भवन्तीत्यर्थः ॥ तेन रेफो न भवति, अनुस्वारसादृश्याभावात् । न च सादृश्याभावेऽपि वचनात् स्यादिति वाच्यम् । यपं इत्यस्य जातिपरत्वेन यपजातीये

(क) यमा इति । अत्र मोऽनुस्वार इत्यतोऽनुस्वार इति प्रथमान्तमप्यनुवर्त्तमानमादेशापेक्षया-ऽर्थात् षष्ठ्यन्तं स्यादिति मत्वाह-अनुस्वारस्येति । तत्र च भाव्यमाना यमाः सवर्णपरिभाषया अनुस्वारस्यैव सवर्णा भवन्तः सर्वेऽपि सर्वत्र प्राप्ताः, तत्रास्येति प्रत्यत्तार्थाभिधायीदम् । शब्दो नन्तरं यपं परामृश्य सवर्णपरिभाषया एकत्वमापद्य यपस्य सवर्णान् यमान् विधत्त इति मनसि कृत्वाह-अस्य यपस्य सवर्णा इति । अस्य यपस्य सवर्णा यमा अनुस्वारस्य भवन्तीति योजना ।

(ख) भावादिति । जमङ्णना' अनुनासिका इति शास्त्रात् ।

(ग) अयमाशयः-असिद्धं बहिरङ्गमन्तरङ्गे इति रेफाद्याश्रयेऽन्तरङ्गे णत्वे कार्य्ये यपाश्रयस्य बहिरङ्गस्य यमादेशस्य नस्यासिद्धत्वेन स्थानिनो भावान्न भवति । प्रकृतिप्रत्ययाश्रितत्वेन वा णत्वस्यान्तरङ्गत्वम् ।

सवर्णे यमजातीयस्यानुस्वारसदृशस्य विधानेन वचनस्य चरितार्थत्वात् ॥ यत्तु यमोऽस्येति सूत्रं युक्तम् । अनुस्वारेण झसे हसे इति वाऽऽक्षेपणीयम् ॥ अनुस्वारस्य सदृशझसहसयोः सवर्ण आदेशो भविष्यतीति व्यर्थमिह यपे इति । शषसहेषु तु नातिव्याप्तिः, तेषां यमे सवर्णाभावादिति । तत्रेदमवधेयम् । हसाक्षेपेणैव तदन्तर्गतस्य झसस्यापेक्षस्याशक्यत्वात् । किं च अनुवृत्तिलब्धेनानुस्वारेण हसाक्षेपे पदान्तस्याक्षेपाच्च ॥ २८ ॥

वा पदान्तस्य ॥ पदान्ते वर्तमानस्यानुस्वारस्य यमा वा भवन्ति यपे परे ॥ अस्य यपस्य सवर्णाः ॥ त्वङ्करोषि–त्वं करोषि । तन्तनोति–तं तनोति । सय्यँन्ता–संयन्ता ॥ सव्वँत्सरः-संवत्सरः । यल्ँलोकम्–यंलोकम् ॥२९॥

(सु०) **वा पदान्तस्य** ॥ अत्रानुस्वारस्यानुनासिका एव यमा वा स्युः ॥

(त०) वेति ॥ द्वितीयसूत्रोपन्याससामर्थ्यादेतत्पदान्तविषयमित्याशयेनाह–**पदान्तेवर्तमानस्येति** ॥ २९ ॥

मो राजि समः क्वौ ॥ क्विबन्ते राजतौ परे समो मस्य म एव स्यात् (क) ॥ सम्राट् ॥ ३० ॥

(सु०) **मो राजि समः क्वौ** ॥ क्विबन्ते राजतौ परे समो मस्य म एव ॥ मकारस्य मकारवचनमनुस्वारनिवृत्त्यर्थम् ॥ राजतौ किम् । गमादीनां जमस्य इति मलोपे ह्रस्वस्य इति तुक् । संगत् ॥ सम इति किम् । इदं राट् ॥ क्विबन्ते इति किम् ॥ संराजितव्यम् । संराजते । राजृ दीप्तौ इति । संपूर्वादस्माद्वर्तमाने क्विप् । पत्वडत्वचपत्वानि । सम्राट् ।३०

(यवलमनपरे हकारे मस्य यवलमना वा) किं ह्यः-किय्ँह्यः । किं ह्वलयति–किव्ँह्वलयति । किं ह्लादयति–किल्ँह्लादयति । किं ह्मलयति–किम्ह्मलयति । किं ह्नुते–किन्ह्नुते ॥ ३१ ॥

(सु०) **यवलमनपरे हकारे मस्य यवलमना वा** ॥ यश्च वश्च लश्च मश्च नश्च ते यवलमनाः यवलमनाः परे यस्मात् सः यवलमनपरस्तस्मिन्यवलमनपरे हकारे मस्य यवलमना वा भवन्ति ॥ 'ह्वल ह्मल संचलने' । 'ह्नुङ् अपनयने' ॥ ३१ ॥

(त०) वेति व्यवस्थितो विकल्प इत्यभिप्रेत्याह–**यवलमनपरे** इति ॥ हकारे इति विशेष्यम् । यश्च वश्च लश्च मश्च नश्च ते परे यस्य स तथा तस्मिन् । **किं ह्य इति** ॥ ह्योऽतीतेऽह्नि । **किं ह्वलयतीत्यादि** ॥ 'ह्वल ह्मल चलने ।' 'ज्वलह्वलह्मलनमामनुपसर्गाद्वा' इति मित्त्वाद्ध्रस्वत्वम् ॥ 'ह्नुङ् अपनयने' । अदादिः । 'ह्लादी सुखे' ॥ कुर्वन्तीत्यत्र नस्य णत्वं तु 'असिद्धं बहिरङ्गमन्तरङ्गे' इत्यसिद्धत्वान्न ॥ वेति व्यवस्थितविभाषाश्रयणात् शसे

(क) **मोराजि** । म इति प्रथमान्तम् । मोऽनुस्वार इत्यतो न इति स्थानषष्ठ्यन्तमनुवर्त्तते । सम इति अवयवषष्ठी । प्रत्ययग्रहणपरिभाषया क्विग्रहणेन क्विप्प्रत्ययान्तलाभः । तदाह–**क्विबन्त इत्यादिना** । **म एवेति** । नत्वनुस्वार इत्यर्थः । मस्य मविधानमनुस्वारनिवृत्त्यर्थमिति भावः । अनुस्वारप्रकरणे कचित्-[ँ छन्दसि] छन्दसि अनुस्वारः ँकारमापद्यते शषसहरेफेषु परतः । इं सः । इ ँ सः । तं रविः । त ँ रविः । इति दृश्यते ।

चपस्य द्वितीया वा। टनात्सस्य वा धुट्। शसे ङ्णोः कुक्टुकौ वा। पकारे परे नॄन्नकारस्य नॄस् वा इत्यादि संगृहीतम् ॥ ३१ ॥

(शसे चपस्य द्वितीया वा) वथ्सरः—वत्सरः। अफ्सरः—अप्सरः॥

(सु०) **शसे चपस्य द्वितीया वा** ॥ वर्गप्रथमानां द्वितीया भवन्ति शसे परे ॥ ३२॥

(न पदान्ते) तत्साधुः ॥ ३३ ॥

(सु०) न पदान्ते ॥ पदान्ते स्थितानां वर्गप्रथमानां द्वितीया न भवन्ति ॥ ३३॥

(कुक्टुक्वर्जितस्य विभक्तौ न) भवत्सु ॥ ३४ ॥

(सु०) **कुक्टुक्वर्जितस्य विभक्तौ न** ॥ चपस्य विभक्तौ द्वितीया न स्युः कुक्टुकोश्च द्वितीयाः स्युर्विभक्तौ परे ॥ ३४ ॥

(टनात्सस्य वा धुट्) षट्त्सन्तः। षट् सन्तः। सन्त्सः—सन्सः॥ ३५॥

(सु०) **टनात्सस्य वा धुट्** ॥ टश्च नश्च तयोः समाहारः टनं तस्मात्। टकार-नकाराभ्यां परस्य सकारस्य धुट् वा स्यात् ॥ धुटश्चपत्वेन तकारः ॥ ततः शसे चपस्येत्य-नेन तकारस्य थो न चपत्वस्यासिद्धत्वात्। षट्त्सन्तः ॥ ३५ ॥

(शसे ङ्णोः कुक्टुकौ वा) प्राङ् षष्ठः—प्राङ्क्षष्ठः—प्राङ्ख्-षष्ठः। सुगण् साधुः—सुगण्ट् साधुः—सुगण्ठ् साधुः ॥ ३६ ॥

(सु०) **शसे ङ्णोः कुक्टुकौ वा** ॥ ङकारणकारयोः कुक्टुकावागमौ वा स्तः शसे परे ॥ कुगभावे प्राङ् षष्ठः। कुगागमे प्राङ्क्षष्ठः। कुको द्वितीये प्राङ्ख् षष्ठः ॥ ३६॥

(त०) ङ् च ण् च ङ्णौ तयोः। ङस्य कुक् णस्य टुक् भवतीत्यर्थः, वर्ग्यत्वात् ॥ ३६॥

(पकारे परे नॄन्नकारस्य नॄस् वा) ॥ ३७ ॥

(सु०) **पकारे परे नॄन्नकारस्य नॄस् वा** ॥ नॄनित्यस्य नकारस्य नॄस् आदेशः स्याद्वा पकारे परे ॥ अकार उच्चारणार्थः तेन नॄः पुनाति इत्यादि सिद्ध्यति ॥ ३७ ॥

स्रोर्विसर्गः ॥ सकाररेफयोर्विसर्गो भवति रसे पदान्ते च (क) ॥ ३८॥

(सु०) **स्रोर्विसर्गः** ॥ स् च र् च स्रौ तयोः स्रोः। स्रोर्विसर्गः स्यात् रसे पदा-न्ते च ॥ धात्वधातुसाधारणमिदम् ॥ पदान्ते किम्। स्यात्। ब्रूयात्। पयसी। वारी ॥ रसे किम्। चातुर्यम् ॥ सुप्प्रत्यये परे रस्य विसर्गो न चतुर्ष्विति निर्देशात्। तेन गीर्षु वार्षु पूर्षु इत्यादि सिद्ध्यति। नार्पत्यः भार्गवः इत्यादौ तु बहिरङ्गाया वृद्धेरसिद्धत्वान्न विसर्गः (ख)। वर्ष्म वर्त्मेत्यादौ कर्तृसाधनयोरिति निर्देशान्न विसर्गः ॥ ३८ ॥

(त०) **स्रोर्विसर्गः** ॥ पदान्ते वर्तमानयोः स्रोर्विसर्गः स्यात्। धात्वधातुसाधा-रणमिदम्। तेन अबिभः देवः प्रातरित्यादि सिद्धम्। अव्ययादित्यस्य परत्वात्सिलुकि

(क) **सोर्विसर्ग इति**। अत्र वर्सा रसे इत्यतः रसे पदान्ते चेत्यधिकारश्च नाम्नोऽधातोश्चेति पदा-न्यनुवर्त्तन्ते। ततश्चाधातो रसे पदान्ते च धातोश्च पदान्त एव विसर्ग इति विवेकः ततश्चाचका अबिभ-इत्यादौ भवति नहि सोर्बिभर्तीत्यादौ। यद्वा—धातोश्च ङसे इत्यत्र धातोरिति योगविभागे स्रोर्विसर्गः पदान्ते चेति सम्बन्धादेतदवसेयमिति **वासुदेवः**। अधातोरसे पदान्ते चेति कुत्रापि पाठः ०व०।

(ख) **न विसर्ग इति**। अन्तरङ्गे विसर्गे कर्त्तव्ये बहिरङ्गवृद्धेरसिद्धत्वमतो विसर्गप्रतिषेधः।

नात्र रसपरत्वम् ॥ पदान्ते किम् । धुर्यात् । पयसी । नाम्नश्च रसपरयोः स्रोर्विसर्गः स्यात् । तेन वेधोभ्यां दोःर्भ्विव्यादि सिद्धम् ॥ सौ तु सिलोपात् प्रथमं रत्वाद्विसर्गे कृते तस्य हसपरत्वाभावेन सिलोपाभावे नित्यं विसर्गद्वयश्रवणप्रसङ्गः । अथ वेधोभ्याम् इत्यत्र द्वयोः सकारयोरेफो विसर्गो भविष्यति सत्वजातेराश्रयणादिति चेत् । शृणु । प्रियचत्वाः गीरित्यादौ रसपरयोरेकजात्यभावादुक्तदोषतादवस्थ्यमिति केचित् । तन्न 'प्रायशो दृश्य-ताम्' इति वचनात् ॥ क्वचित्पर्वेणापि परवाध इष्टसिद्धयर्थम् ॥ रसे किम् चीवरान् । वस्तेः । क्वचित्क्विब्विशिष्टस्य नामसंज्ञा भवति लुप्तेऽपि क्विपि एकदेशविकृतन्यायेन ना-मत्वमस्ति । तेन सुवोभ्यामित्यादौ विसर्गः सिध्यति । स् च र् च स्रौ तयोः । अत्र रेफो निर्दिष्टो न तु रेफभूत ऋकारः । रेफस्थानिकविसर्गस्य रादेशविधायकस्य र इति सूत्रस्य वैयर्थ्यापत्तेः कर्तृकार्ययोरित्यादिनिर्देशाच्च । न ह्यत्र ऋकारस्य विसर्गो निर्दिष्टः । प्रातः पाशमित्यादावुभयथा विसर्गः । नामसंज्ञाप्रवृत्तिकाले रेफस्य सुपि न विसर्गः चतु-र्ष्विति ज्ञापकात् । तेन गीर्ष्वित्यादि सिद्धयति । नार्पत्य इत्यत्र तु बहिरङ्गाया वृद्धेरसि-द्धत्वान्न विसर्गः । वर्ष्म इत्यादौ न विसर्गः कर्तृसाधनयोरिति निर्देशादिति दिक् ॥३८॥

कुप्वोः ≍क≍पौ वा । कवर्गपवर्गसम्बन्धिनि खसे परे विसर्गस्य ≍क≍ पौ वा भवतः ॥ कपावुच्चारणार्थौ । नॄं≍पाहि—नॄंः पाहि—नॄन् पाहि (क)॥३९॥

इति हससन्धिः ॥ ५ ॥

(सु०)कुप्वोः ≍क≍ पौ वा ॥ आदेशनिमित्तयोर्यथाक्रममत्रास्ति । आदेशे ककारपकारावुच्चारणार्थौ । केवलयोर्जिह्वामूलीयोपध्मानीययोरुच्चारणसम्भवात् । किं च ककारखकारयोः परतः ≍ कः स्यात् । पकारफकारयोश्च ≍ पः स्यात् ॥ कुप्वोरिति किम् । कश्चारः ॥ वाग्रहणात्पक्षे विसर्गः । विसर्जनीयस्य स इत्यस्यापवादोऽयम् । उप-ध्मानीये नॄं ≍ पाहि । विसर्गे नॄः पाहि । नभावे नॄन्पाहि ॥ ३९ ॥

इति सुबोधिन्यां हससन्धिः ॥ ६ ॥

(त०) कुप्वोः ≍क≍ पौ वेति ॥ कुश्च पुश्च कुपू तयोः अत्रादेशनिमित्तयोर्य-थाक्रमम् । आदेशे कपावुच्चारणार्थौ केवलयोरुच्चारणासम्भवात् । कखयोः ≍ कः । पफ-योः ≍ पः । अन्यत्रोत्तरविधिर्बाधनात् ॥ ३९ ॥

श्रीविद्यानगरस्थायी पौत्रो रामकरस्य हि । हससंधेर्व्यधाद्व्याख्यां स हि लोकेशसंज्ञकः ॥

इति तत्त्वदीपिकायां हससन्धिः ॥ ६ ॥

अथ विसर्गसन्धिः ॥ ६ ॥

विसर्जनीयस्य सः ॥ खसे परे ॥ कस्तनोति (ख) ॥ १

(क) कुप्वोः किम् , कश्चारः । विसर्जनीयस्य किम् , नृसिंहं पश्य । कटं करोतीति ।

इति चक्रधराख्यटिप्पण्यां हससन्धिः ।

(ख) विसर्जनीयस्येति । आसन्धिसमाप्तीदं षष्ठ्यन्तमधिक्रियते । अबपरस्य विसर्जनीयस्योत्व-रेफलोपयत्वादिविशेषविधेः परिशेषत्वात् खसपरत्वोक्तिः । विसर्गस्येति विहाय यद्विसर्जनीयस्येत्युक्तं तत्प-

(सु०) **विसर्जनीयस्य सः** ॥ विसर्गस्य सकारः स्यात् खसे परे ॥ कस्तनोतीत्यत्र विसर्गस्य सत्त्वे कृते तस्य पुनर्विसर्गादेशो न असिद्धत्वाद्विधिसामर्थ्याद्वा ॥ १ ॥

(त०) **विसर्जनीयस्य स इति** ॥ आसंधिसमासीदं षष्ठ्यन्तमधिक्रियते । परिशेषात् खसे एवास्य प्रवृत्तिः । अन्यत्र तूत्तरसूत्रैस्तत्र तत्र बाधः ॥ विसर्गस्य स इति नोक्तम् । पर्यायशब्दानां गौरवलाघवयोरनपेक्षणात् ॥ यत्तु प्राचामुपहासार्थं विसर्जनीयादिग्रहणं प्राञ्चो लाघवं न जानन्तीत्युक्तम् । तत्रेदमवधेयम् । प्राञ्चोऽत्र के विवरणकर्तारः सूत्रकर्तारो वा । आद्ये सूत्रस्थगौरवेण तेषामुपहासासंभवात् । अन्ते सरस्वत्याः सूत्रकर्तृत्वेन तदुपहासे प्रत्यवायसंभवात् । 'न निन्देन्मनसा वाचा सर्वव्याधिपराङ्मुखः ।' इति निषेधदर्शनात् । अः सः इति सूत्रणीये यद्विसर्जनीयस्येत्युक्तं तत्संज्ञापूर्वकत्वेन सस्यानित्यताबोधनार्थम् । तेन कः साधुरित्यादि सिद्धम् । ननु कुप्वोः ≍क≍ पावित्यस्य वैकल्पिकत्वात् पक्षे सत्त्वं कुतो नेति चेन्न । शेषाः कार्यं' इति निर्देशेन ≍ क ≍ पाभ्यां मुक्ते पक्षे सत्त्वप्रवृत्त्यभावस्य ज्ञापनात् । अत्र वेत्यनुवृत्तस्य व्यवस्थितविभाषाश्रयणात् शसे वा सकारः ॥ १ ॥

(शसपरे खसे विसर्जनीयस्य विसर्ग एव) कः त्सरुः । घनाघनः क्षोभणः(क) ॥ २ ॥

(सु०) **शसपरे खसे विसर्जनीयस्य विसर्ग एव** ॥ शसः परो यस्मात्स शसपरस्तस्मिन् शसपरे खसे विसर्जनीयस्य विर्जनीय एव भवति न त्वन्यत् ॥ यदि तु शसखरे खसे नेत्येवोच्येत तर्हि प्रकृते सत्त्वे निषिद्धेऽपि ≍क≍ पौ स्याताम् । विसर्गवचनात्तु विकारमात्रमपि निषिध्यते । तेन वासः क्षौमम् अद्भिः प्सातमित्यादौ विसर्ग एव ।२।

(त०) **शसपरे खशे** इत्यादि ॥ शसः परो यस्मात् सः शसपरः तस्मिन् ॥२॥

(शसे वा) कश्शूरः–कः शूरः । कष्षण्ढः–कः षण्ढः । कस्साधुः–कः साधुः(ख) ॥ ३ ॥

(सु०) **शसे वा** ॥ षसे परे विसर्जनीयस्य विसर्जनीय एव वा भवति ॥ पक्षे सः । कः शूरः । कस् शूरः । श्चुत्वं कश्शूरः । कः षण्ढः । कश् षंढः । ष्टुत्वं कष्षण्ढः॥३॥

(खपपरे शसे विसर्गस्य लोपो वा) हरिस्फुरति–हरिः स्फुरति–हरिस्स्फुरति । कुप्वोः ≍ क ≍ पौ वा । कः करोति–क ≍ करोति । क ≍ पचति–कः पचति ॥ ४ ॥

(सु०) **खपपरे शसे विसर्गस्य लोपो वा** ॥ खपः परो यस्मात्सः खपपरः तस्मिन्खपपरे शसे विसर्जनीयस्य लोपो वा भवति ॥ वाग्रहणात्पक्षे शसे वेति विसर्गो सत्त्वे

र्यायशब्दानां गौरवलाघवचर्चा नाद्रियते इति ज्ञापनार्थम् । द्वौ बिन्दू विसर्गः । तदुक्तम्—

शृङ्गवद्बालवत्सस्य कुमारीस्तनयुग्मवत् । नेत्रवत्कृष्णसर्पस्य स विसर्ग इति स्मृतः ॥

(क) इह यथायथं सत्त्वं जिह्वामूलीयश्च नेति कौमुदी । अयमर्थः–कः त्सरुरित्यत्र सत्त्वं घनाघनः क्षोभण इत्यत्र कुप्वोरिति जिह्वामूलीयश्च नेति । तथाच–सत्त्वस्य कुप्वोरित्यस्य चायमपवाद इत्युक्तं भवति।

(ख) शसेवेति । विसर्जनीयस्य शसषे परे वा बिसर्गो भवति इति विवरणस्य प्रा० ता० पु० पाठः ।

च त्रैरूप्यम् । हरिस्स्फुरति–हरिः स्फुरति–हरिस्स्फुरति ॥ ४ ॥

(त०) खपरे इति ॥ खपः परो यस्मात्सः खपपरः तस्मिन् । एतत्सर्वं व्यवस्थितविभाषाश्रयणादेव । कुप्वोः ≍क≍ पाविति व्याख्यानं पूर्वोक्तमेव ॥ ४॥

(वाचस्पत्यादयो निपातात्सिध्यन्ति) वाचस्पतिः । बृहस्पतिः । तस्करः(क) । कौतस्कुतः । कान्कान्–कांस्कान् । कस्कः । भास्करः । पयस्पाशम् । यशस्कल्पम् । यशस्कम् । यशस्काम्यति । सर्पिष्पाशम् । सर्पिष्कल्पम् । सर्पिष्कम् । सर्पिष्काम्यति । नमस्करोति–नमः करोति । पुरस्करोति । निष्प्रत्यूहम् । आविष्कृतम् । तिरस्कर्ता–तिरःकर्ता । द्विष्करोति–द्विः करोति । त्रिष्करोति–त्रिः करोति । चतुष्करोति–चतुः करोति । चतुष्कपालम् । सर्पिष्करोति–सर्पिः करोति । धनुष्करोति–धनुः करोति । सर्पिष्कुण्डिका । अयस्कारः । अयस्कामः । अयस्कुम्भः । अयस्पात्रम् । अयःसाहिता कुशा–अयस्कुशा । अयस्कर्णी । अधस्पदम् । शिरस्पदम् ॥ आकृतिगणोऽयम् ॥ अविहितलक्षणः सकारो वाचस्पत्यादिषु द्रष्टव्यः ॥ ५ ॥

(सु०) वाचस्पत्यादयो निपातात्सिध्यन्ति ॥ सिद्धस्वरूपोच्चारणं निपातस्तस्मादेते शब्दाः सिद्धिं यान्ति ॥ वाचः पतिरित्यत्र षष्ठ्या अलुक् । निपातनाद्विसर्गस्य सत्वम् । वाचस्पतिः । तत् चौर्यं करोतीति तकारस्य सत्वं निपातनात् । तस्करः ॥ बृहतां पतिरिति । निपातनात् तकारस्य सत्वम् । बृहस्पतिः ॥ कुतः कुत आगत इत्यत्र 'त्यतनौ' इत्यनेनाव्ययात्त्यप्प्रत्यये प्राप्ते गणपाठसामर्थ्यादण्प्रत्ययष्टिलोपश्च । निपातनाद्विसर्गस्य जिह्वामूलीयाभावः । कौतस्कुतः ॥ कान्कानिति । अत्र एकः किंशब्दः प्रश्ने । द्वितीयो निन्दार्थे । सागागमाभावोऽत्र भिन्नार्थत्वात् । गणे चाम्रेडितस्यैव ग्रहणम् । कान् कुत्सितान् पश्यसीत्यर्थः । कांस्कान् इति । अत्र आम्रेडितत्वात्तु पूर्वनकारस्य सगागमो भवति निपातनात् । कांस्कान् कान् कान् पश्यतीत्यर्थः॥कः क इति कस्कः । जिह्वामूलीयाभावोऽत्र ॥ भासः करोतीति भास्करः जिह्वामूलीयाभावः । कुत्सितं पय इति पयस्पाशम् । कुत्सायामिति पाशः ॥ ईषन्न्यूनं यश इति यशस्कल्पम् । ईषदसमाप्ताविति कल्पः । कुत्सितं यश इति कुत्सितेऽर्थे कः । यशस्कम् ॥ आत्मनो यश इच्छतीति । काम्यच्चेति काम्यप्रत्ययः । यशस्काम्यति इत्यादौ विसर्गस्य जिह्वामूलीयोपध्मानीयाभावो निपातनात ॥ कुत्सितं सर्पिरिति सर्पिष्पाशम् ॥ ईषन्न्यूनं शर्पिरिति सर्पिष्कल्पम् ॥ कुत्सितं सर्पिरिति सर्पिष्कम् ॥ आत्मनः सर्पिरिच्छतीति सर्पिष्काम्यति । इत्यादौ विसर्गस्य षत्वं निपातनात् ॥ नमस्करोति–नमः करोति । इत्यत्र विकल्पेन सकारविसर्गौ निपातनात् । पुरस्करोतीत्यत्र जिह्वामूलीयाभावः ॥ निष्प्रत्यूहम् , आविष्कृतम् , दुष्कृतमित्यादौ विसर्गस्य षत्वं निपातनात् ॥ तिरस्कर्ता·तिरः कर्तेत्यत्र वि·

(क) तद्बृहतोः कारपत्योश्चोरदेवतयोः सुट् तलोपश्चेति सारस्वतादौ दृश्यते ।

कल्पेन सकारविसर्गौ ॥ द्वौ वारौ करोतीति द्विष्करोति-द्विः करोति ॥ त्रीन् वारान् करोतीति त्रिष्करोति-त्रिः करोति ॥ चतुरो वारान् करोतीति चतुष्करोति-चतुः करोति । द्वित्रिचतुर्भ्यः इति सुः ॥ चतुर्षु कपालेषु संस्कृत इत्यर्थे अण् । द्विगुसमासेऽणो लुक् च । चतुष्कपाल.-चतुः कपालः ॥ सर्पिष्करोति-सर्पिः करोति ॥ धनुष्करोति-धनुः करोति । इत्यादौ विकल्पेन विसर्गस्य षत्वविसर्गौ निपातनात् ॥ सर्पिषो घृतस्य कुण्डिकेति सर्पिष्कुण्डिका । नित्यं षत्वमत्र ॥ अयसः कार इत्ययस्कारः ॥ अयसः कामः इत्ययस्कामः ॥ अयसः कुम्भ इत्ययस्कुम्भः ॥ इत्यत्र विसर्गस्य जिह्वामूलीयाभावः ॥ अयसः पात्रमित्ययस्पात्रमित्यत्रोपध्मानीयाभावः ॥ अयः सहिता कुशेत्ययस्कुशा । वेदे औदुम्बरशङ्कुं कुशेति व्यवहरन्ति । अयोविकारे तु कुशीति ॥ अय इव कर्णौ यस्याः सा अयस्कर्णी । नासिकोदरेतीप् । अत्र जिह्वामूलीयाभावः ॥ पदस्याध इत्यधस्पदं शिरसः पदमिति शिरस्पदमित्यत्रोपध्मानीयाभावः ॥ आकृत्या स्वरूपेण गण्यते यः स आकृतिगण इति ॥५॥

(त०) अत्रापि वेत्यस्य व्यवस्थितत्वात् अनेकार्थलाभ इत्याशयेनाह-**वाचस्पत्यादय इति** । बृहस्पतिरित्यत्र तकारस्य सकारः, तस्कर इत्यत्र दकारस्य ॥ एवमन्येऽपि॥५॥

रोऽरात्रिषु ॥ अह्नो विसर्जनीयस्य पदान्ते रो भवति न तु रात्र्यादिषु ॥ अहर्गणः । अहरहः । अरात्रिषु किम् । गतमह्नो रात्रिरेषा । अहोरात्रः । अहोरूपम् । अहोरथन्तरम् (क) ॥ ६ ॥

(सु०) **रोऽरात्रिषु** ॥ पदान्तेऽहन्शब्दस्य विसर्गस्य रः स्यात् रात्र्यादिवर्जितेषु परतः ॥ अरात्रिष्विति बहुवचनमादिशब्दार्थे । तेन रात्रिरात्ररूपरथन्तराणि रात्र्यादयः ॥ अह्नां गण इत्यहर्गणः । अहः इति नस्य रः ॥ अहः अहः इत्यहरहः । वीप्सायां द्वित्वम् ॥ अहश्च रात्रिश्चानयोः समाहार इत्यहोरात्रः । समासान्तोऽप्रत्ययोऽत्र । 'रात्राह्नाहान्ताः' इति पुंस्त्वम् । अह्नो रात्रिरेषा । इदमह एषा रात्रिरस्तीत्यर्थः । प्रशस्तमह

(क) **रोऽरात्रिषु** । अत्राह इत्यतोऽह इत्यनुवर्त्तते । पदान्ते चेत्यतः पदान्ते इति चेति मत्वाह—अह्नो विसर्जनीयस्य पदान्ते इति । ननु यदि पदान्त इत्यनुवर्त्तते तर्हि अवसानेऽहः इत्यत्रापि प्राप्नोति । न च पुनः रेफस्य विसर्गादेशो भविष्यतीति वाच्यम् । एवमहर्गण इत्यादावपि विसर्गादेशे रेफविधानं व्यर्थं स्यात् । अह इति सत्वेनैव सिद्धत्वात् । नाप्येतत्कृतरेफविसर्गस्य विध्यन्तरबाधनार्थत्वमिति वाच्यम् । यं विधिं प्रति उपदेशोऽनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ बाध्यते इति विसर्गादेशं प्रति उपसर्गोऽनर्थक इति तमेव बाधते सत्वादीनां पुनर्निमित्तमेवेति बाधते । अथवा—

यद्येवानिष्टं स्यात्तर्हि विसर्गप्रकरणान्ते नाह्नो रात्रिष्विस्येव ब्रूयात् । तस्मादेकविधानसामर्थ्याच्छ्रवणमेवेति प्रसज्जेदिति चेदुच्यते । इहारात्रिष्विति पर्य्युदासो नञ् । यदुक्तम्—

प्राधान्यन्तु विधेर्यत्र प्रतिषेधे प्रधानता, पर्य्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् । इति ॥

ततश्च नञिव प्रयुक्तमन्यसदृशार्थे तथा ह्यर्थगतिरिति न्यायेन रात्र्यादिसदृशे पदान्ते परे रो भवतीति नोक्तदोषः । तत्रापि लाघवार्थमरात्राविति वाच्ये बहुवचननिर्देशो रूपरथन्तरयोरपि ग्रहणायेति सर्वं मत्वाह—रात्र्यादिष्विति । रात्र्यादिवर्जितेषु पदान्तरेषु परत इत्यर्थः । ननु चैवमपि हे दीर्घाह्नो ग्रीष्मेत्यत्रापि स्यात् । मैवम् । गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय इति न भविष्यति । अह्नो बहुव्रीहौ गुणीभूतत्वात् । सत्वमप्येवं न स्यादिति चेन्मैवम् । अयं हि न्यायः पदकार्य्येष्वेव न नामकार्येषु । सत्वं च नामकार्य्यमिति । एतत्त्वोक्तमोदिति सूत्रे कैयटेन । एवं गां वाहीकमानयेति पूर्वं क्रियाभिसम्बन्धापेक्षया विभक्त्युत्पन्नायां वाक्यीयात्तु न्यायात्सामानाधिकरण्याद्गौणार्थप्रादुर्भावो भवतीतिपदकार्य्येष्वेवायं न्यायो न प्रातिपदिककार्य्येष्वितीति ।

इत्यहोरूपम् , प्रशंसायामिति रूपः । अहोरूपम् । गुणवाचको रूपशब्दोऽयम्त्र ॥ रथन्तरं सामवेदसंज्ञा । अहोरथन्तरम् । एषु विसर्गस्य उत्वं तत ओत्वम् ॥ पदान्ते किम् । अहोभ्याम् ॥

(त०) रोऽरात्रिष्विति ॥ अरात्रिष्विति बहुवचनात् रात्र्यादिर्गृह्यते ॥ अहोरात्र इति ॥ एकदेशविकृतस्यानन्यवत्त्वाद्रात्रशब्दस्यापि ग्रहणम् (क) । रात्राह्नाहान्ताः पुंसि इति नियमात्पुंस्त्वम् । गतमहो रात्रिरेषेति मुख्यः प्रयोगः ॥ ६ ॥

अतोऽत्युः । अकारात्परस्य विसर्जनीयस्योकारो भवत्यति परे । कोऽर्थः(ख) ।७।

(सु०) **अतोऽत्युः** ॥ आदवे लोपश् इत्यस्यापवादोऽयम् । अतः परस्य विसर्गस्य उत्वं स्यादिति ॥ अत इति किम् अग्निरत्र । तपरः किम् । देवा अत्र ॥ सुस्रोतः३ अत्र । दूराद्धाने इति प्लुतः ॥ अतीति किम् । देव इह ॥ तपरः किम् । देव आगतः ॥ तिष्ठतु पय अ३ग्निदत्तेत्यत्र गुरोरनृत इति प्लुतः ॥ विसर्गस्य उत्वे ओत्वे च एदोतोऽतः' इत्यल्लोपः । कोऽर्थः ॥ ७ ॥

(त०) **अतोऽत्युरिति** ॥ अत इति किम् । हरिरत्र ॥ तपरः किम् । देवा अत्र ॥ अतीति तपरः किम् । देव आगतः ॥ विसर्गस्येति किम् । राममनु । 'आदवे लोपश्' इत्यस्यापवादोऽयम् ॥ ७ ॥

हवे ॥ अकारात्परस्य विसर्जनीयस्योकारो भवति हवे परे । देवो याति । मनोरथः ८

(सु०) **हवे** ॥ अत इत्यनुवर्तते । अतःपरस्य विसर्गस्य उत्वं स्यात् हवे 'आदवे लोपश् इत्यस्यापवादोऽयम् ॥ अतः किम् । वायुर्वन्द्यः ॥ तपरः किम् । वेधा वन्द्यः ॥ हवे किम् । देवः पश्यति ॥ ८ ॥

(त०) **हवे इति** ॥ लोपशोऽपवादः ॥ अतः किम् । भानुर्वन्द्यः । तपरः किम् । वेधा नम्यः । हवे किम् । रामः कर्ता ॥ अत्र लघुभाष्यम्-अतोऽह्ववे उरित्येकयोगो न कृतोऽस्यानित्यत्वज्ञापनाय । तेन उषर्बुध इत्यादि सिद्धम् । अत्रेदमवधेयम् । 'कुत्वो ≍ क ≍पौ वा' इत्यस्य व्यवस्थितत्वाश्रयणेनैव वाचस्पत्यादीनां सिद्धत्वेनोषर्बुध इत्यत्रापि रत्वसिद्धेरनित्यत्वज्ञापनस्यानुचितत्वात् । किञ्च ज्ञापितेऽप्यस्यानित्यत्वे 'आदवे लोपश्' इत्यस्य प्राप्तौ रेफार्थयत्नस्य त्वयाऽप्यभ्युपगमात् ॥ ८ ॥

आदवे लोपश् ॥ अवर्णात्परस्य विसर्जनीयस्य लोपश् भवत्यव परे (ग) ॥ देवा अत्र । वाता वान्ति । देवा इह ॥ ९ ॥

(क) **केचित्तु** । राज्यादिगणे रात्रशब्दं पठन्ति । तेन 'अहो रात्र' इति सिद्धम् ।

(ख) **अत इति** । यद्यपि कः अर्थ इत्यादावादवे लोपश् इति लोपशपि प्राप्नोति, तथापि 'सावकाशनिरवकाशयोर्निरवकाशो विधिर्बलवान्' इत्युक्तविधेर्निरवकाशत्वादुत्वम् । उत्वे चान्तरङ्गत्वादोकारैकादेशे पश्चादेदोतोऽत इत्यलोपः ।

(ग) **आदिति** । अत्राकारोऽक्षरसमाम्नाये पठितत्वाद्दीर्घोच्चारणसामर्थ्यात्प्रयत्नाधिक्याद्वा न भेदग्राहक इति तस्य तपरत्वानुपपत्तेरकारस्य पञ्चम्यन्तस्येदं ग्रहणमित्यभिप्रेत्याह—**अवर्णादिति** । अत्र माधवः—

आदिति किम् । न चेकारादिनिवृत्त्यर्थमिति वाच्यम् । नामिनो र इति रेफेण बाधितत्वात् । नापि व्यञ्जननिवृत्त्यर्थम् । असम्भवाद् व्यञ्जनेभ्यः परस्य विसर्गस्य । एवं तर्हि अतोऽत्युरित्यतोऽनुवृत्तस्य तपराकारस्य निवृत्तेः स्पष्टीकरणार्थमित्यभिप्रेत्याकारमुदाहरति—**देवा अत्रेत्यादि** । अत इत्यनुवृत्तौ दीर्घस्या-

(सु०) आदवे लोपश् ॥ आदिति पञ्चम्यन्तम् । न तु तपरत्वम् । दिव औ इत्यादिनिर्देशात् ॥ अवे किम् । देवाः सन्ति ॥ ९ ॥

(त०) आदवे लोपशिति ॥ नन्वाद्ग्रहणं किमर्थम् । न चेकारादिनिवृत्त्यर्थं 'नामिनो रः' इति रेफेण बाधितत्वात् । न च हसव्यावृत्त्यर्थं हसाद्विसर्गस्यासम्भवात् । तस्मादुत्तरार्थमेव॥ नन्ववग्रहणं किमर्थम् । न च हवग्रहणाननुवृत्त्यर्थम् । व आह पूर्वं उपध्येत्यादिनिर्देशैस्तज्ज्ञापनात् ॥ नाप्युत्तरार्थम् । असंदेहार्थं लाघवार्थं तत्रैवाकरिष्यत् ॥ नाप्यवसानवाधनार्थं ज्ञापकादेव तत्राप्यस्याप्रवृत्तेः ॥ तथा हि । यत् आप इति सिलोपं शास्ति तज्ज्ञापयति नानेनावसाने लोपश् भवतीति । अन्यथा सेविसर्गलोपशोः कृतयोर्गङ्गेत्यादिसिद्धौ किं सिलोपविधानेन । ननु लोपशि सति गङ्गाऽत्रेत्यादौ संधिर्न स्यादतो लोपविधानं न ज्ञापकमिति चेन्न । यस्मिन् स्वरे परे लोपश् तेन सह संधिर्नेति ज्ञेयम् । वस्तुतोऽवसानेऽतिप्रसङ्गवारणार्थमेवाब्ग्रहणम् ॥ ननु 'आद्योऽबे' इत्येव सूत्र्यतां स्वरे यत्वं वेति तु न कर्तव्यम् । देव इहेत्यादौ यकारे 'य्वोर्लोपश् वा' इत्यनेन लोपशि कृते रूपसिद्धेः । न च तत्रायाद्यनुवर्तनादस्य कथं लोपश् इति वाच्यम् ॥ यत्पूर्वमवर्णं गृहीत्वा अय् इत्यादिरूपसम्भवात् । लक्षणप्रतिपदोक्तयोः इति परिभाषायास्तु अनित्यत्वात् । उच्यते । भोस इत्यत्रापि यो वेत्यनुवर्तेत । ततश्च भो इहेत्यादि न सिद्ध्येत् ॥ ९ ॥

(स्वरे यत्वं वा) देवायिह ॥ १० ॥

(सु०) स्वरे यत्वं वा ॥ लोपशो विकल्पेनापवादोऽयम् । अवर्णात्परस्य विसर्गस्य यत्वं वा स्यात् ॥ पक्षे लोपश् । स्वरे किम् । रामश्चतुरः ॥ १० ॥

(त०) स्वरे यत्वं वेति ॥ अवर्णात्परस्य विसर्जनीयस्य स्वरे यत्वं वेत्यर्थः ॥ १० ॥

भोसः ॥ भोस् भगोस् अघोस् इत्येतस्य विसर्जनीयस्य लोपश् भवत्येव परे ॥ भो हरे । भगो नमस्ते । अघो याहि ॥ ११ ॥

स्वरे यत्वं वा ॥ भोस्–भगोस्–अघोस् विसर्गस्य स्वरे यत्वं वा भवति ॥ भोयेहि । भगोयेहि । अघोयगच्छत् ॥ १२ ॥

(सु०) भोसः ॥ भोस् भगोस् अघोस् इति सकारान्ताः निपाताः सन्ति । तत्राद्यन्ताभ्यां प्रत्याहारो 'भोस' इति गृहीतः । भोसः इति षष्ठ्यन्तम् । भोस् भगोस् अघोस्

ग्रहणादत्र न स्यात् । अत्रोभयत्राप्यनेन विसर्गलोपशि आद्यं लोपशीति न सवर्णे दीर्घः । ननु चेदमबग्रहणं पूर्वसूत्रतो हवग्रहणाननुवृत्त्यर्थं खसे वा लोपशोऽप्रसङ्गार्थमवसाने वोत्तरार्थं वा । नाद्यः । व आह इति निर्देशात्तन्निवृत्तेः । नापि द्वितीयः । सत्वस्य निर्विषयत्वप्रसङ्गात् । न च तृतीयः । ज्ञापकात् । तथा हि । यदयमपि इत्याबन्तात्सिलोपः शास्ति तज्ज्ञापयत्याचार्यो नावसाने विसर्गलोपश् प्रवर्त्तते इति । अन्यथा तत्रापि सेविसर्गलोपशोः कृतयोः गङ्गेत्यादिसिद्धेः सिलोपविधानं व्यर्थं स्यात् । ननु यदा लोपश् स्यात् तदा गङ्गात्रेत्यादौ लोपशि पुनर्न सन्धिरिति सन्धिर्न स्यात् । लोपे तु सन्धिर्भवत्येवेति सन्ध्यर्थत्वाल्लोपस्याज्ञापकत्वमिति तृतीयः पक्षः प्रमाणमिति चेन्न, सन्धिप्रकरणादेवाऽवसानेऽप्रवृत्तेः । तुर्य्योऽपि न यतोऽसंदेहार्थं लाघवार्थं चोत्तरत्रैवाकरिष्यत् । एवं तर्हि द्वितीयपक्ष इव प्रमाणम् । ।ननु चोक्तमनवकाशत्वात्सत्वं बाधकं भविष्यतीति । मैवम् । अत्र ह्यवग्रहणे सति तत्र परिशेष्यात् खस इति लभ्यते । अन्यथा बहुतरावकाशं तत्स्यादिति खसव्यावृत्त्यर्थमबग्रहणं संस्थितम् ।

एषां विसर्गस्य लोपश् स्यादवे ॥ अवे किम् । भोस्तपस्विनः ॥ स्वरे यत्वं वा ॥ भोस्-भगोस्अघोसां विसर्गस्य यत्वं वा भवति स्वरे । पक्षे लोपश् ॥ ११-१२ ॥

(त०) भोस इति ॥ षष्ठ्येषा न तु पञ्चमी । भोस्शब्दस्य सान्तत्वेन ततः परस्य विसर्गस्याभावादित्यभिप्रेत्याह—भोस्भगोस्अघोस्इत्येतस्येति ॥ भोस्भगोस्-अघोस्इत्येतस्मात्परस्येति तु प्राचः प्रमाद एव । भोस इत्यत्र निपातभवच्छब्दयोरपि सामान्येनानुकरणम् । तथा च भो देव भो लक्ष्मि, भो विद्वन् इत्यादि सिद्धम् । न च भोस इत्यत्र भोस्मात्रग्रहणात् भगो इह अघो याहीत्यादावव्याप्तमिति वाच्यम् । प्रत्या-हाराश्रयणेनाव्याप्तिवारणात् ॥ एवं च विभोरिदमित्यादावतिप्रसङ्गवारणं च सम्भवति । तस्य प्रत्याहारेऽनन्तर्भावात् ॥ अत्र लघुभाष्यम् । ननु अभोसोऽवे लोपश्' इत्येकयोग एव लाघवाय कर्तुमुचितः । उच्यते । नञ् समासोऽत्र प्रतीयेत । भोसव्यतिरिक्ताच्छब्दा-त्परस्येति । अथैतद्दोषवारणाय अभोसोरवे लोपशिति सूत्रणीयम् । तदर्द्धमात्रालाघवेऽपि वैरूप्यं दोषः । भोसोऽवयवोऽवर्णात्पर इति सूत्रभेदे तु नान्यं दोष इति सूत्रभेद एवाश्रितः। अत्रेदमवधेयम् । आद्भोसोऽवे लोपशिति सूत्रणीयम् । तथा च—नञ्समासभ्रमवैरूप्यदोष-योरसम्भव एव । आदित्यस्य पञ्चम्यन्तत्वात् । भोस इत्यस्य षष्ठ्यन्तत्वाच्च भोसोऽवयवोऽ र्णात्तु पर इत्यस्यार्थस्य सुलभत्वात् । एवं च स्वरे यत्वं वेत्यस्याद्विरुक्तिश्चेति महल्लाघवम् १२

नामिनो रः । नामिनः परस्य विसर्जनीयस्य रेफो भवत्यवे परे ॥ अग्निरत्र । पटुर्वक्ता (क) ॥ १३ ॥

उषसो बुधे । उषसो विसर्जनीयस्य रेफो भवति बुधे परे ॥ उषः बुधः–उषर्बुधः ॥ १४ ॥

(सु०) नामिनो रः ॥ नामिन इति किम् । रामो वन्द्यः ! । अवे किम् । अग्निः करोति ॥ १३-१४ ॥

(त०) नामिनो रः इति ॥ ननु नामिन इति किमर्थम् । अवर्णाल्लोपशादिवि-धानेन हसाद्विसर्गासंभवेन च तस्यैव परिशेषात् । यत्तु नामिन इति योगविभागे आदवे लोपशित्यतोऽवे लोपशिति चानुवर्तते । क्वचिन्नामिनः परस्य विसर्गस्यावे लोपश् । तेन 'सेमां भूम्याददे' इत्यादि सिद्धमित्याहुः (ख), तन्न । समामित्यादेश्छान्दसत्वात् । छन्द-सि दृष्टानुविधिरित्यस्योक्तत्वात् । 'सेमां भूम्याददे' इत्यत्रापि भूमिशब्दस्य कृदन्तत्वेन कृदिकारादिति ईपि कृते 'हसेपः' इति सिलोपे इष्टसिद्धेः । उच्यते । 'नामिनोरः' इत्यत्र

(क) नामिन इति । अत्र प्रसादः–यद्यपि हसेभ्यो विसर्जनीयस्यासम्भवादवर्णात्परस्य चोत्वलोपशोः सत्त्वात् परिशेषादेव नामिन इति सिद्धौ नाम्युपादानमपार्थकम् । तथापि रेफप्रकृतिकस्य खपे वेत्यत्र नामिन एव यथा स्यान्न प्रातः प्रातरित्यादावित्यार्थम् । यत्तु नामिग्रहणात् अत्र प्रथमैकवचनान्तत्वमुत्त-रत्र षष्ठ्येकवचनान्तत्वमवसीयत इति । तदसत् । तदुपादानेऽपि सन्देहसत्त्वाद्व्याख्यानतो विशेषप्रतिप-त्तेश्च तुल्यत्वात् प्रातः प्रातरित्यादौ कल्पनान्तरापाताच्च ।

(ख) आहुरिति । अनुभूतिस्वरूपाचार्यादय इति शेषः । तथा च सारस्वते सूत्रम्—

क्वचिन्नामिनोऽवे लोपश् । नामिनः परस्य विसर्जनीयस्य क्वचिल्लोपश् भवत्यवे परे । भूमिः—आददे=भूम्याददे इति ।

योगविभागार्थं नामिग्रहणम् । तथा च वाक्यभेदेन व्याख्यानम् । नामिन इत्येको योगः । तत्र खपे वेति चानुवर्त्य र इति षष्ठ्यन्तं च कृत्वा वाक्यभेदेन व्याख्येयम् ॥ १३-१४ ॥

(रेफप्रकृतिकस्य खपे वा रेफः) गीः पतिः गीर्पतिः गी ≍ पतिः (क) ॥ १५ ॥

(सु०) **रेफप्रकृतिकस्य खपे वा रेफः** ॥ रेफः प्रकृतिर्मूलकारणं यस्य स रेफप्रकृतिकस्तस्य रेफप्रकृतिकस्य विसर्गस्य रकारो वा भवति खपे परे ॥ वाग्रहणात् पक्षे विसर्गोपध्मानीयौ ॥ १६ ॥

(त०) **रेफप्रकृतिकस्य खपे वेति** ॥ रेफः प्रकृतिर्यस्य सः तथा तस्य । वस्तुतस्तु रेफप्रकृतिकस्येति नोचितं वक्तुम् । र इति सूत्रार्थेनैव तद्गतार्थम् ॥ १६ ॥

(अहन्) अहर्पतिः-अहः पतिः-अह ≍ पतिः ॥ १६ ॥

(सु०) **अहन्** ॥ अहन्शब्दस्य विसर्गस्य रो भवति ॥ रोऽरात्रिष्विति रत्वे विसर्गे च कृतेऽयं विधिः प्रवर्तते । अहर्पतिः-अहः पतिः-अह≍पतिः ॥ १६ ॥

रः ॥ रेफसंबन्धिनो विसर्जनीयस्य रेफो भवत्यबे परे ॥ प्रातरत्र । अन्तर्गतः (ख) ॥ १७ ॥

(सु०) **रः** ॥ षष्ठ्यन्तमिदम् । रेफस्य स्थाने विहितो यो विसर्जनीयस्तस्य रो भवत्यबे परे ॥ अबे किम् । प्रातःकालः । रेफप्रकृतिकस्येति किम् । रामो नम्यः ॥ १७ ॥

(त०) **र इति** ॥ षष्ठ्येषा न तु पञ्चमी ॥ १७ ॥

रि लोपो दीर्घश्च ॥ रेफस्य रेफे परे लोपो भवति पूर्वस्य च दीर्घः ॥ पुना रमते । हरी राजते । भानू रम्यः । शंभू राजते (ग) ॥ १८ ॥

(सु०) **रि लोपो दीर्घश्च** ॥ र इति षष्ठ्यन्तमनुवर्तते । रि इति सप्तम्यन्तम् । रो लोपः स्याद्रेफे परे ॥ चकारो विधेययोर्लोपदीर्घयोः समुच्चयार्थः । तेन पूर्वस्वरस्य दीर्घश्च ॥ रीति किम् । प्रातर्वायुः ॥ र इति किम् , मनोरथः ॥ १८ ॥

(त०) **रि लोपो दीर्घश्चेति** ॥ रि इति सप्तमी । अत्र र इति षष्ठ्यन्तमनुवर्तते इत्यभिप्रेत्याह-**रेफस्येति** ॥ रीति सप्तमीनिर्देशाल्लोपनिमित्ताद्रेफात्पूर्वस्येत्याशयेनाह-**पूर्वस्येति** ॥ चकारो विधेययोर्लोपदीर्घयोः समुच्चयस्य द्योतकः ॥ १८ ॥

(क) **रेफेति** । रेफप्रकृतिकस्येत्यत्र वाशब्दस्य व्यवस्थितात्व्यवस्थितार्थत्वेन चिर्कीः करोतीत्यादावनतिप्रसङ्गः ।

(ख) **रः** । अत्र नामिनो र इत्यतो र इति प्रथमान्तानुवृत्तौ पुना र इति निर्देशात् षष्ठ्यर्थं विज्ञायति इत्यत आह-**रेफसम्बन्धिन इति** । रेफस्थाने आदेशसम्बन्धेन विहितस्येत्यर्थः । तत्रापि पूर्वेणैव सिद्धत्वादनन्यर्थोऽयमारम्भ इति मत्वोदाहरति-**प्रातरत्रेत्यादि** । रः किम् । पयोत्र । 'रः' इत्यत्र वेत्यनुवर्त्तते, उत्तरसूत्राच्चेति च । तत्राऽबे चेति सम्बन्धे चादन्यत्रापि लब्धम् । तत्रापि चेति सम्बन्धः । ततश्च रेफप्रकृतिकस्य खपे वेति वार्त्तिकं गतार्थम् । वार्तिके रेफकृतिकस्येति व्यर्थं र इत्यनेनैव गतार्थत्वात् । खपे वेति विवक्षितं तदप्युक्तयुक्त्या गतार्थमिति रघुनाथः ।

(ग) **रिलोप इति** । रीति सप्तमीनिर्देशो लोपनिमित्तात् रेफात्पूर्वस्य स्वरस्य दीर्घार्थः ऊ रसे इति निर्देशोऽप्यत्रानुकूलः ।

सैषाद्धसे ॥ सशब्दादेषशब्दाच्च परस्य विसर्जनीयस्य लोपो भवति हसे परे ॥ स चरति । एष हसति(क) ॥ १९ ॥

(सु०) **सैषाद्धसे** ॥ सश्च एषश्च तयोः समाहारः सैषं तस्मात् । अनञ्समासेऽककारात्सैषात् परस्य विसर्गस्य लोपः स्यात् । हसे परे । स इति एष इति च कृतात्वसत्वस्य तच्छब्दस्य एतच्छब्दस्य चानुकरणम्(ख) । अनुकार्यानुकरणयोर्भेदेऽर्थवत्त्वाद्विभक्त्युत्पत्तौ सत्यां द्वन्द्वे विभक्तिलोपे च कृते नामत्वात् झसि परतः स्मटोऽभावः । द्वन्द्वे सर्वादीनां न सर्वकार्यमित्युक्तत्वात् ॥ अककारात् ॥ किम् । एषको रुद्रः ॥ अनञ्समासे किम् असः शिवः ॥ हसे किम् । एषोऽत्र ॥ १९ ॥

(त०) **सैषाद्धसे** इति । सश्च एषश्च तयोः समाहारः सैषं तस्मात् । स इति तच्छब्दस्य कृतात्वसत्वस्यानुकरणम् । एष इत्येतच्छब्दस्य । अनुकार्यानुकरणयोर्भेदादर्थवत्त्वम् । स्मटोऽभावो द्वन्द्वे सर्वादीनां सर्वकार्याभावज्ञापकः । स धातुरित्यादिज्ञापकात् तच्छब्दस्यैवानुकरणम् । तत्साहचर्यादेषशब्दोऽप्येतच्छब्दस्यैव विकृतनिर्देशात्प्रथमान्तादन्यत्र न । असः शिवः इत्यादौ तु संज्ञापूर्वको विधिरनित्य इत्यनित्यत्वान्न ॥ १९ ॥

(सशब्दाद्विसर्गस्य लोपः स्वरे लोप एव पादपूरणं चेत्)

सैष दाशरथी रामः सैष राजा युधिष्ठिरः ।
सैष कर्णो महात्यागी सैष भीमो महाबलः ॥ २० ॥

इति विसर्गसंधिः ॥ ६ ॥

(सु०) **सशब्दाद्विसर्गस्य लोपः स्वरे लोप एव पादपूरणं चेत्** ॥ स इति शब्दस्य विसर्गस्य लोपःस्यात् स्वरे परे । चेद्यदि लोपे सत्येव पादः पूर्येत ॥ पादः श्लोकचतुर्थांश इति ॥ पादपूरणमिति किम् । स एवमुक्त्वा ॥ लोप एवेत्यवधारणात् अन्यथा पादपूरणे लोपो न । 'सोऽहमाजन्मशुद्धानाम्' इति(ग) ॥ स एष रामोऽस्ति । कीदृशः । दशरथस्यापत्यं दाशरथिः । अत इञनृषेरितीञ् ॥ स एष युधिष्ठिरः । कीदृशः । राजते इति राजा ॥ स एष कर्णः कीदृशः । महांश्चासौ त्यागश्च महात्यागः । महात्यागोऽस्ति यस्य स महात्यागी । 'मान्तोपधाद्वतिविनौ' इतीन् । स एषः भीमः । कीदृशः । महद् बलं यस्य स महाबलः । अइकौ चेत्यप्रत्ययः॥२०॥ इति सुबोधिन्यां विसर्गसंधिः॥६॥

(त०) रि लोपो दीर्घश्चेति सूत्रे लोपशोऽनुवर्तनात् रि लोपो दीर्घश्चेति लोपग्रहणमुत्तरार्थमित्याशयेनाह—**सशब्दाद्विसर्गस्य लोपः स्वरे लोप एव पादपूरणं चे-**

(क) **सैषादिति** । स च एषः च सैषं तस्मात् । अत्र यद्यपि तदेतदोर्ग्रहणे विभक्तिलोपे निमित्ताभावे नैमित्तिकस्याप्यभावात्तदेतशोर्हस इति स्यात् , तैरेवैरित्यादावपि लोपप्राप्तिश्च सकारएषशब्दमात्रग्रहणे सो नः पुंसः एषगं एट् तस्य एषः इत्यादावपि लोपप्रसक्तस्तथापि किलात्षरसः कृतस्येत्यादिनिर्देशाज्ज्ञापकात्तद् एव सोऽत्र तत्साहचर्याच्चैषोऽप्येतद् इति विज्ञायते । एषको रुद्र इत्यादावेतच्छब्दपरत्वाभावान्न लोपः । वानुवृत्तेरसः शिव इत्यादौ नञ्समासेऽपि न । इति **वासुदेवः** । संज्ञापूर्वकविधेरनित्यत्वादसः शिवः एषकोरुद्र इत्यादौ न । इति केचित् । (ख) तद्भिन्नत्वे सति तत्सदृशकरणम् ।

(ग) श्लोकोऽयं कालिदासस्य रघुवंशे, सो यथा—
सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम् । आसमुद्रक्षितीशानामानाकरथवर्त्मनाम् । (कुलकम्) ।

दिति ॥ तथा च 'सैष दाशरथी रामः' इत्यादौ लोपे जाते संधिः सिद्धयति । लोपशि तु न स्यात । लोप एवेत्यवधारणादन्यथापि पादपूरणे लोपो न । तेन 'सोऽहमाजन्मशुद्धानाम्' इत्यादि(क) सिद्धम् ॥ २० ॥

श्रीविद्यानगरस्थायी लोकेशकरसंज्ञकः। विसर्गसन्धेः कृतवान् व्याख्यां भाष्यानुसारिणीम्(ख)॥

इति तत्त्वदीपिकायां विसर्गसंधिः ॥ ६ ॥

अथ स्वरान्तपुँल्लिङ्गाः ॥ ७ ॥

(**अविभक्ति नाम**) विभक्तिरहितं धातुवर्जितं चार्थवच्छब्दरूपं नामोच्यते(ग) ॥ १ ॥

(सु०) **अविभक्ति नाम** ॥ विभक्तेरन्यदित्यविभक्ति । अन्यच्छब्देन शब्दरूपं विशेष्यं गृह्यते । तत् क्लीबम् । तस्य विशेषणमिदम् । सूत्रे विभक्तिशब्देन तन्त्रादिना विभक्तिः विभक्त्यन्तं चेत्युभयमुच्यते । विभक्तिशब्देन सह नञ्तत्पुरुषः । नञ तु द्विधा । तथा हि "द्वौ नञौ च समाख्यातौ पर्युदासप्रसज्यकौ । पर्युदासः सदृग्ग्राही प्रसज्यस्तु विषेधकृत् ॥ १ ॥ प्राधान्यं तु विधेर्यत्र प्रतिषेधेऽप्रधानता । पर्युदासः स विज्ञेयोः यत्रोत्तर-

(क) सम्पूर्णश्लोकस्तु प्राक् द्रष्टव्यः ।　　(ख) क्वचिदनुगामिनीमिति पाठः ।

इति चक्रधराख्यटिप्पण्यां सन्धिप्रकरणं समाप्तम् ।

(ग) अथ शब्दाः द्विविधाः । स्वरान्ताः हसान्ताश्च । ते पुनस्त्रिविधाः । पुंलिङ्गाः स्त्रीलिङ्गाः नपुंसकलिङ्गाश्च । तत्र प्राथम्यादुपजीव्यप्रक्रियात्वाच्च अकारान्तादिक्रमेणादौ स्वरान्तान् पुंलिङ्गान् प्रतिपादयितुमाह–**अथ स्वरान्तपुंलिङ्गा इति** । अथेति संधिप्रकरणकथनानन्तरम् । **अविभक्तीति** । ननु 'अविभक्ति' इति कथं विगृह्यम् । नास्ति विभक्तिर्यस्योत्पत्तौ करणत्वेन आहोस्विन्नास्ति विभक्तिर्यस्योत्पत्तौ कार्य्यत्वेन । तत्राद्ये पक्षे गङ्गेत्यादावेव स्यात् । आवाद्युत्पत्तौ विभक्तिनिरपेक्षत्वात् ग्रामप्राप्त इत्यादौ तु तत्सापेक्षत्वान्न स्यात् । न च समासत्वाद्भविष्यतीत्यपि वाच्यम् । एवं हि समासग्रहणस्य वाक्यव्यावृत्तये नियमार्थता भज्येत । तस्मान्नाद्यः पक्षः । नापि द्वितीयः, भवतीत्यादावपि प्रसङ्गात् । ततश्च तिवाद्यभिहितैकत्वादिसंख्यायामप्यव्यये इवैकवचनं स्यात् । एवं तर्हि विग्रहः करिष्यते नास्ति विभक्तिर्यस्मिन्नाश्रयत्वेन विभक्त्याश्रयो यन्नास्तीत्यर्थः । इत्यभिप्रेत्याह–**विभक्तिरहितमिति** । अत एव धातूनां व्यावृत्तिः तिवादिविभक्त्यन्तत्वात्तेषाम् । हन्तेरहन्नित्यादावपि भूतपूर्वगत्यानाविभक्तित्वमिति मत्वाह–**धातुवर्जमिति** । धातुसंज्ञां वक्ष्यति । तत्राविभक्तीति नञ् नञिव युक्तन्यायेन विभक्तितुल्यमर्थवदेव संज्ञि प्रत्याययतीत्याह–**अर्थवदिति** । अभिधेयवदित्यर्थः । तेनाभावशशविषाणादीनामप्यभिधेयवत्त्वात्संज्ञा सिद्धयति । अभिधेयचातुर्विध्यं तु जातिगुणक्रियाद्रव्यभेदेन प्रपञ्चितम् । महाभाष्यादेरवगन्तव्यम् । **शब्दरूपमिति** । शब्दशास्त्रत्वात्प्रतीतमित्यर्थः । एतदपेक्षमेवाविभक्तीति नपुंसकम् । अविभक्तीति किं काण्डे । अन्यथा(१) अत्र संज्ञायां पुनः संख्याकर्माद्यर्थायोगाद्विभक्तेरनुत्पत्तावपि संज्ञाश्रयो नपुंसकस्य ह्रस्वः स्यात् । धातुवर्जितमिति किम् । अहन् । अत्र हन्तेर्दिवादावटो यदागमस्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्त इत्यनेन धातुग्रहणेन ग्रहणादसंज्ञायां नलोपाभावः । अर्थवत्किम् । धनम् । अत्र नान्तावयवस्यानर्थकत्वादसत्यां संज्ञायां नलोपो न । वर्णानामानर्थकयन्तु महाभाष्ये । अनर्थकास्तु प्रतिवर्णमर्थानुपलब्धेरित्यादिना ग्रन्थेन सुविशदं प्रत्यपादि । तत्तदोऽवगन्तव्यम् । विस्तरभयादत्र नोक्तम् । इति विवरणकारः ।

(१) काण्डे कुड्ये । अत्र भाष्ये विभक्त्यन्तं शक्यमकर्त्तुं काण्डे कुड्ये कथं न भवति । कृत्तद्धितग्रहणार्थं नियमार्थं भविष्यति । कृत्तद्धितस्यैव प्रत्ययान्तस्य प्रातिपदिकसंज्ञा भवति । एवं च विभक्त्यन्तपदाभावेऽपि काण्डे इत्यत्र दूषणमेव नास्ति विवरणोक्तिश्चिन्तनीया ।

पदेन नञ् ॥ २ ॥ अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता ॥ प्रसज्यस्तु स विज्ञेयः क्रियया सह यत्र नञ्(क) ॥ ३ ॥" एवं हि विभक्तिभिन्नं विभक्त्यन्तभिन्नमर्थवच्छब्दरूपं संज्ञि । नाम च संज्ञा । विभक्त्यन्तभिन्नमिति कथनेन धातूनां व्यावृत्तिः कृता तेषां तिबादिविभक्त्यन्तत्वात् । तच्छब्दरूपं नाम प्रातिपदिकमुच्यते । कीदृशं तत् । अविभक्ति । पर्युदासोऽत्र नञ् गृह्यते । विभक्तिसदृशं विभक्तिभिन्नमित्यर्थः । विभक्तिसदृशमिति कथनेनार्थवदेवागतम् ॥ पुनः कीदृशम् । विभक्त्यन्तभिन्नमिति कथनेन धातुवर्जितमित्यागतम् ॥ पुनः कीदृशम् । अर्थवत् । अत्रार्थशब्दोऽभिधेयवचनो न तु धननिवृत्तिप्रयोजनवचनः । यथा-अर्थवान् धनवानित्यर्थः । मशकार्थो धूमः मशकनिवृत्तये इत्यर्थः । कोऽर्थः किं प्रयोजनमित्यर्थः । तत्राभिधेयं तु चतुर्विधं जातिगुणक्रियाद्रव्यभेदात् । जातिशब्दा यथा—गौः अश्वः इत्यादयः । गुणशब्दा यथा—शुक्लः कृष्णः इत्यादयः । क्रियाशब्दा यथा—पाचकः गन्तेत्यादयः । द्रव्यशब्दा यथा—डित्थं कपित्थमित्यादयः ॥ ननु वन्ध्यापुत्राभावशशविषाणगगनकुसुमादीनामर्थाभावादेषां नामसंज्ञा न स्यादिति चेदुच्यते । अभावोऽपि पदार्थान्तरत्वेनाभिधेयत्वादभावशब्दस्य सिद्धा संज्ञा । बन्ध्यादिशब्दार्थः पुत्रादिशब्दार्थश्च प्रसिद्ध एव । तयोः संसर्गमारोप्य शब्दप्रयोगसंभवात्तेषामप्यस्ति ॥ विभरहितमिति किम् । हरिषु । करोषि । छप्सिपोर्मा भूत् । पदादित्वात्सस्य षो न स्यात् ॥ विभक्त्यन्तरहितमिति किम् । देवौ । भवन्ति । अत्र ङित्वाद्यनभिधानेऽव्ययव्ययादिवदेकवचनं स्यात् ॥ धातुवर्जितमिति किम् । अहन्नित्यत्र 'नाम्नो नो लोपश्, इत्यनेन लोपश् स्यात् । अहन्नित्यत्र अह इत्यनेन सत्वं तु न तस्य लाक्षणिकत्वात् ॥ अर्थवदिति किम् । धनं वनमित्यादौ प्रतिवर्णं संज्ञा मा भूत् ॥ अत्र वार्तिकम् । कृत्तद्धितसमासाश्चेति(ख) । चकारोऽनुक्तसमुच्चयार्थः । तेन निपातस्यानर्थकस्य प्रातिपदिकसंज्ञा वक्तव्येति ॥ १ ॥

(क) द्वाविति । "उभौ नञौ समाख्यातौ (नकारौ द्विविधौ ज्ञेयौ) पर्य्युदासप्रसज्यकौ ॥ पर्य्युदासः सदृग्ग्राही निषेधार्थः प्रसज्यकः ॥" इति कुत्रचित् पाठः ॥ अप्राधान्यमिति । "अप्रधान्यं विधेर्यत्र प्रतिषेधे प्रधानता । प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ।" इति पाठान्तरम् ।

अत्र वासुदेवः—इत्युक्तदिशा नामसंज्ञाविधेः प्राधान्यादुत्तरपदयुक्तत्वाच्चात्र पर्य्युदासः । ततश्च नञिव युक्तमन्यसदृशेऽर्थे इति नञ्युक्तविभक्तेरर्थवत्तया सदृशोऽर्थवति विभक्तिभिन्ने वर्तमानत्वाद्विभक्तिरहितमर्थवदित्युक्तम् । विभक्तीनां प्रत्ययान्तत्वात्प्रत्ययग्रहणेन तदन्तस्येति विभक्त्यन्तभिन्नमित्यर्थः । तेन च कुण्डे वृक्षान् अहन् इत्यादौ विभक्त्यन्तत्वेन नामत्वाभावाद् भत्वनलोपादि नेति ।

(ख) कृत्तद्धितेति । अत्र सिद्धान्तरत्नावली—

कृत्तद्धितसमासश्चेषां द्वन्द्वसमासः । समासश्चेति चकारोऽनुक्तसमुच्चयार्थः । तेनैतेऽपि नामसंज्ञा भवन्ति इति वक्तव्यम् । ननु किमर्थमिदं नामसंज्ञा तु पूर्वेणैव सिद्धा न सिद्ध्यति तत्र कृत्सु क्रियावन्तानां धातुत्वानपायात् अत एव हेसोमपा इति धिलोपो न । स्वार्थतद्धितानामपि गुणीभूतार्थवत्त्वात् । तथाहि चोर एव चौरः । स्वार्थेऽण् । आदिवृद्धिः अत्र हि चोरशब्दस्य साक्षादर्थवत्त्वम् । चौरशब्दस्य तु चोरशब्दस्मरणद्वारकमिति गौणमुख्यन्यायेन चोरशब्दस्यैव पूर्वेण संज्ञा स्यात् न चौरशब्दस्येति विध्यर्थं कृत्तद्धितग्रहणम् । समासेष्वपि भूतपूर्वविभक्त्या अविभक्तित्वाभावात् । अत एव पञ्चाप्नोति पदान्ताश्रयो न लोपः । नन्वेवमपि अव्ययीभावादिति विभक्तिलुग्विधानानाज्ञापकात्समासे नामसंज्ञा भविष्यति । एवमपि नियमार्थं समासग्रहणम् । अर्थवत्समुदायनां मध्ये समासस्यैव यथा स्यात्तेन वाक्यस्यार्थवतोऽपि न भवति । अस्य विस्तरस्तु तत्त्वदीपिकायां द्रष्टव्यः ॥

(त०) अविभक्ति नामेति ॥ विभक्तेरन्यदिति अविभक्ति । विशेष्यं तु शब्दस्वरूपम् । तन्त्रादिना विभक्त्यन्तमपि लब्धम् ॥ ननु सूत्रे अविभक्तीत्येतावन्मात्रमर्थवद्ग्रहणं कुतो लब्धमिति चेत्, उच्यते । "द्वौ नञौ च समाख्यातौ पर्युदासप्रसज्यकौ । पर्युदासः सदृग्ग्राही प्रसज्यस्तु निषेधकृत् ॥ प्राधान्यं तु विधेर्यत्र प्रतिषेधेऽप्रधानता । पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् ॥ अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता । प्रसज्यस्तु स विज्ञेयः क्रियया सह यत्र नञ् ॥" इति । तथा च पर्युदासोऽत्र नञ् गृह्यते । ततश्च विभक्तेरर्थवत्त्वात् तत्सदृशमर्थवदेव संज्ञि उपपततीत्यर्थवल्लाभः ॥ तन्त्रादिलब्धविभक्त्यन्तपर्युदासाद्धातुपर्युदासोऽपि ॥ अर्थवदिति किम् । धनं वनमित्यत्र प्रतिवर्णं संज्ञा मा भूत् । तस्यां सत्यां स्याद्युत्पत्तौ नलोपः प्रसज्येत ॥ ननु च एकवर्णानामप्यर्थदर्शनादेतीत्यादाविव देवादिष्वपि वर्णा अर्थवन्तः कथं न । तथा च प्रत्याहाराह्निके अर्थवन्तो वर्णा इति भाष्येपि श्रीमत्पतञ्जलिनोक्तम् । उदाहृतं च कूप इति ककारे सति कश्चिदर्थो गम्यते । यूप इति यकारे अर्थान्तरम् । तेन मन्यामहे । यः कूपे कूपार्थः सः ककारस्य यो यूपे यूपार्थः स यकारस्येति । तथा ब्राह्मण इत्युक्ते योऽर्थो गम्यते नासौ अकारादीनामन्यतमापायेऽपि गम्यते । येषां च संघातो यत्कार्यं करोति ते प्रत्येकमपि तत्कुर्वन्ति । यथा तिलानां खारी तैलमुत्पादयति प्रत्येकं च तिलाः । ये तु यस्मिन् प्रत्येकमसमर्थास्तेषां समुदायोऽपि तत्रासमर्थः । यथा प्रत्येकं सिकतास्तैलं नोत्पादयन्ति तेषां खार्यपि । अतः संघातार्थवत्त्वाच्चार्थवन्तो वर्णाः तत्कथमर्थवद्ग्रहणे सत्यपि तेषां निवृत्तिरिति चेत् । उच्यते । अनर्थका वर्णाः प्रतिवर्णमर्थानुपलब्धेः । नहि ब्राह्मण इत्यत्र ब्रा इत्युक्ते कश्चिदर्थो गम्यते । अतो धात्वादीनामेकवर्णानामर्थवत्त्वादन्येऽपि वर्णा अर्थवन्त इत्युनुपलब्धिबाधितमेतत् । किं च कूपो यूप इत्यन्वयव्यतिरेकाभ्यां ककारयकारयोरर्थवत्त्वादन्येषामपि वर्णानामानर्थक्यमभ्युपगतं न । अथ तेषामप्यर्थवत्त्वम् । भूयिष्ठः कूपे यूपार्थः स्यात् कूपार्थश्च यूपे । यत्र भूयसामर्थानामन्वयो व्यतिरेकस्तु कस्यचित् तत्रार्थानामपि भूयसामनुवृत्तिर्व्यतिरेकस्तु कस्यचित् यथा देवदत्त गामानय शुक्लां देवदत्त गामानय कृष्णामिति । अतः संघाता एव तेनार्थेनार्थवन्तः संघातार्थवत्त्वाच्चेति हेतुरनैकान्तिक इति शङ्का । तैलाभिवर्त्तिसंघातेन दीपो न प्रत्येकम् । रथावयवैश्चक्रादिभिः संहतैः व्रजिक्रिया । किं चार्थवतां विपर्यासे अर्थप्रत्ययस्याविपर्यासः । आहर पात्रं पात्रमाहरेति । अपाये चापायः । गामानय शुक्लां शुक्लां गामानयेति । उपजने चोपजनः । गामानय शुक्लामिति ॥ वर्णेषु नैवम् । हिनस्ति इति सिंहः । हन्ति, हतः, घ्नन्ति । भविता । अतः संघाता एवार्थवन्तः ॥ विभक्तिरहितमिति किम् । हरिषु करोषि । सुप्तिङोर्मा भूत् । पदादित्वात्सस्य षो न स्यात् ॥ विभक्त्यन्तरहितमिति किम् । देवाः । भवन्ति । अत्र द्वित्वाद्यनभिधानेऽव्ययव्ययादिवचैकवचनं स्यात् ॥ धातुवर्जितमिति किम् । अहन् नलोपश् स्यात् ॥

यत्तु प्राचोक्तम्—अथ विभक्तिर्विभाव्यते । तत् व्याख्यातृभिश्च व्याकृतं संधिप्रकरणकथनानन्तरं ये विधयो वक्ष्यन्ते तेषां विभक्तिसंज्ञा स्यात् । सा च विभाव्यते प्रस्तूयते तत्प्रकरणमारभ्यत इति विभक्तिशब्दावृत्त्या योज्यम् । स्वमते शब्दार्थयोरभेदोपचारादित्यर्थः । अभेदोपचाराच्च द्वितीयो विभक्तिशब्दः संज्ञिवचनः । आदिः संज्ञावचनः । महासंज्ञाकरणं तु विभ-

ज्यन्ते विविच्यन्ते संख्याकर्मादयोऽर्था अनयेति विभक्तिः इत्यन्वर्थसंज्ञाविज्ञानार्थम् ॥ तेना-गमादीनामत्र वक्ष्यमाणानामपि विभक्तिसंज्ञा नेति । तन्न, वार्तिकं दृष्ट्वा सूत्रकृतः प्रवृत्त्ययोगात् ॥ अन्ये तु योगिकार्थेनैव सिद्धमित्याहुः । विभज्यते प्रकटीक्रियते कर्तृकर्माद्यर्थोऽनया सा विभक्तिः ॥ अतिप्रसक्तं योगमात्रं कृदादौ यद्यपि तथापि स्यादिषु तिबादिषु च योग-रूढिः ॥ यच्च कृत्तद्धितसमासाश्चेति वार्तिकम् । चकारो नामसंज्ञानुकर्षणार्थः । अत्र तद्व्याख्यातारः । ननु किमर्थमिदं नामसंज्ञा तु पूर्वेणैव सिद्धा । न सिद्ध्यति । तत्र कृत्सु क्रियाद्यन्तानां धातुत्वानपायात् । अत एव हे सोमपा इति धिलोपो न स्वार्थतद्धि-तानामपि गुणीभूतार्थवत्त्वात् । तथाहि । चोर एव चौरः । स्वाऽर्थेऽण् । अत्र हि चोरशब्द-स्य साक्षादर्थवत्त्वम् । चौरशब्दस्य चोरशब्दस्मरणद्वारा गौणमुख्यन्यायेन चोरशब्दस्यैव पूर्वेण संज्ञा स्यान्न चौरशब्दस्येति विध्यर्थं कृत्तद्धितग्रहणम् । समासेष्वपि भूतपूर्ववि-भक्त्या अविभक्तित्वाभावात् । अत एव पञ्चाग्नीति पदान्ताश्रयो नलोप इत्याहुः । अत्रेदं वक्तव्यम् । पञ्च नव दधि मधु इत्यादीनामविभक्तिकत्वेन नामत्वानपायात्कथं पदत्वम् । अत्र यदि विभक्तिसत्त्वसमये एव प्रवृत्ता पदसंज्ञा लुप्तायां विभक्तौ एकदेशविकृतन्यायेन प्रकृतिभागेऽपि साऽस्तीति ब्रूषे तर्हि प्रकृतेऽपि समं क्रियादिसत्त्वसमये प्रवृत्ता नामसंज्ञा लुप्तेऽपि तस्मिन्प्रतिभागेऽपि साऽस्तीति तुल्यम् । यदि च लुप्ते प्रत्यये प्रत्ययलक्षणेन पदसंज्ञां स्वीकरोषि तदपि समं समाधानम् । यदपि स्वार्थतद्धितानामपीत्यादि तदपि न गौणत्वासंभवात् । स्वार्थोपसर्जनार्थान्तराभिधायित्वं गौणत्वम् । तच्चात्र न संभवति । न हि चौरचोरशब्दयोरर्थौ भिन्नौ येनैकोऽपरत्र गौणो भवेत् । यदपि अत्र चोरशब्दस्य सा-क्षादित्यादि तदपि न । नहि पर्यायाणां परस्परस्मरणद्वारा स्वार्थबोधकत्वं क्वचित्स्वीक्रि-यते । व्याकरणानभिज्ञस्यापि शक्तिग्रहे सति ततो बोधो जायते । अन्यथा ज्ञानं ध्यान-मित्यादौ पुरः स्वार्थिकत्वेन गौणत्वादिकं स्यात् । यदपि समासेष्वपि भूतपूर्वविभक्त्ये-त्यादि तदपि न अवयवानां विभक्त्यन्तत्वेऽपि समुदायस्यातथात्वात् । यस्माद्विभक्ति-र्विधीयते तद्विभक्त्यन्तम् । सा चावयवेभ्यो विधीयते न समुदायात् । अन्यथा समास-वत् वाक्यस्यापि विभक्त्यन्तत्वेन पूर्वेण प्राप्तिविरहादेव तत्र नियमानुपयोगात् । यदि नन्वेवमपि अव्ययीभावादिति विभक्तिलुग्विधानाज्ज्ञापकात्समासे नामसंज्ञा भविष्यति । एवमपि नियमार्थं समासग्रहणम् । अर्थवत्समुदायानां मध्ये समासस्यैव यथा स्यात् । तेन वाक्यस्यार्थवतो न भवतीति । तदपि न । उक्तरीत्या समासस्याविभक्त्यन्तत्वेन ज्ञापकोपन्यासवैयर्थ्यात् । अन्यथा समासवद्वाक्यस्यापि विभक्त्यन्तत्वेन समासेष्वपि भूतपूर्वविभक्त्या अविभक्तित्वाभावादित्यनेन विध्यर्थतायास्त्वयैवोक्तत्वात् पूर्वापरविरोधः नियमफलाभावेन समासग्रहणवैयर्थ्यात् । नियमस्तत्र क्रियते यत्र सर्वत्र प्राप्तिर्भवति । अत्र तु तव मते वाक्ये प्राप्तिर्नास्ति वाक्यस्य चेत्प्राप्तिर्भवति तर्हि समासपदं व्यर्थम् । तस्मा-त्पूर्वेणैव सिद्धे वार्तिकमिदं न कार्यम् ॥ १ ॥

(तस्मात्) ॥ २ ॥

(सु०) तस्मात् ॥ अधिकारोऽयम् । 'धातोः' इत्यतः प्राक् स्यादयोऽणादयश्च प्रत्यया नाम्नः पराः स्युः ॥ तस्मादिति पञ्चमी । इयं न विश्लेषावधौ विश्लेषस्यासं-

भवात् । किंतु ऋतेआदिषु दिक्शब्दपाठाद्दिग्योगलक्षणा पञ्चमी । तत्र परः पूर्वो वा इत्यनियमेनाध्याहारे प्रसक्ते बहुवी उक्तेऽर्थे स च प्रयोगे वेत्यनेन बहोः पूर्वत्वस्य नियतत्वादन्यः प्रत्ययः पर एवेति परशब्दोऽध्याहार्यः ॥ २ ॥

(त०) **तस्मादिति** ॥ अधिकारोऽयं प्राग्धातोः । तथाच स्यादयोऽणादयश्च प्रत्यया नाम्न एव परे बोध्या इति। ननु धातोरित्यग्रिमाधिकारात् ततः प्राक्तनानां प्रत्ययानां नाम्नः परत्वमवधेयमेवेति किं तस्मादित्यनेनेति चेन्न किंपरिमाणमिति वक्तव्ये किंदूनमित्यपि स्यात् इति निराकरणाय तस्मादित्यस्यावश्यकत्वात् । अथ न केवलः प्रत्ययः प्रयोक्तव्य इति नियमेन तद्वारणसंभवादिति चेत् एतस्यापि तन्मूलकत्वादित्यवधेहि(क) । तस्मादिति पञ्चमी न विश्लेषावधौ विश्लेषस्यात्रासंभवात् । किंतु ऋतादिमध्ये दिक्शब्दस्य पाठात्तद्योगे । तत्र च पूर्वः परो वेति नियमाभावेऽपि परशब्द एवाध्याहार्यः समानाद्धेर्लोप इति निर्देशात् । तच्छब्दस्य पूर्वपरामर्शित्वान्नाम्नः परामर्शः ॥ २ ॥

सि औ जस्, अम् औ शस्, टा भ्याम् भिस्, ङे भ्याम् भ्यस्, ङसि भ्याम् भ्यस्, ङस् ओस् आम्, ङि ओस् सुप् ॥ नाम्नः पराः स्यादयः सप्त विभक्तयो भवन्ति ॥ ३ ॥

(सु०) सि औ जस् १ अम् औ शस् २ टा भ्यां भिस् ३ ङे भ्यां भ्यस् ४ ङसि भ्यां भ्यस् ५ ङस् ओस् आम् ६ ङि ओस् सुप् ७ ॥ सिप्रत्ययस्येकारोऽत्वसोः सावित्यादौ विशेषणार्थः । जस्शसोर्जकारशकारौ जसीशसोत्यनयोर्विषयविभागार्थौ ॥ टाप्रत्ययस्य टकारः टेन टा ना टौसोः टाङ्योरित्यादौ भेदकः ॥ ङेङसिङस्ङीनां ङकारस्तु ङितीत्यादौ विशेषणार्थः । ङसेरिकारो ङसिरदिति विशेषणार्थः सुप्प्रत्ययस्य पकारः प्रत्याहारार्थस्तेन सिप्प्रत्याहारो यथा स्यात् ॥ स्यादित्यादिभेदतो विभक्तिर्द्विधा । तत्र सिऔजसीत्यादीनां सप्तानां त्रिकाणां प्रथमाद्यः सप्तम्यन्ताः प्राचां संज्ञास्ताभिरिहापि व्यवहारः । तेषु त्रिकेषु त्रीणि त्रीणि वचनानि एकश एकवचनद्विवचनबहुवचनसंज्ञकानि सन्ति ॥ ३ ॥

(त०) **सिऔजस् इत्यादि** ॥ सेरिकारोऽत्वसोः सावित्यादौ सीत्युक्ते सकारादिलाभसंभवात् । न चेष्टापत्तिः, वेधःसु इत्यादावपि दीर्घत्वप्रसङ्गात् । न च श्रवणार्थः गुण इत्यादिलिङ्गात् । एतेन सेरिकार उच्चारणार्थ इत्युक्तिः प्रत्युक्ता, स् इत्यनेनाप्युच्चारणसंभवात् ॥ ३ ॥

(क) मतमिदं माधवस्य, तथाच रत्नावल्याम्—

ननु यदि प्रकृतं नाम तत एव सिद्धेः किं तस्मादित्यनेन । न च वाच्यं तत्प्रथमान्तमिह चोपयोगः पञ्चम्यन्तस्येति । अर्थवशाद्विभक्तिविपरिणामात् इण् इत्यत्राम इत्यनुवृत्तस्यामीतिवत् । उच्यते । तदनुवृत्तौ हि तस्य स्वरूपपरत्वादिहापि तत्स्वरूपप्रतीतिः स्यात् । एवमपि स्पष्टत्वात् नाम्न इति वाच्यम् । स्वरूपप्रतीतिरपि पुनर्नामग्रहणान्न भविष्यति । ज्ञापकाच्च यदयं रः संख्याया इत्याह तज्ज्ञापयति । नात्र स्वरूपग्रहणमिति । अन्यथा नामशब्दादेव स्यादय इति रेफान्तसंख्याया आमो नुड्विधानं व्यर्थं स्यात्, अत एव षष्ठीभ्रान्त्या आदेशो अपि स्यादयो न भविष्यन्ति । किञ्च स्वरूपग्रहणं संज्ञाविधानवैयर्थ्यप्रसङ्गाच्च न भविष्यतीति । तस्मादिति व्यर्थमिति चेन्न । ज्ञापनार्थत्वात् । इह शास्त्रीयसंज्ञातोऽन्यत्र स्वरूपमेव शब्दस्य ग्राह्यं नार्थं इति। तेन सखिपत्योरीगित्यादौ तदर्थानां मित्रभर्त्रादीनां ग्रहणं न भवति ।

एकत्वद्वित्वबहुत्वेषु ॥ एकवचनद्विवचनबहुवचनानि ॥ सोर्विसर्गः । देवः ॥ ४ ॥

(सु०) **एकत्वद्वित्वबहुत्वेषु** ॥ एकत्वद्वित्वबहुत्वशब्दा इह संख्यापराः सन्ति, तेन बहु पर्वत इति वैपुल्यवाचिनो ग्रहणं न । आश्रयद्रव्यगतेषु एकत्वद्वित्वबहुत्वेषु सत्सु एकवचनद्विवचनबहुवचनसंज्ञकाः प्रत्ययाः भवन्ति । उच्यतेऽनेनेति वचनम् । एकस्य वचनमेकवचनम् । द्वयोर्वचनमिति द्विवचनम् । बहूनां वचनमिति बहुवचनम् ॥ ४ ॥

(त०) एकवचनादिसंज्ञानामन्वर्थतामाश्रित्याह—**एकत्वे**त्यादि ॥ तथा च एकं वक्ति एकवचनम् । द्वौ वक्ति द्विवचनम् । बहून्वक्ति बहुवचनम् ॥ यद्वा उच्यत इति वचनम् । एकस्य वचनमिति ॥ जसो जकारस्य फलमाह—जसो जकार इति ॥ तथा च शसः शकारोऽपि शसीति विशेषणार्थः । वस्तुतस्तु एकतरो न पठितुं योग्यः एकेनैव द्वितीयवारणात् ॥

(सरूपाणामेकशेष एकविभक्तौ) देवौ । देवाः(क) ॥५॥

(सु०) **सरूपाणामेकशेष एकविभक्तौ** ॥ एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते ॥ रूप्यते बोध्यते इति रूपमर्थः । समानं रूपं येषां ते सरूपाः । सहादित्वात्समानस्य सादेशः । तथा समानं रूपं स्वरूपं येषां ते सरूपाः सरूपाश्च सरूपाश्चेति सरूपास्तेषामित्येकशेषेण व्याख्यानम् ॥ एकविभक्ताविति विभक्तिसारूप्ये उपलक्षणं न त्वेकशेषे निमित्तम् । एवं च नैमित्तिकत्वेनान्तरङ्गोऽयमेकशेषः स्याद्युत्पत्तेः प्रागेव प्रवर्तते । यद्येतन्नारभ्यते तर्हि प्रत्येकं विभक्तिः स्यात् द्वन्द्वश्च प्रवर्तेत । आरब्धे त्वेकशेषो भवति न तु द्वन्द्वः अनेकपदाभावात् ॥ ननु स्याद्युत्पत्तेः प्रागेकशेषप्रवृत्तौ शिष्यमाणं यत्प्रातिपदिकं तदेकमेवार्थं बोधयतीति द्विवचनाद्युत्पत्तौ देवौ देवा इत्यादि न सिध्येत् । उच्यते । शिष्यमाणो लुप्यमानार्थं कथयति । एकशेषस्य वृत्तिषु पाठात् । परार्थाभिधानं वृत्तिरिति ॥ अत एव लुप्तेऽपि प्रत्यये लिट् धुक् इत्यादौ कर्ता प्रतीयते ॥ एकस्यां विभक्तौ परतः सरूपाण्येवेति किम् । मातृशब्दयोर्जननीपरिच्छेत्तृवाचिनोर्नैकशेषो भवति । मातृभ्यां मातृभिरित्यादौ सारूप्येऽपि औजसादिषु वैरूप्यात् ॥ नन्वेवं पयः पयो नयति देवदेव इत्यादावतिप्रसङ्गः स्यात् । सहविवक्षायामेकशेषः प्रवर्तते इतरेतरयोगे द्वन्द्वस्य विषये इत्यर्थो नान्यत्र ॥ ५ ॥

अमृशसोरस्य ॥ समानादुत्तरयोरमृशसोरकारस्य लोपो भवति ॥ देवम् । देवौ । शसः शकारः शसीति विशेषणार्थः ॥ ६ ॥

(सु०) **अमृशसोरस्य** ॥ समानाद्धेर्लोपोऽधातोरित्यतः समानादिति लोप इति अधातोरिति चानुवर्तते अधातोः समानात्परयोरमृशसोरकारस्य लोपः स्यात् ॥ अधातोरिति किम् । श्रियं भ्रुवमित्यादावियुवौ । सेनान्यं खलप्वमित्यादौ यवौ । सोमपामित्यादौ सवर्णदीर्घः ॥ समानादिति किम् । रायम् । ग्लावम् ॥ ६ ॥

(क) **देवाः इति** । छन्दसि देवासः । 'अकाराज्जसोऽसुक्क्वचिद्वक्तव्यः' इति वार्त्तिकं सारस्वतादौ दृश्यते । असुकः कित्त्वादन्तविधौ 'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते" इति पदत्वाद्विसर्गः । सामान्यतो विधावप्यावन्ते वा रूपे विशेषाभावेऽपि कित्करणं मध्यविधि निरासार्थम् । न च विधानसामर्थ्यादेव मध्ये न स्यादिति वाच्यम् । तस्य संयोगान्तलोपविधेर्दीर्घविधेर्वा निवर्त्तकत्वप्रसङ्गात् ।

(त०) अम्शसोरस्येति ॥ अत्र समानाद्वेर्लोपोऽधातोरिति सूत्रात्समानलोपावनुवर्तेते इत्याशयेनाह–समानादिति ॥ समानादिति किम् । रायम् । अत्र स्याद्यधिकारस्य वामो ग्रहणादधातोरिति नानुवर्त्यम् । अतोऽचिनवमित्यादौ नातिव्याप्तिः ॥ अस्येति किम् । षष्ठीनिर्दिष्टत्वेनान्त्यस्य मा भूत् ॥ न च 'सो नः पुंसः, इत्यत्र सकारस्य नत्वविधेर्लिङ्गान्नान्त्यस्य विधिरन्यथा शसः सकारस्यान्त्यत्वेन लोपे तदभावान्नत्वासंभवः स्यादिति वाच्यम् , तत्र 'सो नः पुंसः, इत्युक्त्या ज्ञापनासंभवात् । नहि तत्र शसो न इत्युक्तं येन ज्ञापकं स्यात् । न च सो न इत्यत्रापि शसः सकारस्यैव ग्रहणमिति वाच्यम् । न हि शस्येव सकारो नान्यत्रेति नियमोऽस्ति येन ज्ञापकमिदं स्यात् ॥ यत्तु लघुभाष्यम् । अत्र 'आदवे लोपश्' इत्यतो आदित्यस्यानुवृत्तेरस्येति व्यर्थमिति कश्चित् इति । अत्रेदमवधेयम् । आदित्यस्य पञ्चम्यन्तत्वेन षष्ठ्यर्थालाभात् । अथार्थवशाद्विभक्तिविपरिणामेन षष्ठ्यर्थलाभः । विभक्तिविपरिणामे त्वर्थलाभस्यातिक्लिष्टत्वेऽन्त्यस्येत्यस्यैवावश्यकत्वात् ॥ ६ ॥

सो नः पुंसः ॥ पुंल्लिङ्गात्समानादुत्तरस्य शसः सकारस्य नकारादेशो भवति न स्वम्शसीत्यात्वे ॥ ७ ॥

(सु०) **सो नः पुंसः** ॥ पुंल्लिङ्गात्समानान्नाम्नः परस्य शसः सस्य नः स्यात् ॥ शस इत्युनुवृत्तम् । लिङ्गं नामार्थं इति मते पुंस इति पञ्चमी । पुंलिङ्गात्समानान्तान्नाम्न इति । यदा तु लिङ्गं प्रत्ययार्थस्तदा पुंस इति षष्ठी । समानान्तान्नाम्नः परस्य पुंसो वाचकस्य शसः सस्य नः स्यादिति ॥ उक्तं च—"एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा । नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः" ॥ इति ॥ स्वार्थद्रव्यलिङ्गसंख्याकारकात्मकः पञ्चको नामार्थः । उक्तपञ्चसु·पूर्वस्य पूर्वस्य नामार्थत्वे परः परो विभक्त्यर्थो ज्ञेयः । शब्दप्रवृत्तिनिमित्तः स्वार्थोऽस्ति । स्वार्थश्चानेकविधः स्वरूपजातिगुणक्रियाद्रव्यसंबन्धभेदात् ॥ स्वरूपं यथा । डित्थः । यदा शब्दरूपेण विशिष्टा जातिः कथ्यते गौरिति तदा गोशब्दस्य स्वरूपं स्वार्थोऽस्ति विशेषणत्वात् । जातिस्तु द्रव्यं भवति विशेष्यत्वात् । यदा जात्या विशिष्टो गुणः कथ्यते पटस्य शुक्लो गुण इति तदा जातिः स्वार्थो भवति विशेषणत्वात् । शुक्लो गुणो द्रव्यं भवति विशेष्यत्वात् । यदा गुणेन विशिष्टं द्रव्यं कथ्यते शुक्लः पट इति । यदा विशेषणभूतो गुणः स्वार्थो भवति विशेष्यभूतं पटादिकं द्रव्यं भवति । यदा तु द्रव्यमपि द्रव्यान्तरस्य विशेषणं भवति यष्टीः प्रवेशयेत्यादौ तदा यष्ट्यादिकं द्रव्यं विशेषणत्वमापन्नं स्वार्थो भवति । पुरुषादिविशेष्यं द्रव्यं भवति । दण्डीत्यादौ दण्डपुरुषसंबन्धः स्वार्थो भवति । दण्डीति द्रव्यं विशेषणं भवति । पाचक इत्यादौ क्रिया स्वार्थो भवति । पुरुषो द्रव्यं भवति । किं च "शब्दस्य यत्र विश्रान्तिर्वाच्यं द्रव्यं तदिष्यते ।" पर्यवसानभूमिरित्यर्थः ॥ तच्चानेकप्रकारम् । जातिगुणक्रियाद्रव्यस्वरूपमिति । गौः शुक्लः पाचकः डित्थः । लिङ्गं स्त्रीत्वादिः । संख्या एकत्वादिः । कर्मादयः कारकविशेषाः । तत्र स्वार्थो विशेषणम् । द्रव्यं तु विशेष्यमिति निर्गलितार्थः ॥ 'आम्शसि' इति सूत्रेणौकारस्य स्थाने आत्वे कृते सति 'सो नः पुंसः' इत्येतत्सूत्रं न प्रवर्तते इत्यर्थः ॥ कुतो न । उच्यते । पदविभागात् । यथा स् १ ओ २ न् ३ अः ४ पुंसः ५ इति पञ्च पदानि छित्त्वा पुंल्लिङ्गात्समानाच्छसः सस्य न्

स्यात् ओकारसंबन्धिनोऽवर्णात्तु विसर्गः स्यादिति व्याख्येयम् । अतो गाः पश्येत्यादौ नत्वं न ॥ पुंलिङ्गादिति किम् । बुद्धीः । समानादिति किम् । रायः । ग्लावः । लोपविषये एवास्य प्रवृत्तिः । समानादमूशसोरल्लोपस्यानिषेधात् ॥ अत एव बहुश इत्यत्र नत्वं न । स्याद्यधिकाराद्वा ॥ ७ ॥

(त०) सो नः पुंस इति ॥ पञ्चमीत्याशयेनाह-पुँलिङ्गादिति ॥ तथा च समानान्तान्नाम्न इति बोद्धव्यम् । यद्वा पुँल्लिङ्गात्समानादित्येकं पदम् । पुंलिङ्गमततीति पुँलिंगात् स चासो समानश्चेति स तथा तस्मादित्यर्थः ॥ तत्राम्शसोरित्यतः शसः इत्यनुवृत्तं यद्यपि समासान्तर्गतं तथापि नामोऽनुवृत्तिस्तत्र तस्यासंभवादित्याह शस इति ॥ ननु गा इत्यत्र नत्वं कुतो न । अमूशसोरित्यात्वेन समानात्परत्वादिति चेत् । अत्र केचित् सो न इत्यावर्त्य शसो नकारस्य सकार इति व्याख्येयम् । इष्टसिद्ध्यर्थमिदम् । तेन गा इत्यादि सिद्धम् ॥ यद्वा आवृत्त्या लब्धं यत्सो न इति सूत्रं तत्र शसो नस्येत्यनुवर्तते । स् इत्यविभक्तिको निर्देशः । ओरिति षष्ठी । ततश्च ओकारसंबन्धी योऽवर्णः तस्मात्परो यः शसः सकारस्तस्य नकार आदेश भवतीत्यर्थो लभ्यतेऽतो नातिप्रसङ्गः ॥ यद्वा स ओ न् अः पुंस इति पञ्च पदानि छित्वा पुंलिङ्गात्समानात् शसः सस्य नकारः । ओकारसंबन्धिनोऽवर्णात्तु विसर्ग इति व्याख्येयम् । अत्रेदं वक्तव्यम् । गा इत्यत्र नत्ववारणे सन्निपातपरिभाषयैव सिद्धे तदर्थमेतावदावृत्त्याद्यनुसरणक्लेशेन किम् । न च तानित्यादावपि सन्निपातपरिभाषया निषेध इति वाच्यम् । कानित्यादिलिङ्गेन त्यदादिषु शसो नत्वविधौ परिभाषानाश्रयणात् ॥ यद्वा त्यदादेष्टेरः स्यादावित्यत्रादिपदगृहीतस्य शसो निमित्तत्वे लाक्षणिकत्वेनामूशसोत्यत्र शसः साक्षाच्छ्रवणेन निमित्तत्वे प्रतिपदोक्तत्वात् लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणात् ॥ किंच परिभाषाश्रयणस्येष्टसिद्ध्यर्थत्वात् तानित्यादावनाश्रयणात् ॥ यच्च पुंस्त्वादिविचारे "स्तनकेशवती स्त्री स्याल्लोमशः पुरुषो भवेत् । उभयोरन्तरं यच्च तदभावे नपुंसकम्" इति लक्षणे खट्वावृक्षादावव्याप्तिवारणाय चेतनेषु स्तनादिमद्व्यक्त्यादिस्त्रीत्वाभिव्यञ्जकम् । अचेतनेषु तु सर्वत्रोपदेश एवाभिव्यञ्जकः । उपदेशस्तु लिङ्गानुशासनादिष्वित्युक्तम् । तत्रापि चेतानाचेतनविषयविभागो व्यर्थः । अतिप्रसक्तस्य दारशब्दस्य स्त्रीवाचकस्य स्तनकेशवत्त्वस्य व्यञ्जकस्य सत्त्वेऽपि स्त्रीत्वादर्शनात्सर्वचेतनाचेतने उपदेश एव स्त्रीत्वादिव्यञ्जक इत्यलमिति विस्तरेण ॥ ७ ॥

शसि ॥ शसि परे पूर्वस्य दीर्घो भवति । यदादेशस्तद्वद्भवति । न तु वर्णमात्रविधौ । देवान् (क) ॥ ८ ॥

(सु०) शसि ॥ दीर्घश्रुत्योपस्थितस्य स्वरस्येति पदस्य नाम्नो विशेषणत्वात्तदन्तविधिः । पूर्वस्य स्वरान्तस्य नाम्नो दीर्घः स्यात् शसि परे ॥ 'सो नः पुंसः' इति नत्वे दीर्घत्वम् । पूर्वं नत्वं ततो दीर्घत्वं पश्चादल्लोपः वैपरीत्यं वा ज्ञेयम् ॥ शसि किम् । हरिभिः ॥ स्वरस्य किम् । लिहः ॥ ननु इह शस्परत्वाभावात्कथं दीर्घः । उच्यते ।

(क) शसीति । तस्मिन्निति निर्दिष्टे पूर्वस्य । यद्यप्यत्र सामान्येनोक्तं तथापि स्वरस्यैव । अचश्चेति नियमात् । अतोऽनडुह इत्यादौ नातिप्रसङ्गः । वर्णमात्राश्रितविधेरन्यत्र यदादेशस्तद्वद्भवति, इति, एकदेशविकृतमनन्यवद्भवतीति च शसोऽल्लोपे नकारादेशे च तत्कार्य्यं स्यादेवेति वासुदेवः ।

यस्य स्थाने आदेशः यदादेशः स तेन स्थानिना तुल्यं तद्वत् स्थानिवद्भवतीत्यर्थः। स्थानिवर्णाश्रयविधौ कर्तव्ये न भवति। अस्य व्याख्यानं परिभाषाप्रकरणे उक्तम्॥ ८॥

(त०) शसीति॥ दीर्घश्रुत्योपस्थितेन स्वरेण नाम्नो विशेषणात्तदन्तविधिः। पूर्वं दीर्घः। पश्चादल्लोपः। वैपरीत्यं वा। उभयथा वैलक्षण्यं नास्ति॥ एवं 'सो नः पुंसः' इति नत्वेऽपि ज्ञेयम्॥ ८॥

टेन॥ अकारात्परष्टा इनो भवति॥ टकारष्टेनेति विशेषणार्थः। देवेन॥९॥

(सु०) **टेन**॥ पदद्वयमपि प्रथमान्तं संकेतितम्। अतः परष्टा इनः स्यात्॥ अतः किम्। कर्त्रा। भवता॥ तपरः किम्। हाहा॥ टा किम्। देवैः॥ ९॥

(त०) टेनेति॥ टा इन इति च्छेदः। पदद्वयमपि लुप्तप्रथमान्तम्। अत्रात इत्यनुवर्त्तते॥ टा इति किम्। देवैः॥ अतः किम्। पित्रा। तपरः किम्। हाहा॥ ननु टानेत्येव सूत्र्यताम्, किम् एकारेण, एग्रहणं चानुवर्त्यं एनेति रूपसिद्धेरिति चेन्न। लाघवे विशेषाभावादित्युक्तं कैश्चित्। तन्न ए इत्यनुवृत्त्या गौरवस्य जागरूकत्वेन विशेषाभावादित्युक्तेरपार्थत्वात्। न च एनेत्येव सूत्र्यताम्। आ इन इति च्छेदः स्यादधिकाराच्च नातिव्याप्तिः। आमि तु नुटा बाधान्नातिप्रसङ्ग इति वाच्यम्। स्पष्टार्थत्वाट्टकारस्य॥९॥

अद्भि॥ अकारस्यात्वं भवति भकारादौ स्यादौ॥ देवाभ्याम्॥ १०॥

(सु०) **अद्भि**॥ अकार आकारो भवति भादौ स्यादौ च॥ आदिति किम्। हरिभ्याम्। तपरत्वमुत्तरार्थम्॥ भीति किम्। देवस्य॥ स्यादौ किम्। देवभवनम्। बहुत्वे तु परत्वादेत्वं भवति। देवेभ्य इति॥ १०॥

(त०) अद्भीति॥ अत्रादिति प्रथमान्तम्। भीति सप्तम्यन्तम्। तत्र भकारादाविति व्याख्येयम्। अदिति न स्वरूपग्राहकम्, आद्यन्ताभ्यामिति लिङ्गात्। तेन महद्भ्यामित्यत्रात्वं न॥ अदिति किम्। हरिभ्याम्॥ भीति किम्। देवस्य॥ ननु रैस्मीत्यतो भीति सिद्धे किं भग्रहणेनेति चेन्न। एकयोगनिर्दिष्टत्वेन सकारस्यानुवृत्तिः स्यादिति तन्निरासार्थं भीत्यस्यावश्यकत्वात्॥ भ्यामो मस्य च नेत्वं इदुद्भ्यामिति लिङ्गात्॥ स्यादौ किम्। देवभवम्॥ १०॥

भ्यः॥ अकारात्परस्य भिसो भकारस्य अकारादेशो भवति॥ देवैः। ङकारो ङित्कार्यार्थः(क)॥ ११॥

(सु०) **भ्यः**॥ 'एस्भि बहुत्वे, इत्यस्यापवादोऽयम्। भ् भि अः इति पदच्छेदः। भि इत्येकदेशद्वारेण भिस एवानुकरणम्। अत इत्यनुवृत्तम्। अतो भिसो भकारस्याकारः स्यात्॥ स्यादावित्यधिकारात् स्यादिसम्बन्धी भिस् गृह्यते। तेन ब्राह्मणभिस्सेत्यादौ नातिप्रसङ्गः॥ ११॥

(त०) भ्य इति॥ भ् भि अः इति छेदः॥ अत इति पूर्वसूत्रादनुवर्तते। भीति

(क) देवैरिति। छन्दसि देवभिरिति। तथा च सारस्वते वार्त्तिकम्—

'अकारस्य भिसि च्छन्दस्येकारो वा वक्तव्यः' इति। ननु देवैरित्यत्रासिद्धं बहिरङ्गमन्तरङ्ग इति न्यायेन अन्तरङ्गे एकारे क्रियमाणे बहिरङ्गोऽकारादेशोऽसिद्धः स्यादिति चेन्न, नाजानन्तर्ये बहिरङ्गत्वक्लृप्तिरिति प्रतिषेधात्। अन्तरङ्गत्वेनादौ प्रत्ययकार्य्यम्।

भिस एकदेशानुकरणम् । नामैकदेशग्रहणे नामग्रहणम् । यथा भीमो भीमसेन इति ॥ यत्तु-भ्य इति चतुर्थीपञ्चम्योर्बहुवचनस्य ग्रहणम् । अञ्चि' इत्यस्मादकारात्परत्वात् 'हसेर्हसः' इति द्वित्वम् 'झबे जबाः' इति भस्य बः । तथा चातः परस्य भ्यस एवाकारादेश इत्यर्थो लभ्यते ॥ यद्वा भ् भ्यः इति छेदः ॥ अकारात्परस्य भ्यसो भकारस्याकार इत्यर्थोऽस्तु । आकारो वास्त्वित्यतोऽनुवर्तते । एवं भ्यसो ग्रहणे व्याख्यायमाने 'भिस् भिस्' इति सूत्रं व्यर्थं स्यात् । ननु तर्हि भि अ इति छित्त्वा भकारे परे पूर्वस्य अत एव भवति । तस्या-देशान्तरं न भवतीति व्याख्यानमस्तु । यद्वा भि इत्येकदेशद्वारेण भिस् एवानुकरणम् । ततश्च भिसि परे अत एवेत्यर्थोऽस्तु । मैवम् । आद्ये पक्षे भीति व्यर्थं स्यात पूर्वसूत्राद-नुवृत्तेः सत्त्वात् । द्वितीये तु भागैरिति निर्देशो नोपपद्यते । इत्याद्युक्तम् । तत्रेदमवधेयम्। भकारस्य द्वित्वे द्वितीयसूत्रस्यैकारस्य निमित्तत्वे बहुस्थलेऽतिप्रसङ्गः स्यात् । किंच-भागै-रिति लिङ्गस्यैव विद्यमानत्वेनव 'भिस्' 'भिस्' इति निर्देशपर्यन्तानुधावनस्य क्लिष्टत्वात् । अवर्णविधानसामर्थ्यात्सवर्णदीर्घं बाधित्वाप्येत्वमेव । अन्यथा 'समानाद्धेर्लोपः' इत्यतो लोपमनुवर्त्य लोपमेव व्यधास्यत् ॥ ननु भ्भि इति सूत्रमस्तु आकारो वास्त्वित्यतोऽनुव-र्तते । तथा च भिसो भकारस्यात्वेऽपि रूपसिद्धेः ॥ यद्वा भ इत्येवास्तु भि इति पूर्वसूत्रा-दनुवर्तनीयम् । तच्च रूपपरम् । इत्थं च भि इति समुदाये यो भः स आकारो भवतीत्यर्थः ॥ अत्राथें भागैरिति लिङ्गदर्शनम् । उच्यते । इमौ यकाराकारौ योगविभागेन स्यादिप्रकरणं भित्त्वान्यस्माद्विधीयेते । अतः प्रौढः स्वैरी वापयतीत्यादि सिद्धम् । पादेर्युक् गवादेरिति च न वक्तव्यं भवति ॥ ११ ॥

ङे अक् ॥ अकारात्परस्य ङे इत्येतस्यागागमो भवति ॥ देवाय । देवाभ्याम् (क) ॥ १२ ॥

(सु०) ङे अक् ॥ ङे इत्यविभक्तिको निर्देशः । अतो ङे इत्यस्याक् स्यात् ॥ किस्वादन्ते ॥ अत इत्यनुवृत्तेर्नेह । वातप्रम्ये ॥ तपरत्वान्नेह । हाहै ॥ अथ अकि कृते 'एदोतोऽत' इत्यकारस्य लोपस्तु न । विधानसामर्थ्यादपदान्तत्वाद्वा न हि अकि कृते एतः पदान्तत्वं संभवतीति ॥ १२ ॥

(त०) ङे अगिति ॥ अत्र ङे इत्यविभक्तिको निर्देशोऽसंदेहार्थः ङेरित्युक्तौ चतुर्थी-सप्तम्येकवचनयोः संदेहः स्यात् । वस्तुतस्तु ङेरित्युक्तिरपि न्याय्या । आम्ङेरित्यादौ चतुर्थ्येकवचनसंदेहनिराकरणाय व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमित्यस्या-श्रयणीयत्वात् । ङकारो व्यर्थः स्याद्यधिकारेणैवातिप्रसंगवारणादित्याहुः । वस्तुतस्तु स्पष्टार्थमुपात्तत्वान्न व्यर्थता । अत इत्यनुवृत्तेर्वातप्रम्ये इत्यादौ न ॥ ङे इति किम् । देवौ, देवे ॥ 'एदोतोतः' इत्यनेन लोपस्तु न । एतोऽपदान्तत्वात् । अग्विधानसामर्थ्या-दित्युक्तिस्तु निर्मूला प्राप्तलोपे विधानसामर्थ्यावलम्बनस्योचितत्वादिह तु पदान्तत्वाभावे प्राप्तेरेवासंभवात् ॥ १२ ॥

(क) अगिति । क आगमसूचनार्थः । टित्कितावाद्यन्तयोर्वक्तव्याविति । 'एदोतोत' इति लोपस्तु देवायेत्यत्र न अकि कृते एतः पदान्तस्थत्वाभावादिदमवधेयम् । यदि च व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणमित्याश्रियेत तर्हि ङेरगित्यपि न्याय्यमेव ।

एस्भि बहुत्वे ॥ अकारस्यैत्वं भवति सकारभकारादौ विभक्तौ बहुत्वे सति ॥ देवेभ्यः ॥ १३ ॥

(सु०) एस्भि बहुत्वे ॥ अकार एकारो भवति बहुत्वे वर्तमानेषु सकारभकारादिषु स्यादिषु परेषु ॥ अकार इति किम् । हाहाभ्यः ॥ बहुत्वे किम् । देवस्य ॥ स्यादिष्विति किम् । पचध्वम् ॥ १३ ॥

(त०) एस्भि बहुत्वे इति ॥ स्भीति सप्तम्यन्तम् । स् च भ् च स्भ् तस्मिन् स्भि । अतः किम् । हरिभ्यः ॥ तपरः किम् । हाहाभ्यः ॥ स्भीति किम् । देवानाम् ॥ ननु स्भीति किम् । न च देवानामित्यत्रातिप्रसङ्गः । तत्र परत्वान्नामीति दीर्घेण बाधात् । देवानित्यादौ तु शसीत्यनेन । अथ देवा इत्यत्रातिप्रसङ्गः स्यादिति चेन्न । तद्वारणाय रैस्भीति सूत्रात् भीत्यस्यानुवृत्तेः सत्त्वात् अथानन्तरत्वादद्भीत्यतो भीत्यस्यैवानुवृत्तिः स्यादिति चेन्न, इच्छार्थे ष्विति ज्ञापकात् ॥ अथवा देवा इत्यत्रापि सवर्णदीर्घः पूर्वोऽपि 'झवे जबाः' इत्यादिनिर्देशेन क्वचित्पूर्वेणापि परबाधस्येष्टसिद्ध्यर्थमभ्युपगमात् । तस्माद्व्यर्थं स्भीति । अत्राहुः । देवपूजा इत्यादौ पूर्वपदस्थस्यैव वारणाय स्भीत्यावश्यकमिति तन्नेति वृद्धाः । विहितविशेषणाश्रयणात् । नाम्नो विहिते बहुत्वे वर्तमाने पर एत्वमित्यभ्युपगमात् । अन्ये तु बहुत्वविशेषणार्थं पुनः स्भीत्युक्तम् । तेन बहुत्वे वाच्ये सति विहितो यः सकारो भकारश्च तस्मिन् परतो नाम्नोऽत एत्वम् । तेन सोमं सुनोतीति सोमसुत् तमाचक्षते सोमसयन्ति ते सोमस इत्यत्र नेत्याहुः । तन्नेति नव्याः स्याद्यनुवृत्त्यैतद्वारणसंभवात् । अत्रोच्यते–रैस्भीत्यत्र नकारोऽपि द्रष्टव्यो नादावपि स्यादावात्वमित्यर्थः । तथा च त्रियाणामिति (पराणामि) सिद्ध्यति । अत्रार्थे इदं स्भिग्रहणमेव लिङ्गम् । यदि तस्याप्यत्रानुवृत्तिः स्यात्तदा देवानामित्यत्राप्येत्वं स्यात् । नामीति तु हरीणामित्याद्यर्थं स्यात् । ततस्तन्निवृत्त्यर्थं पुनः स्भिग्रहणस्यावश्यकत्वात् ॥ १३ ॥

ङसिरत् ॥ अकारात्परो ङसिरद्भवति ॥ देवात् , देवाभ्याम् , देवेभ्यः॥

(सु०) ङसिरदिति ॥ आदन्तान्नाम्नः परो ङसिरत् स्यात् ॥ अतः किम् । वातप्रम्यः, ग्लावः ॥ तपरः किम् । हाहाः ॥ ननु ङसेरदादेशे कृते 'यस्य लोपः' इत्यतो लोपः स्यात् । उच्यते–स्यादौ 'यस्य लोपः' इत्यस्याभावो ज्ञापितोऽकारविधानेन । अन्यथा ङसिस्त इत्यवक्ष्यत् ॥ यद्वा तद्धितप्रकरणादीपीति सूत्रारम्भाच्च नात्र यस्य लोपः(क)। देवादित्यत्र 'वाऽवसाने' इति जबत्वचपत्वे 'हसेऽर्हे हसः'' इति दतयोर्द्वित्वे रूपचतुष्टयं बोध्यम् १४

(त०) ङसिरत् ॥ अत्राप्यत इत्यनुवर्तते । अतो वातप्रम्य इत्यादौ न । तपरत्वात् हाहा इत्यत्र न । अत्रापि ङकारो व्यर्थ इत्युक्तिः पूर्वोक्तयुक्त्यैव निरसनीया । न चाति कृते 'यस्य लोपः' इत्यनेनाकारस्य लोपोऽस्त्विति वाच्यम् । अकारोच्चारणसामर्थ्यात्स्यादौ न 'यस्य लोपः' इति प्रवर्तते । अत्राहुः । कार्ये ''सिस्योः' 'शेषाः' इत्यादिनिर्देशात् तद्धितप्रकरणाद्वा यस्य लोपो न । एवं स्थिते लाघवे विशेषाभावात् ङसिस्त इति न सूत्रि

(क) वासुदेवस्यापि मतमेतत् । तदाह प्रसादे–अद्विधानसामर्थ्यात्समानादित्यादिनिर्देशात्तद्धितप्रकरणत्वाद्वानुवृत्तेश्च विभक्तिस्वरे यस्य लोप इत्यलोपाभावेः' । वावसाने इत्यत्र वाशब्दस्य व्यवस्थितार्थत्वाद्देवादित्यादौ तदभावः ।

तम् । तत्रोच्यते । सेरत इत्येव सुवचम् । न च देव इत्यत्राव्याप्तिस्त्वन्त्यादेरिति लिङ्गेनातिव्याप्तिवारणात् । न चामर्थं तदिति वाच्यम् । छ इत्यादिलिङ्गात् । अथ देवस्येत्यत्रातिप्रसङ्गः तत्र ङस् स्येति विशेषसूत्रेण बाधात् इकारसंहितानुकरणसंभवात् ॥ १४ ॥

ङस् स्य ॥ अकारात्परो ङस् स्यो भवति ॥ देवस्य ॥ १५ ॥

(सु०) **ङस् स्य** ॥ अतो ङस् स्यः स्यात् । अत इति किम् । वातप्रम्यः ॥ तपरः किम् । हाहाः ॥ १५ ॥

(त०) **ङस् स्येति** पदद्वयमिति प्रथमान्तम् । अतः किम् । वातप्रम्यः ॥ तपरः किम् । हाहाः ॥ अत्राहुः । स्वरादित्यादिलिङ्गात्तदन्तलाभः । आदिति लिङ्गाच्च तल्लापीति ज्ञापकद्वयबलमाश्रित्य देवस्य अस्येत्यादिसिद्धिरिति । वस्तुतस्तु तदन्तलाभाय तल्लाभाय च ज्ञापकद्वयानुसरणक्लेशोऽपार्थ एव, देवस्येत्यादौ ङसोऽतः परत्वसम्भवात् । न च विहितविशेषणादतोऽविहितत्वाभावेन देवस्येत्यादिसिद्धिर्न स्यादिति शङ्कनीयं तस्येत्यादिसिद्ध्यर्थं विहितविशेषणानाश्रयणात् ॥ १५ ॥

ओसि ॥ अकारस्यैत्वं भवति ओसि परे ॥ देवयोः ॥ १६ ॥

(सु०) **ओसि** ॥ अत एकारः स्यादोसि परे ॥ अत इति किम् । हर्योः ॥ तपरः किम् । हाहौः ॥ ओसि किम् । देवस्य ॥ १६ ॥

(त०) **ओसि** ॥ अत्रापि स्याद्यधिकारादेव ओस्र इत्यादौ नातिप्रसङ्गः ॥ आ उस्रः ओस्रः ॥ अत इति किम् । भान्वोः ॥ तपरः किम् । हाहौः ॥ ओसीति किम् । देवस्य॥१६॥

नुडामः ॥ समानादुत्तरस्यामो नुडागमो भवति पुंसि तु ह्रस्वादेव ॥१७॥

(सु०) **नुडामः** ॥ आमो नुडिति कर्तव्ये नुटः पूर्वोच्चारणं प्राथम्यार्थम् । यत्र नुडन्यच्च प्राप्नोति तत्र प्रथमं नुडेव भवति । तेन स्त्रीणां वारीणामित्यादावुभयप्रसङ्गे परावियनुमौ बाधित्वा नुडेव(क) । अत एव प्राक् प्रायशो दृश्यतामित्युक्तेर्बीजम् । तत्र क्वचित्पूर्वेणापि नुटा परस्य बाधः क्रियत इति तदर्थः । किंच मण्डूकप्लुत्या 'ङ्णो ह्रस्वात्' इति सूत्राद् ह्रस्वादिति पदं पुंस इति चात्रानुवर्त्य वाक्यभेदेन संबध्यते । समानादित्यनुवृत्तं समानान्तान्नाम्न आमो नुट् स्यात् । पुंल्लिङ्गे तु ह्रस्वान्तान्नाम्न एव परस्यामो नुट् न दीर्घान्तान्नाम्न इत्यर्थः(ख) ॥ समानादिति किम् । रायाम् । भवताम् ॥ ह्रस्वान्तात् किम् । हाहाम् । पुंस इति किम् । वातप्रम्याम् ॥ नाम्न इति किम् । कारयांचकार ॥ पचतितरामित्यत्र तुकारानुबन्ध आम् ज्ञेयः । न नुट् 'निरनुबन्धकग्रहणे न सानुबन्धकस्य' इति वचनात् । ङेरादेशस्यामस्तु न नुट् परत्वेनायङ्भ्यां बाधनात् स्त्रियामित्यादिनिर्देशाच्च ॥ १७ ॥

(त०) **नुडामः** ॥ नुट् आम इति छेदः ॥ अत्र समानादित्यनुवर्तते । तेन रायामित्यादौ न । अत्राहुः । अत्राधातोरित्यनुवर्तनीयं श्रियामित्याद्यर्थं तत्र परेणेया बाधात् ।

(क) 'अनुवाद्यमनुक्त्वा तु, न विधेयमुदीरयेदिति'न्यायेन पूर्वमामो विधानं युक्तमित्याशङ्कते—**आमो नुडित्यादिना** । नुटः नुडागमस्य, पूर्वोच्चारणं प्रथमविधानम्, प्राथम्यार्थं यत्र कार्यद्वयप्राप्तिरस्ति तत्रादौ नुट् कार्य्य इत्येवमर्थमित्यर्थः। उक्तं व्याचष्टे—**यत्रेति** । लक्ष्यं दर्शयति—**तेन स्त्रीणां** वारीणामिति।

(ख) पुंलिङ्गभिन्ने तु स्त्र्यादौ समानादुत्तरस्यामो नुडागमो भवतीत्यर्थः।

एवं तर्हि कारयांचकारेत्यादावतिप्रसङ्गवारणायाधातोरित्यनुवर्तनात्तदपि न परत्वाद्गुणेन बाधात्। पातयांचकारेत्यादावपि लोपेन बाधः। पचतितरामित्यादावपि यस्य लोपः परः। न चैवमपि मालांचकारेत्यत्र नुट् स्यादिति वाच्यम्। स्याद्यधिकारेण तद्वाभाव इति। अत्रेदमवधेयम्। स्याद्यधिकारस्य जागरूकत्वेन गुणाल्लोपादीनां परत्वानुधावनेन बाधान्वेषणस्य व्यर्थत्वात्॥ अत्र ङेरामः कुतो न नुडिति चेन्न। स्त्रियामित्यादिलिङ्गेन विभक्त्युपदेशकाले विद्यमानस्यैवामोऽत्र ग्रहणात्। अत एव चतुराम् शौ च देव आमः देव आमि इत्यादौ नातिप्रसङ्गः। एतेनतद्वारणायानर्थकत्वेन समानान्तान्नाम्नोऽभात्रेन वा प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणमित्यादि समाधानं परास्तम्। ननु वारीणां स्त्रीणामित्यत्र परत्वान्नुमियौ भविष्यतः न नुट्। अथ नुमि न क्षतिरिति न वाच्यम्। नुट्सहित एवामि दीर्घविधानात् दीर्घताभावः प्रसज्येत। अत्रोच्यते। प्रायशो ह्रस्वतामिहेत्यत्र प्रायश इत्यस्य ग्रहणेन क्वचित्पूर्वेणापि परस्य बाधदर्शनात्। आमो मस्येत्वं तु गमां स्वर इत्यादि निर्देशान्न। ननु हाहामित्यादौ कुतो न नुट्। समानात्परत्वसम्भवादित्याह॥ पुंसि त्वित्यादि॥ अयमाशयः—अत्र ङ्णो ह्रस्वादिति सूत्रान्मण्डूकप्लुत्या ह्रस्वादिति पुंस इति चानुवर्त्य पुंसि तु ह्रस्वादेवेति व्याख्यानात्तत्र ह्रस्वात्परत्वाभावान्न नुट्। अत्रार्थे क्षपानां दां हो इत्यादि लिङ्गम्॥ १७॥

नामि॥ नामि परे पूर्वस्य दीर्घो भवति॥ देवानाम्। देवे, देवयोः॥ १८॥

(सु०) **नामि**॥ पूर्वस्य स्वरान्तस्य नाम्नो दीर्घः स्यात् नुट्सहिते आमि परे॥ नुम् सहिते आमि तु न दीर्घो भवति यदि हि नुम्सहिते आम्यपि दीर्घः स्यात्तर्हि नुमं बाधित्वा नुड्विधानं व्यर्थं स्यात् (क)। नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन इत्युक्तत्वान्नुट्सहित एव आम् गृह्यते॥ १८॥

(त०) **नामीति**॥ नुट्सहित आम् नाम् तस्मिन् नामि परे पूर्वस्य दीर्घो भवति इत्यर्थः॥ आमीति तु न सूत्रितं वर्मणामित्यादावपि दीर्घः स्यात्। तथाहि। यत्र नोपधाया इति सूत्रस्य प्राप्तिसम्भवः स्यात्तत्राप्यामीत्यस्यानुवृत्तेरामः सत्त्वात्॥ यत्तु कैश्चिन्नामीत्युक्त्या वारीणामित्यत्र सनुम्यप्यामि दीर्घः सिध्यतीत्युक्तम्। तत्र नुट्सहित आम् नाम् तस्मिन्नामीति व्याख्यानं सर्वसंमतत्वेन स्वोक्त्यैव तद्विरोधेन चोपेक्षितम्॥

षिवलात्षः सः कृतस्य॥ कवर्गादिलाच्च प्रत्याहारात्परस्य केनचित्सूत्रेण कृतस्य सकारस्य षकारादेशो भवति अन्ते स्थितस्य न भवति॥ देवेषु॥ १९॥

(सु०) **किलात्षः सः कृतस्य**॥ कुश्च इलश्चानयोः समाहारः किलं तस्मात् किलात्। क्रियते स्म विधीयते स्मेति कर्मणि क्तः। कृतस्य शास्त्रेण विहितस्येत्यर्थः॥ स इति षष्ठ्यन्तम्। ष इति प्रथमान्तम्॥ अकार उच्चारणार्थः॥ किलात्परस्य कृतस्या-

---

(क) नामीत्यत्र नुट्सहित आम् अथवा नुम् सहित आम् इति समासे द्वैविध्यमशंक्य समाधत्ते—**पूर्वस्येति**। नुम् सहिताम् ग्रहणे विरोधमाह—**यदीत्यादीना**। प्रसदकृत्तु—'नुट्सहित आम् नाम्, तेन दण्डिनामित्यादौ दीर्घत्वाभाव, इत्याह। एतच्चिन्त्यम्।

देशरूपस्य प्रत्ययावयवस्य च सः स्थाने षः स्यात् ॥ 'रहर्नो णोऽनन्ते'इत्यतोऽनन्ते इत्यनुवर्तते । तेन पदान्ते स्थितस्य सस्य षत्वं न(क) । क्विलात्किम् । देवस्य ॥ कृतस्येति किम् । सुपीः, सुपिसौ ॥ पदान्ते स्थितस्य नेति किम् । हरिस्तत्र ॥ १९ ॥

(त०) क्विलात्षः सः कृतस्येति ॥ कुश्च इलश्च क्विलं तस्मात् ॥ ष इति प्रथमान्तम् ॥ स इति षष्ठ्यन्तम् ॥ अत्र रहर्नो णोऽनन्त इत्यतोऽनन्त इत्यनुवर्तते । ततश्चान्ते स्थितस्य सस्य षत्वं न हरिस्तत्रेत्यादौ । ननु कृतस्य सस्येति व्याख्यानात् देवेष्वित्यादौ सुपः कृतत्वेन समास्यत्र कृतकत्वाभावात्कथं षत्वमिति चेन्न । अराश्रिष्विवत्यादिलिङ्गात्क्वचिदवयवग्रहणेनापि समुदायस्य ग्रहणात् । न चैवं तिस्र इत्यादौ षत्वप्रसङ्ग इति वाच्यं तत्र तिसृ चतसृ इति सत्वनिर्देशेन तद्बाधनसम्भवात् । अत्र केचित्—नन्वत्र कु इति 'कु शब्दे' इति धातोर्ग्रहणं कुत्सितार्थाव्ययस्य वा कवर्गस्य वा । नाद्यः इलादित्येव सिद्धत्वात् । ननु यदा कुर्धातुस्तदा इलोऽपि गत्यर्थो धातुरेव साहचर्यात् । नैवम् । अकारोच्चारणसामर्थ्यान्न धातुः । तर्हि कोरेव यथा स्यान्नान्यस्माद्धातोरिति नियमार्थं कुर्धातुरेवेति चेन्न इलेन संज्ञाशब्देन साहचर्यात्संज्ञाशब्दस्यैव कोर्ग्रहणात् । चोः कुरित्यादौ कवर्गार्थस्यैव सिद्धत्वाच्चेत्याहुः ॥ सतो हि कार्यिणः कार्येण भवितव्यमिति सः ष इति निर्देष्टव्ये विपरीतनिर्देशः षस्स इति द्विसकारनिर्देशेन षत्ववत् सत्वस्यापि क्वचिद्विध्यर्थः । तेन सिस्वेदयिषतीत्यादि सिद्धम् । यच्च दधिसेचौ यजूंषु सर्पींषि अवष्टम्भः सुष्टु इत्यादिसिद्ध्यर्थमनेकक्लेशानुसरणं तत्सर्वं रभसोक्तिमात्रमित्युपेक्षितम् । बहुसेचावित्यत्र षत्वनिषेधार्थं शेषा निपात्याः कत्यादय इत्यस्य शरणीकर्तव्यत्वेन सर्वस्यानुक्तस्यानेनैव निर्वाहसत्त्वात् ॥ क्विलात्किम् । देवस्य । विश्वपासु । कृतस्येति किम् । बिसम् ॥

सिर्धिः ॥ आमन्त्रणेऽर्थे सिर्धिसंज्ञको भवति (ख) ॥ २० ॥

(सु०) सिद्धिः ॥ आमन्त्र्यते प्रसन्नं क्रियतेऽनेनेत्यामन्त्रणम् । साधने युट् ॥ आमन्त्रणे किम् । रामः ॥ सिः किम् । हे रामौ ॥ २० ॥

(त०) सिद्धिरिति ॥ आमन्त्रण इत्यनुवर्तते इत्यभिप्रेत्याह-**आमन्त्रणेऽर्थ** इति ॥ आमन्त्रणं चानुकूलकरणम् ॥ आमन्त्रणे किम् । रामः ॥ सिः किम् । रामौ ॥ २० ॥

समानाद्धेर्लोपोऽधातोः ॥ ह्रस्वात्समानादेदोतश्चोत्तरस्य धेर्लोपो

(क) तेन हरिस्तत्रेत्यादौ षत्वाभावः । 'सः षः' इति सूत्रे वाच्ये विपरीतनिर्देशान्नुम् विसर्जनीयशसव्यवधाने षत्वमिति वासुदेवः । तेन हवींषि, हविःषु, हविष्षु इत्यादि । तथा सातेः पदादेश्च सस्य षो नेति । तेन दधि सिञ्चति । अग्निसादित्यादिसिद्धिः । सात्पदाद्योरित्यस्य बीजमिदमिति बोध्यम् ।

(ख) अत्र कश्चित् । आमन्त्रणे सिद्धिरिति सूत्रम् । ननु प्रथमापि न सम्बोधने विधीयते लिङ्गार्थे प्रथमेति विधास्यमानत्वात् सम्बोधनस्य च लिङ्गार्थातिरिक्तत्वात्, यत्तु 'आमन्त्रणेचे'ति वदति तन्न सूत्रे सूत्रेष्वसत्त्वात् । एवं तर्हि अयं योगो विभज्यते, आमन्त्रणे सिद्धिरिति तत्रामन्त्रण इत्येको योगः । तत्र प्रथमानुवर्त्तते ततश्चायमर्थः—आमन्त्रणे प्रथमाविभक्तिर्भवति । अमुमेव योगमाचार्यो बालावबोधाय मूले व्याख्यास्यति ।

ततः सिद्धिरिति द्वितीयो योगः । तत्रामन्त्रण इत्यनुवर्त्तते प्रथमा च । ततोऽस्यापि आमन्त्रणे या प्रथमा तस्याः सिद्धिसंज्ञा भवतीत्यर्थः । तथा चेदं योगद्वयं कृष्णपण्डितेन व्याख्यातमुदाहृतञ्चेति चिन्त्यम् ।

भवत्यधातोः (क) ॥ आभिमुख्याभिव्यक्तये हेशब्दस्य प्राक् प्रयोगः (ख) ॥ हे देव, हे देवौ, हे देवाः, एवं घटपटरामकृष्णमुकुन्दादयः ॥ २१ ॥

(सु०) **समानाद्धेर्लोपोऽधातोः** ॥ ङ्णो ह्रस्वात् इत्यतो मण्डूकप्लुत्या ह्रस्वादिति पदम् एदोतोऽतः इत्यत एदोत इति चानुवर्तते । ह्रस्वसमानान्तादेदोदन्ताच्च नाम्नः परस्य धेर्लोपः स्यात् ॥ ह्रस्वसमानान्तादिति किम् । हे हाहाः । हे वातप्रमीः ॥ अधातोरित्युत्तरार्थम् । एदोत इति ग्रहणं किम् । हे हरे हे विष्णो ॥ अत्र हि परत्वा-न्नित्यत्वाच्च धावित्यनेनैदोतोः कृतयोर्ह्रस्वात्परत्वं नास्ति ॥ अभिमुखस्य भाव आभि-मुख्यं सम्मुखीकरणम् । अभिमुख्यस्याभिव्यक्तिः प्रकटीकरणम् आभिमुख्याभिव्यक्ति-स्तस्य । नाम्नः प्राक् हे शब्दस्य प्रयोगोऽर्थतः शब्दतो वा योज्यः ॥ २१ ॥

(त०) **समानाद्धेर्लोपोऽधातोरिति** ॥ लोपः अधातोरिति छेदः ॥ समाना-दिति किम् । गौः ॥ अधातोरिति किम् । हे श्रीः ॥ ननु हे हाहा हे हरे इत्यादात्र-तिव्याप्त्यव्याप्ती इत्यत आह—**ह्रस्वादिति** (ग) ॥ ननु सूत्रे ह्रस्वादित्येव किमिति नोक्तम् , किं समानादित्यनेनेति चेत् अम्शसोरस्येत्यत्रानुवृत्त्यर्थमेतस्यावश्यकत्वात् । न च समानादित्युक्त्या कथं ह्रस्वलाभ इति वाच्यम् । लक्षणयेति गृहाण ॥ अथैवमप्येदोतोः कुतो लब्धिरिति चेत् , अधातुग्रहणात् । अधातुग्रहणात्कथमिति चेत् शृणु । अधातुग्रहणं तावद्व्यर्थम् । न च हे श्रीरित्यादावतिव्याप्तिः ह्रस्वग्रहणेनैव तद्वारणात् । न चाम्शसो-

---

(क) **समानादिति** । इह 'कृत्रिमाकृत्रिमयोः कृत्रिमे कार्य्यसंप्रत्ययः' इति विधिरित्यादावकृत्रिमस्य धेर्लोपो न । एवमपि हे हाहाः हे अतिलक्ष्मीरित्यादौ दीर्घात्प्राप्तो लोपः संज्ञापूर्वकस्य विधेरनित्यत्वान्न भवति । यद्येवं ह्रस्वादित्येवोच्यतां किमतिप्रसञ्जकेन समानग्रहणेन । एवं हि अधातोरित्यपि न वाच्यं स्यात् । धौ ह्रस्वान्तस्य धातोः क्वचिदप्यभावात् । साधु । एवमप्युत्तरसूत्रे अम् शसोरस्येत्यत्र समानादि-ति वाच्यं नदीं मातॄरित्यलोपो यथा स्यात् । उत्तरार्थं च तत्तत्र कर्त्तव्यमिहैव क्रियते दोषाभावात् ह्रस्वा-दिति मा वाच्यं भूदिति । एवं च हे सोमपा इत्यादिनिरासायाधातोरित्यपि वाच्यम् । न वाच्यम् । सत्यपि तस्मिन्नामसंज्ञया धातुसंज्ञाया बाधितत्वात् प्रयोजनाभावात् । एवं तर्हि धातुग्रहणमिदमेव ज्ञापयति । भव-त्यत्र संज्ञासमावेश इति अत एव गोधुगिति घत्वं सोमप इत्यालोपः ।

ननु यद्यपि अधातोरित्युच्यते हे ग्रामणि कुलेत्यत्र न प्राप्नोति एकदेशविकृतत्वेन धातुत्वानपायात् माभूदमुना 'नपुंसकात् स्यमोरिति' लुग् भविष्यति । गुणस्तु लुक्यपि विषयसप्तम्या सिद्ध्यति । हे सोम-पेत्यत्र 'अतोऽम्' इत्यत्राधातौ इत्यनुवृत्तेर्नाम् प्रसङ्गः । अथवा एकदेशविकृतन्यायस्यात्र विषयाभावं सो-मपं कुलमित्यत्रोपपादयिष्यामः । उत्तरार्थं चाधातोरिति वाच्यं । तत्र यद्यधातोरिति पर्य्युदासः तर्हि नञि-वयुक्तन्यायेन क्रियाशब्देष्वेव स्यात् न पुनर्जात्यादिशब्देषु । प्रसज्यप्रतिषेधाश्रयणात्सिद्धम् । तत्र हि नञः क्रियया सम्बन्धात् प्रतिषेधे प्राधान्यात् न सादृश्यप्रतीतिः । तदुक्तम्—'अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधान्य-ता । प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ्'॥ एतदेव स्पष्टयति—**अधातोरिति** । धातोर्न भवतीत्यर्थः॥

(ख) **आभिमुख्येति** । अभिमुख्यस्य भाव आभिमुख्यं तस्याभिव्यक्तिस्तस्यै । अयं भावः—सुश्रीरित्यादौ सम्बोधने सत्यसति च समानमेव रूपमिति तदर्थाभिव्यञ्जको हेशब्दः प्रयोज्य इति ।

केचित्तु—सम्बोधनार्थस्य प्रथमयैवाभिहितत्वादानर्थक्यान्न प्रयुञ्जते । हे देवेति प्राग्वद्देवशब्दात् सं-बोधनार्थैकत्वविवक्षायां प्रथमैकवचने सौकृते तस्य धिसंज्ञायां समानादिति लोपे प्राक् हेशब्दप्रयोगे एवं स्यादित्यर्थः । (ग) **अव्याप्त्यतिव्याप्तीति** । हे हाहा इत्यादावतिव्याप्तिः, हे हरे इत्यादाव-व्याप्तिरित्यर्थः । अतोह्रस्वादित्युक्तम् ।

रित्यत्रानुवृत्त्यर्थं श्रियमित्यादौ परत्वादियैव तद्भावात् । न चाचिनवमित्यादिवारणार्थं स्याद्यधिकारेणैव तद्वारणसंभवात् । तस्माद्धातुग्रहणं व्यर्थत्वादेतज्ज्ञापनार्थमेवोपात्तम् । लोपग्रहणं तु व्यर्थमेव । रि लोपो दीर्घ इत्यतोऽनुवृत्त्यैव तल्लाभात् । न चैकयोगनिर्दिष्टत्वेन दीर्घस्याप्यनुवृत्तिः स्यादिति वाच्यं सैषाद्धस इत्यत्र केवलस्याप्यनुवृत्तिदर्शनात् ॥ यद्वा लोपग्रहणस्यैवैतज्ज्ञापनमधातुग्रहणं तु व्रितो नुमित्यत्रोपयोगार्थमपि न्याय्यम् । जलधिरित्यादौ तु स्याद्यधिकारेण वारणम् । एवं च ग्रामणि कुलमित्यादौ एकदेशविकृतन्यायेन धातुत्वेऽनेनाप्राप्तेऽपि नपुंसकात्स्वमोर्लुकैव रूपसिद्धेः ॥ २१ ॥

सर्व विश्व उभ उभय अन्य अन्यतर इतर डतर डतम सम सिम त्वत् त्व भवतु नेम एक पूर्व पर अवर दक्षिण उत्तर अपर अधर स्व अन्तर त्यद् तद् यद् एतद् इदम् अदस् द्वि किम् युष्मद् अस्मद् ॥ एते (३५) सर्वादयस्त्रिलिङ्गाः ॥ २२ ॥

(सु०) सर्व विश्व उभ उभय अन्य अन्यतर इतर डतर डतम सम सिम त्वद् त्व भवतु नेम एक पूर्व पर अवर दक्षिण उत्तर अपर अधर स्व अन्तर त्यद् तद् यद् एतद् इदम् अदस् द्वि किम् युष्मद् अस्मद् ॥ **एते सर्वादयस्त्रिलिङ्गाः** ॥ एते पञ्चत्रिंशच्छब्दाः त्रीणि लिङ्गानि येषां ते त्रिलिङ्गाः सर्वादिसंज्ञका ज्ञेयाः ॥ गणसूत्रमिदम् । आदिशब्दोऽत्रावयववाची । सर्वः आदिराद्यावयवो येषां ते सर्वादयः । तद्गुणसंविज्ञानोऽयं बहुव्रीहिः । तस्यान्यपदार्थस्य गुणानां विशेषणानां वृत्तिपदार्थरूपाणां कार्यान्वयितया संविज्ञानं यस्मिन् स तद्गुणसंविज्ञान इत्यक्षरार्थः ॥ आदिशब्दस्यावयववाचित्वादुद्भूतावयवभेदः सदायः समुमासार्थ इति बहुवचनम् । तस्य च युगपल्लक्ष्ये प्रयोगाभावादानर्थक्यात्तदङ्गेष्विति न्यायेन तदवयवेषु प्रवर्तमाना सर्वादिसंज्ञाऽविशेषात्सर्वशब्देऽपि प्रवर्तते इति युक्तम् । तद्गुणसंविज्ञानत्वं संयोगसमवायान्यतरसम्बन्धे । लम्बकर्णमानयेत्यादौ तद्गुणसंविज्ञानत्वमेव ॥ स्वस्वामिभावसम्बन्धे तु चित्रगुमानयेत्यादावतद्गुणविज्ञानत्वम् ॥ तदन्तस्यापीयं सर्वादिसंज्ञा भवति द्वन्द्वे सर्वादीनां सर्वकार्यं न इति ज्ञापकात् । संज्ञोपसर्जनीभूतेषु सर्वादिषु सर्वादिसंज्ञा न प्रवर्तते । मुख्यामुख्ययोर्मुख्ये कार्यसंप्रत्ययो नामुख्ये इति न्यायात् । मुख्यो हि लोकप्रसिद्धोऽर्थः । तत्र सर्वविश्वशब्दौ कृत्स्नपर्यायौ ॥ उभशब्दो द्वित्वविशिष्टस्य वाचकोऽतो नित्यं द्विवचनान्तः । ननु उभस्य सर्वनामत्वे कोऽर्थ इति भाष्यकारप्रयोगो विरुध्येत । उच्यते । अर्थपरस्यैव नित्यं द्विवचनान्तता न तु स्वरूपानुकरणस्येति । अथ सर्वादिषु उभशब्दपाठो व्यर्थः । सर्वादिकार्याणां स्मडादीनां द्विवचनेऽभावात् । उच्यते । सर्वादिगणे उभशब्दस्य पाठस्तु उभकाविति रूपसिद्ध्यर्थः । तथा हि । उभशब्दस्तावद् द्विवचनमात्रविषयः । जित्स्वरितेत उभे इति लिङ्गात् । समासतद्धितादौ तु द्विवचनलोपे नासौ प्रयुज्यतेऽनभिधानात् । द्विवचनलोपे तु उभयशब्दाद्वृत्तिविषये स्वार्थे नित्यमयट् भवति उभयोऽन्यत्रेति । अन्यत्र द्विवचनपरत्वाभावे इत्युक्तत्वात् । तेन उभयतः । उभयत्र । उभाभ्यां पक्षाभ्यां विनीता निद्रा येस्ते इति विग्रहे 'उभयपक्ष-

विनीतनिद्राः' इत्यादिप्रयोगवत् कप्रत्ययेऽप्ययट् प्राप्तः । अयटि सति उभयकाविति रूपापत्तिः स्यात् । तन्निवारणार्थं सर्वादिषूभशब्दस्य पाठः । तेनाव्ययसर्वादेष्टेः प्रागक इत्यकप्रत्यये उभकाविति सिध्यति । तद्धितस्य मध्यपतितत्वेन द्विवचनपरत्वानपायात् ॥ उभयशब्दस्तु अवयवद्वयारब्धेऽवयविनि वर्तते । उभाववयवौ यस्य स उभयः । संख्याया अवयवे तयङयटौ इत्ययट् । ननु 'द्वयेषामपि मेदिनीभृताम्' इति माघप्रयोगः कथं संगच्छते तस्य सर्वादित्वाभावात्। उच्यते । द्वयं द्वैधमिच्छन्ति गच्छन्तीति द्वयेषस्तेषां द्वयेषामिति इषेः क्विबन्तस्य रूपम् ॥ अन्यशब्दो भिन्नार्थः ॥ अन्यतरशब्दोऽव्युत्पन्नः स्वभावात् द्विविषये निर्द्धारणेऽस्ति ॥ इतरस्त्वन्यनीचयोः ॥ डतरडतमौ प्रत्ययौ । यद्यपि संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति विभक्त्यन्तं पदमिति ज्ञापकात् । तथापीह तदन्तग्रहणम् । येभ्यो डतरडतमौ विहितौ तेषां तदन्तानां ग्रहणमित्यर्थः । केवलयोः संज्ञायाः प्रयोजनाभावात् ॥ कतरकतमडतरडतमादयस्तदन्ताः । द्वयोर्बहूनां चैकस्य निर्द्धारणे इति डतरडतमौ ॥ समशब्दः सर्वपर्यायः । तुल्यपर्यायस्तु नेह गृह्यते ॥ 'सिमः कृत्स्ने च शक्ते च स्यान्मर्यादावबद्धयोः ॥' त्वत्त्वशब्दावन्यपर्यायौ । आद्यस्तान्तः । एतस्य पाठोऽकार्थः ॥ भवतुशब्दस्तु भवदर्थः ॥ उणादौ भातेर्डवतुरिति डवतुप्रत्यान्तः उकारानुबन्धो व्युत्पादितः । आ सर्वादेः इत्यात्वमकप्रत्ययश्च प्रयोजनमस्य । भवादृक् भवकान् ॥ नेमशब्दोऽर्द्धवाची ॥ "एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा । साधारणे समानेऽल्पे संख्यायां च प्रयुज्यते ॥" संख्यायामेकवचनान्तः ॥ पूर्वपरावरशब्दा दिग्देशकालवाचकाः सर्वादिसंज्ञकाः ॥ दक्षिणशब्दस्तु दिग्देशवाचकः सर्वादिः न तु प्रवीणवाची ॥ उत्तरापरशब्दौ दिग्देशकालवाचकौ सर्वादी ॥ अधरस्तु दिग्देशवाचकः सर्वादिः ॥ 'स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने' इत्यमरः ॥ 'स्वः स्यात्पुंस्यात्मविज्ञातौ त्रिष्वात्मीयेऽस्त्रियां धने ।' इति मेदिनी ॥ इति चत्वारोऽर्थाः स्वशब्दस्य । तत्रात्मात्मीययोरेव सर्वादित्वम् ॥ "अन्तरमवकाशावधिपरिधानान्तर्द्धिभेदतादर्थ्ये । छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च ॥" इत्यन्तरशब्दस्यार्थाः ॥ तत्र परिधानबहिर्योगयोरेव सर्वादित्वम् ॥ त्यद्तदौ शब्दौ पूर्वोक्तपरामर्शकौ ॥ यद्शब्द उद्देश्यसमर्थकः ॥ एतद्इदमौ शब्दौ प्रत्यक्षोपस्थितवाचकौ ॥ अदस्शब्दस्तु व्यवहितवाचकः । उक्तं च । "इदमस्तु सन्निकृष्टं समीपतरवर्ति चैतदो रूपम् ॥ अदसस्तु ॥ विप्रकृष्टं तदिति परोक्षे विजानीयात्" इति ॥ द्विशब्दो द्वित्वविशिष्टवाचकः ॥ किम्शब्दः प्रश्ने आक्षेपे च ॥ अलिङ्गः संबोधनैकविषयश्च युष्मदर्थः ॥ अलिङ्गः उच्चारयित्रर्थोऽस्मच्छब्दः ॥ २२ ॥

(त०) सर्वविश्वेत्यादि सर्वादयः पञ्चत्रिंशत् ॥ तत्र सर्वविश्वशब्दौ कृत्स्नपर्यायौ ॥ उभशब्दो द्वित्वविशिष्टस्य वाचकः । अत एव नित्यं द्विवचनान्तः । पाठस्तूभकावित्यकार्थः । अन्यथा क एव स्यात् । तस्मिन् द्विवचनपरत्वाभावादुभयकावित्येव रूपं स्यात् उभयशब्दस्तु अवयवद्वयारब्ध इत्यर्थः । तिरोहितावयवभेदत्वादेकवचनम् ॥ अन्यो भिनार्थः ॥ अन्यतरान्यतमशब्दावव्युत्पन्नौ स्वभावाद् द्विबहुविषये निर्द्धारणे वर्तते । तत्रान्यतमशब्दस्य गणे पाठाभावान्न संज्ञा ॥ इतरशब्दस्त्वन्यनीचयोः ॥ त्वत् त्व इत्यन्यपर्यायौ । आद्यस्तान्तः ॥ नेम इत्यर्द्धे ॥ समः सर्वपर्यायः । तुल्यपर्यायस्तु नेह गृह्यते ॥

'समः कृत्स्ने च शक्ते च स्यान्मर्यादावबद्धयोः ॥' पूर्वपरावरोत्तरापराः पञ्च दिक्कालयोस्त-दवच्छिन्ने च ॥ दक्षिणाधरशब्दौ दिशि तदवच्छिन्ने च । दक्षिणः प्रवीणः, अधरे ताम्बूलरागः, उत्तरे प्रत्युत्तरे वा शक्त इत्येते गृह्यन्ते । कथं परे शत्रवः, अपरे वादिन इति शत्रुप्रतिवादिवाचिनोः सर्वादित्वम् । उपचारादिति गृहाण । न चोपसर्जनत्वात्कथमिति वाच्यम् । न हि लाक्षणिकत्वमुपसर्जनत्वम् । किंतु स्वार्थविशिष्टार्थान्तरसंक्रमः । अथ दिग्वाचकत्वे संज्ञात्वात्सर्वादिकार्यनिषेध इति वाच्यम् । आधुनिकसंकेतो हि संज्ञा । न च सा दिक्षु । कुरुषु तु सास्त्येव । नोत्तरा कुरवः । केचित्तु दिक्षु चिरन्तनः कुरुषु तु आधुनिकः संकेत इत्यत्र प्रमाणाभावः । सुमेरुमवधिमपेक्ष्य कुरुषूत्तर शब्दप्रवृत्तेरित्याहुः । तत्र वृद्धव्यवहार एव प्रमाणमिति तु नव्याः ॥ स्वशब्दस्य ज्ञातिरात्मा धनमात्मीयं चेति चत्वारोऽर्थाः । तत्र ज्ञातौ धने च न सर्वादित्वम् । "अन्तरमवकाशावधिपरिधानान्तर्द्धि-भेदतादर्थ्ये । छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च" इति अन्तरशब्दस्यार्थेषु परिधानबहिर्योगयोरेव सर्वादित्वम् । बहिरित्यनावृतो देशो बाह्यं चोच्यते ॥ भवच्छब्दस्य पाठस्तु आ सर्वादेरित्यात्वार्थोऽकार्थश्च ॥ त्यद्तद्शब्दौ पूर्वोक्तपरामर्शकौ ॥ यदुद्देश्यसमर्थकः ॥ एतदिमौ प्रत्यक्षोपस्थिते ॥ अदस् व्यवहिते ॥ "एकोऽन्यार्थे प्रधानेऽल्पे प्रथमे केवले तथा । साधारणे समाने च संख्यायां च प्रवर्तते ॥" संख्यायामेकवचनान्त एव ॥ अलिङ्गः संबोधनैकविषयश्च युष्मदर्थः ॥ किंशब्दः प्रश्ने आक्षेपे च ॥ २२ ॥

जसी ॥ सर्वादेरकारान्तात्परस्य जस ईर्भवति ॥ सर्वे ॥ २३ ॥

(सु०) **जसी** ॥ अदन्तात्सर्वादेर्जस ईः स्यात् ॥ षष्ठ्या अविधानान्नान्तस्याय-मादेशो भवति । निर्दिश्यमानस्यादेशा भवन्ति इति न्यायेन जस् इत्यस्य सर्वस्यैव स्थाने आदेशः । यद्वा जसीत्यत्र ई इ इति प्रश्लेषेण गुरुत्वात्सर्वादेशः । अन्यथा दीर्घग्रहणस्य प्रयोजनाभावात् ॥ यद्वा अन्त्यत्र दीर्घस्य प्रयोजनम् । द्वितीय इकारः प्रथमचरमादिभ्यो ऽपि विध्यर्थः ॥ ननु अकारमाश्रित्य जात ईकारः कथमेत्वरूपेणाकारस्य विघातकः स्यात् उच्यते । उभये इति निर्देशेन सन्निपातपरिभाषाया अनित्यत्वाभ्युपगमादविघातको भव-तीत्यर्थः (क) ॥ २३ ॥

(त०) **जसी** ॥ जस् ई इ इति छेदः । इकारप्रश्लेषः किमर्थम् इति चेत्सत्यम् प्रथमादिभ्योऽपि विध्यर्थो द्वितीयः । अथैवं जसोऽन्त्यस्य सस्यैव किं नेति चेन्न । अन्त्य-विधायकषष्ठ्या अदर्शनात् । उभय इति लिङ्गाच्च । अत्र केचित्सप्तमीभ्रमव्यावृत्त्यर्थं दीर्घ-विधिः न तु तदर्थमित्याहुः । तन्न 'उभये' इति निर्देशेन तद्भ्रमनिरासात् ॥ ननु सर्वे इत्यत्र कथम् अ इ ए इत्यनेनैत्वं सन्निपातपरिभाषया तस्य बाधात् इति चेन्न । अत्रोभयो-

(क) अस्याः शङ्काया इदं बीजम्—यो यमाश्रित्योत्पद्यते स तं प्रति सन्निपातः सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति परिभाषा 'उभयेस्वराः'इत्यादिनिर्देशस्तु तत्समाधानबीजम् ॥

जसीत्यत्र अर्द्धमात्रालाघवेन वैयाकरणाः पुत्रोत्सवं मन्यन्ते इति न्यायेन केचिज् जसि इत्येवं पठन्ति । दीर्घविधानस्य प्रयोजनाभावात् । न दीर्घविधाने द्विमात्रत्वेन गुरुत्वाद् "गुरुः शिच्च सर्वस्य वक्तव्य" इति सर्वस्य जसः स्यादिति वाच्यम् । तस्य षष्ठीनिर्दिष्टस्यादेशस्तदन्तस्य वक्तव्य इत्यन्तविधेरपवादत्वात् । अत्र च षष्ठीनिर्दिष्टस्याभावान्नि"र्दिश्यमानस्यादेशा भवन्ति" इति सर्वस्यैव जसः स्यादिति प्रसादकृत् ।

रपि विनाशे सन्निपातपरिभाषाया अविषयत्वात्। 'उभये' इति निर्देशेन तस्या अनित्यत्वज्ञापनाद्वा ॥ २३ ॥

ष्रृनो णोऽनन्ते ॥ षकाररेफऋवर्णेभ्यः परस्य नकारस्यैकपदस्थस्य णकारादेशो भवत्यन्ते स्थितस्य न भवति सर्वानित्यादौ (क) ॥२४॥

(सु०) **ष्रृनो णोऽनन्ते** ॥ ष् च र् च आ च एषां समाहारः ष्रृ तस्मात् ष्रृः। संज्ञापूर्वकत्वेनानित्यत्वात् नामिनः स्वरे इति न नुम्। अनन्ते इत्यत्र नञ् प्रसज्यप्रतिषेध एव। अन्तशब्देन पदान्त एव गृह्यते न तु वाक्यान्तः। व्याकरणे पदसंस्कारपक्षस्याभ्युपगमात्। ष्रृनः धातोर्नामिन इत्यादिनिर्देशादेकपदे एव णत्वविधिरस्ति। तेनैकपदस्थस्य ष्रृऋवर्णेभ्यः परस्य नस्य णः स्यादपदान्ते ॥ यथा पुष्णाति। चतुर्णाम् ॥ धातॄणाम् ॥ अपदान्ते किम्। पितॄन् ॥ ष्रृरिति किम्। देवेन ॥ २४ ॥

(त०) **ष्रृनो णोऽनन्त इति** ॥ ष् च र् च आ च एषां समाहारः ष्रृ तस्मात् ष्रृः। षकाररेफऋवर्णभ्य इत्यर्थः॥ ननु समासे नपुंसकत्वात्ष्रृरिति कथमिति चेत्सत्यम्, नामिनः स्वर इति नुमः संज्ञापूर्वकत्वेनानित्यत्वात्। सौत्रत्वाद्वा पुंस्त्वम् ॥ अनन्ते इति किम्। कर्तॄन् ॥ ष्रृरिति किम्। देवेन। न इति किम्। वर्म ॥ ननु हरेर्नत्रमित्यत्र कुतो न णत्वमिति चेन्न। धातोर्नामिन इत्यादिनिर्देशेनैकपद एवास्य स्वीकारात्। अथैवं रामनामेत्यादावपि कुतो न णत्वं समासेनैकपदत्वादिति चेन्न। गर्गनडेत्यादिनिर्देशेन समासेनैकपदत्वे न णत्वम्। अथ हरिकामेणेत्यादौ कथमिति वाच्यं ज्ञापकसिद्धं न सर्वत्रेत्याद्याश्रयणात् (ख) ॥ नन्वत्र षग्रहणं किमर्थम्। न च पुष्णातीत्यत्र णत्वं

(क) षरेफसान्निध्यात् 'ष्रृ' रित्यत्र ऋरपि वर्णो गृह्यते न धातुरिति मत्वाह—**सकाररेफऋवर्णेभ्य इति**। यद्येवं मातॄणामित्यादावपि ऋकारैकदेशं रेफमाश्रित्य रेत्येव सिद्धं णत्वं किमृग्रहणेन। न च वाच्यं परेण स्वरांशेन व्यवधानान्न स्यादिति। अवकुप्वन्तरेपीत्यत्रान्तरेऽपि इति विभज्य तदव्यवधानेऽपि विधानात्। अवकुप्वित्यस्याक्षरसमाम्नायिकैस्तत्प्रत्यायितैश्चेत्तदेभिरेवान्तरे स्यान्नान्यैरिति नियमादर्थेनेत्यादाव प्रसङ्गः। ऋकारांशस्य त्वनक्षरसमाम्नायिकत्वान्न नियमेन व्यावृत्तिस्तदेवं व्यर्थमृग्रहणमिति चेन्न, इहाक्षरसमाम्नायिकवर्णेष्ववयवस्य वर्णकार्य्यं न स्यादिति। अन्यथा छ इत्येव सिद्धत्वाद्व्यर्थं तत् स्यात्। इह तर्हि याता यत इत्यलोपो न स्यात्। न च तपरत्वसामर्थ्यान्न भविष्यतीति वाच्यम्। तपरत्वस्य सर्वाकारलोपनिरासार्थत्वात् तन्निरासश्च परस्य लोपे कृते तस्य तद्वद्भावात् पूर्वलोपाभावद्वारेण। तथा पुनर्ऋवभः रिलोपो दीर्घश्चेति न स्यात्। तथा हरे इदं विष्णो उदकमित्यत्रैकारौकारयोः परांशयोरिदुतोः पराभ्यामिदुद्भ्यां परत्वादन्तरङ्गत्वाच्च सवर्णदीर्घो न स्यात्। अन्तरङ्गत्वं चावयवाश्रयस्य दीर्घस्यैव। न समुदायाश्रययोर्वयवोः। अवयवप्रतिपत्तिपूर्वकत्वात्समुदायप्रतिपत्तेः। तथा चोक्तं काशिकायाम्—

"वर्णेषु य वर्णैकदेशाः वर्णान्तरसमानाकृतयः तेषु तत्कार्य्यं ने"ति। अथवा—

यथानुपपन्नैकत्वबुद्धेरेकवर्णोच्चारणेच्छापूर्वकैकप्रयत्ननिर्वर्त्यत्वाच्चाकारादीनामिव एषामप्येकवर्णत्वमिति नरसिंहवज्जात्यन्तरत्वादवयवाभावादृकारेऽप्येकदेशे रेफाभावात् णत्वाप्राप्ते विध्यर्थमृकारग्रहणमिति **माधवः**।

(ख) वृत्तावेकपदस्थस्येति विशेषणस्य व्यावृत्तिमुखेन शङ्कते—**नन्विति**। हरेर्नेत्रेत्यादौ णत्ववारणायैकपदस्थस्येति विशेषणम्। अस्य ज्ञापकमाह—**धातोर्नामिन इत्यादि**। आदिपदेन 'ष्रृनो ण' इत्यादि **अथैवमिति**। एकपदे णत्वस्वीकारे इत्यर्थः। रामस्य नाम रामनाम इति समासे **कृते एकपद**त्वात्कथं नात्र णत्वमिति शङ्कां वारयति—**नेति**। निषेधे हेतुमाह—**गर्गनडेत्यादि**। समासे एकपदत्वेऽपि गर्गनडेत्यादिनिर्देशान्न णत्वमित्यर्थः। समासे एकपदे णत्वसद्भावदृष्टान्तेन बाधामाशङ्कते—**हरिकामेणेत्यादाविति**। उत्तरमाह—**ज्ञापकसिद्धमिति**।

कथमिति वाच्यम् ष्टुत्वेनैव तत्सिद्धेः। न च पुषाणेत्यादौ व्यवहितेऽपि णत्वार्थमिति चेत्॥ ष्टुरिति पञ्चमीनिर्देशेनाव्यवहितस्यैव णत्वविधानात्। तथा चोत्तरार्थमिहैव कृतम्। षरेफसाहचर्यादृकारोऽपि वर्ण एव गृह्यते न तु धातुः। ननु पितॄणामित्यत्र ऋकारैकदेशरेफमाश्रित्य णत्वं भविष्यति किमृकारेणेति चेन्न। नरसिंहवज्जात्यन्तराक्रान्तत्वादृकारत्वेनैव तस्य सर्वव्यवहारसिद्धत्वान्न तु रेफत्वेनेति न तत्र रेफत्वमतोऽवश्यमृग्रहणम्। अत एव हरे इन्द्र इत्यादावेकारान्तर्गतमिकारमाश्रित्य न सवर्णदीर्घः। अत्र केचित्। ननु चैवमपि धातर्नमस्ते इत्यादौ पदादेर्नस्य णत्वं स्यात् अनन्त इति निषेधानुपस्थानात्। अनन्त इत्यस्य काकाक्षिगोलकन्यायेनावृत्त्या वा ष्टुरित्यनेनापि सम्बन्धात् पदान्तेभ्यः षकाररेफऋवर्णेभ्योऽपि प्रतिषेधादित्याहुः। तत्रेदमवधेयम्। एकपद एव णत्वविधानस्योक्तत्वेन द्वितीयपदस्थस्य नस्य णत्वाशङ्का निर्मूलेति सूरिभिर्विभावनीयम्॥ २४॥

अवकुप्वन्तरेऽपि॥ अवप्रत्याहारेण कवर्गेण पवर्गेणानुस्वारेण विसर्गेण ×क× पाभ्यां च मध्य व्यवधानेऽपि भवति नान्येन (क)॥ सर्वेण।

(सु०) **अवकुप्वन्तरेऽपि**॥ अवश्च कुश्च पुश्च तेषां समाहारः अवकुपु तेनान्तरं अवकुप्वन्तरं तस्मिन्। स्वराद्यदन्तस्त इति अवशब्दस्य पूर्वनिपातः। दन्तौष्ठ्यवकारेणाचप्रत्याहारः। अन्तरशब्दो मध्यवाचि। ष्टुरित्यनुवर्तते। पञ्चमीनिर्देशाद्व्यवधाने सति णत्वं न प्राप्नोत्यत इदमारभ्यते। अत्रापिशब्दोऽनुक्तसमुच्चयार्थः। तेनानुस्वारविसर्गजिह्वामूलीयोपध्मानीया ज्ञेयाः। एतेषां व्यस्तानां यथासम्भवं मिलितानां च मध्ये व्यवधाने सति ष्टुः परस्य नस्य णः स्यादनन्ते॥ अत्रेत्यादि किम्। मृत्स्ना॥ ष्टुरिति किम्। भानुना॥ अनन्ते किम्। सर्वान्॥ अनुस्वारादिव्यवधाने यथा। बृंहणम्। उरः केण—उर ×केण। उरः पेण—उर×पेणेत्यादि॥ २५॥

(त०) **अवकुप्वन्तरेऽपि**॥ अवश्च कुश्च पुश्च एतेषां समाहारः अवकुपु तेन अन्तरं तस्मिन्॥ यदि गर्गाः शतं दण्डयन्तामितिवत्समुदाये वाक्यसमाप्तिराश्रीयते तदा क्वापि न प्राप्तिः। ब्राह्मणा भोज्यन्तामितिवद्यदि प्रत्येकं वाक्यपरिसमाप्तिस्तदा अवर्णेत्यादि न स्यात्। तस्मादेतैर्व्यस्तैर्यथासंभवं मिलितैश्च व्यवधाने णत्वं भवति। यथा गर्गैः सह न भोक्तव्यमिति प्रत्येकं च न सह भुज्यते समुदितैरपि तथेहापि व्यस्ताः समस्ताश्चावादयो व्यवायमुपलक्षयितुं शक्ताः। अपिशब्दोऽनुक्तसमुच्चयार्थः। तेनानुस्वारविसर्ग×क×पव्यवायेऽपि णो भवति॥ कुप्ववान्तरेऽपीति सुवचम्॥ अल्पस्वरत्वादुकारान्तत्वात्कु पु एतयोरेव पूर्वनिपातस्य न्याय्यत्वात्। तथा च लाघवमपीति ध्येयम्। स्वराद्यदन्तस्येत्यस्य यदि परत्वाद्बलवत्त्वं तदेदम्॥ २५॥

सर्वादेः स्मट्॥ सर्वादेरकारान्तात्परस्य ङे इत्येतस्य स्मडागमो भवति॥ सर्वस्मै (ख)॥ २६॥

(क) अवेति। अत्रापिना क्वचित् समस्तपदे णत्वं क्वचिच्च णत्वाभावः। आद्योदाहरणम्—प्रणम्य, त्रिहायण इत्यादि। अन्त्योदाहरणम्-दुर्नयः, प्रनष्टः, त्रिनयन इत्यादि। एतदपि शब्दप्रयोगाज्ज्ञेयम्। तदुक्तम् "षत्वणत्वविधिः सूत्रैर्न सम्यक् परिदर्शितः। प्रयोगात्प्रायशो यस्मात्प्रयोगाणां हि भिन्नता"॥ इति।

(ख) सर्वादेरिति अत्र यद्यपि स्मटष्टित्त्वादकश्च कित्त्वादाद्यन्तस्थानत्वेनोभयोरविरोधस्तथापि आद्य-

(सु०) **सर्वादेः स्मट्** ॥ ङे अगित्यस्यापवादोऽयम् । अदन्तात्सर्वादेर्ङे इत्यस्य स्मट् स्यात् ॥ अदन्तादिति किम् । त्वते । भवते ॥ सर्वादेरिति किम् । रामाय ॥२६॥

(त०) **सर्वादेः स्मडिति** ॥ अत्रात इत्यनुवृत्तेरदन्तादिति । अतो भवते इत्यत्र न । तपरकरणं तु स्पष्टार्थमेव न तावन्तनिवृत्त्यर्थं तत्र यडादिनैव बाधात् ॥ सर्वादेरिति किम् । देवाय ॥ अकोऽप्ययमपवादो येन नाप्राप्तिन्यायात् । सर्वं आदिर्यस्य स सर्वादिरिति तद्गुणसंविज्ञानो बहुव्रीहिरतः सर्वशब्दस्यापि लाभः । न च सर्वादिशब्दस्य समुदायवाचित्वात्कथं तदवयवे सर्वशब्दे इति वाच्यम् । समुदायस्य युगपल्लक्ष्ये प्रयोगाभावादानर्थक्यात्तदङ्गेष्विति न्यायेन तदवयवे एव तत्कार्यम् ॥ २६ ॥

अतः ॥ सर्वादेरकारान्तात्परस्यातः स्मडागमो भवति ॥ सर्वस्मात् ॥२७॥

(सु०) **अतः** ॥ ङसिरत् इत्यतो ङसिरित्यनुवर्त्य विभक्तिविपरिणामेन व्याख्यातव्यम् । यथा अदन्तात्सर्वादेः परस्य ङसेरादेशस्यातः स्मट् स्यात् ॥ २७ ॥

(त०) **अत इति** ॥ अत्र ङसेरादेश एवात् गृह्यते न त्वकारः तस्मादिति ज्ञापकात् २७

सुडामः ॥ सर्वादेरवर्णान्तात्परस्यामः सुडागमो भवति ॥ सर्वेषाम् ॥२८॥

(सु०) **सुडामः** ॥ अम्शसोरस्य इत्यतो मण्डूकप्लुत्या अस्येत्यनुवर्त्य व्याख्येयम् । यथा अवर्णान्तात्सर्वादेरामः सुट् स्यात् । नुडामः इत्यत आम इत्यनुवर्तनीयम् । तेनामः षष्ठीबहुवचनस्यामः सुडित्यर्थो ज्ञेयः । तेन 'आम्ङेः' इत्यादिना कृतस्यामस्तु सुड् न । युवाम् । आवाम् । सर्वस्यामित्यत्र परत्वात् ङितां यडित्यपि समाधानमस्ति॥२८॥

(त०) **सुडाम इति** ॥ अत्राम्शसोरस्येत्यतो मण्डूकप्लुत्याऽस्येत्यनुवृत्या अदिति नेत्याह-अवर्णान्तादिति ॥ सर्वादेरेतावन्मात्रोक्तौ भवत इत्यत्रातिप्रसङ्गः स्यात् , अदन्तादित्युक्तावावन्तेऽव्याप्तिः । किंचैवं सर्वमिच्छन्ति सर्वायन्तीति सर्वीयस्तेषां सर्वीयां सर्वं कुर्वतामित्यादावतिव्याप्तिवारणाय यादीनां परत्वादनुसरणक्लेशोऽपि न कार्यः॥२८॥

ङिस्मिन् ॥ सर्वादेरकारान्तात्परो ङि स्मिन्भवति ॥ सर्वस्मिन् ॥ शेषं देववत् ॥ एवं विश्वादयः ॥ डतरडतमौ प्रत्ययौ । ततस्तदन्ताः शब्दा ग्राह्याः२९

(सु०) **ङि स्मिन्** ॥ अदन्तात्सर्वादेर्ङि स्मिन् भवति ॥ अतः किम् । भवति ॥ सर्वादिगणे डतरडतमौ प्रत्ययौ पठितौ न केवलः प्रत्यय इत्युक्तत्वान् तौ डतरडतमावन्ते येषां ते तदन्ताः कतरकतमादयो ज्ञेयाः ॥ २९ ॥

(त०) **ङि स्मिन्निति** ॥ अत्राप्यत इत्यनुवर्तते । इ स्मिन्नित्येव सूत्रयितुमुचितम् । ङकारग्रहणं स्पष्टार्थम् । न च जसः शौ सर्वाणीत्यादावतिव्याप्तिरिति वाच्यम् । तत्र परत्वान्नुमा बाधात् । अथ जातिपक्षे ह्रस्वग्रहणेन दीर्घस्यापि ग्रहणे ईमौ जसीति कृतेऽत्वातिप्रसङ्ग इति वाच्यम् , उभे उभये इत्यादिलिङ्गेन ह्रस्वव्यक्तेरेवालाभात् । सर्वेष्टिरित्यादौ तु स्यादिविशेषणेन वारणसंभवात् । स्यादीनां परवर्ण इति व्याख्यानात् ॥ ततस्तदन्ता इत्यादि ॥ केवलयोः संज्ञायाः प्रयोजनाभावादित्यर्थः । एतन्मूलं तु जसी, सर्वादेः स्मट् , अतः, ङि स्मिन्निति सूत्रचतुष्टयेन वेत्यनुवर्त्य तस्य व्यवस्थितत्वमाश्रित्य

येभ्यो दधि दीयतां कौण्डिन्याय तक्रमित्युक्तेः, कौण्डिन्यस्यापि ब्राह्मणान्तःपातित्वाद्दधिदाने प्राप्तेऽपि सामान्यविशिष्टेन तक्रदानेन बाध्यते । तथात्रापि तक्रकौण्डिन्यन्यायेन सर्वादेः स्मडेव । इति वासुदेवः ।

सर्वार्थनिर्वाहो बोध्यः ॥ २९ ॥

(पूर्वादीनां नवानां जसुङसिङीनामीस्मात्स्मिनो वा)

पूर्वे—पूर्वाः । पूर्वस्मात्-पूर्वात् । पूर्वस्मिन् पूर्वे । शेषं सर्ववत् ॥ एवं परादयः ॥ सर्वादिः सर्वकार्यी स्यान्न चेद् गौणोऽथवाऽभिधा । पूर्वादिश्च व्यवस्थायां समोऽतुल्येऽन्तरोऽपुरि । परिधाने बहिर्योगे स्वोऽर्थज्ञात्यन्यवाच्यपि ॥ सर्वमतिक्रान्तोऽतिसर्वः तस्मै अतिसर्वाय देहि । प्रियं सर्वं यस्यासौ प्रियसर्वः तस्मै प्रियसर्वाय । सर्वो नाम कश्चित्तस्मै सर्वाय । अतिपूर्वाय । अन्तरायां पुरि । समाय तुल्याय ॥ व्यवस्थायां किम् । दक्षिणा गाथकाः । कुशला इत्यर्थः ॥ असंज्ञायां किम् । उत्तराः कुरवः । अन्तरे अन्तरा वा शाटकाः । परिधानीया इत्यर्थः ॥ अन्तरेऽन्तरा वा चाण्डालस्य गृहाः । बाह्या इत्यर्थः । बहिर्योगे किम् । ग्रामयोरन्तरे तापसः । मध्य इत्यर्थः ॥३०॥

(सु०) पूर्वादीनां नवानां जसुङसिङीनामीस्मात्स्मिनो वा ॥ पूर्वादीनां सप्तानां व्यवस्थायामसंज्ञायां स्वशब्दस्य चात्मात्मीयार्थयोरन्तरशब्दस्य बाह्ये परिधानीये चार्थे गणपाठात्सर्वत्र सर्वादिसंज्ञा प्राप्ता सा जसुङसिङ्षु परतो वा भवतीत्यर्थः । "सर्वादिः सर्वकार्यी स्यान्न चेद्गौणोऽथवाऽभिधा । पूर्वादिश्च व्यवस्थायां समोऽतुल्येऽन्तरोऽपुरि ॥ परिधाने बहिर्योगे स्वोऽर्थज्ञात्यन्यवाच्यपि ॥" चेद्यदि सर्वादिः सर्वादिगणो गौणो न अथवाऽभिधा नाम न स्यात् तदा सर्वादिः सर्वशब्दस्य कार्यमस्ति यस्य सः सर्वकार्यी स्यादित्वेन् । मान्तोपधात् इतीन् । सर्वनामाख्य इति वा पाठः । ये तु संज्ञोपसर्जनीभूताः सर्वादयस्तेषां सर्वादिकार्यमन्तर्गणकार्यं च न सर्वादिसंज्ञाया अभावात् । सर्वादिकार्ये यथा । 'जसी' इतीत्वम् । 'सर्वादेः' इति स्मट् । 'अतः' इति स्मट् । 'ङि स्मिन्' इति स्मिन् । 'सुडामः' इति सुडागमः । 'यटोऽच' इति सुट् । इत्यादि ॥ अन्तर्गणकार्यं यथा । 'त्वन्यादेः' इति त्वुः । 'त्यदादेष्टेः' इत्यः । 'इत्य मः' इति मः । 'सौ सः' इति सः । इत्यादि॥ यः स्वार्थं परित्यज्य अन्यार्थं वर्तते स गौणः । गौणे यथा । सर्वमतिक्रान्त इत्यत्र अत्यादयः क्रान्ताद्यर्थे द्वितीययेति तत्पुरुषः । अतिसर्वस्तस्मै अतिसर्वाय पुरुषाय त्वं देहि । गौणत्वादत्र न स्मट् । प्रियं सर्वं यस्येति बहुव्रीहिः स प्रियसर्वः ॥ संकेतकरणं संज्ञा (क) । यथा कश्चित्पुरुषस्तस्य नाम सर्व इति तस्मै सर्वाय । संज्ञात्वादत्र न स्मट् ॥ पूर्वादिसप्तको गणो व्यवस्थया सर्वकार्यी स्यात् । स्वाभिधेयापेक्षावधिनियमो व्यवस्थेति । स्वस्य पूर्वादिशब्दस्याभिधेयेनापेक्ष्यमाणस्यावधेर्नियम इत्यर्थः । अपेक्ष्यते इति अपेक्षः । कर्मणि घञ्प्रत्ययः । स्वशब्देन पूर्वादयः सप्त ग्राह्याः । स्वेषां पूर्वादीनामभिधेयः स्वाभिधेयो दिग्देशकालरूपोऽर्थः । स्वाभिधेयस्यापेक्षः

(क) सङ्केतकरणमिति । संकेत इच्छाविशेषः 'इदं पदममुमर्थं बोधयतु', अथा 'स्मात्पदादयमर्थो बोद्धव्य' इति वेच्छा, सा च वृत्तिः । सम्पूर्वककितधातोः कर्मणि वाच्ये क्तप्रत्ययाद् इच्छार्थकधातोर्विषयत्वस्यैव कर्मत्वात् ॥

स्वाभिधेयापेक्षः। 'कर्तृकार्ययोरक्तादौ' इति कर्तृषष्ठ्या समासः। स्वाभिधेयेनापेक्षते इत्यर्थः। स्वाभिधेयेनापेक्ष्यश्चासाववधिनियमश्च स्वाभिधेयापेक्षावधिनियमो व्यवस्था। अवधिमपेक्ष्य ते पूर्वादयो यत्र स्युस्तत्र व्यवस्था भवतीत्यर्थः (क)॥ व्यवस्थायां किम्। दक्षिणा नराः। कुशला इत्यर्थः॥ एवमधरे ताम्बुलरागः। उत्तरे प्रत्युत्तरे च शक्त इति। गौणे यथा। पूर्वमतिक्रान्तोऽतिपूर्वस्तस्मै अतिपूर्वाय पुरुषाय त्वं देहि। गौणत्वादत्र न स्मट्॥ समशब्दोऽतुल्येऽर्थे सर्वकार्यः। तुल्येऽर्थे न भवतीत्यर्थः। समाय देहि। तुल्यार्थत्वादत्र न स्मट्॥ अन्तरशब्दः परिधाने उत्तरीयेऽर्थे बहिर्योगे चार्थे सर्वकार्यः॥ अपुरि पुरीविषयतायां सर्वकार्यो न भवति। बहिःशब्देनानावृतो देशो बाह्यं वोच्यते। अन्तरायां पुरीति प्राकाराद्बाह्यायां पुरि प्राकारान्तरवर्तिन्यां वा पुरि गृहाः सन्ति। सत्यपि बहिर्योगे पुरीविषयत्वान्न सर्वादिसंज्ञाऽत्र। सर्वादित्वाभावात् 'यटोऽच्च' इति न सुट्॥ परिधाने तु अन्तरे अन्तरा वा शाटका इति। परिधानीया इत्यर्थः सर्वादित्वात् वा 'जसी' इति ईत्वम्। बहिःशब्दोऽर्थद्वयवाची उक्तः। तत्राद्ये यथा। अन्तरे अन्तरा वा गृहा इति। नगराद्बाह्याश्चाण्डालादिगृहा इत्यर्थः॥ द्वितीये तु नगराभ्यन्तरा गृहा इत्यर्थः। बाह्येन सहाभ्यन्तरस्य योगो ह्यस्ति॥ बहिर्योगे किम्। ग्रामयोर्द्वयोरन्तरे मध्ये तापसा वसन्तीति अन्तरशब्दस्य मध्यार्थत्वान्न सर्वादिसंज्ञा। अत एवात्र पाक्षिको न स्मिन्। अर्थश्च ज्ञातिश्चार्थज्ञाती। अर्थज्ञातिभ्यामन्यावात्मात्मीयावर्थौ अर्थज्ञात्यन्यौ अर्थज्ञात्यन्यौ वक्तीत्यर्थज्ञात्यन्यवाची स्वशब्दः सर्वकार्यः। आत्मात्मीयज्ञातिधनवाची स्वशब्दः। तत्र ज्ञातिधनयोः पर्युदासादात्मात्मीयौ परिशिष्टौ। तत्र सर्वादिसंज्ञा भवति। स्वे-स्वाः। आत्मानः-आत्मीया वेत्यर्थः। सर्वादित्वादत्र 'वा' जसी इतीत्वम्। ज्ञातिधनवाचिनस्तु स्वयेत्यत्र सर्वादित्वाभावान्न स्मट्। ननु आत्मात्मीय वाचीति वक्तुं युक्तं पर्युदासग्रहणमनर्थकम्। उच्यते। ज्ञातित्वेन धनत्वेन च विवक्षायां सत्यामात्मीयार्थं सर्वादिसंज्ञा माभूदित्यर्थं पर्युदासग्रहणमिति॥ अन्यशब्दग्रहणमनर्थकम्। उच्यते। आत्मीयार्थस्यापि ज्ञातित्वेन धनत्वेन च विवक्षायां सत्यां सर्वादिसंज्ञा माभूदित्येतदर्थमन्यशब्दग्रहणमिति (ख)॥३०॥

(क) नियमेनावधिसापेक्षार्थे वर्तमानानां पूर्वादिशब्दानां जसि सर्वनामसंज्ञाविकल्प इति फलति। व्यवस्थायां किमिति। पूर्वादिशब्दानां नियमेनावधिसापेक्ष एवार्थे विद्यमानत्वादिति प्रश्नः। दक्षिणा इति। अत्र दक्षिणशब्दो नावधिसापेक्ष इति भावः। दक्षिणपार्श्ववर्तिनो गाथका इत्यत्र कस्मादित्यवध्यपेक्षा अस्त्येवेत्यत आह—**कुशला इत्यर्थ** इति।

(ख) **स्वे स्वा इति**। आत्मा आत्मीयं ज्ञातिः धनं चेति स्वशब्दस्य चत्वारोऽर्थाः। 'स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने' इत्यमरः। अत्र स्वो ज्ञातावात्मनीत्येकं वाक्यम्। ज्ञातावात्मनि च स्वशब्दः पुंल्लिङ्ग इत्यर्थः। स्वं त्रिष्वात्मीये इति द्वितीयं वाक्यम्। आत्मीये स्वशब्दो विशेष्यनिघ्न इत्यर्थः। स्वोऽस्त्रियां धन इति तृतीयं वाक्यम्। धने स्वशब्दः पुंनपुंसक इत्यर्थः। 'स्वः स्यात्पुंस्यात्मनि ज्ञातौ त्रिष्वात्मीयेऽस्त्रियां धने' इति मेदिनीकोषः। तत्र ज्ञातिधनयोः पर्युदासात् आत्मनि आत्मीये च सर्वनामत्वं जसि कल्प्येत इत्यभिप्रेत्य व्याचष्टे—**आत्मानः-आत्मीया वेत्यर्थ इति**। ज्ञातिधनपर्युदासस्य प्रयोजनमाह—**ज्ञातिधनवाचिनस्त्विति**। कारिकायाम् आत्मात्मीयवाची स्वशब्दः सर्वकार्यः स्यादिति कथं नोक्त्वा स्वोऽर्थज्ञात्यन्यवाच्यपीत्युक्तमित्याशङ्कते—**नन्विति**। उत्तरमाह—**ज्ञातित्वेनेति**। यदा स्वशब्दस्य धनत्वेन वा ज्ञातित्वेनात्मीयार्थो भवति तदा तस्य सर्वादिसंज्ञा न भवतीति भावः।

(त०) सर्वादिः सर्वकार्यो स्यादित्यादि ॥ सर्वादिस्तदा सर्वकार्यो स्याद्यदि गौणो न अथवा अभिधा न । पूर्वादिश्च व्यवस्थायां वाच्यायां सर्वकार्यो स्यादित्यर्थः ॥ च श-ब्दाद्गौणाभिधयोः सर्वत्रान्वयः ॥ समः अतुल्ये ॥ अन्तरः अपुरि । परिधाने बहियोंगे च अन्तर एव ॥ स्वशब्दः अर्थज्ञातिभिन्नार्थवाची चेत्तदा सर्वकार्यीत्यर्थः ॥ स्वाभिधेयापे-क्षावधिनियमो व्यवस्था ॥ अवधेर्नियमः । कीदृशः स्वाभिधेयापेक्षः । स्वस्य । पूर्वादेर-भिधेयं वाच्यं दिगादि अपेक्षत इत्यपेक्षः ॥ 'दिशः सपत्नी भव दक्षिणस्याः' इत्या-दावपि व्यवस्थाऽस्त्येव । प्रसिद्धत्वात्तु नावधिवाची शब्दः प्रयुज्यते । न च संज्ञात्वान्नि-षेधः आधुनिकसंकेतस्यैव संज्ञात्वात् । आधुनिकत्वं तु व्यवहार एव शरणम् । एवं च विश्वेषां देवानामित्यपि सिद्धम् । वेदे प्रसिद्धत्वादाधुनिकत्वाभावात् । अन्यच्च पूर्वमेवो-क्तम् । गौणत्वं च स्वार्थविशिष्टार्थान्तरसंक्रमः ॥ अभिधा संज्ञा ॥ ननु सर्वादिगणे सर्व-विश्वादीनामेव पाठो न त्वतिसर्वातितदित्यादीनां तत्कथं तेषु सर्वादिकार्यातिप्रसङ्गशङ्केति चेन्न । तदन्तग्रहणस्यात्रेष्टत्वात् । अन्यथा परमसर्वस्मै इत्यादावपि न स्यात् इति चेदु-च्यते । सर्वादिः स्मडित्यत्र सर्वादेरित्यावर्तते । आदिशब्दश्चात्र प्रकारे । प्रकारश्च सादृश्यम् । तच्च सर्वार्थाभिधानसामर्थ्यम् । तथा च सर्वार्थाभिधानसामर्थ्यविशिष्टानामेव गणे पाठस्या-वश्यकतया प्रकारान्तरजुषां च पाठे प्रमाणाभावादेव विशेषे व्यवस्थितानां संज्ञानामुपसर्ज-नानां च सर्वादित्वमेव नास्ति । तेन तेषां सर्वादिकार्यमन्तर्गणकार्यं च न भवति ॥ यत्तु शब्दस्वरूपमात्राश्रयं न तु गणापेक्षं तत्तूपसर्जनत्वेऽपि स्यादेव युष्मदस्मदोस्त्वमहमितिवत् । न चैवं युष्मदि चास्मदि चेत्यत्र त्वन्मदादिप्रसङ्गः । लोकप्रसिद्धार्थवाचकतायामेव तत्प्रसङ्गः न तु शब्दस्वरूपस्य वाच्ये । नन्वेवमसम इत्यादौ कथमतिसर्वं इतिवद्गौणत्वेऽपि तत्कार्यसं-भवः । अब्राह्मण इत्यादौ ब्राह्मणभिन्न इत्यादिपूर्वपदार्थप्राधान्येन विवरणसंभवादिति चेत्सत्यम् । वैयाकरणैर्नञ्समासे उत्तरपदार्थप्राधान्यस्यैवाभ्युपगमात् । तथा हि—आरो-पितत्वं नञर्थः । तथा च-मायामनुष्यः कपटब्राह्मण इतिवत् मिथ्याभूतो ब्राह्मण इत्येव शाब्दबोधः ब्राह्मणभिन्न इत्याद्यर्थस्तु न शाब्दः अत्राचतुर्णामिति निर्देशोऽनुकूलः ॥ ३० ॥

(द्वन्द्वे सर्वादीनां न सर्वकार्यम्) पूर्वपरावराणाम्(क) ॥ ३१ ॥

(सु०) द्वन्द्वे सर्वादीनां न सर्वकार्यम् ॥ द्वन्द्वसमासे सर्वादिसंज्ञा न भवति ॥ समुदायस्यायं निषेधो न त्ववयवानाम्(ख) वर्णाश्च आश्रमाश्च इतरे च ते वर्णाश्रमेतरे । तेषां वर्णाश्रमेतराणाम् । सर्वादिसंज्ञाऽभावान्न सुट् ॥ ३१ ॥

(त०) द्वन्द्वे सर्वादीनामिति ॥ एतन्मूलं तु पूर्वोक्तमेव ॥ वर्णेत्यादि ॥ वर्णाश्च आश्रमाश्च इतरे च ते तथा ॥ ३१ ॥

(क) पूर्वापरावराणामिति । अत्र वर्णाश्रमेतराणामिति पाठो निवेशनीयः, टीकायां तद्दर्शनात् । "वर्णाश्रमेतराणां नो ब्रूहि धर्मानशेषतः" इति याज्ञवल्क्यस्मृतिः ।

(ख) समुदायस्येति । द्वन्द्वे विद्यमानानि यानि सार्वादीनि तानि सर्वनामानि न स्युरिति नार्थः । विभक्तिक्रियाध्याहारे गौरवात् । किन्तु द्वन्द्वे सर्वनामसंज्ञा न भवतीति प्रधानभूतया निषेध्यभवनक्रिययैव द्वन्द्वस्य नाधारत्वान्वयः । द्वन्द्वाधारा सर्वनामसंज्ञा न भवतीत्यक्षरार्थः । द्वन्द्वस्य सर्वनामसंज्ञा नेति फलि-तम् । वर्णाश्रमेतरेत्यादिसमुदायस्यैव द्वन्द्वता । न तु तदवयवानाम् । एवं च वर्णाश्रमेतरेत्यादिसमुदायस्यैव सर्वनामत्वनिषेधः न तु तदवयवानामिति वस्तुस्थितिकथनम् । अस्य विस्तरस्तु मनोरमादौ द्रष्टव्यः ।

(वा जसी) वर्णाश्रमेतरे–वर्णाश्रमेतराः ॥ ३२ ॥

(सु०) **वा जसी** ॥ द्वन्द्वे उक्ता संज्ञा वा स्याज्जसीति ई आदेशे कर्तव्ये ॥ ३२ ॥

(तृतीयासमासे तृतीयासमासार्थवाक्येऽपि च न)

मासपूर्वाय । मासेन पूर्वाय (क) ॥ ३३ ॥

(सु०) **तृतीयासमासे तृतीयासमासार्थवाक्येऽपि च न** ॥ तृतीयातत्पुरुषसमासे तृतीयासमासोऽर्थः प्रयोजनं यस्य तत् तृतीयासमासार्थं तृतीयासमासार्थं च तद्वाक्यं च तृतीयासमासार्थवाक्यं तस्मिन् तृतीयासमासार्थवाक्येऽपि च सर्वादिसंज्ञा न भवति ॥ मासेन पूर्वः मासपूर्वस्तस्मै मासपूर्वाय देहि । तृतीयासमासेऽत्र सर्वादित्वाभावान्न स्मट् ॥ ३३ ॥

(त०) तृतीयेत्यादि ॥ व्यवस्थितविभाषाश्रयणात् अत्र निषेधः । शेषं देववत् ॥ अथ 'कथं द्वयेषामपि मेदिनीभृताम्' इति माघः ॥ उच्यते । द्वयमिच्छन्तीति द्वयेषः तेषामिति क्विबन्तस्येच्छते रूपम् ॥ ३३ ॥

(प्रथमचरमतयडयडल्पार्द्धकतिपयनेमानां जसी वा)

प्रथमे–प्रथमाः । चरमे–चरमाः ॥ तयडयटौ प्रत्ययौ । ततस्तदन्ताः शब्दा ग्राह्याः । द्वितये–द्वितयाः । द्वये–द्वयाः । शेषं देववत् ॥ नेमे–नेमाः । शेषं सर्ववत्(ख) ॥ ३४ ॥

(सु०) **प्रथमचरमतयडयडल्पार्द्धकतिपयनेमानां जसी वा** ॥ एतेषां सर्वादिसंज्ञा वा स्यात् जसी इतीत्वे कर्तव्ये । नेमशब्दस्य नित्यं प्राप्ते अन्येषामप्राप्ते चायमारम्भः ॥ तयडयटौ प्रत्ययौ । केवलयोः संज्ञायाः प्रयोजनाभावात् तयडयडन्ता द्वितयद्वयादिका ग्राह्याः । 'संख्याया अवयवे' इति तयडयटौ । द्वाववयवौ यस्य सः द्वितयः द्वयः॥

(तीयस्य ङित्सु वा सर्ववद्रूपम्) द्वितीयस्मै–द्वितीयाय । द्वितीयस्मात्–द्वितीयात् । द्वितीयस्मिन्–द्वितीये ॥ एवं तृतीयः ॥ उभशब्दो नित्यं द्विवचनान्तः । उभौ । उभौ । उभाभ्याम् । उभाभ्याम् । उभाभ्याम् । उभयोः । उभयोः ॥ उभयशब्दस्य द्विवचनं नास्तीत्येके । अस्तीत्यन्ये । उभयः उभये ॥ निर्जरः ॥ ३५ ॥

(क) **मासपूर्वायेति** । मासेन पूर्व इति विग्रहे । हेतौ तृतीया । मासात्पूर्वंभावीत्यर्थः । तृतीयासमासार्थवाक्योदाहरणमाह—**मासेन पूर्वायेति** ।

(ख नेमशब्दस्य जसि सर्वनामसंज्ञा गणे पाठान्नित्या प्राप्ता । तद्विकल्पोऽत्र विधीयते । नेमशब्दव्यतिरिक्तानां प्रथमादिशब्दानां तु गणे पाठाभावात् अप्राप्तैव सर्वनामसंज्ञा जसि विकल्पेन विधीयते । अतो नेमशब्दव्यतिरिक्तानां प्रथमादिशब्दानां जसोऽन्यत्र न सर्वनामकार्य्यमित्याह—**शेषं देववदिति । तत इति** । तस्मात्प्रत्ययाद्धेतोः । प्रत्ययग्रहणपरिभाषया तदन्ताः तयडयडन्ताः ग्राह्या इत्यर्थः । **द्वितये द्वितया इति** । द्वाववयवावस्येत्यर्थे तयट् । यद्यप्यवयवसमुदायः अवयवी तयडर्थः । तस्य च एकत्वादेकवचनमेव युक्तम् । तथापि यदा उद्भूतावयवभेदः समुदायस्तयडर्थः, उद्भूतत्वं च विवक्षितसंख्याकत्वं तदा अवयवबहुत्वाभिप्रायम्, अवयविनः अवयवाभेदाभिप्रायं वा बहुवचनमिति न दोषः । **शेषं सर्ववदिति** । नेमशब्दस्य सर्वादिगणे पाठादिति भावः ।

(मु०) **तीयस्य ङित्सु वा सर्ववद्रूपम्** ॥ तीयप्रत्ययान्तस्य वा सर्वशब्दतुल्यं रूपं भवति ङेङसिङस्ङिषु परतः । द्वित्रिभ्याम् इति तीयः । अर्थवद्ग्रहणान्नेह । पटुजातीयायेत्यत्र प्रकारे जातीयः इति जातीयः ॥ उभशब्दस्य आख्यातान्ययसर्वादिः इत्यकार्थः सर्वादौ पाठः । द्विवचनपरत्वाभावे तु उभशब्दान्नित्यमयट् भवतीति न कप्रत्ययादिष्टसिद्धिः ॥ उभयशब्दस्य द्विवचनान्तानभिधानादिति कैयटः ॥ उभयशब्दस्य द्विवचनमस्ति अनभिधाने प्रमाणाभावादिति हरदत्तः ॥ उभयशब्दस्यायट्प्रत्ययान्तत्वात् प्रथमचरम इति विकल्पे प्राप्ते सर्वादौ पाठसामर्थ्यान्नित्यं संज्ञा भवति विभक्तिनिरपेक्षत्वेनान्तरङ्गत्वाच्च । अयमर्थः । उभयशब्दे प्रथमचरमेति विकल्पस्य जसपेक्षया बहिरङ्गत्वं सर्वादिगणपाठसिद्धनित्यसंज्ञायास्तु विभक्त्यपेक्षारहितत्वेन अन्तरङ्गत्वम् । ततः अन्तरङ्गबहिरङ्गयोर्मध्येऽन्तरङ्गो विधिर्बलीयान् इति न्यायादत्र नित्यैव संज्ञा स्यान्न तु विकल्प इति(क) ॥ निष्क्रान्तो जराया इति । 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' इति तत्पुरुषः । अन्यार्थं इति ह्रस्वः । निर्जरः । 'अमरा निर्जरा देवाः' इत्यमरः ॥ ३४ ॥

(त०) उभये इति अयजन्तत्वेऽपि न जसि विकल्पः व्यवस्थितत्वात् ॥ ३५ ॥

(जरायाः स्वरादौ जरस् वा वक्तव्यः) तदन्तविधिरत्र ॥ षष्ठीनिर्दिष्टस्यादेशस्तदन्तस्य ज्ञेयः ॥ गुरुः शिच्च सर्वस्य ॥ निर्दिश्यमानस्यादेशा भवन्ति ॥ एकदेशविकृतमनन्यवत्(ख) ॥ निर्जरसौ निर्जरौ । निर्जरसः-निर्जराः । पक्षे हसादौ च देववत ॥ ३६ ॥

(मु०) **जरायाः स्वरादौ जरस् वा वक्तव्यः** ॥ जराशब्दस्य वा जरस् भवति स्वरादौ विभक्तौ परतः । तदन्तविधिरत्र जराया इत्यस्य नाम्नो विशेषणत्वात् । षष्ठीनिर्दिष्टस्येति परिभाषया निर्जरशब्दस्यान्तस्य स्थाने जरस् प्राप्तोऽत आह ॥ **गुरुः शिच्चेति** ।। अनया परिभाषया सोपपदस्य सर्वस्य स्थाने जरसादेशे प्राप्ते सत्याह ॥ **निर्दिश्यमानस्यादेशा भवन्ति** ॥ निर्दिश्यते इति निर्दिश्यमान उच्चार्यमाणस्तस्य स्थाने आदेशाः स्युः । एवमपि निर्दिश्यमानजराशब्दस्य जरसादेशो भवति न त्वन्यत्रेत्यत आह ॥ **एकदेशेति** ॥ एकदेशेन विकृतमेकदेशविकृतं शब्दरूपम् अन्येन तुल्यमित्यन्यवन्न भवति । अनया परिभषाया निर्जर इत्यत्र जरोऽपि जरावत् ज्ञेयः । जरसादेशाभावपक्षे

(क) ननु प्रथमचरमेति विकल्पस्य परत्वाद् उभयशब्दे कथं नित्या सर्वादिसंज्ञा ? इत्यत आह—**अन्तरङ्गत्वमिति** । प्रथमचरमेति जसि विकल्पविधिः जसपेक्षत्वेन विभक्त्यपेक्षत्वाद् बहिरङ्गः । सर्वादिगणपाठसिद्धनित्यसंज्ञाविधिस्तु तदनपेक्षत्वाद् अन्तरङ्गः, अल्पापेक्षमन्तरङ्गमिति न्यायात् । अतोऽत्र परमपि प्रथमचरमेति विकल्पं बाधित्वा नित्यैव सर्वादिसंज्ञा भवति परादन्तरङ्गस्य बलीयस्त्वादिति केचित् ।

(ख) ननु जराशब्दस्य विधीयमानो जरसादेशः कथं निर्जरशब्दस्य भवेदित्यत आह—**तदन्त इति** । तदुक्तं कौमुद्याम्—"पदाङ्गाधिकारे तस्य च तदन्तस्य च" इति । अयमर्थः, पदाधिकारे अङ्गाधिकारे च यस्य यद्विहितं तत् तस्य तदन्तस्य च भवतीति । **निर्दिश्यमानस्यादेशा भवन्तीति** । प्रत्यक्षनिर्दिश्यमानस्येत्यर्थः । अनया परिभाषया जराशब्दस्यैव जरस् । जराशब्द एव अत्र स्थानी प्रत्यक्षनिर्दिष्टः । जराशब्दान्तस्य तु निर्देशस्तदन्तविधिलभ्यत्वादानुमानिक इति भावः । ननु निर्जरशब्दस्य जराशब्दान्तत्वाभावात् कथमिह जरसादेश इत्यत आह—**एकदेशेति** । "छिन्नेऽपि पुच्छे श्वा श्वैव न चाश्वो न च गर्दभः" इति न्यायादिति भावः ।

हसादौ च देववद्रूपम् ॥ ३६ ॥

(त०) जराया इत्यादि ॥ तदन्त इत्यादि ॥ स अन्ते यस्य तस्य विधिरित्यर्थः ॥ तथा च जराशब्दस्योक्तो जरस् निर्जरशब्दस्यापि भवतीत्याशयः । षष्ठीनिर्दिष्टस्यादेशिन इति भावः ॥ एतदपवादमाह-गुरुः शिच्चेति ॥ अनेकाक्षर आदेशो गुरुः । तथा च निर्जरस्य कृत्स्नस्य प्राप्तिरत आह—निर्दिश्यमानस्येत्यादि ॥ एवमपि जराशब्दनिर्देशादत्रादन्तत्वात्कथं प्राप्तिरित्यत आह—एकदेशेत्यादि । अन्यैः तुल्यमन्यवत् न अन्यवत् अनन्यवत् । नहि कर्णे पुच्छे वा छिन्ने श्वा अश्वो भवति न वा गर्दभः किंतु श्वैव ॥ स्वरादौ विभक्तावेव जरस् बोध्यः नान्यत्र । तेन जराया इदं जारमित्यत्र नातिप्रसङ्गः ॥ पक्षे इत्यादि ॥ पक्षे सर्वत्र देववत् । हसादौ देववदेवेति बोध्यम् ॥ ३६ ॥

(संख्याविसायपूर्वस्याह्नस्याहन् वा ङौ) ॥ ३७ ॥

(छ०) संख्याविसायपूर्वस्याह्नस्याहन् वा ङौ ॥ संख्याविसायाः पूर्वं यस्य स संख्याविसायपूर्वस्तस्य संख्यादिपूर्वस्याह्नस्य स्थानेऽहन् आदेशो वा स्यात् ॥ ३७ ॥

(त०) संख्याविसायेत्यादि ॥ संख्या च विश्च सायश्च संख्याविसायाः ते पूर्वे यस्य स तथेत्यर्थः ॥ ३७ ॥

वेङ्योः ॥ अन्नन्तस्योपधाया लोपो वा भवति ईङीत्येतयोः परयोः ॥ मकारवकारान्तसंयोगादुत्तरस्य न ॥ द्व्यह्नि–द्व्यहनि–द्व्यह्ने । विगतमहर्व्यह्नः । व्यह्नि-व्यहनि व्यह्ने । अह्नः सायः सायाह्नः । सायाह्नि सायाहनि—सायाह्ने ॥३८॥

(मु०) वेङ्योः ॥ ईश्च ङिश्च ईङी तयोरीङ्योः॥ ई इति 'ईमौ' इति सूत्रेण कृतोऽत्र गृह्यते न तु 'जश्शसोः शिः' इति शिः । नापि ईप् । निरनुबन्धकग्रहणे न सानुबन्धकस्येत्युक्तत्वात्(क) । अल्लोप इति नित्ये प्राप्ते विकल्पोऽयम् । अन्नन्तस्य नाम्न उपधाया लोपो वा स्यात् ईङ्योः परतः । मकारवकारौ अन्ते यस्य संयोगस्य स मकारवकारान्तः मकारवकारान्तश्चासौ संयोगश्च मकारवकारान्तसंयोगस्तस्मात्परस्यान उपधाया लोपो न भवतीत्यर्थः । यथा बहुयज्वनी चर्मणी इत्यादि ॥ द्वयोरह्नोर्भव इति तद्धितार्थे द्विगुसमासोऽयम् । भवार्थे इकप्रत्ययस्तस्य लुक् च । ततः समासान्तटप्रत्ययः । "नो वा" इत्युपधालोपः । द्व्यह्नः । विगतमहरिति तत्पुरुषः । व्यह्नः । अह्नः सायम् इति क्वचित् । 'अमाद्यन्तस्य' इति परनिपातः । स्यतेर्घञ्प्रत्यये युकि च कृते सति सायशब्दोऽवसानवाची साधितः । अहन्नादेशे उपधालोपे द्व्यह्नि । लोपाभावे द्व्यहनि । अहन्नभावे द्व्यह्ने ॥ ३८ ॥

(त०) वेङ्योरिति ॥ वा ईङ्योरिति छेदः । ईश्च ङिश्च ईङी तयोः ईङ्योः ॥ ई इति 'ईमौ' इत्यनेन कृतो गृह्यते न तु जश्शसोः शिरिति सानुबन्धकनिरनुबन्धकयोर्निरनुबन्धकस्यैव ग्रहणमिति न्यायात् । अत एव ईपोऽपि न ग्रहणम् । अत वा ङ्योरित्येव छेदः । द्विवचननिर्देशेनैव ईकारलाभात् ॥ अह्नः साय इति षोऽन्तकर्मणीत्यस्माद्घञि कृते अवसानवचनः सायशब्दः न तु मान्तमव्ययम् । मलोपस्यादर्शनात् ॥ ३८ ॥

(क) 'शिः' ईप् प्रत्ययश्च सानुबन्धकः । अतो नानयोर्ग्रहणम् । 'ईमौ' इति सूत्रेण कृतस्य ई इत्येतस्य तु निरनुबन्धकत्वादत्र तस्यैव ग्रहणमिति भावः ।

(पाददन्तनासिकामासहृदयनिशाअसृग्यूषदोषयकृच्छकृदुदकआस्यमांसपृतनासानूनाम्) पद् दत् नस् मास् हृद् निश् असृक् यूषन् दोषन् यकन् शकन् उदन् आसन् मांस् पृत् स्नु एते आदेशा भवन्ति शसादौ वा । पदः । पदा, पद्भ्याम् , पद्भिः । दतः । दता, दद्भ्याम् , दद्भिः ॥ मासः । मासा, माभ्याम , मासाभ्याम् (क) ॥३९॥

(सु०) पाद्दन्तनासिकामासहृदयनिशासृग्यूषदोषयकृत्शकृत् उदकास्यमांसपृतनासानूनाम् ॥ एते पदादय आदेशा वा स्युः शसादौ ॥ माभ्यामित्यत्र सस्य विसर्गे 'आद्वे' इति विसर्गलोपश् । यूषो मण्डः । 'मुद्गामलकयूषस्तु भेदी दीपनपाचनः' इति दर्शनात् ॥ ३९ ॥

(त०) शसादौ वेति ॥ आदिशब्दः प्रकारे इत्यभिप्रेत्याह-पदादय इति ॥ तेन 'पद्भ्यां शुद्रोऽजायत' इति 'स्वान्तं हृन्मानसं मनः' इति च संगच्छते ॥ ३९ ॥

अल्लोपः स्वरेऽम्वयुक्ताच्छसादौ ॥ अनन्तस्योपधाया लोपो भवति शसादौ स्वरे परे ॥ मकारवकारान्तसंयोगादुत्तरस्य न ॥ पूष्णः । पूष्णा ४०

(सु०) अल्लोपः स्वरेऽम्वयुक्ताच्छसादौ ॥ नोपधाया इत्यनुवर्तते । नान्तस्य नाम्न उपधाया अतो लोपः स्यात् शसादौ स्वरे ॥ नान्तस्येति किम् । भवतः । अत इति किम् । दण्डिनः ॥ तपर इति किम् । प्रतानयतीति प्रतान । क्विप प्रत्ययः । तान् प्रतानः । स्वरे किम् । राजभ्याम ॥ शसादौ किम् । मघोन इदं माघवनम् । देवतेदमर्थे इत्यण् ॥ म् च वश्च म्वौ । युक्तः कर्मणि क्तः । म्वाभ्यां युक्तो म्वयुक्तः न म्वयुक्तोऽम्वयुक्तस्तस्मादम्वयुक्तात् । म्वाभ्यां युक्ताद्वर्णात्परस्यातो लोपो न भवतीत्यर्थः ॥ यथा । यज्वनः । ब्रह्मणः ॥ म्वेति किम् । तक्ष्णः । युक्तादिति किम् । अर्यम्णः ॥ पूनयोगे णत्वे कृते ष्ण इत्यक्षरं भवति । पूष्णः ॥ ४० ॥

(त०) अल्लोपः स्वरेऽम्वयुक्ताच्छसादाविति ॥ अत्रादिति निर्विभक्तिको निर्देशः । नोपधाया इत्यनुवर्तते । तथा च नान्तस्योपधाया अतो लोपः स्यादित्यर्थः ॥ म् च वश्च म्वौ म्वाभ्यां युक्तः वर्णः म्वयुक्तः न म्वयुक्तः अम्वयुक्तः तस्मात् । म्वाभ्यां युक्ताद्वर्णान्नेत्यर्थः ॥ प्रसज्यप्रतिषेधः पर्युदासो वा ॥ तथा च म्वयुक्तभिन्नाद्वर्णात्परस्यातो लोप इत्यर्थः ॥ उपधाया इति किम् । तपस्विनः ॥ नान्तस्य किम् । महतः । अतः किम् । दण्डिनः ॥ स्वरे किम् । राजभ्याम् ॥ तपरः किम् । प्रतानयतीति प्रतान् तस्य शसि प्रतान इत्यत्र लोपो न । केवलस्य क्विपि नान्तत्वाभावात् ण्यन्तत्वमाश्रित्योदाहृतमिति भावः ॥ म्वेति किम् । तक्ष्णः ॥ युक्तात्किम् । अर्यम्णः ॥ पूष्णा इति ॥ यूषो मण्डः । 'मुद्गामलकयूषस्तु वेदी दीपनपाचनः' इति दर्शनात् ॥ ४० ॥

नाम्नो नो लोपशघौ ॥ नान्तस्य नाम्नो नस्य लोपश् भवति

(क) सारस्वते तु—मासस्याल्लोपो वा । मासशब्दस्याकारस्य लोपो वा भवति सर्वासु विभक्तिषु परतः । इति विशेषः । तेन माः—मासः, मासौ—मासौ । मासः—मासाः । मासम्-मासम् । मासौ-मासौ । मासः—मासान् । इति सिध्यति ।

रसे पदान्ते चाधौ ॥ यूषभ्याम् , यूषभिः ॥ नस्य लोपशि न विभक्तिकार्यम् ॥ पक्षे पञ्चसु देववत् ॥ पदादयः पृथक् शब्दा इत्येके ॥ सोमपाः, सोमपौ, सोमपाः । सोमपाम् ॥ ४१ ॥

(छ०) नाम्नो नो लोपशधौ ॥ न इत्यनेन नाम विशिष्यते । विशेषणत्वात्तद-न्तविधिर्भवति । नान्तस्य नाम्नोऽन्तस्य लोपश् स्याद्रसे पदान्ते चाधौ ॥ नाम्न इति किम् । अहन् ॥ नाम्न इत्यनुवर्तमाने पुनर्नामग्रहणं नामसंज्ञाप्रवृत्तिकाले स्थितस्य नका-रस्य लोपशार्थम् । तेनागमादेशयोर्नकारस्य लोपश् न भवति (क) । यथा । पचन् । भ-वन् । श्वन् । सुहिन् । प्रशान् ॥ यूषभ्याम् । अत्र नस्य लोपशि कृते अद्भि इत्यात्वे प्राप्ते उच्यते—नस्य लोपशि न विभक्तिकार्यमिति । विभक्तौ कार्यं विभक्तेर्वा कार्य मिति समासः । पथिष्वित्यादौ षत्वं तु न विभक्तिकार्यम् । सैषादिति ज्ञापकात् (ख) ॥ आदेशाभावपक्षे सर्वाणि रूपाणि देववत् । आदेशपक्षे पञ्च वचनानि देववत् । पदादयो नादे-शाः किन्तु पृथक्शब्दाः इति एके आचार्या वदन्ति (ग) । तेन 'पद्दङ्घ्रिश्चरणोऽस्त्रियाम्' । 'स्वान्तं हृन्मानसं मनः' इत्यादि संगच्छते ॥ इत्यदन्ताः ॥ सोमं पिबतीति सोमपाः । पा पाने इत्यस्मात् आतो ड इति डप्रत्ययं बाधित्वा क्विप् ॥ ४१ ॥

(त०) नाम्नो नो लोपशधाविति ॥ अत्र न इति षष्ठ्यन्तं नाम्नो विशेषणं अतस्तत्र तदन्तलाभ इत्यभिप्रेत्याह ॥ नान्तस्येति ॥ ननु राजेत्यत्र परत्वात्प्रथमं नलो-पशिति चेन्न । प्रायशो इत्यतामिति वचनात्क्वचित्पूर्वेणापि परबाधः आ साविति ज्ञापकाच्च । अन्यथा अधावित्येवावक्ष्यत् ॥ ननु यूषभ्याम् , यूषभिरित्यादौ अद्भिभ्य इत्यादिना-त्वाऽऽदिकमस्त्वित्यत आह—नस्य लोपशि न विभक्तिकार्यमिति ॥ विभक्तौ कार्यं विभक्तेर्वा कार्यमिति समासः । तेन दण्डिष्वित्यादौ नलोपे सति षत्वं भवत्येव । सैषा-दिति ज्ञापकेन तस्य विभक्तिकार्यत्वाभावात् ।' अत्र नाम्न इत्यनुवर्तमाने पुनर्नामग्रहणा-न्नामसंज्ञाप्रवृत्तिकाले नान्तत्वं ग्राह्यम् । तेन पचन्नित्यादौ नलोपो न ॥ ४१ ॥

आतो धातोर्लोपः ॥ धातुसम्बन्धिन आकारस्य लोपो भवति शसादौ स्वरे परे ॥ सोमपः । सोमपा, सोमपाभ्यामित्यादि ॥ एवं कीलाल-पाशङ्खध्मामधुपाविश्वपाप्रभृतयः ॥ धातोः किम् । हाहान् । हाहा । हाहै । हाहाः । हाहाः । हाहौः । हाहि ॥ हरिः ॥ ४२ ॥

(क) ननु नाम्न इति अनुवर्तनेनैव कार्य्यसिद्धौ सत्यां कथं पुनरत्र नामग्रहणमित्याह—नाम्न इति । नामसंज्ञाप्रवृत्तिकाले इति । 'अविभक्तिनाम' इति सूत्रप्रतिपाद्यमानायाः नामसंज्ञायाः प्रवृ-त्तिकालावच्छिन्नस्य तच्छब्दघटकीभूतस्य नकारस्य लोपश् भवतीत्यर्थः । पचन् भवन्नित्यादौ तु नाम-संज्ञाप्रवृत्तिकालावच्छिन्ननकारप्रतियोगिकत्वाभावान्न नस्य लोपशिति भावः ।

(ख) ननु लोपशि न विभक्तिकार्य्यमिति पथिष्वित्यादौ नकारस्य लोपश् करणानन्तरं कथं किला-दिति सुप्सकारस्य षकार इत्याशङ्का । अस्या उत्तरम्—सैषादिति ज्ञापकेन नस्य विभक्तिकार्य्यत्वाभा-वात् षत्वं भवत्येवेति ।

(ग) आचार्य्याः एके । इति अनुभूतिस्वरूपादयः । सारस्वतेऽप्येवं कुत्रचित्पुस्तके दृश्यते । संगच्छते इति तेन बाध्यत एव वक्तव्यम् ।

(सु०) **आतो धातोर्लोपः** । आकारान्तस्य धातोर्लोपः स्याच्छसादौ स्वरे ॥ "शासृशानकमन्तानां तृजन्तानां तथैव च । क्विबन्तानां च शब्दानां धातुत्वं नोपहन्यते ॥" प्रातिपदिकसंज्ञयेत्यर्थः ॥ अतोऽस्य द्वे संज्ञे स्तः । षष्ठीनिर्दिष्टस्येत्यन्त्यलोपः ॥ धातोः किम् । हाहान् ॥ गन्धर्वविशेषवाचकमव्युत्पन्नं प्रातिपदिकमिदम् । 'हाहा हूहूश्चैवमाद्या-गन्धर्वाः' इत्यमरः ॥ टा सवर्णे दीर्घः । हाहा ॥ ङे ऐत्वं हाहै ॥ ङसिङसोर्दीर्घः हाहाः । हाहाः ॥ ओसि औत्वं हाहौः । ङौ एत्वं हाहे ॥ शेषं सोमपावत् । आत इति योगवि-भागादधातोरप्याकारलोपः क्वचित् । क्त्वः(क) ॥ इत्याद्न्ताः ॥ ४२ ॥

(त०) **आतो धातोर्लोपः** इति ॥ धातोः किम् । खट्वा पश्य ॥ न च नामत्वधा-तुत्वयोर्विरोधात्कथं धातुत्वमिति वाच्यम् । क्विबन्ता विजन्ता विडन्ताश्च धातुत्वं न जहति नामत्वं प्रतिपादयन्तीति वचनादविरोधात् ॥ ननु अस्य धातोरिति किमिति न सूत्रित मिति चेन्न । अपेण कुलेनेत्यादावपि परत्वादकारलोपापत्तेर्दुर्वारत्वात् । तपरकरणं तु व्य-र्थमेव ॥ अत्रात इति योगविभागादधातोरप्यलोपः क्वचित् तेन क्त्वः ॥ हाहानिति ॥ गन्धर्वविशेषवाचकमव्युत्पन्नं नामेदम् । केचित्तु जहातीति हाहा इति क्रियाशब्दं वदन्तः सोमपावद्रूपमाहुः ॥ ४२ ॥

औ यू ॥ इकारान्तादुकारान्ताच्च पर औ यू आपद्यते ई ऊ भवतः ॥ हरी ४३

(सु०) **औ यू** ॥ इदुद्भ्यां पर औ यू स्याताम् । ईदूतोर्दीर्घयोर्ग्रहणे ई ऊ इति पद-द्वयं बोध्यम् । ह्रस्वग्रहणपक्षे तु यु इत्यत्रेतरेतरद्वन्द्वः ॥ इदुद्भ्यामिति किम् । देवौ ॥ तपरत्वमिति किम् । वातप्रम्यौ । हूहौ ॥ ४३ ॥

(त०) **औ यू** इति ॥ अत्र इदुद्भ्यामित्यनुवर्तते । दीर्घयोर्ग्रहणे ई ऊ इति छेदः ह्रस्वयोर्ग्रहणे तु इतरेतरद्वन्द्वः ॥ ४३ ॥

एओ जसि ॥ इकारान्तस्योकारान्तस्य च जसि परे एकार ओकारश्च भवति ॥ हरयः ॥ ४४ ॥

(सु०) **एओ जसि** ॥ इदुद्भ्यामित्यनुवर्तते । तच्च षष्ठ्या विपरिणम्यते । तच्च नाम्नो विशेषणम् । विशेषणे हि तदन्तविधिः । इदुदन्तस्य नाम्न एओ स्यातां जसि परतः ॥ इदुदन्तस्येति किम् । रायः । ग्लावः ॥ तपरत्वं किम् । वातप्रम्यः हूहः ॥४४॥

(त०) **एओ** इति ॥ अत्रेदुद्भ्यामित्यनुवृत्तस्यापि विभक्तिविपरिणामेन व्याख्या-नमित्यभिप्रेत्याह--इदुदन्तस्येत्यादि ॥ इदुदन्तस्य किम् । रामाः ॥ गुणो जसीति तु न सूत्रितं लाघवे विशेषाभावात् । जसि गुण इत्युक्ते स्वर्द्धमात्रालाघवेऽपि प्रतिपत्तिलाघ-वार्थमिदमुक्तम् ॥ ४४ ॥

धौ ॥ इकारान्तस्योकारान्तस्य च धौ परे एकार ओकारश्च भवति ॥ हे हरे । हरिम् , हरी, हरीन् ॥ ४५ ॥

(क) अत्र कश्चित् । क्त्वः इनः इत्यादौ तत्राधर्मेण पुनरुच्चार्याद्धातोरातो लोपः क्वचिदित्यर्थ-कल्पनाद् आलोपः इति । धौ तपरस्य तावन्मात्रग्राहकत्वात्सोमपेन कुलेनेत्यादौ अप्रसङ्गः । वस्तु-तस्तु द्विमात्रोच्चारणसमर्थादेव सवर्णानुपस्थितौ तदन्तमेव सर्वविधिभ्यो लोपविधिर्बलवानिति धिलोपे पश्चात्स्यलोपे प्रत्ययलक्षणमिति तदाश्रयकार्यम् ।

(सु०) धौ ॥ इदुदन्तस्य एओ भवतः धौ परे ॥ कृताकृतप्रसङ्गित्वेन नित्यत्वाच्च पूर्वमेत्वमोत्वं च ॥ ततः 'समानाद्धेः' इति धिलोपः ॥ इदुदन्तस्य किम् । हे ग्लौः ॥ तपरत्वं किम् । हे वातप्रमीः । हे हूहूः ॥ ४९ ॥

(त०) धाविति ॥ अत्र एओ धिजसोरिति जस्भ्योरिति वा एकयोगो न कृतो यथाक्रमं स्थानिनोरादेशविधानशङ्कानिरासाय ॥ यत्तु योगविभागो विषयसप्तमीलक्षणार्थ इति तन्न विषये सप्तम्या अविधानादित्युक्तं तच्चिन्त्यम् । विषये सप्तम्या बहुस्थले दर्शनात् ॥ किं च यत्र प्रत्ययोत्पत्तेः पूर्वमेव कार्यं विधीयते तत्रैव विषयसप्तमीति व्यवहारः प्राचाम् ॥ यथाऽर्धधातुके 'ब्रूञो वच्' 'चक्षिङः ख्याञादयः' एवं वदता त्वया स्वयमेव विषयसप्तम्याः स्वीकृतत्वात् ॥ ४९ ॥

टा नाऽस्त्रियाम् ॥ इकारान्तादुकारान्ताच्च परष्टा ना भवत्यस्त्रियाम्(क) ॥ हरिणा हरिभ्याम्, हरिभिः ॥ ४६ ॥

(सु०) टा नाऽस्त्रियाम् ॥ इदुद्भ्यां परष्टा ना स्यात् । स्त्रीलिङ्गे तु न ॥ किंच पुंसीत्युक्ते तु अदसष्टाप्रत्यये त्यदाद्यत्वे मत्वे च अम टा इति स्थिते इनादेशतः परत्वादन्तरङ्गत्वाच्च 'मादू' इत्युत्वे पुँल्लिङ्गे सिद्धममुनेति । क्लीबे त्वमुनेति न सिद्ध्यति । 'नामिनः स्वरे' इति नुमि कर्तव्ये उत्वस्यासिद्धत्वात् । अतोऽस्त्रियामित्युक्तम् ॥ इदुद्भ्यां किम् । गवा ॥ तपरत्वं किम् । वातप्रम्या । हूहा ॥ ४६ ॥

(त०) टा नाऽस्त्रियामिति ॥ इदुद्भ्यामित्यत्राप्यनुवर्तते । अत्र अस्त्रियामिति नञं प्रश्लिष्य छेदः । नञः प्रश्लेषे च व्याख्यानमेव शरणमिति तु वृद्धाः ॥ ननु पुंसीत्येव किमिति न सूत्रितं लाघवात् । अत्राहुः । अमुना कुलेनेत्यत्र उत्वादन्तरङ्गत्वादिनादेशः स्यादतो नाम्यभावान्नुमभावे रूपसिद्धिः स्यादित्यस्त्रियां ग्रहणसामर्थ्याद् दुर्बलमप्युत्वं प्रवर्त्य नाभावो भवतीत्युक्तं कैश्चित्तन्न, इनादेशत उत्वस्यान्तरङ्गत्वात् । अदसृशब्दमकारान्तात्परवर्णं ह्यपेक्षते उत्वम् । इनादेशस्तु नाम स्यादि अकार टाचतुष्टयापेक्षत्वेन बह्वाश्रयत्वात् बहिरङ्गः ॥ किंच कृतेऽपीनादेशे स्थानिवद्भावेन टात्वमाश्रित्य नाप्रवृत्तेरिति पूर्वपक्षस्योत्तरम् । उत्तरार्थमस्त्रियांग्रहणं सूत्रकृता कृतम् । कथम् मु इति सूत्रान्तरम् । मुशब्दात्परष्टा ना भवति मुशब्दश्चादस एव गृह्यते नान्यस्य पूर्वसूत्रेणैव सिद्धेः । तथा चात्र सूत्रे पुंसीत्यस्यानुवृत्तौ क्लीबे अमुनेति रूपसिद्धिर्न कर्तव्येति उत्वस्यासिद्धत्वात् । अस्त्रिया-

---

(क) अत्र माधवः । अत्र सेनेति निर्देशादस्त्रियामिति प्रश्लिष्टो नञस्तीति मत्वाह—अस्त्रियामिति । किमर्थमिदमुच्यतेऽस्त्रियामिति नापुंसीत्युच्येत । क्लीबेऽपीष्टत्वादमुनेति । नन्वत्र नामिनः स्वरे इति नुमि नाभावेऽपि समानमेवेति नुमेवास्तु । मैवम् । अमति अस्त्रियां ग्रहणेऽमुनेत्यत्रादसष्टाप्रत्यये त्यदाद्यत्वे मत्वे च अमटेति स्थिते परत्वान्नित्यत्वाच्च 'माद्' इत्युत्वं प्राप्नोति । प्रकृतिप्रत्ययाश्रितत्वेनान्तरङ्गत्वादिनादेशश्च तत्र बलीयस्त्वादिनादेश एव स्यात् । यत उक्तम् । परं विदुः पूर्वपरोपपत्तौ परस्य नित्यस्य च नित्यमेव । नित्यान्तरङ्गोपगमेऽन्तरङ्गस्तस्माद्विधिः प्रातिपदो बलीयानिति । अत एव वक्ष्यति-'अद्रि' इत्यात्वं पश्चादुकार इति । तदेवमिनादेशे पत्वे पश्चादुत्वं चामुनेति स्याद् इति कुत्र नुम् स्यात्। कुत्रतराश्च नाभावः । सति पुनरस्त्रियां ग्रहणे क्लीबे नुमा बाधितसकलविषयो नाभावः स्वसामर्थ्यात्तु दुर्बलमप्युत्वं प्रवर्त्य प्रवर्तते । तदेवं क्लीबे प्राक्प्रवृत्त्या जातदुर्बलमुत्वं पुंस्यपि प्रागेव प्रवर्तते ततो नाभावः । अत एव वक्ष्यति, मत्वे उत्वे च कृते टानास्त्रियामिति ।

मित्यनुवृत्तौ तु नपुंसकेऽप्यस्य प्रवृत्तिरिति ॥ अत्रेदं वक्तव्यम् । मु इति सूत्रान्तरकल्पनापेक्षया अच्चियामित्यस्यैव तज्ज्ञापने लाघवात् ॥ इदुद्भ्यां किम् । गवा ॥ तपरत्वं किम् । हूहा ॥ टा किम् । हरिभ्याम् ॥ ४६ ॥

ङिति ॥ इकारान्तस्योकारान्तस्य च ङिति परे एकार ओकारश्च भवति(क) ॥ हरये, हरिभ्याम् , हरिभ्यः ॥४७॥

(सु०) ङिति ॥ इदुदन्तस्य नाम्न एओ स्याताम् । ङ् इत् यस्य स ङित् तस्मिन् ङिति । ङिति स्यादौ ॥ ङिति किम् । हरिभ्याम् ॥ स्यादौ किम् । हरिरिवाचरतीति हरियति । आचारे क्विप् । ततः 'प्रत्ययान्तात्' इति ञियामङ् । हर्या ॥ नाम्नः किम् । नुतः, नुवन्ति (ख) ॥ किंच ङ् चासौ इच्च ङित् तस्मिन् ङिति इति कर्मधारयकरणे इत्संज्ञकङकारादौ प्रत्यये परे इत्यर्थो भवति । तदा नाम्नः स्यादावित्येतयोरनुवृत्तिर्न कर्तव्येति । 'लित्पुषादेः' इत्यादौ ङप्रत्यये तु परत्वादियुवौ । अशिश्रियत्, अदुद्रुवदित्यादि ॥४७॥

(त०) ङितीति ॥ अत्र 'इदुद्भ्याम्' 'एओ जसि' इति चानुवर्तते । तत्र विभक्तिविपरिणामेन व्याख्यानम् ॥ ङ् इद्यस्य स ङित् तस्मिन्ङिति ॥ ङिति किम् । हरिभ्याम् ॥ ङिच्च स्यादिरेव गृह्यते न त्वन्यः ॥ ४७ ॥

ङस्य ॥ एदोद्भ्यामुत्तरस्य ङसिङसोरकारस्य लोपो भवति ॥ हरेः, हर्योः, हरीणाम् ॥ ४८ ॥

(सु०) ङस्य ॥ एदोतोऽत इति सूत्रमनुवर्तते लोपश् इति च । एदोतः परस्य ङस्याकारस्य लोपश् स्यात् । ङकारस्य इत्संज्ञायामकारः परत्वेन लभ्यते ॥ एदोत इति किम् । रायः । ग्लावः ॥ अस्येति किम् । हरये । भानवे ॥ ङस्यातः किम् । हरयः । भानवः ४८

(त०) ङस्येति ॥ ङकारग्रहणेन ङसिङसोर्ग्रहणम् ॥ ४८ ॥

ङेरौ ङित् ॥ इदुद्भ्यामुत्तरस्य ङेरौ भवति स च ङित् ॥ ४९ ॥

(सु०) ङेरौ ङित् ॥ इदुद्भ्यां परस्य सप्तम्येकवचनस्य औः स्यात्स च ङित्संज्ञकः ॥ ननु 'ङेरौ' इत्येव वक्तव्यं किं ङिच्छब्देन । उच्यते । ङिद्ग्रहणम् 'ऋतो ङ डः' इत्यादौ ङिदित्यस्यानुवृत्त्यर्थम् ॥ इदुद्भ्यां किम् । रायि । गवि ॥ तपरत्वं किम् । वातप्रमी । हूहि ॥ ४९ ॥

(त०) ङेरौ ङिदिति ॥ इदुद्भ्यां किम् । गवि ॥ तपरत्वं किम् । वातप्रमी ॥ ङेः किम् । हरिभ्याम् ॥ अमादावित्यादिनिर्देशेन च औ ङिदित्ययं नादेशः । अत एव ङेरित्यनेन चतुर्थ्येकवचनस्य न ग्रहः । न च ङिति टेरित्यत्र ङित्संज्ञकस्यैव ग्रहणं न तु यौगिकस्य कृत्रिमत्वात् । तथा च सेर्डाऽधेरित्यत्र डकारस्य ङित्संज्ञा न प्रयोजनाभावादिति चेत्सत्यम् ञियामिति निर्देशेन 'कृत्रिमाकृत्रिमयोः कृत्रिमस्यैव ग्रहणम् इत्यस्याप्रवृत्तेः । तथा हि । स्त्यायतेः ड्रटि स्त्रीति रूपं तच्चैवं न स्यात् ॥ ङेरौविरित्येव किमिति न सूत्रितमिति चेन्न उत्तरार्थं ङित्करणम् । ऋतो ङ डरित्यादावावश्यकत्वात् । अथ तत्रापि ङो डुरि-

---

(क) ङितीति सूत्रस्य वृत्तौ स्यादावित्यधिकं ङितीत्यस्य विशेषणम् । टीकायां तस्य व्याख्यादर्शनात् । स्यादाविति विशेषणस्याभावे 'हर्या' इत्यादौ दोषापत्तेः ।

(ख) नुतः, नुवन्तीत्यादौ इदुदन्तस्य नाम्नो विशेषणात् नौकारप्रसङ्गः ।

त्येव किमिति न कृतमिति वाच्यम् । ङावित्यत्र घेरित्यनुवर्त्तते । तथा च ङरि कृते ङरित्येवात्रानुवर्त्तते । तथा च ऋकारस्य ङरि कृते टिलोपे पितरीत्यादि रूपं न सिद्ध्येत् । अप् कर्तरीति लिङ्गेन तत्र टिलोपः स्यादिति न वाच्यम् । पञ्चस्विति सूत्रेऽपि ङरोऽनुवृत्तौ ज्ञापकाभावात् टिलोपे पितरावित्यादिरूपं न सिद्ध्येत् इति ङिदित्युक्तम् ॥ यदि तु ङिति प्रत्यये लोप इति व्याख्यायते तदा न कर्तव्यं भवति ॥ ४९ ॥

ङिति टेः ॥ ङिति परे टेर्लोपो भवति(क) ॥ हरौ, हर्योः, हरिषु ॥ एवमग्नि–गिरि–रवि–कविमुन्यादयः ॥ उकारान्ता विष्णु–वायु–भानु–गुर्वादयोऽप्येवं ज्ञेयाः ॥ भानुः, भानू, भानवः ॥ ५० ॥

(सु०) **ङिति टेः** ॥ नाम्नष्टेर्लोपः स्यात् ङिति परतः ॥ अव्ययानां टेर्लोपश्च । तद्धितस्य ये स्वरे च । तथा बहिर्भवो बाह्यः । पुनः पुनरेव पौनःपुन्यम् । ण्यः ॥ कुतः कुत आगतः कौतस्कुतः । कारकादित्यण् ॥ ५० ॥

(त०) **ङिति टेरिति** ॥ ङ् इत् यस्य स ङित् तस्मिन् ङिति ॥ अत्राहुः । अत्र वाक्यार्थत्रयम् । नाम्नो लोपो भवति ङिति परे इत्येकम् । तथा च विंशतेः पूरण इति वाक्ये अप्रत्यये 'यस्य लोपः' इतीकारलोपेऽतो लोपे विंश इति सिध्यति । ततः टेः । नाम्नः तथा टेर्लोपो भवति यकारे स्वरे चेति द्वितीयम् । तथा च लघिष्ठः बहिर्भवो बाह्य इत्यादिसिद्धिः । ततः टेर्लोपो भवति ङितीति तृतीयम् । अत्र तद्धिते यस्वरे इति न सम्बध्यते विश्लेपावधावित्यादिनिर्देशात् । तत्र ङेरौ ङिदिति न तद्धित इति । अत्रेदं संप्रधार्यम् । तृतीयवाक्ये नाम्न इति संबन्धे स्त्रौ तितउरित्यादि न सिध्यति । तथा हि । स्त्यैधातोर्डे टि कृते टिलोपावसरे नामत्वाभावात् । तितउरित्यत्रापि तनोते र्डउः सवच्चेति डउप्रत्यये टिलोपावसरे धातुत्वानपायेन नामत्वाभावात् । तस्मादत्र न नाम न संबध्यते । किंतु ङितीति परसप्तम्या पूर्वमात्रमाक्षिप्यते तथा च सर्वत्र निर्वाह इति दिक् ॥ ५० ॥

सेऽर्डाधेः ॥ सखिशब्दात्तदन्ताच्च परस्य सेरधेर्डा भवति(ख) ॥ सखा ॥ ५१ ॥

(सु०) **से र्डाऽधेः** ॥ सखिशब्दात्सखिशब्दान्ताच्च नाम्नः परस्य सेर्डा स्यात् । 'ऐ सख्युः' इति सूत्रे विपरीतनिर्देशात्तदन्तग्रहणम्(ग) ॥ कीदृशस्य सेः । न धिः अधिस्तस्याधेर्धिभिन्नस्येत्यर्थः ॥ समानं ख्यायते जनैरिति सखा । 'नीव्यादयः' इति निपातनात्ख्याधातोरिप्रत्ययो या इत्यस्य निवृत्तिश्च ॥ तदन्ते तु शोभनः सखा सुसखा ॥ धौ तु "धौ" इत्येकारो न तु डा आधेरिति निषेधात् ॥ ५१ ॥

(क) 'ङेरौ ङित्' इति सूत्रे ङित्करणस्य फलं कथयति–**ङिति टेरिति** । टिरिति 'अन्त्यस्वरादिः' इति सूत्रप्रतिपाद्यो ज्ञेयः ।

(ख) 'ऐ सख्युः' इत्यतः सख्युरिति षष्ठ्यन्तमनुवर्त्तमानं सेरित्यनेन सम्बन्धात्सखिशब्दार्थस्यैकत्वे वाच्ये विहितस्य सेरित्यर्थं प्रत्याययतीति मत्वाह **सखिशब्दस्येति** । तदर्थस्यैकत्वे विहितस्येत्यर्थः । तेन शोभनः सखा यस्य सः सुसखिरित्यत्र न भवति, अन्यपदार्थस्यैकत्वे सेर्विहितत्वात् । गौणमुख्यन्यायेन वात्र न भवति । अत एव च शोभनः सखा सुसखेत्यत्र भवतीति माधवः । अत एव 'तदन्तादि'ति चिन्त्यम् ।

(ग) ननु सूत्रात्तदन्तसखिशब्दादिति नार्थोपलभ्यते वृत्तौ सः कुतः, इत्याशङ्कायामाह **ऐसख्युरिति** । 'सख्युरे' इति नोक्त्वा विधेयस्य पूर्वविधानादयमर्थो लभ्यत इति भावार्थः ।

(त०) सेर्डाऽधेरिति ॥ अधेरिति छेदः धिभिन्नस्य सेर्डा भवतीत्यर्थः ॥ ऐ स- ख्युरित्यतः सख्युरित्यनुवर्तते । तच्च षष्ठ्यन्तमर्थवशाद्विपरिणम्यते । "सख्युरुरै" इति कर्त- व्ये विपरीतनिर्देशात्तदन्तलाभ इत्यभिप्रेत्याह—तदन्तादिति ॥ सख्युः किम् । हरिः ॥ सेः किम् । सखिभ्याम् ॥ अधेः किम् । हे सखे ॥ ९१ ॥

ऐ सख्युः ॥ सखिशब्दस्य तदन्तस्याप्यैकारादेशो भवत्यधिषु पञ्चसु ॥ सखायौ, सखायः । सखायम् , सखायौ, सखीन् ॥ ५२ ॥

(सु०) ऐं सख्युः ॥ तस्मादित्यनुवर्तते । तस्य सखिशब्देन विशेषणात्तदन्तवि- धिः सखिशब्दस्य सखिशब्दान्तस्य च नाम्नः ऐः स्यात् । पञ्चसुशब्दः प्राक् स्यादिष्वेव रूढः(क) । सौ तु परेण डादेशेन बाधितत्वादैर्न ॥ अथवा सेर्डादेशे प्रकृतेरैत्वे च कृते टिलोपः । विशेषाभावात्तदन्ते सुसखायौ । सख्युरिति षष्ठीनिर्दिष्टत्वेनान्त्यस्यैकारस्य ऐः । सखायौ॥६२॥

(त०) ऐ सख्युरिति ॥ अत्राधेरित्युत्तरसूत्रादपकृष्यते । तथा चाधिप्रत्ययान्तस्य सखिशब्दस्यैकारादेशः पञ्चस्विति व्याख्येयम् । अथ औप्रभृतीनि पञ्च वचनानि कुतो न गृहीतानि इति न वाच्यं पञ्चसुशब्दः स्यादिष्वेव रूढ इति व्याख्यानात् ॥ यद्वा अधे- रिति पर्युदासात्स्यादिग्रहः ॥ ६२ ॥

सखिपत्योरीक् ॥ सखिपतिशब्दयोरीगागमो भवति टाङेङिषु परतः दीर्घत्वान्ना न भवति ॥ सख्या । सख्ये ॥ ५३ ॥

(सु०) सखिपत्योरीगिति ॥ एतयोरीक् स्यात् टाङेङिषु ॥ कित्त्वादन्ते । टा- प्रत्यये ईका व्यवधानात् टा नाऽस्त्रियामिति न प्रवर्तते (ख) । सवर्णे दीर्घे यत्वे च सख्या । सख्ये । ङौ तु औत्वे टिलोपे च कृते पश्चादेकदेशविकृतमिति न्यायेनेग्यत्वे । सख्यौ ॥ सखिपत्योर्विशेषस्य विवक्षणात् तदन्तविधिर्न । तेनातिसखिना भूपतिना इत्यत्र नेक् ॥६३॥

(त०) सखिपत्योरीगिति ॥ अत्र ए टाङ्योरिति पूर्वसूत्रात् टाङ्योरित्यनुवर्तते । तथा च टाङ्योरेवानेन ईक् । सख्ये इति सिद्ध्यर्थं तु 'ङे' इति सूत्रान्तरम् । तथा च ङ- यि परे सखिपत्योरीगागमो भवति इति तस्यार्थः ॥ दीर्घविधिर्नात्वादिप्रतिषेधार्थं इत्य- भिप्रेत्याह—दीर्घत्वादिति ॥ यद्यपि ह्रस्वकरणेऽपि विधानसामर्थ्यान्नात्वादिप्रतिषेधो ल- भ्यते तथापि ङौ ङिः सवर्णदीर्घे सखी इत्येव स्यादिति दीर्घकरणात्प्रथममौत्वटिलोपयोः प्रसक्तयोः पश्चादेकदेशविकृतन्यायेन ईगागमे कृते सख्याविति रूपसिद्ध्यर्थं दीर्घविधानस्या-

---

(क) रूढः । 'रूढः सङ्केतवन्नाम सैव संज्ञेति कीर्त्यते' । इति शब्दशक्तिप्रकाशिकायां जगदीशः । अत औप्रभृतीनि पञ्चवचनानि न ग्राह्यानि ॥ 'षष्ठीनिर्दिष्टस्यादेशस्तदन्तस्य ज्ञेय' इति वचनादादेशो ऽन्त्यस्यैकारस्य बोध्यः । सखिशब्दस्य वैदिकमते स्वयं विशेषः—'सखाया' इति । तथा च सूत्रम्— "द्विवचनस्यावा छन्दसि" । द्विवचनस्य औ आ भवति वेदे ॥

(ख) अत्र माधवः । मूलं—दीर्घत्वादिति । अयमाशयः—यदि ह्रस्व एवेक् क्रियते, तर्हि सखि इ टा इति स्थिते सवर्णदीर्घं बाधित्वान्तरङ्गत्वात् 'टा नाऽस्त्रियाम्' इति नाभावः प्राप्नोति । ईकि पुनःसत्य- सति वा सवर्णदीर्घे सवर्णदीर्घत्वान्नास्ति नादेशः । अत्र कश्चित्—नैतत् सद्विचारयुक्तम् , इहापि परि- भाषाया अनित्यत्वमाश्रियते ज्ञापकानुसारेण, तच्च ज्ञापकं 'काभ्यायेत्', एतदर्थमेव सूत्रस्य गुरुकरणम् । अन्यथा कृत एवावक्ष्यत इति ।

बाध्यकत्वात् । अत एव ईदिद्वा न कृतः । 'सखिपत्योर्वा' इत्यपि न सूत्रितम् । सख्या सख्ये इति सिद्धावपि ङौ सख्यि इति रूपापत्तेः । अत्र नाम्नो विशेषणत्वाभावान्न तदन्तलाभः ॥५३॥

ऋङ् ङे ॥ सखिपतिशब्दयोर्ऋङागमो भवति ङसिङसोरकारे परे(क) ॥ सख्यृ अस् इति स्थिते ॥ ५४ ॥

(सु०) ऋङ् ङे ॥ सखिपत्योरृङ् स्यात् । ङा उपलक्षितः अः ङस्तस्मिन् ङे ॥५४॥

(त०) ऋङ् ङे इति ॥ ऋङ् ङे इति छेदः । ङे इति सप्तमी । ङोपलक्षितः अः ङः तस्मिन् ॥ तेन ङसिङसोरकारो लभ्यते ॥ 'ङङः' इति सूत्रणोये ईगनुवृत्त्या ङितीत्येत्वस्य बाधे रूपसिद्धावपि गुरुकरणमागमजन्यानित्यत्वज्ञापनार्थम् । तेन 'सखिना वानरेन्द्रेणे' ति अन्यत्र पतिना सहेति च संगच्छते ॥ ङे किम् । सखीन् ॥ सखिपत्योः किम् । वातप्रम्यः ५४

ऋतो ङ उः ॥ ऋकारान्तात्परस्य ङसिङसोरकारस्योकारो भवति । स च डित् ॥ सख्युः । ङौ डिदित्यौकारे कृते सखिपत्योरीक् । सख्यौ ॥ शोभनः सखा सुसखा, सुसखायौ, सुसखायः । सुसखीन् । सुसखये । सुसखेः । सुसखौ ॥ अतिशयितः सखा अतिसखा । परमः सखा परमसखा। सखीमतिक्रान्तोऽतिसखिः । इह ङैत्वं न । "लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमिति" न्यायात् ॥ पतिः, पती, पतयः। पतिम् , पती, पतीन् । पत्या । पत्ये । पत्युः । पत्या ॥ ५५ ॥

(सु०) ऋतो ङ उः ॥ डिदित्यनुवर्तते(ख) । ऋदन्तान्नाम्नः परो ङ उः स्यात् ॥ स च डित् । नाम्नः किम् । आरत् । उरिति लिङ्गात्केवलादपि ऋत उर्भवति । ऋगागमे कृते यत्वोत्वटिलोपाः । सख्युः । तदन्ते यथा । शोभनः सखेति प्रादिसमासे तत्पुरुषे 'राजाहः सखिभ्य' इति टप्रत्ययो न पूजार्थोपपदे निषेधात् । इहैडात्वयोः प्रवृत्तिस्तदन्तग्रहणात् । सुसखिशब्दस्य पञ्चसु सखिवद्रूपम् । शेषं हरिवत् ॥ एवमतिशयितः सखेति अतिसखा । प्रादिसमासोऽत्र । परमः सखा यस्य स परमसखेति बहुव्रीहिः । कर्मधारये तु टप्रत्ययेन भाव्यम् । गौणत्वेऽप्यैडात्वे भवतः । अतिदध्नेत्यादावचाल्लनामितिवत् ॥ सखीमतिक्रान्तोऽतिसखिः । 'अत्यादयः क्रान्ताद्यर्थे' इति तत्पुरुषः अन्यार्थे इति ह्रस्वत्वेन सखिशब्दस्य लाक्षणिकत्वात् टप्रत्यय ऐडात्वे च न । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणं न तु लाक्षणिकस्येति परिभाषणात् । लक्षणं च प्रतिपदं च लक्षणप्रतिपदे लक्षणप्रतिपदाभ्यामुक्तौ लक्षणप्रतिपदोक्तौ तयोः । द्वन्द्वान्ते श्रूयमाणत्वादुक्तशब्दः प्रत्येकं संबध्यते । लक्षणोक्तः प्रतिपदोक्त इति । लक्षणेन सूत्रेणोक्तो लाक्षणिकः इकः । प्रतिपदोक्तस्य झटिति बुद्ध्यारोहो लाक्षणिकस्य तु लक्षणानुसंधानद्वारेण विलम्बि

(क) ऋकारेति । अत्र यदि ङ इति चतुर्थ्येकवचनमभिप्रेतं स्यात्तर्हि ङ इत्यस्यानुवृत्तेरेव पुनर्ग्रहणं न कुर्यात् । तस्मात् ङकारोपलक्षितः अ ङस्तस्मिन् ङे इत्यभिप्रेत्याह—ङसिङसोरकार इति।

(ख) ङेरौ डित्' इत्यतोनुवर्त्तते । सूत्रं व्याचष्टे—ऋदन्तादिति ।

तो वृद्ध्यारोहो भवतीत्यर्थः(क) । क्लीबे तु पूर्वेणापि नुमा परस्याप्यैत्वस्य बाधः क्रियते 'प्रायशो दृश्यता'मित्युक्तत्वात् । यथा प्रियसखिनी, प्रियसखीनि । पतिशब्दस्य टाङेङसिङसङिषु सखिवद्रूपम् । शेषं हरिवत् ॥ ५५ ॥

(त०) ऋतो ङ उरिति । अत्र नाम्न इति ऋदन्तस्य विशेषणम् । स्यादेरिति ङस्य । तेन आरन् कर्तृ ङ्वते इत्यादौ नातिप्रसङ्गः, सख्युरित्यादिलिङ्गाच्चतुर्थ्येकवचनस्यादेशे लोपं च न निर्देशशङ्का ॥ ऋतः किम् । ग्लावः ॥ ऋतो डरिति सूत्रणीये ङग्रहणं वर्णमात्रविधौ यदादेशस्तद्वद्भवतीति न प्रवर्तते इति ज्ञापनाय । तथा हि । ऋतः अः डरिति छेदः । जस्समोस्तु परत्वाद्गुण एव स्थानिवद्भावेन प्राप्तोऽपि पञ्चमुग्रहणसामर्थ्यान्न । अन्यथा अर्वीत्येवाध्येत । तथा च शस्यतिप्रसङ्गः । तत्रापि परत्वाच्छसीति दीर्घेण भवितव्यम् । दीर्घे कृतेऽपि यदादेशस्तद्वदित्यनेनोत्वेन भाव्यम् । एवं चोत्वे कृते यदादेशस्तद्वदित्यम् शसोरस्येत्यलोपो भविष्यति । इत्थं च कृताकृतप्रसङ्गित्वेन नित्यत्वादतः पूर्वमलोपो भविष्यति । तथा च शस्यपि नातिप्रसङ्गनिःशङ्केति तज्ज्ञापकफलकमेव ङकारग्रहणमिति वृद्धाः ॥ अतिसखिरिति ॥ अन्यार्थे इति ह्रस्वः । अतिसखेरिति भाष्यप्रयोगादीदूदन्तस्येत्यादिना ऐकार्यं न । लक्षणप्रतिपदोक्तयोरिति ॥ सूत्रानुसंबन्धद्वारेण कृतं लाक्षणिकम् । ऋटिति वृद्ध्यारोहणं प्रतिपदोक्तम् ॥ ५५ ॥

(पतिः समासे हरिवत्) भूपतये ॥ ५६ ॥

(मु०) **पतिः समासे हरिवत्** ॥ पतिशब्दस्य रूपं समासे हरिवत्स्यात् ॥ समासाभावे शसादौ सखिवत् । भुवः पतिः भूपतिस्तस्मै भूपतये । समासत्वादत्र नेक् । कथं 'सीतायाः पतये नमः' । पराशरश्चाह—'नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ । पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते' इति (ख) ॥ १ ॥ उच्यते । पतिशब्दोऽयमा-

(क) लक्षणेति । प्रकृतेऽप्यतिसखिशब्दस्वरूपस्य सामान्यतश्शास्त्रादुन्नेयत्वादिति यावत् । सखिशब्दस्तु नैवम् । ननु लाक्षणिकस्यापि ग्रहणं कुतो नेत्यत आह—लक्षणेति ।

(ख) श्लोकेऽस्मिन् केचिद्विवदन्ते । नन्वस्य कोऽर्थ इति । तथाच—पतौ भर्तरि, नष्टे स्वात्मगोपनं कृते सतीत्यर्थः । नशधातोरदर्शनार्थत्वात् । मृते प्रेते सति । प्रव्रजिते प्रव्रज्याश्रमं गते सति 'यदहरेव विरजेत् तदहरेव प्रव्रजेत्' इति श्रुत्या वयस्थस्त्रीसद्भावेऽपि प्रव्रज्याश्रयणे न दोषः । क्लीबे पुंस्त्वहीने च सति । समुच्चयार्थश्चशब्दः । नारीणां युवतीनां स्त्रीणाम् । आसु पञ्चसु निरुक्तासु आपत्सु । अन्यः पतिरपरो भर्ता विधीयते प्रशस्यते । इति मतं केषाञ्चिन्नादरणीयम्, अयुक्तिसहत्वात् । अनुशासनविरोधात् । अभिप्रायानभिज्ञानात् । स्मृत्यन्तरविरोधाच्च । किं तत्? तथाहि—तादृशनार्यो दानकर्तृभावाद्दानयोग्यताभाव इति युक्तिविरोधः । पतिशब्दस्य सप्तम्यां पत्याविति रूपविधानात् 'पतौ—भर्तरीति' अनुशासनविरोधः । पद्यमिदं पराशरस्य वाग्दानाभिप्रायकमिति प्रकरणाज्ञानादभिप्रायानभिज्ञानम् । "मृते जीवति वा पत्यौ या नान्यमुपगच्छति, सेह कीर्तिमवाप्नोति मोदते चोमया सह" ॥ इति याज्ञवल्क्योक्तिविरोधात् स्मृत्यन्तरविरोधः । सोऽयं वादो नैयायिकैः प्रधानवादवत् यावद्यावद्विचार्यते तावत्तावत् प्रमाणवृत्तं बाधत इति ।

तर्ह्यस्य कोऽर्थ इत्यपेक्षायामाहुर्गुरुचरणाः—पतिमाचष्टे इति पतयति पतयतीति पतिस्तस्मिन् पतौ पतिसदृशे येन सह पाणिपीडनाय वाग्दानं भूतं तस्मिन्नित्यर्थः । अथाऽपताविति वा । 'एङोतोऽत' इति अकारलोपः । नष्टे सति मृते सति प्रव्रजिते सति क्लीबे च सतीति पूर्वोक्त एवार्थः । एतासु पञ्चविधास्वापत्सु नारीणामन्यः पतिर्विधीयत इति न पूर्वदोषाणां प्रसरो विधवाविवाहस्य च । एवं सत्यपि सा पाणिग्रहणविधौ नातिप्रशस्तेति देशविशेषाचारोऽपि ।

ल्यातप्रत्ययान्तः । यथा नाम्नो णिङिदिति णिप्रत्यये टिलोपे धातोरित्यौणादिके इप्रत्यये णेरिति णिलोपे च निष्पन्नोऽयं पतिशब्दः ॥ पतिमाचष्टे इति पतयति पतयतीति पतिः । लाक्षणिकत्वादस्य सखिवद्रूपम् । एवं 'कृष्णस्य सखिरर्जुनः' इति भारते । 'सखिना वानरेन्द्रेण' इति रामायणे च बोध्यम् ॥ ५६ ॥

(**आगमजमनित्यम्**) सखिना । पतिना ॥ द्विशब्दो नित्यं द्विवचनान्तः ॥ ५७ ॥

(सु०) **आगमजमनित्यम्** ॥ आगमाज्जातमागमजं कार्यमनित्यमस्ति इति न्यायाद्वा सखिनेत्यादौ नेक् । अथ ऋङ् के इत्यत्र क ङरिति सूत्रणीये ईगनुवृत्त्या ङिति त्वेत्वस्य बाधे रूपसिद्धावपि गुरुकरणमेतत्सत्त्वे ज्ञापकं बोध्यम् ॥ ५७ ॥

(**त्यदादेष्टेरः स्यादौ**) द्वौ । द्वौ । द्वाभ्याम् । द्वाभ्याम् । द्वाभ्याम् । द्वयोः । द्वयोः ॥ ५८ ॥

(सु०) **त्यदादेष्टेरः स्यादौ** ॥ त्यदादीनां दशानां टेरत्वं भवति स्यादिविभक्तौ (क) ॥ विभक्ताविति किम् । त्यद् । तत् ॥ स्यादौ किम् । तस्यापत्यं तादः । तमिच्छतीति तद्यति । यः ॥ टेः किम् । सः य इत्यादावत्वे सवर्णे दीर्घे च सा या इति स्यात् ॥ द्विशब्दस्यात्वे सति सर्ववद्रूपम् ॥ ५८ ॥

(त०) **त्यदादेष्टेरः स्यादाविति** ॥ त्यदादेः किम् । मरुतौ ॥ स्यादौ किम् । तस्यापत्यं तादः । तमिच्छति तद्यति । अत्र स धातुरित्यादिलिङ्गेनैव टेरेवात्वसिद्धौ टेरिति ग्रहणं टेरपि क्वचिद्विधानार्थम् । तेन किम्शब्दस्याकसहितस्य त्यदाद्यत्वे क इत्येव रूपम् ५८

(**संज्ञोपसर्जनयोर्नात्वम्**) द्विर्नाम कश्चित् । द्विः, द्वी, द्वयः ॥ द्वावतिक्रान्तोऽतिद्विः । प्राधान्ये तु परमद्वौ ॥ त्रिशब्दो नित्यं बहुवचनान्तः । त्रयः । त्रीन् । त्रिभिः । त्रिभ्यः । त्रिभ्यः । ॥ ५९ ॥

(सु०) **संज्ञोपसर्जनयोर्नात्वम्** ॥ संज्ञायां गौणत्वे च त्यदादेरित्यत्वं न भवति सर्वाद्यन्तर्गणकार्यत्वात् । कस्यचित् पुरुषस्य द्विर्नाम तस्य हरिवद्रूपम् । गौणेऽतिद्विस्तस्यापि हरिवद्रूपम् । प्राधान्ये मुख्ये तु परमौ च तौ द्वौ च परमद्वौ । कर्मधारयः । सर्ववद्रूपम्॥

त्रेस्त्रयङ् ॥ त्रिशब्दस्यायङ् आदेशो भवति नामि परे ॥ तदन्तविधिरत्र(ख) । ङिदन्तस्यैव वक्तव्यः । त्रयाणाम् । परमत्रयाणाम् । त्रिषु ॥ कतिशब्दो नित्यं बहुवचनान्तः ॥ ६० ॥

(सु०) **त्रेस्त्रयङ्** ॥ आम इत्यनुवर्तते । तच्च सप्तम्या विपरिणम्यते । तस्मादिति च । तस्य नाम्नस्त्रेरिति विशेषणे विशेषणत्वात्तदन्तविधिः । त्रिशब्दस्य त्रिशब्दान्तस्य

(क) दशानामिति । त्यद् , तद् , यद् , एतद् , इदम् , अदस् , द्वि, किम् , युष्मद् , अस्मद् इति।

(ख) त्रेरिति । बह्वर्थत्वेऽप्यस्य निर्देशस्य स्वरूपपरत्वात् त्रेरित्येकवचनमिति मत्वाह—त्रिशब्दस्येति । यद्येवं प्रियास्त्रयो यस्य सः प्रियत्रिः प्रियत्रीणामत्रापि प्राप्नोति शब्दस्वरूपस्य सत्त्वात् । मैवम् , त्रेरिति षष्ठ्या आमीत्यनेनापि सम्बन्धात् ।

त्रयक् स्यादामि । गुरुत्वात्सर्वादेशे प्राप्ते ङिदादेशः अन्तस्य स्थाने भवतीतीकारस्या-यङ् । त्रेरित्येकवचननिर्देशस्त्वनुकरणत्वात् । तदन्ते-प्रियाश्च ते त्रयश्च प्रियत्रयस्तेषां प्रियत्रयाणाम् । गौणत्वे नेति कश्चित् । तातेरोणादिका ङिप्रत्ययः । ङित्त्वाट्टिलोपे त्रिशब्दः॥६०॥

(त०) त्रेस्त्रयङिति । ननु त्रिशब्दस्य बहुवचनान्तत्वात् कथं त्रेरिति चेत्सत्यम् । त्रिशब्दस्त्रित्वविशिष्टवाचको बहुवचनान्तः । अयं तु न त्रित्वविशिष्टवाचकः किंतु तदनुकरणेन गृहीतः । अनुकार्यानुकरणयोश्च भेदविवक्षाया इष्टत्वात् । प्रकृतिवदनुकरणमित्यस्य त्वनित्यत्वात् । एवं स्थिते त्रयाणामयङ् इत्युक्तौ त्रिशब्दसमानवचनाशङ्कायां तदुद्धरार्थम् अचतुर्णामित्यादिलिङ्गानुसरणं कृत्वा पुनर्गौरवदोषोद्भावनेन यथान्यासमूत्रस्थापनप्रयासो निजपाण्डित्यप्रख्यापनायैवेति दिक् ॥ तदन्तविधिप्रत्येति ॥ तस्मादित्यनुवृत्तेः त्रिशब्दान्तस्य नाम्न इति व्याख्यानात् । त्रयाणामित्यत्र तु व्यपदेशिवद्भावादित्यभिप्रायः ॥ ङिदन्तस्येति ॥ गुरुः शिच्चेत्यस्यापवादः ॥ ६० ॥

डतेः ॥ संख्यावाचिनो डत्यन्ताज्जश्शसोर्लुक् ॥ प्रत्ययलोपे प्रत्ययलक्षणम् (क) ॥ ६१ ॥

(सु०) डतेः ॥ किमः संख्यापरिमाणे डति चेति डतिः । संख्यापरिमाणे विहित इह गृह्यते पतेर्डतिरिति तु न संख्याया इत्यनुवृत्तेः ॥ ६१ ॥

(त०) डतेरिति ॥ डत्यन्तान्नाम्न इति वाच्यम् । डतिप्रत्ययश्च शेषा निपात्याः इत्यादय इति गृह्यते । संख्याया इत्यनुवृत्तेः संख्यासंबन्धे च डतिर्गृह्यते न तु पतेर्डतिः पतिरिति ॥ कतेरिति तु न सूत्रितं पतिततीनां ग्रहणार्थम् ॥ यत्तु कतेरित्येव युक्तं पतिततीनां लोकेऽदर्शनादित्युक्तं तत् प्रौढवादमात्रम् 'पतति नागशीर्षणि' 'तति नाङ्गवदना' इत्यादिषु दर्शनात् । बहुगणवतु डतिसंख्येति पाणिनिसूत्रेऽपि डतेरेव ग्रहणात् । कतीत्यत्र एओ जसीत्यस्य प्राप्तौ जसोऽत्राभावात् प्रत्ययलोपेऽपि प्रत्ययाश्रितं कार्यं भवतीति तत्प्राप्तिः यदादेशस्तद्वद्भवतीति सिद्धेः प्रत्ययलोप इत्याद्युक्तिर्नियमार्था । तेन यत्र प्रत्ययस्यासाधारणं रूपं प्रयोजकं तदेव प्रत्ययलोपे सति भवति न तु प्रत्ययाप्रत्ययसाधारणम् । तेन शोभना दृषदोऽस्य सुदृषत् प्रासाद इत्यत्र अत्वसोः साविति दीर्घो न ॥ ६१ ॥

(लुकि न तन्निमित्तम्) कति । कति । कतीनाम् । कतिषु ॥ औडुलोमिः । औडुलोमी ॥ ६२ ॥

(सु०) कतीत्यत्र यदादेशस्तद्वदिति जसमाश्रित्य एओ जसीत्येत्वे प्राप्ते सत्याह-लुकि न तन्निमित्तम् ॥ लुक्शब्देन लुप्ते सति लुग्वन्निमित्तमाश्रित्य कार्यं न भवतीत्यर्थः ॥ शीङो गुणश्चतुर्षु' इत्यनेन ज्ञापितमिदम् । अन्यथा शेते इत्यादावदादेर्लुगिति लुप्तस्यापः 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति तद्भावेन गुणस्य सिद्धत्वाद्व्यर्थमिदं सूत्रं ततो ज्ञापयतीति । का संख्या येषां ते कति ॥ उडूनीव लोमानि यस्य स उडुलोमा । उडुलोम्नोऽपत्यमौडुलोमिः । बाह्वादित्वादिञ् ॥ ६२ ॥

(क) 'प्रसक्तादर्शनं लोपः' कतिशब्दस्य प्रथमाविभक्ति द्वितीयाविभक्तिबहुवचने जस् शसोर्लुकि कृते यदादेशस्तद्वद् भवतीति 'ए ओ जसी'ति न भवति । एवमन्यत्रापि बोध्यम् ।

(त०) सिद्धान्तमाह—लुकि न तन्निमित्तमिति ॥ स प्रत्ययो निमित्तं यस्य तत्कार्यमिति शेषः । लुकि सति प्रत्ययमाश्रितं कार्यं न भवति इत्यर्थः । एतद्बीजं तु शेते इत्यत्र शीङ इति सूत्रेण गुणकरणम् । अन्यथा अपो लुकि प्रत्ययलक्षणेन पित्वाद्गुण इत्यनेनैव गुणे सिद्धे यत्सूत्रान्तरप्रणयनं तज्ज्ञापयति-लुकि न तन्निमित्तमिति ॥ औडुलोमिरिति । बाह्वादिभ्यश्चेति इञ् । आदिस्वरस्य ञ्णिति चेति वृद्धिः । टिलोपः ॥६२॥

(लोम्नोऽपत्येषु बहुष्वकारः) उडुलोमाः । औडुलोमिम् । औडुलोमी, उडुलोमान् ॥ वातप्रमीः, वातप्रम्यौ, वातप्रम्यः । वातप्रमीम्, वातप्रम्यौ, वातप्रमीन् । वातप्रम्या ॥ एवं ययीपप्यादयः । क्विबन्तवातप्रमीशब्दस्यामि शसि ङौ च विशेषः । वातप्रम्यम् । वातप्रम्यः । वातप्रम्यि । य्वौ वेति यः ॥ बह्व्यः श्रेयस्यो यस्य स बहुश्रेयसी ॥ ६३ ॥

(सु०) लोम्नोऽपत्येषु बहुष्वकारः । लोमन्शब्दान्तादप्रत्ययो भवति अपत्यानां बहुत्वे वाच्ये ॥ उडुलोम्नोऽपत्यानि उडुलोमाः । नो वेति टिलोपः । बहुत्वाभावे औडुलोमिशब्द इदन्तस्तस्य हरिवद्रूपम् । बहुत्वे तु उडुलोमशब्दोऽदन्तोऽन्य एव । तस्य इकारान्तेषु व्युत्पादनं प्रासङ्गिकम् । औडुलोमिशब्दस्य बहुत्वेऽदन्तत्वं भवतीति न भ्रमितव्यमिति ॥ अदन्तस्य तु देववद्रूपम् ॥ इति इदन्ताः ॥ वातं प्रमिमीते इति वातप्रमीः । 'वातप्रम्यादय' इत्युणादिसूत्रेण माङ ईक् प्रत्ययः । आतोऽनपीत्यालोपः । स्वरादिविभक्तौ 'इ यं स्वरे' इति यत्वम् । अमिशसि च परत्वादम्शसोरित्यलोपः । वातप्रमीम् वातप्रमीन् । आमि तु दीर्घत्वान्न नुट् । वातप्रम्याम् । ङौ तु सवर्णे दीर्घः । वातप्रमी । एवं यान्त्यनेनेति ययीर्मार्गः । पाति लोकमिति पपीः सूर्यः । यापोरीक्प्रत्ययो द्वित्वं च निपातनात् । यदा वातं प्रमीनातीति मीञ् हिंसायाम् अस्मात् क्विपि वातप्रमीः । अथवा ईक्प्रत्ययान्ताद्वातप्रमीशब्दादाचारे यङन्तात्कर्तरि क्विप् क्रियते तदा क्विबन्तो वातप्रमीशब्दः । धातुत्वाद् य्वौ वेति यः । स्वरादिविभक्तौ परतः सर्वत्र प्रधीवत् ॥ बह्व्यः श्रेयस्यो यस्य स बहुश्रेयसी पुरुषः । ईयसो बहुव्रीहौ नेति निषेधात् ॥ ६३ ॥ [sic: see below]

(त०) बहुष्वकार इति । तथा च एकत्वद्वित्वयोरिदं न औडुलोमिशब्दः । बहुत्वे वकारान्तो भिन्न उडुलोमशब्दः । इकारान्तस्य बहुत्वेऽदन्तमिति न भ्रमितव्यमिति भावः । ययीपप्यादय इति ॥ यान्त्यनेनेति ययीर्मार्गः । पाति लोकमिति पपीः सूर्यः औणादिकौ ॥ क्विबन्तेत्यादि ॥ तथा च वातं प्रमिमीते इति वातप्रमीरिति क्विबन्तत्वे धातुत्वानपायेन य्वौ वेति य इति भावः । औणादिकस्य तु धातुत्वाभावात् य्वौ वेत्यस्याप्रवृत्तावपि अम्शसोरित्यस्य प्रवृत्तिः । ङौ तु सवर्णे दीर्घः सहेत्यस्येति रूपभेदः ॥ बहुश्रेयसीति ॥ समासाश्रितविधेरनित्यत्वान्न कः । ईयसोनेति निषेधान्न ह्रस्वः ॥६३॥

(ईदूदन्तस्येयुवस्थानभिन्नस्य स्त्र्याख्यस्योपसर्जनत्वेऽपि स्त्रीकार्यं वक्तव्यम्)॥ ६४ ॥

(सु०) ईदूदन्तस्येयुवृस्थानभिन्नस्य स्त्र्याख्यस्योपसर्जनत्वेऽपि स्त्रीकार्यं वक्तव्यम् ॥ स्त्रियमाचष्टे इति स्त्र्याख्यः । चक्षिङो मूलविभुजादित्वात्कप्रत्यये ख्याञादेशे चातोऽनपीत्यालोपे रूपम् ॥ स्त्रियामिति वक्तव्ये आख्यग्रहणं नित्यस्त्रीत्वलाभार्थम् । तेन वृत्तेः प्राक् स्त्र्याख्यस्य नित्यस्त्रीलिङ्गस्य ईकारोकारान्तस्य नाम्नो गौणेऽपि स्त्रीलिङ्गकार्यं भवति ॥ स्त्र्याख्यस्येति किम् । ग्रामण्ये ॥ ६४ ॥

(त०) स्त्र्याख्यस्येति ॥ स्त्रियमाख्यातीति स तस्य पूर्वं स्त्रीत्ववाचकस्येत्यर्थः ॥ इयुवृस्थानभिन्नस्य किम् । अतिश्रिये ॥ ६४ ॥

हसेपः सेर्लोपः ॥ हसान्तादीबन्ताच्च परस्य सेर्लोपो भवति ॥ बहुश्रेयसी, बहूश्रेयस्यौ ॥ ६५ ॥

(सु०) हसेपः सेर्लोपः ॥ हसान्तादीबन्ताच्च नाम्नः सेर्लोपो भवति । हसश्च ईप् चानयोः समाहारो हसेप् तस्मात् ॥ ननु कौशाम्ब्या निष्क्रान्त इति निष्कौशाम्बिरित्यत्रातिव्याप्तिः स्यात् । 'अन्यार्थे' इति ह्रस्वे कृते एकदेशविकृतस्यानन्यत्वात् । उच्यते । ई ईप् इति प्रश्लिष्य दीर्घस्यैवेपो ग्रहणात् ईकाररूपादीपः सेर्लोप इति । ह्रस्वे कृते त्वीबन्तत्वेऽप्याकारान्तत्वं नास्तीति(क) ॥ सेरिति किम् । मरुती ॥ हसान्तात्प्रथमं सिलोपं पश्चात्कार्यान्तरं भवति । इतोऽदित्यनेनात्वे उपधादीर्घे नलोपे सौ विसर्गे च कृते पन्थाः इति सिद्धम् । आ सावित्याकारविधानेन प्रथमं सिलोपस्य ज्ञापनात् ॥ ६५ ॥

(त०) हसेपः सेलोपः इति ॥ हसश्च ईप् च एतयोः समाहारः हसेप् तस्मात् हसेपः ॥ ननु हसग्रहणं किमर्थं हसान्तात्संयोगान्तलोपे रूपसिद्धेरिति चेन्न वेधा इत्यत्र परत्वादपवादत्वाद्वा स्कोराद्योरित्यनेन सलोपे अत्वसोः साविति दीर्घासिद्धेः । अथ परं नित्यं च लोपं बाधित्वा निरवकाशत्वादत्वसोरित्यस्यैव प्रवृत्तिरिति चेत् मैवम् । शक्नोतीति शक् इत्यस्यासिद्धेः । संयोगान्तलोपं बाधित्वा स्कोराद्योरिति कलोपप्राप्तेः । तस्माद्धसग्रहणम् । अथ गङ्गामिच्छतीति गङ्गीयति । ततः क्विपि अलोपयलोपौ गङ्गीरिति । तत्रापि भूतपूर्वपकारमाश्रित्य ईपः सिलोपोऽस्त्विति न वाच्यम् । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमिति परिभाषया तद्ग्रहणात् ॥ ननु निष्कौशाम्बिरित्यत्र ह्रस्वत्वेऽपि ईपमाश्रित्य सेलोपोऽस्त्विति चेन्न । तत्र ई ईबिति प्रश्लिष्य दीर्घस्यैवेपः सर्वत्र ग्रहणात् । अत्र तस्मादित्यनुवृत्त्या स्याद्यनुवृत्त्या वा ईप्साहचर्याद्वा अभैत्सीदित्यादौ न लोपः ॥ ६५ ॥

धौ ह्रस्वः ॥ इयुवृस्थानवर्जितयोरीदूतोः स्त्रीशब्दस्य च स्त्रियां धौ परे ह्रस्वो भवति । ह्रस्वविधानसामर्थ्याद्धाविति न । हे बहुश्रेयसि । बहुश्रेयसीम् । बहुश्रेयसीन् ॥ ६६ ॥

(क) कौशाम्ब्या निष्क्रान्तो निष्कौशाम्बिः । अत्र प्रथमैकवचने 'हसेपः' इत्यादिना सिलोपमाशङ्कते—नन्विति । समासे विकृतत्वेऽपि स्वधर्मं न जहातीति तद्धेतुं कथयति—अन्यार्थे इति । समाधानायाह—उच्यत इति । समाधत्ते—ई ईबिति । अतिव्याप्तिं परिहरति—ह्रस्व इति । नन्वत्र 'ई ईप्' इति प्रश्लेषे कः प्रयोजकः ? विवक्षैव प्रयोजिका । तथाच प्रसादे—"अत्रापि ईरूपः इप् इति इप् विवक्षयेति ॥"

यद्यप्यत्र हसन्तात् संयोगान्तलोपेनापि सिद्धिस्तथापि 'कक् लौल्ये' इत्यादीनां ककारान्तानां क्विपि 'स्कोराद्योश्चेति' विशेषस्य कलोपविधेः प्रसङ्गेनानिष्टं स्यात् ।

(सु०) ह्रस्वः॥ स्त्रियां वर्तमानयोरीदूतोः स्त्रीशब्दस्य च ह्रस्वो भवति ॥ वेयुव इत्यपकृष्य व्यवस्थितविकल्पं चाश्रित्य वाक्यभेदेन व्याख्येयम्। तेन इयुव स्थानिनोरीदूतोर्धौ न ह्रस्वः ॥ हे बहुश्रेयसि इत्यत्र ह्रस्वे कृते धाविति गुणो न ह्रस्वविधिसामर्थ्यात्॥६६॥

(त०) धौ ह्रस्व इति ॥ अत्र वेयुव इत्यतो वा इति इयुव इति चानुवर्त्य वा इत्यस्य व्यवस्थितत्वमाश्रित्य सर्वत्र निर्वाहः। तथा च इयुवस्थानवर्जितयोरीदूतोः स्त्रीशब्दस्य च धातुवर्जितस्य चेत्यादिलाभः । तेन हे श्रीः । हे स्त्रि । हे ग्रामणि । हे अतिचमु । इत्यादावव्याप्त्यतिव्याप्तिपरिहारः सिद्ध्यतीति ध्येयम् ॥ ६६ ॥

ङितामट् ॥ स्त्रियामीकारान्तादूकारान्ताच्च ङितामडागमो भवति ॥ बहुश्रेयस्यै । बहुश्रेयस्याः । बहुश्रेयसीनाम् ॥ ६७ ॥

(सु०) ङितामट् ॥ य्वोरित्यनुवर्तते । इदुद्भ्यामिति परत्वाद्विकल्पेन बाधनाद्दीर्घयोरेव ईदूतोर्ग्रहणम । स्त्रियामीदूदन्तात्परेषां ङेङसिङसङीनामट् स्यात् ॥ "यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते" इति परिभाषया स्याद्यवयवत्वात् । तेन स्वरादौ स्यादौ परतो विधीयमानावियुवौ य्वौ च भवतः । यथा । श्रियै । भ्रुवै । प्रध्यै । वर्षाभ्वै ॥ स्त्रियां किम् । वातप्रम्ये । हूह्वे । आमि तु नुट् । बहुश्रेयसीनाम् ॥ ६७ ॥

(त०) ङितामडिति ॥ ङ इत् येषां ते ङितस्तेषाम् ॥ नन्वटः स्यादित्वाभावेन कथं तस्मिन् इयुवौ य्वौ चेति चेत्सत्यम् । 'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते' इति परिभाषयाऽपि स्यादिग्रहणेन ग्रहणसंभवात् । अत्र स्त्रियामिति निर्देशो मानम्॥ अत्र च दीर्घौ ईदूतौ ग्राह्यौ इदुद्भ्यां परत्वाद्विकल्पेन बाधात् । नन्वतिलक्ष्म्य कथमत्र समासस्य स्त्रियामभावादिति चेन्न, अवयवस्य स्त्रियां वर्तमानत्वेनैवेष्टसिद्धेः॥ स्त्रियां किम् । वातप्रम्ये ॥ य्वोः किम् । मात्रे ॥ ६७ ॥

स्त्रियां योः ॥ इवर्णान्तादुवर्णान्ताच्च स्त्रियां वर्तमानात्परस्य ङेरामादेशो भवति । बहुश्रेयस्याम । अनीबन्तत्वान्न सिलोपः । अतिलक्ष्मीः । धौ ह्रस्वः हे अतिलक्ष्मि । शेषं बहुश्रेयसीवत् । सुश्रीः ॥ ६८ ॥

(सु०) स्त्रियां योः ॥ इश्च उश्चानयोः समहारो युस्तस्मात् योः । समाहारे नपुंसकत्वस्यानित्यत्वात्पुँल्लिङ्गनिर्देशः । आगमशासनस्यानित्यत्वाद्वा न नुम् (क) अथवा इना सहित उरिति युः । शाकपार्थिवादित्वान्मध्यमपदलोपः । स्त्रियामिवर्णोवर्णान्तात्परस्य ङेराम् स्यात् ॥ स्त्रियां किम् । वातप्रमौ । हूह्वि ॥ योरिति किम् । गवि । किंच अडागमाभावे आमोऽप्यभाव इति यद्वृत्तौ पठ्यते तस्यायमाशयः । तथा हि । मत्यां मताविल्यादिषु स्त्रियां योरित्यनेन नित्यमामि कृते इदुद्भ्यामित्यादिविकल्पेनाट् क्रियते । अडागमाभावे तु स्थानिवद्भावेनामो ङित्वात् ङेरौ ङिदित्यनेन औत्वटिलोपौ भवतः । अट्पक्षे तु तेन व्यवधानादौत्वाभाव इति । तेनाडामोः सहैव प्रवृत्तिर्भवति ॥ बहुश्रेयसी ङि इत्यत्र ङेरामादेशे कृते नुट् न परत्वेनाटा बाधनात् । बहुश्रेयस्याम् ॥ 'लक्षेर्मुट्' चेत्यौणादिक इप्रत्ययान्तो लक्ष्मीशब्दः । लक्ष्मीमतिक्रान्त इत्यतिलक्ष्मीः । 'अन्यार्थे' इति ह्रस्वो न, स्त्री-

---

(क) नुर्मिति । 'आगमजमनित्यम्, इत्युक्तत्वात्।

प्रत्ययान्तत्वाभावात् । हसेप इति सेर्लोपोऽपि न, ईप्प्रत्ययान्तत्वाभावात् । सुष्ठु श्रीर्यस्येति सुश्रीः । ईबन्तत्वाभावान्न सिलोपः ॥ ६८ ॥

(त०) स्त्रियां ग्वोरिति ॥ इश्च उश्च एतयोः समाहारः युः तस्मात् योः । आगमजस्यानित्यत्वान्न नुम् ॥ स्त्रियां किम् । वातप्रमीः ॥ योरिति किम् । गवि ॥ ६८ ॥

य्वोर्धातोरियुवौ स्वरे ॥ धातोरिवर्णोवर्णयोरियुवौ भवतः स्यादौ स्वरे परे ॥ सुश्रियः । एवं सुधीयवक्र्यादयः ॥ सेनानीः ॥ ६९ ॥

(सु०) य्वोर्धातोरियुवौ स्वरे ॥ यत्वाद्यपवादोऽयम् । इश्च उश्च यू तयोर्य्वोः । व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणमिति परिभाषया य्वोरिति ह्रस्वयोरिह ग्रहणे सावर्ण्याद्दीर्घयोश्च ॥ नाम्नो धातोरिवर्णोवर्णयोरियुवौ भवतः स्यादौ स्वरे ॥ धातोः किम् । वातप्रम्यौ । हूह्वौ । स्यादौ किम् । श्र्यर्थम् । भ्वर्थम् ॥ ननु सुश्रिये इत्यादौ वेयुव इत्यनेनाटकथं न क्रियते । ईदूदन्तस्य स्त्र्याख्यस्येत्युक्तत्वादिति चेन्न । इयुवोर्निमित्तभूतयोरीदूतोर्गौणे स्त्रीकार्यं न वक्तव्यं स्त्रीशब्दं विना ॥ सुष्ठुधीर्यस्येति सुधीशब्दस्य च नेति निषेधात् य्वौ वेति न प्रवर्तते (क) ॥ एवं क्रीणातीति यवक्रीः । क्विबन्तः ॥ सेनां नयतीति सेनानीः । क्विबन्तः ॥ ६९ ॥

(त०) य्वोर्धातोरियुवौ स्वरे इति ॥ धातोः किम् । वातप्रम्यौ ॥ य्वोः किम् । विश्वपौ ॥ स्वरे किम् । सुश्रीभ्याम् ॥ स्यादौ किम् । श्र्यर्थम् । भ्वर्थम् ॥ अत्र इश्च उश्च एतयोः य्वोरिति व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति वचनादिवर्णोवर्णयोरिति व्याख्यास्यामः । अत्राहुः । 'नामिनः स्वरे' इति तु स्वरग्रहणमत्रास्थनामिति शसादिना संबद्धमिति तदनुवृत्तौ तस्याप्यनुवृत्तिः स्यादिति पुनः स्वरग्रहणमिति। तत्रेदमवधेयम् । न ह्यन्यसूत्रस्थपदसंबद्धस्यानुवृत्तिरिह दृष्टा एकयोगनिर्दिष्टानामेव प्रवृत्तिनिवृत्त्योदर्शनात् । किन्तु बहुसूत्रव्यवधानादन्यत्र विधानात्तन्निवृत्तौ स्वरग्रहणमित्येव वक्तुमुचितम् । अत्रातो धातोरित्यतो धातोरिति लब्धेऽपि पुनर्धातुग्रहणं योगविभागेनार्थविशेषज्ञापनार्थम् । तत्तु इयेवेत्यादौ स्पष्टतयोपपादयिष्यते ॥ अत्राहुः । य्वोरिति किमर्थम् । परिशेषादेव तल्लाभात् । तथा हि । ऋदन्तस्य तुक् । ॠदन्तस्य तु इरुरौ । ऌदन्तस्य तु धातोरेव न संभवः । संध्यक्षरान्तस्य त्वात्वमेव । अदन्तस्य तु यत इति लोपः । आदन्तस्य शसादौ लोपः । पञ्चसु तु आतः पञ्चसु नेति पदत्रयमनुवर्त्य पञ्चसु नेति निषेधः । हसान्तस्य गमामित्यादिनिर्देशान्नेति । श्रीपं कुलमित्यादौ तु अत इति नेति च पदद्वयमनुवर्त्य अतो नेति व्याख्यातुं शक्यत्वान्नेति । परिशेषात् य्वोरिति लब्धे किमर्थं तदितीति। अत्रेदमवधेयम् आदन्तस्य वारणाय आतः पञ्चसु नेति अदन्तवारणाय अतो नेत्याद्यनुवृत्तिक्लेशतो य्वोरिति ग्रहणस्य स्पष्टप्रतिपत्तितया लघुत्वादिति तदुपेक्षितम् ॥ ६९ ॥

य्वौ वा ॥ अनेकस्वरस्य नाम्नो धातोरिवर्णोवर्णयोर्यकारवकारौ भवतः स्यादौ स्वरे परे ॥ धातोरवयवसंयोगः पूर्वो यस्मात्तस्य तु न । सोप-

---

(क) अयमाशयः शङ्कायाः—'स्त्र्याख्यस्योपसर्जनेऽपि स्त्रीकार्यं वक्तव्यम्' इत्युक्त्या वेयुवेति सूत्रेण ङितामट् प्राप्तः, अस्याः समाधानं—नेति । ईदूतोर्गौणे स्त्रीकार्यं नेति भावः ।

पदस्यानेकस्वरस्य चेदुपसर्गकारकपूर्वस्यैव नान्यपूर्वस्य । वर्षाकरदृन्पुनर्पूर्वस्य भूशब्दस्य वत्वम् । अन्यभूशब्दस्य सुधीशब्दस्य च य्वौ न ॥ सेनान्यौ । सेनान्यः ॥ ७० ॥

(सु०) य्वौ वा ॥ इयुवोरपवादोऽयम् । तस्मादिति य्वोर्धातोः स्वरे इति चानुवर्तते । अनेकस्वरस्य नाम्नो धातोः संबन्धिनोरिवर्णोवर्णयोर्यकारवकारौ भवतः स्यादौ स्वरे । धात्ववयवसंयोगपूर्वयोरिवर्णोवर्णयोस्तु य्वौ न । चेद्यदि सोपपदस्य धातोरिवर्णोवर्णयोर्य्वौ स्यातां तदोपसर्गकारकपूर्वस्य धातोरिवर्णोवर्णयोरेव य्वौ स्तः । न तूपसर्गकारकेतरपूर्वस्य धातोरिवर्णोवर्णयोरर्थादुपसर्गकारकपूर्वत्वेन योऽनेकस्वरो धातुस्तस्यैवर्णोवर्णयोरेव य्वौ । उपसर्गकारकेतरपूर्वत्वेन योऽनेकस्वरो धातुस्तस्यैवर्णोवर्णयोर्य्वौ न । अनेकस्वरस्य किम् । नियौ । लुवौ ॥ धातोर्य्वोः किम् । वातप्रम्यौ । हूह्वौ ॥ स्वरे किम् । सेनानीभ्याम् । सुलूभ्याम् ॥ धात्ववयवसंयोगपूर्वत्वे सुश्रियौ । उपसर्गधात्ववयवसंयोगपूर्वत्वे तु य्वौ भवतः । उन्न्यौ । उल्ल्वौ । धात्ववयवसंयोगोऽत्र न । उपसर्गकारकाभ्यामितरपूर्वत्वे तु य्वौ न । परमनियौ । शुद्धधियौ । वर्षाकरदृन्पुनर्पूर्वस्य भूवो वत्वमितरपूर्वस्य भूशब्दस्य सुधीशब्दस्य च य्वौ न किंतु इयुवौ ॥ ७० ॥

(त०) य्वौ वेति ॥ अत्र तस्मात् य्वोर्धातोः स्वरे इति पदचतुष्टयमप्यनुवर्तते इत्यभिप्रेत्याह—नाम्नो धातोरित्यादि । अत्र वाशब्दो व्यवस्थितः । ततश्च सर्वेष्टसिद्धिरिति । अनेकस्वरस्य किम् । नियौ ॥ धातोः किम् । वातप्रमीम् ॥ य्वोः किम् । सोमपौ ॥ स्वरादौ किम् । सेनानीभ्याम् ॥ स्यादौ किम् । सेनान्यर्थम् ॥ ७० ॥

नियः ॥ नीशब्दादुत्तरस्य ङेरामादेशः ॥ सेनान्याम् । एवं सुनीप्रधीग्रामण्यादयः । धातुना संयोगविशेषणात् उन्न्यौ । उपसर्गकारकपूर्वस्य किम् । परमनियौ । शुद्धधियौ ॥ अनेकस्वरस्य किम् । नियौ ॥ कुमारीमिच्छन् कुमारीवाचरन् वा कुमारी । हसेप इति सिलोपः । कुमार्यौ, कुमार्यः । अमि शसि च कुमार्यम् । कुमार्यः । शेषं बहुश्रेयसीवत् । सखायमिच्छति सखीयति । एकदेशविकृतस्यानन्यत्वात् ङैत्वे सखा, सखायौ, सखायः । हे सखीः । सखायम् । सख्यः ॥ सह खेन वर्तते सखस्तमिच्छति सखीः । सख्यौ । सुतमिच्छति सुतीः । सुत्यौ ॥ ७१ ॥

(सु०) नियः ॥ नीशब्देन नाम्नो विशेषणात्तदन्तविधिः । नीशब्दान्नीशब्दान्ताच्च नाम्नो ङेराम् स्यात् (क) ॥ लून्यीत्यत्र तु नातिव्याप्तिः लक्षणप्रतिपदोक्तयोरिति

(क) अयमाशयः—'निय' इति सूत्रेण विहितो ङेरामादेशस्तु नीशब्दस्यैव प्राप्नोति नतु सेनान्यादेः शब्दस्येति शङ्कावारणायाह—'नीशब्देनेति' । 'विशेषणं तदन्तस्य स्वस्य च रूपस्योपरस्थापकं वक्तव्यमिति परिभाषया निशब्दस्य नाम्नो विशेषणात्तदन्तविधिः नीशब्दान्तविधिः । तेन सेनान्यादेः शब्दस्यापि ङेरामादेशोभवतीति भावः । निर्गलितार्थं दर्शयति—नीशब्दादिति । निशब्दादुत्तरस्य ङेरामादेशोभवतीत्यर्थकथनात् । लूनीशब्दस्य चातिव्याप्तिः स्यात् तत्र तु लून्यीत्येव भाव्यं नतु लून्यामिति । तत्रस्याचह-

न्यायात् ॥ अर्थवद्ग्रहणे नानर्थकस्येति न्यायाच्च ॥ यत्वे आमादेशे च सेनान्याम् । एवं सुष्ठु नयतीति सुनीः ॥ प्रध्यायतीति प्रधीः । ध्यायतेः क्विपि संप्रसारणे रूपम् ॥ यदा तु प्रकृष्टा धीर्बुद्धिर्यस्येति विग्रहस्तदा धीशब्दस्य नित्यस्त्रीलिङ्गत्वात् ईदूदन्तस्य स्त्र्याख्यस्येति स्त्रीकार्ये बहुश्रेयसीवद्रूपम् ॥ सुष्ठु ध्यायतीति सुधीः । सुधीशब्दस्य च नेति निषेधादिय् । सुधियौ, सुधियः । इत्यादि ॥ ग्रामं नयतीति ग्रामणीः ॥ उन्नयतीत्युन्नीः । धातुना संयोगस्य विशेषणादिह य्वौ वेति यत्वं स्यादेव ॥ परमश्चासौ नीश्च परमनीः । शुद्धा धीर्यस्य स शुद्धधीः । उपसर्गकारकेतरपूर्वत्वादिय् । यदा तु शुद्धं ब्रह्म ध्यायतीति विगृह्यते तदा य्वौ वेति यत्वं भवत्येव ॥ नयतीति नीः । एकस्वरत्वादिहेय् ॥ कुमारीमिच्छतीति कुमारीयति । अथवा कुमारीवाचरतीति कुमारीयते कुमारयति वा । नाम्नो य ई चास्येति यप्रत्ययान्तात् कर्तुर्यङिति नाम्न आचारे क्यङन्ताभ्यां च कर्तरि क्विपि परतः यत इत्यल्लोपे यवयोर्वसे हकारे चेति यलोपे च कुमारीति रूपम् ॥ ननु कुमारीत्यत्रान्यार्थे ह्रस्यनेन ह्रस्वः स्यात् क्विबर्थं प्रतीबन्तस्योपसर्जनत्वात्, उच्यते । 'अन्यार्थे' इति सूत्रे कृत्रिमोपसर्जनं गृह्यते न त्वप्रधानरूपमिति । कुमारीशब्दे ईदूदन्तस्य स्त्र्याख्यस्येति स्त्रीकार्यं भवति । तेन धौ परे धौ ह्रस्व इति ह्रस्वः । ङिद्वचनेषु ङितां मडित्यट् । स्त्रियां योरिति ङेराम् । आमि तु नुट् । स्वरे य्वौ वेति यत्वम् । कथं तर्हि दुर्धियः वृश्चिकभिय इत्यादि । उपसर्गकारकपूर्वत्वाद्यत्वेन भाव्यमिति । उच्यते । दुःस्थिता धीर्येषामिति विग्रहे दुरित्यस्योपसर्गसंज्ञा नास्ति । यत्क्रियायुक्ताः प्रादयस्तं प्रत्येवोपसर्गसंज्ञका इत्युक्तत्वात् (क) । वृश्चिकसंबन्धिनी भीर्वृश्चिकभीरित्युत्तरपदलोपोऽत्र बोध्यः । भययोगाभावाद्वृश्चिकस्य नापादानत्वमिति भावः ॥ सखायमिच्छतीति सखीयति । नाम्नो य इति यप्रत्ययः । य इति दीर्घः । ततः क्विपि यत इत्यल्लोपः । यवयोर्वसे इति यलोपः । अल्लोपस्यात्र स्थानिवत्वेन यत्वं न भवति । क्वौ लुप्तं न स्थानिवदिति निषेधात् । एकदेशविकृतस्यानन्यतया डात्वमैत्वं च भवति । शसादौ स्वरे य्वौवेति यः ॥ सह खेन वर्तते यः स सख इति बहुव्रीहिः । "कं शीर्षे च सुखे खं खः सदिवि व्योमनीन्द्रिये । शून्ये बिन्दौ सुखे खल्नु" इति हैमः ॥ सखमिच्छतीति सखीयति । नाम्नो य ई चास्येति यः ईत्वं च । ततः क्विपि सखी । लक्षणप्रतिपदोक्तयोरिति न्यायान्नात्र डात्वम् । स्वरादिविभक्तौ य्वौ वेति यः ॥ एवं सुतमिच्छतीति सुतीयति क्विपि सुतीः ॥ ७१ ॥

(८०) नियं इति । अत्र 'णीञ् प्रापणे' इति धातुरेव गृह्यते न त्वन्यः लक्षणप्रति-

---

नातिव्याप्तिरिति तत्र हेतुं दर्शयति—लक्षणेति । लून्यीत्यस्य लाक्षणिकत्वात्तत्र नातिव्याप्तिरिति भावः। तत्र च हेत्वन्तरं दर्शयति—अर्थवद्ग्रहणे इति । लून्यीत्यस्य चार्थवत्त्वाभावा (अनर्थकत्वात्) न्नातिव्याप्तिरिति भावः ।

(क) दुर्धिय इत्यत्रोपसर्गपूर्वत्वेन वृश्चिकभिय इत्यत्र च कारकपूर्वत्वेन 'नीय' इति सूत्रेण तत्तच्छब्दघटकीभूतस्येकारस्य यकार एव भाव्य इति शङ्कते—कथमिति ।

नास्तीति । दुःस्थिता धीर्येषामिति विग्रहे कृते दुरिति भागस्योपसर्गसंज्ञा न भवतीत्यर्थः। तत्र हेतुं वदति—उक्तत्वादिति । यत्क्रियायुक्ताः=यया क्रियया सह सम्मिलिताः, प्रादयः—उपसर्गाः तं प्रत्येव=तां क्रियां प्रत्येव, ते उपसर्गाः न त्वन्यं प्रतीतिकथनाद् बहुव्रीहिसमासे तेषामत्र क्रियाया अभावादुपसर्गसंज्ञकत्वाभाव इत्याशयः ।

पदोक्तपरिभाषयाऽतो लून्यि इत्यादौ नातिप्रसङ्गः । क्वचिन्नियश्चेति चकारः स चिन्त्यप्रयोजन इति वृद्धाः ॥ उन्न्यावविति ॥ अत्र संयोगपूर्वकत्वेऽपि उपसर्गधात्वन्त्रयवसंयोगत्वाद्ग्वौ ॥ कुमारीमिच्छन्नित्यादि ॥ इच्छार्थयान्तादाचारक्विबन्ताद्वा कर्तरि क्विपि कुमारीति रूपम् । नेति पुरुष इत्यर्थः ॥ पुंस्त्वद्योतनायेदम् । कुमार्यमिति ॥ अल्लोपं बाधित्वा य्वौ वेति यः ॥ सखेति ॥ अत्रापि सखायमिच्छतीति वाक्ये अल्लोपयलोपयोः सखीति दीर्घान्तः । सेर्डाऽधेरित्यत्र ऐ सख्युरित्यस्य ह्रस्वान्तस्यानुवृत्तेरिह च ह्रस्वान्तस्य ग्रहणात् कथं दीर्घान्ते कार्यद्वयमित्यत आह-एकदेशेत्यादि ॥ एकदेशेन एकावयवेन विकृतं विकारवत् विपरीताकृत्यपि नान्यवद्भवतीत्यर्थः । यथा छिन्नकर्णोऽपि श्वा श्वैव नाश्व इति भावः ॥ नन्वात्राल्लोपस्य स्थानिवद्भावेन यादेशोऽस्त्विति चेन्न क्वौ लुप्तं न स्थानिवदिति परिभाषोपस्थानात् । लुप्तेति नपुंसके भावे क्तः । क्वौ लोप इति यावत् ॥ सखायमिति। अत्राम्शसोरिति बाधित्वा य्वौ वेति यः प्राप्तः ततोऽपि परत्वादै सख्युरित्यैत्वमेव तकारस्थानजादिति स्थानिवद्भावेनेति भावः ॥ ७१ ॥

(खीतीभ्यां कृतयादेशाभ्यां ङसिङसोरकारस्य उः)

सख्युः । सुत्युः ॥ ७२ ॥

(सु०) खीतीभ्यां कृतयादेशाभ्यां ङसिङसोरकारस्य उः ॥ य्वौ वेति कृतयाभ्यां खीतीवर्णाभ्यां परस्य ङसिङसोरस्य उः स्यात् ॥ ७२ ॥

(त०) कृतयादेशेत्यादि ॥ धात्ववयवसंयोगपूर्वत्वान्न यत्वं तदभावान्नोत्वमित्यर्थः ॥ ७२ ॥

(तकारस्थानजाद्वर्णादपि) लूनमिच्छतीति लूनीः । लून्युः । क्षामं प्रस्तीमं वेच्छतीति क्षामीः । क्षाम्युः । प्रस्तीमीः । प्रस्तीम्युः । शुष्कीः । पक्वीः । कृतयादेशत्वाभावान्नोत्वम् । शुष्कियः । पाकियः ॥ हूहूः, हूहौ, हूहः । हे हूहूः । हूहूम् , हूह्वौ, हूहून् । वातप्रमीवत् ॥ एवं हम्भूः । अतिचमूः । बहुश्रेयसीवत् ॥ खलपूः, खलप्वौ, खलप्वः । एवमुल्लुप्वादयः ॥ स्वयंभूः, स्वयंभुवौ, स्वयंभुवः । एवं लक्ष्वभूकटप्रूहम्भूकाराभूपरमात्वादयः ॥ वर्षाभूः, वर्षाभ्वौ, वर्षाभ्वः । वर्षाभ्वम् । एवं कारभूपुनर्भूहन्भूकरभूशब्दाः ॥ ७३ ॥

(सु०) तकारस्थानजाद्वर्णादपि ॥ कृतयादेशात्तकारस्थानोत्पन्नाद्वर्णात्परस्य ङसिङसोरस्य उः स्यात् ॥ लूनमिच्छतीति लूनीयति क्विपि लूनीः । ल्वादिभ्यश्चेति क्तस्य नः । क्षाममिच्छतीति क्षामीयति क्विपि क्षामीः । क्षायो म इति क्तस्य मः ॥ प्रस्तीममिच्छतीति प्रस्तीमीयति क्विपि प्रस्तीमीः । प्रस्त्यायतेः संप्रसारणं क्तस्य नत्वं च निपातनात् । क्षामं क्षीणं तु प्रस्तीमं विपरीतं निगद्यते' इति ॥ शुष्कं पक्वं वेच्छतीति शुष्कीयति । पक्वीयति। क्विपि शुष्कीः । पक्वीः । शुषेः क इति क्तस्य कः । पचो व इति क्तस्य वः । ङसिङसोः परतो य्वोर्धात्वोरितीयादेशे कृते य्वौ वेति यादेशाभावात्

स्त्रीतीभ्यामित्युत्वं न ॥ इतीदन्ताः ॥ उदन्ता हरिवत् ॥ इत्युदन्ताः ॥ गन्धर्वविशेषवाचकोऽव्युत्पन्नो हूहूशब्दः । अमि शसि च अमूशसोरित्यल्लोपः । अन्यत्र स्वरादौ विभक्तौ ह वमिति वत्वम् ॥ दृम्भतीति दृम्भूः । 'अन्दूदृम्भूजम्बूकफेलूकर्कन्धूर्दिधिषूः' इत्युणादिसूत्रेण कूप्रत्ययो नुमागमश्च निपात्यते । अयमूकारो धातोर्न । तेन उ वमिति वत्वम्। दृभी ग्रन्थे । दृम्भूः ग्रन्थकर्ता ॥ चमूं सेनामतिक्रान्तो यः सोऽतिचमूः । 'अतिचमूशब्दे तु स्त्रीकार्यं विशेषः। धौ हे अतिचमु ङिति अतिचम्वै । अतिचम्वाः । आमि अतिचमूनाम् । ङौ अतिचम्वाम् ॥ खलं पुनातीति खलपूः । पूञः क्विप् । स्वरादौ विभक्तौ य्वौ वेति वत्वम् । स्वयं भवतीति स्वयम्भूः । क्विबन्तः । अन्यभूशब्दस्येति निषेधात् वत्वं न ॥ लुनातीति लूः । अनेकस्वरत्वाभावात् वत्वं न । स्वेन भवतीति स्वभूः । अन्यभूशब्दस्येति निषेधाद्वत्वं न ॥ कटं प्रवत इति कटप्रूः । धातोरवयवसंयोगपूर्वकत्वाद्वत्वं न ॥ दृम्भ्यां भवतीति दृम्भूः ॥ कारायां भवतीति काराभूः । अन्यभूशब्दस्येति वत्वं न ॥ परमश्चासौ लूश्च परमलूः । उपसर्गकारकेतरपूर्वकत्वाद्वत्वं न ॥ वर्षासु भवतीति वर्षाभूः । य्वौ वेति वत्वं स्वरे । 'भेके' मण्डूकवर्षाभूशालूरप्लवदर्दुराः' इत्यमरः ॥ 'भेक्यां पुनर्नवायां स्त्री वर्षाभूर्दर्दुरे पुमान्' इति यादवः ॥ कर एव कारः स्वार्थिकोऽण् । कारे भवतीति कारभूः । वत्वम् ॥ पुनर्भवतीति । पुनर्भूरिति । क्रियाशब्दः । 'पुनर्भूर्दिधिषूरूढा द्विः' इत्यमरः ॥ पुनर्भूशब्दस्तु नित्यस्त्रीलिङ्ग एव ॥ दृन्निति नान्ते हिंसार्थाव्यये पूर्वपदे भुवः क्विप् । दृन्भूः । तरुः सर्पजातिः कपिश्च ॥ करे भवतीति करभूः । वत्वम् ॥ इत्यूदन्ताः ॥ ७३ ॥

सेरा ॥ ऋकारान्तात्परस्य सेरा भवति स च डित् ॥ पिता ॥ ७४ ॥

(सु०) **सेरा** ॥ ऋतो ङ उरित्यतः ऋत इत्यनुवृत्तम् । ऋदन्तान्नाम्नः सेरा स्यात् स च डिद्वत् ॥ पितृ सि इत्यत्र पञ्चसु इत्यर् प्राप्तः सेरा इत्यात्वं च प्राप्तम् । तत्र येन नाप्राप्ते यो विधिरारभ्यते स तस्यापवाद इति न्यायेनार् इत्यस्य बाधकोऽयमाकारः प्रथमं प्रवर्तते । ततस्तस्य स्थानिवत्त्वेन आ इत्यस्य सित्वात्तस्मिन् परे अर् टिलोपश्चेति द्वयं प्राप्तम् । तत्र परत्वान्नित्यत्वाच्च टिलोपः (क) ॥ "पिता माता ननान्दा नप्तृत्वष्टृभ्रातृयातरः । जामाता दुहिता देवा न हि ऋन्ता इमे दश ॥ १ ॥" अव्युत्पत्तिपक्षमाश्रित्येदमुक्तम् ॥ ७४ ॥

(त०) **सेरेति** ॥ अत्र ऋतो ङ उरित्यत ऋत इत्यनुवर्तते ॥ सेः किम् । पितृभ्याम् ॥ ऋतः किम् । हूहूः । तपरत्वं किम् । तॄः । अत्र पितृ सि इति स्थिते पञ्चस्वित्यर् प्राप्तेऽप्यल्पविषयत्वात् सेरेत्यादौ प्रवर्तते । ततः स्थानिवद्भावाट्टिलोपेऽरि च प्राप्ते परत्वाट्टिलोप एव ॥ अत्राहुः । अन् साविल्येव सूत्रयितुमुचितम् । तथा च अनि सति नो-

(क) **प्राप्तमिति** । सिप्रत्ययस्यापञ्चवचनान्तर्गतत्वात् पञ्चस्वित्यरः प्राप्तिः । अल्पत्वेन प्राधान्यात् 'सेरेति' आत्वस्य प्राप्तिरित्यर्थः । अनयोः कस्य वादौ प्राप्तिः कस्य वा पश्चादत्राह—**तत्र येनेति** । येन=आत्वविधिना, नाप्राप्ते=न अप्राप्ते प्राप्ते=सति, योविधिः=आर् विधिः, आरभ्यते=उत्पद्यते, स=आत्वविधिः तस्य=आर् विधेः, अपवादः, इति न्यायेन आर् इत्यस्य=विधेः, बाधकोऽपवादक आत्वविधिः प्रथमं प्रवर्तते प्राप्तः । ततः पश्चात् स्थानिवत्परिभाषया अर् इत्यस्य सित्वात्=सिप्रत्ययत्वात् अर् प्राप्तः टिलोपश्च प्राप्त इत्यर्थः । ननु अर् इति विधानात् प्रागेव टिलोपो भवत्विति समाधत्ते—**तत्रेति** । अत्र तत्त्वदीपिका द्रष्टव्या ।

पथाया इति दीर्घे हसेप इति लोपे सिद्ध्यतीष्टमिति । अत्रेदमवधेयम् । अन् साविति कृतेऽर्द्धमात्रालाघवेऽपि सूत्रद्वयापेक्षत्वेन प्रक्रियागौरवमित्युपेक्षितम् ॥ ७४ ॥

पञ्चसु ॥ ऋकारस्यार भवति पञ्चसु ॥ पितरौ, पितरः ॥ ७५ ॥

(सु०) पञ्चसु ॥ नाम्न ऋतोऽर् स्यात् स्यादिषु पञ्चसु ॥ स्यादौ किम् । बिभ्रतः॥

(त०) पञ्चस्विति ॥ अरित्यनुवर्तते । तच्च ऋत एव न तु तदन्तस्य निर्दिश्यमानस्यादेशा भवन्तीति वचनात् ॥ ऋतः किम् । हूहौ ॥ तपरत्वं किम् । त्रौ ॥ पञ्चसु किम् । पितृभ्याम् ॥ अत्र लाघवात् ङिपञ्चस्वित्येकयोगः समुचितः । पृथग्योगकरणमरोऽनित्यत्वज्ञापनायेति कश्चित् । तेन प्रियतिस्रौ, प्रियतिस्रेत्यादौ नेति भावः ॥ ७५ ॥

धेरर् ॥ ऋकारान्तात्परस्य धेरर् भवति स च ङित् । हे पितः । पितरम् , पितरौ, पितॄन् ॥ ७६ ॥

(सु०) धेरर् ॥ पञ्चसु इत्यस्य स्तुरार् इत्यस्य चापवादोऽयम् । ऋदन्ताद्धेरर् स्यात् स च ङिद्वत् ॥ ७६ ॥

(त०) धेररिति ॥ अत्र वृद्धाः । माऽस्त्विदं सूत्रं पञ्चस्वित्यनेनारि कृते हसेप इति संयोगान्त इति वा सिलोपे रूपसिद्धेः । अथ सेरेत्यस्य प्रवृत्तौ रूपासिद्धिरिति न वाच्यम् । तत्राधेरिति योजनीयमतो न हानिः ॥ अथ ङावित्यत्रानुवृत्त्यर्थमिति चेत् तत्र 'अङौ' इत्यस्यैव सुवचत्वात्, लाघवे विशेषाभाव इति चेत् एकवाक्येनार्थलाघवसद्भावात् नैवं हे कर्तरित्यत्राप्यार्प्रसङ्ग इति वाच्यं तत्रापि सेराऽधेररित्यतोऽधेरित्यनुवर्त्य विभक्तिविपरिणामेनाधाविति व्याख्येयमित्यतो धावरः प्रतिषेधात् । अत्रोच्यते । सूत्रं विना हे कर्तरिति न सिद्ध्येत् । तथा हि । प्रथमं पञ्चस्विति अर् प्राप्तः तदपवादः स्तुराररिति आर् प्राप्तः स चाधाविति प्रतिषिद्धः । देवदत्तस्य हन्तरि हते न हि देवदत्तो जीवतीति न्यायेनारि निषिद्धेऽप्यर् न स्यात् । सूत्रारम्भे तु धेररिति टिलोपे च सिद्धम् हे कर्तरिति । यदि त्वपवादे पुनरुत्सर्गस्य प्रवृत्तिरिति न्याय आश्रीयते यथा वासिष्ठ इत्यादौ तदेदं सूत्रं व्यर्थमित्याहुः ॥ ७६ ॥

(ऋतो ङ उः) पितुः ॥

ङौ ॥ ऋकारस्यार् भवति ङौ परे ॥ पितरि ॥ एवं जामातृभ्रात्रादयः ॥ ७७ ॥

(सु०) ङौ ॥ नाम्न ऋतोऽर् स्यात् ङौ परे ॥ ङौ किम् । पित्रे । नयतेर्ऋन्चेति ऋप्रत्ययान्तो नृशब्दः । ना, नरौ, नरः ॥ ७७ ॥

(त०) ङाविति ॥ अत्र ङिदिति निवृत्तं ङित्कार्यस्यासम्भवात् । ऋत इत्यनुवृत्तं पञ्चम्यन्तमर्थवशात्षष्ठ्या विपरिणम्यते । अत्रापि कर्तरीति निर्देशान्निर्दिश्यमानस्यैव ग्रहणम् । न तु तदन्तस्य । ङिपरत्वमप्यृत एव । तेन ग्रन्थकृतीत्यादौ नातिप्रसङ्गः ॥ ऋतः किम् । वातप्रमी ॥ तपरः किम् । क्रि ॥ ७७ ॥

(नुर्वा नामि दीर्घः) नृणाम्—नॄणाम् । शेषं पितृवत् ॥ ७८ ॥

(सु०) नुर्वा नामि दीर्घः ॥ नृशब्दस्य वा दीर्घो भवति नामि परे ॥ ७८ ॥

स्तुरार् ॥ सकारतृप्रत्ययसंबन्धिनः ऋकारस्यार् भवति पञ्चसु ॥ कर्ता, कर्तारौ, कर्तारः । हे कर्तः । कर्तारम् , कर्तारौ, कर्तॄन् ॥ ७९ ॥

(सु०) **स्तुरार्** ॥ स् च ता चानयोः समाहारस्तृ तस्य स्तुः । स्तोरितिवद्बोध्यम् सकारसहितस्ता तस्य स्तुरिति वा । सकारात् परस्य तृप्रत्ययावयवस्य च ऋत आर् स्यात् पञ्चसु ॥ कर्तृ सि इत्यत्र आरपेक्षया सेरस्यस्यैव प्रथमप्रवर्तनस्यौचित्यं नित्यत्वात् । तत- स्सिलोपः । वस्तुतः पूर्वमारि कृते तु वर्णमात्रविधौ यदादेश इत्यस्याभावात् 'सेरा' इत्यात्वं न स्यादिति आत्वमेव पूर्वं विधेयमिति ॥ स्तुरिति किम् । ना, नरौ नरः ॥७९॥

(त०)**स्तुरारिति** ॥ स् च तृ च स्तृ तस्य स्तुः । स्त्रोरिति केचित् । सात्परत्वं तृशब्दस्यावयवत्वमृकारे बोध्यम् । न तु संयोगसमवायौ ऋकारस्य वर्णत्वेन शब्दत्वात् संयोगसमवाययोरभावात् । शब्दस्य गुणत्वेन संयोगाभावः तस्य द्रव्यमात्रधर्मत्वात् । शब्दस्याकाशमात्रसमवेतत्वेन समवायाभावश्च ॥ ननु तृ इत्युक्ते तृणो न ग्रहणं निरनुबन्ध- कग्रहणे न सानुबन्धकस्येति न्यायात् इति चेन्न परिभाषाया अनित्यत्वात् । प्रशास्तृश- ब्दस्यैव तृशब्दस्य ग्रहणं व्याख्यानात् । लक्ष्यानुरोधो व्याकरणान्तरं चात्र मूलम् । न प्त्रादीनां मातृपित्रादीनां तु नेति व्याख्यायां व्याख्यानमेव शरणम् । उभयेषामपि व्युत्प- न्नाव्युत्पत्तिपक्षयोः समत्वात् ॥ ७९ ॥

(उद्गातृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणां च) उद्गाता । नप्ता । क्रोष्टुशब्दस्य पुंसि पञ्चसु स्यादिषु स्त्रियां च तृवद्रूपम् ॥ क्रोष्टा, क्रोष्टारौ, क्रोष्टारः । हे क्रोष्टो क्रोष्टारम् , क्रोष्टारौ, क्रोष्टून् ॥८०॥

(सु०) उद्गातृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणां च ॥ एषामप्यार् स्यात् पञ्चसु ॥ किं च उद्गात्रादीनां त्रन्तानामारिष्टः । पितृमातृभ्रातृजामातृयातृदुहितृ- शब्दानां त्रन्तानामरिष्टस्तत्र किं प्रमाणम् । व्युत्पत्तिपक्षे उद्गात्रादयः पित्रादयश्च उणादौ त्रन्ता व्युत्पादिताः । अव्युत्पत्तिपक्षे तूद्गात्रादयः पित्रादयश्चाव्युत्पन्ना न तृप्रत्ययान्ता इति । उच्यते । व्युत्पत्तिपक्षे तृप्रत्ययान्तत्वादेवारि सिद्धे उद्गात्रादिग्रहणं व्यर्थम् । व्यर्थं सति नियम्यते । औणादिकानामुद्गात्रादीनामेव त्रन्तानामार् न तु औणादिकानां त्रन्ता- नां संज्ञाशब्दानामन्येषां पितृप्रभृतीनामिति । अव्युत्पत्तिपक्षे तूद्गात्रादिग्रहणं विध्यर्थमिति पितृमातृभ्रातृप्रभृतीनामार् इत्यस्य शङ्कैव नास्तीति ॥ क्रोष्टुशब्दस्य पुंसि पञ्चसु स्या- दिषु स्त्रियां च तृवद्रूपम् । क्रोष्टुशब्दस्य स्थाने क्रोष्टृ इति तृप्रत्ययान्तं रूपं भवति पुंसि पञ्चसु परेषु स्त्रीलिङ्गे च । 'क्रुश आह्वाने' अस्मादौणादिके तुप्रत्यये क्रोष्टु-शब्दः । तृन्- तृचाविति तृप्रत्यये तु क्रोष्टृशब्दः । द्वावपि शृगालवाचिनौ । तत्राविशेषे द्वयोः प्रयोगे प्राप्ते पञ्चसु स्यादिषु स्त्रियां च तृप्रत्ययान्त एव । तृतीयादौ स्वरे उभयम् । अन्यत्र तु प्रत्ययान्त एवेति नियमार्थमिदमारम्भणीयम् । निमित्तव्यपदेशतादात्म्यशास्त्रकार्यरूपवि- षयकत्वेनातिदेशस्य षड्विधत्वेऽपि प्राधान्यादिह रूपमेवातिदिश्यते तच्च क्रुशेरेव । उप- स्थितत्वादर्थतः सादृश्याच्च ॥ ८० ॥

(टादौ स्वरे क्रोष्टुशब्दस्य तृवद्वा) क्रोष्ट्रा—क्रोष्टुना ।

क्रोष्ट्रे-क्रोष्टवे । क्रोष्टुः-क्रोष्टोः । क्रोष्टुः-क्रोष्टोः । क्रोष्ट्रोः-क्रोष्ट्वोः । कृताकृतप्रसङ्गी यो विधिः स नित्यः । नित्यानित्ययोर्मध्ये नित्यविधिर्बलवान्(क) । क्रोष्टूनाम् । क्रोष्टरि-क्रोष्टौ ॥ सह इना कामेन वर्तते सेः, सयौ, सयः । स्मृता ईर्लक्ष्मीर्येन स स्मृतेः, स्मृतयौ, स्मृतयः ॥ ८१ ॥

(सु०) टादौ स्वरे क्रोष्टुशब्दस्य तृवद्वा ॥ क्रोष्टृशब्दो वा तृप्रत्ययान्तः प्रयोज्यष्टादौ स्वरे ॥ तृप्रत्ययान्तक्रोष्टृशब्दस्य कर्तृवद्रूपमुकारान्तक्रोष्टुशब्दस्य भानुवत् । आमि तु तृवद्भावे नुडागमे च प्राप्ते सत्याह । कृतं चाकृतं च कृताकृते कृताकृतयोः प्रसङ्गोऽस्यास्तीति कृताकृतप्रसङ्गी यो विधिः स नित्यो विधिर्भवति । तृवद्भावे कृतेऽकृते च नुड्विधिर्नित्यः तृवद्भावस्त्वनित्यः । नित्यश्चानित्यश्च नित्यानित्यौ तयोर्नित्यानित्ययोर्विध्योर्मध्ये नित्यो विधिर्बलवान्बलिष्ठः ॥ कौमुद्यां तु आमि परत्वात् तृज्वद्भावे प्राप्ते नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेनेति नुडेव । तेन वारीणाम् । तिसृणाम् । क्रोष्टूनामिति(ख) ॥ इत्युदन्ताः ॥ 'कॄ विक्षेपे ।' 'तॄ प्लवनतरणयोः ।' अनयोरनुकरणे कॄ तॄ इति ॥ प्रकृतिवदनुकरणमिति वैकल्पिकातिदेशात् 'ऋत इर्' इति इरि 'ध्वो वि हसे' इति दीर्घे च कीः, किरौ, किरः, तीः, तिरौ, तिरः । इत्यादि गीर्वत् । इरभावपक्षे तु कॄः, क्रौ, क्रः । क्रम्, क्रौ, कॄन् । क्रा । क्रे । ङसिङसोः क्रः । दीर्घान्तत्वादामो न नुट् क्राम् । ङौ तु क्रि ॥ इत्यृदन्ताः ॥ 'गम्लृ गतौ ।' 'शक्लृ शक्तौ ।' अनयोरनुकरणे गम्लृ शक्लृ इति । ऋवर्णलृवर्णौ चेति सावर्ण्यात् सेरेत्यात्वम् । गमा । शका । पञ्चल्विवत्यल् ॥ गमलौ, गमलः । गमलम्, गमलौ । शसि तु गम्लृन् । लृकारस्य दीर्घत्वाभावाच्छसीति न दीर्घः ॥ लृ लमिति लः । गम्ला । गम्ले । ङसिङसोस्तु ऋतो ङ उरित्युत्वम् । गमुल् । शकुल् । ङौ तु गमलि । शकलि ॥ इति लृदन्ताः ॥ अस्यापत्यमिः कामः । अस्य कृष्णस्य स्त्री ईर्लक्ष्मीः । तेन तया वा सह वर्तते यः स सेः । सहादेरिति सहस्य सस्तत एत्वम् । स्वरादौ विभक्तावय् । सयौ ॥ इत्येदन्ताः ॥ ८१ ॥

(क) कृतं चाकृतं च कृताकृते कृताकृतयोः प्रसङ्गोऽस्यास्तीति कृताकृतप्रसङ्गी यो विधिः स नित्यो विधिः । तृवद्भावे कृतेऽकृते च नुड्विधिर्नित्यः तृवद्भावस्त्वनित्यः । नित्यश्चानित्यश्च नित्यानित्यौ तयोर्नित्यानित्ययोर्विध्योर्मध्ये नित्यो विधिर्बलवान् बलिष्ठः ॥

क्रोष्टु शब्दस्य रूपं यथा—

क्रोष्टा,	क्रोष्टारं,	क्रोष्टा-क्रोष्टुना,	क्रोष्ट्रे-क्रोष्टवे,
क्रोष्टारौ,	क्रोष्टारौ,	क्रोष्टुभ्याम् ,	क्रोष्टुभ्याम् ,
क्रोष्टारः,	क्रोष्टून् ,	क्रोष्टुभिः,	क्रोष्टुभ्यः

क्रोष्टुः-क्रोष्टोः,	क्रोष्टुः-क्रोष्टोः	क्रोष्टरि-क्रोष्टौ
क्रोष्टुभ्याम् ,	क्रोष्ट्रोः-क्रोष्ट्वोः	क्रोष्ट्रोः-क्रोष्ट्वोः
क्रोष्टुभ्यः,	क्रोष्टूनाम् ,	क्रोष्टुषु

हे क्रोष्टो
हे क्रोष्टारौ
हे क्रोष्टारः ।

(ख) पाणिनीयमतं दर्शयति—कौमुद्यामिति । सिद्धान्तकौमुद्यामिति भावार्थः ।

रै स्भि ।। रैशब्दस्याकारादेशो भवति सकारभकारादौ स्यादौ विभक्तौ ॥ सुराः, सुरायौ, सुरायः । सुराभ्याम् । सुरासु ।। ८२ ॥

(सु०) रै स्भि ॥ रै इत्यविभक्तिको निर्देशः । रायः आत्वं स्यात् स्भादौ विभक्तौ ॥ स्भीति किम् । रायौ ॥ स्यादौ किम् । रैभारः । रैसहायः । 'अर्थ रैविभवा अपि' इत्यमरः ॥ इत्यैदन्ताः ॥ ८२ ॥

(त०) रै स्भीति ॥ स् च भ् च स्भ तस्मिन् । स्भादौ स्यादावित्यर्थः ॥ स्भादौ किम् । रायौ ॥ स्यादौ किम् । रैभारः । रैसहायः ॥ ऐ स्भीति न सूत्रितम् । 'ऐकारः स्यान्महेश्वरः' इत्येकाक्षरकोशादिस्थैकारान्तेऽतिप्रसङ्गात् ॥ ८२ ॥

ओरौ ॥ ओकारस्यौकारादेशो भवति पञ्चसु ॥ गौः, गावौ, गावः । हे गौः ॥ ८३ ॥

(सु०) ओरौ ॥ ओकारस्यौकारो भवति ओकारान्ताद्विहितेषु पञ्चसु परेषु ॥ पञ्चसु किम् । गवा ॥ विहितविशेषणं किम् । हे भानो । हे भानवः । धौ पुओ जसीत्योकारे कृते औत्वं प्राप्तं विहितविशेषणाद्वार्यते ॥ ८३ ॥

(त०) ओराविति ॥ ओकारान्ताद्विहितेषु पञ्चसु स्यादिष्विति बोध्यम् । तेन हे भानौ, हे भानव इत्यादौ नातिप्रसङ्गः । उकारान्ताद्विहितौ सिजसावत्र न त्वोकारान्तात् ॥ नन्वोरित्युक्ते उवर्णस्य कुतो न ग्रहणमिति चेन्न द्विगुः उत ऊरित्यादिनिर्देशेन ओकारस्यैव ग्रहणात् ॥ ८३ ॥

आऽम्शसि ॥ ओकारस्यात्वं भवति अमि शसि च ॥ गाम्, गावौ, गाः । गवा, गोभ्याम् । ङस्य । गोः । एवं सुद्यौः । स्मृत उः शम्भुर्येन स स्मृतौः, स्मृतावौ, स्मृतावः । ग्लौः, ग्लावौ, ग्लावः ॥ ८४ ॥

इति स्वरान्ताः पुँल्लिंगाः ॥

(सु०) आऽम्शसि ॥ ओत आत्वं स्यात् ॥ शसा साहचर्यात् स्यादीनामेवम् गृह्यते । नेह । अचिनवम् । असुनवम्(क) । औतोऽपवादोऽयम् । अम् च शश्चानयोसमाहारोऽम्शस् तस्मिन् अम्शसि । गाः इत्यत्र न त्वाम्शसीत्यात्वे इत्युक्तेः 'सो नः पुंसः' इत्यनेन सस्य नकारो न । सुष्ठु द्यौर्यस्मिन् दिवसे स सुद्यौः । 'द्योदिवौ द्वे स्त्रियामभ्रम्' इत्यमरः ॥ उः शम्भुः स्मृतो येनः सः स्मृतौः । बहुव्रीहाविति क्तान्तस्य पूर्वनिपातः ॥ इत्योदन्ताः ॥ 'ग्लौर्मृगाङ्कः कलानिधिः' इत्यमरः, ॥ स्वरे आव् । ग्लावौ, ग्लावः ॥ इत्यौदन्ताः ॥ ८४ ॥ इति सुबोधिन्यां स्वरान्ताः पुंलिङ्गाः ॥

(त०) आऽम्शसीति ॥ आ अम्शसीति च्छेदः । अम् च शस् च अनयोः समाहारोऽम्शस् तस्मिन् ॥ अम्शसीति किम् । गावौ । स्तोर्व उरित्यादिनिर्देशान्नोवर्णशङ्का ।

(क) अचिनवम्, असुनवम्, इत्यादौ लङ्थामि आम् परत्वात्कथमात्वं नेति शङ्कां समाधत्ते—शसेति ।

दर्पणीनृपञ्चशासितपूर्व्यां काटकीयपुरुषोत्तमपत्न्याम् ।

यास्कवंशजनुदीनजनस्य श्रीनवस्य रचनास्तु रमेशे ॥

इति श्रीचक्रधराख्यटिप्पण्यां स्वरान्तपुँल्लिङ्गाः समाप्ताः । जगतः शुभमस्तु ।

स्याद्यधिकाराददिनवमित्यत्रातिप्रसङ्गोऽपि न । ओतः किम् । ग्लावम् ॥ ८४ ॥

श्रीविद्यानगरस्थायिलोकेशकरशर्मणा कृतायामिह टीकायां पुँल्लिङ्गोऽगात्स्वरान्तकः ॥

इति तत्त्वदीपिकायां स्वरान्ताः पुँल्लिङ्गाः ॥ ७ ॥

अथ स्वरान्ताः स्त्रीलिङ्गाः ॥ ८ ॥

आपः ॥ आदन्तादाबन्तात्परस्य सेर्लोपो भवति ॥ गङ्गा ॥ १ ॥

(सु०) **आपः** ॥ आ आप इत्याकारप्रश्लेषादाकारान्तादाबन्तान्नाम्नः परस्य सेर्लोपः स्यात् ॥ आबन्तात्किम् । सोमपाः ॥ आदन्तात्किम् । खट्वामतिक्रान्तोऽतिखट्वः । एकदेशविकृतस्यानन्यत्वादाबन्तत्वेऽपि न सिलोपः आदन्ताबन्ताभावात् ॥ १ ॥

(त०) **आप** इति ॥ अत्र आ आबिति प्रश्लेषादाकाररूपस्यैवापो ग्रहणादतिगङ्ग इत्यादौ नातिप्रसङ्गः । न चात्र गौणमुख्यन्यायादेव नेति वाच्यं तस्य विशिष्टरूपोपादानविषयत्वात् । अत्र तु आप इति प्रत्ययग्रहणं न तु किंचिद्विशिष्टरूपम् ॥ अत्राहुः ॥ आप इति सानुबन्धग्रहणं व्यर्थविशेषग्रहणं त्वर्थविशेषादेवेति । अत्रेदमवधेयम् । अर्थविशेषानुशरणानुधावनतः सानुबन्धनिर्देशस्य लघुत्वात् ॥ न चाप इति सूत्रं व्यर्थं हसेपः सेर्लोप इत्यत्रैव हस आ ईबिति प्रश्लेषेण पकारस्योभययोजनेनैवेष्टसिद्धेः । उत्तरत्रोभयानुवृत्तिस्तु स्त्रीभ्रुवोरित्यस्याम्शसीत्यत्रैव निरसनायेति चेत् । न । त्रिद्वन्द्वे सति पश्चात्पकारेण सम्बन्धे अन्तरङ्गत्वाद् इ ए इति कृते हसेप इति स्यात् । त्रिपदे द्वन्द्वे तु पकारस्याकारेण संबन्धो न लभ्यते । अतः सूत्रारम्भ एवोचित इत्युक्तं वृद्धैः । तत्रेदमवधेयम् । अद्वएसवर्णदीर्घयोरन्तरङ्गबहिरङ्गत्वविशेषे मानाभावः । किं च हसैप इति जातेऽपि मात्रागौरवाभावः । किं च त्रिपदेऽपि द्वन्द्वे पकारानन्वये न कापि क्षतिः । लुनः शान्तिः सोममालभेतेत्यत्रेव अर्थविशेषस्यैव निश्चायकत्वमिति स्वयमेवास्याभ्युपगमादित्यूहनीयमायुष्मता ॥ १ ॥

औ आदन्तादाबन्तात्पर औ ईर्भवति ॥ गङ्गे, गाङ्गः ॥ २ ॥

(सु०) **औ** ॥ औ इत्यविभक्तिको निर्देशः । आप इत्यनुवर्तते । धिरीरित्यत ई इति च ॥ २ ॥

(त०) **औ** इति ॥ अविभक्तिकमौकारविभक्तेरनुकरणम् ॥ आप इति किम् । सोमपौ । आदन्तात्किम् । गङ्ग्यौ । दीर्घग्रहणं तु 'ध्वे ह्रित्वे' इत्येतदर्थम् । जरसीति तु सन्निपातपरिभाषयैव ॥ तद्ध्रस्वत्वेऽपि न क्षतिः ॥ २ ॥

धिरीः ॥ आदन्तादाबन्तात्परो धिरीर्भवति । हे गङ्गे । गङ्गाम्, गङ्गे, गङ्गाः ॥ ३ ॥

(सु०) **धिरीः** ॥ आप इत्यनुवर्तते । दीर्घविधानमौ इति सूत्रेऽनुवृत्त्यर्थम् । वस्तुतस्तु ह्रस्व एव युक्तः । शसि तु धीत्वाद्यत्वाभावः । गङ्गाः ॥ ३ ॥

(त०) **धिरीरिति** ॥ दीर्घविधानमुत्तरार्थम् । जराशब्दस्य तूक्तरीत्यव निरासः । आपः किम् । हे हाहाः ॥ आदन्तात्किम् । हे अतिगङ्गे । हे अतिगङ्गे, इत्यत्र स्थानिवद्भावेन धेर्लोपस्तु न सूत्रारम्भसामर्थ्यात् ॥ ३ ॥

टौसोरेः ॥ आदन्तस्याबन्तस्य टौसोः परयोरेत्वं भवति ॥ गङ्गया ।

(सु०) टौसोरेः ॥ टाश्च ओश्च टौसौ तयोष्टौसोः परतः आदन्तस्याबन्तस्यैत्वं स्यात् ।४।

(त०) टौसोरेरिति ॥ टाश्च औश्च टौसौ तयोः ॥ आपः किम् । हाहा । हाहौ । अत्राप्याकारं प्रश्लिष्य पूर्ववदादन्तस्याबन्तस्येति व्याख्यानादतिगङ्गिया इत्यादौ नातिप्रसङ्गः ॥४॥

ङितां यट् ॥ आदन्तादाबन्तात्परेषां ङेङसिङस्ङीनां यडागमो भवति ॥ गङ्गायै । गङ्गायाः । गङ्गायाः, गङ्गयोः, गङ्गानाम् ॥ ५ ॥

(सु०) ङितां यट् ॥ ङ् इद्येषां तानि तेषां ङिताम् । वचनापेक्षया क्लीबत्वम् । ङ् इत् यासां ता ङितस्तासाम् । विभक्त्यपेक्षया स्त्रीत्वं वा । ङ् इत् येषां ते ङितस्तेषाम् प्रत्ययापेक्षया पुंस्त्वं वा । आदन्ताबन्तात् ङितां यट् स्यात् ॥ टित्वादादौ ऐत्वम् ॥ गङ्गायै । सवर्णदीर्घे । गङ्गायाः ॥ ५ ॥

(त०) ङितां यडिति ॥ ङ् इद्येषां यासां वेति वचनविभक्तिप्रत्ययानामन्यतमस्यान्यपदार्थत्वेन विग्रहः ॥ आप इति किम् । हाहे ॥ आदन्तादिति किम् । अतिगङ्गाय ॥ ङितां किम् । गङ्गा ॥ अतिगङ्गायेत्यत्र तु आकारस्य श्रूयमाणत्वात्स्थानिवत्त्वेनाबन्तत्वाच्च यट् तु न । लाक्षणिकत्वात् । अवयवशो व्युत्पादितत्वादिति स्वीकारात् ॥ ५ ॥

आम्ङेः ॥ आदन्तादाबन्तात्परस्य ङेरामादेशो भवति ॥ गङ्गायाम्, गङ्गयोः, गङ्गासु ॥ एवं श्रद्धामेधादुर्गादयः ॥ ६ ॥

(सु०) आम्ङेः ॥ तिप्तेवत्क्रियायामित्यादिनिर्देशात् सप्तम्येकवचनस्यैव ग्रहणं न तु चतुर्थ्येकवचनस्य ॥ ननु गङ्गायामित्यादौ ङेरामादेशे कृते नुडाम इति नुट् स्यादिति चेन्न । परत्वात् ङितामिति यटा बाधनात् ॥ ननु ङितां यडागमो विधीयते आमादेशस्तु न ङिदिति कथं तस्य यडिति चेन्न । आदेशः स्थानिकार्यं लभते इति स्वीकारात् । अत्र क्रियायामिति निर्देशो मानम् ॥ श्रद्धा प्रतीतिः मेधा बुद्धिः । दुर्गा पार्वती ॥ ६ ॥

(त०) आम्ङेरिति ॥ अत्र ङेरिति सप्तम्येकवचनम् । न तु चतुर्थ्येकवचनम् । व्याख्यानात् । अत्रार्थे क्रियायामित्यादिनिर्देशोऽप्यनुकूलः ॥ ननु गङ्गायामित्यादौ नुडाम इति नुडस्तु इति चेत् न परत्वाद्यटा बाधात् । न चामि कृते ङित्वाभावाद्यडेव कथमिति वाच्यम् । आदेशः स्थानिकार्यं लभत इत्यभ्युपगमात् । अत्रापि क्रियायामिति निर्देशो मानम् ॥ ६ ॥

(अम्बार्थानां द्विस्वराणां धौ ह्रस्वः) हे अम्ब । हे अक्क । हे अल्ल । शेषं गङ्गावत् । द्विस्वराणामिति किम् । हे अम्बाडे । हे अम्बाले । हे अम्बिके ॥ ७ ॥

(सु०) अम्बार्थानां द्विस्वराणां धौ ह्रस्वः ॥ अम्बार्थानां द्विस्वराणां ह्रस्वः स्याद्धौ परे ॥ "अम्बा माताऽथ बाला स्यात्" इत्यमरः ॥ ७ ॥

(त०) अम्बार्थानामिति ॥ एतन्मूलं तु यटोऽच्चेत्यतोऽनुक्तसमुच्चयार्थचकारानुवृत्तिस्ततोऽस्यार्थस्य संग्रह इति वृद्धाः ॥ ७ ॥

याटोऽच्च ॥ सर्वादेः परस्य यटः सुडागमो भवति पूर्वस्य चापोऽका-

रः ॥ सर्वस्यै । सर्वस्याः । सर्वस्याः, सर्वयोः, सर्वासाम् । सर्वस्याम् । एवं विश्वादयोऽप्याबन्ताः ॥ जरा, जरसौ–जेरे, जरसः–जराः ॥ ८ ॥

(सु०) यटोऽच्च ॥ आप इत्यनुवर्तते । आबन्तसर्वादेर्यडागमस्य सुट् स्यात् आपः स्थानेऽच्च ॥ सर्वादेः किम् । गङ्गायै ॥ यटः किम् । सर्वाभ्याम् ॥ जृष् वयोहानावित्यस्मात् 'षिद्भिदादिभ्योऽङ्' इत्यङि 'ऋदृशोऽङि गुणः' इति गुणे कृते आप् । जरा । जरायाः स्वरादौ जरसिति स्वरादिविभक्तौ जरस् । औ परतः औ इतोत्वं न नित्यत्वाज्जरस् । जरसौ । आमि तु जरसामिति । जराया इति वचनसामर्थ्यात् ॥ पक्षे हसादौ च गङ्गावत् ॥८॥

(त०) यटोऽच्चेति ॥ यटः अत् चेति छेदः ॥ अत्राहुः । ननु यटः सर्वादेः परत्वं नास्ति आपा व्यवधानात् इति चेत्सत्यम् । वचनसामर्थ्यात्तेन व्यवधानं सह्यते । आपं विना हि यट एव दुर्लभत्वात् । अङ्विधावपि सर्वादेरिति पञ्चमीति पक्षे सवर्णदीर्घे कृते एकदेशविकृतन्यायेन सर्वादेः परस्य विधीयमानो यडाप एव भवति अन्यस्यासम्भवात् । षष्ठीपक्ष एकदेशविकृतन्यायेन सर्वादेरकारो भवति ऊनाधिकभावेन विकारस्य द्वैविध्यादिति । अत्रेदमवधेयम् । अत्राबन्तात्सर्वादेरिति व्याख्याने आपो व्यवधायकत्वाभावेन तद्व्यवधानशङ्का निर्मूलैव तदन्तग्रहणे वाऽऽप इत्यादावाकारप्रश्लेष एव लिङ्गम् । किञ्च केवलस्यापः प्रत्ययत्वेन तत्परविभक्तेरभावात्तत्कार्यासम्भव इति दिक् ॥ ८ ॥

दिक्समासे बहुव्रीहौ सर्वादेर्वा सर्वकार्यम् ॥ दक्षिणपूर्वस्यै-दक्षिणपूर्वायै । उत्तरपूर्वस्याः-उत्तरपूर्वायाः ॥ अन्तरस्यै शालायै बाह्यायै इत्यर्थः ॥ अपरीत्युक्तेर्नेह । अन्तरायै नगर्यै । द्वितीयस्यै-द्वितीयायै । तृतीयस्यै-तृतीयायै । नासिका, नासिके, नासिकाः । नासिकाम् , नासिके । नासिकायाः नस् । नसः नासिकाः । नसा-नासिकया । नोभ्याम्-नासिकाभ्याम् ॥ पक्षे पञ्चसु गङ्गावत् ॥ पृतनायाः पृत् । पृतः । पृता पृद्भ्याम् । निशायाः निश् । निशः । निशा ॥ ९ ॥

(सु०) दिक्समासे बहुव्रीहौ सर्वादेर्वा सर्वकार्यम् । गौणत्वादप्राप्ते विभाषेयम् । दिशां समासो दिक्समासस्तस्मिन् । बहुव्रीहौ सर्वादेः सर्वादिकार्यं वा वाच्यम् ॥ दक्षिणस्याः पूर्वस्याश्च अन्तराले मध्ये या दिक् सा दक्षिणपूर्वा । तस्य ॥ उत्तरस्याः पूर्वस्याश्च अन्तराले या दिक् सा उत्तरपूर्वा तस्याः ॥ अन्यपदार्थोऽपि दिक्शब्दवाच्य एव ग्राह्यस्तेन नेह । योत्तरा सा पूर्वा यस्या उन्मत्तायाः सा उत्तरपूर्वा । तस्यै उत्तरपूर्वायै ॥ अन्तरोऽपुरि परिधाने बहिर्योगे इत्युक्तत्वादन्तरशब्दस्य बहिरर्थे सर्वकार्यम् । अन्तरस्यै शालायै । नगरबाह्यायै इत्यर्थः । अन्तरस्य न पुरि सर्वकार्यम् । अन्तरायै । न सुट् ॥ द्वितीयातृतीययोस्तीयस्य ङित्सु वा सर्ववदित्युक्तत्वात् ङेङसिङस्ङिषु वा सर्ववत् । शेषं गङ्गावद्रूपम् ॥ पादन्तेति नासिकाशब्दस्य शसादौ नस् । सस्य विसर्गे हवे इत्युत्वे ओत्वे च नोभ्याम् ॥ पृतना सेना ॥ ९ ॥

(त०) दिक्समासे इति ॥ दिशां दिग्वाचकानां शब्दानां समास इत्यर्थः । एतन्मूलं तु यटोऽच्चेत्यत्र चेत्यनुवृत्तेर्व्यवस्थितत्वाश्रयणम् ॥ ९ ॥

छशषराजादेः षः ॥ छकारान्तस्य शकारान्तस्य षकारान्तस्य राजयज्सृज्मृज्भ्रस्जव्रश्चभ्राजां च षकारो भवति धातोर्झसे परे नाम्नश्च रसे पदान्ते च ॥ १० ॥

(सु०) छशषराजादेः षः ॥ छान्तस्य शान्तस्य षान्तस्य राजादेश्च नाम्नः षः स्यात् रसे पदान्ते च । छान्तस्य शान्तस्य षान्तस्य राजादेश्च धातोः षः स्यात् झसे पदान्ते च ॥ छान्तस्य नाम्नो यथा । तत्त्वप्राट्–तत्त्वप्राड् । भजां विणिति विण्प्रत्यये अकृतव्यूहपरिभाषया द्वित्वं न प्रवर्तते । ततोऽसिद्धपरिभाषया न वृद्धिः । वृद्धेर्विण्नि- मित्तत्वेन षत्वं प्रति बहिरङ्गत्वात् ॥ धातोश्च यथा । प्रष्टा । अप्राट् ॥ शान्तस्य नाम्नो यथा । विट् । विड्भ्याम् ॥ धातोश्च यथा । वेष्टा । अवेवेट् ॥ षान्तस्य नाम्नो यथा । द्विट् । द्विड्भ्याम् ॥ धातोश्च यथा । द्वेष्टा । अद्वेट् ॥ षस्य षविधानमादेशान्तरनिवृत्त्य- र्थम् । ततः पुरस्तादपवादन्यायेन खसे चपा एव बाध्यो न तु व्यवहितो 'झबे जबाः' इति च । अयं च निषेधः स्यादौ न लक्ष्यानुरोधात् । तेन षट्सु इत्यादिसिद्धिः । द्विड्ढ्वे । अत्र 'झबे जबाः' अद्वेट्-अद्वेडत्र 'वाऽवसाने' च स्यादेव । व्यवहितविधित्वात् ॥ राजा- दयस्तु 'राजृ दीप्तौ । यज देवपूजादौ । सृज विसर्गे । मृजूष् शुद्धौ । भ्रस्ज पाके । ओव्र- श्चू छेदने ॥ भ्राजृ दीप्तौ ।' आदिशब्दात् परिव्राज्शब्दो विण्णन्तो ग्राह्यः । दिशा- मिति सूत्रे स्रगृत्विजोः पाठस्तु षत्वबाधनार्थः । असधातोरौणादिके ऋजप्रत्यये सिद्धोऽ- सृजशब्दो न गृह्यते लाक्षणिकत्वात् ॥ १० ॥

(त०) छशषराजादेः ष इति ॥ यद्यपि छान्तस्य नाम्नोऽसम्भवः क्विपि छस्य शविधानात् तथापि विणि तत्त्वप्राट्छब्दस्य तत्त्वप्राडिति रूपं मन्वानैः सूत्रे छग्रहणमङ्गी- कृतम् । अकृतव्यूहपरिभाषया द्वित्वाभावः । असिद्धपरिभाषया वृद्ध्यभावः । वृद्धेर्विण् निमित्तकत्वेन षत्वं प्रति बहिरङ्गत्वात् । अत्र षस्य षविधानमन्यविधिबाधनार्थम् । पुर- स्तादपवादन्यायेन खसे चपा एव बाध्यः न तु व्यवहितो झबे जबा इति वाऽवसान इति वा । अयं निषेधो न स्यादौ लक्ष्यानुरोधादिति वृद्धाः । तेन षट्स्वित्यादिसिद्धिः । द्विड्- ढि । अत्र 'झबे जबाः' । अद्वेट्–अद्वेड् । अत्र च 'वावसाने' च भवत्येव व्यवहितविधि- त्वात् ॥ राजयजसृजमृजभ्रस्जव्रश्चभ्राजपरिव्राजोऽष्टौ राजादयः । स्रजृत्विजोस्तु दिशा- दिषु पाठः षत्वबाधनार्थः । असृज्शब्दस्तु न सृजेः किंतु असेरौणादिक ऋजप्रत्यये बोध्यः । लाक्षणिकत्वान्न गृहीतः । भ्राजिस्तु राजृसाहचर्यादिजृसहचरितो न गृहीतः ॥ १० ॥

(षो डः) निड्भ्याम् । निड्भिः । निट्त्सु–निट्सु–निशासु । केचित्तु धातोरेव षत्वमाहुः तन्मते तु 'झबे जबा' इति जकारः–निज्भ्याम् , निज्भिः । श्चुत्वम् । निच्सु–निशासु ॥ गोपाः सोमपावत् ॥ बुद्धिः, बुद्धी, बुद्धयः । हे बुद्धे । बुद्धिम् । बुद्धीः । बुद्ध्या ॥ ११ ॥

(सु०) षो डः ॥ षस्य नाम्नो विशेषणात्तदन्तविधिः । षान्तस्य नाम्नोऽन्तस्य डः स्यात् रसे पदान्ते च ॥ षष्ठीति निर्देशात् थट्प्रत्यये न षस्य डः । षष्ठः ॥ ननु 'वा- ऽवसाने' 'झबे जबाः' खसे चपा झसानामित्यन्तैः सूत्रैष्टडयोर्लाभान्माऽस्त्विदं सूत्रम् ।

उच्यते । षाण्मातुर इत्यादिसिद्ध्यर्थमिदमावश्यकम् । यथा षाष् मातुर इति स्थिते षो ड इति डत्वे कृते 'त्वन्मदेकत्वे' इति निर्देशाज्जबस्यापि अमो भवतीति ॥ अष्टनो डौ वेति निर्देशाच्च द्वेष्टीत्यादावपि न डत्वम् ॥ शस्य षत्वे डत्वम् । निड्भ्याम् । सुपि डस्य खसे चपा इति चपत्वे टनात्सस्य वेति वा धुट् । धस्य चपत्वम् । धुडभावे टस्य धुट्पक्षे च तकारस्य शसे चपस्येत्यनेन टथौ न, कुक्टुक्वर्जितस्येति निषेधात् । स्यादीनां सस्येति न ष्टुत्वम् । निट्सु-निट्त्सु ॥ परिशिष्टकारादयः छशषराजादेरिति सूत्रे धातोश्च इति सूत्राद्धातोरित्येवानुवर्तयन्ति न तु नास्न इति । तन्मते झबे जबा इत्यनेन शस्य जकारे निज्भ्यामिति । सुपि खसे चपा इति शस्य चः । स्तोः श्चुभिरिति शत्वम् । 'चपाच्छः शः' इति पक्षे शस्य छत्वमपि बोध्यम् । निच्सु ॥ चोः कुरिति कुत्वं न चपस्यासिद्धत्वात् ॥ इत्याबन्ताः ॥ गोपाशब्द आकारान्तः ॥ बुद्धिः प्रायेण हरिवत् । स्त्रीत्वात्सो नः पुंस इति न नत्वम् । बुद्धीः । अस्त्रियामित्युक्तत्वाट्टानेति नात्वं न । अबुद्ध्या ॥११॥

(त०) षो ड इति ॥ ननु इदं सूत्रं किमर्थम् 'झबे जबाः' 'वाऽवसाने' इति सूत्राभ्यां कार्यसिद्धेरव्याहतत्वात् । अथ कथं षडानन इत्यादाविति चेत्सत्यं वाऽवसान इत्यस्याप्रवृत्तेः । अत्रावसानत्वाभावात्कथमिति चेत् । शृणु । अवसीयत इत्यवसानपदेन नह्यवसीयतेऽतः पदान्ततैवावसानम् । अन्यथा षाण्मातुर इति न सिद्ध्येत् । तथा हि षाष्मातुर इति स्थिते षो ड इति डत्वे चपाभावाद् अमत्वाभावः । अस्मन्मते तु 'वाऽवसाने' इत्यनेनैव रूपसिद्धिः । अथ त्वन्मदेकत्व इति निर्देशेन जबस्यापि अमत्वमिति न वाच्यम् । तत्र 'वाऽवसाने' इत्यनेनैव तत्त्वे तस्य अमत्वाद्रूपसिद्धेर्ज्ञापकानुसरणक्लेशस्य व्यर्थत्वात् । षण्णामित्यपि ड्ण इत्यस्य षो णो नामीत्यथस्यैव वक्तुमुचितत्वेन षशब्दस्यैव प्रथमैकवचनम् ड् इति रूपत्वात् । द्वेष्टीत्यादौ त्वष्टन इति निर्देशेन 'षो डः' 'खसे चपा' इत्युभयोरपि निवृत्तिरिति सूत्रं व्यर्थम् । वस्तुतस्तु 'झबे जबाः' इति सूत्रेण विधास्यमानस्य षस्थाने डस्यैव विधानानुवादार्थमिदं सूत्रमिति ध्येयम् । अस्मिन् ग्रन्थे समानवर्गजस्यैव सावर्ण्यस्योक्तत्वेन षडयोस्तदभावात्तुल्यास्यप्रयत्नं सवर्णमित्यस्याप्रणयनात्कथं षस्य डत्वमित्याशङ्कायां षो ड इत्यस्य विहितत्वादिति दिक् ॥ निज्भ्यामिति ॥ प्रथमातिक्रमे कारणाभावात्प्रथम इति न्यायेन जकार इति भावः ॥ निच्स्विति ॥ खसे चपा इति षस्य चत्वं तद्योगे स्तोः श्चुरिति सोः सस्य शत्वमित्यर्थः ॥ ११ ॥

इदुद्भ्याम् ॥ स्त्रियां वर्तमानाभ्यामिकारोकाराभ्यां परेषां ङितां वचनानां वाऽडागमो भवति ॥ बुद्ध्यै—बुद्धये । बुद्ध्याः—बुद्धेः । बुद्ध्याः—बुद्धेः । बुद्धीनाम् । स्त्रियां योः । बुद्ध्याम् । अडागमाभावे आमोऽप्यभावः(क) । बुद्धौ ॥ एवं मतिभूतिधृतिरुच्यादयः ॥ धेनुरज्जुदनुचञ्च्वादयोऽप्येवम् ॥१२॥

(क) **अडागमाभाव इति** । सन्नियोगशिष्टानां सहवा प्रवृत्तिः सह वा निवृत्तिरिति न्यायादाह—आमोऽप्यभाव इति । अत्र कश्चित्—अडागमाभावपक्षे तु प्रवृत्तोऽप्यामादेशः परत्वादौत्वेन बाध्यते । ततश्चाडामादेशयोरेकविषयत्वमेवेति निर्णीयाह—अडागमाभावः । इति व्याचष्टे स्म ।

इह तु पक्षेऽटो व्यवधानाभावात् परेणौत्वेन बाधितत्वादामोऽप्यप्रवृत्तिरित्यर्थः । **बुद्धाविति** । ङेरौ ङिदित्यैत्वे टिलोपः। **एवमिति** । एतैरेव सूत्रैरुकारान्ता अपि सहोक्तप्रक्रियत्वाज्ज्ञेयाः इत्यर्थः

(सु०) इदुद्भ्याम् ॥ इच्च उच्च इदुतौ ताभ्यामिदुद्भ्याम् । वेयुव इत्यतो वेत्यनुवर्तते । ङितामाडिति च । स्त्रियां ङितां वाऽट् स्यात् ॥ ङितामडिति नित्ये प्राप्ते विभाषेयम् ॥ स्त्रियामिति किम् । सख्ये । पत्ये ॥ ङितामिति किम् । मतिभ्यः ॥ तपरत्वं किम् । नद्यै ॥ अट् । बुद्ध्यै । अडभावे ङितीत्येत्वम् । बुद्धये । ङौ तु अडामोः सहैव प्रवृत्त्यप्रवृत्ती । सन्नियोगशिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिरिति न्यायात् ॥ १२ ॥

(त०) इदुद्भ्यामिति ॥ इच्च उच्च इदुतौ ताभ्याम् । सन्नियोगशिष्टन्यायादडामोः सहैव प्रवृत्त्यप्रवृत्ती । यद्वा आमोऽभावे परत्वात् ङेरौ ङिदित्यौकारः । न च । नित्यत्वादट् । औकारे टिलोपे च इकारान्तत्वाभावात् । परत्वादटा बाधादामि कृते नुडभावः । वेयुव इत्यत्र ह्रस्वानुवृत्तेर्ह्रस्वाद्वेति सिद्धेऽपि मात्रे इत्यादौ ह्रस्वत्वाविशेषेणातिव्याप्तिवारणायेदं सूत्रमिति वृद्धाः । तपरत्वमपि नित्यविकल्पयोर्व्यवस्थार्थम् । अन्यथा उभयोर्विकल्पो नित्यो वा स्यात् । दीर्घस्य विकल्पः ह्रस्वस्यैव नित्य इति विपर्ययो वा स्यादिति ॥ स्त्रियामिति किम् । सख्ये ॥ ङितामिति किम् । मतिभ्याम् ॥ इदुद्भ्यामिति किम् । मात्रे ॥ तपरत्वं किम् । नद्यै ॥ इदुद्भ्यामित्यस्यैव तन्त्राश्रयणात् इदुद्भ्यां ङितामड्वा । अटि सति ङेरामिति । एतेनाटि सति अटो ङिद्विभक्तित्वेन ङेरिदुदन्तात्परत्वानपायादौत्वं स्यादित्यादिकमपास्तम् । अडामोः सहैव प्रवृत्तत्वात् ॥ १२ ॥

त्रिचतुरोः स्त्रियां तिसृचतसृवत् ॥ स्त्रियां वर्तमानयोस्त्रिचतुर्शब्दयोस्तिसृ चतसृ इत्येतावादेशौ भवतो विभक्तौ । ऋकारश्च ऋकारवत् । ततोऽरारुकारा न भवन्ति । सेरा घेरर् तु भवति ॥ तिस्रः तिस्रः । तिसृभिः । तिसृभ्यः । तिसृभ्यः (क) ॥ १३ ॥

(सु०) त्रिचतुरोः स्त्रियां तिसृचतसृवत् । त्यदादेरित्यतः स्यादावनुकृष्यते । स्त्र्यर्थवाचकयोरेतयोरेतावादेशौ स्तो विभक्तौ । रा ऋकारेण तुल्यम् ऋवदिति वाक्यान्तरम् । ऋ ऋवादिति पदच्छेदः । य्वोरित्यतः स्वरे इत्यनुवर्तते । स्वरे परे तिसृचतसृशब्दयोः ऋकार ऋकारकार्यं लभते तच्च रत्वम् । तेन पञ्चस्विति ढाविति चार् स्तुरारित्यार् ऋतो ङ उरित्युकारः एते विषया न । अम्शसोरल्लोपोऽपि न । सेरस्यात्वम् । घेररित्यर् तु भवत्येव । स्वरपरत्वाभावात् ॥ तिसृ इत्यत्र क्विलादिति षत्वाभावप्रदर्शनेनादेशावयवे षत्वं नेति ज्ञापितम् । सैषादिति षत्वनिर्देशेन समास्त्रादेशस्य षत्वं भवतीति ज्ञापितं च ॥ विभक्तौ किम् । तिस्रः प्रिया यस्य स त्रिप्रियः इत्यत्र तु न । लुकि न तन्निमित्तमित्युक्तत्वात् ॥ स्त्रियां किम् । त्रयः । चत्वारः ॥ १३ ॥

(त०) त्रिचतुरोः स्त्रियां तिसृचतसृवदिति ॥ अत्र त्यदादेरित्यतः स्यादा-

(क) त्रिचतुरोरिति । 'त्यदादेरेः स्यादौ' इत्यतः स्यादावित्यनुकृष्यते । स्त्रियामिति त्रिचतुरोरेव विशेषणम् । असत्त्वात् । त्रिचतुरोस्त्वनुवृत्तस्य नाम्नो विशेषणम् । स्त्र्यर्थाभिधायकत्रिचतुरशब्दान्तनाम्नोस्तिसृचतसृ इत्येतावादेशौ स्यातां स्यादौ परतः ऋवादिति भिन्नं वाच्यम् । ऋवदिति पदच्छेदः । तिसृ चतसृ इति सम्बध्यते तच्च षष्ठ्या विपरिणम्यते । य्वोर्धातोरित्यतः स्वरे इत्यनुवर्त्तनीयम् । तिसृचतस्रोर्ऋकार ऋकारवद् भवति स्वरे परतः । रा तुल्यं ऋवत् ऋकार्यं प्राप्नोतीति निष्कर्षः । तच्च कार्यं रत्वम् । तथा चारारुकारा न स्युः अम् शसोरल्लोपो न । सेरा घेरर् तु स्याताम्, हसकार्यत्वात् ।

वित्यनुकृष्यते । स्त्र्यर्थवाचकत्रिचतुरन्तनाम्नस्तिसृचतसृ आदेशावित्यर्थः ॥ अनेकाक्षरत्वात्संपूर्णस्य प्राप्तौ निर्दिश्यमानस्यादेशा भवन्तीति त्रिचतुरोरेव केवलयोस्तु व्यपदेशिवद्भावात् ॥ ऋकारश्चेति ॥ अत्र य्योरित्यतः स्वरे इत्यनुवर्त्य वाक्यभेदेन व्याख्येयम् । तेन ऋकारः स्वरे ऋवद्भवतीत्यर्थः ॥ रा तुल्यम् ऋवत् । आतोऽरारुकाराणां स्वरकार्यत्वादभावः । सेरा धेरर् एतयोस्तु हसकार्यत्वात्प्रवृत्तिरिति भावः ॥ १३ ॥

(**न तिसृचतस्रोर्नामि दीर्घः**) तिसृणाम् । स्त्रियामिति त्रिचतुरोर्विशेषणान्नेह । प्रियास्त्रयः प्रियाणि त्रीणि वा यस्याः सा प्रियत्रिः । बुद्धिवत् । आमि प्रियत्रयाणाम् । यदा स्त्रियां मुख्यौ लिङ्गान्तरे गौणौ तदैतौ स्तः । प्रियास्तिस्रो यस्य स प्रियतिसा, प्रियतिस्रौ, प्रियतिस्रः । हे प्रियतिसः । नाम्शसोररलोपः । प्रियतिस्रम् । प्रियास्तिस्रो यस्य कुलस्य तत् कुलं प्रियत्रि, प्रियतिसृणी, प्रियतिसृणि ॥ स्वृणां नपुंसके धौ गुणो वा । हे प्रियतिसः-हे प्रियतिसृ । टादौ स्वरे टादाविति पुंवत् । नामिनः स्वरे । प्रियातिसृणा-प्रियतिस्रा । द्वेरत्वे सत्याप् । द्वे । द्वे । द्वाभ्याम् । द्वाभ्याम् । द्वाभ्याम् । द्वयोः । द्वयोः ॥ हसेऽपः सेर्लोपः । नदी, नद्यौ, नद्यः । हे नदि । नदीम्, नद्यौ, नदीः नद्या-ङिताम‍ट् । नद्यै । नद्याः । नदीनाम्, नद्याम् ॥ एवं ब्राह्मणीसखीकुमारीगौर्यादयः (क) ॥ लक्ष्मीः । अनीबन्तत्वान्न सिलोपः । धौ ह्रस्वः । हे लक्ष्मि । शेषं नदीवत् ॥ एवमवीतन्त्रीतरीप्रभृतयः ॥ ईबन्तत्वात्सलोपः । स्त्री ॥ १४ ॥

(मु०) **न तिसृचतस्रोर्नामि दीर्घः** ॥ एतयोर्दीर्घो न स्यान्नामि ॥ आमि तु नुट् । तिसृणाम् । अनन्तत्वात् त्रिचतुरोरित्यस्यैव स्त्रियामिति विशेषणं नानुवृत्तस्य नाम्नः प्रियास्त्रयः पुरुषाः प्रियाणि त्रीणि कुलानि वा यस्याः सा प्रियत्रिः । तस्य बुद्धिवद्रूपम् । समासस्य स्त्र्यर्थाभिधायकत्वेऽपि त्रिचतुरोः स्त्र्यर्थाभिधायकत्वाभावात् । आमि तु 'त्रेरयङ्' इत्ययङ् । प्रियत्रयाणामिति विशेषः । यदा स्त्रियां मुख्यौ लिङ्गान्तरे गौणौ तदैतौ स्तः । यदा विग्रहे त्रिचतुरशब्दौ स्त्र्यर्थवाचकौ मुख्यौ । तिसृचतसृरूपावित्यर्थः । यस्य यस्याः वेत्यादिसमासार्थरूपे लिङ्गान्तरे तु तौ गौणौ स्तः । तदा त्रिचतुरोस्तिसृ चतसृ इत्येतौ भवतः । यथा प्रियाः तिस्रो यस्य पुंसः स इत्यत्र प्रिया जस् त्रि जस् इति स्थिते 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुक् बाधते' इत्यकृत्वैव तिस्रादेशं सिपो लुकि कृते समासात्स्यादिविभक्तिस्तस्यां परस्तिस्रादेशः । पुंवद्वेति प्रियाशब्दस्य पुंवद्भावः । सेरेत्यात्वम् । प्रियतिसेति । यद्यपीह जहत्स्वार्थावृत्तिपक्षे त्रिशब्दस्य निरर्थकत्वेन स्त्रीवाच्यत्वं दुर्लभं तथापि भूतपूर्वगत्या स्त्रियां वृत्तिर्बोध्या । उत्तरपदार्थप्रधानस्तत्पुरुष इत्या-

(क) प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति सेडोऽधेरिति डात्वे ऐ सख्युरित्यैत्वे च प्राप्ते विभक्तौ लिङ्गविशिष्टाग्रहणमिति न । सखी ।

दिसिद्धान्तस्यैवमत्र निर्वाह्यत्वात् । अजहत्स्वार्थावृत्तिपक्षे तु स्त्रीनिष्ठसंख्यासमर्पकयोस्त्रिचतुरोरिति विवक्षितोऽर्थः । प्रियतिस्रौ प्रियतिस्रः । प्रियतिस्रम् प्रियतिस्रौ, प्रियतिस्रः । प्रियतिस्रा, प्रियतिसृभ्याम् , प्रियतिसृभिः । प्रियतिस्रे । प्रियतिस्रः, प्रियतिस्रोः, प्रियतिसृणाम् । प्रियतिस्रि, प्रियतिस्रोः, प्रियतिसृषु । हे प्रियतिसः ॥ प्रियाः तिस्रो यस्य कुलस्येत्यत्र स्यमो र्लुका लुप्तत्वेन प्रत्ययलक्षणाभावान्न तिस्रादेशः । प्रियत्रि । लुकि न तन्निमित्तमित्यस्यानित्यत्वात्पक्षे प्रियतिसृ । एतद्रूपद्वयं कैयटेन स्वीकृतम् । इदमोऽयं पुंसीत्यनेनानित्यत्वं ज्ञापितम् 'नामिनः स्वरे' इति नुम् । ईमावितीत्वम् । प्रियतिसृणी । नोपधाया इति दीर्घः । प्रियतिसॄणि ॥ तृतीयादिषु वक्ष्यमाणेन टादावित्यनेन पुंवद्भावविकल्पात् पर्यायेण नुमृत्वे । प्रियतिस्रा—प्रियतिसृणा । प्रियतिस्रे–प्रियतिसृणे । प्रियतिस्रः प्रियतिसृणः । आमि ह्रस्वं बाधित्वा परत्वान्नुम् प्राप्तः । तं च बाधित्वा विप्रतिषेधे परमिति नुट् । प्रियतिसृणाम् । ऋणामिति वा गुणः । हे प्रियतिसः हे प्रियतिसृ । द्विशब्दस्य त्यदादेरित्यकारे कृते सन्निपातपरिभाषाया अनित्यत्वादाबत इत्याप् ॥ इतीदन्ताः ॥ नद्यादेरितीप । नदी । धौ ह्रस्व इति ह्रस्वे हे नदि ॥ प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति सेर्डोऽधेरिति डात्वे, ऐ सख्युरित्येत्वे च प्राप्ते विभक्तौ लिङ्गविशिष्टाग्रहणमिति न । सखी ॥ लक्षेर्मुट् चेति ईप्रत्ययः । लक्ष्मीः । केचिदिह कृदिकारादिति पाक्षिकमीपमिच्छन्ति । तन्मते पक्षे सिलोपः स्यादेव । 'वातप्रमी श्री लक्ष्मीति पक्षे ङ्यन्ताः सुमाधवः' इति रक्षितः । 'लक्ष्मीर्लक्ष्मी हरिप्रिया' इति द्विरूपकोशश्च ॥ अवी रजस्वला स्त्री । तन्त्रीर्वीणा । स्तरीर्धूमः । स्तरीर्वंध्या (क) । स्त्यायतेर्ड्रडिति ड्रट् प्रत्यये 'यवयोर्वसे' इति यलोपः । टित इतीप् । स्त्यायेत अस्यां शुक्रशोणिते इति स्त्री ॥ १४ ॥

(त०) स्त्रियामिति त्रिचतुरोर्विशेषणादिति ॥ श्रुतत्वात् तयोरिति भावः । नामविशेषणं नेति बोध्यम् । तद्विशेषणे तु विपरीतं स्यात् । अत्रेदं तत्त्वम् । जहत्स्वार्थैव वृत्तिरिहाभिमता लक्ष्यानुरोधात् । तेन नाम्नः स्त्रियामिति सम्यगेव । त्रिशब्दस्य पुंनपुंसकवाचित्वं तु भूतपूर्वगत्या । अजहत्स्वार्था वृत्तिरिति पक्षे तु स्त्रीनिष्ठसंख्यासमर्पकयोस्त्रिचतुरोरिति विवक्षितोऽर्थः । ननु स्त्रियां प्रियतिसेति कथम् । ऋकारान्तत्वादीपः प्रवृत्तेरिति चेत्सत्यं सन्निपातपरिभाषाविरोधात् ॥ विभक्त्यानन्तर्येण प्रवृत्ते आदेशे स न विहितः ॥ विभक्तौ किम् । तिस्रो भार्या अस्येति त्रिभार्य इत्यादौ न । लुकि न तन्निमित्तमिति प्रत्ययलक्षणनिषेधात् ॥ स्त्रियां किम् । त्रयः ॥ तिस्र इत्यत्र षत्वं तु षः सः कृतस्येति व्याख्याने सस्य कृतत्वाभावान्न । अत एव संधिसंपद्दन्धिश्चेति द्विर्वचनादेशे तु प्रकृतेऽपि न षत्वम् । देवेषु एधिष्यते इत्यादौ तु चतुर्षु भविष्यतीत्यादिनिर्देशात् प्रत्ययावयवस्य षत्वं भवतीति ज्ञापकात् । व्यधिकरणषष्ठीपक्षे तु प्रत्ययावयवस्य भवत्येव आदेशावयवस्य तु तिसृ इति निर्देशादेव न । अन्यथा तिसृ चतसृ इत्येव ब्रूयात् । सैषाविति निर्देशेन सकारमात्रादेशस्य षत्वं भवतीति ज्ञापितम् ॥ द्वेरत्व इति ॥ स्यादिसन्निपातकृतमपि त्यदाद्यत्वमापो निमित्तम् । सन्निपातपरिभाषाया अनित्यत्वात् ॥ १४ ॥

(क) मौकीते हेमचन्द्रः ।

स्त्रीभुवाः ॥ स्त्रीशब्दस्य भ्रूशब्दस्य चेयुवौ भवतः स्यादौ स्वरे परे ॥ स्त्रियौ, स्त्रियः । हे स्त्रि ॥ १५ ॥

(श०) **स्त्रीभ्रुवाः** ॥ अप्राप्ते विधिरयम् । यत्वत्वयोरपवादः । एतयोरिवर्णोवर्णयोरियुवौ भवतः स्वरादौ ॥ स्यादौ किम् । स्त्र्यर्थम् । भ्र्वर्थम् ॥ धौ ह्रस्व इति ह्रस्वे हे स्त्रि ॥

(त०) **स्त्रीं भ्रुवाविति** ॥ अधातुत्वात् य्वोरित्येतदप्राप्तौ विधिरयम् । यत्ववत्वयोरपवादोऽयम् ॥ स्यादौ किम् । स्त्र्यर्थम् । भ्र्वर्थम् ॥ अत्र य्वोरित्यनुवर्तते । अनेकवर्णत्वात्सर्वादेशबाधनाय ॥ १९ ॥

वाऽमशसि ॥ अमि शसि च परे स्त्रीशब्दस्य वा इय् भवति ॥ स्त्रियम्—स्त्रीम् । स्त्रियः—स्त्रीः । स्त्रियाम्—स्त्रीणाम् । स्त्रियमतिक्रान्तोऽतिस्त्रिः । अन्यार्थे । अतिस्त्रयौ ।

"एओनाभावौत्वनुड्भिः पूर्वस्थैः पुंसि बाध्यते ।
क्लीबे नुमा च स्त्रीशब्दस्येय् त्वयेत्यवधार्यताम्(क) ॥"

अतिस्त्रयः । हे अतिस्त्रे । अतिस्त्रियम्—अतिस्त्रिम् , अतिस्त्रियौ । अतिस्त्रियः—अतिस्त्रीन् । अतिस्त्रिणा । अतिस्त्रये । अतिस्त्रेः, अतिस्त्रियोः, अतिस्त्रीणाम् । अतिस्त्रौ, अतिस्त्रियोः, अतिस्त्रिषु ।

"ओस्यौकारे च नित्यं स्यादम्शसोस्तु विभाषया ।
इयादेशस्तु नान्यत्र स्त्रियाः पुंस्युपसर्जने(ख) ॥"

क्लीबे तु नुम् । अतिस्त्रि, अतिस्त्रिणी, अतिस्त्रीणि । अतिस्त्रिणा अतिस्त्रये-अतिस्त्रिणे । अतिस्त्रेः—अतिस्त्रिणः । अतिस्त्रेः—अतिस्त्रिणः, अतिस्त्रियोः- अतिस्त्रिणोः, अतिस्त्रीणाम् । अतिस्त्रौ, अतिस्त्रिणि ॥ स्वर्णा नपुंसके धौ गुणो वा वक्तव्यः । हे अतिस्त्रे -हे अतिस्त्रि ॥ स्त्रियां तु प्रायेण

(क) **एओनेत्यादि** । पूर्वस्थैः एओनाभावौत्वनुड्भिः पुंसि स्त्रीशब्दस्य इय् बाध्यते । क्लीबे च नुमा स्त्रीशब्दस्य इय् बाध्यते, इति त्वयाऽवधार्यताम् । इत्यन्वयः ।

अथार्थः—एश्च ओश्च नाश्च ते एओनाः । एओनानां भावः एओनाभावः । एओनाभावश्च औत्वं च नुट् च ते एओनाभावौत्वनुटः । तैः एओनाभावौत्वनुड्भिः । किम्भूतैः ? पूर्वस्मिन् तिष्ठन्तीति पूर्वस्थाः तैः पूर्वस्थैः । 'एओ जसि' 'ङिती' स्येत्वौत्वे । 'टानास्त्रिया'मिति ना । 'ङेरौ ङि'दित्यौत्वम् । 'नुडाम' इति नुट् । पुंसि पुँल्लिङ्गे स्त्रीशब्दस्येय् बाध्यते इति त्वयाऽवधार्यतां ज्ञायतामिति ।

च पुनः । क्लीबे 'नामिनः स्वरे' इति नुमागमेन स्त्रीशब्दस्येय् बाध्यते । इत्यपि ज्ञायतामिति ।

(ख) **ओस्यौत्यादि** । स्त्रियाः पुंसि उपसर्जने इयादेशः ओसि औकारे च नित्यं स्यात् । अम्शसोस्तु विभाषया स्यात् । अन्यत्र न । इत्यन्वयः ।

अथ व्याख्या—स्त्रियाः स्त्रीशब्दस्य । पुंस्युपसर्जने विद्यमानस्येति शेषः । स्त्रीभ्रुवोरितीयादेशः । ओसि औकारे प्रत्यये च परतो नित्यं स्यात् । तु पुनः अम्शसोः परतः । विभाषया विकल्पेनेय् । अन्यत्र अन्यस्मिन् प्रत्यये इय् न भवति, एओनाभावौत्वनुड्भिरित्यादिभिर्बाधितत्वादित्यर्थः ।

पुंवत् । अतिस्त्रिः, अतिस्त्रियौ, अतिस्त्रयः । शसि अतिस्त्रीः । अतिस्त्रिया । इदुद्भ्याम् । अतिस्त्रियै—अतिस्त्रये । अतिस्त्रियाः—अतिस्त्रेः । अतिस्त्रियाः—अतिस्त्रेः, अतिस्त्रियोः, अतिस्त्रीणाम् । अतिस्त्रियाम् । अतिस्त्रौ ॥ श्रीः, श्रियौ, श्रियः । हे श्रीः ॥ १६ ॥

(सु०) वाऽम्शसि ॥ पूर्वेण नित्ये प्राप्ते विकल्पोऽयम् । क्वचिदेकदेशोऽप्यनुवर्तते इति स्त्रीभ्रुवोरित्यतः स्त्रीशब्दस्यानुवृत्तिः ॥ ङितामडित्यट् । स्त्रियै । आमि स्त्रियास्तु नित्यमिति वक्ष्यमाणेन नुट् । स्त्रीणाम् । ङौ स्त्रियां योरित्याम् । स्त्रियाम् । गौणे तु स्त्रियमतिक्रान्तः पुमान् अतिस्त्रिः । अन्यार्थं इति ह्रस्वः ॥ एओनेत्यादि ॥ एओनाभावौत्वनुड्भिः पुंसि स्त्रीशब्दस्य इय् बाध्यते इति त्वयाऽवधार्यतां ज्ञायताम् । एश्च ओश्च नाश्च ते एओनाः एओनानां भावः एओनाभावः एओनाभावश्च औत्वं च नुट् च ते एओनाभावौत्वनुटस्तैः । एओजसि ङितीत्येत्वौत्वे । टानाऽस्त्रियामिति ना । ङेरौ ङिदित्यौत्वम् । नुडाम इति नुट् । कीदृशैः । पूर्वस्मिन् तिष्ठन्तीति पूर्वस्थास्तैश्च ॥ पुनः क्लीबे 'नामिनः स्वरे' इति नुगागमेन स्त्रीशब्दस्येय् बाध्यते । ओसोरित्यादि ॥ स्त्रियाः स्त्रीशब्दस्य पुंस्युपसर्जने विद्यमानस्य ओसादिषु चतुर्ष्वेव परेषु स्त्रीभ्रुवोरितीयादेशो भवति । यथा ओसि औकारप्रत्यये च परतः इय् नित्यम् । तु पुनरम्शसोः परतो विकल्पेनेय् । अन्यस्मिन् प्रत्यये इय् न । एओनाभावौत्वनुड्भिः पूर्वोक्तैर्बाधितत्वादित्यर्थः ॥ क्लीबे तु नुम् । ईमावितीत्वम् । अतिस्त्रिणी । जश्शसोरिति शिः । नोपधाया इति दीर्घः । अतिस्त्रीणि । टादिस्वरे तु टादावुक्तपुंस्कमिति वक्ष्यमाणेन पुंवद्भावपक्षे हरिवद्रूपम् ॥ स्त्रियमतिक्रान्ता या स्त्री सा अतिस्त्रिः । शसि स्त्रीत्वात् सो नः पुंस इति न नत्वम् । अतिस्त्रीः । स्वरादिविभक्तौ स्त्रीभ्रुवोरितीय् ङिद्वचनेषु इदुद्भ्यामिति वाऽट् । अतिस्त्रियै । ङितीत्येत्वपक्षे अतिस्त्रये । आमि नुट् अतिस्त्रीणाम् । ङौ स्त्रियां योरित्याम् । अतिस्त्रियाम् । पक्षे ङेरौ ङिदित्यौत्वे अतिस्त्रौ । क्विपि वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणामिति क्विपि दीर्घः । अनीबन्तत्वान्न सिलोपः । श्रीः ॥ य्वोर्धातोरितीय् । श्रियौ । इयुव्स्थानवर्जितयोरित्युक्तत्वात् धाविति ह्रस्वो न । हे श्रीः ॥ १६ ॥

(त०) वाऽम्शसीति ॥ वा अम्शसीति च्छेदः । क्वचिदेकदेशोऽप्यनुवर्तत इति स्त्रीशब्दस्यैवानुवृत्तिरित्यभिप्रेत्याह—स्त्रीशब्दस्येति ॥ वार्त्तिकमिदं लेखकभ्रमात् सूत्ररीत्या लिखितमिति केचित् (क) । स्थानसादृश्यात् एरिय् ओरुव् ॥ एओनाभावेति ॥ एओइत्यनेन एओविधायकं सूत्रं गृह्यते ॥ तथा च 'एओ जसि' इति सूत्रं गृह्यते ॥ इयादेशास्त्विषति । स्वरादौ य इयादेशो विहितः उपसर्जनत्वे पुंसि विद्यमानस्य स्त्रीशब्दस्य स्यादिषु चतुर्ष्वेव न त्वन्यत्र । एओनाभावादिभिः पूर्वोक्तैर्बाधितत्वादित्यर्थः ॥ १६ ॥

येयुवः ॥ इयुवन्तात् ङितामड् वा स्त्रीं विना ॥ श्रियै—श्रिये । श्रि-

(क) इदं वस्तुतस्तु सूत्रमेव । तस्य वृत्तेर्जागरूकत्वात् । वृत्तिकारस्य वार्त्तिकादौ वृत्त्यदर्शनात् सूत्रादौ तु दर्शनात् प्रकृते तु वृत्तिदर्शनादिदं सूत्रमेव न तु वार्त्तिकम् । अष्टाध्यायीसूत्रपाठे च विद्यमानत्वादिति न भ्रमितव्यम् ।

याः—श्रियः । इयुवन्तादामो नुड् वा । स्त्रियास्तु नित्यम् । श्रीणाम्—श्रियाम् । श्रियि—श्रियाम् ॥ एवं ह्रीधीप्रभृतयः । एवं भ्रूभूप्रभृतयः ॥ प्रधीशब्दस्य तु लक्ष्मीशब्दवद्रूपम् । केषांचिन्मते तु पुंवत् (क) । प्रकृष्टा धीरिति विग्रहे तु लक्ष्मीवत् । अमि शसि च प्रध्यम् । प्रध्यः । सुष्ठु धीर्यस्याः सुष्ठु ध्यायेति वेति विग्रहे सुधीः श्रीवत् । केषांचिन्मते पुंवत् । सुष्ठु धीरिति विग्रहे तु श्रीवदेव ॥ ग्रामणीः पुंवत् ॥ एवं खलप्वादिः ॥ १७ ॥

(ह०) वेयुवः ॥ ङितामडित्यनेन नित्ये प्राप्ते विकल्पोऽयम् । स च व्यवस्थितः । तेन स्त्रियां नित्यमेवाट् । इय् च उव् चानयोः समाहारः इयुव् तस्मादियुवः । य्वोरित्यनुवर्तते । स्त्रियामियुवस्थानिभ्यामिवर्णोवर्णाभ्यां परेषां ङितामड् वा स्यात् ॥ स्त्रियामिति किम् । सुधिये । स्वयंभुवे ॥ इयुव इति किम् । प्रध्यै । वर्षाभ्वै । इयुवन्तादामो नुड् वा । स्त्रियास्तु नित्यम् । स्त्रियामियुवस्थानिभ्यामिवर्णोवर्णाभ्यां परस्यामो नुड् वा स्यात् ॥ स्त्रीशब्दात्परस्यामो नित्यमेव नुट् ॥ 'धीः प्रज्ञा शेमुषी मतिः' इत्यमरः ह्रीर्लज्जा ॥ 'भूर्भूमिरचलाऽनन्ता' इत्यमरः ॥ भ्रमतीति भ्रमेर्डूरिति भ्रमतेर्डूप्रत्ययः । डित्त्वाट्टिलोपः। नेत्रयोरुपरि रोमपद्धतिर्भ्रूः ॥ पदान्तरं विनापि स्त्रियां वर्तमानत्वं नित्यस्त्रीत्वमिति वदतां वृत्तिकारादीनां मते प्रधीशब्दस्य लक्ष्मीशब्दवद्रूपम् । अमि शसि च प्रध्यम्, प्रध्यः इति विशेषः । धातुत्वात् य्वो वेति स्वरे यत्वम् ॥ लिङ्गान्तराऽनभिधायकत्वं नित्यस्त्रीत्वमिति वदतः कैयटस्य मते, प्रकृष्टा धीर्यस्याः सा प्रकर्षेण ध्यायतीति वा विग्रहे प्रधीशब्दस्य पुंवद्रूपम् ॥ अयं मतभेदः । प्रकृष्टा धीरिति विग्रहेण तत्पुरुषे तु मतद्वयेऽपि लक्ष्मीवत्प्रधीशब्दस्य स्याद्रूपम् । सुष्ठु धीर्यस्याः सा सुष्ठु ध्यायति वेति विग्रहे वृत्तिकारमते सुधीशब्दस्य श्रीशब्दवद्रूपम् । कैयटमते तु नित्यस्त्रीत्वाभावात्पुंवद्रूपम् । सुष्ठु धीरिति विग्रहेण तत्पुरुषे तु मतद्वयेऽपि श्रीवदेव बुद्धिवाचकधीशब्दस्य नित्यस्त्रीत्वात् ॥ ग्रामणीशब्दः पुंवत् । ग्रामनयनस्योत्सर्गतः पुंधर्मतया पदान्तरं विना स्त्रियामप्रवृत्तेः । एवं खलत्वादेरपि पुंधर्मत्वमौत्सर्गिकं बोध्यम् ॥ १७ ॥

(त०) वेयुव इति ॥ इय् च उव् चानयोः समाहारः इयुव् तस्मात् इयुवः । अत्र य्वोरित्यनुवर्तते तयोरभेदस्य बाधितत्वादियुवस्थानिनो य्वोरित्यर्थो लभ्यते । विकल्पश्चायं व्यवस्थितः । तेन स्त्रियां नित्यम् । आमो नुड्वा स्त्रियां नित्यमित्येव सर्वं लब्धम् ॥ लक्ष्मीवदिति । पदान्तरं विना स्त्रियां वर्तमानत्वं नित्यस्त्रीत्वमिति वदतां वृत्तिकारादीनां मते प्रधीशब्दस्य तथात्वादिति भावः ॥ केषांचिदिति ॥ लिङ्गान्तरानभिधायित्वं नित्यस्त्रीत्वमिति वदतां कैयटादीनां मते इत्यर्थः ॥ ग्रामणीरिति ॥ ग्रामनयनस्योत्सर्गतः पुंधर्मतया पदान्तरं विना स्त्रियामप्रवृत्तेः ॥ एवं खलपवनादेरपि पुंधर्मत्वमौत्सर्गिकं बोध्यम् ॥

ऋन्नेभ्यो ङीप् । (ख)नकारान्तादृकारान्तादणन्ताच्च स्त्रियामीप् प्रत्ययो भवति ।

(क) केषामिति लिङ्गान्तरानभिधायित्वं नित्यस्त्रीत्वमिति वदतां कैयटादीनां मते पुंवदित्यर्थः । वृत्तिकारादीनां मते तु लक्ष्मीशब्दवत्पदान्तरं विना स्त्रियां वर्तमानत्वं नित्यस्त्रीत्वमिति तैःस्वीकृतत्वात् ।

(ख) ऋन्न इति । ऋकारोऽत्र रेफभूतो निर्दिष्टो न रेफो व्याख्यानात् । असन्देहार्थं नात्पाणिनिरेवये

क्रोष्ट्री । क्रोष्ट्र्यौ । नदीवत् ॥ वधूजम्ब्वादयो नदीवत् ॥ पुनर्भूः । भ्वौ वा । पुनर्भ्वौ । हे पुनर्भु । पुनर्भ्वा । पुनर्भूणाम् । पुनर्भ्वाम् । 'भेक्यां पुनर्नवायां स्त्री वर्षाभूर्दर्दुरे पुमान् (क) ।' हे वर्षाभु । वर्षाभ्वौ । स्वयम्भूः पुंवत् ॥१८॥

(सु०) नॄण ईप् ॥ नॄ च आ च अण् च एषां समाहारो नॄण् तस्मान्नॄणः । अणिति प्रत्ययो न तु क्विबन्तोऽणिति गृह्यते प्रत्ययाप्रत्यययोरिति न्यायात् । अस्य व्याख्यानं स्त्रीप्रत्यये द्रष्टव्यम् ॥ क्रोष्टुशब्दस्य पुंसि पञ्चस्वपिषु स्त्रियां चेति तृवद्भावः । क्रोष्ट्री ॥ धाविति ह्रस्वः । हे पुनर्भु । स्त्रियां योरिति ङेराम् । पुनर्भ्वाम् । कैयटमते भेकजातौ नित्यस्त्रीत्वाभावात् हे वर्षाभूः । वृत्तिकारमते तु हे वर्षाभु । पुनर्नवायां तु हे वर्षाभु । उक्तं च—'भेक्यां पुनर्नवायां स्त्री वर्षाभूर्दर्दुरे पुमान्' इति यादवेन ॥ भेक्यां मण्डूक्यां तथा पुनर्नवा ओषधी तस्यां वाच्यायां वर्षाभूशब्दः स्त्रीलिङ्गः । दर्दुरवाची तु पुंलिङ्गः । स्त्रौ वर्षाभ्वाम् ॥ स्वयंभूशब्दे स्वरे परतो भ्वोर्धातोरित्युव् । मतद्वयेऽपि नित्यस्त्रीत्वाभावात् ङितामित्यादि न ॥ १८ ॥

(त०) नॄण ईप् इति ॥ नॄ च आ च अण् च एतेषां समाहारः नॄण् तस्मात् नॄणः । अत्र मध्ये रेफभूत ऋकारो गृह्यते न रेफः व्याख्यानात् । मध्यपाठस्य लाघवार्थत्वाच्च । अत्राण् प्रत्ययः न तु क्विबन्तोऽणिति । प्रत्ययाप्रत्यययोरिति न्यायात् । तथा च तदन्तं नाम गृहीतम् । प्रत्ययग्रहणे यस्मात्स विहित इति परिभाषया तदन्तं लब्धम् । नाम्ना विशेषणात्तदन्तान्तमप्यायातम् ॥ १८ ॥

(नकारान्तसंख्यायाः स्वसृतिसृचतसृननान्दृदुहितृयातृमातृभ्यश्च नेवाप्यौ) माता, पितृवत् ॥ स्वसा, कर्तृवत् ॥ शसि मातॄः । स्वसॄः ॥ राः पुंवत् ॥ गौः पुंवत् ॥ नौर्ग्लौवत् ॥ १९ ॥

इति स्वरान्ताः स्त्रीलिङ्गाः ॥ ८ ॥

(सु०) नकारान्तसंख्यायाः स्वसृतिसृचतसृननान्दृदुहितृयातृमातृभ्यश्च नेवाप्यौ ॥ स्वसाद्येनामीप् प्राप्तो नकारान्तसंख्यायास्तूभौ प्राप्तावनेन निषिध्येते । सावसेर्ङः इति ऋप्रत्ययः । स्वसा । स्तुरारित्यार । स्वसारौ । शसि स्वसॄः । स्त्रीत्वात्सो नः पुंस इति न नत्वम् ॥ 'ननान्दा तु स्वसा पत्युः' इत्यमरः ॥ 'भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परम्' इति च ॥ यद्यपि पुंलिङ्ग एव रैशब्दः 'अथ रैर्विभवा अपि' इत्यमरे भिन्नलिङ्गानां न द्वन्द्व इति परिभाषितत्वात् तथापि रात्येनामिति राः । स्त्री येके ॥ नुदतेर्ग्लानुदिभ्यां डाविति डौप्रत्ययः । डित्वाट्टिलोपः । नौः । 'स्त्रियां नौस्तरणिस्तरिः' इत्यमरः ॥ १९ ॥ इति सुबोधिन्यां स्वरान्ताः स्त्रीलिङ्गाः ॥ ८ ॥

परनिर्देशाद्वा तत्रापि केवलस्य अणः प्रयोगाभावात् सामर्थ्यात्तदन्तग्रहणमिति ।

(क) कैयटमते भेकजातौ नित्यस्त्रीत्वाभावात् हे वर्षाभूरिति । वृत्तिकारमते तु हे वर्षाभु । पुनर्नवायां तु हे वर्षाभु । भेक्यामिति—उक्तार्थं यादवस्य । भेक्यां मण्डूक्यां पुनर्नवायां तन्नामौषधीवाच्यायां वर्षाभूशब्दः स्त्रीलिङ्गः । दर्दुरार्थे तु पुंल्लिङ्गः । इत्यर्थः । इति चक्रधराख्यायां टिप्पण्यां स्वरान्तस्त्रीलिङ्गाः ।

(त०) नकारान्तेत्यादि ॥ एतद्बीजं तु नूण ईबित्यत्र न संधीत्यतो न इत्यनुवर्त्य-लक्ष्यानुरोधात्तस्य व्यवस्थितत्वमाश्रित्य क्वचिन्नेति व्याख्यानात् । तेन क्वचिदणन्तादपि न कामिका । यथा अणन्तान्तात् नगरकारी । अणन्तादेवात्रेबिति तु न । तथा सतीबन्तादेयणि तद्धितप्रकृतिभूतस्यादेः स्वरस्य वृद्धौ नगरकारेय इत्येव स्यात् ॥ ननु परमनगर-कार्या अपत्यमित्यर्थं एयणि कस्य वृद्धिरिति चेत्सत्यम् । समुदायादेरेव प्रत्ययग्रहणे आ-देरन्तस्य च नियमोऽस्त्विति यत्र विधौ स्त्रीप्रत्ययो गृह्यते तत्र तदादिनियमो नास्ति स्त्रीप्र-त्ययेऽनुपसर्जने तदादिनियमो नेति वचनात् । पारमनगरकारेय इति भवति ॥ अनुपसर्जने किम् । अतिनगरकारेरपत्यमित्यर्थं तदादिनियमाभावे एयण् स्यात् स मा भूत् किं त्वणेव । अतिनगरकार इति । प्रियोपगवेत्यत्र नत्वमाश्रित्य नेप्गोणत्वात् । गौणमुख्ययोर्मुख्ये कार्यसंप्रत्यय इति न्यायात् ॥ ११ ॥

श्रीविद्यानगरस्थायिलोकेशकरशर्मणा कृतायामिह टीकायां स्त्रीलिङ्गोऽगात्स्वरान्तकः ॥

इति तत्त्वदीपिकायां स्वरान्ताः स्त्रीलिङ्गाः ॥ ८ ॥

अथ स्वरान्त नपुँसकलिङ्गाः ॥ ९ ॥

अतोऽम् ॥ अकारान्तान्नपुंसकलिङ्गात्परयोः स्यमोरम् भवत्यधौ(क) ॥ कुलम् ॥ १ ॥

(सु०) अतोऽम् ॥ अदन्तान्नपुंसकान्नाम्नः परयोः स्यमोरम् स्यात् ॥ नपुंसका-त्स्यमोर्लुगित्यस्यापवादोऽयम् ॥ अतः किम् । पयः ॥ तपरकरणं मुखमुखार्थम् । नपुंसक-स्येति ह्रस्वे कृते दीर्घत्वाभावात् । केचित्तु म् इत्येव पदच्छेदं कुर्वन्ति लाघवात् । तत्र सेम कृते कुलमिति सिद्धम् । द्वितीयैकवचने तु मस्यैव मे कृते अम्शसोरित्यल्लोपे सिद्ध-मिष्टम् । यत्त्वाहुः । अतिजरसमिति सिद्ध्यर्थममृविधानं तच्च द्वितीयैकवचने लुकोऽपवादे अतोऽमिति मृभावे कृते अम्शसोरित्यल्लोपं बाधित्वा जरस् ततः सन्निपातपरिभाषया लुकोऽप्रवृत्तौ रूपसिद्धिरिति ॥ हे कुलेत्यत्र धेरमि कृते अल्लोपे च समानाद्धेरिति मलोपः । यद्वाऽतोऽमिति सूत्रे स्सम्महत इत्यतो मण्डूकप्लुत्याऽधावित्यनुवर्त्य षष्ठ्या विपरिणम्यते । अमादेशनिषेधाद्धेर्लोप एव विधेयः ॥ १ ॥

(त०) अतोऽमिति ॥ अत्र अतः म् इति छेदः । तथा च सेमादेशे कुलमिति सि-द्धम् । द्वितीयैकवचने मस्यैव मादेशोऽस्य अम्शसोरिति लोपे रूपसिद्धेः । न चातिजरस-मिति सिद्ध्यर्थं तदिति वाच्यम् । लुकोऽपवादममभावं बाधित्वा जरसि कृते ततः सन्निपा-तपरिभाषाविरोधादमोऽलुकि सिद्धत्वादिष्टस्य । सा तु सन्निपातपरिभाषयैव जरसादेशो नेति मूल एव स्फुटीकरिष्यति । यत्त्वाहुः । अत्राकारविधानं सन्निपातपरिभाषाया अनि-

---

(क) अमोऽम्ग्रहणं लुग् व्यावृत्त्यर्थम् । तपरकरणं सुखमुखोच्चारणार्थम् । आकारान्तस्य ह्रस्वत्वेन व्यावर्त्यत्वाभावात् । येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधकः' इति लुको बाधः । अनेकाक्षरत्वेन गुरुत्वात्सर्वस्यैवामः स्यान्नान्त्यमकारमात्रस्य ।

अत्राह वासुदेवः—नन्वत्र म् एव विधीयताम् मेरन्त्यस्याभावादाद्यन्तन्यायेन सर्वस्य स्यात् । अमोऽ-प्यन्त्यस्यैव भविष्यति । मृविधिसामर्थ्याच्च लुगभावोपि भविष्यतीति चेत्सत्यम् । अमो मस्य मविधौ कुलं पातीत्यादावनुस्वारोऽपि न स्यात् । मृविधिसामर्थ्यात् । अजरसं कुलमित्यादिप्रयोगासिद्धिप्रसङ्गाच्चेति ।

त्यत्वज्ञापनार्थम् । तेनामि जरसादेशोऽतिजरसमिति । अत्रेदं वक्तव्यम् । अमि अनित्यं सौ नेत्यत्र विनिगमनाविरहः । इष्टासिद्धेरेव विनिगमकत्वमिति चेत् अन्यथापीष्टसिद्धेरव्याहतत्वात् । यदपि मन इति सूत्रणीयं म् च अश्चेति समासे मान्तादन्तात्स्यमोर्लुगित्यर्थः स्यात् । कलोति पूर्वेण सिद्धेऽक्लीबार्थमेतत्स्यात् । तथा च किम् इदम् शब्दयोर्दोषशङ्काव्यावृत्तये तत्तज्ज्ञापकानुसरणे लाघवाभावः । किंतु आत्मित्येव वक्तुमुचितमित्युक्तम् । अत्राप्यनिष्टशङ्काया अनिवार्यत्वात् । अश्च मश्चेति समासे क्लीबाद्यथाक्रमं स्यमोरामौ स्यातामिति । तस्मान्म इत्यत्र निष्कारणमुद्देश्यविधेयक्रमबाधस्यैव दुष्टत्वात् ॥ १ ॥

ईमौ ॥ नपुंसकलिङ्गात्परं औरीकारमापद्यते (क) ॥ कुले ॥ २ ॥

(सु०) **ईमौ** ॥ नपुंसकान्नाम्नः परं औरीत्वं प्राप्नोति ॥ दीर्घोच्चारणं तु मधुनी इत्यादौ श्रवणार्थम् । विपरीतनिर्देशो नित्यादपि नुमः पूर्वमीविधानार्थः ॥ २ ॥

(त०) **ईमाविति** ॥ अत इति नानुवर्तते । दीर्घोच्चारणं तु वारिणी इत्यादौ श्रवणार्थम् । विपरीतनिर्देशो नित्यादपि नुमः पूर्वमीविधानार्थः । सत्यपि च प्रथमं नुम्प्रवृत्त्यभावात् ॥ २ ॥

जश्शसोः शिः ॥ नपुंसकलिङ्गात्परयोर्जस्शसोः शिर्भवति ॥ ३ ॥

(सु०) **जश्शसोः शिः** ॥ नपुंसकान्नाम्नः परयोर्जश्शसोः शिः स्यात् ॥ नपुंसकात्किम् । देवाः ॥ जसा सहचरितस्य शसो ग्रहणान्नेह । शतशो ददाति । शकारः सर्वादेशार्थः(ख) ॥ ३ ॥

(त०) **जश्शसोः शिरिति** ॥ जसा सहचरितस्य शसो ग्रहणात् शतशो ददातीत्यादौ नातिप्रसङ्गः । शकारः सर्वादेशार्थो न तु श्रवणार्थः पराणीत्यादिनिर्देशात् । अत्राहुः । अत्रासेरित्येव वक्तुमुचितम् । पराणीत्यादिनिर्देशात् स्याद्यधिकाराच्च जश्शसोः शिरित्येव ग्रहणं न तु ङसिङसोः नपुंसकात् नपुंसकस्येति निर्देशात् । अर्थस्य नियामकत्वाद्वैपरीत्यशङ्काऽपि नेति । अत्रेदमवधेयम् । लाघवार्थमसेरिति सूत्रिते ज्ञापकानुसरणस्य वैपरीत्यशङ्कानिवृत्त्यर्थम् अर्थनियामकत्वानुसरणस्य चातिगौरवेण ततोऽस्यैव लघुत्वात् ॥ ३ ॥

नुमयमः ॥ नपुंसकस्य नुमागमो भवति शौ परे । यमप्रत्याहारान्तस्य न । मिदन्त्यात्स्वरात्परः ॥ ४ ॥

(सु०) **नुमयमः** ॥ अयमप्रत्याहारान्तस्य नपुंसकस्य नुम् स्यात् शौ परतः । नपुंसकादिति पञ्चम्या विपरिणम्यते शिरिति सप्तम्या च । अयम इति षष्ठी । मकारादकारस्योच्चारणार्थत्वात् । मित्वादन्त्यात्स्वरात्परो नुम् ॥ अयमः किम् । विमर्द्दिवि । चत्वारि । वारि । फलि । सुगणि । ब्रह्माणि । प्रशामि ॥ ४ ॥

(त०) **नुमयम इति** ॥ अत्र नपुंसकादित्यनुवृत्तस्यार्थवशाद्विभक्तिविपरिणामः । एवं शिरित्यपि सप्तम्या विपरिणम्यते इत्यभिप्रेत्याह—**नपुंसकस्य शाविति** च ॥ अयम

(क) **ईमाविति** । मधुनी इत्यादौ दीर्घश्रवणार्थं दीर्घविधिः ।

(ख) जस्शसोरित्यत्र जसा साहचर्यात् सानुबन्धग्रहणे न निरनुबन्धस्येति परिभाषया वा शसपि द्वितीयाबहुवचनमेव तेन शतशो ददातीत्यादौ शस्प्रत्ययस्य तद्धितस्य नेत्यर्थः ।

इति षष्ठी अकारस्योच्चारणार्थत्वात् । षष्ठ्यर्थे प्रथमा वा ॥ मिदन्त्यादिति ॥ अत्र चक संध्यक्षराणीति ज्ञापकमिति भावः ॥ ४ ॥

नोपधायाः ॥ नान्तस्योपधाया दीर्घो भवति शौ पञ्चस्वघिषु । नामि च । ईति न । कुलानि । हे कुल । शेषं देववत् ॥ एवं मूलफलादयः ॥ ५ ॥

(त०) **नोपधायाः** ॥ नेत्यविभक्तिको निर्देशः । नाम्नो विशेषणम् । तेन तान्तस्य नाम्न उपधाया दीर्घः स्यात् शौ परे पञ्चस्वघिषु । ईमाविति ईकारे तु न ब्रह्मणी इति । वाऽऽद्दीपारित्यत ईकारस्य अनुक्तसमुच्चयार्थस्य निषेधार्थस्य वा वाशब्दस्य चानुवर्तनात् । नामीत्यस्यापकर्षणान्नम्यपि उपधाया दीर्घः । विदो नवानामिति निर्देशात् । भवन्नित्यादौ संयोगान्तलोपस्यासिद्धत्वान्न दीर्घः ॥ ५ ॥

(त०) **नोपधाया** इति ॥ न उपधायाः इति छेदः । नेति लुप्तषष्ठीकं तदन्तत्वं च बोध्यम् । विशेष्यस्य नाम्न उपस्थितत्वात् इत्यत आह—**नान्तस्येति** ॥ अत्र वाऽऽद्दीपोरित्यत ईकार इत्यनुवर्त्य नेति वेत्यत आह—**ईति नेति** ॥ तेन ब्रह्मणी इत्यादि च सिद्धम् । अत्र नामीत्यस्यापकर्षणमित्याह ॥ **नामीति**—यदि तु ज्ञापकसिद्धस्यासार्वत्रिकत्वात् पञ्चानामिति निर्देशाद्वा नलोपेऽपि दीर्घ-तदा नामीति नापकर्षणीयम् । हे कुलेति ॥ अकारस्य लोपे मकारस्य समानाद्धेरिति लोपः । अधेरित्यनुवृत्तेर्वा ॥ ५ ॥

श्त्वन्यादेः ॥ अन्यादेः क्लीबात्परयोः स्यमोः श्तुर्भवति(क) । अन्यत् । ६

(मु०) **श्त्वन्यादेः** ॥ क्लीबादन्यादेर्नाम्नः परयोः स्यमोः श्तुः स्यात् । अतोऽमित्यस्यापवादः ॥ अन्य-अन्यतर-इतर डतर-डतमेति पञ्चात्मकोऽन्यादिः । सर्वाद्यन्तर्गणः । डतरडतमौ प्रत्ययौ । तदन्तदन्ताः कतरकतमादयो ग्राह्याः ॥ क्लीबादिति किम् । अन्यः । अन्यम् ॥ शकारः सर्वादेशार्थः । उकार उच्चारणार्थः ॥ ६ ॥

(त०) **श्त्वन्यादेरिति** ॥ श्तु अन्यादेरिति छेदः । शः सर्वादेशार्थः । उकार उच्चारणार्थः । मेरकवर्णत्वादेव सर्वादेशः सिद्धः । द्वितीयैकवचने तु मस्य तादेशे कृते एकदेशविकृतन्यायेनाम्शसोरस्येत्यलोपे कृते सिद्धमिष्टमिति शकारो व्यर्थ इति चेत्सत्यम् । स्वविषये प्राप्तस्य सर्वस्य स्थाने तुर्यथा स्यात् । सिलोपबाधनार्थं शकार इति फलितम् । इत्याशयेनाह-**अन्यादेरिति** ॥ ६ ॥

वाऽवसाने ॥ अवसाने वर्तमानानां झसानां जबा भवन्ति चपा वा ॥ अन्यत्—अन्यद् , अन्ये, अन्यानि ॥ ७ ॥

(मु०) **वाऽवसाने** ॥ अवसानिरवसानम् । षोऽन्तकर्मणि । अस्माद्भावे युट् । समाप्तिरन्त इति यावत् । पदस्यान्ते वर्तमानानां झसानां जबाश्चपाश्च वा स्युः ॥ पदस्य किम् । मरुतौ । अन्ते किम् । गतः ॥ झसानां किम् । राजन् ॥ ७ ॥

(क) श्त्वन्यादेरिति । मधाविरयस्यानानुवृत्तेर्घेरपि अमोऽपवादः । समानाद्धेर्लोपोऽधातोरित्यत्र कुप्वोः ᳲकᳲपौ वेत्यतो वानुवृत्तेर्व्यवस्थामाह । अन्यदिति । अत्राह वासुदेवः—यस्त्वन्यदित्यत्राम्लुगभाव इवात्रापि श्तुविधानसामर्थ्यादेव लोपाभाव इति । तदसत् । येन नाप्राप्तिन्यायेनाम्लुको प्राप्तयोः श्तुविधेस्तदपवादत्वात् । विधानस्य च स्यमोरेव सार्थकत्वादिति ।

(त०) वाऽवसान इति ॥ अत्रावसातिरवसानम् । षोऽन्तकर्मणि । भावे ल्युट् । समाप्तिरन्त इति यावत् । अत्रावसानशब्दस्यान्तावयवार्थस्यावयविनि साकाङ्क्षत्वात् पदस्यैवास्यावयवी संबध्यते । यदि तु 'अवसे चरा झसानाम्' 'झबे जबाः' इति सूत्रद्वये पदान्त इत्यनुवर्त्य वाक्यभेदेन व्याख्यायते पदान्ते झसानां जबाश्चपाश्च भवन्तीति तदेदं सूत्रं व्यर्थमेव ॥ ७ ॥

(अन्यादेर्भेर्लोपो न) हे अन्यत् । अन्यतरत् । इतरत् । कतरत् । कतमत् ॥ ८ ॥

(मु०) अन्यादेर्भेर्लोपो न ॥ अन्यादेः परस्य भेर्लोपो न ॥ समानाद्धेरिति प्राप्ते निषेधः ॥ ८ ॥

एकतरस्य डतुर्न ॥ एकतरम् । शेषं सर्ववत् ॥ सेरमादेशे संनिपातपरिभाषया न जरस् । अजरम् , अजरसी—अजरे, अजराणि ॥ ९ ॥

(मु०) एकतरस्य डतुर्न ॥ एकतरात्परयोः स्यमोः डतुर्न स्यात् । डतरप्रत्ययान्तत्वात्प्राप्ते निषेधः । अविद्यमाना जरा यस्य तत् । अन्यार्थं इति ह्रस्वे कृते अतोऽमिस्यम् । अजरमित्यत्राजरशब्दमाश्रित्य सिस्थानेऽम् उत्पन्नः तेनाजरशब्दस्याम्विधिः संनिपातः । अतः सन्निपातोऽम्विधिर्जरमादेशविधानेनाजरशब्दस्य विघातको नेति(क)। अजरमित्येकमेव रूपं प्रथमैकवचने । अजर शि इति स्थिते परत्वाज्जरसि कृते नुमयम इति नुम्

(त०) सेरमादेशे इति ॥ यो यमाश्रित्योत्पद्यते स तं प्रति सन्निपातः । 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' ॥ ९ ॥

नृसम्महतोऽधो दीर्घः शौ च ॥ न्सन्तस्य प्शब्दस्य महच्छब्दस्य च दीर्घो भवति पञ्चस्वघिषु शौ च ॥ अजरांसि । अमि लुकोऽपवादमम्भावं बाधित्वा परत्वाज्जरस् । ततः सन्निपातपरिभाषया न लुक्(ख) । अजरसम्—अजरम् , अजरसी—अजरे, अजरांसि—अजराणि । शेषं निर्जरवत् ॥ हृदयोदकास्यमांसानाम् हृद् उदन् आसन् मांस् । हृन्दि । हृदा । हृद्भ्याम् ॥ उदानि । उद्ना । उदभ्याम् । आसानि । आस्ना । आसभ्याम् ॥ मांसि । मांसा । मान्भ्याम् ॥ १० ॥

(मु०) न्सम्महतोऽधो दीर्घःशौ च ॥ न्स् च अप् च महच्च एषां समाहारो न्सम्महत् तस्य न्सम्महतः । 'अमे अमा वा' इत्यनेन पस्य मादेशं कृत्वा अप्शब्दोऽत्र

(क) यो यमाश्रित्योत्पद्यते स तं प्रति सन्निपातः । सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य । अत्र अजरमित्यत्राजरशब्दमाश्रित्य सिस्थानेऽम् उत्पन्नः, तेनाजरशब्दस्याम्विधिः सन्निपातः । अतः=सन्निपातात् । अम्विधिः=सेरमादेशः जरशब्दस्य विघातको न भवतीत्यर्थः ।

(ख) अजर अम् इत्यत्र 'नपुंसकात्स्यमोर्लुक्' इत्यस्यापवाद'मतोऽम्' इत्यम् भावं बाधित्वा परत्वाज्जरस् । ततो यो यमाश्रित्योत्पद्यते स तं प्रति सन्निपातः । सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति परिभाषया नामो लुक् । अजरसम् । अजरम् ।

निर्दिश्यते । अधिकारालब्धस्य नाम्नो विशेषणमिदम् । विशेषणेन च तदन्तविधिरिति तदन्तस्यापि दीर्घो भवतीत्यर्थः ॥ अधाविति छेदो न तु धाविति । पञ्चस्वित्यनुवर्तते । तद्विशेषणं चेदम् । अत्र पूर्ववत् ई इत्यनुवर्तते । चकारोऽस्त्येव । तेन स्वपी इत्यादौ ईति नेत्यर्थः ॥ अत्राम्महत्साहचर्यादधातोरेव न्स् गृह्यते । तेन सुहिन् इत्यादौ न दीर्घो धातुत्वात् । न्सन्तत्वाद्दीर्घे अजरांसि । नोपधाया इति दीर्घे अजराणि । अजर अमित्यत्र नपुंसकात्स्यमोर्लुगित्यस्यापवादमतोऽमित्यम्भावं बाधित्वा परत्वाज्जरस् । ततो यो यमाश्रित्योत्पद्यते स तं प्रति सन्निपातः । सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति परिभाषया नामो लुक् । अजरसम्-अजरम् ॥ पाद्दन्तेत्यनेन हृद् उदन् आसन् मांस् आदेशाः । 'अल्लोपः स्वरे' इत्यकारलोपे उद्ना । नाम्नो नो लोपशिति नलोपे उदभ्याम् । संयोगान्तस्येति सलोपे मान्भ्यामिति ॥ १० ॥

(त०) न्सम्महतोऽधौ दीर्घः शौ चेति ॥ न्स् च अप् च महच्च एतेषां समाहारः न्सम्महत् तस्य । पस्य 'जमे जमा वेति' मः । अत्राधाविति छेदः । तच्च पञ्चस्वित्यनुवृत्तस्य विशेषणम् । तेन भिवर्जितेषु पञ्चस्वित्यर्थः । केवलस्य न्सोऽसंभवात्तदन्तस्य ग्रहः । अत्र नोपधाया इत्यत उपधामात्रमनुकृष्य तच्च पूर्वमात्रोपलक्षकं पारिभाषिकार्थस्येहासंभवात् । एवं स्थिते दीर्घग्रहणस्य सामर्थ्यकल्पनादिकमनर्थकमित्युपेक्षितम् ॥ शसः पञ्चस्वनन्तर्भावात् शाविति ॥ स्वपीत्यत्र तु न दीर्घः । येति ईकारं चानुवर्त्य वाकारस्य निषेधार्थत्वं परिकल्पनीयम् इति व्याख्यानात् ॥ १० ॥

नपुंसकस्य ह्रस्वः ॥ नपुंसकस्य ह्रस्वो भवति ॥ श्रीपम् । कुलवत् ॥

(मु०) **नपुंसकस्य ह्रस्वः** ॥ अत्र ह्रस्वश्रुत्या स्वरस्येत्युपस्थितम् । तच्च नपुंसकस्य विशेषणम् । नाम्न इत्यनुवृत्तमधिकारात् । तत्र स्वरान्तस्य नपुंसकस्य नाम्न इति सामानाधिकरण्येन व्याख्यानम् (क)। लिङ्गस्य नामार्थत्वाभ्युपगमात् । तस्य ह्रस्वः स्यादित्यर्थः । श्रियं पाति यत् कुलं तत् श्रीपम् । अत्र ह्रस्वे कृतेऽतोऽमित्यम् ॥ ११ ॥

(त०) **नपुंसकस्येति** ॥ ह्रस्व श्रुत्या स्वर इत्युपस्थितम् । तच्च नाम्नो विशेषणम् । तेन स्वरान्तस्य नाम्नो नपुंसकस्येत्यथः । न तु नपुंसकस्य स्वरस्य ह्रस्व इत्यर्थः । सुवाक् कुलमित्यादावतिव्याप्तेः (ख) ॥ ११ ॥

नपुंसकात्स्यमोर्लुक् ॥ अस्थि(ग) ॥ १२ ॥

(मु०) **नपुंसकात् स्यमोर्लुक्** ॥ नपुंसकान्नाम्नः परयोः स्यमोर्लुक् स्यात् ॥ त्यदित्यादौ लुका त्यदाद्यत्वं बाध्यते । क्वचित्पूर्वेणापि परस्य बाधस्वीकारात् नित्यत्वा-

---

(क) **उपस्थितमिति** । स्वराणां ह्रस्वदीर्घधर्मत्वात् । तच्चेति स्वरपरामर्शः। अधिकारात् नामप्रकरणत्वादिति भावः । **सामानाधिकरण्येनेति** । सामानाधिकरण्यं नानैकाधिकरणवृत्तित्वम् **लिङ्गस्येति** स्वार्थद्रव्यलिङ्गसंख्याकारकाणि प्रातिपदिकार्थ इत्युक्तत्वात् ।

(ख) नपुंसकस्येति स्वरस्येति विशेषणे सुवागित्यत्राऽऽकारस्य ह्रस्वत्वापत्तिप्रसङ्गः इत्यर्थः ।

(ग) 'नपुंसकात्स्यमोर्लुक्" इति सूत्रम् । न तु वार्त्तिकम् । सारस्वते तस्य सूत्रदृष्टत्वात् । तथाच नपुंसकलिङ्गात्परयोः स्यमोर्लुक् भवतीति वृत्तिकारः ।

द्वा । कृताकृतप्रसङ्गित्वाल्लुङ् नित्यः । स्यदाद्यत्वं विभक्तावुच्यमानं कृते लुकि विभक्त्य भावान्न ॥ ११ ॥

(त०) नपुंसकान्त्यमोर्लुगिति ॥ तत्कुलमित्यत्र तु स्यदाद्यत्वमेतेन बाध्यते । नित्यत्वाद्वा कृताकृतप्रसङ्गित्वात् न च कृते स्यदाद्यत्वे लुकोऽपि न प्राप्तिः अतोऽमित्यनेन बाधात् इति चेत् । लुको निमित्तस्य लक्षणान्तरेण बाधात् । न पुनःस्यदाद्यत्वस्येव । यस्य लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यं भवति ॥ १२ ॥

इवृणां नपुंसके धौ गुणो वा ॥ हे अस्थे-हे अस्थि ॥ १३ ॥

(सु०) **इवृणां नपुंसके धौ गुणो वा** । इश्च उश्च आ च ते इवरस्तेषां इवृणा-मिकारोकारऋकारान्तानां नपुंसकानां गुणो वा स्यात् धौ ॥ १३ ॥

(त०) इवृणामिति ॥ इश्च उश्च आ च इवरस्तेषां इवृणाम् ॥ १३ ॥

नामिनः स्वरे ॥ नाम्यन्तस्य नपुंसकस्य नुमागमो भवति स्यादौ स्वरे ॥ अस्थिनी ॥ १४ ॥

(सु०) **नामिनः स्वरे** । नाम्यन्तस्य नपुंसकस्य नाम्नो नुम् स्यात् स्वरादौ स्यादौ ॥ नाम्यन्तस्य किम् जगते ॥ नपुंसकस्य किम् । वातप्रम्ये ॥ स्वरादौ किम् । वारिभ्याम् ॥ स्यादौ किम् । दध्यत्र ॥ १४ ॥

(त०) **नामिनः स्वरे** इति ॥ नाम्यन्तस्य किम् । जगता । नपुंसकस्य किम् । वातप्रम्या । स्वरादौ किम् । वारिभ्याम् ॥ स्यादौ किम् । दध्यत्र ॥ ननु स्वरग्रहणं किमर्थम् । वारिभ्यामित्यादौ वारणार्थमिति चेन्न । तत्रलोपशा रूपसिद्धेः । अथ सुरा-भ्यामित्यत्र नुमा जातेन व्यवधानादात्वं न स्यात् । नलोपे कृतेऽपि विभक्तिविधौ तस्या-सिद्धत्वाद्व्यवधानमेव । सुरेत्यस्य व्यवधायकत्वाद्रैशब्दस्य व्यवधायकत्वं भवत्येव । अथ तस्माद्रैशब्दान्तनाम्न एव नुमा व्यवधानमिति न वाच्यम् । तथा सति पूर्वस्य ये कृतेऽ-तिर्याभ्यामिति स्यात् । मैवम् । राय आत्वं नुमा व्यवधानं प्राप्यापि भवति विभक्ति-विधानदशायामानन्तर्याश्रयणात् । अथ नुड्बाधनार्थं स्वरग्रहणम् । अन्यथा नित्यत्वान्नु-मेव स्यादिति चेन्न, नुडर्थं यत्नान्तरस्यावश्यकत्वात् । अथ नुटि कृते नुम् बाधनार्थमिति चेन्न, किं ततो लोपेनेष्टसिद्धेः । अथ लोपशि नामीत्यस्याप्रसङ्ग इति न वाच्यम् । नोपधाया इत्यनेनैव निर्वाहसत्त्वात् । अथ शुचीनामित्यादौ इनां शौ सावित्यनेन नियमः स्यादिति न वाच्यं प्रतिपदोक्तस्यैवेनो ग्रहणात् । उत्तरार्थमित्यपि न तथा सति तत्रैव कृतं स्यात् । तेन इह करणं ज्ञापयति । आगमजस्य लोपश् नेति । तेन भवानित्यादि सिद्धम् ॥ १४ ॥

अच्चास्थ्नां शसादौ ॥ शसादौ स्वरेऽस्थ्यादीनां नुमागम इकारस्य चाकारः(क) । अल्लोपः स्वरेऽम्वयुक्ताच्छसादौ ॥ अस्थ्ना । अस्थ्ने । अ-

---

(क) अच्चास्थ्नामिति । बहुवचनमन्यथानुपपत्त्याऽग्रे पठितान् दधिसक्थि-प्रभृतिशब्दानपि गृहीतीत्याह—अस्थ्यादीनामिति । इकारस्येति । न तावन्नमविधिसामर्थ्यात् । न च नुम्विधेरकारार्थत्वं वाच्यम् । अन् विधानेनापि तत्सिद्धेः । तस्मादन्त्याभावेऽन्त्यसाशदेशस्येतीकारस्यैव भवति पूर्वतो नामिन इत्य-नुवृत्तेर्वा । शसादावित्यतद्-गुणसंविज्ञानबहुव्रीहिः । तेनास्थीनीत्यत्र शसि न स्यात् । एवं च टादाविति

स्थ्नः, अस्थ्नोः, अस्थ्नाम् । वेङ्योः अस्थि-अस्थनि । एवं दधिसक्थ्यक्षि-शब्दाः । तदन्तस्यापीष्टः । प्रियास्थ्ना । अतिदध्ना । वारि, वारिणी, वारीणि । आमि नुट् । वारीणाम् । नपुंसकस्य ह्रस्वः । ग्रामणि ॥ १५ ॥

(सु०) **अच्चास्थ्नां शसादौ** ॥ अत्राधिकृतस्य नाम्नोऽस्थ्यादिभिर्विशेषणात्त-दन्तविधिः । तेनानपुंसकस्याप्यस्थ्याद्यन्तस्य नाम्नो नुम् स्यादेषामितोऽकारश्च । शस् आदिर्यस्येत्यतद्गुणसंविज्ञानो बहुव्रीहिः । तेन शसि न अस्थीनीति । अस्थ्नामिति बहु-वचनमाद्यर्थम् । तेनास्थिदधिसक्थ्यक्षिशब्दा ग्राह्याः । अल्लोप इत्यनेनोपधाऽकारलोपे अस्थ्ना । वेङ्योरित्युपधाया वा लोपे अस्थ्नि-अस्थनि । तदन्ते तु प्रियमस्थि यस्य स प्रियास्थिः । तेन प्रियास्थ्ना शुना ॥ दधि अतिक्रान्तमतिदधि । तेनातिदध्ना व्यञ्जनेन ॥ स्त्रियामप्यतिदध्नेत्येव । सन्निपातपरिभाषया बहिरङ्गपरिभाषया चेपोऽप्रवृत्तेः (क) ॥ ह्रस्वाणामिति वा गुणे हे वारि-हे वारे । टा नाऽस्त्रियामिति नाभावे वारिणा । ङयि ङिती-त्येत्वे प्राप्ते एत्वौत्वतृवद्भावैत्वानि बाधित्वा 'नामिनः स्वरे' इति नुम् । 'परेण पूर्वबाधो वा' इत्याद्युक्तत्वात् । अतिसखिनीत्यत्र ऐ सख्युरित्यैत्वे प्राप्ते नुम् । वारिणीत्यत्र ङेरौ ङिदित्यौत्वे प्राप्ते नुम् । प्रियक्रोष्टुनि इत्यत्र क्रोष्टुशब्दस्येति तृवद्भावे प्राप्ते नुम् । वारिणे । एत्वे प्राप्ते नुम् । आमि 'प्रायशः' इत्युक्तत्वात्पूर्वेण परस्य बाधनात् नुडेव ॥ ननु नुम्नुटोः को विशेषः । उच्यते । नामीति दीर्घत्वमिति । वारीणाम् । हसादौ हरि-वत् ॥ ग्रामं नयति यत् कुलमिति नपुंसकस्येति ह्रस्वे ग्रामणि ॥ १५ ॥

(त०) **अच्चास्थ्नां शसादाविति** ॥ शस आदिर्यस्येत्यतद्गुणसंविज्ञानबहुव्रीह्या-श्रयणात् टादिर्गृह्यते । अथैवं टादावित्येव कथं नोक्तमुत्तरसूत्रेऽपि तदनुवृत्त्यैव सिद्धेः टादा-वित्यस्यैव वक्तुमुचितत्वादिति चेत्सत्यम् । वसोर्व उरित्युत्तरसूत्रे शसादावित्यस्योपयो-गित्वात् । बहुवचनाद्वास्थ्यादिग्रहः । अत्वं चकारस्यैव । नाप्यनुवृत्तेः तपरत्वविपरीतनि-र्देशयोस्तु वैयर्थ्यमेव ॥ तदन्तेति ॥ तस्मादित्यधिकारान्नामलाभः । तच्चास्थ्यादीनां विशेषणम् । विशेषणेन च तदन्तविधिरित्यतस्तदन्तत्वलाभः । यत्तु उत्तरार्थमनुवृत्तं नपुं-सकग्रहणमस्थ्यादीनां विशेषणम् । तेन यदृच्छाशब्दानां पुंलिङ्गानां वारणम् । दधिर्नाम कश्चित्तदनुकरणस्य दधिनेत्येव यथा स्यादित्युक्तं तन्न । "अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः । शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिषु" इत्युक्तेरेव तद्वारणसंभवात् ॥ १५ ॥

टादावुक्तपुंस्कं पुंवद्वा ॥ उक्तपुंस्कं नाम्यन्तं नपुँसकलिङ्गं टादौ स्वरे परे पुंवद्वा भवति(ख) ॥ ग्रामण्या-ग्रामणिना । ग्रामणीनाम्-

---

वाच्ये शस्ग्रहणं 'वसोर्व उ' आदेरित्याद्यर्थम् ।

(क) अतिदध्नेत्यस्य स्त्रियामपि तृतीयायां तादृगेव । सन्निपातपरिभाषया बहिरङ्गपरिभाषया च इपो=इप्प्रत्ययस्याप्रवृत्तेः ।

(ख) टादाविति । अत्र यदि उक्तः पुमान् येन तदुक्तपुंस्कं शब्दरूपं पुंशब्दो भवतीति व्याख्या-येत । तदा ग्रामण्येत्यादौ पुंशब्दातिदेशेऽपि क्लीबार्थस्याऽनिवृत्तत्वात् सति ह्रस्वे नुमि च पुंवत्त्वस्य वैय-र्थ्यादन्यतरानिवृत्त्या चारितार्थ्येऽपि तद्धेतुह्रस्वं नाभावगुणनुडौत्वानि प्राप्नुवन्ति । तस्मादुक्तः पुमान्

ग्रामण्याम् । ग्रामणिनि–ग्रमण्याम् ॥ प्रधि । प्रध्या–प्रधिना ॥ सुधि । सुधिया–सुधिना ॥ मधु । हे मधो–हे मधु ॥ एवमम्ब्वादयः ॥ सानु, सानुनी, स्नूनि–सानूनि । स्नुना–सानुना, स्नुभ्याम् ॥ प्रियक्रोष्टु, प्रियक्रोष्टुनी, प्रियक्रोष्टूनि । प्रियक्रोष्ट्रा–प्रियक्रोष्टुना । प्रियक्रोष्ट्रे–प्रियक्रोष्टवे–प्रियक्रोष्टुने । प्रियक्रोष्टुः–प्रियक्रोष्टोः प्रियक्रोष्टुनः ॥ सुलु, सुलुनी, सुलूनि । सुल्वा–सुलुना ॥ एवं खलप्वादयः ॥ धातृ, धातृणी, धातॄणि । हेधातः–हेधातृ ॥ एवं ज्ञातृकर्त्रादयः ॥ १६ ॥

(७०) टादावुक्तपुंस्कं पुंवद्वा ॥ प्रवृत्तिनिमित्तैक्ये उक्तपुंस्कं नाम्यन्तं नपुंसकं पुंवद्वा भवति टादौ स्वरे ॥ नपुंसकादित्युक्तपुंस्कमित्यनेन सह प्रथमान्तं सम्बध्यते । पुंवदिति पुंशब्देन तुल्यमित्यर्थः । केन प्रकारेण पुंशब्देन तुल्यं नुम्ह्रस्वयोरभावात् । तेन नुम्ह्रस्वयोरभावोऽतिदिश्यते । पुंनपुंसके वर्तमानस्य यस्य शब्दस्य प्रवृत्तिनिमित्तं भिद्यते तस्य टादौ स्वरे न पुंवत् । यथा । मधुशब्दो मद्ये नपुंसकः । चैत्रदैत्ययोः पुंलिङ्गः (क) । नात्र पुंवत् । प्रवृत्तिनिमित्तभेदात् । उक्तः पुमान् यस्मिन्नर्थे तद्भाषितपुंस्कं प्रवृत्तिनिमित्तं तदस्यास्तीति उक्तपुंस्कम् । अहृको चेत्यप्रत्ययः । उक्तं हि । "शब्दप्रवृत्तेर्निमित्तं यत् क्लीबे तच्च पुंसि चेत् ॥ तदा भाषितपुंस्कत्वं पटुने पटवे यथा ॥ १ ॥" पुंलिङ्गपक्षे ग्रामणीशब्दो दीर्घान्त एव । ततो य्वौ वेति यः । निय इत्याम् । ग्रामण्याम् । नपुंसकपक्षे ह्रस्वः । ततो 'नामिनः स्वरे'' इति नुम् ॥ पुनरुक्तं च एक एवेत्यादि । तन्नाम उक्तपुंस्कमाचार्येणोच्यते । तत्किम् । एक एव यः शब्दः हीति निश्चयेन त्रिषु लिङ्गेषु वर्तते यः शब्दः त्रिषु लिङ्गेषु एकमेवार्थमाख्याति कथयति । अर्थशब्देन प्रवृत्तिनिमित्तमुच्यते ॥१॥ प्रकृष्टा धीर्यस्य तत्प्रधि । प्रधिनो इत्यत्र पूर्वेणापि नुमा परमपि यत्वं बाध्यते प्रायश इत्युक्तत्वात् । अत्रापि प्रकृष्टज्ञानवत्त्वं पुंनपुंसकयोरेकमेवेति उक्तपुंस्कत्वात्पुंवत्पक्षे य्वौ वेति यः । नपुंसकपक्षे नुम् ॥ सुष्ठु धीर्यस्य तत् सुधि । सुधिना इत्यत्र इयं बाधित्वा प्राग्वन्नुम् । शोभनज्ञानवत्त्वं प्रवृत्तिनिमित्तं पुंनपुंसकयोरेकमेव । उक्तपुंस्कत्वात् पुंवत्पक्षे सुधीशब्दस्य च नेति निषेधादिय् । सुधिया ॥ मधु मद्ये पुष्परसे । मधुर्वसन्ते चैत्रे चेति पुंनपुंसकयोरेकप्रवृत्तिनिमित्तं नास्त्यत्र । किं तु मद्यत्ववसन्तत्वादिरूपं भिन्नं भिन्नमेव । उक्तपुंस्कत्वाभावान्मधुने । मधुन इत्येव । न तु मधवे मधोरित्यादि । स्वृणामिति वा गुणे हे मधु–हे मधो ॥ सानुशब्दस्य शसादौ पाद्दन्तेत्यनेन वा स्नुरादेशः । 'स्नुः प्रस्थः सानुरस्त्रियाम्' इत्युभयलिङ्गः सानुशब्दः । स्नूनि–सानूनि इत्यादि ॥ प्रियः क्रोष्टा यस्य

यस्मिन् अर्थे शब्दप्रवृत्तिनिमित्ते स उक्तपुंस्कोऽर्थः । सोऽस्मिन्नस्तीति मत्वर्थीयाकारेण नामापि क्लीबमुक्तपुंस्कं समानायामाकृतावुक्तपुंस्कमिति यावत् । तच्च पुंवत् पुमर्थवद् भवतीति व्याख्येयम् । तथाचोक्तम् 'शब्दप्रवृत्तेर्निमित्तं यत् क्लीबे तच्च पुंसि चेत्तदाभाषितपुंस्कत्वम्'पटुने पटवे यथा' अत एव पीलुने फलायेत्यत्र न भवति । अत्र हि पुंसि वृक्षाकृतिः प्रवृत्तिनिमित्तम् । क्लीबे तु फलाकृतिरिति प्रवृत्तिनिमित्तभेदः तदुक्तं 'पीलुवृक्षः फलं पीलु, पीलुने न तु पीलवे, वृक्षे निमित्तं पीलुत्वं तज्जत्वं तत्फले पुनः' इति ।

(क) 'मधुश्चैत्रे च दैत्ये च मधुः पुष्परसे मधु' इत्युक्तत्वात् ।

तत् प्रियक्रोष्टु । टादौ स्वरे पुंवत्पक्षे त्वम् । प्रियक्रोष्ट्रा । टा नाऽस्त्रियामिति नाभावे प्रियक्रोष्टुना इति रूपद्वयम् । क्लीबे तु नुमेव । प्रियक्रोष्टुने । एवमन्यत्रापि । आमि नुडेव नित्यत्वात् ॥ सुष्ठु लुनाति तत्सुलु । नपुंसकस्येति ह्रस्वः । शोभनलवनकर्तृत्वं पुंनपुंसकयोरेकमेव । पुंवत्पक्षे य्वौ वेति वः । क्लीबे नुम् । सुल्वा, सुलुना ॥ दधाति तत् धातृ धारणकर्तृत्वं पुंनपुंसकयोरेकमेव । पुंवत्पक्षे रत्वम् । क्लीबे नुम् । ङसिङसोर्ऋतो ङ उरित्युत्वम् । धातुः । आमि नुट् । धातॄणाम् । ङाविति गुणे धातरि । स्वॄणामिति वा गुणे हे धातः-हे धातृ ॥ १६ ॥

(त०) टादावुक्तपुंस्कं पुंवद्वेति ॥ पुंशब्देन तुल्यं पुंवत् । तेन नुम्ह्रस्वयोरभावोऽतिदिश्यते । अतिदेशसामर्थ्याद्ह्रस्वोऽपि । अन्यथा प्रकृतत्वान्नुम एव ग्रहणं स्यात् । तथा च ह्रस्वाश्रयनाभावादि स्यात् ॥ उक्तपुंस्कमिति ॥ उक्तः पुमान्यस्मिन्नर्थे प्रवृत्तिनिमित्तरूपे तदुक्तपुंस्कं प्रवृत्तिनिमित्तं तदस्यास्तीति मत्वर्थीयाकारेण क्लीबं नामाख्यते । तेन पीलुर्वृक्षस्तत्फलं पीलु । पीलुने न तु पील्वे । प्रवृत्तिनिमित्तभेदात् । वृक्षे वृक्षत्वव्याप्यजातिः । फले तु फलत्वव्याप्यजातिरिति भेदः । उक्तं च । "शब्दप्रवृत्तौ निमित्तं यत् क्लीबे तच्च पुंसि चेत् । तदा भाषितपुंस्कत्वं पटुने पटवे यथा" इति । उक्तः पुमान् येन शब्देनेति वाक्यं तु स्वप्रवृत्तिनिमित्तभेदेऽपि स्यात् । प्रध्येति । पुम्वत्त्वं य्वौ वेति यत्वम् । बह्व्यः श्रेयस्यो यस्येति तद्बहुश्रेयसी कुलम् । अत्र नपुंसकाद्ध्रस्वत्वं न ईयसोऽङ्ति ह्रस्वमात्रनिषेधादिति श्रीपत्यादयः । अन्ये तु उपसर्जनह्रस्व एव निषिध्यते नपुंसकह्रस्वत्वं स्यादेव बहुश्रेयसि बहुश्रेयसिनी इत्याहुः । प्रद्युनेति माधवमते । मतान्तरे पुंवद्वा प्रद्यवेत्यपि ॥ १६ ॥

ह्रस्वादेशे सन्ध्यक्षराणामिकारोकारौ ॥ अतिरि । अतिराया—अतिरिणा । अतिराये—अतिरिणे । अतिराभ्याम्(क) । अतिरीणि । अतिरासु । प्रद्यु । प्रद्युना—प्रद्यवा । उपगुना—उपगवा । अतिनु । अतिनुना—अतिनावा ॥ १७ ॥ इति स्वरान्ता नपुंसकलिङ्गाः ॥ ९ ॥

(मु०) ह्रस्वादेशे सन्ध्यक्षराणामिकारोकारौ ॥ आदिश्यते इत्यादेशः ह्रस्वश्चासावादेशश्च ह्रस्वादेशः । निर्धारणे सप्तमी । जातावेकवचनम् । आदिश्यमानेषु ह्रस्वेषु मध्ये संध्यक्षराणामिकारोकारौ भवतः ॥ एकारान्तस्योदाहरणम् । इः कामः स्मृतो येन सः स्मृतेः । शोभनः स्मृतेर्यस्य तत् सुस्मृति ॥ रायमतिक्रान्तं यत् कुलं तदतिरि । 'अत्यादयः क्रान्ताद्यर्थे' इति तत्पुरुषः । अतिरिणा । इह न पुंवत् । उक्तपुंस्कत्वाभावात् । पुंसि त्वैदन्तोऽस्तीति । एवमग्रेऽपि । एकदेशविकृतस्यानन्यत्वात् रैस्मीत्यात्वम् । अतिराभ्याम् । आमि नुट् नामीति दीर्घः । अतिरीणाम् ॥ प्रकृष्टा द्यौर्यस्मिन् तत् प्रद्यु । प्रकृष्टस्वर्गवत्त्वादिप्रवृत्तिनिमित्तैक्यात् प्रद्योशब्द उक्तपुंस्कः । स एवेदानीं ह्रस्वत्वे इति प्रद्युशब्दोऽपि उक्तपुंस्क एव एकदेशविकृतस्यानन्यत्वात् । अतः पुंवद्भावो भवतीत्येके

(क) 'एकदेशविकृतस्यानन्यत्वात्' इत्युक्त्या 'अतिराभ्याम् इत्यत्र 'रायो हलि'इत्यात्वं बोध्यम् ।

वदन्ति ॥ माधवमते तु सन्ध्यक्षरान्तेषु क्लीबेषु पुंवद्भावो नास्तीति बोध्यम् ॥ नावमतिक्रान्तं यत्तदतिनु ॥ १७ ॥ इति सुबोधिन्यां स्वरान्ता नपुंसकलिङ्गाः ॥ ९ ॥

(त०) लोकेशकरसंज्ञेन श्रीक्षेमङ्करसूनुना । विहितायां हि टीकायां क्लीबलिङ्गो गमच्छुभः ॥ इति तत्त्वदीपिकायां स्वरान्तनपुंसकलिङ्गाः ॥ ९ ॥

अथ हसान्ताः पुँल्लिङ्गाः ॥ १० ॥

अनडुहश्च ॥ पुंसि पञ्चसु शौ चानडुह आमागमः, ईपि वा ॥१॥

(सु०) **अनडुहश्च** ॥ अनडुहशब्दस्यामागमः स्यात् । अत्र चतुराम् शौ चेत्यत आम् शाविति पदद्वयमनुवृत्तं पञ्चस्विति च । अत्र हि चकारोऽनुक्तसमुच्चयार्थः । तेन ईकारे नाम् । ईप्याम् वा ॥ ईकारे अनडुही । ईपि । अनुडुही-अनड्वाही । पत्न्यादित्वान्नदादित्वादीप्(क) । तदन्तविधिरत्र । प्रियानड्वान् ॥ १ ॥

(त०) **अनडुहश्चेति** ॥ अत्र चतुराम् शौ चेत्यत आम् शौ इति पदद्वयमनुवर्तते । अत्राहुः । अनडुहश्चेत्यत्रामादेरनुवृत्त्यैव लाभात्तदर्थो न चकारः । किंतु योगविभागार्थः । तथा च चेति सूत्रेऽनडुह इति साविति नुमिति पदद्वयमनुवर्त्यानडुहः सौ नुमिति व्याख्येयम् । अत्रार्थे चतुराम् शौ चेत्यतः पृथग्योगकरणं लिङ्गम् । एवं चानडुह इति सूत्रेऽनुक्तसमुच्चयार्थो भिन्नश्चकारोऽनुवर्त्य इति । तत्रेदमवधेयम् । योगविभागानुवृत्तिक्लेशगौरवतः सूत्रस्यैव लघुत्वात् । पुनस्तत्र चकारान्तरस्याश्रयणे आश्रितत्यागे वाऽतिगौरवमित्यालोच्योपेक्षितम् । यदप्युक्तम् । नन्वल्पविषयेन नुमा बहुविषय आम् बाध्यताम् यथा च नुमेवेति चेत्सत्यम् । अच्ययोरादित्यतो मण्डूकप्लुत्या आदित्यनुवृत्तेरवर्णात्परतो नुम्विधानात् । कथमनुवृत्तावप्यममोः कृतयोरेव नुम् प्रथमाकारादेव किमिति न स्यादिति चेच्छृणु, एवं सति मिदन्त्यादिति मिदन्त्यादिति परिभाषा बाध्येत । तथा न बाध्येतानुवृत्तिश्च सार्थिका भवति तथा कर्तव्यम् । यदि वाऽऽममोः कृतयोर्नुम् स्यात् नेदमुभयमनुगृहीतं स्यादिति कृतयोरेव तयोर्नुम् भविष्यतीति । अत्रापीदं विचार्यम् । प्रथमतो नुम्यपि कृते न कापि क्षतिः । आम्करणं उकारस्यैवान्त्यस्वरत्वात्ततः परस्यैवामो विधानात् । असंभवत्वादबाधाच्च बाध्यबाधकभावाभावः ॥ १ ॥

सावनडुहः ॥ अनडुहः सौ नुम् ॥ २ ॥

(सु०) **सावनडुहः** ॥ अस्य नुम् स्यात् सौ परे । नुमयम इत्यतो नुमित्यनुवृत्तमच्ययोरात्रिस्यमिति सूत्रान्मण्डूकप्लुत्या आदित्यनुवर्तते । तेनावर्णात्परोऽयं नुम् । अतो विशेषविहितेनापि नुमाऽऽम् न बाध्यते । अमा च नुम् न बाध्यते ॥ २ ॥

संयोगान्तस्य लोपः ॥ स्यादौ रसे पदान्ते च (ख) ॥ ३ ॥

(क) 'नदादेः' । नदादेः स्त्रियामीप् । अनडुही—अनड्वाही

(ख) संयोगान्तस्येति । अयमर्थः । संयोगान्तस्य नाम्नोऽन्तस्य लोपो भवति स्यादौ रसे । एवंच पदान्ते वर्तमानस्य नाम्नो धातोश्च सम्बन्धिनो संयोगस्यान्तस्य लोपो भवतीति ।

(सु०) संयोगान्तस्य लोपः ॥ संयोगेति अन्तस्येति च छेदः । अनुकरणाद्वि-भक्तेर्वैकल्पिकत्वादविभक्तिको निर्देशः । नाम्न इति विशेष्यम् । संयोगेति विशेषणम् । विशेषणेन च तदन्तविधिः । तेन संयोगान्तस्य नाम्नोऽन्तस्य लोपो भवति स्यादौ रसे च । पुनः पदान्ते वर्त्तमानो नाम्नो धातोश्च यः संयोगस्तस्यान्तस्य लोप इति ॥ पदान्ते यथाऽयमर्थः । अचोरुकुन् ॥ संयोगान्तस्येति किम् । हन् । संयोगस्य नाम्नो विशेषण-त्वादादेर्न स्वट् ॥ अनः शकटं वहतीति विग्रहे अनसि वहेः क्विप् । अनसो डश्च । यजा-मिति सम्प्रसारणम् । अनडुह् सि इति स्थिते । आम्नुमौ । परत्वात् संयोगान्तलोपे कृते सिलोपः । अनड्वान् । 'वसां रसे' इत्यनेन नुमो दत्वं न नुम्विधिसामर्थ्यात् ॥ ३ ॥

(त०) संयोगान्तस्य लोप इति ॥ संयोग अन्तस्येति छेदः । अनुकरणाद्विभ-क्तेर्वैकल्पिकत्वादविभक्तिको निर्देशः । तच्च नाम्नो विशेषणम् । तस्मात्तदन्तलाभः । तेन संयोगान्तस्य नाम्नोऽन्तस्य लोपो रसे । पदान्ते वर्तमानो यः संयोगः इत्येव न तु ना-म्नस्तेन धातोः संयोगान्तस्यापि पदान्ते भवति । नाम्नो विशेपणत्वादादेर्नस्तः । संयो-गावन्ते यस्येति विग्रहलाभार्थमन्तग्रहणम् । अन्यथा सोमसुत्स्थानेत्यत्रापि लोपः प्रस ज्येत इति तु प्रत्येकं संयोगसंज्ञेति पक्षे । समुदायसंज्ञापक्षे तु संयोगोऽन्तो यस्येति विग्रहे-पि व्यर्थम् । विशेपणत्वेनैव तदन्तलाभात् । लोपशोऽनुवृत्तावपि लोपग्रहणं सन्नच्युत इत्यादौ द्वित्वार्थम् । अन्यथा लोपशि पुनर्न रन्धिरिति निषेधः प्रवर्तेत ॥ ३ ॥

(सभिन्नस्य रात्र) अनड्वान्, अनड्वाहौ, अनड्वाहः ॥ ४ ॥

(सु०) सभिन्नस्य रात्र ॥ रात्परस्य सस्यैव लोपः स्यान्नान्यस्य वर्णस्य ॥ च-तुरो वारान् इति चतुः सुप्रत्ययस्य लोपोऽत्र । सस्येति किम् । ऊर्क् । अमार्ट् ॥ ४ ॥

(त०) सभिन्नस्येति ॥ रात्परस्य सकारमात्रस्य लोपो न तु सभिन्नवर्णान्तरस्ये-त्यर्थः । तेन ऊर्क् इत्यादि सिद्धम् ॥ ४ ॥

धावम् ॥ चतुरनडुहोर्धावमागमो भवति आम्न । हे अनड्वन् ॥ ५ ॥

(सु०) धावम् ॥ चतुरनडुहोरमागमः स्याद्धौ परं । अमोऽपवादः । चतुरशब्दा-त्तु गौणे । हे प्रियचत्वः ॥ ५ ॥

(त०) धावमिति ॥ चतुरनडुहोरनुवृत्तेराह—चतुरेत्यादि ॥ चतुरस्तु गौणत्वे हे प्रियचत्वः । नुम्विधिसामर्थ्याद्विद्वत्वं न ॥ ५ ॥

वसां रसे ॥ वसुस्रंसुध्वंसुभ्रंसुअनडुहां दत्वं भवति रसे पदान्ते च ॥ अनडुद्भ्याम् । अनडुत्सु ॥ ६ ॥

(सु०) वसां रसे ॥ बहुवचनमाद्यर्थम् । वसु चात्र प्रत्ययो गृह्यते न धातुर्व्या-ख्यानात् । उत्सृष्टानुबन्धकत्वेन वसुक्वसोः सामान्यग्रहणम् (क) । सौ स इत्यतः स इत्य-नुवर्त्य षष्ठ्यन्तं व्याख्येयम् । तच्च वसोर्विशेषणं न स्रंसादेरव्यभिचारात् । नाप्यनडुहोऽ-सम्भवात् (ख) सान्तवस्वन्तस्य स्रंसादेश्च नाम्नोऽनडुहशब्दस्य च दः स्यात् ॥ सान्तेति

(क) उत्सृष्टानुबन्धत्वेन=त्यक्तानुबन्धत्वेन=अनुबन्धानुल्लेखतया, वसुक्वसोरुभयोः प्रत्यययोर्ग्रहणं न तु केवलस्य वसोरित्यर्थः ।

(ख) स्रंसादेरनडुहश्च तादृशविशेषणाभावेऽपि न कुत्रचिद् दोषः । परं वसोस्तादृशविशेषणं देयमेव।

किम्। विद्वान्॥ नाम्न इति किम्। स्रस्तम्। ध्वस्तम्। खसे चपा इति तः। अनडुत्सु॥६॥

(त०) वसां रस इति बहुवचनमाद्यर्थं लक्ष्यदर्शनात् । ग्रन्थान्तरसंवादाच्च । वसुरत्र प्रत्यय एव न धातुः साहचर्यस्य सर्वत्र नियामकत्वात्। सौ स इत्यतः स इत्यनुवर्त्य तच्च वसोर्विशेषणं कार्यं नान्येषामभिचारासम्भवात् । तेन सान्तवस्वन्तस्येति व्याख्येयमतो विद्वानित्यत्र न दत्वम् । नाम्नोऽधिकारात्स्रस्तमित्यादौ न । स्मीत्यधिकारेऽपि स्यादिनिरासाय रसग्रहणम् । तेन विद्वद्रूप इत्यादिसिद्धिः । रुत्वबाधनार्थमनडुहो रस इत्येव न सूत्रितम् । सिद्धद्भ्यामित्यत्र झबे जबा इत्यनेन स्थानसाम्याद्दत्वम् । विद्वत्स्वित्यत्र खसे चपा इति तः । स्रदित्यत्र 'वाऽवसाने' इति तदौ । एवं स्थितेऽपि सकारे रूपासिद्धेर्वसादिग्रहणम् । तत्र परत्वात्प्रतिपदोक्तत्वाच्च खोर्विसर्ग इत्यनेन बाधनात् । अन्यथा विसर्जनीयस्य स इति सूत्रवैयर्थ्यप्रसङ्गात्॥ वसां किम् । हरिभ्याम् ॥ रसे किम् । स्रसौ ॥ पदान्ते किम् । विदुष्मान् ॥ ६ ॥

दादेर्घः ॥ आद्योच्चारणे दादेर्हकारस्य घत्वं भवति धातोर्झसे नाम्नश्च रसे पदान्ते च (क) ॥ ७ ॥

(छ०) दादेर्घः ॥ द् आदिर्यस्य स दादिस्तस्य दादेः । अत्र धातुग्रहणद्वयमनुवर्त्य तत्रैकमाद्योच्चारणप्रतिपत्त्यर्थम् । आद्योच्चारणे दादेर्धातोर्हस्य घः स्यात् झसे पदान्ते च । दादेर्नाम्नश्च हस्य घो रसे पदान्ते च ॥ ढस्यापवादोऽयम् ॥ धातोर्यथा । दोग्धि । अधोक् ॥ आद्योच्चारणे किम् । अधोगित्यत्र यथा स्यात् ॥ दामलिहमात्मन इच्छतीति दामलिह्यति । नाम्नो य इति यप्रत्ययः । ततः क्विपि दामलिट् । अत्र मा भूदिति ॥७॥

(त०) दादेर्घ इति ॥ द् आदिर्यस्य स दादिस्ततस्य धातोर्झस इति । तेन द्रुह्यादित्यत्र न । ननु अधोक् दामलिहमिच्छन् दामलिडित्यत्राव्याप्त्यतिव्याप्ती इति चेत्सत्यम् । धातुग्रहणद्वयमत्रानुवर्तते । एकमाद्युच्चारणलाभार्थम् । तेनाद्युच्चारणे दादित्वादधोगित्यत्र घत्वम्। तत्र त्वभावान्न घत्वम्। कखगानामन्यतमस्तु दोग्ध्रीत्यसिद्धेर्न कृतः ॥७॥

अदिजबानां झभान्तस्य झभाश्च स्ध्वोः ॥ धातोर्झभान्तस्यावयवस्यादौ वर्तमानानां जबानां झभा भवन्ति सकारे ध्वशब्दे नाम्नश्च रसे पदान्ते च(ख) ॥ धुक्–धुग् , दुहौ, दुहः । धुग्भ्याम् । धुक्षु ॥ आद्योच्चारणे

अन्यथा विद्वानित्यादौ दोषापत्तेः। इति भावः।

(क) अत्र माधवः। अत्र धातोरित्यनुवर्त्तते। सा यदि समानाधिकरणषष्ठी स्याद्दादिर्यो धातुस्तस्य हस्य घ इति तदा दुहेर्दिर्पि दिवादावटो धातुग्रहणेन ग्रहणादिवादित्वाद् घत्वं न स्यात्। अधोक्। अतोऽवयवषष्ठीयं व्याख्यायते। व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणमिति। तेन धातोरवयवो यो दादिस्तस्यावयवस्य हस्येत्यर्थः स्यात्।

ननु चैवं दुग्धेत्यादौ न स्यात्। अत्र हि धातुरेव दादिर्न तदवयवः। मैवम्। अवयवावयविनोरभेदोपचारात्।

(ख) आदिजबानामिति। अत्र धातोरित्यवयवषष्ठ्यन्तमनुवर्त्तते। तेन धातोरवयवो यो झसान्तस्तस्यादिजबानां झभा भवन्तीत्यर्थः। तेन गर्दभमाचष्टे गर्दभयति, ततः क्विप, गर्धप्, इत्यत्र गर्दभेर्धातोरवयवस्य दभो भमान्तस्यादिजबस्य दस्य भभोधः सिद्धयति। अन्यथा गस्यघः स्यात्। अकारभिलोपयो·

किम् । दाम लेढीति दामलिट्-दामलिड् । दामलिड्भ्याम् । दामलिट्सु दामलिट्त्सु ॥ अवयवस्य किम् । गर्दभमाचष्टे गर्दभयतीति गर्धप् । गर्दभौ । गर्धब्भ्याम् । गर्धप्सु ॥ ८ ॥

(सु०) आदिजबानां झभान्तस्य झभाश्च स्ध्वोः ॥ मण्डूकप्लुत्या 'भिदपा'-मित्यतो भि इत्यनुवर्तते । पदान्ते इति च । आदिशब्दस्यावयववाचित्वादवयव्याकाङ्क्षायां धातोर्नाम्नश्चेत्याक्षिप्यते । झभान्तस्येति न धातोर्विशेषणं किन्त्ववयवस्य । झभान्तस्य धातोरवयवस्यादौ स्थिता जबा झभाः स्युः सादौ भादौ पदान्ते च ध्वेति ध्वेत्यनयोः सामान्यग्रहणम् । धातोर्यथा । घक्ष्यते । घुग्ध्वे । अघुग्ध्वम् । अधोक् ॥ जबानामिति किम् । योत्स्यते ॥ झभान्तस्येति किम् । दास्यति । जबानां झभा इत्यत्र दबानां धभा इत्यपेक्षितमाद्ययोरदर्शनात् ॥ अवयवस्येति किम् । गर्दभमाचष्टे इति गर्दभयति । नाम्नो णिर्ङिदिति णिप्रत्ययः । ततः क्विप्णिलोपौ । गर्धप् । अवयवग्रहणाभावे गकारस्थानेऽत्र घः स्यादित्यर्थः ॥ दुह प्रपूरणे । क्विप् । 'दादेर्घः' इति घत्वे झभान्तत्वाद् धः । वाऽवसान इति जबचपौ । धुग्-धुक् । झबे जबा इति जबत्वम् । धुग्भ्याम् । धत्वचत्वे धुक्षु ॥८॥

(त०) आदिजबानां झभान्तस्य झभाश्च स्ध्वोरिति ॥ अत्र धातोर्झस इति निवृत्तं स्ध्वोर्ग्रहणसामर्थ्यात् । झभान्तस्येति न धातोर्विशेषणं किन्त्ववयवस्य । तेन गर्दभमाचक्षाणः गर्धबिति सिद्धम् ॥ आदिजबानामिति ॥ आद्यो जबा आदेः परा आदावुपदेशावस्थायां जबा इति पक्षत्रयमपि न । गर्द्धबित्यत्र गकारेऽतिव्याप्तेर्न प्रथमः । धुगित्यत्राव्याप्तेर्न द्वितीयः । पुनर्गर्द्धबित्यत्राव्याप्तेर्न तृतीयः । किन्तु आदौ धातुसंज्ञाप्रवृत्तिकाले इति स्थिते दामलिडित्यत्र दकारे गर्द्धबित्यत्र गकारे चातिव्याप्तिरिति चेन्न । अन्त्यबाधेऽन्त्यसदेशस्येति परिभाषाश्रयणात् । भि दपामित्यतो मण्डूकप्लुत्या भीत्यनुवृत्तेराह-भकारे चेति ॥ ८ ॥

हो ढः ॥ हकारस्य ढत्वं भवति धातोर्झसे परे नाम्नश्च स्से पदान्ते च ॥ लिट्-लिड्, लिहौ लिहः । लिट्सु-लिट्त्सु ॥ ९ ॥

(सु०) हो ढः ॥ धातोर्हस्य ढः स्यात् झसे पदान्ते च ॥ नाम्नो हस्य ढः स्यात्स्से पदान्ते च । धातोर्यथा । लेक्ष्यति । अलेट् 'लिह आस्वादने' क्विप् । सौ परत्वात् ढत्वे सिलोपः । जबत्वचपत्वे । लिट्-लिड् । सुपि ढस्य चपत्वे कृते टनात्सस्य वेति धुट् । धुटः चपत्वेन ततः शसे चपस्य द्वितीयो वेति तस्य थो न । कुक्टुकवर्जितस्येत्युक्तत्वात् । ष्टुत्वं तु न शङ्क्यमेव 'टोरन्त्यात्' 'सुपो न' इति च निषेधात् । लिट्त्सु । धुडभावेऽपि शसे चपस्येति टस्य ठो न पूर्ववत् । ष्टुत्वं तु स्यादीनामिति निषिद्धमेव ॥ ९ ॥

(त०) हो ढ इति ॥ टठडानामन्यतमस्तु लेढीत्याद्यसिद्धेर्न कृतः । तथा सति झभान्तत्वाभावात्तथोर्ध इत्यस्याप्रवृत्तेः ॥ ९ ॥

त्र तदभावो नेष्यत इति निमित्तमस्त्येव । तथा 'दामलिहमिच्छन् दामलिट्' इत्यत्रापि यो दामलिहेर्धातोरवयवो झभान्तो लिडिति न तस्यादौ जबो दः । यस्य च दामेत्यस्यादौ जबा नासौ झभान्त इति न भवति झभादेशः । अन्यथात्रापि स्यात् ।

द्रुहादेर्वा ॥ द्रुहमुहस्नुहस्निहां वा घत्वम् ॥ ध्रुक्–ध्रुग्–ध्रुट्–ध्रुड्, द्रुहौ, द्रुहः । ध्रुग्भ्याम्–ध्रुड्भ्याम् । ध्रुक्षु–ध्रुट्सु–ध्रुट्त्सु ॥ मुहस्नुहस्निहः(क) ॥ विश्ववाट्–विश्ववाड् ॥ १० ॥

(सु०) **द्रुहादेर्वा** ॥ द्रुहमुहस्नुहस्निहां घत्वं वा । द्रुह, जिघांसायाम् । मुह, वैचित्त्ये । ष्णुह, उद्गिरणे । ष्णिह, प्रीतौ । द्रुहेर्दादित्वान्नित्यं प्राप्ते अन्येषामप्राप्ते विभाषेयम् । द्रुहादीनां हस्य वा घः स्यात् धातोर्झसे पदान्ते च । नाम्नो रसे पदान्ते च । पक्षे ढः । धातोर्यथा । द्रोढा–द्रोग्धा । अद्रोध्रोट्–अद्रोध्रोक् ॥ विश्वं वहतीति विग्रहे भजां विणिति विण् प्रत्ययः । विश्वं वाहयतीति ण्यन्तात् तु वा विण्प्रत्ययो बोध्यः ॥ १० ॥

(त०) **द्रुहादेर्वेति** ॥ ननु द्रुहादेर्गणनिर्दिष्टत्वादस्य श्तिपेति निषेधाद्यङि लुकि दोध्रुगित्यत्र न प्रवृत्तिरिति चेन्न । तस्यानित्यत्वाभ्युपगमात् ॥ १० ॥

वाहो वौ शसादौ स्वरे ॥ वाहो वकारस्यौ भवति शसादौ स्वरे परे ताद्धितयस्वरयोरीपीकारे च ॥ विश्वौहः । विश्वौहा । विश्ववाड्भ्याम् । विश्ववाट्सु–विश्ववाट्त्सु ॥ ११ ॥

(सु०) **वाहो वौ शसादौ स्वरे** ॥ वकाराकारविशिष्टस्य वाशब्दस्येत्यर्थः । टनादिति धुट् । चपत्वम् । विश्ववाट्सु ॥ ११ ॥

(त०) **वाहो वौ शसादौ स्वरे इति** ॥ वाहो वा औ इति च्छेदः । वाहो वा गृहीतोऽत्र न तु निपातो व्याख्यानात् इत्यभिप्रेत्याह ॥ **वा शब्दस्येति** ॥ वाय्यं इत्यादिप्रयोगास्तूहतेः क्विपि । वहस्त्वनकारान्ते उपपदे विणोऽसंभवः । फणान्द्रेणानङ्गीकृतत्वात् (ख) ॥ ११ ॥

सहेः साढि ॥ साढिरूपे सति सहेः सस्य षो भवति ॥ तुराषाट्–तुराषाड्, तुरासाहौ, तुरासाहः । तुराषाड्भ्याम् । तुराषाट्सु ॥ इति हान्ताः १२

(सु०) **सहेः सढि** ॥ षत्वमनुवर्तते । तुरं दैत्यवेगं सहते इति विग्रहे विण् । तुरं त्वरितं साहयत्यभिभवत्यरीनिति विग्रहे तु ण्यन्तात् क्विप् (ग) । सहादित्वात् पूर्वपदस्य दीर्घः । तुराषाट् ॥ १२ ॥

(त०) **सहेः साढीति** ॥ सहेरिति किम् । सह ढेन वर्तत इति सढः यस्य नाम्नि ढशब्दोऽस्ति । यथा षण्ढ इति । सढस्यापत्यं साढिरित्यत्र मा भूत् ॥ १२ ॥

दिव औ ॥ दिवो नाम्न औकारादेशो भवति सौ परे ॥ सुद्यौः, सुदिवौ ।

(सु०) **दिव औ** ॥ समानाद्वेर्लोप इत्यतो मण्डूकप्लुत्या अधातोरित्युनुवर्तते तेन धातोर्न भवति । अक्षैर्दीव्यतीति अक्षद्यूरिति क्विबन्तात् । दिवेर्डिविति डिव् प्रत्ययः । वर्णमात्रविधित्वेन स्थानिवत्त्वाभावाद्धसेप इति सिलोपो न(घ) । सुष्ठु द्यौर्यस्मिन् स सुद्यौः १३

(क) केचिन्नशमप्यत्र पठन्ति । तच्चिन्त्यम् । (ख) फणीन्द्रेण – भाष्यकारेण पतञ्जलिना ।

(ग) तुरं त्वरितं साहयत्यभिभवत्यरीनिति तुराषाडिन्द्रः ।

(घ) अयमाशयः । न च सुदिव् सि इत्यवस्थायां वकारस्यौकारे कृतेऽपि प्रत्ययस्य सेर्लोपः स्यात् । यदादेशस्तद्वद्भवति न तु वर्णमात्रविधाविस्युक्तत्वात् । वर्णमात्रविधित्वेन स्थानिवत्त्वाभावान्न हसेप इति सिलोपः ।

(त०) दिव औ ॥ निरनुबन्धकग्रहणे सानुबन्धकस्य ग्रहणं नेति परिभाषया दिवु क्रीडादावित्यस्य धातोर्न ग्रहणम् । तेनाक्षद्यूरित्यादौ परत्वादूठ्योत्वे एकदेशविकृतन्यायेन प्राप्तमप्यौत्वं न ॥ १३ ॥

ऊ रसे ॥ दिव उदादेशो भवति रसे पदान्ते च ॥ सुद्युभ्याम् । सुद्युषु ॥ इति वान्ताः ॥ चतुर्शब्दो नित्यं बहुवचनान्तः ॥ १४ ॥

(सु०) **ऊ रसे** ॥ अधिकृतस्य नाम्नो दिव्शब्देन विशेषणात्तदन्तविधिः दिवो नाम्नः उः स्यात् रसे पदान्ते च । तदन्ते विमलद्यु ॥ इति वान्ताः ॥ १४ ॥

(त०) **ऊ रसे** ॥ उः रसे इति छेदः । पदान्ते चेति ॥ ष्रुर्नो ण इति सूत्रादन्त इत्यनुवृत्तमत्र पदान्तपरतया व्याख्येयमित्याशयः । विपरीतनिर्देशस्तु प्रयोजनान्तरार्थः । तदग्रे स्फुटीकरिष्यते । वाऽम्या इति सूत्रं तु व्यर्थमेव द्योशब्दादेव द्यामिति सिद्धेः ॥१४॥

चतुराम्शौ च ॥ चतुर्शब्दस्यामागमो भवति पञ्चसु शौ च । न त्वीति ॥ चत्वारः । चतुरः । चतुर्भिः ॥ १५ ॥

(सु०) **चतुराम् शौ च** ॥ नाम्नश्चतुर्शब्देन विशेषणात्तदन्तविधिः । चकारेण पञ्चस्विति सम्बध्यते । चतुरित्यविभक्तिको निर्देशः । तदन्ते प्रियचत्वाः । चतेरुरित्युरप्रत्यये चतुर्शब्दः । ईमावितीकारे तु न ॥ १५ ॥

(त०) **चतुराम्शौ** चेति ॥ चतुः आम् शौ चेति छेदः ॥ चतुरिति लुप्तषष्ठीकं पदम् । चकारेण पञ्चस्विति लब्धम् । नाम्नश्चतुरो विशेषणात्तदन्तलाभः ॥ १५ ॥

रः संख्यायाः ॥ रेफान्तसंख्यायाः परस्यामो नुडागमो भवति णत्वं द्वित्वं च । चतुर्णाम् । चतुर्षु ॥ प्रियाश्चत्वारः प्रियाणि वा चत्वारि यस्याः सा प्रियचत्वाः । हे प्रियचत्वः । प्रियचत्वारौ, प्रियचत्वारः । प्रियचतुरः । गौणत्वे नुट् न (क) । स्वार्थावच्छिन्नपरार्थावलम्बनं गौणत्वम् । प्रियचतुराम् ॥ कमलं कमलां वाऽचक्षाणः कमल्, कमलौ, कमलः । फल् फला । फल्भ्याम् ॥ इति लान्ताः ॥ १६ ॥

(सु०) **रः संख्यायाः** । नाम्नो नकारेण विशेषणात्तदन्तविधिस्तेनान्तग्रहणम् । णत्वम् । रहाद्यपो द्विरिति द्वित्वम् । चतुर्णाम् । यक् चतुर्ष्विति सूत्रे रकारपठनान्न विसर्गः । प्रियाश्चत्वारः पुरुषाः प्रियाणि चत्वारि कुलानि वा यस्याः सा स्त्री प्रियचत्वाः । तदन्तस्यादाम् । हे प्रियचत्वः इत्यत्र धावमित्यम् । गौणत्वे तु नुट् नेति ॥ गौणत्वे रेफान्तसंख्याया आमो नुड् न । अन्यपदार्थवृत्तित्वेन संख्याभिधायित्वाभावात् । प्राधान्ये भवत्येव । परमचतुर्णाम् ॥ इति रान्ताः ॥ 'कमलं जलपद्मयोः' इति विश्वः । 'कमला श्रीर्हरिप्रिया' इत्यमरः ॥ कमलं कमलां वाऽऽचक्षाण इति नाम्नो णिङ्डिति णिप्रत्ययः । ण्यन्तात् क्विपि णेरिति णिलोपः । कमल् । षत्वं कमल्षु ॥ फलमाचक्षाण इति फल् । तोयमाचक्षाण इत्यादौ तु 'यवयोर्वसे' इति यलोपे तो इति स्यादतो यान्तो

(क) गौणत्वे चान्यपदार्थवृत्तित्वेन संख्याभिधायित्वाभावात् ।

नोक्तः इति कान्ताः ॥ १६ ॥

(त०) रःसंख्याया इति ॥ र इति किम् । त्रिंशताम् । विंशत्याद्याः सदैकत्वे'(क) इति नियमेऽपि संख्यार्थे द्विबहुत्वे स्त इत्यनेन संख्याया द्विबहुत्वयोरपि संभवात् ॥ संख्याया इति किम् । वाराम् । रेफान्तसंख्याया विहितस्यामो नुडिति व्याख्यानादि-त्याशयेनाह-गौणत्व इति ॥ गौणत्वे चान्यपदार्थवृत्तित्वेन संख्याभिधायित्वाभावात् । ष्णः संख्याया इत्येकयोगस्तु न कृतो रेफान्ततोऽपि जश्शसोर्लुक् स्यात् । यदि त्वेकदेशोऽप्यनुवर्तते इत्याश्रीयते तदैकयोगोऽपि साधुरेव ॥ कमला लक्ष्मीः ॥ १६ ॥ .

मो नो धातोः ॥ मान्तस्य धातोर्मस्य नो भवति झसे पदान्ते च॥१७॥

(सु०) मो नो धातोः ॥ मान्तस्य धातोर्नः स्यात् झसे पदान्ते च ॥ १७ ॥

(वमयोश्च) प्रशान् । प्रशामौ । प्रशामः । प्रशान्भ्याम् । प्रशान्सु ॥ कः, कौ, के । शेषं सर्ववत् ॥ १८ ॥

(सु०) वमयोश्च ॥ मान्तस्य धातोर्नकारादेशः स्यात् वकारे मकारे च परे ॥ षष्ठ्या निर्दिष्टत्वादन्त्यस्यादेशः । सिप्रत्यये परत्वान्नकारे कृते सिलोपः । प्रशानित्यत्र नाम्नो नो लोपशिति नलोपो न नत्वस्यासिद्धत्वात् । यद्वा नाम्नो न इति सूत्रे पूर्वमेवो पपादितत्वात् (ख) । शमु उपशमे । क्विप् । अमान्तस्येति दीर्घः । प्रशाम्यतीति प्रशान् । वमयोस्तु । चक्षण्वहे, चक्षण्महे । पदान्ते च । अशंशन् । अचंस्कन् ॥ पदान्ते किम् । प्रशामौ । धात्वधिकारादेव धातोरिति लभ्यमाने पुनर्धातुग्रहणान्नामधातोर्न । अयमिवाचरन् इदाम् । प्रशान्भ्यामित्यादौ नश्चेति नकारस्यानुस्वारे विशेषाभावान्नाम-र्थ्याच्च नानुस्वारः कायतेर्डिमिति डिम्प्रत्यये निष्पन्नः किम्शब्दः त्यदादेरित्यत्वे कृते सर्वशब्दवद्रूपम् ॥ १८ ॥

(त०) नस्य लोपो नेति ॥ नाम्नो नो लोपशधाविस्यत्र नाम्न इत्यस्यानुवृत्ता-वपि पुनर्नामग्रहणान्नामसंज्ञाप्रवृत्तिकाले नान्तार्थमित्याशयः ॥ १८ ॥

इदमोऽयम्पुंसि ॥ इदमः पुंसि सावयं भवति ॥ अयम् ॥ १९ ॥

(सु०) इदमोऽयम्पुंसि ॥ सौ सः इत्यतः सावित्यनुवर्तते ॥ सिलोपे अयम् । पुंसि किम् । इदम् ॥ नन्वत्र लुकि न तन्निमित्तमिति परिभाषया न भविष्यति । सत्यम् । तस्या अनित्यत्वज्ञापनार्थं पुंसीति । तेन प्रियतिस्र इत्यादि सिद्ध्यति ॥ इन्देः कमिर्नलोपश्चेति कमिप्रत्यये इदम् शब्दः ॥ १९ ॥

(त०) इदमोऽयम्पुंसीति ॥ इदमः किम् । यः ॥ पुंसीति किम् । इदम् ॥ न चात्र लुकि न तन्निमित्तमेत्येव भविष्यतीति चेत्सत्यम् । तस्य अनित्यत्वज्ञापनार्थम् । तेन हे प्रियतिस्र इत्यादि सिद्धम् ॥ अयमिति ॥ हसेप इति सेर्लोपः ॥ १९ ॥

(दस्य मः ।) त्यदादेर्दकारस्य मत्वं भवति स्यादौ ॥ इमौ, इमे ॥

(क) 'विंशत्याद्याः सदैकत्वे' इत्यमरः ।

(ख) असिद्धत्वादित्यादि सिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषयेत्यर्थः । 'नाम्नो नो लोपशधौ' इत्यत्र नाम्न इत्यस्यानुवृत्तावपि पुनर्नामग्रहणान्नामसंज्ञाप्रवृत्तिकाले नान्तार्थमित्याशयः ।

त्यदादेः सम्बोधनाभावः (क)। इमम्, इमौ, इमान् ॥ २० ॥

(छ०) दस्य मः ॥ त्यदादेर्दस्य मः स्यात्स्यादौ विभक्तौ ॥ स्यादौ किम्। अस्यापत्यमैदमः। अमुमिच्छतीत्यदस्यति। ननु द्वावित्यत्र कस्मान्मत्वं न। शृणु। स्यादाविति दस्य विशेषणम्। अर्थवशाद्विभक्तिविपरिणाम इत्युक्तत्वात् स्यादिपरस्य दस्येत्यर्थः ॥ येन नाव्यवधानं तेन व्यवहितेऽपि इत्युक्तत्वादकारव्यवधाने सति भवति न च द्विव्यवधाने। क्वचिद् द्वयोरिति निर्देशाद्वा न। त्यदाद्यत्वे मत्वे औत्वे च इमौ। त्यादादेः सम्बोधनं नास्तीत्युत्सर्गः। प्रचुरप्रयोगादर्शनमेवात्र मूलम्। भाष्ये तु हे स इत्युक्तम्।२०।

(त०) दस्य म इति ॥ ननु द्वावित्यत्र किमु न मत्वमिति चेन्न। दो म इति वक्तव्ये अकारोच्चारणमकारपरस्यैव दस्य मत्वार्थम्। अत्राहुः। अत एव त्यदिति त्यदादेः। न चात्र त्यदाद्यत्वं बाधकम्। परत्वान्मत्वप्रसङ्गात् अत्वावकाशो द्वौ। मत्ववान् इमौ। स्य इत्यत्रोभयप्रसङ्गपरत्वान्मत्वम्। न चात्वविधौ त्यदादिग्रहणं व्यर्थम्। इदमादेरिति वक्तुं युक्तम्। उत्तरत्र चरितार्थत्वादिति। अत्रेदं वक्तव्यम्। स्य इत्यादौ कृतेऽपि मत्वे पश्चात्त्यदाद्यत्वेन रूपसिद्धेरनिवार्यत्वात्। न च मत्वविधिसामर्थ्यादेवात्वं नेति वाच्यं मत्वविधेरिमावित्यादौ चरितार्थत्वेन ज्ञापनायोगात्। पर्जन्यवल्लक्षणप्रवृत्तेरिष्टत्वाच्च स नपुंसकमित्यादिनिर्देशाच्चेति ॥ त्यदादेः सम्बोधनाभाव इति ॥ औत्सर्गिकश्चायम्। हे स इति भाष्यप्रयोगात्। अभावस्तु प्रचुरप्रयोगे सम्बोधनाभाव इत्येवम्परतया व्याख्येयः। यत्त्वाहुः। "इदमस्तु सन्निकृष्टे समीपतरवर्ति चैदतो रूपम्। अदसस्तु विप्रकृष्टे तदिति परोक्षे विजानीयात्" इति वचनादेवम्बिधस्यार्थस्याभिमुखीकरणानर्हत्वादिति तदापाततः। सन्निकृष्टादिशब्दानामिव इदमादीनामपि सम्बोध्यसमर्थकत्वे बाधकाभावात्। विप्रकृष्टस्यापि बुद्ध्या सन्निधापितस्य बहुशः सम्बोधनदर्शनाच्च ॥ तथा च भट्टिः। 'हा पितः क्वासि हे सुभ्रु बह्वेवं विललाप सः ॥' इति ॥ २० ॥

अन टौसोः ॥ इदमोऽनादेशो भवति टौसोः परयोः॥ अनेन ॥२१॥

(छ०) अन टौसोः॥ इदमोऽयमित्यत इदम इत्यनुवर्तते। टेनेतीनादेशः ॥ अनेन॥२१॥

(त०) अन टौसोरिति ॥ अनाऽपीति तु लाघवेऽपि प्रतिपत्तिगौरवादुपेक्षितम्। तथा हि। टा इत्याकारमारभ्य सुपः पकारेण प्रत्याहाराश्रयणे इतरविभक्तावन्यविधानात्परिशेषाट्टौसोरेव लाभः। आपोऽपि स्यादाविति विशेषणेन वारणम् इत्यादिप्रतिपत्तिगौरवम्। तस्माद्यथान्यासमेव ॥ २१ ॥

स्भ्यः ॥ सकारे भकारे च परे इदमोऽकारो भवति कृत्स्नस्य(ख) ॥

(क) सम्बोधनाभाव इति। प्रचुरप्रयोगादर्शनमेवात्र मूलम्। औत्सर्गिकश्चायम्। हे स इति भाष्यप्रयोगात्। 'इदमस्तु संनिकृष्टे समीपतरवर्त्ति चैददो रूपम्। अदसस्तु विप्रकृष्टे तदिति परोक्षे विजानीयात्' इतीदमादेरर्थः।

(ख) यमा यपेऽस्येति लिङ्गेन षष्ठीनिर्दिष्टस्येत्यस्य अनित्यत्वज्ञापनात् सर्वस्येदमः आदेशः। अन्यो लिङ्गेन सन्निपातपरिभाषाया अनित्यत्वज्ञापनात् स्त्रिया माप्। अत्र असादेशो भवतीति केच्याहुः। तन्मन्दम्। असादेशे त्यदाद्यत्वं न स्यादन्यथा इयमित्यत्राप्यत्वं स्यात्। 'आम्स्मौ' इति सूत्रे आम्ग्रहणं च व्यर्थं स्यात्।

अद्भिः । आभ्याम् ॥ २२ ॥

(छ०) स्भ्यः ॥ स् च भ् च अनयोः समाहारः स्भ् तस्मिन् स्भि । सकारभकारादौ स्यादौ इदम्शब्दस्य अः स्यात् । स्भ्यशिति सुवचम् । यतः सर्वस्य स्यात् ॥ अद्भीत्यात्वे आभ्याम् ॥ २२ ॥

(सु०) स्भ्यः ॥ स् च भ् चानयोः समाहारः स्भ् तस्मिन् स्भि अ इति च्छेदः ॥ यस्मिन्विधिस्तदादौ वर्णग्रहणे इति सादिभादिग्रहः ॥ न च अः षष्ठीनिर्दिष्टस्येत्यन्तस्य भविष्यति । तस्यानित्यत्वात् स्भ्यशित्यस्यैव सुवचत्वात् ॥ २२ ॥

भिस् भिस् ॥ इदमदसोर्भिस् भिसेव भवति न भकारस्याकारः ॥ एभिः । अस्मै । अस्मात् । अस्य, अनयोः, एषाम् । अस्मिन् , एषु ॥२३॥

(सु०) **भिस् भिस्** ॥ इदमोऽदसश्च भिस् भिसेव भवति ॥ भिसो भिस्विधानं स्भ्य इत्यत्वबाधनार्थम् । ए स्भीत्येत्वे एभिः । अदसस्तु अमीभिः ॥ २३ ॥

(त०) **भिस् भिसिति** ॥ फलं किमित्याह—न भकारस्येति ॥ ह्रस्वो वेत्यतो वेत्यनुवर्त्य तस्य व्यवस्थितत्वादिह न । इमकेन, इमकाभ्याम् , इमकैः ॥ २४ ॥

(**इदमेतदोरन्वादेशे द्वितीयाटौस्स्वेनद्वा**) एनम् , एनौ, एनान् । एनेन । एनयोः । किंचित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः(क) । यथाऽनेन व्याकरणमधीतम् । एनं छन्दोऽध्यापय ॥ नोपधायाः नाम्नो नो लोपशधौ । राजा, राजानौ, राजानः । हे राजन् । अल्लोपः स्वरेऽम्वयुक्ताच्छसादौ । श्चुत्वम् ॥ २५ ॥

(छ०) इदमेतदोरन्वादेशे द्वितीयाटौस्स्वेनद्वा ॥ द्वितीयायां टौसोश्च परतोऽन्वादेशे इदमेतदोरेनदादेशो वा स्यात् ॥ अन्वादेशमाह । किंचित्कार्यं विधातुमुपात्तस्य गृहीतस्य शब्दस्य कार्यान्तरं विधातुं बोधयितुं पुनरुपादानं ग्रहणम् । सोऽन्वादेश उच्यते । 'ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः । एतमातं ङितं विद्यात्'' इत्यत्र तु ईषदर्थादयो न विधीयन्ते किंत्वनूद्यन्ते इति नात्रेनदादेशः ॥ एवम् 'नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय' इत्यत्रापि भीरुत्वस्यानुवाद्यत्वं बोध्यम्(ख) । यथा—अनेन पुरुषेण व्याकरणमधीतं पठितम् एनं पुरुषं त्वं छन्दोऽध्यापय पाठय ॥ इति मान्ताः ॥ राजते इति राजा । 'कन् युवृषितक्षिराजिधन्विद्युप्रतिदिवः' इति कन्प्रत्ययः । पञ्चस्वाऽपोपधाय इत्युपधादीर्घः । 'हसेपः' इति सिलोपः । ततो नाम्नो नो लोपशिति न लोपः ॥ शसि तु 'अल्लोपः स्वरे' इत्यल्लोपे कृते श्चुत्वम् ॥ २५ ॥

(त०) व्यवस्थितत्वादपरमिह फलमित्याह—इदमेतदोरिति ॥ किंचित्कार्यं

(क) उक्तं हि—'किंचिद्विधातुमुक्तस्य विधानान्तरहेतवे । शब्दस्य पुनरुक्तिश्चेदन्वादेशं विदुर्बुधाः।' इति

(ख) सम्पूर्णश्लोको यथा—

मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमैर्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय ।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः ॥१॥

इत्यत्र भीरुत्वस्यानुवाद्यत्वं बोध्यम् ।

विधातुमिति ॥ कर्तुम् अपूर्वं बोधयितुमित्यर्थः । उपात्तस्य गृहीतस्येत्यर्थः । कार्यान्तरमन्यत्कार्यमित्यर्थः । पुनरुपादानं ग्रहणमित्यर्थः ॥ 'ईषदर्थे क्रियायोगे' इति श्लोके तु ईषदर्थादयो न विधीयते किन्तु अनूद्यन्ते । तेन एनदादेशो न । एतेन 'नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय' इत्यपि व्याख्यातम् ॥ भीरुत्वस्यानुवाद्यत्वेन विवक्षितत्वात् न तु विधेयत्वेन ॥ २५ ॥

जञोर्ज्ञः ॥ जकारञकारयोर्योगे ज्ञो भवति ॥ राज्ञः । राज्ञा । राजभ्याम् । नलोपश्शि न विभक्तिकार्यम् । पञ्चस्विति ज्ञापकात् । राजभिः । वेङ्योः । राज्ञि—राजनि । राज्ञोः, राजसु ॥ एवं वृषादयः ॥ यज्वनः । यज्वना ॥ आत्मनः । आत्मना ॥ प्रतिदिवा, प्रतिदिवानौ । अल्लोपे कृते ॥२६॥

(सु०) **जञोर्ज्ञः** ॥ उभयोर्योगे ज्ञ इत्यक्षरं भवति ॥ राज्ञः । नस्य लोपश्शि न विभक्तिकार्यम् । पञ्चस्विति ज्ञापकात् । अतो राजभ्यामित्यत्राद्भोस्यात्वम् , राजभिरित्यत्र भ्भ्य इत्यत्वम् , राजभ्य इत्यत्र एत्भीस्येत्वं च न (क) । वेङ्योरिति वोपधालोपे राज्ञि-राजनि ॥ वृषा इन्द्रः । कन्नन्तः ॥ इष्टवानिति यज्वा । क्विब्वनिब्डा इति वनिप् प्रत्ययः । अम्वयुक्तादित्युक्तत्वान्नोपधालोपः । यज्वनः ॥ अततीत्यात्मा । अततेर्मनिण् इति मनिण् प्रत्ययः । अम्वयुक्तादित्युक्तत्वान्नोपधालोपः । आत्मनः ॥ सुष्ठु धर्मो यस्यासौ सुधर्मा । धर्मादित्यन् । अम्वयुक्तादित्युक्तत्वान्नोपधालोपः ॥ सुधर्मणः ॥ प्रतिदीव्यतीति प्रतिदिवा । कन्नन्तः । शसि 'अल्लोपः स्वरे' इत्यल्लोपे कृते ॥ २६ ॥

(त०) **यज्वनः** इति ॥ वान्तसंयोगात्वान्नालोपः ॥ **आत्मन** इति ॥ मान्तसंयोगोऽत्र ॥ २६ ॥

र्वो र्वि हसे ॥ धातोरिदुतोर्दीर्घो भवति रेफवकारयोर्हसपरयोः ॥ प्रतिदीव्नः । प्रतिदीव्ना । प्रतिदिवभ्याम् ॥ २७ ॥

(सु०) **र्वो र्वि हसे** ॥ र् च व् च अनयोः समाहारो र्वं तस्मिन् र्वि । रेफवकारयोः परतः पदान्ते च धातोरिकारोकारयोर्दीर्घः स्यात् । कीदृशयोः । हसः परो ययोस्तौ हसपरौ तयोर्हसपरयोः । प्रतिदीव्नः ॥ नाम्नो न इति नलोपे प्रतिदिवभ्याम् ॥ २७ ॥

(त०) **र्वो र्वि हस** इति ॥ र्वोः र्वि हस इति च्छेदः । इश्च उश्च यू तयोः र्वोः । र् च व् च एतयोः समाहारः र्वं तस्मिन् र्वि । हस इति रेफवकारयोर्विशेषणमित्याशयेनाह—**हसपरयोरिति** ॥ २७ ॥

श्वादेः ॥ श्वादेर्वं उत्वं प्राप्नोति शसादौ स्वरे ईपीकारे च(ख) ॥ शुनः । शुना, श्वभ्याम् ॥ यूनः । यूना, युवभ्याम् ॥ मघवा, मघवानौ, मघ-

---

(क) अयमत्र प्रश्नः—ननु राजभ्यां, राजभिः, राजभ्यः, इत्यादौ प्रथमं नस्य लोपश्शोऽनन्तरम् 'अद्भिः' 'भ्भ्यः' 'एभिः' इत्यादिसूत्रै रात्वात्वेत्वानि कथं न भवन्तीति । अथोत्तरम्—

'पञ्चस्विति' ज्ञापकान्नस्य लोपश्शि न विभक्तिकार्य्यं भवतीति नियमादात्वाऽत्वेत्वानि नेति भावः ।

(ख) **श्वादेरिति** । ननु युवतीः पश्येत्यादौ कथं नोत्वं नामग्रहणे लिङ्गाभिधायकप्रत्ययविशिष्टस्य ग्रहणमिति परिभाषाभयणादिति चेत्सत्यम् । विभक्तिनिमित्ते कार्य्ये लिङ्गविशिष्टग्रहणं नेति निषेधात् ।

वानः । मघोनः । मघोना ॥ २८ ॥

(सु०) श्वादेः ॥ श्वयुवमघोनां व उः स्यात् शसादौ स्वरे ईपि प्रत्यये ईमावितीकारे च ॥ प्रातिपदिकग्रहणे लिङ्गाभिधायिस्त्रीप्रत्ययविशिष्टस्यापि ग्रहणमिति परिभाषा विभक्तिनिमित्ते कार्ये न प्रवर्त्तते । अतो युवतीः पश्येत्यादौ नोत्वम् । अकारसहितस्य वस्योत्वम् ॥ श्वा कुक्कुरः ॥ युवा तरुणः । युवन्शब्दे वस्योत्वे कृते दीर्घत्वम् । यूनः ॥ मघवा इन्द्रः(क) । वस्योत्वे ओत्वे च कृते मघोनः ॥ २८ ॥

(त०) श्वादेरिति । ननु युवतीः पश्येत्यत्र कथं नोत्वं नामग्रहणे लिङ्गाभिधायकप्रत्ययविशिष्टस्य ग्रहणमिति परिभाषाश्रवणादिति चेत्सत्यम् । विभक्तिनिमित्ते कार्ये लिङ्गविशिष्टग्रहणं नेति निषेधात् । सस्वरस्य वस्योत्वम् । अल्लोपेऽपि सिद्धे ङौ विकल्पात् २८

अर्वणस्त्रसावनञः ॥ नञा रहितस्यार्वन्नन्तस्य तृ इत्यन्तादेशः स्यान्न तु सौ ॥ २९ ॥

(सु०) अर्वणस्त्रसावनञः ॥ ननु ऋधातोर्विच्प्रत्यये गुणे च अरिति रूपं तस्माद्वतुप्रत्यये अर्वन्तावित्यादि सेत्स्यति ऋधातोरेव वनिप्प्रत्यये त्वनर्वेति सेत्स्यति । रूढिशब्दश्चायम् । 'वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः' इत्यमरोक्तत्वात्तत्रार्थोऽपि न भिद्यते । किमनेन सूत्रेणेति चेत् उच्यते । नान्ततान्तयोः सर्वत्र प्रयोगे प्राप्ते सौ परे नञ्युपपदे च नान्तस्य प्रयोगोऽन्यत्र तु तान्तस्य प्रयोगो भवतीति व्यवस्थार्थं सूत्रम्(ख) २९

(त०) अर्वणस्त्रसावनञ इति ॥ ऋधातोर्विचि गुणे च अरिति रूपं तस्माद्वतौ अर्वन्ताविति । रूढिशब्दश्चायम् । 'वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः' इत्यमरकोशात् । तथा च श्रीहर्षः । 'वाहैरलुप्यत सहस्रदृगर्वगर्वः'(ग) इति प्रायुङ्क्त ॥ २९ ॥

उगितो नुम् ॥ उकारानुबन्धस्य ऋकारानुबन्धस्य च नुमागमो भवति पुंसि पञ्चसु(घ) ॥ अर्वन्तौ, अर्वन्तः । अर्वन्तम् , अर्वन्तौ, अर्वतः । अर्वता, अर्वद्भ्याम् ॥ अनञः किम् । अनर्वाणौ ॥ असौ किम् । अर्वा ॥ ३० ॥

(सु०) उगितो नुम् ॥ उश्च ऋ च उऋौ इतौ यस्य स उऋित् तस्य उऋितः । उदितः ऋदितश्च नुम् स्यात् । 'सो नः पुंसः' इत्यतो मण्डूकप्लुत्या पुंस इत्यनुवर्तते । तेन पुंसि पञ्चस्वित्यर्थः ॥ धातोर्नलोपिनोऽञ्चतेरेव । अञ्चेर्दीर्घश्चेत्यतोऽञ्चेरित्यपकृष्यते । तत्रैव वाऽञ्चेरिति विभज्य पञ्चस्विति नुमिति चानुवर्तते । अञ्चेरिति निर्देशात् नलोपिनो

(क) 'इन्द्रो मरुत्वान्मघवा' इत्यमरात् ।

(ख) रूढशब्दश्चेति । रूढं सङ्केतवन्नाम, सैव संज्ञेति कीर्त्यते । इति शब्दशक्तिप्रकाशिकायां जगदीशः अयमर्थः—यन्नाम यादृशार्थे सङ्केतितमेव न तु यौगिकमपि तद्रूढम् । तथा च—यादृशानुपूर्वी 'इदं पदममुकं बोधयतु' इति यादृशार्थबोधजनकत्वप्रकारकेच्छाविषयतावच्छेदिका योगरूढभिन्नत्वे सति तादृशानुपूर्वीमच्छब्दत्वं तादृशार्थे रूढत्वमिति पर्य्यवसितम् । रूढिरिति बोध्यम् ।

(ग) वाहैरिति । एतद्बलैः क्षणिकतामपि भूक्षुराग्रस्पर्शायुषां रयरसादसमापयद्भिः ।
दृक्पेयकेवलनभःक्रमणप्रवाहैर्वाहैरलुप्यत सहस्रदृगर्वगर्वः ॥
इति नैषधीयचरिते एकादशसर्गे १२७ श्लोकः ।

(घ) कार्य्यार्थमुच्चरितस्य वर्णस्यानुबन्ध इति संज्ञा । यद्वा—उच्चरितप्रध्वंसिनो ह्यनुबन्धाः ।

ग्रहणम् । धातोश्चेद् ञित्कार्यं तर्हि अञ्चतेरेवेति नियमार्थमिदम् । तेन स्रंसादीनामीदृनुमौ न । ऋदित्त्वान्नुम् । अर्वन्तौ । नञ् तत्पुरुषे तु न अर्वा । अनर्वा । यज्ववत् ॥ ३० ॥

(त०) ञितो नुमिति ॥ उश्च आ च ञौ तौ इतौ यस्य स ञित् तस्य ञितः । अत्राधातोरेव अञ्चतेर्नुम्विधानात् । अन्यथा ञित्त्वादेवाञ्चतेरपि सिद्धे नुम्विधानं व्यर्थम् । अतः सिद्धे सति पुनर्नुम्विधानं ज्ञापकम् । धातोश्चेद्ञित्कार्यं तर्ह्यञ्चतेरेव । तेन स्रदित्यादौ न ॥ ३० ॥

इतोऽत्पञ्चसु ॥ पथिन्मथिन्ऋभुक्षिन्शब्दानामिकारस्याकारादेशो भवति पुंसि पञ्चसु शौ च (क) ॥ ३१ ॥

(सु०) इतोऽत्पञ्चसु ॥ पथां टेरित्यतः पथामित्यनुवृत्तम् । पथ्यादेरिताऽत् स्यात् पुंसि पञ्चसु शौ च ॥ शौ सुपन्थानि । पुंसि किम् । सुपथि । पतेस्थश्चेति चादिनिप्रत्ययः । पथिन् ॥ मन्थतेः किन्प्रत्यये मथिन्शब्दः ॥ 'ऋभुक्षाः स्वर्गवज्रयोः ।' ततोऽस्त्यर्थे इन्प्रत्यये ऋभुक्षिन् ॥ ३१ ॥

(त०) इतोऽत्पञ्चसु ॥ पथां टेरित्यतः पथामित्यनुवृत्तेर्बहुवचननिर्देशादेव पथ्यादिलाभः अत्राद्वचनं तु चिन्त्यम् । इत आ पञ्चस्वित्येव स्वचम् । तथा च आ साविति सूत्रमपि न कर्तव्यं भवति (ख) । तपरकरणं तु दीर्घनिवृत्त्यर्थम् । तथा च पन्थानमिच्छतीति वाक्ये पथीयतीति । ततः क्विपि यत इत्यकारलोपः । एकदेशविकृतस्यानन्यत्वादा सावित्यात्वम् । नुट् पन्थाः । इतोऽत्पञ्चस्वित्यत्वं न भवति इत इति तपरत्वात् । य्वौ वेति बाधित्वा नित्यत्वात् थो नुट् ततः संयोगपूर्वत्वादिय् । पन्थियौ । शसादौ पथां टेः । पथः । पथा । भ्यामादौ पथिभ्यामित्यादि । एवं चाद्वचनमा साविति सूत्रं च सार्थकं भवति । अन्ये तु पथीः पथ्यौ ऋभुक्षीः ऋभुक्षियावित्यादि उदाजहुः । गौणत्वादात्वादि नेति । एकदेशविकृतन्यायोऽपि मुख्ये चरितार्थत्वान्न । अन्यथा सर्वमिच्छन्सर्वीरित्यत्राप्यकः स्यात् । तपरत्वं तु मुखमुखार्थमित्याहुः । अत्र केचित् । पदकार्ये गौणमुख्यन्यायो न नामकार्ये । अन्यथा गां वाहीकं पश्येत्यादावात्वं न स्यात् । अकस्तु सर्वादिपाठाभावा । तपरस्यापि सार्थक्यमेव । अन्यथा इरदित्येवावक्ष्यत् । तपरे तु पथामिति निर्देशेन नान्तप्रकृत्यनुकरणान्नान्तानामेव पथ्यादीनामात्वादि प्रकृते नान्तत्वाभावान्नेति । न चैकदेशविकृतन्याय एवमपि दुर्वार इति वाच्यम् । नान्तत्वविवक्षासामर्थ्यादेव प्रथमं नुटि तद्बाधनात् । एवं च पन्था इत्यत्रापि नान्तत्वविवक्षासामर्थ्यादेव नुट् ततः आत्वम् । अन्यथा नित्यत्वाद्विशेषविहितत्वाच्च पूर्वमात्वेऽनान्तत्वात् न्यादेशो न स्यात् ॥ ३१ ॥

थो नुट् ॥ पथिमथोस्थस्य नुट् स्यात् पुंसि पञ्चसु शौ च ॥ ३२ ॥

(सु०) थो नुट् ॥ पथ्यादेस्थस्य नुट् स्यात् पुंसि पञ्चसु शौ च ॥ थस्येति किम् ।

(क) इतः किम् । नकारस्य माभूत् । तपरः किम् । पन्थानमात्मन इच्छतीति पथीयति । यप्रत्यये दीर्घः पथीयतोः क्विप् । यत इति यलोपः । पथीः । अत्र न भवतीति । पञ्चसु किम् । पथिभ्याम् ।

(ख) अत्राद् वचनमिति लोकेशकरव्याख्यानं न विशदं प्रक्रियानिरूपितलाघवेऽपि हे पन्था इत्यादौ न लोपो न स्यात् । इति कश्चित् ।

ऋभुक्षाः ॥ पुंसि किम् । सुपथि ॥ ३२ ॥

(त०) थो नुडिति ॥ अत्र द्वयोरेवानुवृत्तिः तृतीये थस्यासंभवात् ॥ ननु थस्य नुडिति सूच्यताम् । थस्येति निर्देशादकारोऽपि । तथा च किमिति सूत्रेणेति चेत्सत्यम् । ऋभुक्षा इति न सिद्ध्येत् ॥ ३२ ॥

आ सौ ॥ पथिमथिऋभुक्षां टेरात्वं भवति सौ ॥ पन्थाः, पन्थानौ, पन्थानः । हे पन्थाः । पन्थानम् ॥ ३३ ॥

(सु०) **आ सौ** ॥ पथां टेरिति पदद्वयमनुवर्तते । पथ्यादेष्टेरात्स्यात् सिप्रत्यये ॥ सौ किम् । पथिभ्याम् ॥ ३३ ॥

(त०) **आ साविति** ॥ अत्र पथां टेरिति पदद्वयमप्यनुवर्तत इत्यत आह–टेरात्वमिति ॥ अत्राहुः । पथ्यादीनामन्त्यस्यात्वं भवति । अन्त्यस्येति षष्ठीनिर्दिष्टस्येति परिभाषया लभ्यते इति । अत्र साक्षादनुवृत्तं टेरिति त्यक्त्वा परिभाषालब्धस्यान्त्यस्येत्यस्यानुकरणे गौरवात् । आ आ इति प्रश्लेषादनुनासिकस्यापि स्थाने विहितो नानुनासिकः ॥ ननु किमर्थमात्वम् । इतोऽद्धिऽत्यत्वे नोपधाया इति दीर्घत्वे सौ रसे नलोपशिपक्षाद्विसर्गे पन्था इति रूपसिद्धेरिति चेन्न धौ नलोपशोऽभावे हे पन्था इति न सिद्ध्येत् । राजेत्यत्रातिप्रसक्तेश्च । अ सावित्येव तु न कृतं नकारमात्रस्यात्वे सवर्णदीर्घत्वेन सिद्धेऽपि पथीशब्दस्य पन्था इत्यसिद्धेः । टेरनुवृत्तौ तु मुख्येऽपि रूपासिद्धेश्च ॥ ३३ ॥

पथां टे ॥ पथिमथिऋभुक्षां टेर्लोपो भवति शसादौ स्वरे ईपीकारे च ॥ पथः । पथा । पथिषु ॥ एवं मन्थाः । ऋभुक्षाः ॥ स्त्रियां नान्तत्वादीप् । सुपथी । सुमथी । अनृभुक्षी सेना ॥ क्लीबे शोभनः पन्थाः यस्मिन् वने तत्सुपथि वनम् ॥ ३४ ॥

(सु०) **पथां टेः** ॥ पथ्यादेष्टेर्लोपः स्यात् शसादौ स्वरे इपीकारे च ॥ पथामिति बहुवचनमाद्यर्थम् । स्त्रियां ऋण इतीप् । ततष्टिलोपः॥ सुष्टु पन्थाः यस्याः सा सुपथी रथ्या । ऋक्पूरित्यप्रत्ययो न 'न पूजने' इति निषेधात् । कप्रत्ययस्तु समासान्तविधेरनित्यत्वान्न ॥ सुष्ठु मन्थाः यस्यां सा सुमथी नगरी ॥ न विद्यते ऋभुक्षाः इन्द्रो यस्यां सा अनृभुक्षी सेना ॥ क्लीबे सुष्ठु पन्थाः यस्मिन् तत् सपथि । आत्वं त्वत्र न । लुकि न तन्निमित्तमिति निषेधात् ॥ ३४ ॥

(त०) **स्त्रियामिति** ॥ **सुपथीति** ॥ आ सावित्यात्वं थो नुडिति च लिङ्गविशिष्टपरिभाषया प्राप्तमपि विभक्तौ लिङ्गविशिष्टाग्रहणमिति निषेधान्न भवति ॥ ३४ ॥

(धौ नपुंसकानां नस्य लोपो वा) हे सुपथिन्–हे सुपथि । सुपथी । सुपन्थानि ॥ ३५ ॥

(सु०) **धौ नपुंसकानां नस्य लोपो वा** । हे सुपथ इत्यत्र नलोपस्यासिद्धत्वात् स्वृणामिति गुणो न (क) । द्विवचने पथामिति'टिलोपः । सुपथी । शौ स्वत्वे नुटि च

(क) ननु सुष्ठुः पन्था यस्मिन् तत् सुपथि, धौ नपुंसकानाम्'इत्यादिना सम्बोधनैकवचने पक्षे नस्य लोपश्चि सति स्वृणामिति कथं गुणो नेति चेन्न, 'असिद्धं बहिरङ्गम्' इत्यादिना न लोपस्यासिद्धत्वात् ।

दीर्घत्वम् । सुपन्थानि ॥ किञ्च पन्थानमात्मन इच्छतीति पथीयति । ततः क्विप् । यस्य इत्यल्लोपः । यवयोरिति यलोपः । एकदेशविकृतस्यानन्यत्वादा सावित्यात्वम् । थो न्थिति नुट् । पन्थाः । अत्वं तु न इत इति तपरकरणात् । च्वोर्धातोरितीय् । पथ्यियौ ॥ एवम् ऋभुक्षाः ऋभुक्षियौ ॥ ३५ ॥

इनां शौ सौ ॥ इन-हन्-पुषन्-अर्यमन्-इत्येतेषां शौ सौ चाघौ परे उपधाया दीर्घो भवति नान्यत्र ॥ दण्डी । हे दण्डिन् । दण्डिनौ, दण्डिनः ॥ एवं कलिन्हलिन्यशस्विन्वाग्मिन्प्रभृतयः ॥ वृत्रहा, वृत्रहणौ, वृत्रहणः॥३६॥

(सु०) **इनां शौ सौ** ॥ बहुवचनमाद्यर्थम् । अर्थवत्परिभाषाया अनित्यत्वादर्थवतोऽनर्थकस्यापीनोऽत्र । ग्रहणम् (क) । उपधाया इत्यनुवर्तते । अघाविति च । नोपधाया इत्यनेनैव सिद्धे नियमार्थमिदम् । तदाह । इनादीनामुपधायाः शावेव दीर्घः स्यान्नान्यत्रेति । उपधादीर्घस्यैवायं नियमः तेन वृत्रहेवाचरतीति वृत्रहायते । कर्तुर्यङ् । इत्यत्र ये इति दीर्घो भवत्येव वृत्रहणी इत्यत्र 'जमस्य क्ङिति झसे' इति यो दीर्घः सोऽपि नियमेन व्यावर्त्यते । उपधादीर्घमात्रापेक्षया नियमविधानादिति । साविति तु विध्यर्थम् । पूर्वेण नियमात् सावप्राप्तेः । योगविभागाभिप्रायेणैव शौ साविति निर्देशोऽस्ति अन्यथा शिस्योरित्येवावक्ष्यत् ॥ ननु पन्था इवाचरतीति पथीनति । क्विप् । इत्यादौ जमान्तस्येत्युपधादीर्घो न प्राप्नोति । पथ्यादीनामिन्नन्तत्वात् । इन्नादीनां शौ सावेवेत्युपधादीर्घस्य नियमादिति चेत् । उच्यते । यत्र इनामिति सूत्रं प्रवर्तते तत्रैवायं नियमः । यथा दण्डीवाचरतीति दण्डायति(ख) । क्विप् । वृत्रहणति । पूषणति । अर्यमणति इति । दण्डोऽस्यास्तीति दण्डी । मान्तोपधादितीन् । शौ बहवो दण्डिनः सन्ति येषां तानि बहुदण्डीनि ॥ मुसलमस्यास्तीति मुसली । हलमस्यास्तीति हली । 'तालाङ्को मुसली हली' इत्यमरः ॥ यशोऽस्यास्तीति यशस्वी । विन् ॥ वागस्यास्तीति वाग्मी । ग्मिन् ॥ वृत्रं हतवानिति वृत्रहा । क्विबन्तः । 'वासवो वृत्रहा वृषा' इत्यमरः ॥ अवकुव्वन्तरेऽपीति णत्वम् । वृत्रहणौ ॥ ३६ ॥

(त०) **इनां शौ साविति** ॥ बहुवचनादिनादिलाभः । अनिनस्मिन्समुदायेऽनिनोपि इन्त्वमारोप्यते छत्रिणो यान्तीतिवत् । अर्थवत्परिभाषाया अनित्यत्वादनर्थकस्यापीनो ग्रहणम् । साविति ग्रहणात्तदन्तं गृह्यते पूषार्यम्णोः केवलयोः पुंस्त्वात् शेरभावात् । नोपधाया इति सिद्धे विधिरारभ्यमाणो नियमाय । तेन इन्नादीनामुपधाया दीर्घः शावेव नान्यत्रेति नियमः । नियमश्चोपधादीर्घस्यैव नान्यस्य । तेन दण्डीयति दण्डीभूत इत्यादौ

(क) इनामिति बहुवचनादाद्यर्थावगतिः । इन्ननिन् समुदाये इन्त्वमारोप्यते । छत्रिन्यायेन वा । तथा इन् हन पूषार्यम्णां परिग्रहः । अर्थवत्परिभाषाया अनित्यत्वादनर्थकस्यापीनो ग्रहणं तेन च तदन्त गृह्यते तथा इन् हन् पूषार्यम्णामुपधायाः शौ सौ वा घावेव दीर्घः स्यान्नान्यत्र ।

(ख) इयमत्राशङ्का—'इनां शौ सौ' इति सूत्रेण इन्नादीनां शौसावेवेत्युपधायाः दीर्घविधानात् पन्था इवाचरतीति पथीनति । क्विप् । इत्यादौ 'जमान्तस्येति' उपधाया दीर्घो न प्राप्नोतीति । अस्या उत्तरम्—यत्र 'इनां शौ सौ' इति सूत्रस्य प्रवृत्तिस्तत्रैवायं नियमः । पथ्यादिषु तु इतोऽदित्यादेः प्रवृत्तिसम्भवाद्व नियम इति दीर्घकरणे बाधाभावः ।

भवत्येव दीर्घः । ये च्वावित्यत्रोपधाग्रहणाभावात ॥ ननु पन्था इवाचरन् पथीनतीत्यत्रापि नमान्तस्येत्युपधादीर्घोऽपि कथं पथ्यादीनामिन्नन्तत्वादिति चेत्सत्यम् यत्र इनांशौ साविति सूत्रप्रवृत्तिस्तत्रैवायं नियमः । पथ्यादिषु तु इतोऽदित्यादेः प्रवृत्तिसंभवान्ननियमः ३६

हनो घ्न ॥ हनो हकारस्य घो भवत्यव्यवधाने नकारे ञिति णिति च परे ॥ ३७ ॥

(सु०) हनो घ्ने ॥ हनः घ्ने इति च्छेदः । आदिस्वरस्येत्यतो ञ्णितीत्यनुवृत्तम् । ञिति णिति प्रत्यये नकारे च परे हन्तेर्हस्य घः स्यात् ॥ ३७ ॥

(त०) हनो घ्ने इति ॥ हनः घ्ने इति च्छेदः । आदिस्वरस्येत्यतो ञ्णितीत्यनुवर्तते

(घसंयोगे णत्वं न) वृत्रघ्नः । वृत्रघ्ना । वृत्रहभ्याम् ॥ एवं पूषन् । अर्यमन् ॥ संख्याशब्दा पञ्चन्प्रभृतयो बहुवचनान्तास्त्रिषु सरूपाः ॥ ३८ ॥

(सु०) 'अल्लोपः स्वरे' इत्यल्लोपे घत्वे च कृते अवकुप्वन्तर इति णत्वे प्राप्ते आह-घसंयोगे णत्वं न ॥ घकारात्परस्य णत्वं न भवति । वृत्रघ्नः । वृत्रघ्ना ॥ पूषा सूर्यः ॥ अर्यमा रविः ॥ ३८ ॥

(त०) घ्ने इत्यत्र तन्त्रादिना घ्न इत्यत्र नस्यादेशो नेति व्याख्यानमपीत्याशयेनाह-घसंयोगे णत्वं नेति ॥ ३८ ॥

जश्शसोर्लुक् ॥ षकारनकारान्तसंख्यायाः परयोर्जश्शसोर्लुक् । पञ्च । पञ्च । पञ्चभिः । पञ्चभ्यः । पञ्चभ्यः ॥ ३९ ॥

(सु०) जश्शसोर्लुक् ॥ संख्याया इति ष्ण इति चानुवर्त्तते ॥ संख्यायाःकिम् । विप्रुषः । पामानः ॥ ष्ण इति किम् । चत्वारः ॥ शतानि सहस्राणीत्यत्र संनिपातपरिभाषया जश्शसोर्लुग् न । तथा हि । सनिपातलक्षणो विधिरानमित्तं तद्विघातस्य । निपतनं सन्निपातः आनन्तर्यम् संनिपातो लक्षणं कारणं यस्य स संनिपातलक्षणो विधिस्तद्विघातस्य कारणविघातस्यानिमित्तं न प्रयोजकः यमुपजीव्य यो विधिः प्रवृत्तः स तस्योपजीव्यस्य विरोधं न करोतीति परिभाषार्थः । शिमाश्रित्य प्रवृत्तो नुम्शेर्विघातकोन(क) ३९

(त०) जश्शसोर्लुगिति ॥ संख्याया इति ष्ण इति चानुवर्तते । ननु शतानि सहस्राणीत्यादौ कथं न लुगिति चेत्सत्यम् । सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति परिभाषया तन्निषेधात् । सन्निपतनं सन्निपातः आनन्तर्यं लक्षणं कारणं यस्य स सन्निपातलक्षणो विधिः तद्विघातस्य अनिमित्तं न प्रयोजकः । यमुपजीव्य यो विधिः प्रवृत्तः स तस्योपजीव्यस्य विरोधं न करोतीत्यर्थः । शिमाश्रित्य प्रवृत्तो नुम् शेर्विघातको न भवति ॥ लोप इत्यनुवृत्तावपि लुग्ग्रहणं षष्ठीनिर्दिष्टस्येति परिभाषां ज्ञापयति । लुकस्तु प्रत्ययादर्शनत्वेन सर्वलोपाभावे दर्शना संभवात्सर्वलोप एव नान्यस्य । लोपापवादो लुक् शब्दादेशस्तु न भवति नव पमित्यादिनिर्देशात् । नहि लुक्शब्दोऽत्र श्रूयते । क्विपः कित्त्वेन प्र-

(क) ननु 'जश्शसोर्लुक्' इति जश्शसो लुग्विधानेन शतानि सहस्राणीत्यादौ कथं न लुगित्याशङ्का । अस्या उत्तरम्—"सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य" इति परिभाषया शिमाश्रित्य प्रवृत्तो नुम्विधिः शेर्विघातको न भवतीति शतानि सहस्राणीत्यादौ न जश्शसो लुग् इत्यर्थः ॥ परिभाषार्थं व्याख्याति—सन्निपतनमिति । प्रकृते संगमयति—शिमाश्रित्येति ।

त्यथादर्शनेऽपि प्रत्ययाश्रितं कार्यं भवतीति ॥ पञ्चेत्यत्र लुक्यपि नोपधाया इति दीर्घो न । नव पमिति लिङ्गेनैव लुकि सति तन्निमित्तं कार्यं न भवतीति ज्ञायते । एतदर्थमेव शब्दभेदेन व्यवहारः । अन्यथा लुक्लोपयोरन्यतरेणैव सर्वत्र व्यवहरेत् । अथ लुग्ग्रहणं विनैव रूपसिद्धौ ज्ञापकं स्यात् असति तस्मिन्ननन्तरस्येति न्यायेनायडादिरेव प्रसज्येतेति चेत्सत्यं नव पमिति निर्देशेनैव तद्वारणसंभवात् ॥ ३९ ॥

ष्णः ॥ षकारनकारान्तसंख्यायाः परस्यामो नुडागमो भवति ॥ पञ्चानाम् । परमपञ्चानाम् । गौणत्वे न लुग्नुटौ । प्रियपञ्चा, प्रियपञ्चानौ, प्रियपञ्चानः । प्रियपञ्चः । प्रियपञ्चा ॥ एवं सप्तन् नवन् दशन् प्रभृतयः ॥ ४० ॥

(सु०) **ष्णः** ॥ ष् च न् चानयोः समाहारः ष्ण् तस्मात् ष्णः । संख्याया इत्यनुवर्तते । ष्णः इति तस्या विशेषणम् । विशेषणेन तदन्तविधिः ॥ संख्याया इति किम् । त्विषाम् । यज्वनाम् ॥ ष्ण इति किम् । त्रिंशताम् । पञ्चाशताम् ॥ नलोपे नोपधाया इति दीर्घे च पञ्चानाम् ॥ प्राधान्ये परमाश्च ते पञ्च च परमपञ्च । तेषां परमपञ्चानाम् ॥ गौणत्वे न लुग्नुटौ । गौणे ष्णान्तसंख्यायाः जश्शसोर्लुक् नामि तु नुट् च न । संख्यावाचित्वाभावात् । प्रियाः पञ्च यस्य स प्रियपञ्चा । आमि प्रियपञ्चाम् । अकारद्वयमध्ये चकारः ॥ ४० ॥

(त०) **ष्ण इति** ॥ ष् च न् च अनयोः समाहारः ष्ण् तस्मात् ष्णः । अत्र संख्याया इत्यनुवर्तते ष्ण इति तद्विशेषणं ततस्तदन्तलाभः इत्याशयेनाह—**षकारनकारान्तेत्यादि** ॥ नस्य ष्टुत्वनिर्देशे विशेषणम् । णस्य संख्यावाचिनोऽभावान्नान्तमेव गृह्यते ॥ संख्याया इति किम् । त्विषाम् ॥ ष्ण इति किम् । त्रिंशताम् ॥ **गौणत्वे नेति** ॥ संख्यावाचित्वाभावादित्यर्थः ॥ ४० ॥

अष्टनो डौ ॥ अष्टन्शब्दात्परयोर्जश्शसोर्वा डौ भवति ॥ अष्टौ अष्ट । अष्टौ—अष्ट ॥ ४१ ॥

(सु०) **अष्टनो डौ** ॥ अष्टन इत्येकवचनं तु त्रेरितिवत् । अल्लोपः स्वरे इत्यस्याप्रवृत्तिश्चिन्त्या(क) । जश्शसोरित्यनुवर्तते । वाऽऽस्विति वाशब्द उभयत्र संबध्यते काकाक्षिगोलकन्यायेनेति ॥ ननु षष्ठीनिर्दिष्टत्वादन्त्यस्य डौ भवति न चानेकवर्णत्वात्सर्वादेशः स्यात् । नानुबन्धकृतमनेकवर्णत्वमित्युक्तत्वात् । उच्यते । डित्त्वसामर्थ्यान्नोक्तदोषः । तथा हि । अन्त्यादेशे सति जसि अष्टाविति शसि अष्टाविति प्राप्नोति । तच्चान्तरेण डित्त्वं सिद्धम् । अतो डित्करणसामर्थ्यात् सर्वादेशः(ख) । लुकोऽपवादोऽयमिति सर्वादेश इति

(क) चिन्त्येति । सुबोधिनी । अत्र अष्टाभ्य औशिति सूत्रव्याख्यावसरे । अन्यथा अष्टन इत्येव ब्रूयात् । इति भाष्यकारोक्त्यापि चिन्ताया अपसरणीयत्वात् ।

(ख) **अनुबन्धकृतमनेकवर्णत्वं न स्वीक्रियते** । अत्र संध्यक्षराणि पराणीत्यादिनिर्देशेन शिर्देशेज्ञाप्यते इयं परिभाषा । तथा हि जश्शसोः शिश्चेत् सर्वस्य न स्यात् तदोक्तनिर्देशोऽनुपपन्नः स्यादिति । 'साधनाधारयोर्युट्' कारकात् क्रियायुक्ते इत्यादिनिर्देशेनानेकवर्णीशे ज्ञाप्यते इयं परिभाषा इति परिभाषाप्रकरणे द्रष्टव्यम् । इयमत्राशङ्का—ननु षष्ठीनिर्दिष्टस्यादेशस्तदन्तस्य ज्ञेयः' इति परिभाषया 'अष्टनो डौ' इति षष्ठीनिर्दिष्टत्वात् जश्शसोरन्त्यस्य स्थाने डौ प्राप्नोति न तु सर्वस्य स्थाने । इत्या-

वा । औशिति सुवचम् । औत्वं हि लुग्लुटाविव प्राधान्ये एव भवति न तु गौणत्वे । सप्य-शूभ्यां तुट् चेत्यनेन सप्तन्अष्टन्शब्दौ निष्पन्नौ ॥ ४१ ॥

(त०) अष्टनो डाविति ॥ एकवचनं तु त्रेरिति वत् । सौत्रत्वादल्लोपोऽपि न । 'अल्लोपः स्वरे' इत्यस्याप्रवृत्तिश्चिन्त्येति कैश्चिदुक्तम्(क) । अत्र अष्टाभ्य ओशिति सूत्र-व्याख्यावसरे अन्यथा अष्टन इत्येव ब्रूयात् इति भाष्यकारोक्त्यापि चिन्ताया अपसारणी-यत्वात् । वाऽऽस्विति वाशब्दः काकाक्षिन्यायेनोभयत्रान्वेति । संख्याया इत्यनुवृत्तेर्नेह । प्रियाष्ट्नः ॥ अनुबन्धैरनेकवर्णऽत्वस्यासंभवादन्त्यादेशोऽस्तीति न शङ्कनीयम् षष्ठीनिर्दि-ष्टस्येति परिभाषाया अनित्यत्वात् ॥ ४१ ॥

वाऽऽस्सु ॥ अष्टनः सकारभकारादिषु विभक्तिषु वाऽऽत्वं भवति ॥ अष्टाभिः–अष्टभिः । अष्टाभ्यः–अष्टभ्यः । अष्टाभ्यः–अष्टभ्यः । अष्टानाम् । अष्टासु । अष्टसु ॥ प्रिया अष्टौ यस्यासौ प्रियाष्टा, प्रियाष्टानौ, प्रियाष्टानः । प्रियाष्ट्नः । प्रियाष्ट्ना, प्रियाष्टाभ्याम् । "प्रियाष्ट्नो राजवत्सर्वं हाहाव-च्चापरं हसे ।" सुगण्, सुगणौ, सुगणः । सुगणम् , सुगणौ, सुगणः । सुग-णट्सु ॥ भुत्–भुद् बुधौ, बुधः । भुद्भ्याम् । भुत्सु । राक् । राग् , राघौ, राघः । राग्भ्याम् । राक्षु ॥ सुककुप् सुककुब् , सुककुभौ, सुककुभः । सुक-कुभम् । सुककुप्सु ॥ ४२ ॥

(सु०) वाऽऽस्सु ॥ स्भौत्यपकृष्यते । तेन स्यादयो विशेष्यन्ते । वा आ आसु इति च्छेदः । सकारभकारादौ स्यादौ परे अष्टन आत्वं वा भवतीति फलितोऽर्थः ॥ इत आरभ्य संख्याया इति निवृत्तं व्याख्यानात् । तेन गौणत्वेऽपि स्यादावात्वम् ॥ स्यादा-विति किम् । अष्टभार्यः अष्टसेवकः ॥ स्भौति किम् । प्रियाष्टानौ ॥ प्राधान्ये परमाष्टौ ॥ गौणत्वे प्रिया अष्टौ यस्य स प्रियाष्टा । आत्वाभावे राजवत् । शसि 'अल्लोपः स्वरे' इत्यका-रलोपे कृते ष्टुभिः ष्टुरिति णत्वं प्राप्तमसिद्धं बहिरङ्गमन्तरङ्गे इति परिभाषया न शस्निमि-त्तकत्वेन बहिरङ्गस्याल्लोपस्यासिद्धत्वात् । पूर्वं पूर्वमन्तरङ्गमिति स्वीकारात् ॥ आत्वपक्षे प्रथमैकवचने प्रियाष्टाः । हाहाशब्दवत् । प्रियाष्टन्शब्दस्यात्वाभावपक्षे सर्वं रूपं राज-वत् । आत्वपक्षे तु हसादावपरं रूपं हाहावत् ॥ इति नान्ताः ॥ सुष्ठु गणयतीति सुगण् गणयतेर्विण्प्रत्ययः । शसे ङ्णोरिति टुकि सुगणट्सु । शसे चपस्येति द्वितीये सुग-ण्ट्सु । टनादिति धुटि सुगणट्त्सु । क्विप्प्रत्यये तु सुगाण् । अमस्य क्ङिति इति दीर्घे कर्तव्ये अल्लोपणिलोपयोः स्थानिवद्भावो न शङ्क्यः । दीर्घविधौ तन्निषेधात्(ख) ॥ इति

शङ्कते—नन्वित्यादिना । अनेकवर्णादेशस्य गुर्वादेशत्वाद् 'गुर्वादेशश्च सर्वस्य' इति परिभाषया सर्व-स्य जसः शसश्चस्थाने डौ भवतीति नाशङ्काप्रसरः, तत्परिहरति—नचेत्यादिना । परिहारहेतुमाह—नानुबन्धकृतमिति । अनुबन्धकृतं नानेकवर्णत्वं स्वीक्रियते इति भाषया अनेकवर्णत्वास्वीकारान्न जश्शसोः सर्वस्य स्थाने डावादेशः । परमन्त्यस्यैवेति । अस्या उत्तरमाह—उच्यत इति हिस्वसाम-र्थ्यादित्यादिना ।

(क) कैश्चिदिति । तेषां मध्ये एकः सदानन्दः । (ख) तन्निषेधात्—स्थानिवद्भावनिषेधादिति ।

णान्ताः ॥ बुध्यतेः क्विप् । आदिजबानामिति भः । जबत्वचपत्वे । भुत्–भुद् । जबत्वे भुद्भ्याम् । चपत्वे भुत्सु ॥ इति धान्ताः ॥ राघृ, सामर्थ्ये । राघते इति राक् क्विबन्तः ॥ इति घान्ताः ॥ सुष्ठु ककुप् यस्मिन् स सुककुप् । 'दिशस्तु ककुभः काष्ठाः' इत्यमरः ॥ इति भान्ताः ॥ ४२ ॥

(त०)वाऽऽस्त्विति ॥ वा आ आसु इति च्छेदः । इत आरभ्य संख्याया इति निवृत्तं व्याख्यानात् तेन गौणत्वेऽप्यात्वम् ॥ अत्र स्भीत्युत्तरसूत्रात् स्भीत्यपकृष्यते इत्यभिप्रेत्याह—सकारेत्यादि ॥ प्रियाष्टन इति ॥ ष्टुत्वं न । 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषया अल्लोपस्यासिद्धत्वात् ॥ ४२ ॥

(युजेः पञ्चसु नुम् न समासे इति च) ॥ ४३ ॥

(सु०) युजेः पञ्चसु नुम् न समासे इति च ॥ 'युजिर् योगे' इत्यस्य धातोः पञ्चसु स्यादिषु नुम् स्यान्न तु समासे ॥ युजेरिति धातुपाठपठितेकारविशिष्टस्य ग्रहणं न तु निर्देशे य इक् तस्य । तेनेह नुम् न । युज्यते समाधत्ते इति युक् । 'युज समाधौ' दैवादिक आत्मनेपदी ॥ ४३ ॥

(त०) युजेः पञ्चस्विति ॥ समासे इति न इति च संबन्धः । युञ्जी कुले इह न ४३

दिशाम् ॥ दिश्दृश्स्पृश्दधृष्ऋत्विज्क्रुञ्च्युञ्ज्स्रज्अञ्च्उष्णिहादीनां कुत्वं स्यादौ रसे पदान्ते च ॥ संयोगान्तस्य लोपः । युङ्, युञ्जौ, युञ्जः । युञ्जम्, युञ्जौ, युजः । युजा, युग्भ्याम् । समासे तु ॥ ४४ ॥

(सु०) दिशाम् ॥ बहुवचनमाद्यर्थम् । तेन दिश् १ दृश् २ स्पृश् ३ दधृष् ४ ऋत्विज् ५ क्रुञ्च् ६ युञ्ज् ७ स्रज् ८ अञ्च् ९ उष्णिहो १० गृह्यन्ते । दिशदृशस्पृशदधृषऋत्विज्स्रजां षत्वे प्राप्ते क्रुञ्चयुञ्ज्अञ्चामप्राप्ते उष्णिहो ढत्वे प्राप्ते अयं कुत्वविधिः ॥ चोः कुरित्यतः कुरित्यनुवर्तते । युनक्तीति सिलोपे संयोगान्तलोपे च नस्य कुत्वेनानुनासिको ङकारः । युङ् । नश्चापदान्ते इति नुमोऽनुस्वारे परसवर्णः । तस्यासिद्धत्वाच्चोः कुरिति कुत्वं न युञ्जौ । समासे तु सुष्ठु युनक्तीति क्विप् । अत्र न नुम् ॥ ४४ ॥

(त०) दिशामिति ॥ बहुवचनमाद्यर्थम्(क) । अत्र रसग्रहणाद्दिक्पाशेत्यादावपि॥ युञ्जाविति ॥ नकारस्य कुत्वं न तु न यमस्यासिद्धत्वात् ॥ ४४ ॥

चोः कुः ॥ चवर्गस्य कवर्गो भवति धातोर्झसे नाम्नश्च रसे पदान्ते च(ख) ॥ सुयुक् ॥ समाध्यर्थस्य नुम् न । युक् ॥ खन्, खञ्जौ । खन्भ्याम् । खन्सु ॥ छशषराजादेः षः । सम्राट्–सम्राड्, सम्राजौ, सम्राजः ॥ देवेट्–देवेड्, देवेजौ, देवेजः ॥ परिमृट्–परिमृड्, परिमृजौ, परिमृजः ॥ विश्वसृट्–विश्वसृड्, विश्वसृजौ ॥ ४५ ॥

(सु०) चोः कुः ॥ रसे किम् । त्वचौ ॥ नाम्नः किम् । वच्मि ॥ पदान्ते

(क) 'बहुवचनान्तास्तद्गणसूचकाः' इति न्यायेन दिशामिति बहुवचनेन दिशादिनवानां ग्रहणम् ।

(ख) चोःकुरिति । अत्र प्रसिद्धतरत्वात् कृत्रिमाकृत्रिमपरिभाषया आन्तरतम्याद्वा कवर्ग एव कुर्गृह्यते नान्य इत्याह—कवर्गं इति ।

किम् । वाचि ॥ धातोर्झसे यथा । वक्ता ॥ झसे किम् । वच्मि ॥ कुत्वे छ्युक् । समाध्यर्थस्य युजेर्नुम्न(क) । युक् ॥ खञ्जतीति । खजि गतिवैकल्ये । क्विबन्तः । संयोगान्तलोपे खन् । संराजते इति पत्वे जबत्वचपत्वे च सम्राट् ॥ देवान् यजतीति क्विपि यजादित्वात्संप्रसारणे पत्वे च देवेट् ॥ विश्वं सृजतीति विश्वसृट् क्विबन्तः । दिशामिति कुत्वं न सृजिति सूत्रे रज्जुसृड्भ्यामिति भाष्यप्रयोगात् । यद्वा सृजियज्योः कुत्वापवादः षत्वविधिरेव ॥ स्रक्ऋत्विक्शब्दयोस्तु दिशामित्यनेन कुत्वमेव ॥ परिमार्ष्टीति परिमृट् ॥४५॥

(त०) चोः कुरिति ॥ अत्र तदन्तग्रहणम् । तेन चवर्गान्तस्येति व्याख्येयम् । एवं चासिद्धत्वानुसरणेन युञ्जावित्यादौ कुत्वाभाव इति समाधानमपि नाश्रयणीयम् । चकारस्यान्तेऽभावात् जकारसत्त्वेपि तस्य रसपरत्वाभावात् । समाध्यर्थस्येति॥ युजेरिति धातुपाठपठितेकारविशिष्टस्यानुकरणं न श्तिका निर्देश इत्याशयः (ख) ॥ युगिति ॥ युज्यते समाधत्तो इति युक् । युज समाधौ । दैवादिकः । आत्मनेपदी ॥ खन इति। खञ्जतीति खन् । खजि गतिवैकल्ये संयोगान्तस्येति जलोपः ॥ देवेडिति ॥ देवं यजतीति । क्विपि संप्रसारणे रूपम् ॥ ४५ ॥

(**विश्वस्य वसुराटोर्दीर्घः**) विश्वावसुः । विश्वाराट् , विश्वराजौ । विश्वाराड्भ्याम् । विश्वाराट्सु–विश्वाराट्त्सु ॥ ४६ ॥

(सु०) **विश्वस्य वसुराटोर्दीर्घः** ॥ विश्वशब्दस्य दीर्घः स्यात् वसुशब्दे राट्शब्दे च परे ॥ विश्वं वसु द्रव्यं यस्य स विश्वावसुः । राटिति डशब्दस्यापि स्वरूपोपलक्षणमविवक्षितं टत्वम् । विश्वस्मिन् राजते इति विश्वराट् ॥ ४६ ॥

(त०) वसुराटोरिति ॥ टत्वमविवक्षितं षत्वविषयोपलक्षकम् ॥ **विश्वावसुरिति** ॥ विश्वं वसु यस्येति विग्रहः ॥ ४६ ॥

स्कोराद्योश्च ॥ संयोगाद्योः सकारककारयोर्लोपो भवति धातोर्झसे नाम्नश्च रसे पदान्ते च ॥ भृट्–भृड् , भृज्जौ, भृज्जः ॥ वृक्षवृट् वृक्षवृड् , वृक्षवृश्चौ ॥ विभ्राट्–विभ्राड् , विभ्राजौ । विभ्राड्भ्याम् । विभ्राट्सु । ऋत्विक्–ऋत्विग्, ऋत्विजौ । ऋत्विक्षु । ऊर्क्–ऊर्ग्, ऊर्जौ । ऊर्क्षु ॥ ४६ ॥

(सु०) **स्कोराद्योश्च** ॥ आदिशब्दस्यावयववाचित्वेन ससंबन्धित्वादवयव्याकाङ्क्षायां संयोगेति संबध्यते । संयोगशब्दस्यापीह समुदायवाचित्वादवयवार्थकत्वेनावयव्याकाङ्क्षायां नाम्नो धातोश्चेति संबध्यते(ग) । संयोगान्तलोपापवादः । झसे स्वपूर्वो

(क) युजेरिति धातुपाठपठितेकारविशिष्टस्यानुकरणं नश्तिका निर्देश इत्याशयः । युज्यते समाधत्ते इति युक् । युज समाधौ दैवादिकः । आत्मनेपदी । (ख) न श्तिकेति । व्याख्यानादिति भावः ।

(ग) इदेयमाशङ्का—ननु स्कराद्योश्चेति सूत्रात् संयोग इति धातोर्नाम्नश्चेति कथं लब्धमिति । तत्राह—**आदिशब्दस्येति** । अत्रेदमनुमानम्—आदिशब्दः ससम्बधी । अवयववाचित्वात् । घटवदित्यनुमानेन ससम्बन्धित्वसिद्धौ अवयववाच्यादिशब्दः अवयव्यपेक्षः, ससम्बन्धित्वात् बुद्ध्यादिवत् । इत्यानुमानेन संयोगः सम्बध्यते । अथापि समुदाये एव संयोगसंयोगिव्यवहारो न तु समुदायाभावे । तेनावयव्याकाङ्क्षायां धातोर्नाम्नश्चेति सम्बध्यते । अत्र रसे पदान्ते इति पदत्रयं संयोगस्यैव विशेषणम् । न तु नामधात्वोः । स्कोरिति द्विर्वचननिर्देशात्स्कुम्भातोः स्वरूपस्य वा न ग्रहणम् ।

विधिः । झसे भ्रष्टा । पदान्ते अधाभ्रट् ॥ आद्योः किम् । भक्ष्यति । नक्ष्यति ॥ भृज्जतीति क्विप् । ग्रहामिति संप्रसारणम् । सौ परत्वात् षत्वे स्कोरिति सलोपे च सिलोपः । भृट् । सस्य श्चुत्वेन शः । शस्य झबे जबा इति जः भृज्जौ ॥ वृक्षं वृश्चतीति क्विपि ग्रहामिति संप्रसारणं छशषेति षत्वं स्कोरिति सलोपः जबत्वचपत्वे । वृक्षवृट्-वृक्षवृड् । छपि टनादिति धुट् । तस्य च अत्वम् । वृक्षवृट्त्सु । चान्तेषु वक्तुमुचितः ॥ विशेषेण भ्राजते इति विभ्राट् । षत्वविधौ राजिसाहचर्यात् भ्राजृ दीप्ताविति फणादिरेव गृह्यते(क) । यस्तु राजृ भ्राजृ दीप्ताविति तस्य कुत्वमेव । विभ्राक्-विभ्राग् । विभ्राग्भ्यामित्यादि ॥ ऋतौ यजतीति ऋतावुपपदे यजेः क्विप् । यजादित्वात्संप्रसारणम् । कुत्वम् ऋत्विक् ॥ ऊर्ज बलप्राणनयोः । अस्माच्चुरादिण्यन्तात् क्विपि णिलोपः । ऊर्जयतीति । सभिन्नस्येति नियमात् न संयोगान्तलोपः । ऊर्क् (ख) ॥ इति जान्ताः ॥ ४६ ॥

(त०) स्कोराद्योश्चेति ॥ स् च क् चेति स्का तयोः स्कोः । आदिशब्दस्यावयविनि साकाङ्क्षत्वेन संयोगशब्देन संबन्धः । संयोगशब्दोऽपि नामधातुभ्यां संबध्यते । अत्र रसे झसे पदान्ते इति पदत्रयमपि संयोगस्यैव विशेषणम् । न तु नामधात्वोः । स्कोरिति द्विर्वचननिर्देशात्स्कुञ्धातोः स्वरूपस्य वा न ग्रहणम् ॥ ऋत्विगिति ॥ ऋतौ यजते इति वाक्ये ऋतावुपपदे यजतेः क्विपि संप्रसारणे च रूपम् ॥ ऊर्क् इति बलप्राणनयोः । चुरादिण्यन्तात्क्विपि णिलोपे च रूपम् ॥ ४६ ॥

तः ॥ त्यदादेस्तस्य सत्वं भवति सौ परे ॥ स्यः, त्यौ, त्ये ॥ सः, तौ, ते ॥ परमसः । संज्ञायां गौणत्वे चात्वसत्वे न ॥ त्यत्-त्यद् , त्यदौ ॥ अतित्यत् , अतित्यद् , अतित्यदौ ॥ यः, यौ, ये ॥ एषः, एतौ, एते । अन्वादेशे एनम् , एनौ, एनान् । एनेन । एनयोः । अग्निमत्-अग्निमद् , अग्निमथौ । अग्निमद्भ्याम् । अग्निमत्सु । प्रत्यञ्चतीति क्विपि कृते ॥ ४७ ॥

(सु०) तः ॥ त्यादेरित्यतः त्यदादेरिति सौ स इत्यतः स इति साविति चानुवृत्तम् ॥ त्यदादेः किम् । तातः ॥ प्राधान्ये परमसः ॥ संज्ञायां गौणत्वे चात्वसत्वे न ॥ अत्वसत्वयोः सर्वाद्यन्तर्गणकार्यत्वादत्वं सत्वं च संज्ञायां गौणे च न प्रवर्तेते । संज्ञायां त्यत् , त्यदौ । गौणे त्यमतिक्रान्तोऽतित्यद् ॥ इदमेतदोरित्यन्वादेशे एनदादेशः । एनमित्यादि ॥ इति दान्ताः ॥ अग्निं मन्थतीति क्विपि नलोप इति नलोपः । अग्निमत् ॥ इति थान्ताः ॥ प्रत्यञ्चतीत्यत्राञ्चेः क्विपि कृते ॥ ४७ ॥

(त०) त इति ॥ त्यादादेष्टेरित्यतस्त्यदादेरिति सौ स इत्यतः स इति सौ इति च पदद्वयमनुवर्तत इत्याशयेनाह । त्यदादेरित्यादि ॥ त्यदादेः किम् । तातः ॥ त इति किम् । यः ॥ सौ इति किम् । तौ ॥ ननु त्वमित्यत्र सत्वात्वे कुतो नेति चेत्सत्यम् । तकारोच्चारणसामर्थ्यात् । अथातित्वमित्यत्र गौणत्वे सिपरत्वाभावात् तस्य चरितार्थत्व-

(क) फणादिरिति 'फणराजभ्राज्' इति सूत्रोक्तो ज्ञेयः ।

(ख) इयमत्राशङ्का—'ऊर्क्' इत्यत्र संयोगान्तस्य लोप इति कलोपो कथं ? नेति । अत्राह—सभिन्नस्येति । रात्परस्य सस्यैव लोपो भवति । नत्वन्यस्येत्युक्तत्वान्न कलोपः ।

म्निति चेदोम् । साविति वक्तव्ये सिनेति गुरुकरणं वस्नसोरिव विभागसंमोहार्थम् । अत एव मितावागमौ न ॥ ४७ ॥

नो लोपः ॥ धातोर्हसान्तस्योपधाभूतस्य नकारस्य लोपः क्ङिति परे ॥४८॥

(सु०) **नो लोपः** ॥ हसान्तस्येति किम् । नीयते ॥ उपधाभूतस्येति किम् । हन्यते ॥४८॥

पूजार्थाञ्चतेर्न ॥ निरुपपदात् क्रुञ्चेः क्विपि क्रुङ् क्रुञ्चौ । क्रुङ्भ्याम् क्रुङ्षु–क्रुङ्क्षु–क्रुङ्खषु ॥ ४९ ॥

(सु०) **पूजार्थाञ्चतेर्न** ॥ पूजार्थवाचिनोऽञ्चतेरुपधाभूतस्य नस्य लोपो न भवति किति ङिति च ॥ निरुपपदात् क्रुञ्चेः क्विपि न । निर्गत उपपदेभ्यः निरुपपदस्तस्मात् । उपपदरहितस्य क्रुञ्चेरुपधाभूतस्य नस्य लोपो न भवति क्विपि । क्रुञ्च कौटिल्याल्पीभावयोः।

(त०) **निरुपपदादिति** ॥ निर्गत उपपदेभ्यः निरुपपदः तस्मात् । क्रुञ्चेः क्विपि परे तस्यैव नलोपो नेत्यर्थः ॥ ४९ ॥

अञ्चेः पुंसि पञ्चसु नुम् ॥ दिशाम् ॥ प्रत्यङ्, प्रत्यञ्चौ, प्रत्यञ्चः । प्रत्यञ्चम् , प्रत्यञ्चौ ॥ ५० ॥

(सु०) **अञ्चेः पुंसि पञ्चसु नुम्** ॥ गत्यर्थस्याञ्चतेर्नुमागमः स्यात् पुंसि पञ्चसु॥ नलोपे पुनर्नुमि कृते प्रत्यन् च् सि इति स्थिते संयोगान्तलोपे सिलोपे च नुमो नकारस्य दिशामिति कुत्वेन ङकारः । प्रत्यङ् । अनुस्वारसवर्णौ । प्रत्यञ्चौ ॥ ५० ॥

(त०) **अञ्चेरिति** । न इका निर्देशस्तथा सति कित्वान्नलोपे अचेरित्येव स्यात्॥ किं तूच्चारणार्थं इकारः ॥ **प्रत्यङ्ङिति** ॥ प्रत्यञ्चतीति क्विपि नो लोप इति नलोपे सौ नुमि कृते प्रथमं संयोगान्तलोपः । न तु श्चुत्वम् अकृतव्यूहपरिभाषया श्चुत्वाप्रवृत्तेः । बिल्यत्वात्संयोगान्तलोप एव । तथा च लोपे नस्यैव ङकारः पञ्चमत्वेन साम्यात् । प्रथमं चुत्वे खञ्चित्यसिद्धयापत्तेश्च ॥ ५० ॥

अचेर्दीर्घश्च ॥ नलोप्यञ्चतेरकारस्य लोपः पूर्वस्य च दीर्घः शसादौ स्वरे परे तद्धितयस्वरयोरीपीकारे च (क) ॥ प्रतीचः । प्रतीचा । प्रत्यग्भ्याम्। प्रत्यक्षु । तिर्यङ्, तिर्यञ्चौ, तिर्यञ्चः ॥ ५१ ॥

(सु०) **अचेर्दीर्घश्च** ॥ लुप्तनकारस्याञ्चतेरतो लोप भवति ईपि ईकारे च ॥ प्रतीची । तद्धितयस्वरयोः प्रतीच्यः । प्रतीचीनः । अचेरिति नायमिकप्रत्ययः । किंतूच्चारणार्थोऽयमिकारः नलोपिनिर्देशे ज्ञापकः । इकः कित्वान्नलोपे कृतेऽचेरित्यस्योक्तार्थेऽज्ञापनात्॥ ननु पूर्वस्येति कस्माल्लब्धम् । उच्यते । दीर्घश्रुत्योपस्थितः स्वर एवात्र स्थानी । शसादौ स्वरे इति लोपदीर्घयोर्निमित्तम् । सप्तमीनिर्देशात् पूर्वस्याव्यवहितस्य स्वरस्य दीर्घे प्राप्ते

(क) अत्राचेरिति लुप्तनकाराञ्चतिनिर्देशो यत्रास्य न लपोस्तत्रैव यथा स्यादिति ज्ञापनार्थः । तेन पूजार्थाञ्चतेर्भजादिविण्नन्तस्य न लोपाभावेनालोपदीर्घाभावात् प्रत्यञ्चेत्यादि स्यादित्यर्थः ।

अकारस्य लोप इति । 'एतश्चाल्लोपस्वरे' इत्यतोऽनुवर्त्तते । पूर्वस्य च दीर्घ इति । ननु कथं पूर्वस्य यावता स्थान्यनिर्देशात् परस्यापि प्राप्नोति युक्तं चैतदञ्चतिव्यवधानादपि पूर्वस्य न स्यात्। मैवम् । निमित्ते परे व्यवहितस्याञ्चतेरल्लोपस्तस्मिंश्च लुप्ताकारेऽञ्चतौ परेऽव्यवहितस्य पूर्वस्य स्वरस्य दीर्घ इति व्याख्यानात्।

येन नाव्यवधानं तेन व्यवहितेऽपीति वचनप्रामाण्यात् चकारेणाव्यवहितस्याप्यत्र दीर्घः(क)। अचरिति लोपस्य विषयेऽन्तरङ्गोऽपी यमिति यकारो न । अकृतव्यूहा इति परिभाषया । प्रतीचः । तिरोऽञ्चतीति सहादेरिति तिरसस्तिरिः । तिर्यङ् ॥ ९१ ॥

(त०) अचेर्दीर्घश्चेति ॥ लुप्तनकारनिर्देशात्पूजार्थासंग्रह इत्याशयेनाह—नलोपिन इत्यादि ॥ अचेरिति पाठे तु ज्ञापनासम्भवः इकः कित्त्वेन सर्वथैव नलोपात् । उच्चारणार्थ इकार इत्याद्याश्रयणे तु भवत्येव ॥ पूर्वस्य चेति शसादाविति परसप्तम्या निमित्तत्वेन पूर्वलाभः । न च चकारेण व्यवधानान्नेति वाच्यं 'येन नाव्यवधानं तेन व्यवहितेऽपि' इति वचनप्रामाण्यात् चकारैकवर्णव्यवधानेऽपि भवत्येव । अकृतव्यूहपरिभाषया पूर्वं न यत्वम् (ख) ॥ ९१ ॥

तिरश्चादयः ॥ तिरश्चादयो निपात्यन्ते शसादौ स्वरे ताद्धितयस्वरयोरीपीकारे च ॥ तिरश्चा । तिर्यग्भ्याम् । तिर्यक्षु ॥ उदीचः । उदग्भ्याम्। उदक्षु । पितरमञ्चतीति । पित्रङ्, पित्रञ्चौ ॥ ५२ ॥

(सु०) तिरश्चादयः ॥ सिद्धरूपनिर्देशो निपातनम् । एते निपात्यन्ते ईपि ईकारे च ॥ तिरश्ची । तद्धितस्य स्वरे यकारे च तिरश्चीनः उदीच्यः ॥ तिरश्चादिरिति सूत्रणीयम्। आदिशब्दादुदीच इति । बहुवचनं तु व्यर्थम्। तृतीयस्याभावात् । पदादयः षोडशादेशाः । न तु पृथक्शब्दा इति पक्षाश्रयणे तु वचनस्य सार्थक्यं बोध्यम् (ग) । उदञ्चतीति उदङ्॥

(त०) तिरश्चादय इति ॥ ननु माऽस्तु निपातनम् । अञ्चतौ सहादेःसादिरिति सूत्रेण तिर्यादेशः । स तु अल्लोपे निमित्ताभावे नैमित्तिकाभावादेव रूपसिद्धेरिति चेत्सत्यम्, अञ्चतेर्निमित्तत्वेन अल्लोपेऽप्येकदेशविकृतन्यायेन तत्सत्वान्निमित्ताभावत्वाभावात् । तिरश्चादिरिति तु युक्तं तिरश्च उदीच इति शब्दद्वयप्रवृत्तिदर्शनात्। तृतीयस्यादर्शनात् बहुवचनं व्यर्थमिति वृद्धाः ॥ ९२ ॥

(**ऋतो दीर्घो न**) पितृचः । पितृग्भ्याम् , । पितृग्भिः । पितृक्षु॥ सध्र्यङ् । सध्रीचः ॥ सम्यङ् । समीचः । प्राङ् । प्राचः ॥ पूजायां तु प्रत्यञ्चः। प्रत्यञ्चा । प्रत्यङ्भ्याम् । प्रत्यङ्क्षु—प्रत्यङ्ख्षु—प्रत्यङ्षु ॥ उदञ्चः । उदङ्भ्याम् ॥ तिर्यञ्चः । तिर्यङ्भ्याम् ॥ सम्यञ्चः । सध्र्यञ्चः । प्राञ्चः । प्राञ्चा । सहादेः सादिः ॥ अमुमञ्चतीति अमुमुयङ् । अमुमुईचः । अमुमुयग्भ्याम् । अदमुयङ् । अदद्र्यङ् ॥ पूजायां तु अमुमुयञ्चः । अमुमुयङ्भ्याम् । अदमुयञ्चः।

(क) अयं भावः। शसादाविति परसप्तम्या निमित्तत्वेन पूर्वलाभः । येन नाव्यवधानं तेन व्यवहितेऽपि' इति वचनबलात् चकारेण व्यवधानेऽपि दीर्घो भवत्येव ।

(ख) न यत्वमिति । अचेरिति लोपस्य विषये अन्तरङ्गोऽपि यमिति अकृतव्यूहपरिभाषया यकारो नेत्यर्थः ।

(ग) 'केचिदत्र समीचः सध्रीच इति पदद्वयं पठन्ति । तयोः पठनं निपातेन साधनलाघवार्थम् । तेन बहुवचनस्य नानर्थक्यम् ।

अदद्र्यश्चः ॥ मरुतः । मरुद्भ्याम् ॥ ञितो नुम् । न्सम्महतोऽधौ दीर्घः शौ च । महान्, महान्तौ, महान्तः । हे महन् ॥ ५३ ॥

(सु०) ऋतो दीर्घो न ॥ ऋकारस्य दीर्घो न भवति । लुप्ताकारनकारेऽञ्चतौ परेऽपि । पितृचः । सहाञ्चतीति सहादेरिति सहस्य सध्रिः । सध्र्यङ् ॥ समञ्चतीति सहादेरिति समः समिः । सम्यङ् ॥ प्रकर्षेणाञ्चतीति प्राङ् । पूजार्थस्याञ्चतेस्तु प्रत्यञ्चति पूजयतीति क्विपि पूजार्थाञ्चतेरिति नलोपाभावः । अत एव नुम् न । प्रत्यङ् । शसि नलोपाभावादकारलोपो न । प्रत्यञ्चः । सुपि प्रत्यञ्च् सु इति स्थिते दिशामिति कुत्वात् प्राक् संयोगान्तस्येति चलोपे नस्य कुत्वेन ङकारे च कृते शसे ङ्णोरिति कुक् षत्वम् । प्रत्यङ्क्षु । शसे चपस्येति, पक्षे खकारः । प्रत्यङ्ख्षु । कुगभावे प्रत्यङ्षु ॥ एवं पूजार्थे तिर्यङादयः ॥ विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये । चाददसो ग्रहणम् । अनयोरदसश्च टेरद्र्यादेशः स्यात् । अप्रत्ययान्तेऽञ्चतौ परं ॥ अमुमञ्चतीति विग्रहे अदस् अञ्च् इति स्थिते अद्र्यादेशे अदद्रि । अच इति यत्वम् । अदसोऽसेर्दादु दो मः । असेरिति इकार उच्चारणार्थः । असकारान्तस्यादसो दात्परस्य उदूतौ भवतः दस्य मश्च । उ इति ह्रस्वदीर्घयोः समाहारः । ह्रस्वव्यञ्जनयोर्ह्रस्वो दीर्घस्य च दीर्घो भवति ॥ असान्तस्येति किम् । अमुमात्मन इच्छति अदस्यति ॥ दात्परस्येति किम् । अमुया इत्यत्रान्त्यस्य यस्य मा भूत् । दकाररकारयोर्दकाररकारयोश्च मुत्वे अमुमुयङ् । शसि अचेरित्यतो लोपे दीर्घे च अमुमुईचः । मुत्वस्यासिद्धत्वान्न वत्वम् । अन्त्यबाधेऽन्त्यसदेशस्येति परिभाषां वदतां मते परस्य दकाररकारस्यैव मुत्वम् । अदस इति स्थाने षष्ठी । एवं हि षष्ठीनिर्दिष्टस्येति परिभाषोपतिष्ठते । अदसो योऽन्त्यः स दात् परो यः सोऽदसोऽन्त्यः । एवमन्त्यबाधेऽन्त्यसमीपस्य भवतीति दकाररकारयोर्मुत्वं अदमुयङ् । अः अकारः सेः सकारस्य स्थाने यस्य स असिरिति व्याख्याने त्यदाद्यत्वविषये एव मुत्वं नान्यत्रेति पक्षे उभयत्र मुत्वं न अदद्र्यङ् । वार्तिककृतोक्तं च । "अदसोऽद्रेः पृथङ् मुत्वं केचिदिच्छन्ति लत्ववत् । केचिदन्त्यसदेशस्य नेत्येकेऽसेर्हि दृश्यते ॥ १ ॥" अदसो दकाराकारयोरद्र्यादेर्दकाररयोश्च पृथङ् मुत्वं केचिदाचार्या इच्छन्ति लत्ववत् । यङन्तस्य चलीक्लृप्यते इत्यस्योभयोः कृपो रो ल इत्यनेन यथा लत्वं तथेत्यर्थः ॥ अन्त्यसदेशस्य दकाररकारस्य मुत्वं केचिदिच्छन्ति । अः अकारः सेः सकारस्य स्थाने यस्य सोऽसिस्तस्य असेः । त्यदाद्यत्वविशिष्टस्यादसो हि मुत्वं दृश्यते इति केचिद् वदन्ति । तन्मते उभयोर्मुत्वं न त्यदाद्यत्वाभावात् । एवं चामुद्र्यङ् इति केषांचिदुदाहरणं तद्भाष्येऽनुक्तत्वादुपेक्ष्यमिति भावः इति चान्ताः ॥ 'मरुतौ पवनामरौ इत्यमरः ॥ मह पूजायाम् । महते पूज्यते इति महान् । कर्मणि तृप्रत्ययः । ऋदित्वान्नुम् । न्सम्महत इति दीर्घः । सिलोपे संयोगान्तलोपे च महान् ॥ ५३ ॥

(त०) ऋत इति ॥ एतद्बीजं तु दीर्घग्रहणात् संज्ञापूर्वको विधिरनित्य इति ऋतां न दीर्घः ॥ अमुमुयङिङति ॥ अमुमञ्चतीति वाक्ये क्विपि अदस्अम्अञ्च् क्विप् इति स्थिते क्विपां लोपे वेरिति वलोपे समासप्रत्यययोरिति अम्लोपे नामसंज्ञायां स्यादौ अदस् अञ्च् सि इति स्थिते । अद्र्यादेशमुत्वे नलोपे नस्य ङत्वेन नुमागमे सिलोपे रूपसिद्धिः । अदमुयङ् । अदद्र्यङ् । इति विकल्पस्त्विम् । उभयत्र मुत्वं लत्ववत् । यथा चलीक्लृप्यते

इत्यत्र लत्वम् । 'दस्यमः' इत्यत्र अन्त्यस्य दस्येति व्याख्यानेऽन्त्यबाधेऽन्त्यसदेशस्येति परिभाषामाश्रित्य परस्यैवोत्त्वम् । तत्रैवोक्तम्–केचित्तु दो म इति वक्तव्ये दस्येति सस्वर-दकारोक्तिर्ज्ञापयति त्यदाद्यत्वविषय एव मत्वं प्रकृते तदभावान्नेति । उक्तं च । "अदसोऽद्रेपृथग् मुत्वं केचिदिच्छन्ति लत्ववत् । केचिदन्त्यसदेशस्य नेत्येकेऽसेहि दृश्यते॥" अमुमुईच इति ॥ संज्ञापूर्वस्य विधेरनित्यत्वान्न वत्वम् । यद्वा मुत्वस्यासिद्धत्वात् ॥९३॥

(द्विरुक्तानां जक्षादीनां च शतुर्नुम् न शौ वा(क))

ददत् । एवं जक्षत् । जाग्रत् । दरिद्रत् । चकासत् । शासत् ॥ ५४ ॥

(सु०) द्विरुक्तानां जक्षादीनां च शतुर्नुम् न शौ वा ॥ द्विरुक्तधातुभ्यो जक्षादिभ्यश्च परस्य शतुर्नुम् न स्यात् शौ परे तु वा । ददातीति दाञः शतृप्रत्यये अप् । ह्वादेरित्यपो लुक् द्वित्वं च ह्रस्व इति पूर्वस्य ह्रस्वः । दादेरित्यालोपः ॥ ददत् । एवं जक्षतीति जक्षत् ॥ जागर्तीति जाग्रत् ॥ दरिद्रातीति दरिद्रत् । दरिद्रातेरित्यालोपः ॥ चकास्तीति चकासत् ॥ शास्तीति शासत् ॥ ९४ ॥

(त०) द्विरुक्तानामिति ॥ आगमशास्त्रस्यानित्यत्वादिति भावः ॥ ९४ ॥

अत्वसोः सौ ॥ अत्वन्तस्य धातुभिन्नासन्तस्य चोपधाया दीर्घो भवति सावधौ(ख) ॥ भवान् , भवन्तौ, भवन्तः । हे भवन् ॥ चन्द्रमाः, चन्द्रमसौ ॥ अधात्वसन्तस्य किम् । चीवराणि वस्तेऽसौ चीवरवः ॥ शत्रन्तस्य तु अत्वन्तत्वाभावान्न दीर्घः । भवन् , भवन्तौ ॥ पचन्॥ दीव्यन् ॥ धीमान्। हे धीमन् । धीमन्तौ ॥ मघवान् , मघवन्तौ । मघवद्भ्याम्॥ गुप्–गुब् , गुपौ, गुपः । गुब्भ्याम् । तादृक् , तादृशौ, तादृशः । तादृक्षु ॥ एवं यादृगादयः ॥५५॥

(सु०) **अत्वसोः सौ** ॥ अतुश्च अस् च तौ अत्वसौ तयोः । नोपधाया इत्यत उपधाया इत्यनुवर्तते । अतुरिति मतुवतुक्तवत्वादीनामवयवो गृह्यते केवलस्य प्रत्ययस्याभावात् । अस्त्वर्थवाननर्थकोऽपि । अतु इत्युकारानुबन्धस्यानुकरणाच्छत्रन्तस्य दीर्घो न । अत्वन्तस्य धातोर्दीर्घः । गामन्तमिच्छति गोमानिवाचरति इति वा इच्छार्थक्यन्तात् , आचारक्विबन्ताद्वा कर्तरि क्विप् । ततोऽल्लोपयलोपौ । गोमान् । अधातोरित्यनुवर्त्य असन्ते योज्यम् । तेनासन्तस्य नाम्न उपधाया दीर्घोऽधौ सौ । अत एव चानर्थकस्याप्यसो ग्रहणम् । भातेर्डवतुरिति डवतुप्रत्ययान्तो भवच्छब्दः । नित्यमपि नुमं बाधित्वा वचनसामर्थ्यादादौ दीर्घः ततो नुम् । भवान् । शसादौ महद्वत् । असन्तस्तु चन्द्रमस्शब्दः । धात्वसन्तस्योपधाया दीर्घो न । यथा । वस आच्छादने क्विप् । चीव-

(क) द्विरुक्तानामिति । विशेषतो ह्वादिगणोक्तानामित्यर्थः । जक्षादीनाम् । जक्ष–जागृ–दरिद्र चकास्–शासूनां ग्रहणम् ।

(ख) अत्र माधवः—अत्वेति । इहापि नोपधाया इत्युनुवर्त्तते । तेनात्वन्तस्य नोपधाया इति दीर्घे सिद्धमिष्टम् । असन्ते तु नोपधा नास्तीत्युपधैव सम्बन्ध्यते। ननु चेयमस्ति विद्वानिति न्सम्महत इति तु विद्वांसावित्यादौ सावकाशम् । सत्यम् । एवं हि विद्वानित्यत्रापि तेनैव सिद्धत्वात् अत्रासग्रहणस्य वैयर्थ्यमापद्येत। अन्यत्तत्र द्रष्टव्यम् ।

रवः। भवतीति शतृप्रत्ययान्तस्यातुं इत्युकारानुबन्धत्वाभावाद्दीर्घो न। मितो नुमिति नुम्। भवन् एवं पचतीति पचन्। दीव्यतीति दीव्यन्॥ अत्वन्तस्याधातोर्यथा धीरस्येति धीमान्। अस्त्यर्थे मतुरिति मतुः॥ मघशब्दाद्वतुप्रत्यये मघवच्छब्दः। उपधादीर्घादि प्राग्वत्। "हविर्जक्षिति निःशङ्को मखेषु मघवानसौ" इति भट्टिः॥ मत्वन्तत्वाभावे महेर्हस्य घो वुगागमः कन्प्रत्ययश्चेत्येतत्त्रितये निपातनात्कृते मघवन्शब्दः श्वादेरित्यत्रोक्त एव॥ इति तान्ताः॥ गोपायतीति गुप्। क्विबन्तः। अयादयोऽनपीति वैकल्पिकत्वादिहायप्रत्ययाभावः। आयप्रत्ययपक्षे तु यत इत्यल्लोपे अलोपे च गोपा इति रूपं बोध्यम्॥ इति पान्ताः॥ तमिव पश्यतीति दृशेष्टक्सकाविति चकारात् क्विप्। आ सर्वादेरित्यात्वम्। दिशामिति कुत्वम्। तादृक्॥ ५५॥

(त०) अत्वसोः साविति॥ अतुश्च अस् च अत्वसौ तयोः। अतुरत्र प्रत्ययावयवः केवलस्यासम्भवात्। असतुवन्निरर्थकोऽपि। अतुग्रहणसामर्थ्यात्प्रथमं दीर्घः। पश्चान्नुम्। अन्यथाऽतुग्रहणं व्यर्थं स्यात्। अत्वन्तस्य धातोरपि। गोमन्तमिच्छन् गोमानित्यत्र यथा। अधातोरित्यनुवृत्तं तु अनन्तरत्वादस् इत्यनेनान्वेति इत्यभिप्रेत्याह— अधात्वसन्तस्येति॥ धातुभिन्नासन्तस्येत्यर्थः॥ ५५॥

नशेः॥ को वा पदान्ते स्यादौ झसे च॥ नक्—नग् नट्—नड्, नशौ, नशः। नग्भ्याम्—नड्भ्याम्। नक्षु—नट्सु॥ विट्—विड्, विशौ, विशः॥ स्पृक्—स्पृग्, स्पृशौ, स्पृशः॥ घृतस्पृक्॥ घृतस्पृग्॥ उदकपूर्वस्य न कुत्वम्। उदकस्पृट्—उदकस्पृड्, उदकस्पृशौ॥ दधृक्—दधृग्, दधृषौ। दधृक्षु॥ रत्नमुट्—रत्नमुड्, रत्नमुषौ। रत्नमुड्भ्याम्॥ षष्शब्दो नित्यं बहुवचनान्तस्त्रिषु सरूपः। जश्शसोर्लुक्। षट्—षड्॥ ५६॥

(सु०) नशेः॥ नशेः कवर्गान्तादेशो वा स्यात् स्यादौ झसे पदान्ते च। णश अदर्शने। क्विप् षत्वं जबत्वचपत्वे। नट् नड्। कत्वे तु नक् नग्॥ 'विश प्रवेशने' क्विप्। षत्वं जबत्वचपत्वे विट्-विड्॥ घृतं घृतेन वा स्पृशतीति घृतस्पृक्॥ उदकपूर्वस्य न कुत्वम्। उदकपूर्वस्य स्पृशेस्तु दिशामिति कुत्वं न उदकं स्पृशतीति षत्वम्। उदकस्पृट्॥ इति शान्ताः॥ ञिधृषा प्रागल्भ्ये। अस्मात् क्विप् द्वित्वम्। निपातनात् दिशामिति कुत्वम्। धृष्णोतीति दधृक्॥ मुष स्तेये। रत्नानि मुष्णातीति रत्नमुट्॥ जश्शसोरिति जश्शसोर्लुक् इत्वम्। जबत्वचपत्वे। षट्-षड्। डत्वे षड्भिः। आमि ष्ण इति नुटि कृते षस्य डत्वं नस्य च ष्टुत्वम्॥ ५६॥

ड्णः॥ डकारस्य णो भवति नामि परे॥ षण्णाम् षट्सु। षट्त्सु। परमषट्—परमषड्। परमषण्णाम् गौणत्वे तु प्रियषट्॥ प्रियषषः। प्रियषषाम् (क)॥

(क) ड्णः। डकारस्य चपेष्वनन्तर्भूतत्वादपदान्तत्वाच्च 'जमे जमा वा' इति न प्राप्नोति। इत्यारम्भः। अत्र संख्याया इत्यतः संख्याया इत्यनुवर्तते। सूत्रे ड्ण इति षष्ठ्याः स्थाने प्रथमा। व्यधिकरणषष्ठ्यौ संख्यावाचिनः शब्दस्य यो डस्तस्येत्यर्थः। षण्णामिति। षष् आम् इत्यत्र 'ष्णः' इति नुटि षष् नामिति स्थिते 'षोड' इति डत्वस्यानेन णत्वे एव स्यादित्यर्थः। केचित्तु। 'ड्ण' इत्यत्र द्वौ डकारौ निर्दिश्य णत्ववत्

(सु०) ड्णः ॥ डकारस्य चपेष्वनन्तर्भूतत्वादपदान्तत्वाच्च ञमे ञमा वेत्यस्याप्राप्तौ तस्यामारम्भः । आगमा यद्गुणीभूता इति परिभाषया नुटः प्रत्ययावयवत्वात् । प्रत्ययञमे इत्यनेन ञमत्वस्वीकारे व्यर्थमिदम् । टनादिति धुटि षट्सु । तदन्तेऽप्ययं विधिर्वाञ्छितः । परमाश्च ते षट् च परमषट् तेषां परमषण्णाम् । षडर्थप्राधान्ये एव लुग्नुटौ न तु गौणत्वे । प्रियाः प्रियाणि वा षट् येषां ते प्रियषषः तेषां प्रियषषाम् ॥९७

(त०) ड्ण इति ॥ ड् ण इति छेदः । षशब्दस्य डत्वे प्रथमैकवचनमित्याशये नाड-ड् इति ॥ संख्याया इत्यनुवृत्तेः । षष्ठीनिर्दिष्टत्वादन्त्यस्यैव नाद्यस्येति भावः ॥ संख्यायाः किम् । सजुषाम् ॥ ९७ ॥

दोषाम् ॥ दोषादीनां रो भवति रसे पदान्ते च ॥ दोः, दोषौ । शसादो वा दोषन्(क) दोष्णः । दोर्भ्याम्—दोषभ्याम् ॥ ५८ ॥

(सु०) दोषाम् ॥ जबचपविसर्गाणामपवादः । बहुवचनमाद्यर्थम् । दाम्यतीति दोः । दमेर्डोसिति डोस् प्रत्ययः । डित्वाट्टिलोपः । 'भुजबाहू प्रवेष्टो दोः' इत्यमरः ॥ पाददन्तेति वा दोषन्नादेशः । शसादौ अल्लोपः इत्युपधालोपः । णत्वम् । दोष्णः ॥९८॥

(त०) दोषामिति ॥ बहुवचनमाद्यर्थम् । व्युत्पत्तिपक्षे ओसि उप्रत्ययान्तानां रोर्विसर्ग इति विसर्गेणैव सिद्धिस्तथापि सजुष्शब्दस्य रत्वदीर्घार्थम् । तुसुसिसोस्तु रत्वे दीर्घार्थं सूत्रकरणम् ॥ ९८ ॥

(विसर्गनुम्स्थानिकानुस्वारव्यवधानेऽपि) क्विलात्परस्य सस्य षः(ख) ॥ दोःषु–दोष्षु–दोषसु ॥ स्वोर्वि हसे । पिपठीः, पिपठिषौ । पिपठीर्भ्याम् । पिपठीःषु ॥ विविट्–विविड्, विविक्षौ, विविक्षः ॥ तट्–तड्, तक्षौ, तक्षः । गोरट्–गोरड्, गोरक्षौ, गोरक्षः ॥ तक्षिरक्ष्योः संयोगान्तलोप इत्येके । तक् तग् ॥ गोरक्–गोरग् ॥ ५९ ॥

(सु०) विसर्गनुम्स्थानिकानुस्वारव्यवधानेऽपि ॥ क्विलात्परस्य सस्य षः ॥ क्विलादिति पञ्चमीनिर्देशाद्व्यवहितस्याप्राप्तौ वचनम् । एतद्व्यवधानेऽपि आभ्यां परस्य सस्य षः स्यात् । सुपि रत्वविसर्गयोः कृतयोः शमे वेसि विकल्पात् पक्षे सकार-

---

डत्वमपि विधाय षड्णामित्युदाहरन्ति। गौणत्वे तु प्रियषषः' प्रियषषामित्यत्र यथा लुग्नुटौ न भवतस्तथा जशूश्सोर्लुक् 'ष्ण' इत्यत्र प्रतिपादितम् । प्राधान्ये स्त एव परमषट् परमषण्णामिति षट्स्विति । षष् सु इत्यत्र डत्वे टत्वे 'टोरन्त्यादिति षत्वनिषेधः । ननु च तत्र पदान्ताट्टोरित्युक्तम् न चात्र टवर्गः पदान्तमित्याशङ्कायां वक्तव्यं क्वचित्पदान्तेति । इदं च टोरन्त्यादित्यत्रैव माधवीटीकायां प्रतिपादितम् ।

(क) दोषामिति । 'षोड' इत्यस्यापवादः । बहुवचनमाद्यर्थम् । तेन पिपठिषादीनां संग्रहः। इह च 'रोरात्रिषु' इत्यतो रोऽनुवर्तते । स च दोषामिति षष्ठीनिर्दिष्टत्वादन्त्यादेशः।रस इति 'वसां रसे' इत्यतोऽनुवर्त्तते । पदान्ते चेति । सूत्रान्तरमेवैतदनुवर्त्तते । 'दोष्ण' इति । 'अल्लोपः स्वरे इत्युपधालोपः। अदुपधत्वविधानं तु ङौ वेङ्योरित्यल्लोपाभावपक्षे दोषणीत्यदुपधश्रवणार्थम् ।

(ख) विसर्गनुमिति । क्विलादिति पञ्चमीनिर्देशेन व्यवहितस्य दन्त्यसकारस्य मूर्द्धन्यषकाराप्राप्तौ विधानमिदम् । एतद्व्यवधानेऽपि सस्य षः स्यादित्यर्थः ।

स्तस्य षत्वम् । सुपः सस्य तु ष्टुत्वम् । दोष्षु । विसर्गपक्षे विसर्गनुमिति षत्वम् । दोः,षु । नाम्नो न इति नलोपे दोष्सु ॥ नुम्स्थानिकानुस्वारेति व्याख्यानान्नेह । सुहिन्सु ॥ ंसु । पिपठिषतेः क्विपि यत इत्यललोपे कृत्तद्धितेति स्याद्युत्पत्तौ पिपठिष् सि इति स्थिते परत्वाद्रेफे कृते सिलोपे च दीर्घः । पिपठीः ॥ विश प्रवेशने अस्मात्सः । 'नानिटि से' इति गुणाभावः । द्वित्वादि । विविक्षते । क्विप् स्कोरिति कलोपः । जबत्वचपत्वे । विविट्-विविड् ॥ तक्ष् तनूकरणे । अस्मात् क्विप् । स्कोरिति कलोपे तट्-तड् ॥ गां रक्षतीति क्विप् । स्कोरिति कलोपे गोरट् । गोरड् ॥ तक्षिरक्ष्योः संयोगान्तलोप इत्येके । स्कोरिति कलोपो न । किंतु संयोगान्तलोप इत्यर्थः ॥ ५९ ॥

(त०) पोपठारिति ॥ पठितुमिच्छति पिपठिषति । पिपठिषतीति क्विपि रुत्वे दीर्घे च पिपठीरिति ॥ ५९ ॥

(कलोपे कुत्वमसिद्धम्) पिपक्-पिपग् , पिपक्षौ, पिपक्षः । पिपक्षु ॥ एवं विवक् ॥ दिधक् ॥ सुपीः, सुपिसौ । सुपीःषु ॥ एवं सुतूः ॥ विद्वान्, (क) विद्वांसौ, विद्वांसः । हे विद्वन् ॥ ६० ॥

(सु०) **कलोपे कुत्वमसिद्धम्** ॥ स्कोरिति कलोपे कर्तव्ये चोः कुरिति कुत्वस्यासिद्धत्वं वक्तव्यम् । अन्यथा स्कोरिति कलोपः स्यादित्यर्थः ॥ पक्तुमिच्छतीति पिपक् ॥ संयोगान्तलोपः । वक्तुमिच्छतीति विवक् ॥ दह भस्मीकरणे । दादेरिति घः । आदिजबानामिति धः । दग्धुमिच्छतीति दिधक् ॥ इति षान्ताः ॥ पिस गतौ ॥ सुष्ठु पेसतीति सुपीः । तुस खण्डने । सुष्टु तोसतीति सुतूः । क्विबन्तः ॥ वेत्तीति । विदेर्वा वसुरिति शतृस्थाने वसुः । अदादित्वाच्छपो लुक् । अपित्तादिर्ङिदिति ङित्वान्नोपधागुणः । उदित्त्वान्नुम् । नसम्महत इति दीर्घः । संयोगान्तलोपस्यासिद्धत्वान्नलोपो न । विद्वान् ६०॥

वसोर्व उः ॥ वसोर्वकारस्य उत्वं भवति शसादौ स्वरे तद्धितयस्वरमतुप्वीपीकारे च (ख) ॥ विदुषः । विद्वद्भ्याम् । विद्वत्सु ॥ सेदिवान् । वस्योत्वे इडभावः सेदुषः । सेदिवद्भ्याम् ॥ ऊषिवान् । ऊषुषः । ऊषिवद्भ्याम् ॥ शुश्रुवान् । नुधातोः । शुश्रुवुषः । शुश्रुवद्भ्याम् ॥ महच्छन्दसाहचर्यादधातोर्न्स् गृह्यते । नेह । सुहिन्, सुहिन्सौ । सुहिन्भ्याम् । सुहिन्सु ॥ ध्वत् । ध्वसौ । वर्सा रसे । ध्वद्भ्याम् । एवं स्रत् ॥ ६१ ॥

(सु०) **वसोर्व उः** ॥ अत्रास्थनामित्यतः शसादाविति वाऽऽदीपोरित्यत ईईपोरितिचानुवर्तते तद्धितयस्वरमतुप्स्विति च । व्याख्यानात् । वसुक्वस्वोर्वकार उकारः स्यात् ॥

(क) विद्वानित्यत्र संयोगान्तस्यासिद्धत्वान्नलोपो न ।

(ख) अत्र केचित् । **वसोर्व उम्** । इति व इति कर्त्तरि प्रथमा । उम् इति कर्मणि द्वितीया वकारउत्वं प्राप्नोतीत्यर्थः । वकारे अकारोच्चारणं तत्सहितस्योत्वं यथा स्यादिति । **शसादौ स्वरे इति** । एतदन्वास्थ्नां शसादावित्यतोऽनुवर्तते । तत्राऽपि च महाशसादिर्गृह्यते । तेन ओदौतोरित्यत्र यः प्रत्ययः स्वरवदिति विभज्य यकारस्यापि स्वरवत्त्वाद्विदुष्यमित्यत्र तद्धितेऽपि भवति । तथा ईपि विदुषीति भवति इकारोऽत्र वेव्योरित्यनुवर्तते इति प्रियविदुषी इत्यत्र भवति ।

तद्धिते वैदुषः । अण् ॥ वैदुष्यम् । यण् । मतौ विदुष्मान् ॥ ईप्योर्विदुषी ॥ सस्वरस्य वस्योत्वम् । बवराणामिति पृथक् निर्देशात् । वसामिति दत्वम् । विद्वद्भ्याम् ॥ सस्व-देति सदः क्वसुः । द्विवचेति द्वित्वम् । पूर्वस्येति हसादिः शेषः । लोपः पचामित्येत्व-पूर्वलोपौ । द्वित्वे सत्येकस्वाराद्दितीट् । उदित्वान्नुम् । न्सम्महत इति दीर्घः । सेदि-वान् ॥ वस्योत्वे इडभावः । निमित्ताभावे नैमित्तिकस्याप्यभावः इत्युक्तत्वात् वकाराभावे इडभावः ॥ एवमुवासेति । यजामिति सम्प्रसारणं णबादौ पूर्वस्येति पूर्वस्य सम्प्रसारणं दीर्घत्वं वसादेरिति षः । ऊषिवान् ॥ शुश्रावेति शुश्रुवान् । नुधातोरित्युव् । सुश्रुवुषः ॥ सुष्ठु हिनस्तीति । न्सम्महत इति सूत्रे महत्साहचर्याद्धातोर्न्सन्तस्य न दीर्घः आधातोरि-त्यनुवृत्तेर्वा । ततश्च संयोगान्तलोपस्यासिद्धत्वान्नोपधादीर्घः । सुहिन् । टनादिति वा धुट् । सुहिन्त्सु ॥ ध्वंसते इति ध्वत् । स्रंसु ध्वंसु अवध्वंसने । ध्वंसु गतौ च । आभ्यां क्विप् नो लोप इति नलोपः । वसामिति दत्वम् । ध्वद्भ्याम् ॥ ६१ ॥

(त०) वसोर्ध्व उरिति ॥ अत्र वसुक्वस्वोः सामान्यग्रहणम् । एकानुबन्धग्रहणे द्व्यनुबन्धकस्य ग्रहणं नेति परिभाषा तु नेहाश्रीयते । उकारसहितस्य विधानात् । तथा हि विदेर्वसुरिति सूत्रेण शतुर्वसुरादेशो विधीयते । तत्र स्थानिनः शतुः ऋत्वादेव नित्कार्ये सिद्धे पुनरादेशे उदित्करणं व्यर्थमिति ज्ञापयति । वसुग्रहणेन क्वसोऽपि ग्रहणं यथा स्या-दिति । अल्लोप इति सूत्राच्छसादाविति लभ्यते तत्रादिशब्दः प्रकारे । तेन यदिग्रहेऽ-पीत्याह ॥ तद्धितेत्यादि ॥ ६१ ॥

पुंसोऽसुङ् ॥ पुंसोऽसुङादेशः पुंसि पञ्चसु शौ च ॥ पुमान् , पुमांसौ पुमांसः । हे पुमन् । पुंसः । पुंभ्याम् । पुंसु(क) ॥ वेधाः, वेधसौ । हे वेधः । वेधोभ्याम् ॥ ६२ ॥

(सु०) पुंसोऽसुङ् ॥ सा नः पुंस इत्यतो मण्डूकप्लुत्या पुंस इत्यनुवर्तते । न्सम्महत इत्यतः सिंहावलोकितन्यायेन शावित्यपकृष्यते । पुंलिङ्गस्य पुम्स्शब्दस्य असुङ् स्यात् । पञ्चसु । ङित्वादन्तादेशः पातेर्डुम्सुरित्यौणादिकडुम्सुप्रत्ययस्योदित्वात् तेनैव नुमि सिद्धे असुङ उकार उच्चारणार्थः । शौ प्रियपुमांसि । अधाविस्युक्तत्वात् न्सम्महत इति न दीर्घः । हे पुमन् ॥ सुपि संयोगान्तलोपे मोऽनुस्वारः । नुम्स्थानिकानुस्वारव्य-वधानेऽपीत्युक्तत्वान्न षत्वम् । पुंसु ॥ विधाञो वेध चेत्यसुप्रत्ययः । अत्वसोरिति दीर्घः । वेधाः । विश्वसृट् ॥ ६२ ॥

(त०) पुंसोऽसुङिति अत्र न्सम्महत इति सूत्रात्सिंहावलोकितेन शौ चेत्यप-

(क) अयमत्र विशेषोऽस्ति । तदुक्तं सारस्वते । असम्भवे पुंसः कक् सौ । वेदान्तैकवेद्यस्याऽऽत्मनो बहुत्वासम्भवेऽर्थे वाच्ये सति पुंस्शब्दस्य सुपि परे कागमो भवति । अयमर्थः—वेदान्तैकवेद्यस्यात्मनः "एकमेवाद्वितीयं, 'नेह नानास्ति किञ्चन" इत्यादिभिरेकत्वेन प्रतिपादितस्य पुंसः—बहुषु बहुवचनमिति बह्वर्थवाचित्वे विहितबहुवचनासम्भवः इत्यर्थः । पुंक्षु । ननु पुंक्ष्वित्यत्र मकार एव संयोगादिर्न सकारस्त-र्हि कथं लोपः । 'पुंक्षु' अत्र 'स्कोराद्योश्च' इत्यनेन संयोगाद्यस्य लोपे प्राप्ते मकारस्यैव लोपो भवेन्न तु स-कारस्य । आदित्वाभावात् । संयोगाद्यस्तु पुंस इत्यत्र शिरसि मकार एव तस्मादादित्वं द्विविधम् । मुख्यमा-पेक्षिकं च । अत्र सस्यादित्वमापेक्षिकम् । पुंस्क इत्यत्र ककारापेक्षया मकार आदिरिति सकारस्यैव लोपः ॥

लुप्यते। सो नः पुंस इत्यतो मण्डूकप्लुत्या पुंस इत्यनुवर्तते ॥ उकारस्तूच्चारणार्थः । 'पातेर्डुम्सुः' इति प्रत्यये उदित्त्वेन नुम्सिद्धेः । पुंसः पुंसीति सिद्धेऽसुङ्करणमन्यतोऽपि विधानार्थम् । तेन जराशब्दे सिद्धम् । पुंस्विति ॥ संयोगान्तलोपे मोऽनुस्वारः । विसर्गं नुमिति न षत्वं नुम्स्थानिकानुस्वारस्यैव ग्रहणात् ॥ ६२ ॥

उशनसाम् ॥ उशनस्पुरुदंशस्अनेहसां सेरधेर्डा ॥ उशना:, उशनसौ, उशनसः ॥ ६३ ॥

उशनसो धौ नान्तता अदन्तता वा वाच्या ॥ हे उशनन्—हे उशन—हे उशनः । उशनोभ्याम् । उशनस्सु ॥ ६४ ॥

(सु०) **उशनसाम्** ॥ बहुवचनमाद्यर्थम् ॥ सेर्डाऽधेरित्यनुवर्तते । 'उशना भार्गवः कविः' इत्यमरः ॥ धौ नान्तत्वेऽदन्तत्वे सान्तत्वे च रूपत्रयं भवति । उक्तं च । 'सम्बोधने' इत्यादि(क) । सान्तम् । सस्य नकारादेशे नान्तम् । सस्य लोपेऽदन्तम् । इगन्ते इदन्ते उदन्ते ऋदन्ते च क्लीबे धौ गुणमिति ॥ पुरु बहु दंशतीति पुरुदंशा इन्द्रः ॥ नञि हन एह चेत्यसुप्रत्यये अनेहाः कालः ॥ ६३ ॥

(त०) **उशनसामिति** ॥ बहुवचनमाद्यर्थम् ॥ अत्राहुः । उशनेत्यत्र संज्ञापूर्वकस्यालोपधाया इति दीर्घो नेति । अत्रेदमवधेयम् । इयं शङ्का सिलोपेऽकृते कृते वा । नाद्यः । तत्र नान्तत्वाभावात्सान्तस्यैव दर्शनात् । द्वितीयेऽपि नान्तस्य नाम्न इति व्याख्यानम् । तत्र नित्यमिति सम्बन्धात् नित्यं नान्तस्य इति लाभात् । प्रकृते तदभावादेव नेति विचारः ॥ ६३ ॥

सौ सः ॥ अदसो दस्य सः सौ (ख) ॥ ६५ ॥

(सु०) **सौ सः** ॥ मत्वापवादः ॥ ६५ ॥

(त०) **सौ स इति** ॥ अत्र स्यदादेष्टेरिति सूत्रात्स्यदादेरित्यस्यानुवृत्तेर्विवरणे त्यदा-

---

(क) "सम्बोधने तूशनसस्त्रिरूपं शान्तं तथा नान्तमथाप्यदन्तं माध्यन्दिनिर्वष्टि" इत्यादिकारिकाप्रमाणेन त्रिरूपत्वं साध्यम् ।

(ख) **साविति** । मत्वापवादः । साविति सेर्ग्रहणं, न सुपः सोः सैषादिति निर्देशात् उभयोरपि ग्रहणे सीत्येवावक्ष्यत इह स्यदादेरित्यनुवर्तने । दस्येति च । ततश्च स्यदादीनां दकारस्य सौ परे सत्वमित्यर्थः । ननु चैवं द्विशब्दस्यापि प्राप्नोति । असिपरत्वान्न भविष्यति । इह तर्हि प्राप्नोति । द्वावात्मन इच्छति द्वीयति । ततोऽप्रत्ययः । यत इति या लोपः । द्वीरिति । अत्र स्वोरिति प्राप्नोति । न । व्यवधानात् । इहापि तर्हि व्यवधानान्न स्यात् । असाविति । अस्त्येव अ...र्णेनात्रापि व्यवधाने वचनं तु माया इत्यादावावन्ते चरितार्थं त्यदाद्यत्वं तु सावकाशत्वान्नान्ते सत्वबाधकमिति चेत्, सत्वमपि सावव्यवहितानां त्यदादीनां दस्य सत्वमिति पक्षेऽनन्त्ये सावकाशं द्वयोश्च सावकाशयोः परत्वादन्त्यस्य सत्वमेव स्यादिति सायेत्यत्रानदन्तत्वादाप् न स्यात् । एवं तर्हि दस्येत्यकारस्तन्त्रमिति द्विशब्दस्यान्त्यस्य च दमात्रस्य केवलव्यञ्जनस्य न भवति । अतएव चेदं सत्वमदस एव भवति । तत्रैव हि साकारो दकारो नान्यत्र त्यदादावित्यभिप्रेत्याह सौ परे । अदसो दकारस्येति सौ परेऽव्यवहितस्यादसोदकारस्येत्यर्थः । नन्वेवमपि स्त्रियां दोषः । तत्र हि त्यदाद्यत्वे कृते परत्वादापि चानदन्तत्वादस्य न सत्वं स्यात् मैवं प्रकृतिप्रत्ययाश्रितत्वेनान्तरङ्गसत्वमित्यादौ स्यात् । आप्तु बहिरङ्गः । असो माणवकीत्यादौ बहिर्भूतशब्दान्तरसन्निधानेनैव प्रतीयमानस्त्रीत्वाश्रितत्वात् ।

देर्दस्येत्येवोचितं न त्वदस इति । यदि तु त्यदादेरदस इति व्याख्यायते तदा न दोषः ॥ त्यदादेः किम् । वन्दः । नन्दः ॥ दस्य किम् । यः ॥ सौ किम् । अमूनि ॥ स इत्यकार-सहितत्वान्नान्यस्य ॥ ६५ ॥

सेरौ ॥ अदसः सेरौर्भवति ॥ असौ । दस्य मः (क) ॥ ६६ ॥

(सु०) **सेरौः** । अदसः परस्य सेरौः स्यात् ॥ असौ । अत्र वाशब्दमनुवर्त्य व्यवस्थितविकल्प आश्रयणीयस्तेन अकसहितस्यादसः सर्वोत्वमौत्वाभावे सात्परस्य उत्वं च वक्तव्यम् । असकौ असुक इति । स्त्रियाम् असकौ । औत्वाभावे असुका ॥ अमुक इति अमुको इति च प्रयोगोऽसाधुरेव । अथ कथममुकगोत्रस्याऽमुकशर्मण इति अपभ्रंश एवायमिति प्राञ्चः । अमुकशब्दोऽव्युत्पन्नं नाम वृत्तिविषये एव प्रयुज्यते इत्यन्ये ॥ ६६ ॥

(त०) **सेरौरिति** ॥ ननु स्त्रियामकान्तस्यासकाविति कथम् । काप्यत इतीत्वेन भवितव्यमिति चेत्सत्यम् । ङेरौ ङिदित्यनुवृत्तेर्ङित्त्वाट्टिलोपे रूपसिद्धेः । अत्र वेत्यनुवृत्तेस्तस्य व्यवस्थितत्वाश्रयणात् साकादसः सेरौत्वं वा । औत्वाभावे सादुत्वं च । असुकः । तन्मध्यपतितस्य तद्ग्रहणेन ग्रहणात् साकस्यापि त्यादिकार्यम् । कथममुकगोत्रस्य अमुक गोत्र इति चेत् ॥ अपभ्रंश एवायमिति दीक्षिताः ॥ रामाश्रमास्तु । अमुकशब्दोऽव्युत्पन्नं नाम वृत्तिविषये प्रयुज्यते । केवलस्य तु अदकस्शब्दस्यैव प्रयोगः । अमुक इत्येकवचने तु यदि शिष्टप्रयोगस्तदा साधुः । नो चेत् असाधुरेव । अमुकशब्दस्य तु वृत्तिविषये प्रयोगाभ्युपगमो युक्त एवेति । यद्यपि सामान्येऽकः स्यादित्यकश्चेति व्युत्पादितस्तथाऽपि तस्य प्रयोगः समास एव न स्वतन्त्रस्येत्याहुः । तत्रेदमवधेयम् । इत्थं हि महानिबन्धानामृषिवाक्यानां च गतौ सत्यां नाप्रामाण्यमापादनीयमिति स्वोक्त्यैव शिष्टप्रयोगनिष्पत्तिश्चेत्पुनर्यदि विशिष्टप्रयोग इत्यादिसंशयोक्तिर्विरुद्धेति ॥ ६६ ॥

मादू ॥ अदसो मात्परस्य उश्च ऊश्च भवति (ख) अमू ॥ ६७ ॥

(सु०) **मादू** ॥ उश्च ऊश्चानयोः समाहार ऊ । संज्ञापूर्वकत्वान्न ह्रस्वः ॥ ६७ ॥

(क) **सेरौ** । अत्रादस इति सूत्रमनुवर्तत इत्याह अदसः सेरिति । अदसः सम्बन्धिनः सेरित्यर्थः । **असाविति** । अदस् सीत्यत्र त्यदाद्यत्वे दस्य सत्वे अनेन सेरौत्वे ओ औ औ ।

ननु चात्र सम्बोधने घेरौत्वादेशस्य तद्भावात् समानाद्धेरिति लोपः प्राप्नोति यदि प्रयोगोस्ति मैवम् । तत्र हि तस्मात्सीति सिः प्रकृत इति सेरेव घेर्लोपादौकारे न प्रसक्तः एवमपि स्त्रियामपि घिरिः प्राप्नोति तत्रापि इसेप इत्यतः सेरनुवृत्तेः सेः स्वरूपसम्बन्धवान् यो घिरित्यर्थान्न दोषः तथापि इतीकारादेशः प्राप्तः लाक्षणिकत्वादौकारस्य न भवति । असकावित्यत्र तु सामान्येऽदस इति कप्रत्ययस्यादसोऽवयवभूतत्वात्सेरन्तरङ्गत्वादौत्वे तत आपि कप्रत्ययस्यादि वस्यदाद्यत्वे सत्वे चास का औ इति स्थिते काप्यत इतीत्वं प्राप्तं यथा न भवति तथा तत्र वक्ष्यामः ।

(ख) मा । इहाप्यदस इत्यनुवर्तते । इत्याह—अदस इति । ऊ इति ह्रस्वदीर्घयोरुवर्णयोर्द्वन्द्वैकत्वेन निर्देशः । ह्रस्वस्तु संज्ञापूर्वकस्य विधेरनित्यत्वान्न भवति । अविभक्तिको वा निर्देशः । छान्दसो वा विभक्तेर्लुक् । ननु दीर्घ एवायं कुतो न स च भवन्नान्तरतम्यात् स्थानिनमपि दीर्घमाक्षेप्स्यति । इति ह्रस्वस्याप्रसङ्गः । मैवं । व्याख्यानाद्विशेषप्रतिपत्तिः । तथा हि मादिति पञ्चम्या ततः परः स्थानी आक्षिप्यते । स च ह्रस्वो दीर्घश्च भवति । द्वयोश्च स्थानिनोरादेशावपि द्वावेव युक्तौ भवितुमित्यत आह—**ह्रस्वस्य ह्रस्व इत्यादि** । इति चक्रधराख्यटिप्पण्यां हसान्तपुंल्लिङ्गाः ॥ १० ॥

(त०) मादू इति ॥ मात उ ऊ इति च्छेदः। समाहारे ह्रस्वत्वापत्तेः । यद्वाऽस्तु समाहारः । ह्रस्वस्तु न संज्ञापूर्वकत्वेनानित्यत्वात् । अत्राहुः । मादिति पञ्चमीनिर्देशात्परः स्थानी लभ्यते । स च हसः स्वरश्च । मात्परस्य हसल्यासम्भवात्स्वर एव गृह्यत इति । अत्रेदमवधेयम् । अमुमुयङ् इत्यत्र मात्परस्य रेफरूपहसस्योत्वदर्शनात् हसल्यासम्भवात्स्वर एव गृह्यते इत्युक्तिर्निर्मूला । तथा चोक्तं दीक्षितैः । ह्रस्वव्यञ्जनयोर्ह्रस्वः दीर्घस्य तु दीर्घ इति । व्यञ्जनस्यासम्भवे कथमिदं सङ्गच्छते इति ॥ ६७ ॥

एरी बहुत्वे ॥ अदस एकारस्येर्भवति बहुत्वे सति ॥ जसि । अमी । अमुम् , अमू , अमून् । अमुना, अमूभ्याम् , अमीभिः । अमुष्मै । अमुष्मात् । अमुष्य, अमुयोः, अमीषाम् । अमुष्मिन् , अमुयोः, अमीषु ॥ ६८ ॥

इति हसान्ताः पुँल्लिङ्गाः ॥ १० ॥

(सु०) एरी बहुत्वे ॥ अदसः किम् । ते ॥ एः किम् । अमून् ॥ बहुत्वे किम् । अमुयोः ॥ ६८ ॥ इति सुबोधिन्यां हसान्ताः पुँल्लिङ्गाः ॥ १० ॥

(त०) एरी बहुत्वे इति बहुत्वे किम् । अमुयोः ॥ ६८ ॥

श्रीरामकरपौत्रेण लोकेशकरशर्मणा । कृतायामिह टीकायां पुँल्लिङ्गोऽगाद्धसान्तकः ॥

इति तत्त्वदीपिकायां हसान्ताः पुँल्लिङ्गाः ॥ १० ॥

अथ हसान्ताः स्त्रीलिङ्गाः ॥ ११ ॥

नहो धः ॥ नहो हस्य धो भवति धातोर्झसे परे नाम्नश्च रसे पदान्ते च (क) ॥ उपानत्–उपानद् । उपानद्भ्याम् । उपानत्सु ॥ उष्णिक्–उष्णिग् , उष्णिहौ, उष्णिहः । उष्णिग्भ्याम् । उष्णिक्षु ॥ द्यौः, दिवौ । द्युभ्याम् । द्युषु ॥ गीः, गिरौ । गीर्भ्याम् । गीर्षु ॥ एवं पुर्धुरादयः । चतस्रः । प्रियचत्वाः, प्रियचत्वारौ, प्रियचत्वारः । हे प्रियचत्वः ॥ १ ॥

(सु०) नहो धः ॥ ढस्यापवादः । हो ढ इत्यतो हस्येत्यनुवर्तते । उपपूर्वान्नहेः क्विप् । नहिवृतीति पूर्वपदस्य दीर्घः । उपनह्यते इति उपानत् ॥ उत्पूर्वात् ष्णिह प्रीतावित्यस्मात् क्विप् ॥ निपातनाद्धलोपषत्वे । दिशामिति हस्य घः । जबत्वचपत्वे । उष्णिक्–उष्णिग् ॥ 'दिव औ' इत्यौत्वे द्यौः । 'ऊ रसे' इत्युत्वे द्युभ्याम् ॥ 'गॄ–निगरणे ।' अस्मात् 'गॄ शब्दे' इत्यस्माद्वा क्विप् । ऋत इरितीर् । 'य्वो विं हसे' इति दीर्घः । गीः ॥

(क) ननु चास्मिन् सूत्रे वसां रसे इत्यस्मात् परे भिदपामतोऽनुवर्तमानदविधिनाऽपि उपानदित्यादि च सेत्स्यत्येव । तथा चायमर्थः । धग्रहणं न कर्तव्यं भवति । प्रक्रियालाघवं च । न च तथा सति हकारानुवृत्त्या सर्वादेशो दः स्यादिति वाच्यम् । षष्ठीनिर्दिष्टस्यैवान्तस्य हस्य सिद्धेः । एवं तर्हि नद्धमित्यत्र तथोर्धः इति झभान्तत्वात् परस्य तस्य धत्वं यथा स्यात् 'दस्तस्य नोदश्चेति' नत्वं माभूदिति । इह धत्वं विधीयते ।

एवं 'पृपालनपूरणयोः ।' पोष्ठरित्युर् । पूः ॥ 'धुर्वी हिंसायाम् ।' क्विपि वचयोरिति वलोपः । धूः ॥ त्रिचतुरोरिति । चतस्रादेशः । न तिसृचतसृरोरिति न दीर्घः । चतसृणाम् ॥ प्रियाश्चत्वारो यस्याः सेति । यदा स्त्रियां मुख्यावित्युक्तत्वान्न चतस्रादेशः । चतुरामित्याम् । प्रियचत्वाः । धावमित्यम् । हे प्रियचत्वः ॥ १ ॥

(त०) नहो ध इति ॥ तथदानामन्यतमस्तु नोक्तः नद्ध इत्यसिद्धेः ॥ उपानदिति ॥ उपपूर्वान्नहेः क्विपि नहिवृतीत्यादिना पूर्वस्यात्वम् । अत्रेदं विभाव्यम् ॥ सुष्ठु अनड्वानस्यामिति बहुव्रीहौ स्वनड्वानित्येव न तु नदादित्वादीपि स्वनड्वाहीति । अनुपसर्जनादिति तन्निषेधात् ॥ उष्णिगिति ॥ उत्पूर्वात्ष्णिह प्रीतावित्यस्मात्क्विपि निपातनाद्दलोपषत्वे ॥ गीरिति । गॄ निगरणे शब्दे च । क्विपि । ऋत इरिति इत्वम् । र्वोर्वि हल इति दीर्घः ॥ पूरिति ॥ पॄ पालनपूरणयोः । क्विपि पोरुरित्युत्वम् ॥ १ ॥

इयं स्त्रियाम् ॥ इदमः स्त्रियामियं सौ (क) । इयम् , इमे, इमाः । अनया, आभ्याम्, आभिः । अस्यै । अस्याः । अनयोः, आसाम् । अस्याम् । आसु ॥ अन्वादेशे । एनाम् , एने, एनाः । एनया । एनयोः ॥ स्रक्–स्रग् , स्रजौ । स्रग्भ्याम् । स्रक्षु । समित्–समिद्, समिधौ, समिधः । समिद्भ्याम् । समित्सु ॥ स्या, स्ये, स्याः ॥ एवम् । तद् । यद् । एतद् । किम् ॥ वाक्–वाग् , वाचौ । वाग्भ्याम् । वाक्षु ॥ ककुप्–ककुब् , ककुभौ । ककुब्भ्याम् । ककुप्सु । त्वक्–त्वग् , त्वचौ, त्वचः । त्वचम् । त्वग्भ्याम् ॥ ऋक्–ऋग् , ऋचौ, ऋचः । ऋचम् । ऋग्भ्याम् । ऋक्षु । अप्शब्दो नित्यं बहुवचनान्तः । आपः । अपः ॥ २ ॥

(व०) इयं स्त्रियाम् ॥ इदमोऽयमित्यतः इदम इत्यनुवर्तते । सौ स इत्यतः साविति च । त्यदाद्यत्वे आप् मत्वम् । औरितीत्वम् । इमे । अन टौसोरित्यनादेशः । टौसोरित्येत्वम् । अनया । हल्य इत्यत्वम् । आभ्याम् । अन्वादेशे इदमेतदोरित्येनत् । शेषं सर्ववत् ॥ सृजेः क्विप् अमागमश्च निपातितः । दिशामिति कुत्वम् । स्रक्–स्रग् ॥ 'इध्ममेधः समित् स्त्रियाम्' इत्यमरः ॥ त्यदाद्यत्वे आप् । त इति सः ॥ स्या ॥ वचेः क्विपि वचीति क्विपि परे दीर्घोऽसंप्रसारणं च । चोः कुरिति कः । वाक् ॥ आप्नोतेर्ह्रस्वश्चेति ह्रस्वश्चात् क्विप् । अप्तृन्नित्यादिना दीर्घः । आपः ॥ २ ॥

(त०) इयं स्त्रियामिति । अत्रापि स्त्रियामिति ग्रहणं लुकि न तन्निमित्तमित्यस्यानित्यत्वे लिङ्गम् । अन्यथा इदमित्यत्र सेरभावादेवाप्राप्तौ स्त्रियांग्रहणमनर्थकं स्यात् ॥ २ ॥

भि दपाम् ॥ अप्शब्दस्य दत्वं भवति भकारादौ विभक्तौ ॥ अद्भिः । अद्भ्यः । अपाम् । अप्सु ॥ दिक्–दिग् , दिशौ, दिशः । दिग्भ्याम् । दिक्षु ॥

(क) इयमिति। आदेशविधानसामर्थ्यात् त्यदाद्यत्वाभावः हसान्तत्वात् सिलोपः । आभ्यामित्यादावाकारादेशे आ प् प्रातिपदिकन्यायेनाप्सहितस्य त्वकारादेशे अद्भीत्यत्राद्विति योगविभागादात्वे नेष्टसिद्धिः

त्विट्—त्विड्, त्विषौ, त्विषः ॥ दृक्-दृग्, दृशौ, दृशः ॥ सह जुषते इति सजूः, सजुषौ, सजुषः । सजूर्भ्याम् । सजूःषु ॥ आशीः, आशिषौ । आशीर्भ्याम् । आशीःषु । असौ, अमू, अमूः । अमूम् । अमूः । अमुया, अमूभ्याम्, अमूभिः । अमुष्यै । अमुष्याः अमूषाम् । अमुष्याम्, अमूषु ॥ ३ ॥

इति हसान्ताः स्त्रीलिङ्गाः ॥ ११ ॥

(सु०) भि दपाम् ॥ अपामिति बहुवचनं चिन्त्यम्(क) ॥ अष्टनः त्रेरितिवदेकवचनमेव युक्तम् । दिशेः क्विप् दिशामिति कुत्वम् । दिक्-दिग् ॥ त्विष दीप्ताविस्यस्मात् क्विप् । षो ड इति डत्वम् । त्विट् ॥ दृशेः क्विप् । दिशामिति कुत्वम् । दृक् ॥ जुषी प्रीतिसेवनयोरित्यस्माद् क्विप् । दोषामिति रः । य्वोरिति दीर्घः । सजूर्मित्रम् । शसे वेति वा सः । विसर्गनुम्स्थानिकेति षत्वम् । सजूःषु । ष्टुत्वम् । सजूष्षु ॥ आशासः क्वावित्युपधाया इत्वम् । घसादेरिति षः । आशीः । त्यदाद्यत्वे आप् । सौ स इति दस्य सः । 'सेरौः' इत्यौत्वम् । असौ । दस्य म इति मत्वम् । औ इतीत्वम् । एवं मादू इत्यूत्वम् । अमू ॥ ३ ॥ इति सुबोधिन्यां हसान्ताः स्त्रीलिङ्गाः ॥ ११ ॥

(त०) भि दपामिति ॥ भि दू आपम् इति च्छेदः । बहुवचनं चिन्त्यम् ॥ सुष्ठु-आपो यस्मिन्स स्वाप् स्वदन्नगामित्यश्रेष्टत्वात् प्राधान्यद्योतनायेत्यपि न । स्ववस्स्वतवस्मासां वैदिकानां संग्रहार्थमाद्यर्थं बहुवचनमिति माधवः । तन्नेति रामाश्रमः । अत्र-लौकिकानामेव प्रतिपाद्यत्वेन वैदिकप्रतिपादनस्यायुक्तत्वात् । अन्यथा अन्येषामपि व्युत्पाद्यत्वमिति न । न हि वैदिकव्युत्पादने यवनभाषायामिवापराधः(ख) । यदपि अन्यथेत्यादि तत्रापि देवासः देवेभिः गोनामित्यादीनां व्युत्पादनदर्शनात् । कथं न व्युत्पाद्यम् । यदपि लौकिकप्रयोगनिष्पत्तये इति मूलविरोधाच्चेति तत्रापि न मात्रपदं न वा एवपदं

(क) चिन्त्यमिति । अत्रोक्तं माधवेन सिद्धान्तरत्नावल्याम् । भिदपामित्यत्र अपामिति बहुवचनेनेतरेषामपि लाभः । तेन—स्वतवद्भिः स्ववद्भिः माद्भिः समुपवद्भिः इत्यादौ स्वतवस् स्ववस् मास् समुपषसामपि छन्दसि दत्वं सिद्ध्यति । अत्र चाह वासुदेवः । अपामिति बहुवचनान्तनिर्देशात् नित्यबहुवचनान्तस्यैव दत्वं स्यान्न गौणत्वे । तत्त्वदीपिकाकारेण यदुक्तमपामिति बहुवचनेन माधवोक्तरीत्या निरुक्तवैदिकप्रयोगसङ्ग्रहे प्रतिज्ञाभङ्गः प्रसज्येत । तन्न युक्तम् । भिदपामिति सूत्रं तु वाण्याः, नतु रामाश्रमादीनां केषाञ्चिदपि येन प्रतिज्ञाभङ्गप्रसक्तिः । न तु देव्युक्तिरस्ति यल्लौकिकप्रयोगसिद्धिरनेन भवति न तु वैदिकसिद्धिरिति । एकस्याः सूत्रमेकस्य प्रतिज्ञाभङ्ग इत्यतीव खेदः ॥ यत्त लोकेशकरेण सिद्धान्तितं वस्तुतस्तु 'ब्यपोदिति सूत्रणीयं लाघवात् वैदिकानां तु छन्दसि दृष्टानुविधिरिति । तदयुक्तम् । यदि वैदिकानां छन्दसि दृष्टानुविधिरित्येव सिद्धः । अत्र तदर्थं किञ्चिन्न वक्तव्यम् । तर्हि लौकिकानामपि माहेशपाणिन्यादिप्रक्रियायां सिद्धत्वात् तदप्यत्र न वक्तव्यमिति प्राप्तम् । एवं च सूत्रमात्रविधानं व्यर्थम् । अतो भिदपामिति बहुवचने पूर्वैर्यदुक्तं वैदिकप्रयोगसङ्ग्रहाय तत् । तदव्यभिचारि । ब्यपोदिति सूत्रकरणे न तेषां संग्रहो भवति । अतो बहुवचननिर्देशः समीचीनः ॥

(ख) ननु यवनभाषायां कोऽपराधः । "साधुभिर्भाषितव्यं नापभ्रंशितवै न म्लेच्छितवै" इत्यादिश्रुत्या 'न वदेत् यावनीं भाषां' मित्यादिस्मृत्या च यवनादिभाषाभाषणे प्रतिपातितो दोषः ।

इति हसान्ताः स्त्रीलिङ्गाः ।

वैदिकव्यवच्छेदकं दृष्टमस्ति। न च लौकिकपदाद्वैदिकनिरास इति वाच्यं लौकिकानां बहूनां व्युत्पादनेन तद्ग्रहणस्योचितत्वात्। छत्रिणो गच्छन्तीतिवत्। यदि माधवमतखण्डने आग्रह एव तदा इत्थम्। संज्ञिनिर्देशे प्रथममुचिते विपरीतनिर्देशादन्यत्रापीति वैदिकानां सिद्धिः। वस्तुतस्तु भ्यपोदिति सूत्रणीयम्। लाघवात्। वैदिकानां तु छन्दसि दृष्टानुविधिरित्येव सिद्धिरिति दिक्॥ आशिषाविति॥ आशासः क्वावुपधाया इतीत्वे घसादेरिति षत्वम्॥ ३॥

श्रीविद्यानगरस्थायिकोकेशकरशर्मणा। विहितायां हि टीकायां स्त्रीलिङ्गोऽगाद्धसान्तकः॥
इति तत्त्वदीपिकायां हसान्तस्त्रीलिङ्गाः॥ ११॥

अथ हसान्ता नपुंसकलिङ्गाः॥ १२॥

स्वनडुत्-स्वनडुद्, स्वनडुही, स्वनड्वांहि। पुनस्तद्वत्। शेषं पुंवत्॥ वाः, वारी, वारि। वार्भ्याम्। वार्षु॥ ऊ रसे। विमलद्यु, विमलदिवी, विमलदीवि॥ किम्, के, कानि॥ इदम्, इमे इमानि। अन्वादेशे एनत्, एने, एनानि॥ ब्रह्म, ब्रह्मणी, ब्रह्माणि। हे ब्रह्मन्-हे ब्रह्म॥ *॥

(सु०) सुष्ठु अनड्वान् यस्मिन् तत्। वसामिति दत्वम्। स्वनडुत्। शौ अनडुहश्चेत्याम्। नुमयम इति नुम्। स्वनड्वांहि। टादौ पुंवद्रूपम्॥ यमान्तत्वान्न नुम्। वारि॥ विमला द्यौर्यस्मिन् तद्विमलद्यु। औ परतोऽन्तर्वर्तिनीं विभक्तिमाश्रित्य पूर्वपदस्येवोत्तरखण्डस्यापि पदसंज्ञायां प्राप्तायामाह-उत्तरपदत्वे चापदादिविधौ प्रत्ययलक्षणं नेति। उत्तरशब्देनोत्तरपदमुच्यते। उत्तरपदस्य पदत्वव्यपदेशे कर्तव्ये प्रत्ययलक्षणं न भवतीत्यर्थः। पदादिविधौ तु प्रत्ययलक्षणं भवति। पदत्वाभावादुत्वं न। विमलदिवी(क)। लुकि नेति त्यदाद्यत्वं न। किम्॥ एवमिदम्। इदमेतदोरित्येनदादेशे एनत्॥ वेङ्योरित्यल्लोपो न। वकारमकारान्तसंयोगादुत्तरस्य नेति निषेधात्। ब्रह्मणी। धौ नपुंसकानामिति वा नस्य लोपः। हे ब्रह्मन्-ब्रह्म॥ *॥

अह्नः॥ अहन्शब्दस्य सो भवति रसे पदान्ते च (ख)॥ अह्नः।

(क) इयमत्राशंका। विमला द्यौर्यस्मिन् तत् विमलद्यु। द्विवचने विमलदिवी। इत्यत्र अन्तर्वर्तिपदमाश्रित्य 'ऊरसे' इत्यनेन उत्वं कथं नेति। पूर्वखण्डस्येवोत्तरखण्डस्यापि पदत्वमस्ति। अस्या उत्तरम्। 'उत्तरपदत्वे चापदादिविधौ प्रत्ययलक्षणं ने'ति। अयमर्थः। उत्तरपदस्य पदत्वव्यपदेशे कर्त्तव्ये प्रत्ययलोपे प्रत्ययलक्षणं न भवतीति। पदादिविधौ तु प्रत्ययलक्षणं भवतीति 'विमलदिव्औ' इत्यत्र औ परत उत्तरखण्डस्य पदत्वाभावादुत्वं न परन्तु पदादिविधौ प्रत्ययलक्षणं भवतीति बोध्यम्।

(ख) ननु 'रोऽरात्रिषु' इत्येकमेव योगं कृत्वाऽपि र एव विधीयताम्। मैवम्। अहोभ्यामित्यादौ विसर्गस्य वार्भ्यामिति बद्र इति पुना रं इति प्राप्नोति। तथा हेदीर्घाहो निदाघेत्यत्रापि रं एव श्रूयेत। यथा न्यासे तु नास्ति दोष इति 'रो रात्रिष्विति सूत्रेऽप्युक्तमस्ति। इति माधवः। 'अह्नः सः' इति पाठान्तरम्। कुत्र चित् सारस्वतप्रक्रियायामिदमाकारसूत्रमुपलभ्यते। नान्तादन्तयोः छन्दसि क्ङियोर्वा लोपः। छन्दस्यागमजानागमजयोर्लोपालोपौ च वक्तव्यौ। तेन-परमे व्योमन् सर्वा भूतानि इति॥ इतः सारस्वते इदमधिकमस्ति।

अह्नी—अहनी, अहानि । अह्ना । अहोभ्याम् । कर्म, कर्मणी कर्माणि ॥ एवं चर्मन्वर्मन्धन्वन्नादयः ॥ दण्डि, दण्डिनी, दण्डीनि ॥ स्रग्वि, स्रग्विणी, स्रग्वीणि । वाग्मि । वाग्मिनी, वाग्मीनि ॥ बहुवृत्रह, बहुवृत्रघ्नी—बहुवृत्रहणी, बहुवृत्रहाणि ॥ बहुपूष, बहुपूष्णी—बहुपूषणी, बहुपूषाणि ॥ बह्वर्यम, बह्वर्यम्णी—बह्वर्यमणी, बह्वर्यमाणि ॥ असृक्—असृग्, असृजी, असृञ्जि । शसादौ वाऽसन् । असानि । अस्ना । असभ्याम् ॥ ऊर्क्—ऊर्ग्, ऊर्जी, ऊर्न्जि ॥१॥

(सु०) अहः ॥ नस्य विसर्गविधानं युक्तम् । सस्यापि विसर्गविधानावश्यकत्वात् । तदन्तेऽपीष्टं सत्वम् । दीर्घाणि अहानि यस्मिन् स दीर्घाहाः निदाघः । दीर्घाहन् सि इत्यत्र हसेप इति सिलोपे नोपधाया हवि दीर्घं च कृते ततः सकारः । वेङ्योरिति वाऽल्लोपः अह्नी—अहनी । 'अल्लोपः स्वरे' इत्यल्लोपः । अह्नः । भ्यामि सत्वे कृते विसर्गः । 'हबे' इत्युत्वम् ओत्वं च । अहोभ्याम् ॥ दण्डोऽस्यास्तीति । मान्तोपधादितीन् । नाम्नो न इति नलोपः । दण्डि । दण्डिनी । इनामिति दीर्घः दण्डीनि । स्रगस्यास्तीति विन् । स्रग्वि ॥ वागस्यास्तीति ग्मिन् । वाग्मि । बहवो वृत्रहणो यस्मिन् तत् । नाम्नो न इति न लोपः । बहुवृत्रह । वेङ्योरित्युपधालोपे हनो घ्न इति घः । बहुवृत्रघ्ना । अल्लोपाभावे बहुत्रहणी । इनामिति दीर्घः । बहुवृत्रहाणि ॥ बहवः पूषाणो यस्मिन् तत् बहुपूष ॥ बहवोऽर्यम्णो यस्मिन् तत् बह्वर्यम् ॥ असूयतेरौणादिके ऋजप्रत्यये । असृज् । चोः कुरिति कुत्वम् । असृक् पाददन्तेत्यसन् । 'अल्लोपः स्वरे' इत्यल्लोपे अस्ना ॥ ऊर्जतीति ऊर्क् । शौ ऊर्न्जि । नरजानां संयोगः । बहव ऊर्जो यस्मिन् तत् बहूर्क् ॥ १ ॥

(त०) अह्न इति ॥ स्रोर्विसर्ग इत्यतो विसर्ग इत्यनुवर्तते । कश्चित्तु सस्तावित्यतः समनुवर्त्य समेव व्यधित तन्नेति रामाश्रमः(क) । सस्यापि विसर्गविधानावश्यकत्वेन विसर्गविधानस्यौचित्यात् । वस्तुतस्तु सस्येव व्यवहितत्वेन तदनुवृत्तेरेवौचित्यं युक्तं क्षत्यभावात् ॥ दीर्घाण्यहानि यस्मिन्निदाघे इति विग्रहे दीर्घाहन् सि इति स्थिते हसेप इति सिलोपे नोपधाया इति दीर्घं पश्चादह्न इति विसर्गः । दीर्घाहाः । धौ त्वधाविति निषेधाद्दीर्घाभावे विसर्ग एव । हे दीर्घाहः ॥ १ ॥

बहूर्जो नुम्प्रतिषेधः ॥ अन्त्यात्पूर्वो वा नुम् ॥ बहूर्जि—बहूर्ञ्जि । त्यत्—त्यद्, त्ये, त्यानि ॥ तत्—तद्, ते, तानि ॥ यत्—यद्, ये, यानि ॥ एतत्—एतद्, एते, एतानि ॥ अन्वादेशे एनत्—एनद्, एने, एनानि ॥ बेभित्—बेभिद्, बेभिदी ॥ २ ॥

(सु०) बहूर्जो नुम्प्रतिषेधः ॥ आन्त्यात्पूर्वो वा नुम् । बहूर्ज् शब्दस्य भाष्यमते नुम् ॥ इदमेतदोरित्येनदादेशः । एनत् । बेभिद्यते इति बेभित् । यङन्तात् क्विप् ॥ २ ॥

(त०) बहूर्ज इति ॥ बहूर्ञ्जि इति ॥ नरजानां संयोगः । शौ न नुमिति । वाऽनुवृत्तेर्व्यवस्थितत्वादिति भावः ॥ २ ॥

(क) कश्चिदिति । वासुदेवः । प्रसादटीकायां तदेव दृश्यते । सिद्धान्तरत्नावल्यामपि मतमेतदस्ति । किन्तु 'सावि'त्यतः सोऽनुवर्तते इति दृष्टत्वान्मतमिदं वासुदेवस्य खण्डितम् ।

(सयङन्तस्य शौ नुम्न) बेभिदि ॥ चेच्छिद्‌—चेच्छिद् । चेच्छिदी । चेच्छिदि ।

"गवाक्शब्दस्य रूपाणि क्लीबेऽर्चागतिभेदतः ।
असन्ध्यगागमाल्लोपैर्नवाधिकशतं मतम् ॥
स्यम्सुप्सु नव षड् भादौ षट्के स्युस्त्रीणि जश्शसोः ।
चत्वारि शेषे दशके रूपाणीति विभावय(क) ॥"

गवाक्—गवाग्—गोअक्—गो अग्—गोक्—गोग्—गवाङ्-गोअङ्—गोङ् । गोची—गवाञ्ची—गोअञ्ची—गोञ्ची । गवाञ्चि-गोअञ्चि—गोञ्चि । गवाक्षु—गोअक्षु—गोक्षु—गवाङ्क्षु—गोअङ्क्षु—गोङ्क्षु—गवाङ्ख्षु—गोअङ्ख्षु—गोङ्ख्षु ॥ तिर्यक्—तिर्यग् , तिरश्ची, तिर्यञ्चि । तिर्यङ्, तिर्यञ्ची, तिर्यञ्चि ॥ यकृत् , यकृती, यकृन्ति—यकानि । यक्ना—यकृता, यकभ्याम्—यकृद्भ्याम् ॥ एवं शकृत् ॥ ददत् , ददती, ददति—ददन्ति ॥ एवं जाग्रदादयः ॥ तुदत् ॥ ३ ॥

(सु०) सयङन्तस्य शौ नुम्न ॥ सश्च यङ् च सयङौ सयङावन्ते यस्य स सयङन्तस्तस्य सयङन्तस्य नाम्नो नुम् न शौ परे ॥ बेभिदि ॥ चेच्छिद्यते इति चेच्छित् । शौ चेच्छिदि ॥ सप्रत्ययान्तस्य शौ पिपठिषि ॥

"जायन्ते नव सौ तथाऽमि च नव भ्याम्भिस्भ्यसां सङ्गमे
षट्संख्यानि नवैव सुप्यथ जसि त्रीण्येव तद्वच्छसि ।

(क)(प्र० ए०)—गवाक्—गवाग्—गोअक्—गो अग्—गोक्—गोग्—गवाङ्—गो अङ्—गोऽङ् ।(प्र० द्वि०) गोची—गवाञ्ची—गोअञ्ची—गोऽञ्ची । (प्र० ब०)—गवाञ्चि—गोअञ्चि गोऽञ्चि ।

(द्वि० ए०)—गवाक्—गवाग्—गो अक्—गो अग्—गोक्—गोग्—गवाङ्—गो अङ्—गोऽङ् । (द्वि० द्वि०)—गोची—गवाञ्ची—गो अञ्ची—गोऽञ्ची । द्वि० ब०)—गवाञ्चि—गो अञ्चि—गोऽञ्चि ।

(तृ० ए०)—गोचा—गवाञ्चा—गो अञ्चा—गोऽञ्चा । (तृ० द्वि०)—गवाग्भ्याम्—गो अग्भ्याम्—गोऽग्भ्याम्—गवाङ्भ्याम्—गो अङ्भ्याम्—गोऽङ्भ्याम् । (तृ० ब०)—गवाग्भिः—गो अग्भिः—गोऽग्भिः—गवाङ्भिः—गो अङ्भिः—गोऽङ्भिः ।

(च० ए०)—गोचे—गवाञ्चे—गो अञ्चे—गोऽञ्चे । (च० द्वि०) गवाग्भ्याम्—गो अग्भ्याम्—गोग्भ्याम्—गवाङ्भ्याम्—गोअङ्भ्याम्—गोऽङ्भ्याम् । (च० ब०)—गवाग्भ्यः—गो अग्भ्यः—गोऽग्भ्यः—गवाङ्भ्यः गोअङ्भ्यः—गोऽङ्भ्यः ।

(प० ए०)—गोचः—गवाञ्चः—गो अञ्चः—गोऽञ्चः । (प० द्वि०) गवाग्भ्याम्—गो अग्भ्याम्—गोऽग्भ्याम्—गवाङ्भ्याम्—गो अङ्भ्याम्—गोऽङ्भ्याम् । (प० ब०)—गवाग्भ्यः गो अग्भ्यः गोऽग्भ्यः—गवाङ्भ्यः गो अङ्भ्यः—गोऽङ्भ्यः ।

(ष० ए०)—गोचः—गवाञ्चः—गोअञ्चः—गोऽञ्चः (ष० द्वि०) गोचोः—गवाञ्चोः—गोअञ्चोः—गोऽञ्चोः । (ष० ब०) गोचाम्—गवाञ्चाम्—गोअञ्चाम्—गोऽञ्चाम् ।

(स० ए०)—गोचि—गवाञ्चि—गोअञ्चि—गोऽञ्चि । (स० द्वि०)—गोचोः—गवाञ्चोः—गो अञ्चोः—गोऽञ्चोः । (स० ब०) गवाक्षु—गोअक्षु-गोऽक्षु—गवाङ्क्षु—गोअङ्क्षु—गोङ्क्षु—गवाङ्क्षु—गोअङ्क्षु—गोऽङ्क्षु ।

चत्वार्यन्यवचस्तु कस्य विबुधाः शब्दस्य रूपाणित·
ज्जानन्तु प्रतिभाऽस्ति चेन्निगदितुं षाण्मासिकोऽत्रावधिः ॥ १ ॥"

राजसभायामिति श्लोकः केनचित् कविनोक्तस्तदा कश्चित्पण्डितः श्लोकद्वयेन तदुत्तरमाह।

श्लोकः । "गवाक्शब्दस्य रूपाणि क्लीबेऽर्चागतिभेदतः ।
असंध्यगागमात्लोपैर्नवाधिकशतं मतम् ॥ १ ॥"

व्याख्या । गवाक्शब्दस्य रूपाणि अर्चागतिविभेदतः पूजागत्यर्थभेदेन नवाधिकशतं बोध्यानि। 'विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः' इत्युक्तत्वादेकत्वं शते ॥ अञ्चेर्गतौ नस्य लोपः । पूजायां तु नेत्याशयः । कीदृशम् । असंध्यगागमात्लोपैर्मतं गोरग् वेत्यगागमेन गोर्वेति प्रकृतिभावाल्लोपाभ्यां वाऽऽचार्याणां मननविषयीभूतम् । उक्तसंख्यामाह । प्रत्येकं स्यम्सुप्सु नव रूपाणि स्युः । भादौ षट्के षट् । जश्शसोस्त्रीणि । शेषेदशके प्रत्येकं चत्वारि । इति नवाधिकशतं रूपाणि त्वं विभावय जानीहि । शसे चपत्स्येति वार्तिकमनाश्रित्योक्तम् । अन्यथा त्रीणि रूपाणि वर्द्धन्ते इत्यर्थः ॥ १ ॥

गामञ्चतीति विग्रहे क्विप् गतौ नो लोप इति नलोपः । गो अच् सि इति स्थिते अगागमे चोः कुरिति कुत्वम् । गवाक् १ गवाग् २ । प्रकृतिभावे गोअक् ३ गोअग् ४ । अल्लोपे गोक् ५ गोग् ६ । पूजायां नस्य कुत्वेन ङः गवाङ् ७ । प्रकृतिभावे गोअङ् ८ । लोपे गोङ् ९ । अम्यप्येतानि रूपाणि । औ परतः अचेरित्यल्लोपे गोची १ पूजायां तु गवाञ्चि २ गोअञ्ची ३ गोञ्ची ४। शौ नुमयम इति नुम् । गतिपूजनयोस्त्रीण्येव सादृश्यात्। गवाञ्ची १ गोअञ्ची २ गोञ्चि ३ टापरतः अचेरित्यल्लोपः । गोचा १ पूजायाम् गवाञ्चा २ गोअञ्चा ३ गोञ्चा ४ । भ्यामि गवाग्भ्याम् १ गोअग्भ्याम् २ गोग्भ्याम् ३ पूजायाम् गवाङ्भ्याम् ४ गोअङ्भ्याम् ५ गोङ्भ्याम् ६ । भिसि परे गवाग्भिः १ गोअग्भिः २ गोग्भिः ३ पूजायाम् गवाङ्भिः ४ गोअङ्भिः ५ गोङ्भिः ६ । ङे परतः अचेरित्यल्लोपः । गोचे १ पूजायाम् गवाञ्चे २ गोअञ्चे ३ गोञ्चे ४। भ्यामि प्राग्वत्। भ्यसि गवाग्भ्यः १ गोअग्भ्यः २ गोग्भ्यः ३ पूजायाम् गवाङ्भ्यः ४ गोअङ्भ्यः ५ गोङ्भ्यः ६ । ङसौ गोचः १ पूजायाम् गवाञ्चः २ गोअञ्चः ३ गोञ्चः ४ । भ्यामि भ्यसि च प्राग्वत् ङस्परतो ङसिवत् । ओसि गोचोः १ पूजायाम् गवाञ्चोः २ गोअञ्चोः ३ गोञ्चोः ४ । आमि गोचाम् १ पूजायाम् गवाञ्चाम् १ गोअञ्चाम् ३ गोञ्चाम् ४ । ङौ गोचि १ पूजायाम् गवाञ्चि २ गोअञ्चि ३ गोञ्चि ४ । ओसि च गोचोः १ पूजायाम् गवाञ्चोः २ गोअञ्चोः ३ गोञ्चोः ४ । सुपि गवाक्षु १ गोअक्षु २ गोक्षु ३ पूजायाम् शमे ङ्णोरिति ङान्तानां कुकृपक्षे गवाङ्क्षु ४ । गोअङ्क्षु ५ गोङ्क्षु ६ कुगभावे गवाङ्षु ७ गोअङ्षु ८ गोऽङ्षु ९ । एवंनवाधिकशतं रूपाणि कुकृपक्षे शसे चपत्स्येति ककारस्य खकारेण त्रयाणामाधिक्यं ज्ञेयम् । अन्यत्र तु कुत्वस्यासिद्धत्वान्न खकारः । एवं द्वादशाधिकम् ॥ तिरोऽञ्चतीति । नो लोप इति नलोपः । चोः कुरिति कुः । तिर्यक् । सहादित्वात्तिरिः । औपरतः तिरश्चादय इति तिरश्चः । तिरश्ची । शौ नुमयम इति नुम् । तिर्यञ्चि । पूजायां तिर्यङ् ॥ यकृत्कालखण्डम् । शकृत् पुरीषम् ॥ शसादौ पाद्दन्तेति यकन्शकन्नादेशौ वा ॥ ददिति पुल्लिङ्गे उक्त एव । द्विरुक्तानां जक्षादीनां चेति वा नुम् । ददन्ति–ददति वा ॥ ३ ॥

(त०) सयङन्तस्येति ॥ सश्च यङ् च सयङौ तौ अन्तौ यस्य तस्येत्यर्थः । एतन्मूलं त्वनुवर्तितवाग्रहणस्य व्यवस्थितत्वम् ॥ गवाक्शब्दस्येत्यादि ॥ अर्चागतीत्यादि ॥ अर्चा पूजा गतिर्गमनं तयोर्भेदस्तस्मात् ॥ असंध्यगागमाल्लोपरिति ॥ गोर्वा गोरग्वेति विकल्पद्वयेन रूपत्रयमिति भावः ॥ स्यम्सुप्स्विर्वति ॥ प्रत्येकं नवनवेत्यर्थः ॥ भादाविति ॥ भकारादौ इत्यर्थः । तथा हि । सौ गत्यर्थतायामनलोपे असन्धौ अगागमे च पर्यायेण रूपत्रयम् । तत्रैव वाऽवसान इति कगयोविकल्पाद्रूपषट्कम् । पूजायां त्वसन्ध्यादिविकल्पे रूपत्रयमिति सङ्कलनया नव । एवमम्यपि । औङ्ग्ये तु गत्यर्थतायाम् अचेर्दीर्घ इत्यकारलोपे तन्निमित्तासंध्यादिरूपद्वयाभावादेकमेव । पूजार्थतायां तु नलोपाभावादलोपस्याभावेऽसन्ध्यादिविकल्पेन रूपत्रयम् । संकलनया प्रत्येकं रूपचतुष्टयम् । एवं टाप्रभृतौ स्वरादौ सर्वत्र प्रत्येकं रूपचतुष्टयं बोध्यम् । जश्शसोस्तु गत्यर्थतायां नलोपेऽपि पुनर्नुमा विशेषाभावात् प्रत्येकं त्रीण्येव । भ्यामादौ तु त्रीणि गतौ त्रीण्यर्चायामिति षट्षट् । सुपि तु पूजार्थतायां शसे ङ्णोः कुक्टुकाविति कुग्विकल्पेन षट् । गतौ तु त्रयमेवेति नव । कुक्पक्षे शसे चयस्येति विकल्पेन यदि खकारस्तदा रूपत्रयाधिक्यं भवत्येव ॥३॥

वाऽऽदीपोः शतुः ॥ अवर्णान्तात्परस्य शतुर्वा नुमीकारे ईपि च ॥ तुदती–तुदन्ती, तुदन्ति ॥ भात् । भाती–भान्ती, भान्ति ॥ ४ ॥

(सु०) वाऽऽदीपोः शतुः ॥ वा आत् ईपोरिति पदच्छेदः । आदिति पञ्चमन तु तपरत्वम् । ईश्च ईप् च ईपौ तयोरीपोः । शतुरित्यवयवषष्ठी ॥ ननु तुदती इत्यत्र शिति चतुर्वदित्यनेन कृतस्य तुदादेरित्यप्रत्ययस्य अदे इत्यनेनान्तरङ्गत्वाल्लोपे कृतेऽवर्णात्परत्वाभावान्नुम् न स्यात् । उच्यते । प्रत्ययलक्षणेन तत्परत्वमस्त्येव । न चैवं घ्नन्तीत्यादावतिप्रसङ्गः लुकि न तन्निमित्तमित्यनेन प्रत्ययलक्षणप्रतिषेधात् (क) ॥ भातीति भात् । भा दीप्तौ शतृप्रत्यये शित्वादप् । अदादित्वादपो लुक् ॥

(त०) वाऽऽदीपोः शतुरिति । वा आत् ईपोःशतुरिति च्छेदः । आदिति पञ्चमी । न तपरत्वम् । ईश्च ईप् च ईपौ तयोः ईपोरित्यत्र जबाभावेन उत्तरपदस्यान्तर्वर्तिविभक्त्या पदत्वं नेति ज्ञापितम् । तेन परमवाचावित्यत्र कुत्वाद्यभावः । अदीपोरादीपोरिति तु न च्छेदः । उत्तरसूत्रे नित्यग्रहणसामर्थ्यात् । तुदन्ती इत्यत्रावर्णस्य 'अदे' इत्यनेन लोपे कथमात्परत्वमिति चेत्सत्यम् । प्रत्ययलक्षणत्वेनेति गृहाण । अथ घ्नन्तीत्यत्रातिव्याप्तिरिति चेत् न । लुकि न तन्निमित्तमिति निषेधात् । अथ कथमग्रहणेन सानुबन्धकावर्णसामान्यस्य ग्रह० यवर्णसामान्यस्य ग्रहणं च "निरनुबन्धकग्रहणे न सानुबन्धकस्य ।" "अर्थवद्ग्रहणे नानर्थकस्य ।" "प्रत्ययाप्रत्ययया: प्रत्ययस्यैव ।" इति परिभाषात्रयेण निषेधादिति वाच्यम् । अप्याभ्यां नित्यविधानेन परिभाषात्रयस्याप्रवृत्तिज्ञापनात् ।

(क) इयमत्राशंका । तुद् शतृ, इत्यवस्थायां शिति चतुर्वदित्यनेन तुदादेर' इत्यप्रत्यये कृते 'अदे' इत्यनेनान्तरङ्गत्वादलोपे कृते प्रथमैकवचने तुदिति । अत्र पृच्छ्यते—तुदन्तीत्यत्रावर्णस्य 'अदे' इत्यनेन लोपेऽवर्णपरत्वाभावात्कथं शतुर्नुमागम इति अस्या उत्तरम् । प्रत्ययलोपे प्रत्ययलक्षणमिति प्रत्ययलक्षणत्वेन नुम् भवत्येवेति । पुनराशंक्य परिहरति—न चैवमिति । अयमर्थः । लुकि न तन्निमित्तमिति निषेधात् घ्नन्तीत्यत्र नाव्याप्तिरिति ।

न ह्यन्यथाऽप्याम्यामनेन विकल्पः प्राप्तो येन नित्यमित्यर्थवद्भवेत् । ईवग्रहणं तु सानुबन्धकस्य ग्रहणे निरनुबन्धकस्य ग्रहणं नेति ज्ञापनार्थम् ॥ ४ ॥

अप्श्यनोरान्नित्यम् ॥ अप्प्रत्ययश्यप्रत्ययसम्बन्धिनोऽवर्णात्परस्य शतुर्नुम् नित्यमीकारे ईपि च ॥ पचत् , पचन्ती, पचन्ति ॥ दीव्यत् , दीव्यन्ती, दीव्यन्ति ॥ स्वप् , स्वब् , स्वपी । न्सम्महत इति दीर्घः । स्वाम्पि । दीर्घो नेत्येके । स्वम्पि । स्वपा । भि दपाम् । स्वद्भ्याम् ॥ स्वाद्भिः ॥ जगत् , जगती, जगन्ति ॥ महत् , महती महान्ति ॥ धनुः, धनुषी ॥ ५ ॥

(सु०) अप्श्यनोरान्नित्यम् ॥ वाऽऽद्दीपोरित्यत ईपोरित्यनुवृत्तम् विकल्पे प्राप्ते नित्यविधानार्थमिदम् । अप् च यश्चाप्यौ तयोरात्परस्य शतुर्नित्यं नुम् । भवति ईईपोः ॥ ननु अप्श्यनोरित्यत्र 'चपा अबे' इति जबत्वं वक्तुं युक्तम् । उच्यते । ज्ञापनार्थमेवं निर्देशः। प्रत्यये परतः क्वचित्पदत्वं नेति । तेन तडित्वानित्यादि सिद्धम् (क) ॥ पचतीति पचत् । अप् कर्तरीत्यप् । अदे इत्यल्लोपः ॥ दीव्यतीति दीव्यत् । दिवादेरिति यः ॥ सुष्ठु आपो यस्मिन् सरसि तत् स्वप् । ऋक्पूरित्यप्रत्ययो न । 'न पूजने' इति निषेधात् । शौ नित्यत्वात् नुमः प्राक् दीर्घः । स्वाम्पि । तदन्ते दीर्घोऽस्य नेत्येके । स्वम्पि । अतिपॄवपियजितनिधनितायिभ्य उसित्यौणादिकः धनेरुस् । धनुः ॥ ५ ॥

(त०) अप्श्यनोरान्नित्यमिति । अप् च यश्च अप्यौ तयोः । अब्ययोरिति वक्तव्ये जबाकरणं ज्ञापकं यकारे क्वचिदन्तर्वर्तिविभक्त्या पदान्तं नेत्यस्य । तेन वैदुष्यमित्यत्र 'वसां रसे' इति दत्वं न । अप्यानित्यमिति सुवचम् । आदित्यस्यानुवृत्तेः । आरम्भसामर्थ्यान्नित्यत्वे लब्धेपि अदीपोरादीपोरिति संदेहनिरासार्थं नित्यग्रहणम् ॥ ५ ॥

न्षपूर्वस्य शौ दीर्घः ॥ धनूंषि ॥ हविः, हविषी, हवींषि ॥ पयः, पयसी, पयांसि ॥ तेजः, तेजसी, तेजांसि ॥ वचः, वचसी, वचांसि ॥ पिपठीः, पिपठिषी । सयङन्तस्य शौ नुम्न । पिपठिषि ॥ सुपुम् , सुपुंसी, सुपुमांसि ॥ अदः, अमू , अमूनि । शेषं पुंवत् ॥ ६ ॥

इति हसान्ता नपुंसकलिङ्गाः ॥ १२ ॥

(सु०) न्षपूर्वस्य शौ दीर्घः ॥ न्सम्महत इत्यस्यैव प्रपञ्चः । शौ न्सम्महत इति दीर्घः । विसर्गनुमिति षत्वम् ॥ धनूंषि । धनुर्भ्याम् । अत्र 'व्वो वि हसे' इति न दीर्घोऽधातुत्वात् ॥ अचिशुचिहुसृपोत्यादिना जुहोतेरिस् । हविः ॥ पिपठिषतेः क्विप् । 'व्वो वि हसे' इत्यनेन दीर्घत्वम् । पिपठीः ॥ सुष्ठु पुमांसो यस्मिन् तत् सुपुम् । शौ पुंसोऽसु-

---

(क) अयं भावः । अप्श्यनोरित्यत्र 'चपा अबे' इत्यनेन अब्ययोरिति वक्तव्येऽपि प्रत्यये परतः क्वचिदन्तवर्तिविभक्त्या पदान्तं नेत्यस्य ज्ञापकम् । तेन तडिदस्यास्तीति तडित्वानित्यत्र दत्वं न । लोकेशकरस्तु 'यकारे क्वचिदन्तवर्त्तिविभक्त्या पदान्तं नेत्यस्य ज्ञापकमित्याह । वस्तुतस्तु लोकेशकरमतेन वैदुष्यमित्यत्र 'वसां रसे' इति दत्ववारणेऽपि तडित्वानित्यत्रार्थं प्रत्यये परे पदत्वाभावे इति सम्यक् ।

इति चक्रधराख्यटिप्पण्यां षड्लिङ्गाः समाप्ताः ।

क्लित्यलुक् । तुमयम इति तुम् । न्सम्महत इति दीर्घः । सुपुमांसि ॥ त्यदाद्यत्वं विभक्तिकार्यं मत्वोत्वे अमू । शौ नुम्दीर्घौ । अमूनि । शेषं पुंवत् ॥ ६ ॥

इति सुबोधिन्यां हसान्ता नपुंसकलिङ्गाः ॥ १२ ॥

(त०) श्रीविद्यानगरस्थायिलोकेशकरशर्मणा ।
कृतायामिह टीकायां क्लीबलिङ्गो हसान्तकः ॥ ६ ॥

इति तत्त्वदीपिकायां हसान्तनपुंसकलिङ्गाः ॥१२॥

समाप्तेयं षड्लिङ्गव्याख्या ॥

अथ युष्मदस्मत्प्रक्रिया ॥ १३ ॥

त्वमहं सिना ॥ सिना सहितयोर्युष्मदस्मदोस्त्वमहमित्येतावादेशौ भवतो यथासंख्येन (क) ॥ त्वम् । अहम् ॥ १ ॥

(सु०) **त्वमहं सिना** ॥ युष्मदस्मदोः स्थाने त्वमहमित्येतौ यथाक्रमं स्तः । सिनेति सहादियोगे तृतीया । सिप्रत्ययेन सहितयोरित्यर्थः ॥ ननु त्वमहमोर्हसान्तत्वादेव सिलोपे सिद्धे साविति वाच्यं व्यर्थं सिनेति । उच्यते । मान्तत्वस्य यथा तकारोच्चारणस्य गौणेऽतित्वमित्यादौ चरितार्थत्वात् सिलोपात्परत्वात्त्यदादेरित्यत्वं तत आऽमूस्भाविस्यात्त्वम् त इति तकारस्य सत्वं च स्यात् । अतः सिनेत्युक्तम् ॥ इह तदन्तविधिरपीष्टोऽस्ति । परमत्वम् । परमाहम् । गौणत्वे तु त्वां मां युवामावां युष्मान् अस्मान् वाऽतिक्रान्त इत्यत्रापि अतित्वमत्यहमित्येव । इह युस्मदस्मदोःष्णान्तसंख्यावाचिनां चालिङ्गत्वमेव । 'अलिङ्गे युष्मदस्मदी' इत्युक्तत्वात् । अत एव त्रिषु लिङ्गेष्वेषां समानं रूपम् । लिङ्गनिमित्तमीबादिकमनयोर्नालिङ्गत्वात् (ख) । त्वं ब्राह्मणः ॥ अहं ब्राह्मणः । त्वं ब्राह्मणी । अहं ब्राह्मणी । त्वं ब्राह्मणकुलम् । अहं ब्राह्मणकुलमिति ॥ १ ॥

(त०) **त्वमहं सिनेति** ॥ त्वम् अहं सिनेति च्छेदः । सिनेति सहयोगे तृतीया । त्वमहं साविति तु नोक्तम् । त इति सकारस्य सौ परेऽनिवार्यत्वात् । तकारोच्चारणस्य तु

(क) **त्वमहमिति** । नन्वत्र त्वमहमोर्हसान्तत्वादेव सिलोपे सिद्धे व्यर्थं सिनेति । लाघवाय साविस्येव वाच्यम् । न च सुप्यतिव्याप्तिः । त्वन्मदेकत्वे इत्यनुवृत्तेः । नापि वाच्यं त्यदाद्यत्वं माभूदिति मान्तत्वविधिसामर्थ्यादेव तन्निवृत्तेर्यथायमियमित्यत्र । नापि सिलोपार्थम् । मान्तत्वमत्वबाधपूर्वमेव सिलोपप्रवृत्तेः । एवं तर्हि सकारनिमित्तमाम्स्भाविस्यात्वं माभूदिति सिनेत्युक्तम् । तदपि मान्तत्वविधिसामर्थ्यान्न स्यादिति चेन्न मान्तत्वस्याऽत्वबाधेन चरितार्थत्वात् किञ्च पुरस्तादपवादन्यायेनात्वं स्यादेवेति वक्तव्यमेव सिनेति

(ख) अत्रेदं सारस्वतम् । 'युष्मदस्मदोर्वाच्यलिङ्गत्वात् त्रिष्वपि लिङ्गेषु समानं रूपम्' । अत्र वासुदेवः । 'वचनं वाक् अस्यां लिङ्गत्वात् स्वविषये लिङ्गद्योतकाभावादित्यर्थः । अयमर्थः—सर्वस्य त्रिगुणात्मकत्वेन सत्वोद्रिक्तवाचित्वे पुंस्त्वं रजउद्रिक्तवाचित्वे नपुंसकत्वं भवति । अनयोस्तु धर्मिमात्रवाचित्वेनानालिङ्गत्वम् । अथवा उपचयापचयाद्यभाववाचित्वादलिङ्गत्वम् । अत एवोक्तम्—'अलिङ्गे युष्मदस्मदी' इति । केचित्तु—'वाच्यमित्युच्यते भेद्यं तल्लिङ्गं भजते तु यः । विशेषणत्वमापन्नो वाच्यलिङ्गः स उच्यते' ॥ इति विशेष्यलिङ्गत्वादलिङ्गत्वमित्याहुः तदसत् । शुक्लादिशब्दानामपि वाच्यलिङ्गत्वेनालिङ्गत्वप्रसक्त्या आबाद्यभावप्रसङ्गात् । अत्रापि स्त्रीवाचित्वे आप्प्रसङ्गाच्चेति" ।

न सामर्थ्यं तस्यातित्वमिति गौणे चरितार्थत्वात् । अत्राहुः । अत्र सावित्युक्ते स्त्रियां त्यदाद्यत्वे परत्वादाम् सावित्यात्वं बाधित्वा आप्स्यादिति तन्निरासायेति । अत्रेदमवधेयम् । युष्मदस्मदोरलिङ्गत्वात्स्त्रीत्वाभावादेवापो निवृत्तेस्तन्निवृत्त्यर्थत्वस्य व्यर्थत्वात् । अथ लिङ्गयोगोऽस्ति युष्मदस्मदोरिति ब्रूषे तर्हि अस्मिन् ग्रन्थे युष्मदस्मदोः ष्णान्तसंख्यावाचिनां चालिङ्गत्वमेव स्वीकृतमिति स्वोक्त्याविरोधः । तयोश्च वाच्यलिङ्गत्वात्त्रिष्वपि लिङ्गेषु समानरूपमिति वदता वृत्तिकृताऽपि महानेव विरोधः । चवाच्यलिङ्गत्वादित्येकं पदम् । चस्य वाच्यं लिङ्गमिव लिङ्गं ययोस्ते तयोस्ते तयोर्भावस्तत्त्वादव्ययवदलिङ्गत्वादित्याद्यर्थं वर्णयन्निश्च विरोध एवेत्युपेक्षितम् ॥ १ ॥

युवावौ द्विवचने ॥ द्व्यर्थवाचिनोर्युष्मदस्मदोर्युवावादेशौ भवतो विभक्तौ(क) ॥ २ ॥

(सु०) **युवावौ द्विवचने** ॥ द्वयोरर्थौ द्व्यर्थस्तं वक्त इति द्व्यर्थवाचिनौ तयोर्युष्मदस्मदोर्युवावौ स्तः स्यादौ विभक्तौ ॥ त्यदादेरित्यतः स्यादावित्यपकृष्यते । द्वौ वक्त इति द्विवचने कर्तरि युट् । किंच द्विवचने इति प्रत्ययविशेषणे कृतेऽपि युवावौ सिद्ध्यतः तथापि युवामतिक्रान्तान् अतियुवानित्यादौ युवावयोरप्रसङ्गवारणाय प्रकृत्यर्थविशेषणं कृतम् ॥

(त०) **युवावौ द्विवचने** इति ॥ इह त्यदादेष्टेरित्यतः स्यादावित्यपकृष्यते । वक्त इति वचने कर्तरि युट् । द्वयोरर्थयोर्द्विवचने प्रथमान्तम् । तथा च द्विवचने युष्मदस्मदौ इति हरदत्तादिमते तयोरित्यध्याहारक्लेशः । कर्मणि युडिति पक्षे द्विवचन इति सप्तम्यन्तं द्वित्वे इत्यर्थकं तद्वाचिनारित्यर्थः । अत्राहुः । द्वित्वे या स्यादिर्विभक्तिस्तस्यामित्यर्थ इति । अत्रेदं वक्तव्यम् । एवं सति युवामावां वातिक्रान्तानतियुवानित्यत्राव्याप्तिः द्वित्वाभिधायिस्याद्यभावात् ॥ २ ॥

आमौ ॥ युष्मदस्मद्भ्यां पर औराम् भवति ॥ युवाम् । आवाम्(ख) ॥ ३ ॥

(सु०) **आमौ** ॥ आभ्यामौ आम् स्यात् ॥ अत्र योगविभागाभिप्रायेण विपरीतनिर्देशो बोध्यः । विपरीतनिर्देश इत्येतदर्थं व्याख्यानान्तरं क्रियते । अत्र अ अम् औ इति च्छेदः । अ इति योगविभागः कर्तव्यः । लोपः अन्तः युष्मदस्मदोरिति पदत्रयं चानुवर्तनीयम् । युष्मदस्मदोरकारान्तादेशोऽकारात्परस्याकारस्य लोपश्च स्यादित्येको

(क) **द्विवचने इति** । ननु युवयोः पुत्रो युष्मात् पुत्रः युवां करोति युष्मयति इत्यत्र युवावौ प्राप्नुतः । मैवम् । द्वित्व इति वाच्ये द्विवचनग्रहणस्यावृत्त्या संज्ञाशब्दस्यापि ग्रहणार्थत्वात् ।

(ख) **आमौ** । ननु किमित्यामादेशः क्रियते । नाऽमेव क्रियते । अमूशसोरित्यलोपप्रसङ्गात् । अमोलाक्षणिकत्वमामस्भावित्यपि नात्वप्रसङ्गः । एवं तर्ह्यकारोपदेशसामर्थ्यादेव नालोपो भविष्यति । अन्यथा ममात्रं विधीयेत । किं च आमि सति युष्मयतेरस्मयतेश्च क्विपि तलोपे औकारस्यापि युष्मामस्मामिति प्राप्नोति । युष्मामस्मामिति चेष्यते तस्मादामावित्यस्यायमर्थः । आ अम् औ इति च्छेदः । युष्मदस्मदोराकारान्तादेशो भवति औकारस्य च अमादेशः । एवं च क्विबन्तयोरपि युष्म औ अस्म औ इति स्थिते मकारस्यात्वे औकारस्य चामि युषामसामिति सिद्ध्यति । ननु चात्रापि युवावौ प्राप्नुतः । एवं तर्ह्ययमाकारो मान्तयोरादेशाः पाक्षिकाः भवन्ति इति ज्ञापनार्थः । रूपाणि तु तान्यपि पदमञ्जर्यादिरेवगन्तव्यानि । आत्वावधौ च युवामावामित्यत्रापि न दोषो भवति । अदन्तत्वाच्च युवाम इत्यस्यापि न प्रवृत्तिः । अन्यथा हि लक्षणप्रतिपदोक्तपरिभाषाऽऽश्रयणीया स्यात् । इति माधवः ।

योगः । युष्मदस्मद्भ्यां पर औकारोऽयम् स्यादिति द्वितीयः । औकारस्यामि कृते आम्-स्भाविस्यात्वम् । यद्वा सवर्णदीर्घः । न चामृशसोरिति लोपः अकारोच्चारणसामर्थ्यात् । इति लघुभाष्ये । युवाम् । आवाम् । तदन्ते परमयुवाम् । परमावाम् । गौणत्वे तु स्य-दादेरित्यत्वं न भवति । संज्ञोपसर्जनयोर्नात्वमित्युक्तत्वात् । किं तर्हि आमावित्यत्र योग-विभागेन । अनयोरन्तस्याकारोऽतो लोपश्च । औकारस्य अमि कृते आमृस्भावित्यात्वम्॥ अतित्वाम् । अतिमाम् । अतियुवाम् । अत्यावाम् । अतियुष्माम् । अत्यस्माम् ॥३॥

(त०) आमावितो ॥ आम् औ इति च्छेदः ॥ नन्वमेव क्रियतां किंवाऽऽमृविधा-नेनेति चेत् । अत्र माधवः । आ अम् औ इति च्छेदः । युष्मदस्मदोराकारान्तादेशः औकारस्याम् भवतीत्यर्थः । एवं युष्मयतेः क्विपि अल्लोपे औकारस्यामि युष्मामस्मा-मिति प्राप्नोति युषाम् असाम् इति चेष्यते एवं मस्यात्वे रूपासिद्धिरित्याह । अत्र रामा-श्रमः । अम्मात्रविधानेनैवेष्टसिद्धेराकारो व्यर्थ इत्युक्त्वा स्वमतमुक्तवान् । अ अम् औ इति च्छेदः । अ इति योगो विभज्यते । अत्र लोपः अत् युष्मदस्मदोरित्येतत्सर्वमनुव-र्तते । तथा च युष्मदस्मदोरकारोऽन्तादेशः स्यात् । तस्य अतः परस्य लोपः स्यात् । द्वितोयस्य तु युष्मदस्मद्भ्यां पर औ अम् भवति ॥ आमृस्भावित्यात्वम् । 'सवर्णे दीर्घः' इतिवा दीर्घत्वम् । अम्शसोरस्येति तु न अकारोच्चारणसामर्थ्यादिति । अत्रेदमवधेयम् । अ इति छित्वा योगविभागं लोपाद्यनुवृत्तिं च कृत्वा युवामावामिति रूपं साध्यम् । तत्रा-धिकक्लेशः । कुत्र आम् औ युष्मदस्मद्भ्यां पर औकारोऽम् भवति सति तस्मिन् तयोर-कारान्तादेश इति । अन्यत्र त्वाम्स्भावित्यनेनैवात्वम् । एवं चातिप्रसङ्गशङ्काऽपि नेति अम्मात्रविधाने सुट्प्रसङ्गोऽत्रावर्ननिराकरणार्थयत्नक्लेशोऽपि नेति विभाव्यं सूरिभिः ॥३॥

यूयं वयं जसा ॥ जसा सहितयोर्युष्मदस्मदोर्यूयं वयं भवतः ॥ यूयम् वयम् ॥ ४ ॥

(सु०) यूयं वयं जसा ॥ तदन्ते परमयूयम् । परमवयम् । गौणत्वेऽतियूयम् । अतिवयम् ॥ ४ ॥

(त०) यूयं वयंजसेति ॥ जसीति तु पूर्वोक्तयुक्तेनैं कृतं जसीत्यस्य प्रवृत्तेः॥४॥

त्वन्मदेकत्वे ॥ युष्मदस्मदोस्त्वन्मदौ भवत एकत्वे गम्यमाने(क)॥५॥

(सु०) त्वन्मदेकत्वे ॥ एकत्वे गम्ये । एकस्य भावः एकत्वं तस्मिन् गम्यमाने ज्ञायमाने सति युष्मदस्मदोस्त्वन्मदावादेशौ स्तः । स्यादावित्यत्र न संबध्यते । तेन तव पुत्र इति त्वत्पुत्रः । तवापत्यमिति त्वादः । त्वं पुत्रो यस्य सः त्वत्पुत्रः । इत्या-दौ विभक्त्यभावेऽपि त्वन्मदौ भवतः । न चान्तर्वर्तिनीं विभक्तिमाश्रित्याप्येतौ स्याता-मिति वाच्यं युवयोः पुत्र इति युष्मत्पुत्र इत्यादौ युवावयोरपि प्रसङ्गात् । लुकि न तन्नि-मित्तमिति निषेधाच्च । दान्तादेशावेतौ । तेन त्वादयति । मादयति । त्वदीयम् । मदीय-मित्यादिरूपसिद्धिः । सूत्रे वाऽवसाने इति पाक्षिकतकारे कृते ममे ममा वेति ममत्वं क-

(क) त्वन्मदे । अत्रमाधवः । एकत्वे इत्यर्थपरोनिर्देशः । ततश्चैकार्थवाचिनोर्युष्मदस्मदोरित्यर्थः। अत एव त्वामात्मन इच्छति त्वयति त्वत्पुत्र इत्यदावप्यादेशः। तथा युष्मानस्मान् वाऽतिक्रान्ता अतियु-ष्मामत्यस्मानित्यादौ चादेशाभावः । समासस्यैकार्थत्वे युष्मदस्मदोरनेकार्थत्वात् ।

चिजवस्यापि नमो ज्ञाप्यते तेनेति वा बोध्यम् । सिद्धेऽस्त्सूक्तवक्ष्यमाणा विधयस्त्वन्मदौ आवन्ते परत्वात् । तदन्ते । परमत्वाम् । परममाम् ॥ गौणत्वे तु अतित्वाम् । अतिमाम् ॥५॥

(त०) त्वन्मदेकत्वे ॥ त्वद् मद् एकत्वे इति च्छेदः । नमे नमा वेत्यत्र वाश-ब्दस्य व्यवस्थितत्वात्कचिन्नसानामपि नमा भवन्तीति नमत्वम् । तेन त्वादयतीत्यादि सिद्धम् । तव पुत्रस्त्वत्पुत्र इत्यादौ भवत्येव एकत्वाभिधानस्य निमित्तस्य सत्त्वात् । अत्राहुः । युवयोः पुत्रः युष्मत्पुत्र इत्यत्र स्याद्यभावात् कथमिति न वाच्यम् ॥ धातो-रित्यत्रासंभवात्स्याद्यधिकारस्त्यक्तः सोऽग्रेऽपि न संबध्यते । अत एव त्यदादेष्टेः स्यादा-वित्यत्र पुनः स्यादिग्रहणं कृतमिति । अत्रेदं वक्तव्यम् । 'त्वन्मदेकत्वे' 'युवावौ द्विवचने' इत्यनयोर्द्वयोरपि नुधातोस्त्यदादेष्टेरित्येतत्सूत्रद्वयमध्यस्थताऽविशेषेण कथमेकत्र स्यादिसंब-न्धोऽपरत्र नेति व्याख्यानं संगच्छते विनिगमनाविरहात् । किंतु द्वित्व इति वक्तव्ये द्विव-चनग्रहणसामर्थ्यादत्र स्यादियोग इति समाधेयम् ॥ ५ ॥

आऽम्स्भौ ॥युष्मदस्मदोष्टेरात्वं भवति अमि सकारे भिसि च परे ॥ त्वाम् । माम् । युवाम् । आवाम् । त्यदाद्यत्वे शसीति दीर्घः(क) ॥ ६ ॥

(सु०) **आऽम्स्भौ** ॥ आ अम् इति च्छेदः । युष्मदस्मदोष्टेरात्वं स्यादमि सकारे भिसि च । अम् च स् च भिश्च तेषां समाहारोऽम्स्भि तस्मिन् । आगमजस्यानित्यत्वान्न नुम्भावः । भीत्येकदेशद्वारा समुदायानुकरणम् । अत्र माधव आह । टेरिति नानुवर्तनीय-म् , प्रयोजनाभावात् , षष्ठीनिर्दिष्टत्वादन्त्यस्यात्वे सवर्णदीर्घे च त्वां मामिति रूपसिद्धेः । युष्मदस्मदोर्म्यन्तयोः क्विपि युष्म् अस्मिति रूपम् आभ्याममि शसि च युषाम् असाम् युषान् असानित्यन्त्यस्य मकारस्यात्वे सिध्यति । अन्यथा न । सत्यम् । अतियुष्मा-भ्यामित्यादावात्वं केन भवति गौणत्वे त्यदाद्यत्वाभावात् । उच्यते । आमावित्यत्र यो-गविभागेनात्वं कृते रूपसिद्धिरिति । तदा युष्मास्मोरपि योगविभागेनात्वे कृते पश्चाट्टेरात्वे चामि शसि च युषाम् असाम् युषान् असानिति सिद्ध्यत्येव किं माधवोक्त्येति ॥ ६ ॥

(त०) **आऽम्स्भाविति** ॥ आ अम्स्भाविति च्छेदः । नन्वतियुष्माभ्याम् अति युष्मान् अत्रात्व केन, गौणत्वे त्यदाद्यत्वाभावात् , इति चेत्सत्यम् । केचिदामावित्यत्र योगविभागेन परत्वादाऽम्स्भावित्यविभक्तिनिर्देशेन सात्पूर्वः परो वा लुप्तनिर्दिष्टो नकारा-न्तस्तस्मिन्परेऽप्यात्वम् । अत्र षष्ठीदर्शनादन्तादेशः । टेरित्यनुवृत्तिस्तु प्रयाजनाभावात् युष्मदस्मदोर्युवामावामित्यसिद्धेश्चोपेक्षितम् ॥ ६ ॥

(शसो नो वक्तव्यः) युष्मान् । अस्मान् । त्वन्मदादेशे कृते(ख)७।

(सु०) **शसो नो वक्तव्यः** ॥ सो नः पुंस इत्यत्र सो न इति योगविभागे नाय-मर्थो लभ्यते इत्यर्थः ॥ ७ ॥

(क) आम्स्भाविति । ननु भ एव विधीयताम् । विधानसामर्थ्याच्च टेरनुवृत्तौ षष्ठीनिर्दिष्टन्या-येनान्त्यस्यादेशेनेष्टसिद्धौ दीर्घविधिवैयर्थ्यमिति चेत् , मैवम् , युष्माभिरित्यादावकारान्तत्वेन भिसो भ-करस्याकारप्रसङ्गात् ।

(ख) अयमर्थः—'शसो न' इति सो नः पुंस इत्यस्य पुँल्लिङ्गविषयत्वेनानयोश्च लिङ्गविशेषाभा-वात्तस्याप्राप्तावारम्भः ।

ए टाङ्योः ॥ युष्मदस्मदोष्टेरेत्वं भवति टाङ्योः ॥ त्वया । मया । युवाभ्याम् । आवाभ्याम् । युष्माभिः । अस्माभिः(क) ॥ ८ ॥

(सु०) ए टाङ्योः ॥ अत्र टेरित्यनुवृत्तं अनयोष्टेरेत्वं स्यात् । टाश्च ङिश्च टाङी तयोः परतः । इदन्तत्वात् ङेः पूर्वनिपाते प्राप्ते तस्यानित्यत्वज्ञापनार्थं परनिपातः । किं च परत्वात्त्यदादेरित्यत्वे प्राप्तेऽपि आदौ ए टाङ्योरित्येत्वप्रवृत्तिरेव न्याय्या कृताकृतप्रसङ्गित्वेन तस्य नित्यत्वात् । टेरेत्वे कृते अयादेशे च त्वया मयेति । अत्र हि युष्मदस्मदोर्ण्यन्तयोः क्विपि युष्म् अस्म् इति । टाङि ओस्सु परतः । युष्मा । अस्मा । युष्मि । अस्मि । युष्मोः। अस्मोरिति रूपाणि । तत्सिद्ध्यर्थं व्याख्यानान्तरं क्रियते । अत्रैकारात् परो यवयोर्वसे हकारे चेत्यनेन लुप्तो यकारो ज्ञातव्यः । तेनायमर्थः । अदन्तयोरनयोरेत्वं हसान्तयोर्यत्वं च न भवति । ए टाङ्योरिति टाङीओसां लुप्तसप्तमीको निर्देशः । एषु परत इति ॥ ८ ॥

(त०) ए टाङ्योरिति ॥ अत्र टेरित्यनुवर्तते । अन्त्यविधौ रूपासिद्धेः । नित्यत्वात्प्रतिपदोक्तत्वाच्चादावेत्वप्रसक्तेस्त्यदाद्यभावात् । अत्राहुः ॥ ननु युष्मदस्मदोर्ण्यन्तयोः क्विपि युष्म् आ अस्म् आ इति स्थिते टेरेत्वे कृते युष्मया अस्मया इति प्राप्नोति युष्मा अस्मा इति चेष्यते । सत्यम् । एकारोऽप्यनेन विधीयते । लक्ष्यानुसाराच्च व्यवस्था । अत एत्वं हसस्य यत्वं च न यवयोर्वसे लोप इत्यनेनैव ज्ञापितवचनेन लुप्तोऽत्र य इति । अत्रेदं तत्त्वम् । अत्रापि टेरनुवृत्तिर्न कर्त्तव्या षष्ठ्यन्तादेश एव । स च त्यदाद्यत्वे कृते एव परत्वात् । नित्यत्वं तु समानमुभयोरपि । तथा च युष्मदस्मदोर्मस्यैत्वे अयादेशे य्वोर्लोपश्चेत्यत्र वा इत्यस्य व्यवस्थितत्वात् य्वोः सम्बन्धिनोऽवर्णस्य क्वचिल्लोप इत्यलोपे रूपसिद्धिः । एवं युष्मास्मेति सिद्ध्यर्थं ज्ञापितवचनेन लुप्तयकारनिर्देशक्लेशो नोचितः । किंच अत एत्वं हसस्य यत्वमिति व्याख्याने एकस्मिन्नेव प्रयोगे दस्य यत्वं मस्यैत्वं च केन वार्यम् । त्यदाद्यत्वेनेति केचित् । नित्यत्वात्प्रतिपदोक्तत्वाच्चादावेत्यप्रवृत्तेस्त्यदाद्यत्वाभाव इति स्वोक्त्या विरोधात् । किंच लोपेन वचनं ज्ञाप्यते । ज्ञापितेन वचनेन लोप इत्यन्योन्याश्रयोऽपि । किंच अत एत्वमिति कथं त्यदाद्यत्वाभावे टेरत्वे अदस्शब्दस्यैत्वम् । किंच एत्वं टेर्यत्वमन्त्यस्येत्यत्र विनिगमनाविरहः । टाङ्योरित्यत्र टकारङकारौ तु स्पष्टप्रतिपत्तये कृताविति नान्यद्बहु जल्पितम् ॥ ८ ॥

तुभ्यं मह्यं ङ्या ॥ ङेसहितयोर्युष्मदस्मदोस्तुभ्यं मह्यमेतौ भवतः ॥

(क) एटा । ट आकारान्तरनिवृत्त्यर्थः ङोऽसंदेहार्थः । टाङ्योरिति द्वन्द्वे टा इत्यस्य पूर्वत्वादिदन्तस्यापि ङेः परत्वं निर्देशस्य सौत्रत्वाद्वा । ए इति । अविभक्तिको निर्देशः । एत्वमिति । अन्तादेश इति शेषः । त्वया मयेति । युष्मदस्मदोष्टेरत्वन्मदोष्टत्वन्मदोस्त्यदाद्यत्वस्यानेन एत्वेऽय् । ननु चैवं युष्मास्मोष्टेर्गौणत्वादसति त्यदाद्यत्वे मस्यानेन एत्वेऽपि च युष्मया अस्मयेति प्राप्नोति । युष्मा अस्मा इति चेष्यते । एवं तर्हि एटाङ्योरित्यत्र य्वौवेत्यतो यकारोऽनुवर्त्तते टाङ्योरिति च । टाङ्योसां लुप्तसप्तमीको निर्देशस्तदयमर्थः । युष्मदस्मदोर्यकारोऽप्यन्तादेशो भवति । टाङ्योस्सु परतः त्यदाद्यत्वापवादः । त्वया मया त्वयि मयि अतित्वया अतिमया अतित्वयि अतिमयि । युष्मस्मोरपि युष्या अस्या युष्यि अस्यि । ओसि तु पूर्वं यत्वे तेन सहैव युवावयाः कृतयोरोसीत्येत्वेऽयादेशः । युवयोरवियोः । न चैवमोसि यत्वविधानं व्यर्थमिति वाच्यम् । युष्योरस्योरित्यत्र चरितार्थत्वात् । तदेव यत्वेनापि सिद्धावेत्वविधिश्चिन्त्यप्रयोजनः ।

तुभ्यम् मह्यम् (क) ॥ ९ ॥

(सु०) तुभ्यं मह्यं ङया ॥ तदन्ते परमतुभ्यम् । परममह्यम् गौणत्वे तु अतितुभ्यम् । अतिमह्यम् ॥ ९ ॥

(त०) तुभ्यं मह्यं ङयेति ॥ तृतीया तु पूर्ववत् । अन्यथा ङे त्यदाद्यत्वे तुभ्यै इति स्यात् ॥ ९ ॥

भ्यस् श्भ्यम् ॥ युष्मदस्मद्भ्यां परो भ्यस् श्भ्यं भवति ॥ शकारो भकारादित्वव्यावृत्त्यर्थः । तेनात्वैत्वे न भवतः । युष्मभ्यम् । अस्मभ्यम् (ख) ॥ १० ॥

(सु०) भ्यस् श्भ्यम् ॥ अत्र भ्यस् चतुर्थीबहुवचनम् । आभ्यां भ्यस् श्भ्यं स्यात् । शकारो न सर्वादेशार्थः भ्यमो गुर्वादेशत्वात् तर्हि किमर्थः भकारादित्ववारणार्थः ॥ सति शकारे भकारस्यादित्वाभावात् ॥ भादिनिमित्तम् एभ्भीत्येत्वम् अद्भीत्यात्वं च न । आदेर्भाव आदित्वं भकारस्यादित्वं भकारादित्वं भकारादित्वस्य व्यावृत्तिनिषेधः भकारादित्वव्यावृत्तिः भकारादित्वव्यावृत्तिरर्थः प्रयोजनं यस्य सः ॥ १० ॥

(त०) भ्यस् श्भ्यमिति ॥ भ्यस् श्भ्यमिति च्छेदः । नन्वत्र शकारो न श्रवणार्थः । युष्मभ्यमित्यत्राश्रुतेः । सर्वादेशार्थोऽपि न, भ्यमोऽनेकाक्षरादेशत्वादेव तत्सिद्धेरित्याशयेनाह—शकार इत्यादि ॥ सर्वत्वादिव्यावृत्त्यर्थं कृतस्तद्व्यावृत्त्यनन्तरं नोपादीयते । जलानयनानन्तरं जलार्थं घटवत् ॥ चतुर्थीबहुवचनमेवात्र भ्यस् । पञ्चम्यास्तु न, ङसिसाहचर्यात्तस्य तत्रैव ग्रहणात् ॥ १० ॥

ङसिभ्यसोः श्तुः ॥ ङसिसाहचर्यात्पञ्चम्या भ्यस् गृह्यते । त्वत् । मत् । युवाभ्याम् । आवाभ्याम् । युष्मत् । अस्मत् ॥ ११ ॥

(सु०) ङसिभ्यसोः श्तुः ॥ युष्मदस्मद्भ्यां परयोर्ङसिभ्यसोः श्तुरादेशः स्यात् ॥ शित्वात्सर्वादेशः । उकार उच्चारणार्थः ॥ अत्र ङसिसाहचर्यात्पञ्चम्या एव भ्यस् गृह्यते । किंच अत्र माधवः । ङसिभ्यसः अः श्तुरिति पदच्छेदः कर्तव्यः । ततश्च युष्मदस्मद्भ्यां ङसिभ्यसोः श्तुर्भवति युष्मदस्मदोरन्त्यस्याकारादेशो भवति । तेन भ्यन्तयोर्युष्मास्मोर्युषत् असत् । अयमेवाकारो भ्यस् श्भ्यम् सामाकमित्यत्राप्यनुवर्तते । तेन युषभ्यम् । असभ्यम् । युषाकम् । असाकमिति सिद्ध्यतीति वदति ॥ आमावित्यत्र योगविभागेनात्वे युषदसदित्यादि सिद्ध्यत्येव किं तत्प्रयासेन ॥ ११ ॥

(त०) ङसिभ्यसोः श्तुरिति ॥ शकारः सर्वादेशार्थः । उकार उच्चारणार्थः । अत्र ङसिभ्यसः अः श्तुरिति च्छेदादकारोऽन्तादेशोऽनयोरिति व्याख्यानात् युष्मास्मोर्युषदसदिति सिद्ध्यति ॥ ११ ॥

(क) तुभ्यमह्यमिति । मान्तत्वसामर्थ्यान्नात्वे इहाप्येकत्वद्वित्वबहुत्वेषु गौणत्वेऽपि परत्वादेतौ स्त इति अतितुभ्यमतिमह्यमित्येव भवति ।

(ख) भ्यसः । भ्यसत्र चतुर्थी बहुवचनं गृह्यते । ङसिभ्यसोरित्यत्र ङसिसाहचर्यात् पञ्चमीबहुवचनस्य ग्रहणात् । ननु श्भ्यमः शो न तावच्छ्रुत्यर्थः । युष्मभ्यमिति प्रयोगश्रुतेः । नापि सर्वादेशार्थः । भ्यमोऽनेकवर्णतयैव तत्सिद्धेः । इत्यत आह—शकार इति । सति हि सकारे उत्तरस्योच्चारणार्थत्वादेस्त्वादिप्रतिबन्धानन्तरमुदकाहरणानन्तरमुदकार्थंघटवन्नोपादीयते इत्याशयः ।

तव मम ङसा ॥ ङसा सहितयोर्युष्मदस्मदोस्तवममौ भवतः ॥ तव । मम । युवयोः आवयोः । सुडामः ॥ १२ ॥

(छ०) **तव मम ङसा** ॥ तदन्ते परमतव । परममम ॥ गौणत्वे अतितव । अतिमम ॥ १२ ॥

(त०) **तव मम ङसेति** ॥ तृतीया पूर्ववत् ॥ १२ ॥

सामाकम् ॥ युष्मदस्मद्भ्यां परः सामाकं भवति ॥ युष्माकम् । अस्माकम्(क) ॥ त्वयि । मयि । युवयोः । आवयोः । युष्मासु । अस्मासु ॥

"समस्यमाने द्व्येकत्ववाचिनी युष्मदस्मदी ।
समासार्थोऽन्यसङ्ख्यश्चेद्युवावौ त्वन्मदावपि ॥ १ ॥
सिजसूङेङस्सु परत आदेशाः स्युः सदैव ते ।
त्वाहौ यूयवयौ तुभ्यमह्यौ तवममावपि ॥ २ ॥
एते परत्वाद्बाधन्ते युवावौ विषये स्वके ।
त्वन्मदावपि बाधन्ते पूर्ववद्विषये स्वतः ॥ ३ ॥
द्व्येकसंख्यः समासार्थो बह्वर्थे युष्मदस्मदी ।
तयोरद्व्येकतार्थत्वाद्युवावौ त्वन्मदौ च न ॥ ४ ॥"

त्वां मां वाऽतिक्रान्त इति विग्रहे अतित्वम् । अत्यहम् ॥ गौणत्वे युष्मदस्मदोः त्यदाद्यत्वं न भवति । अतित्वाम् । अतिमाम् । अतियूयम् । अतिवयम् । अतित्वाम् । अतिमाम् । त्वन्मदेकत्वे । आऽम्भौ । अतित्वाम् । अतिमाम् । अतित्वान् । अतिमान् । अतित्वया । अतिमया । अतित्वाभ्याम् । अतिमाभ्याम् । अतित्वाभिः । अतिमाभिः । अतितुभ्यम् । अतिमह्यम् । अतित्वाभ्याम् । अतिमाभ्याम् । अतित्वभ्यम् । अतिमह्यम । अतित्वत् । अतिमत् । अतितव । अतिमम । अतित्वयोः । अतिमयोः । अतित्वाकम् । अतिमाकम् । अतित्वायि । अतिमयि । अतित्वासु । अतिमासु ॥

(क) **सामिति** । सुटसहित आम् साम् तस्याकं भवतीत्यर्थः । ससुट्कस्यादेशविधानाद्गौणत्वे च सुडभावादाकमोऽप्राप्ते टेटाङ्योरित्यत्र ए इति योगविभागाद्द्वित्वे अयादेशे च अतित्वयाम् अतियुवयाम् अतियुष्मयामित्यादि । केचित्तु ससुट्कनिर्देशस्य भाविसुटनिवृत्त्यर्थत्वादाम एवाकम् । विधेर्गौणत्वेऽप्याकं भवत्येवेति अतित्वाकमित्याद्याहुः । अकम्विधानेनैवेष्टसिद्धेराकम्विधानं भावि सुण्निवृत्त्यर्थम् पक्षे तत्करोतिण्यन्तस्य क्विपि णिलोपे हसन्तस्यापि सिद्ध्यर्थं गौणत्वे वाचित्वे द्वित्वादिवाचित्वे युवावादिविधानमुक्तचिन्तायाम् । यथा—'यदि युष्मदस्मदी तु द्वित्वं वदती समासमायातः । भवतस्तदायुवावौ तदितरसङ्ख्ये समासार्थे । अभिवदती त्वेकत्वं समासतस्तदानयोस्त्वन्मत् । इत्यादेशौ भवतो द्वित्वबहुत्वान्विते समासार्थे । ङसूङेजस्सिषु चातस्तव मम तुभ्यं तथा मह्यम् । यूयंवयं त्वमहमिति सर्वत्रैव स्युरादेशाः" ॥ इति प्रसादकृत् ।

युवामावां वाऽतिक्रान्त इति विग्रहे । सिजसूङेङस्सु प्राग्वत् । अन्यत्र युवा-
वौ । अतित्वम् । अत्यहम् । अतियुवाम् । अत्यावाम् । अतियूयम् । अति-
वयम् । अतियुवाम् । अत्यावाम् । अतियुवान् । अत्यावान् । अतियुवया ।
अत्यावया । अतितुभ्यम् । अतिमह्यम् । अतियुवाभ्याम् । अत्यावाभ्याम् ।
अतियुवभ्यम् । अत्यावभ्यम् । अतियुवत् । अत्यावत् । अतियुवाभ्याम् ।
अत्यावाभ्याम् । अतियुवत् । अत्यावत् । अतितव । अतिमम । अतियुवयोः ।
अत्यावयोः । अतियुवाकम् । अत्यावाकम् । अतियुवयि । अत्या-
वयि । अतियुवासु । अत्यावासु ॥ युष्मानस्मान्वाऽतिक्रान्त इति विग्रहे ।
सिजसूङेङस्सु प्राग्वत् । अतित्वम् अत्यहम् । अतियुष्माम् । अत्यस्माम् ।
अतियूयम् । अतिवयम् । अतियुष्माम् । अत्यस्माम् । अतियुष्माम् । अत्य-
स्माम् । अतियुष्मान् । अत्यस्मान् । अतियुष्मया । अत्यस्मया । अतियु-
ष्माभ्याम् । अत्यस्माभ्याम् । अतियुष्माभिः । अत्यस्माभिः । अतितुभ्यम् ।
अतिमह्यम् । अतियुष्मत् । अत्यस्मत् । अतियुष्माभ्याम् । अत्यस्माभ्याम् ।
अतियुष्मत् । अत्यस्मत् । अतितव । अतिमम । अतियुष्माकम् । अत्य-
स्माकम् । अतियुष्मयि । अत्यस्मयि । अतियुष्मासु । अत्यस्मासु ॥ १३ ॥

(५०) **साम।कम्** ॥ अत्र तन्त्रैकशेषावृत्तिभिः सामिति द्वयं बोध्यम् । सकृदुच्चरितः शब्दोऽनेकार्थगमको भवतीति तन्त्रम् । सरूपाणामित्येकशेषः । द्विरुच्चारणमावृत्तिः । एकस्य सुटा सह आम् साम् । द्वितीयस्य तु आमा सह साम् इत्यर्थः । ततः सुट्सहित आम् केवल आम् च आकम् युष्मदस्मदोरन्त्यस्याकारश्च भवतीत्यर्थः ॥ तेनातियुष्माकम् अत्यस्माकमित्यादि सिद्धयतीति लघुभाष्यकर्तुरपि प्रयासो व्यर्थ एव । योगविभागेनात्वे कृते छडाम इति सुटोऽपि सर्वादिकार्यत्वाद्गौणेऽप्रवृत्तेः । तन्त्रादिना सामित्यस्य द्विरुच्चारणात् केवलस्याप्याम् आकमि च विहिते रूपसिद्धेः ॥ "समस्यमाने द्वयेकत्ववाचिनी युमदस्मदी ॥ समासार्थोऽन्यसंख्यश्चेद्युवावौ त्वन्मदावपि ॥ १ ॥

'युवावौ द्विवचने' 'त्वन्मदेकत्वे' इति सूत्रद्वये द्विवचनैकत्वशब्दौ प्रकृत्यर्थपरौ न तु प्रत्ययपराविति व्याख्यातम् । तत्फलं जातिलिङ्गव्यक्तिसंख्याकारकात्मकः पञ्चको नामार्थ इति पक्षाभिप्रायेण दर्शयति । चेद्यदि युष्मच्चास्मच्च युष्मदस्मदी शब्दरूपे समस्येते इति समस्यमाने समासविषयीक्रियमाणे । द्वौ च एकश्च द्वयेकौ । द्वयेकयोर्भावः द्वयेकत्वं वक्ति इति द्वयेकत्ववाचिनी स्तः । समासस्यार्थः समासार्थः विग्रहः । अन्यसंख्योऽन्यस्य पदार्थस्य संख्या यस्मिन्सोऽन्यसंख्यो युष्मदस्मदर्थगतसंख्येतरसंख्यायुक्तो भवतीत्यर्थः । तदा युष्मदस्मदोः स्थाने युवावौ त्वन्मदावप्यादेशौ भवतः । द्विवचनैकत्वयोः प्रत्ययविशेषणत्वे तु न स्यातामित्यव्याप्तिः स्यादिति भावः ॥ १ ॥

"सिजसूङेङस्तु परत आदेशाः स्युः सदैव ते । त्वाहौ यूयवयौ तुभ्यमह्यौ तवममावपि॥२॥"

नन्वेवं सिजसङेङस्स्वपि युष्मदस्मदोर्द्व्यर्थत्वे युवावौ स्यातामेकार्थत्वे तु त्वन्मदा॰ वित्याशङ्कायामाह । एतासु विभक्तिषु परतो युष्मदस्मदोः स्थाने ते आदेशाः सदैव स्युः। के ते आदेशा इत्यत आह । त्वाहौ यूयवयावित्यादि ॥ २ ॥

"एते परत्वाद्बाधन्ते युवावौ विषये स्वके । त्वन्मदावपि बाधन्ते पूर्ववद्विषयेस्वतः॥३॥"

एते त्वमहं यूयं वयं तुभ्यं मह्यं तव ममेत्यादेशाः स्वके विषये स्वे आत्मीये स्थाने युवावौ बाधन्ते । कस्मात्परत्वाद्विप्रतिषेधे परं कार्यमिति न्यायात् । उभयोस्तुल्यबलवि॰ रोधे सति सूत्रापेक्षया स्वमादयः परे त एव भवन्तीत्यर्थः । एते त्वमादयः । स्वतो वि॰ षये त्वन्मदावपि बाधन्ते पूर्ववत् उक्तन्यायेन । स्वत इत्यत्र सप्तम्यर्थे तस् ॥ ३ ॥

"द्व्येकसंख्यः समासार्थो बह्वर्थे युष्मदस्मदी । तयोरद्व्येकतार्थत्वाद्युवावौ त्वन्मदौ च न॥४॥"

यदा युष्मदस्मदो बह्वर्थे बहूनामर्थो ययोस्ते बह्वर्थे भवतः । समासार्थो विग्रहः । द्वौ च एकश्च द्व्येकौ द्व्येकयोः संख्या यस्मिन् द्व्येकसंख्यो भवति । तदा युष्मदस्मदोः स्थाने युवावौ त्वन्मदावपि न स्तः । कस्मात् तयोर्युष्मदस्मदोः द्वौ च एकश्च द्व्येकौ द्व्येकयो- र्भावः द्व्येकता द्व्येकताया अर्थः द्व्येकतार्थः द्व्येकतार्थस्य भावो द्व्येकतार्थत्वं न द्व्येकता- र्थत्वमद्व्येकतार्थत्वं तस्मात् द्व्येकतार्थत्वस्याभावात् ।

त्वां मां वाऽतिक्रान्त इति विग्रहे अपवादौ अतित्वम् अत्यहम् । त्वां मां वाऽति॰ क्रान्ताविति विग्रहे उत्सर्गतः त्वन्मदादेशे कृते गौणत्वेऽपि युष्मदस्मदोस्त्यदाद्यत्वं भवति । आमावित्यत्र योगविभागेन यद्व्याख्यानान्तरं कृतं तस्यायं निष्कर्षोऽस्ति । गौणत्वेऽ- प्यनयोस्त्यदाद्यत्वं भवतीत्यर्थः । इत्यनेनात्वे तल्लोपे औविभक्तेरमि च कृते सवर्णदीर्घः । अतित्वाम् । अतिमाम् । त्वां मां वाऽतिक्रान्ता इति विग्रहे अपवादो अतियूयमतिवयम्। एवमग्रेऽप्यूह्यम् ॥ १ ॥

अत्वे आम्स्भावित्यात्वे च अम्शसोरित्यल्लोपः । अतित्वाम् । अतिमाम्। शसि अत्वे कृते अम्शसोरित्यल्लोपः, शसीति दीर्घः, शसो न इति नत्वम् । अतित्वान् । अतिमान्॥२॥

अत्वे कृते ए टाङ्योरित्ययादेशे च । अतित्वया । अतिमया । अत्वे अङ्गीत्यात्वे च अतित्वाभ्याम् । अतिमाभ्याम् । आम्स्भावित्यात्वम् अतित्वाभिः । अतिमाभिः ॥३॥

अपवादौ अतितुभ्यम्। अतिमह्यम् । अतित्वाभ्याम्। अतिमाभ्याम् । अत्वे भ्यमि च अतित्वभ्यम् । अतिमभ्यम् ॥ ४ ॥

अत्वे त्तुआदेशे च अतित्वत्। अतिमत् । अतित्वाभ्याम् । अतिमाभ्याम् । अति॰ त्वत् । अतिमत ॥ ५ ॥

अपवादौ अतितव । अतिमम । अत्वे । ओसीत्येत्वे च अतित्वयोः अतिमयोः। अत्वे सुडभावेऽपि प्रागुक्तरीत्या आकामि च अतित्वाकम्। अतिमाकम् ॥ ६ ॥

अत्वे कृते ए टाङ्योरित्येत्वे अयादेशः अतित्वयि। अतिमयि । अतित्वयोः । अति- मयोः । अत्वे आत्वे च अतित्वासु । अतिमासु ॥ ७ ॥

गुणीभूतयोर्युष्मदस्मदोरेकार्थत्वे उदाहरणान्युक्त्वा संप्रति द्व्यर्थवाचित्वे उदाहरति । युवामावां वा अतिक्रान्तः अतिक्रान्तौ अतिक्रान्ता वा इति विग्रहे अतित्वम् । अत्यहम्। अतियुवाम् । अत्यावाम् । अतियूयम् । अतिवयम् ॥ १ ॥

अतियुवाम् । अत्यावाम् । अतियुवान् । अत्यवान् ॥ २ ॥

अतियुवया । अत्यावया । अतियुवाभ्याम् । अत्यावाभ्याम् । अतियुवाभिः । अत्यावाभिः ॥ ३ ॥

अतितुभ्यम् । अतिमह्यम् । अतियुवाभ्याम् । अत्यावाभ्याम् । अतियुवभ्यम् । अत्यावभ्यम् ॥ ४ ॥

अतियुवत् । अत्यावत् । अतियुवाभ्याम् । अत्यावाभ्याम् । अतियुवत् । अत्यावत् ॥ ५ ॥

अतितव । अतिमम । अतियुवयोः । अत्यावयोः । अतियुवाकम् । अत्यावाकम् ॥ ६ ॥

अतियुवयि । अत्यावयि । अतियुवयोः । अत्यावयोः । अतियुवासु । अत्यावासु ॥ ७ ॥

बह्वर्थयोस्तूदाहरति युष्मानस्मान्वाऽतिक्रान्त अतिक्रान्तौ अतिक्रान्ता वेति विग्रहे अतित्वम् । अत्यहम् । अतियुष्माम् । अत्यस्माम् । अति यूयम् । अतिवयम् ॥ १ ॥

अतियुष्माम् । अत्यस्माम् । अतियुष्मान् । अत्यस्मान् ॥ २ ॥

अतियुष्मया । अत्यस्मया । अतियुष्माभ्याम् । अत्यस्माभ्याम् । अतियुष्माभिः । अत्यस्माभिः ॥ ३ ॥

अतितुभ्यम् । अतिमह्यम् । अतियुष्माभ्याम् । अत्यस्माभ्याम् । अतियुष्मभ्यम् । अत्यस्मभ्यम् ॥ ४ ॥

अतियुष्मत् । अत्यस्मत् । अतियुष्माभ्याम् । अत्यस्माभ्याम् । अतियुष्मत् । अत्यस्मत् ॥ ५ ॥

अतितव । अतिमम । अतियुवयोः । अत्यावयोः । अतियुष्माकम् । अत्यस्माकम् ॥ ६ ॥

अतियुष्मयि । अत्यस्मयि । अतियुष्मयोः । अत्यस्मयोः । अतियुष्मासु । अत्यस्मासु ॥ ७ ॥

पुनर्गौणे रूपान्तरम् । युष्मानस्मान्वा करोतीति णौ युष्मयति । अस्मयति । ततः क्विप् । णेरिति णिलोपे कृते युष्म् अस्मित् जातम् । स्यादिषु युष्मस्मोरपि त्वमहमादय आदेशा भवन्ति। एकदेशविकृतमनन्यवदित्युक्तत्वात् । त्वम् । अहम् । औविभक्त्यादिषु गौणत्वेऽपि टाङ्योस्सुविभक्त्योर्वर्जयित्वासर्वत्रात्वे कृते आत्वम् । युषाम् असाम् । यूयम् । वयम् । १ । युषाम् । असाम् । युषान् । असान् । २ । ए टाङ्योरित्यस्य व्याख्याना न्तरेणान्तस्य यत्वम् । युष्या । अस्या । युषाभ्याम् । असाभ्याम् । युषाभिः । असाभिः । ३ । तुभ्यम् । मह्यम् । युषाभ्याम् । असाभ्याम् । युषभ्यम् । असभ्यम् । ४ । युषत् । असत् । युषाभ्याम् । असाभ्याम् । युषत् । असत् ॥ ५ ॥ तव । मम । अन्तस्य यत्वे युष्याः । अस्योः । युषाकम् । असाकम् ॥ ६ ॥ यत्वे युष्यि । अस्यि । यूष्योः । अस्योः । युषासु । असासु ॥ १३ ॥

(त०) सामाकमिति ॥ साम् आकम् इति छेदः । तेन युष्मदस्मद्भ्यां परः साम् आकम् भवति ॥ अनयोचाकागेऽन्तादेशः ॥ अत्राहुः । नन्वतियुष्माकमित्यादौ गौणत्वात्स्यदाद्यत्वाभावादनवर्णान्तत्वात्सुडभावात्कथं सामिति चेत्सत्यम् । तन्त्रादिना सामिति द्वयं बोध्यम् । एकस्य तु सुटा सहाम् सामिति । द्वितीयस्य तु आमा सह साम् । ततश्च सट्सहित आम् केवलश्च आकं भवति तयोश्चाकार इत्यर्थो भवतीति । अत्रेदमवधेयम् । गौणत्वात्स्यदाद्यत्वाभावादन वर्णान्तत्वात्सुडभावादिति किमर्थं गौण-

स्वात् सुडभावादित्यस्यैव वक्तुमुचितत्वात्सुटोपि सर्वादिकार्यत्वात् गौणत्वेऽप्रवृत्तः। अन्यथा आकारान्तादेशेनावर्णान्तत्वात् तन्त्रादिप्रयासोऽनर्थकः सम्पद्येत ससुट्निर्देशस्तु आकम आदेशस्य स्थानिवद्भावेनामृत्वमाश्रित्य पश्चादपि सुट् स्यादिति तन्निवृत्तये ॥ अयमेवात्र ग्रन्थे स्थानिवद्भावज्ञापकः ॥ 'त्वन्मदे कत्वे' 'युवावौ द्विवचने' इति सूत्रद्वयेऽपि एकत्वद्विवचनशब्दौ न प्रत्ययपरौ किंत्वर्थपराविति फलं दर्शयति स्वार्थद्रव्यकारकलिङ्गसंख्येत्यादिपञ्चकं नामार्थ इति पक्षे संख्याया अपि नामार्थत्वादिति भावः। त्रिकपक्षे तु "द्वयैकार्थवाचिनी' इति पाठ्यम्। संख्याया विभक्त्यर्थत्वेपि संख्येयस्य नामत्वानपायात्। अन्यसंख्यश्चेत् युष्मदस्मदर्थगतसंख्येतरसंख्यायुक्तश्चेदित्यर्थः। समस्यमाने युष्मदस्मदी द्व्येकत्ववाचिनो चेत् समासार्थः अन्यसंख्यश्चेत् तदा युवावौ त्वन्मदावपि भवत इत्यर्थः॥ **तयोरिति**॥ युष्मदस्मदोरद्व्येकतार्थत्वात् द्वित्वार्थत्वेकार्थत्वाभावादित्यर्थः। संकलितार्थस्त्वयम्। यदा वाक्ये युष्मदस्मदोरेकत्वं तदा त्वन्मदादेशौ भवत एव। त्वन्मदेकत्व इति सूत्रे युष्मदस्मदोरेकत्वाभिधानस्योक्तत्वात्। यदा वाक्ये युष्मदस्मदी द्वित्वे तदा युवावौ भवत एव। युष्मदस्मदोर्द्वित्वाभिधायित्वात्। यदा तु वाक्ये युष्मदस्मदी बह्वर्थं समासार्थो द्वित्ववाची एकत्वाची च तदा युष्मदस्मदोर्द्वित्वार्थत्वैकार्थत्वाभावान्न युवावौ न वा त्वन्मदौ ॥ १३ ॥

युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयाभिस्तेमे वांनौ वस्नसौ ॥ युस्मदस्मदोः षष्ठीचतुर्थीद्वितीयासहितयोर्यथासंख्येनामी आदेशा भवन्ति(क) ॥ तत्रैकवचनेन सह तेमे। द्विवचनेन वांनौ। बहुवचनेन वस्नसौ ॥ १४ ॥

(सु०) **युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयाभिस्तेमेवांनौ वस्नसौ** ॥ षष्ठी च चतुर्थी च द्वितीया च षष्ठीचतुर्थीद्वितीयास्ताभिः। अल्पस्वरत्वात् षष्ठीत्यस्य पूर्वनिपातः। सहयोगे तृतीया तथा साहित्यं बोध्यते। तत् किं साहित्यम्। श्रूयमाणविभक्तिकयोरेवादेशा भवन्ति न लुप्तविभक्तिकयोरिति। तेन समासे युष्माकं पुत्र इति युष्मत्पुत्रो ब्रवीति। अस्माकं पुत्र इत्यस्मत्पुत्रो ब्रवीतीत्यत्र प्रत्ययलक्षणेन षष्ठ्यन्तयोर्युष्मदस्मदोर्वस्नसौ न ॥ १४ ॥

(त०) **युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयाभिस्तेमे वांनौ वस्नसौ इति** ॥ अत्र व्याख्यानादेकार्थस्यैकार्थौ तमयौ इति ॥ यथाक्रमं तु न त्वर्थतो नापि शब्दतः। अर्थतस्त्वेषां नवत्वम्। आदेशानां त्रित्वमिति वैषम्यम्। शब्दतस्तु षष्ठ्यास्तेमे इत्यादिक्रमप्रसङ्गः स्यात्। द्वितीयास्विति त्यक्त्वा द्वितीयाभिरिति तृतीयोपादानं श्रूयमाणविभक्त्या साहित्यलाभार्थम्। लुप्ततया प्रत्ययलक्षणेन साहित्यासम्भवात्। तेनेति

(क) ननु युष्माकं पुत्रो युष्मत्पुत्रः। अस्माकं पुत्रोऽस्मत्पुत्र इत्यादौ प्रत्ययलोपे प्रत्ययलक्षणमिति परिभाषया युष्मदस्मदोर्वस्नसौ कथं न ?। उच्यते। श्रूयमाणविभक्तिकयोरेवादेशा भवन्ति न लुप्तविभक्तिकयोः। ननु कुतोऽयमर्थ उपलभ्यते ? उच्यते। षष्ठीचतुर्थीद्वितीयास्विति त्यक्त्वा द्वितीयाभिरिति तृतीयोपादानं श्रूयमाणविभक्त्या साहित्यलाभार्थम्। साहित्यं तु लुप्तविभक्तिकयोर्न संभवति प्रत्ययलक्षणेनातोऽयमर्थः। तेन युष्मत्पुत्र इत्यादौ वसादिर्नेति बोध्यम्।

युष्मत्पुत्रो ब्रवीतीत्यादौ न तृतीया तु सहयोगे। अल्पस्वरत्वात्षष्ठ्याः पूर्वनिपातस्तद्-पेक्षया चतुर्थ्याः ॥ १४ ॥

त्वामाऽमा ॥ अमा सहितयोर्युष्मदस्मदोस्त्वामा एतौ भवतः ॥

श्रीशस्त्वाऽवतु माऽपीह दत्तात्ते मेऽपि शर्म सः।
स्वामी ते मेऽपि स हरिः पातु वामपि नौ विभुः ॥ १ ॥
सुखं वां नौ ददात्वीशः पतिर्वामपि नौ हरिः।
सोऽव्याद्वो नः शिवं वो नो दद्यात्सेव्योऽत्र वः स नः ॥ २ ॥

एकवाक्ये युष्मदस्मदादेशा वक्तव्याः। एकाख्यातं वाक्यम्। तेनेह न। ओदनं पच तव भविष्यति। इह तु स्यादेव। शालीनामोदनं ते दास्यामि ॥ १५ ॥

(सु०) **त्वामाऽमा** ॥ तेमयोरपवादोऽयम्। षष्ठीबहुवचनस्यामाऽत्र ग्रहणं न व्याख्यानात्। व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति भावः ॥

श्रीशस्त्वाऽवतु माऽपीह दत्तात् ते मेऽपि शर्म सः।
स्वामी ते मेऽपि स हरिः पातु वामपि नौ विभुः ॥ १ ॥
सुखं वां नौ ददात्वीशः पतिर्वामपि नौ हरिः।
सोऽव्याद्वो नः शिवं वो नो दद्यात्सेव्योऽत्र वः स नः ॥ २ ॥

उक्तानादेशान् वचनक्रमेणोदाहरति। द्वितीयैकवचने यथा। श्रिय ईशः श्रीशो हरिरिह जगति त्वामपि मामपि अवतु रक्षतात्। चतुर्थ्येकवचने यथा। स हरिस्ते तुभ्यमपि मे मह्यमपि शर्म सुखं दत्तात्। दानपात्रे चतुर्थी। षष्ठ्येकवचने यथा। स हरिस्ते तव मे ममापि स्वामी वर्तते। स्वाम्यादियोगे इति षष्ठी। सप्तम्यविधानात्। द्वितीयाद्विवचने यथा। विभुर्विष्णुर्वां युवां नावपि आवामपि पातु रक्षतु। चतुर्थीद्विवचने यथा। ईशः शंभुर्वां युवाभ्यां नौ आवाभ्यां सुखं ददातु। षष्ठीद्विवचने यथा। हरिर्वां युवयोः नावपि आवयोरपि पाति रक्षतीति पतिः। द्वितीयाबहुवचने यथा। स हरिर्वो युष्मान् नोऽस्मानव्यात् रक्षतु। चतुर्थीबहुवचने यथा। स वो युष्मभ्यं नोऽस्मभ्यं शिवं कल्याणं दद्यात्। षष्ठीबहुवचने यथा। स हरिर्वो युष्माकं नोऽस्माकमत्र लोके सेवितुमर्हः सेव्यः। ऋहलोर्ण्यदिति कर्मणि ण्यत्। कृत्यानां कर्तरि वेति षष्ठी। एकवाक्ये युष्मदस्मदादेशा वक्तव्याः। एकवाक्ये एकाख्यातेऽनयोः स्थाने उक्ता आदेशा भवन्ति। एकमाख्यातं यत्र तदिति बहुव्रीहिः एकाख्यातं वाक्यमुच्यते ॥ ननु पश्य मृगो धावति इत्यादावेकवाक्यत्वव्यवहारो न स्यात्। सत्यम्। एकाख्यातमित्यत्राख्यातं विशेषसमर्पकं विवक्षितम्। ततश्च पश्य मृगो धावतीत्यत्राख्यातद्वये सत्यपि पश्यैतस्यैव विशेषसमर्पकत्वान्नोक्तदोषः(क) ॥ तथा च वार्तिककारः। आख्यातं सविशेषणं वाक्यमि-

(क) अत्र तत्त्वबोधिनी। ननु ओदनस्त्वया पक्तव्यस्तव भविष्यतीत्यत्रातिप्रसङ्गः। पक्तव्योऽस्तीत्यध्याहारेण भिन्नवाक्यतासमर्थनेऽपि पश्य मृगो धावतीत्यादावेकवाक्यत्वव्यवहारो न स्यात्। सत्यम्। प्रकृतोपयोगित्वेनेदमुक्तम्। पश्य मृग इत्यादौ तु 'अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद् विभागे स्यात्' इति शास्त्रान्तरप्रसिद्धमेवेत्येक इति।

त्याह । त्वमोदनं पच तव भविष्यति । अत्र ते इत्यादेशो न वाक्यद्वयत्वात् । एकवाक्ये यथा । अहं ते तुभ्यमोदनं दास्यामि ॥ १५ ॥

(त०) त्वमाऽमा इति ॥ त्वा मा अमा इति च्छेदः । तेमयोरपवादोऽयम् । आमस्तु न ग्रहणम् एकवचनान्तस्थानिनिर्देशात् ॥ श्रीश इत्यादि । अवनकर्मत्वात्कर्मणि द्वितीया त्वा मेति ॥ ते मे दानपात्रत्वाच्चतुर्थ्येकवचनं तुभ्यं मह्यमित्यस्य स्थाने ॥ स्वाम्यादियोगे षष्ठीति षष्ठ्येकवचनं ते मे तव ममेत्यर्थः ॥ द्विवचनं दर्शयति । पातु वामपीति युवामावामित्यर्थः । कर्मत्वाद् द्वितीया ॥ सुखमिति वान्नौ युवाभ्यामावाभ्यामित्यर्थः । अत्रापि दानपात्रत्वाच्चतुर्थी पतिरिति । वांनौ युवयोरावयोरित्यर्थः । अत्रापि स्वाम्यादियोगे षष्ठीति षष्ठी ॥ बहुवचनं दर्शयति । सोऽव्याद्वो न इति ॥ वः युष्मान् नः अस्मान् स हरिः अव्यात् रक्ष्यादित्यर्थः ॥ शिवं वः नः युष्मभ्यमस्मभ्यमित्यर्थः । सेव्योऽत्र वः स नः । युष्माकमस्माकमित्यर्थः । कृत्ययोगे षष्ठी ॥ १५ ॥

(एतेऽनन्वादेशे वा) धाता ते तव भक्तोऽस्ति । अन्वादेशे नित्यम् । तस्मै ते नमः ॥ १६ ॥

(सु०) **एतेऽनन्वादेशे वा** वक्तव्याः ॥ एते तेमयादय आदेशाः । युष्मदस्मदोः स्थानेऽनन्वादेशेऽर्थे एते आदेशा विकल्पेन भवन्ति । अन्वादेशे नित्यम् । युष्मदस्मदोः स्थानेऽन्वादेशेऽर्थे एते आदेशा नित्यं स्युः ॥ अनन्वादेशेऽर्थे धाता ब्रह्मा ते भक्तस्तव भक्तोऽस्तीति वा ॥ अन्वादेशे तस्मै पूर्वोक्ताय ते तुभ्यं विष्णवे नमोऽस्तु ॥ १६ ॥

(त०) अनन्वादेश इति ॥ युष्मदस्मदोरिति सूत्रे ग्वौ वेत्यतो वेत्यनुवर्त्य तस्य व्यवस्थितत्वमाश्रित्य विकल्पः ॥ १६ ॥

नादौ ॥ वाक्यादौ पादादौ च वर्तमानयोर्युष्मदस्मदोर्नैते ॥ त्वां पातु । 'वेदैरशेषैः संवेद्योऽस्मान् कृष्णः सर्वदाऽवतु' ॥ १७ ॥

(सु०) **नादौ** ॥ वाक्यादौ मा भूत् । यथा त्वां पातु । पादादावपि मा भूत । यथा कृष्णोऽस्मान् सर्वदा सर्वस्मिन् कालेऽवतु पातु । कीदृशः । अशेषैः समस्तैर्वेदैः कृत्वा संवेद्यो ज्ञायमानः । संवेत्तुं योग्यः संवेद्यः । कर्मणि ध्यण् ॥ १७ ॥

(त०) नादाविति ॥ आदित्वं च सत्यन्यस्मिन् यस्मात्पूर्वं नास्तीति वचनात्स्वप्राग्वर्णान्तरशून्यत्वम् । सत्यन्यस्मिन्निति विशेषणरहितलक्षणमन्ये वदन्ति । त्वमदादीनां तु नायं निषेधः । मध्येऽपवादाः पूर्वान्विधीन् बाधन्ते नोत्तरानिति न्यायात् ॥ योगविभागसामर्थ्यादनन्तरस्येति न्यायं बाधित्वा त्वामाऽमेत्यस्यैव न निषेधः । अन्यथा त्वामाऽमा नादावित्येकयोगमेवाकरिष्यत् ॥ १७ ॥

विशेष्यपूर्वं सम्बोधनेतरपूर्वं सम्बोधनं च हित्वाऽन्यस्मात्सम्बोधनात्परयोर्नैते ॥ 'देवास्मान् पाहि नृहरे विष्णोऽस्मान् रक्ष सर्वदा ।' विशेष्यपूर्वात्तु । 'हरे कृपालो नः पाहि सर्वदा रक्ष देव नः॥' १८

(सु०) **विशेष्यपूर्वं सम्बोधनेतरपूर्वं सम्बोधनं च हित्वाऽन्यस्मात्स-**

म्बोधनात्परयोर्नैते ॥ सम्बोधनात्परयोर्युष्मदस्मदोः स्थाने एते आदेशा न भवन्ति । किं कृत्वा । विशेष्यं पूर्वं यस्य तत् एतादृशं विशेषणात्मकं सम्बोधनं त्यक्त्वा । च पुनः सम्बोधनादितरत् पदं पूर्वं यस्य तत् एतादृशं सम्बोधनं त्यक्त्वा । विशेष्यपूर्वात् सम्बोधनेतरपूर्वाच्च सम्बोधनात् परयोर्युष्मदस्मदोः स्थाने एते आदेशा भवन्तीत्यर्थः । हे देव त्वमस्मान् पाहि रक्षेत्यर्थः । हे नरसिंहावतारे हे विष्णो त्वमस्मान् रक्ष पालयेत्यत्र सम्बोधनात्परस्यास्मानित्यस्य नसादेशो न जातः । विशेष्यपूर्वात्सम्बोधनात्तु स्युरेव । यथा । हे हरे कृपाऽस्यास्ति कृपालुस्तस्य सम्बोधनं हे कृपालो त्वं नोऽस्मान्पाहि । हरे इति विशेष्यं कृपालो इति विशेषणम् । सम्बोधनेतरपूर्वात्सम्बोधनात्तु यथा । हे देव त्वं नोऽस्मान् सर्वस्मिन्काले रक्षेत्यत्र देवेति सम्बोधनस्य सत्त्वेऽपि ततः प्राचीनं रक्षेत्याश्रित्यादेशः ॥ १८ ॥

(त०) नेति योगविभागादन्यत्रापि नेत्याशयेनाह ॥ विशेष्यंपूर्वमित्यादि ॥ विशेष्यं पूर्वं यस्मात् तद्विशेष्यपूर्वं सम्बोधनम् । सम्बोधनेतरपूर्वमिति । सम्बोधनादितरत्सम्बोधनेतरपूर्वं यस्य तद्द्वयमपि हित्वा त्यक्त्वेत्यर्थः ॥ १८ ॥

चादिभिश्च ॥ च वा ह अह एव एभिर्योगे नैते (क) । 'आवयोर्युवयोश्चेशो हरिर्मामेव रक्षतु ॥' १९ ॥

(सु०) **चादिभिश्च** ॥ चादिगणस्थाः पञ्चैव चादयो ग्राह्या न त्वधिकाः लक्ष्यानुरोधात् । सहयोगे तृतीया । तथा साक्षात्सम्बन्धो गृह्यते न तु परम्परासम्बन्धः (ख) । यत्र युष्मदस्मदर्थगतान्समुच्चयादीन् चादयो द्योतयन्ति तदा चादिभिः सहार्थद्वारा युष्मदस्मदोः साक्षात्सम्बन्धस्तत्रायं निषेध इत्यर्थः । यथा । आवयोर्द्वयोर्युवयोर्द्वयोश्च समुच्चये हरिरीशः स्वामीत्यर्थः ॥ वा विकल्पे । ह प्रसिद्धौ । अह पूजायाम् । एवावधारणे । परम्परासम्बन्धे तु स्युरेव । यथा । हरो हरिश्च मे स्वामीत्यत्र चशब्दो हरहरिगतं समुच्चयं वक्ति । हरिहराभ्यां सहास्मदः सम्बन्धो न तु समुच्चयेन । किन्तु परम्परासम्बन्धोऽस्ति । लक्षणं तु समुच्चीयमानादर्थान्तरसम्बन्धः परम्परासम्बन्धः ॥ १९ ॥

(त०) चादिभिरिति ॥ लक्ष्यानुरोधाच्चादिपञ्चकस्यैव योगे नान्यस्येत्यर्थः । साक्षाद्योगे एवायं निषेधः । परम्परासम्बन्धे तु आदेशाः स्युरेव । 'हरो हरिश्च मे स्वामी' इत्यादि ॥ १९ ॥

अचाक्षुषज्ञानार्थधातुभिर्योगे च न ॥ चेतसा त्वां समीक्षते । भक्तस्तव रूपं ध्यायति (ग) चाक्षुषज्ञाने तु भक्तस्त्वा पश्यति चक्षुषा ॥२०॥

(सु०) **अचाक्षुषज्ञानार्थधातुभिर्योगे च न** ॥ अचाक्षुषज्ञानमर्थो येषां ते अचाक्षुषज्ञानार्थाः । अचाक्षुषज्ञानार्थाश्च ते धातवश्च अचाक्षुषज्ञानार्थधातवस्तैर्योगे नैते आ-

---

(क) चादिभिरिति । समुच्चयविकल्पाद्भुतखेदावधारणार्थानां चादीनामन्यतमेन योग इत्यर्थः ।

(ख) साक्षादिति । युष्मदस्मदर्थगतसमुच्चयादिद्योतकत्व इत्यर्थः । परम्परेति । स्वार्थान्वय्यन्वयित्वादिरूप इत्यर्थः ।

(ग) चेतसेति । चाक्षुषं नाम चक्षुरिन्द्रियसन्निकर्षजन्यम् । तद्भिन्नमचाक्षुषम् ।

देशा भवन्ति ॥ यथा स भक्तः चेतसा चित्तसम्बन्धिध्यानेन त्वां समीक्षते पश्यतीत्यर्थः । परम्परासंबन्धेऽपि निषेधः (क) । यथा भक्तस्तव रूपं ध्यायति ॥ २० ॥

(विद्यमानपूर्वात्प्रथमान्तात्परयोरन्वादेशेऽप्येते वा)

'भक्तस्त्वमप्यहं तेन हरिस्त्वां त्रायते स माम्' त्वा मेति वा ॥२१॥

इति युष्मदस्मत्प्रक्रिया ॥ १३ ॥

(सु०) **विद्यमानपूर्वात्प्रथमान्तात्परयोरन्वादेशेऽप्येते वा** ॥ विद्यमानं पदं पूर्वं यस्य स विद्यमानपूर्वस्तस्मात् प्रथमान्तात्परयोर्युष्मदस्मदोरन्वादेशे अर्थेऽपि वाऽऽदेशा भवन्ति । अन्वादेशे नित्यमित्यविशेषोक्त्या नित्यत्वे प्राप्ते विकल्पार्थमिदं वचनम् । यथा त्वं भक्तोऽहमपि भक्तस्तेन हरिस्त्वां मां त्रायते पालयतीत्यर्थः ॥ अत्र तेनेति पूर्वं विद्यमानं पदं ततो हरिरिति प्रथमान्तं ततः परस्य युष्मच्छब्दस्य त्वादेशः । उत्तरत्र त्रायते इति विद्यमानं पदं ततः सः इति प्रथमान्तं ततः परस्यास्मच्छब्दस्य मादेशो बोध्यः ॥ २१ ॥

इति सुबोधिन्यां युष्मदस्मत्प्रक्रिया ॥ १३ ॥

(त०) भक्त इत्यादि । अत्र केचित् । येन हरेस्त्वं भक्तस्तेनैव कारणेनाहमपि भक्त इति योज्यम् । यदि तेनेत्यनेन भक्तत्वं त्राणे हेतुर्निर्दिश्यते तदा सापेक्षत्वविधानत्वमेव तदिममितिवदन्वादेशो न स्यादिति तन्नेति दीक्षिताः । तथाहि । सापेक्षत्वविधानेऽन्वादेशत्वं नास्तीति तावदसङ्गतम् । आदेशो हि विधिः किंचिद्विधाय पश्चादितरविधिश्चान्वादेशः न तु निरपेक्षत्वगर्भः । अशब्दार्थत्वात् शास्त्रे तथा परिभाषितत्वाच्च । न च प्रयोगदर्शनादेव तथा कल्प्यत इति वाच्यम् । 'तदेनमुल्लङ्घितशासनं विधेर्विधेहि कीनाशनिकेतनातिथिम्' (ख)इत्यादौ सापेक्षत्वेऽपि एनदादेशदर्शनात् । नक्तं भीरुरयम्' इति तु न विधिः किं त्वनुवादः । अतस्तदिममिति न विरुध्यते । एवं स्थिते येन त्वं भक्त इति यच्छब्दाध्याहारक्लेशो व्यर्थः । किन्तु तेन त्रायत इत्येव सम्बन्धः प्रक्रान्तार्थत्वाच्च न यच्छब्दापेक्षेति ॥ तेनेति विद्यमानपदम् । हरिरिति प्रथमान्तम् । ततः परस्यादेशः । तथा त्रायत इत्यस्मात्परः स इति प्रथमान्तम् । न च त्रायत इति भिन्नवाक्यस्थमिति भ्रमितव्यं स हरिस्त्वा मा त्रायत इति तन्त्रेणानेकसम्बन्धात् ॥ २१ ॥

इति तत्त्वदीपिकायां युष्मदस्मत्प्रक्रिया ॥ १३ ॥

(क) **परम्परेति** । स्वान्वितान्वयित्वादिरूप इत्यर्थः ।

इति चक्रधराख्यायां टिप्पण्यां युष्मदस्मत्प्रक्रिया ॥ १३ ॥

(ख) सम्पूर्णश्लोको यथा—

"तदेनमुल्लंघितशासनं विधेर्विधेहि कीनाशनिकेतनातिथिम् ।

शुभेतराचारविपक्त्रिमापदो विपादनीया हि सतामसाधवः" ॥ इति शिशुपालवधे प्रथमसर्गे, ७३ ॥

नक्तं भीरुरिति । सम्पूर्णश्लोकः १४० संख्यकपत्रे द्रष्टव्यः ।

अथाऽव्ययानि ॥ १४ ॥

(चादिर्निपातः) (क) च । वा । ह । अह । एव । एवम् । नूनम् । पृथक् । शश्वत् । युगपत् । भूयस् । नह । हन्त । विना । नाना । स्वस्ति । अस्ति । दोषा । नक्तम् । मृषा । मिथ्या । मिथस् । अथ । अथो । अहो । ह्यस् । श्वस् । उच्चैस् । शनैस् । ऋधक् । ऋते । आरात् । दिवा । रात्रौ । सायम् । चिरम् । मनाक् । ईषत् । जोषम् । तूष्णीम् । बहिस् । अवस् । समया । निकषा । अद्धा । इद्धा । वत् । उपधा । सामि । सना । सनत् । सनात् । तिरस् । अन्तरा । अन्तरेण । सहसा । अलम् । वषट् । क्षमा । विहायसा । मुधा । पुरा । मिथो । प्रायस् । मुहुस् । सार्द्धम् । साकम् । नमस् । हिरुक् । धिक् । मा । माङ् । अम् । आम् । नेत् । चेत् । काचित् । उञ् । यत् । सत्यम् । जातु । कम् । शम् । ज्योक् । रहसि । अभीक्ष्णम् । अनेहा । आ । आत् । न्व । द्वै । रै । किम् । यत् । तत् । इति । हम् । हो । स्वर् । अन्तर् । प्रातर् । पुनर् । सनुतर् । यावत् । तावत् । स्वाहा । स्वधा । तथाहि । खलु । किल । सुष्ठु । दुष्ठु । आदह ॥ १ ॥

(क) **निपात इति** । निश्चयेन पतत्यनेकेषु अर्थेष्विति निपात इत्यन्वर्थः । अद्रव्याणामेव चादीनां निपातत्वदर्शनादद्रव्यार्थाश्चादयो निपातसंज्ञका भवन्तीत्यर्थः ।

ततश्च चश्चोरशशाङ्कयोरित्याद्यभिधानाच्चादीनां चौरादिद्रव्यवाचित्वे निपातत्वं न । उक्तं च—"वस्तूपलक्षणं यत्र सर्वं नाम प्रयुज्यते । द्रव्यमित्युच्यतेसोऽर्थो भेद्यत्वेन विवक्षितः । इति ॥ अत्र माधवः—ननु कथं निपातसंज्ञाविधीयते । ओनिपात इति सन्धिनिषेधार्थमिति चेन्न, स ओ अव्ययमित्येव तस्य सिद्धत्वात् । तथा हि आकार ओकारान्तमेकस्वरश्चाव्ययं सन्धिं न प्राप्नोति । अव्ययसंज्ञा तु चादीनामप्यस्त्येव । एवं तर्हि अन्वर्थसंज्ञाविज्ञानार्थसंज्ञा महती च क्रियते । तथा चोक्तम्—

निपाताश्चोपसर्गाश्च धातवश्चेति ते त्रयः । अनेकार्थाःस्मृताः सर्वे पाठस्तेषां निदर्शनम् ॥

अत्रेदं तन्त्रान्तरमतम्, तथा हि जगदीशः—

"स्वार्थे शब्दान्तरार्थस्य तादात्म्येनान्वयाक्षमः । सुबाद्यन्यो निपातोऽसौ विविधश्चादिभेदतः" ॥इति॥

यः शब्द केवले यादृशस्वार्थे शब्दान्तरार्थस्य तादात्म्येनान्वयबोधं प्रत्यसमर्थः, सुबादिप्रत्ययेभ्यः प्रत्येकं भिन्नः, स तादृशार्थे निपातः । चादयो निपाताः स्वार्थे समुच्चयादौ नामार्थस्याभेदेनान्वयबोधं प्रत्ययोग्याः ।

न हि स्मृतमनुभूतञ्चेत्यादितः कस्यापि स्मृतः समुच्चय इत्यादिरनुभवः, किन्तु स्मृतानुभूतयोः समुच्चय इत्यादिरेव । स्तोकं पचतीत्यादौ धातुरपि स्वार्थे नामार्थस्य तादात्म्यं बोधयंस्तत्समर्थः एव । प्रत्ययस्तु सुबादिरेव, च शब्द इत्यादौ नामार्थस्याभेदस्याकाङ्क्षश्चकारादिः स्वपरतायां न निपातः किन्तु नामैव । पुरन्दरप्रभृतौ तु नाम्नि निपातव्यपदेशः सूत्रानिष्पाद्यत्वप्रयुक्तो भाक्तः । "कार्त्तिक्यादौ यत्र दानं तदत्यन्तविनिन्दित" मित्यादौ न केवले नञर्थे यदर्थस्य तादात्म्येनान्वयः, किन्तु दानाद्यवच्छिन्ने । स्वर्दिवा नक्तमाद्यव्ययमपि नामैव न तु निपातः । शोभनं स्वरित्यादौ तदर्थे नामार्थस्य तादात्म्येनान्वयात् । प्रादयस्तूपसर्गा न सार्थकाः । सार्थकाश्चेन्निपाता अपि" । इत्यादि प्रतिपादितं स्वलक्षणव्याख्यानावसरे जगदीशेन । विस्तरस्तुशब्दशक्तिप्रकाशिकायां द्रष्टव्यः ।

(सु०) **चादिर्निपातः** ॥ च आदिर्यस्य स चादिः । निश्चयेन पतत्यनेकेष्वर्थेषु द्योतकत्वादिति निपातः । पत्लृ, पतने । अस्माज्ज्वलादेर्ण इति णप्रत्ययः । असत्ववाचिनामेव चादीनां निपातसंज्ञा अव्ययसंज्ञा च भवति । स्वरादीनां तु सत्त्ववाचिनामसत्त्ववाचिनां चाव्ययसंज्ञैव न निपातसंज्ञा । स्वस्ति वाचयति स्वः पश्यति स्वः पततीत्यादौ कर्मादिकारकयोगेन सत्त्ववाचकत्वं स्वरादीनां द्रष्टव्यमेव । एकस्वराणां निपातानां सन्धिर्न भवतीति निपातसंज्ञाफलम् । एकस्वराणां स्वरादीनां तु सन्धिर्भवत्येव तेषां निपातसंज्ञाभावात् ॥ चेति समुच्चयान्वाचयेतरेतरयोगसमाहारेषु । 'वा स्याद्विकल्पोपमयोरिवार्थेऽपि समुच्चये ॥' हेति प्रसिद्धौ ॥ अहेति पूजायाम् ॥ एवेत्यवधारणे अनवक्लृप्तौ उपमायां च ॥ एवमित्युक्तपरामर्शे ॥ नूनमिति निश्चये वितर्के च ॥ पृथगिति भिन्नार्थे ॥ शश्वदिति पौनःपुन्ये नित्ये सहार्थे च ॥ युगपदित्येककाले ॥ भूयसिति पुनरर्थे अधिक्ये च ॥ नहेति प्रत्यारम्भे ॥ हन्तेति हर्षे विषादे अनुकम्पायां वाक्यारम्भे च ॥ विनेति वर्जने ॥ नानेत्यनेकविनार्थयोः । स्वस्तीति मङ्गले ॥ अस्तीति सत्तार्थे ॥ दोषेति रात्रौ वृथेति व्यर्थे ॥ मृषेति वितथे ॥ नक्तमिति रात्रौ ॥ मिथ्येति वितथे ॥ मिथसिति रहःसहार्थयोः ॥ अथेति मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्याधिकारप्रतिज्ञासमुच्चयेषु ॥ अथो इत्यथवत् ॥ अहो इति विकल्पे चेदर्थेऽपि ॥ ह्यसिति अतीतेऽह्नि ॥ श्वसिति अनागते दिने ॥ उच्चैसिति महति ॥ नीचैसिति अल्पेऽर्थे ॥ शनैसिति क्रियामान्द्ये ॥ ऋधगिति सत्ये ॥ वियोगशीघ्रसामीप्यलाघवेष्वित्यन्ये ॥ ऋते वर्जने ॥ आरादिति दूरसमीपयोः ॥ दिवेति दिवसे ॥ रात्राविति निशि ॥ सायमिति निशामुखे ॥ चिरमिति बहुकाले ॥ मनाक्, ईषत्, इमावल्पे ॥ जोषमिति सुखे मौने च ॥ तूष्णीमिति मौने ॥ बहिस्, अवस्, इमौ बाह्ये ॥ समयेति समीपे मध्ये च ॥ निकषेति समीपे ॥ अद्धेति स्फुटावधारणयोः । तत्त्वातिशययोरित्यन्ये ॥ इद्धेति प्राकाश्ये ॥ वत् 'वत्तुल्ये' इत्यादिना विहितो यो वत्प्रत्ययः स इह गृह्यते । प्रत्ययमात्रस्य संज्ञायां प्रयोजनाभावात् प्रत्ययान्तं ग्रहीतव्यम् । यथा । ब्राह्मणवत् ॥ क्षत्रियवत् ॥ उपधेति भेदे ॥ सामीत्यर्द्धजुगुप्सितयोः ॥ सना, सनत्, सनात्, एते त्रयो नित्ये ॥ तिरसिति अन्तर्द्धौ तिर्यगर्थे परिभवे च ॥ अन्तरेति मध्ये विनार्थे च ॥ अन्तरेणेति वर्जने । सहसेति आकस्मिकाविमर्शयोः ॥ अलमिति भूषणपर्याप्तिशक्तिवारणनिषेधेषु ॥ वषडिति हविर्दाने ॥ क्षमेति क्षान्तौ ॥ विहायसेति वियदर्थे ॥ मुधेति व्यर्थे ॥ पुरेति अविरते चिरातीते भविष्यदासन्ने च ॥ मिथो इति रहःसहार्थयोः ॥ प्रायसिति बाहुल्ये ॥ मुहुसिति पुनरर्थे ॥ साकम्, सार्धमेतौ सहार्थे ॥ नमसिति नतौ ॥ हिरुगिति वर्जने ॥ धिगिति निन्दाभर्त्सनयोः ॥ मा, माङ्, एतौ निषेधाशङ्कयोः ॥ अमिति शैघ्र्येऽल्पे च ॥ आमिति अङ्गीकारे ॥ नेदिति शङ्काप्रतिषेधविचारसमुच्चयेषु ॥ चेदिति यद्यर्थे ॥ कच्चिदितीष्टप्रश्ने च ॥ ननिति सन्तर्कसम्बोधनपूरणेषु ॥ यदीति पक्षान्तरे ॥ सत्यमिति प्रश्नप्रतिषेधसत्येषु ॥ जात्विति कदाचिदर्थे ॥ कमिति वारिमूर्द्धनिन्दासुखेषु ॥ समिति सुखे ॥ ज्योगिति कालभूयस्त्वे प्रश्ने शीघ्रार्थे सम्प्रत्यर्थे च ॥ रहसीत्येकान्ते ॥ अभीक्ष्णमिति पौनःपुन्ये ॥ अनेहा इति विस्मयविषादशोकजुगुप्सार्तिषु ॥ आ इति भयाश्चर्ययोः ॥ आदिति शङ्कायाम् ॥ स्वै विशेषवितर्कयोः ॥ द्वै वितर्के ॥ रै दाने अनादरे च । रै करोति ददातीत्यर्थः । रै

त्वं किं वदसीति ॥ किमिति पृच्छाजुगुप्सेषदर्थातिशयेषु ॥ यदिति कारणे ॥ तदिति हेतौ ॥ इतीति हेतुप्रकारप्रकर्षवमर्थव्यवस्थास्वरूपविवक्षानियमसमाप्तिप्रकृतवक्ष्यमाणपरामर्शमतेषु ॥ ईहो इति विचारे ॥ स्वरिति स्वर्गे परलोके च ॥ अन्तरिति मध्ये प्रातरिति प्रत्यूषे ॥ पुनरित्यप्रथमे विशेषे च ॥ मनुतरित्यन्तर्द्धाने ॥ स्वराद्याः पञ्च रान्ताः ॥ यावत्तावदेतौ साकल्यावधिमानावधारणेषु । साकल्ये यावत्कार्यं तावत्कृतम् । अवधौ यावन्नृत्तव्यं तावत्तिष्ठामि । माने यावद्दत्तं तावद्भुक्तम् । अवधारणे यावदमत्रं तावद् ब्राह्मणानामन्त्रयस्वेति ॥ स्वाहेति देवताभ्यो दाने ॥ तथाहीति निदर्शने ॥ खल्विति निषेधवाक्यालङ्कारनिश्चयेषु किलेति वार्तायामलीके च ॥ नु वितर्के ॥ ननु इति प्रश्नावधारणानुज्ञेच्छामन्त्रेषु वाक्यारम्भादावपि ॥ सुष्ठु प्रशंसायाम् । दुष्ठु निकृष्टार्थे ॥ आद्दहेत्युपक्रमहिंसाकुत्सनेषु ॥ १ ॥

(त०) चादिर्निपात इति ॥ च आदिर्यस्य स चादिः । आदिशब्दो व्यवस्थावाची । प्रकारार्थ इत्यन्ये । तेनानुक्तानामपि संग्रहः । निश्चयेन पतन्त्यनेकेष्वर्थेषु द्योतकत्वान्निपाताः । ज्वलादेर्णः । "निपाताश्चोपसर्गाश्च धातवश्चेति ते त्रयः । अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शनम् ॥" इति केचित् । निपातसंज्ञा तु स्वरादीनां सन्धिनिषेधाभावार्थमिति निष्कर्षः (क) ॥ १ ॥

(**उपसर्गस्वरविभक्तिप्रतिरूपकाश्च**) अवदत्तम् । अहंयुः । हेतौ । स्वयम् । उत । मत्र । स्वधा । स्म । अहम् । अस्मि । वै । शश्वत् । दिष्ट्या । अ । आ । इ । ई । उ । ऊ । ऋ । ॠ । ऌ । ए । ऐ । ओ । औ । पशु । शुकम् । यथाकथा च । पाट् । प्याट् । अङ्ग । हे । है । भोः । अये । द्य । विषु । रे । अरे । एकपदे । द्राक् । मङ्क्षु । युत् । आतः । श्रौषट् । वौषट् । इत्यादि । तत्रादिर्विभक्त्यर्थे निपात्यते ॥ तस्मिन्निति तत्र । अस्मिन्निति अत्र । यस्मिन्निति यत्र । कस्मिन्निति कुत्र । क । कुह । तेन

(क) "प्रणम्य पितरं शान्तं श्रीमत्क्षेमङ्कराभिधम् । अव्ययार्थं प्रकटये पूर्वाचार्यैरुदीरितम् ॥ १ ॥ च पुनरादौ ॥ वा विकल्पे ॥ ह स्फुटपादपूरणयोः ॥ हि निश्चये ॥ अहह खेदे ॥ एव अवधारणे ॥ एवमङ्गीकारे ॥ नूनं निश्चये ॥ पृथग्भिन्नार्थे ॥ अन्तरेण वर्जनार्थे ॥ स्वस्ति कल्याणे ॥ अस्ति सत्तायाम् ॥ दोषा, नक्तम्, रात्रौ ॥ मृषा, मिथ्या, असत्ये । मिथस् अन्योऽन्यार्थे ॥ अथ, अथो, आनन्तर्ये ॥ ह्यः पूर्वदिने ॥ श्वः परदिने ॥ उच्चैस् उच्चे ॥ नीचैस् नीचे ॥ स्वर् स्वर्गे ॥ अन्तर् मध्ये ॥ प्रातर् प्रत्यूषे ॥ पुनर् भूयस्, पौनःपुन्ये ॥ अहोस्वित् वितर्के ॥ अन्तरा मध्ये । अलं भूषायाम् ॥ कृतं वारणे ॥ ईषदल्पे ॥ किल; खलु, वै इति निश्चये ॥ आरात् दूरान्तिकयोः ॥ भृशमत्यर्थे ॥ यत् यत्कारणे ॥ तत् तत्कारणे ॥ शश्वत् सातत्ये ॥ अ सम्बोधने अधिक्षेपे निषेधे च ॥ आ नयाश्चर्ययोः वाक्यस्मरणयोः ॥ इ, ई, भर्त्सने ॥ उ, ऊ, दुःखवितर्कयोः ॥ ऋ, ॠ, ऌ, गणस्तोमे ॥ ए सम्बोधने ॥ ऐ आश्चर्ये ॥ ओ भवत्वर्थे ॥ औ अङ्गीकारे ॥ श्रौषट्, वौषट् वषडिति हविर्दाने ॥ तत्क्षणे सद्यः ॥ अस्मिन् दिने अद्य ॥ अस्मिन्क्षणे अधुना । इदानीम्, साम्प्रतं, सम्प्रति त्रयमपि ॥ पूर्वस्मिन्दिने पूर्वेद्युः ॥ अन्यस्मिन्दिने अन्येद्युः ॥ प्र प्रकर्षेषु निराकरणे ॥ सं सम्यगर्थे ॥ अनु पश्चादर्थे ॥ अव स्थितिज्ञानयोः ॥ निर् निर्गतार्थे ॥ दुर् दुःखे ॥ अभि आभिमुख्ये वि विशेषार्थे ॥ आङ् समानार्थे ॥ नि निधने ॥ अति अतिशये ॥ अधि अधिके ॥ अपि सम्भावनायाम् ॥ प्रति वीप्सायाम् ॥ परि वर्जने ॥ उप समीपे ॥ श्रत् श्रद्धायाम् ॥ अन्तर् मध्ये ॥ अपि प्राकट्ये ॥ सु

प्रकारेण तथा । सर्वथा । कथम् । इत्थम् । अस्मादिति इतः । एतस्मादित्येततः । ततः । यतः सर्वतः । कुतः । बहुतः । सार्वविभक्तिकस्तसित्येके ॥ आदितः । मध्यतः । अन्ततः । पूर्वस्मिन्निति पुरः । पुरस्तात् । अधः। अधस्तात् । उपरि । उपरिष्टात् । परास्मिन्निति परेण । दक्षिणेन । दक्षिणा । दाक्षिणतः । उत्तरतः । दक्षिणस्यां दिशि दुरे दक्षिणा । दक्षिणाहि ॥ राजाधीनं राजसात् । सर्वं भस्म । भस्मसात् ॥ ऊररी ऊरी उररी विस्ताराङ्गीकारयोः ॥ सद्यआदिः काले समानेऽह्नि सद्यः । अद्य । अधुना । इदानीम् । तस्मिन् काले । तदा । यदा । कदा । सर्वदा । एकदा । अन्यदा । सपदि । साम्प्रतम् । झटिति । तूर्णम् । आशु । शीघ्रम् । पूर्वेद्युः । परेद्युः । परेद्यवि । ऐषमः । परुत् । परारि । अन्येद्युः । अन्यतरेद्युः । उभयेद्युः । तर्हि । यर्हि । कर्हि । एतर्हि ॥ २ ॥

(सु०) उपसर्गविभक्तिप्रतिरूपकाश्च ॥ उपसर्गप्रतिरूपको यथा अवदत्तमिति । दो दत्तीति दथादेशः । इह अवस्यानुपसर्गत्वात्स्वरान्तो वेति तकारो न भवति ॥ स्वरप्रतिरूपको यथा । अ आ इत्यादि ॥ विभक्तिप्रतिरूपको यथा । अहंयुः । अहमिति सिबन्तप्रतिरूपकमहङ्कारे वर्तते । ऊर्णाहंशुभम्भ्यो युरिति युः ॥ यदाऽस्मच्छब्दान्निष्पन्नोऽहंशब्दस्तस्मात् प्रत्ययः क्रियते तर्हि समासप्रत्यययोरिति लुकि सति अस्मद्यु इति स्थिते मदीय इत्यत्रेव मदादेशे मद्युरिति स्यादिति भावः ॥ हेताविति निमित्ते ॥ स्वयमित्यात्मनेत्यर्थे ॥ उतेति विकल्पे । नञिति निषेधेषदर्थविक्षेपेषु तदन्यतद्विरुद्धतदभावेषु च ॥ स्वधेति पितृभ्यो दाने ॥ स्मेत्यतीते पादपूरणे च ॥ अस्मीत्यहमित्यर्थे ॥ वै पादपूरणेविशेषेऽपि ॥ शम्बडित्यन्तःकरणे आभिमुख्ये च ॥ नोनिषेधे ॥ दिष्ट्या इत्यानन्दे । स्वजनदर्शनप्रातिलोम्येष्वित्यन्ये ॥ अ इति सम्बोधनेऽधिक्षेपे निषेधे च ॥ आ इति वाक्यस्मरणयोः ॥ इ इति सम्बोधनजुगुप्साविस्मयेषु ॥ ई भर्त्सने ॥ उ ऊ दुःखवितर्कयोः ॥ ऋ ॠ ऌ गानसमूहे ॥ ए सम्बोधने ॥ ऐ आश्चर्ये ॥ ओ सम्बोधने ॥ औ अङ्गीकारे ॥ पशु सम्यगर्थे ॥ शुकम् शैघ्र्ये ॥ यथाकथाचेत्यनादरे । पाट , प्याट् ,

---

पूजायाम् ॥ सनुतरित्यन्तर्धाने ॥ ऋधगिति सत्ये । वियोगशीघ्रसामीप्यलाघवेष्वित्यन्ये ॥ युगपदिति एककाले ॥ मनाक् इति ईषदर्थे ॥ ईषदित्यल्पे ॥ जोषमिति सुखमौनयोः ॥ तूष्णीमिति मौने ॥ बहिस् इति बाह्ये ॥ अधसिति बहिरर्थे ॥ समयेत्यन्तिकमध्ययोः ॥ निकषेत्यन्तिके ॥ स्वयमिति आत्मनेत्यर्थे ॥ वृथेति व्यर्थे ॥ नञिति निषेधेषदर्थविक्षेपेषु तदन्यद्विरुद्धतदभावेष्वपि ॥ हेताविति निमित्तार्थे ॥ इद्धेति प्राकाश्ये ॥ अद्धेति स्फुटावधारणयोः ॥ तत्त्वातिशयोरित्येके ॥ सामीत्येतदर्द्धजुगुप्सितयोः ॥ सनेति नित्ये ॥ उपधेति भेदे ॥ सनादिति नित्ये ॥ सनदित्यपि ॥ तिरस् इति अन्तर्द्धौ तिर्यगर्थे वा ॥ अन्तरेति मध्यविनार्थयोः ॥ ज्योगिति कालभूयस्त्वप्रश्नयोः शीघ्रार्थे सम्प्रत्यर्थेऽपि ॥ कमिति वारिमूर्द्धनिन्दासुखेषु ॥ शमिति दुःखोपशमे ॥ सहसेत्याकस्मिकाविमर्शयोः ॥ नानेत्यनेकविनार्थयोः ॥ स्वस्तीति पुण्याशीःक्षेममङ्गलप्रत्यभिवादेषु ॥ स्वाहेति देवदाने ॥ स्वधेति पितृदाने ॥ अलमिति भूषणपर्याप्तिशक्तिवारणनिषेधेषु ॥ अन्यदिति अन्यार्थे ॥ उपांशु इति अप्रकाशोच्चारणरहस्ययोः ॥ क्षमेति क्षान्तौ ॥ विहायसेति

अङ्ग, हे, है, भोः, अये (यि) इते सम्सम्बोधने ॥ घेति हिंसाप्रतिलोम्यपादपूरणेषु ॥ विषु इति नानार्थे ॥ रे, अरे एतौ नीचामन्त्रणे ॥ एकपदे इत्यकस्मादित्यर्थे ॥ द्राक् मङ्क्षु, एतौ शैघ्र्ये ॥ युत् इति कुत्सायाम् । आतः इतीतोऽपीत्यर्थे ॥ श्रौषट्, वौषट्, एतौ हविर्दाने ॥ अन्येऽपि सन्ति । तथाहि । कामम् स्वाच्छन्द्ये ॥ प्रकाममित्यतिशये । साम्प्रतमिति न्याय्ये ॥ परमिति किन्त्वर्थे ॥ साक्षादिति प्रत्यक्षे ॥ साचीति तिर्यगर्थे संवदिति वर्षे ॥ अवश्यमिति निश्चये ॥ उषेति रात्रौ । ओमिति अङ्गीकारे ब्रह्मणि च ॥ भूरिति पृथिव्याम् ॥ भुव इत्यन्तरिक्षे ॥ कु कुत्सितेषदर्थयोः ॥ अञ्जसेति तत्त्वशीघ्रार्थयोः ॥ मिथु इति द्वावित्यर्थे ॥ अस्तमिति विनाशे ॥ स्थाने इति युक्ते ॥ वरमिति ईषदुत्कर्षे ॥ सुदीति शुक्लपक्षे ॥ वदीति कृष्णपक्षे ॥ तुमिति तुङ्कारे ॥ आहेति उवाचेत्यर्थे ॥ आसेति बभूवेत्यर्थं ॥ आयेति प्रतिबन्धे । असीति त्वमित्यर्थवाक्यालङ्कारयोः । प्रहीति प्रैषानुज्ञावसरेषु । वामिति युवामित्यर्थे । चटु, चाटु, एतौ प्रियवाक्ये । एवमन्येऽप्यूह्याः ॥ तत्रादिर्विभक्त्यर्थे । आदिशब्दः प्रकारे वर्तते गणाभावात् । विभक्तीनामर्थोऽभिधेयो योऽपादानादिस्तस्मिन्नर्थे तत्रादिर्निपात्यते । तत्र आदिर्यस्य स तत्रादिः शब्दसमूह इत्यर्थः ॥ तस्मिन्निति तत्र ॥ अस्मिन्नित्यत्र ॥ यस्मिन्निति यत्र ॥ कस्मिन्निति कुत्र, क्व ॥ तेन प्रकारेण तथा ॥ सर्वेण प्रकारेणेति सर्वथा ॥ केन प्रकारेणेति कथम् ॥ अनेन प्रकारेण एतेन प्रकारेण वेतीत्थम् ॥ तस्मात्तस्या वेति ततः ॥ यस्मात् यस्या वेति यतः ॥ कस्मात् कस्या वेति कुतः ॥ सर्वस्मात् सर्वस्या वेति सर्वतः ॥ बहोरिति बहुतः ॥ पूर्वस्मिन् देशे पूर्वस्माद्देशात्पूर्वो वा देशः पुरः पुरस्तात् । अधः अधस्तात् उर्ध्वे ऊर्ध्वात् ऊर्ध्वो वेति उपरि उपरिष्टात् ॥ दक्षिणस्मिन् दक्षिणो वेति दक्षिणेन । दक्षिणस्यां दिशि दूरे इति दक्षिणा दक्षिणाहि ॥ उत्तरस्मादुत्तरस्या वेति उत्तरतः ॥ उत्तरस्यां दिशि दूरे इति उत्तराहो उत्तरा । स भवानिति ततोभवान् तत्रभवान् । तं भवन्तमिति ततोभवन्तम् तत्रभवन्तम् । तेन भवतेति ततोभवता तत्रभवता । तस्मै भवते इति तातोभवते तत्रभवते । तस्माद्भवतः इति ततो भवतः तत्रभवतः । तस्य भवत इति ततोभवतः तत्रभवतः तस्मिन्भवति इति ततोभवति तत्रभवति ॥ सप्तआदिः

वियदर्थे ॥ पुरेति चिरातीतभविष्यदासन्नेषु ॥ मिथो इति रहःसहार्थयोः । विरहान्योन्यार्थयोरपि ॥ प्रायसिति बाहुल्ये ॥ मुहुरिति पुनरर्थे ॥ प्रवाहुकमिति समकालार्थे ऊर्ध्वेऽपि ॥ प्रवाहकमिति पाठान्तरम् ॥ आर्यहलमिति बलात्कारे ॥ आर्येति प्रतिबन्धे । हलमिति निषेधविवादार्थयो रिति शाकटायनः ॥ अभीक्ष्णमिति अनारते पुनरर्थे च ॥ साकं सार्धमित्येतौ सहार्थौ ॥ नमसिति नतौ ॥ हिरुक् इति वर्जने ॥ धिगिति निन्दाभर्त्सनयोः॥ अथेति मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्याधिकारप्रतिज्ञासमुच्चयेषु॥ अम् शैघ्र्ये अल्पे च॥ आमित्यङ्गीकारे ॥ प्रतामिति ग्लानौ ॥ प्रशानिति समानार्थे ॥ प्रतानिति विस्तारे ॥ मा इति निषेधे ॥ माङिति निषेधाशङ्कयोः ॥ चेत्यन्वाचयसमाहारेतरेतरसमुच्चयविनियोगतुल्ययोग्यतावधारणहेतुषु । पादपूरणेऽपि ॥ वेति विकल्पानवक्लृप्त्युपमानद्वन्द्वसमुच्चयेषु अहेति विनियोगे । प्राचां मते क्रमपूजनयोरपि ॥ एवमिति प्रकृतपरामर्शप्रकारार्थोपदेशनिश्चयाङ्गीकारेषु ॥ नूनमिति वितर्के निश्चये च ॥ शश्वदिति सर्वकाले पौनःपुन्यनिश्चयशब्देष्वपि ॥ यदिति प्राश्नवितर्कप्रशंसासु ॥ कच्चिदिति भूयोऽर्थे ॥ कमिति वितर्के निश्चये च॥ प्रशंसायां शङ्कायां च नदिति । शङ्कायां प्रतिषेधविचारसमुच्चयेष्विति शाकटायनः ॥ चेदिति यद्यर्थे ॥ चिदिति चेदर्थे असाकल्यार्थोपमानसंपत्तिषु ॥ कच्चिदिति अभीष्टे प्रश्ने च ॥ यत्रेति अनवक्लृप्त्यमर्षगर्हाश्चर्येषु ॥ नहेति प्रारम्भे ॥ हन्तेति हर्षानुकम्पावाक्यारम्भविषादेषु ॥ दाननिश्चय-

काले । अत्राप्यादिशब्दः प्रकारे वर्तते । पूर्वं देशकालादिविशिष्टो विभक्त्यर्थो गृहीतः । इह तु कालविशिष्ट एव विभक्त्यर्थो गृह्यते । समानेऽह्नीति समानस्य सादेशः द्यस्प्रत्ययश्च । तत्काले सद्यः ॥ अस्मिन्नहनीति इदमोऽशादेशो द्यप्रत्ययश्च ॥ साम्प्रतदिनेऽद्य ॥ अधुना, इदानीमेतौ वर्तमानक्षणार्थे ॥ यस्मिन् काले यदा ॥ कस्मिन् काले कदा ॥ सर्वस्मिन् काले सर्वदा ॥ एकस्मिन् काले एकदा ॥ अन्यस्मिन् काले अन्यदा ॥ सपदि, सांप्रतम् , सम्प्रति, एते त्रयो वर्तमानक्षणार्थे । झटिति, तूर्णम् , आशु, शीघ्रमेते शैघ्र्ये । पूर्वस्मिन्नहनीति पूर्वेद्युः ॥ परस्मिन्नहनीति परेद्यवि ॥ अस्मिन् वर्षे इमि ऐषमः ॥ पूर्वस्मिन् वर्षे परुत् ॥ पूर्वतरे वर्षे परारि ॥ अन्यस्मिन्नहनीति अन्येद्युः ॥ अन्यतरस्मिन्नहनीति अन्यतरेद्युः ॥ उभयस्मिन्नहनीति उभयेद्युः ॥ तस्मिन् काले तर्हि ॥ कस्मिन्काले कर्हि ॥ यस्मिन् काले यर्हि ॥ एतस्मिन्काले एतर्हि ॥ २ ॥

(प्रादिरुपसर्गः) प्र । परा । अप । सम् । अनु । अव । निस् । निर् । दुस् । दुर् । अभि । वि । अधि । अति । सु । उद् । नि । प्रति । अपि । परि । उप । आङ् । श्रत् । अन्तर् । आविर् ॥ ३ ॥

(सु०) प्रादिरुपसर्गः ॥ प्र आदिर्यस्य स प्रादिः । तद्गुणसंविज्ञानोऽयं बहुव्रीहिः । प्रकर्ष इति लिङ्गात् । उप समीपे सृज्यते उच्चार्यते क्रियावाचकस्य शब्दस्येत्युपसर्गः । कर्मणि घञ् । अन्वर्थसंज्ञाबलात् क्रियासम्बद्ध इति लभ्यते । तदुक्तम् । यत्क्रियायुक्ताः प्रादयस्तं प्रत्येवोपसर्गसंज्ञेति ॥ उपसर्गा हि अर्थविशेषस्य द्योतका न तु वाचकाः॥ "प्र आदिकर्मदीर्घेशभृशसम्भवतृप्तिषु ॥ वियोगशुद्धिशक्तीच्छाशान्तिपूजाप्रदर्शने ॥ १ ॥" आदिकर्मणि प्रारम्भकर्मणि यथा । प्रयातः ॥ दीर्घे यथा । प्रबला मूषिकाः ॥ ईशे यथा । प्रभुः ॥ भृशार्थे यथा । प्रवदन्ति ॥ सम्भवे यथा । हिमवतो गङ्गा प्रभवति ॥ तृप्तौ यथा। प्रभुक्तमन्नम् ॥ वियोगे यथा । प्रोषितः ॥ शुद्धौ यथा । प्रसन्नमुदकम् ॥ शक्तौ यथा । प्रशक्तः ॥ इच्छायां यथा । प्रार्थयते कन्याम् ॥ शान्तौ यथा । प्रशान्तोऽग्निः ॥ पूजायां यथा । प्राञ्जलिः स्थितः ॥ अग्रे तथा । प्रावलम् ॥ दर्शने यथा । प्रलोकयति ॥ १ ॥ "वधे गतौ दर्शने च विक्रमेऽभिमुखे भृशे ॥ अधीनमोक्षणप्रातिलोम्यकेषु परा मतः ॥२॥"

योरपि ॥ माकिमिति निषेधवर्जनयोः । नकिमित्यौपम्ये ॥ यावत्तावदित्येतौ साकल्यावधिमानावधारणेषु ॥ स्वै इति विशेषवितर्कयोः ॥ द्वै इति वितर्के ॥ रै इति आदरानादरयोः ॥ तुमिति तुङ्कारे ॥ तथाहि इति निर्देशने ॥ खलु इति निषेधवाक्यालङ्कारजिज्ञासानुनयेषु । नियमनिश्चयहेतुविवादेष्वपि ॥ किल इति वार्तानुकरणसम्भाव्यहेत्वतिरस्कारालीकेषु ॥ तथेति सादृश्ये समुच्चयाभ्युपगमयोरपि ॥ अतीते पादपूरणे च ॥ अस्मीति अहमित्यर्थे ॥ आङिति ईषदर्थाभिविधिमर्यादाक्रियायोगेषु ॥ उत इति अप्यर्थे ॥ उञ् इति वितर्कसम्बोधनपूरणेषु ॥ आदहेति हिंसोपक्रमकुत्सनेषु । आतङ्केति कुत्सनविनाशयोः । प्रतिग्रहेऽपीति शाकटायनः ॥ वेलायाम् इति कालपरिमाणे ॥ मात्रायामिति अल्पपरिमाणे ॥ यथेति योग्यतावीप्सापदार्थानतिवृत्तिसादृश्येषु ॥ किमिति पृच्छाजुगुप्सयोः । ईषदर्थातिशययोरपि ॥ यदिति यच्छब्दार्थे हाहा इति विस्मयविषादशोकजुगुप्सार्तिषु ॥ ह इति विनियोगक्रमपादपूरणेषु ॥ हे, है, पाट् , प्याट् , एते सम्बोधनार्थाः ॥ अहो इति विकल्पे । चेदर्थेऽपि । नन्विति प्रश्नावधारणानुज्ञेच्छामात्रेषु ॥ मन्ये इति वितर्के ॥ नहीत्यभावे ॥ उताहो इति वितर्के ॥ असीति त्वमित्यर्थवाक्यालङ्कारयोः ॥ ब्रूहीति प्रेषानुज्ञावसरेषु ॥ ननु इति निषेधे ॥ इति इति हेतुप्रकारप्रकर्षेवमर्थव्यवस्थास्वरूपविवक्षानियमसमाप्तिप्रकृतिवचनमाणपरामर्शमतेषु ॥

वधे यथा । पराहतः ॥ गतौ यथा । परागतः ॥ दर्शने यथा । परादृष्टः ॥ विक्रमे यथा । पराक्रान्तः ॥ अभिमुखे यथा ॥ परावृत्तः ॥ भृशे यथा ॥ पराजितः ॥ अधीने यथा पराधीनः ॥ मोक्षणे यथा । पराकृतस्त्यक्त इत्यर्थः ॥ प्रातिलोम्ये यथा । पराङ्मुखः ॥२॥ "अपो वियोगे विकृतौ विपरीते निदर्शने ॥ आनन्दे वर्जने चौर्ये चारणे समुदाहृतः॥३॥" वियोगे यथा । अपयाति ॥ विकृतौ यथा । अपकृतवान् ॥ विपरीते यथा । अपशब्दः ॥ निदर्शने यथा । अपदिशति ॥ आनन्दे यथा । अपहसति ॥ वर्जने यथा । अपवनाद्वृष्टो देवः ॥ चौर्ये यथा । अपहरति ॥ चारणे यथा । अपसरति ॥ ३ ॥ "संयोगैक्ये च प्रभवे सत्यप्रत्यक्षसिद्धिषु ॥ भूषाश्लेषस्वीकरणक्रोधाभिमुखवाचि सम् ॥ ४ ॥" संयोगे यथा । संगतः पुत्रेण ॥ ऐक्ये यथा । संवदन्ति सख्यः ॥ प्रभवे यथा । काष्ठेऽग्निः संभवति ॥ सत्ये यथा । गां संजानाति ॥ प्रत्यक्षे यथा । सम्पश्यते ॥ सिद्धौ यथा । संसिद्धिः ॥ भूषायां यथा । संस्कृता कन्या ॥ आश्लेषे यथा । संधत्ते ॥ स्वीकारे यथा । संगृह्णाति ॥ क्रोधे यथा । संक्रुद्धः ॥ अभिमुखे यथा । संयाति ॥ ४ ॥ "वेदाधिष्ठानसामीप्यपश्चाद्भावानुबन्धने ॥ साम्याभिमुखहीनेषु विसर्गे लक्षणे त्वनुः ॥ ५ ॥" वेदे यथा । अनुवाकमधीते ॥ अधिष्ठाने यथा । अनुष्ठानं देशः ॥ सामीप्ये यथा । अनुमेघं वर्षति ॥ पश्चाद्यथा । अनुरथम् ॥ भावानुबन्धने यथा । अनुशयः ॥ साम्ये यथा । अनुकृतिः ॥ अभिमुखे यथा । अनुवत्सो मातरं धावति ॥ हीने यथा । अन्वर्जुनं योद्धारः ॥ विसर्गे यथा । अनुज्ञातः ॥ लक्षणे यथा । अनुवनमसतां गतिः ॥ ५ ॥ "ज्ञानावलम्बशुद्धीषदर्थे व्याप्तिपराभवे ॥ अवो ज्ञेयो वियोगे च लोकयोगानुसारतः ॥ ६ ॥" ज्ञाने यथा । अवगतोऽर्थः ॥ अवलम्बे यथा । अवलम्ब्य यष्टिं गच्छति ॥ शुद्धौ यथा । अवदातः ॥ ईषदर्थे यथा । अवलम्ब्यते ॥ व्याप्तौ यथा । अवकीर्णम् ॥ पराभवे यथा । अवघ्नन्ति ॥ वियोगे यथा । अवयातः ॥ ६ ॥ "निर्वियोगात्ययादेशातिक्रमे लाभनिश्चिते ॥" वियोगे यथा । निःसङ्गो ब्रवीति ॥ अत्यये यथा । निर्मेघम् ॥ आदेशे यथा । निर्दिष्टम् ॥ अतिक्रमे यथा। निष्क्रान्तः ॥ लाभे यथा । निर्दिष्टः ॥ निश्चिते यथा । निश्चितम् ॥ "दुरीषदर्थे कृच्छ्रेऽर्थे कृशासंपत्तिसंकटे ॥ ७ ॥" दुर्—ईषदर्थे यथा । दुर्गतिः ॥ कृच्छ्रार्थे यथा । दुर्जीवः ॥ कृशे यथा । दुर्बलः ॥ असम्पत्तौ यथा । दुर्गतः ॥ संकटे यथा । दुर्दिनम् ॥७॥ "नामावियोगातिशये भृशमोहेशवाङ्मृधे ॥ पैशुन्यास्मरणे भूषेषदर्थानाभिमुख्यके ॥ ८ ॥

इवेतीषदर्थेऽपि । मा प्रेक्षावाक्यालङ्कारेषु ॥ ओमित्यभ्यादानाभ्युपगमसमाध्यर्थेषु ॥ फडिति निराकृतौ ॥ यदि पक्षान्तरे ॥ हो इति सम्बोधने ॥ इहीति तिङन्तप्रतिरूपकं गच्छत्यर्थं ॥ अहेत्यत्रेत्यर्थे॥ तदिति हेतौ ॥ असाश्चादिति । अहो वत समिति सर्वतोभावे ॥ किमिति अनर्थके पादपूरणे वा ॥ आमिति प्रतिवचनावधारणयोः ॥ हमिति स्तोभवचने ॥ वामिति युवामित्यर्थे ॥ श्रुकमिति अतिशये ॥ शुकमिति शैघ्र्ये ॥ आनुकमिति तर्के ॥ नहिकामिति निषेधे ॥ सत्यमिति प्रश्नप्रतिषेधसत्येषु ॥ ऋतमिति सत्यार्थे । नोचेन्न-चेदिति निषेधे ॥ जात्विति कदाचिदर्थे ॥ कथमिति प्रकारप्रश्ने ॥ कुत इति प्रश्ननिह्नवयोः ॥ कुत्रेति देशप्रश्ने ॥ अनु अवेति उपसर्गप्रतिरूपकौ अनु अव इत्येतयोरर्थे ॥ हा हौ हे एते त्रयोऽपि शोभार्थाः ॥ शम्बडिति अन्तःकरणे आभिमुख्येऽपि ॥ वै इति पादपूरणहिंसाप्रातिलोम्येषु ॥ दिष्ट्येत्यानन्दे । सद्भजनदर्शनप्रातिलोम्येष्वित्येके ॥ समिति सम्यगर्थे ॥ आनुषगिति आनुपूर्व्ये ॥ अङ्गेति सम्बोधने ॥ द्राक् स्रागिति झटित्यर्थे ॥ अरे इति नीचसम्बोधने ॥ 'चटु चाटु इति प्रियवाक्ये ॥ हुमित्यनिच्छाभयभर्त्सनकोपेषु ॥ सुष्ठु इति प्रशंसायाम् । पुरास्त्यग्रे पूर्वदेशपूर्वकालयोश्च ॥ आश्विति क्षिपे ॥ नहीति विशेषे ॥

अनवस्थामुख्यशौर्यदर्शने विरुदाहृतः ॥" नानार्थे यथा । विचित्रा सूत्रस्य कृतिः पाणिनेः॥ वियोगे यथा । वियुक्तः ॥ अतिशये यथा । विकीर्णः ॥ भृशे यथा । वितटा नद्यो महत्य इत्यर्थः ॥ मोहे यथा । विमनस्कः ॥ ईशे यथा । विभुः ॥ वाङ्मृधे यथा । विवदन्ते ॥ पैशुन्ये यथा । विगायति ॥ अस्मरणे यथा । विस्मृतः ॥ भूषायां यथा । विभूषितः ॥ ईषदर्थे यथा । विलोपितः ॥ अनाभिमुख्यके यथा । विमुखः ॥ ८ ॥ अनवस्थायां यथा। विभ्रान्तः ॥ मुख्ये यथा । विशिष्टः ॥ शौर्ये यथा । विक्रान्तः ॥ दर्शने यथा । विलोकयति ॥ "आङिच्छाभयवाक्येषदर्थाश्लेषादिकर्मणि ॥ ९ ॥ बन्धनेऽभिविधौ शाठ्यकृच्छ्रसामीप्यसंभ्रये ॥ अभिमन्त्रनिवृत्त्याशादानानुभवविस्मये ॥ १० ॥ प्रतिष्ठादेशमर्यादास्पर्धामुख्योर्ध्वकर्मणि ॥" आङ्—इच्छायां यथा । अकाङ्क्षति ॥ भये यथा । आबिभेति ॥ वाक्ये यथा । आजानाति ॥ ईषदर्थे यथा । आताम्रनखः ॥ आश्लेषे यथा । आलिङ्गति ॥ आदिकर्मणि यथा । आरभते ॥९॥ बन्धने यथा ॥ कवचमाबध्नन्ति ॥ अभिविधौ यथा । आकुमारं यशः ॥ शाठ्ये यथा । आचरति कपटेन ॥ कृच्छ्रे यथा । आहतः ॥ सामीप्ये यथा । आसन्ना वयम् ॥ संभ्रये यथा । आवसथः ॥ अभिमन्त्रे यथा । आमन्त्रणम् ॥ निवृत्तौ यथा । आधावति ॥ आशायां यथा । आशास्ते ॥ आदाने यथा । आदत्ते ॥ अनुभवे यथा । आशीतम् ॥ विस्मये यथा । आ एवं किल तत् ॥ १० ॥ प्रतिष्ठायां यथा । आस्पदम् ॥ आदेशे यथा । आदिष्टः ॥ मर्यादायां यथा । आमुक्तेर्दुःखम् ॥ स्पर्धायां यथा । आह्वयते मल्लं मल्लः ॥ मुख्ये यथा । आगच्छति ॥ ऊर्ध्वकर्मणि यथा । आरोहति पर्वतम् ॥ "नो राश्यधोभृशादेशनित्यकौशलबन्धने ॥११॥ अन्तर्भावे समीपे च दर्शनोपरमाश्रये ॥" नि—राशौ यथा । निकरो मणीनाम् ॥ अधो यथा । निपतति ॥ अभृशे यथा । निगृहीतः ॥ आदेशे यथा । निदर्शितम् ॥ नित्ये यथा । निविशते ॥ कौशले यथा । निपुणः ॥ बन्धने यथा निबद्धः ॥११॥ अन्तर्भावे यथा । निपीतमुदकं सिकताभिः ॥ समीपे यथा । निकृष्टः ॥ दर्शने यथा । निदर्शनम् ॥ उपरमे यथा । निवृत्तः प्रगतः ॥ आश्रये यथा निलयः ॥ "अधिरध्ययनैश्वर्यवशित्वमरणाधिके ॥१२॥" अधि—अध्ययने यथा । उपाध्यायादधीते ॥ ऐश्वर्ये यथा । अधि पतिः ॥ वशित्वे यथा । आधीनः ॥ स्मरणे यथा । मातुरध्येति ॥ अधिके यथा । अधिकृतम् ॥ १२ ॥ 'अपिः संभवगर्हाशीर्मृतिभूषासमुच्चये ॥" संभवे यथा ।

रहसीति एकान्ते ॥ एषामर्थानां निपाता द्योतकाः । न तु वाचकाः पदान्तरं विनाऽप्रयोगात् । किञ्च वाचकत्वे घटस्य च इत्यपि स्यात् । अपि शोभनः समुच्चयेऽतिवत् । शोभनं च इत्यपि स्यात् । द्योतकत्वे स्वस्य पदार्थैकदेशत्वान्न तत्र विशेषणान्वयः । अथ कथं घटश्चेत्यादौ समुच्चयादिबोध इति चेत्सत्यम् । घटवलक्षणस्यैव समुच्चितघटबोधसम्भवात् । विजय इत्यादौ विशिष्टजयो धातोरिति दिक् ॥ तत्रादिविभक्त्यर्थं इति ॥ आदिशब्दः प्रकारार्थः गणाभावात् । विभक्तीनामर्थोऽभिधेयस्तस्मिन् तत्रादिनिपात्यते ॥ तत्रेति । अत्र त्रप्रत्ययष्टेरत्वं निपात्यते ॥ तत इति अत्र तसप्रत्ययष्टेरत्वं च ॥ बहुत इति ईकारलोपः । तेन प्रकारेण तथेति । तस्मिन् काले तदेति ॥ कालप्रकारयोर्विभक्त्यर्थत्वाभावेऽपि सदोणादयः प्रादेश्च तथेति सूत्रस्थसदातथेतिकालप्रकारयोरुपलक्षणम् । सप्तम्यादिरिति ॥ तत्राप्यादिशब्दः प्रकारे । सर्वत्र देशकालादिविशिष्टो विभक्त्यर्थो गृहीत इह तु कालविशिष्ट एव विभक्त्यर्थो गृह्यते ॥ अधेति ॥ अस्मिन्नहनीत्यर्थः । इदमः अः थप्रत्ययश्च ॥ पुरः पुरस्तादिति ॥ पूर्वस्मिन् देशे पूर्वस्माद्देशात् पूर्वो वा देश इत्यर्थः ॥ उपरीति उर्ध्वमित्यर्थः ॥ प्रक्षिप्तोऽयं पाठः । प्रा० ता० पुस्तकादौ न दृश्यते ।

अपि प्रयोजनमस्ति ।। गर्हायां यथा । अपि पापिनः ।। आशिषि यथा । भद्रमपि ।। मृतौ यथा । मरणमपि ।। भूषायां यथा । अपिनह्यति हारम् ।। समुच्चये यथा । तदपि विक्रामति ।। "विक्रमाविक्रमावुद्धभृशार्थातिशयेष्वति ।।१३।। अति–विक्रमे यथा।अतिरथः ॥ अतिक्रमे यथा । अतिक्रामति ॥ अबुद्धे यथा । अतिगहनम् ।। भृशार्थे यथा।अतितप्तम् ॥ अतिशये यथा । अतिमनुते ॥ १३ ॥ "प्रशंसानुमते पूजाभृशकृच्छ्रशुभेषु सुः ॥" प्रशंसायां यथा । सुरूपः ॥ अनुमते यथा । सुकृतम् ॥ पूजायां यथा । सुसाधुः ॥ भृशे यथा । सुतप्तः ॥ कृच्छ्रे यथा । सुदुष्करम् ॥ शुभे यथा । सुगन्धः ॥ "उत्प्राबल्यवियोगोर्ध्वकर्मलाभप्रकाशने॥१४॥आश्चर्ये मोक्षणेऽभावे चलप्राधान्यशक्तिषु॥" उद्–प्राबल्ये यथा । उद्बलः ॥ वियोगे यथा । उद्गच्छति ॥ ऊर्ध्वकर्मणि यथा । उत्तिष्ठति शयनात् ॥ लाभे यथा । उत्पन्नम् ॥ प्रकाशने यथा । उच्चरति ॥ १४ ॥ आश्चर्ये यथा । उत्सुकः ॥ मोक्षणे यथा । उद्गतोऽश्वः । अभावे यथा । उत्पथः ॥ चले यथा । उत्कः ॥ प्राधान्ये यथा । उद्दिष्टः ॥ शक्तौ यथा । उत्साहः "अभिः पूजाभृशार्थेच्छाव्याधिसाम्याभमुख्यके ॥ १५॥ सारूप्यवचनाहारस्वाध्यायेषु निरूपितः ॥" अभि–पूजायां यथा । अभिवन्दते देवम् ॥ भृशे यथा । अभियुक्तः ।। इच्छायां यथा । अभिलिप्सते ॥ व्याधौ यथा । अभिस्यन्दो व्याधिः ॥ साम्ये यथा । अभिजातः ।। अभिमुख्यके यथा । अभिमुखम् ।। १५ ।। सारूप्ये तथा । अभिरूपः ॥ वचने यथा । अभिधानम् ॥ आहारे यथा । अभ्यवहरति ॥ स्वाध्याये यथा । अभ्यस्यति ॥ "सादृश्यादानहिंसाङ्गीकृतौ प्रतिनिधौ क्वचित् ॥ १६ ॥ व्याप्त्याभिमुख्ययोर्व्याप्तौ वारणे प्रतिरुच्यते ॥" प्रति—सादृश्ये यथा । देवदत्तस्य प्रति ॥ आदाने यथा । प्रतिगृह्णाति ॥ हिंसायां यथा । प्रतिहन्ति ॥ अङ्गीकृतौ यथा । प्रतिज्ञातम् ॥ प्रतिनिधौ यथा । अभिमन्युरर्जुनतः प्रति ॥१६॥ व्याप्तौ यथा । प्रतिशापः ॥ आभिमुख्ये यथा । प्रतिसूर्यं गच्छति । व्याप्तौ यथा । प्रतिकीर्णं पांशुभिः ।। वारणे यथा । प्रतिषिद्धः ॥ "परिः समन्तो भावव्याप्तिदोषकथासु च ॥१७॥ भूषाश्लेषे पूजने च वर्जने वसनेऽशुभे ॥" परि–समन्ततो भावे यथा । परितः ॥ व्याप्तौ यथा । परिगतोऽग्निर्मार्गम् ॥ दोषकथासु यथा । परिवादः ॥ १७ ॥ भूषायां यथा । परिष्करोति कन्याम् ॥ आश्लेषे यथा । परिष्वजते ॥ पूजने यथा । परिचरति गुरुम् ॥ वर्जने यथा । परिवनेभ्यो वृष्टो देवः ॥ वसने यथा । परिधत्ते वासः ॥ अशुभे यथा । परिदेवनम् ॥ "उपः सामीप्यसामर्थ्यव्याप्त्याचार्यकृतौ मृतौ ॥ १८ ॥ दोषदानक्रियावीप्सारम्भाध्ययनपूजने ॥ कृष्णाचार्यैः कृताः श्लोका उपसर्गार्थसंग्रहे॥१९॥" उप—सामीप्ये यथा । उपकुम्भम् ॥ सामर्थ्ये यथा । उपकरोति मित्रेभ्यः ॥ व्याप्तौ यथा । उपकीर्णः पांशुभिः ॥ आचार्यकृतौ यथा । उपदिशति शिष्येभ्यः ॥ मृतौ यथा उपरतः ॥१८॥ दोषे यथा । उपघातः ॥ दाने यथा । उपहरत्यर्थं देवदत्ताय ॥ क्रियायां यथा । उपचारः ॥ वीप्सायां यथा । देवं देवमुपचरति ॥ आरम्भे यथा । उपक्रमते भोक्तुम् ॥ अध्ययने यथा । उपाध्यायादधीते ॥ पूजने यथा । उपचितः पिता पुत्रेण. ॥ १९ ॥ निस्, निश्चयादौ ॥ दुस्, दुःखादौ ॥ श्रत्, श्रद्धादौ ॥ अन्तर्, मध्यादौ ॥ आविर्, प्राकट्यादौ ॥ ३ ॥

(त०) प्रादिरुपसर्ग इति ॥ प्र आदिर्यस्येति स प्रादिरिति तद्गुणसंविज्ञानो बहुव्रीहिः नातद्गुणसंविज्ञानः प्रकर्ष इति लिङ्गात् । अन्यथा प्र इत्यस्य धातोः प्राक् पाठो न स्यात् । उप समीपे सृज्यत उच्चार्यते क्रियावाचकस्येत्युपसर्गः । सृजेः कर्मणि घञ् । अन्वर्थसंज्ञायां च क्रियायोग इति लभ्यते । तदुक्तम् । यत्क्रियायुक्ताः प्रादयस्तं प्रत्येवोपसर्गसंज्ञेति । यस्य धातोर्वाच्या क्रिया यत्क्रिया तया युक्ताः । तं धातुम् अर्थं वा प्रति । उपसर्गाणां द्योतकत्वमेव न वाचकत्वम् । तदुक्तम् । "उपसर्गेण धात्वर्थो बलादन्यः प्रतीयते" इति (क) । उपसर्गेण द्योतकेन हेतुना अन्यः धातुपाठपठिताद्भिन्नः प्रतीयते धातुनैव ॥ ३ ॥

प्राग्धातोः ॥ उपसर्गाः धातोः प्राक् प्रयोक्तव्याः ॥ ४ ॥

(सु०) प्राग्धातोः ॥ वेदादौ विपरीतप्रयोगदर्शनात् व्याकरणे लोकेऽपि विपरीतप्रयोगो मा भूदिति नियमार्थमिदम् (ख) ॥ ४ ॥

(त०) प्राग्धातोरिति ॥ संज्ञानियम एवायम् । धातोः प्राक् प्रयुज्यमाना एव प्रादय उपसर्गसंज्ञा नान्ये इत्यर्थः । तेन सुपुरुष इत्यादावधातोः प्राक् प्रयोगेऽपि न क्षतिः । अत्र धातोरिति ग्रहणात् कर्तुं प्रेच्छति प्रचिकीर्षतीत्यादौ नानिष्टता । अन्यथा यत्क्रियायुक्ताः प्रादयस्ततः प्रागिति सवाच्येच्छया प्रशब्दस्य योग इति तस्यैव प्राक् प्रशब्दः प्रयुज्येत । वस्तुतस्तु यत्क्रियेत्यस्य धातोर्वाच्या क्रियेति व्याख्यानात्केवलस्य तस्य धातुत्वाभावात् । सान्तस्यैव धातुत्वात् ॥ ४ ॥

तदव्ययम् ॥ चादि अव्ययसंज्ञं भवति । न तु शब्दनिर्देशे(ग) ॥५॥

(सु०) तदव्ययम् ॥ प्रादिचादिउपर्यादि तत्रादिस्वआदिपरामर्शार्थं तद्ग्रहणम् । अत्र नाम्न इत्यनुवर्त्य प्रथमया विपरिणम्य विशेष्यमभ्युपेयम् । चादिस्वरादीनि तु विशेषणानि । विशेषणे हि तदन्तविधिस्तेन परमोच्चैः परमस्वरित्यादावव्ययसंज्ञा भवत्येव । उच्चैरति क्रान्तोऽत्युच्चैः । अत्युच्चैसौ । अतिस्वः । अतिस्वरौ । अतिस्वरः । इत्यादि ॥ गौणे तु नाव्ययसंज्ञा । मुख्यामुख्ययोरिति न्यायात् ॥ ५ ॥

(त०) तदव्ययमिति ॥ तच्छब्देन प्रादिचादिउपर्यादितत्रादिग्रहणम् । अन्यथाऽनन्तरत्वात् स्वआदय एव गृह्येरन् ॥ ५ ॥

क्त्वाद्यन्तं च ॥ क्त्वा क्यप् तुम् णम् धा च्वि शस् वत् कृत्वस् सु आम् इत्याद्यन्तमव्ययसंज्ञं भवति ॥ ६ ॥

(सु०) क्त्वाद्यन्तं च ॥ पूर्वकाले क्त्वेति क्त्वा । समासे क्यबिति क्यप् । तुम् तदर्थायां भविष्यतीति तुम् । पौनः पुन्ये णम् पदं द्विश्चेति णम् । संख्यायाः प्रकारे धेति धा । बह्वल्पार्थात्कारकाच्छस् इति शस् । अभूततद्भावे कृभ्वस्तियोगे नाम्नश्च्वि-

---

(क) प्रहाराहारसंहारपरिहारविहारवदिति सम्पूर्णपद्यम् ।

(ख) तद्यथा सामवेदसंहितायां आग्नेयपर्वणि—अग्ने आयाहि वीतये गृणानो हव्यदातये नि होता सत्सि बर्हिषि' इति । अत्र नैर्विपर्य्यासः ।

(ग) नत्विति । शब्दनिर्देशे तु नाव्ययसंज्ञा भवतीत्यर्थः । यथा चेन च शब्देनेत्यादि ।

रिति च्विः। वत्तुल्ये इति वत्। क्रियाया आवृत्तौ कृत्वसिति कृत्वस्। द्वित्रिचतुर्भ्यः सुरिति सुः। 'किमोऽव्ययादाख्यातात्च तरतमयोराम् वक्तव्यः अद्रव्यप्रकर्षे' इत्याम्॥६॥

अव्ययाद्विभक्तेर्लुक् ॥

"सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु
वचनेषु च सर्वेषु यन्नव्येति तदव्ययम् (क) ॥
वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।
आपं चैव हसान्तानां यथा वाचा निशा दिशा ॥"

वगाहः—अवगाहः ॥ पिधानम्—अपिधानम् ॥ ७ ॥

इत्यव्ययानि ॥ १४ ॥

(सु०) **अव्ययाद्विभक्तेर्लुक्** ॥ अव्ययाद्विहिताया विभक्तेर्लुक् स्यात्। विभजनं विभक्तिविभागः। यद्वा विभज्यते बोध्यते कर्तृकर्माद्यर्थोऽनयेति विभक्तिः। स्यादिस्याद्योरेवेति योगरूढिः। "सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥ १ ॥" आथर्वणप्रणवविद्यागतश्रुतिरियम्। यत् शब्दरूपं न व्येति न व्ययं प्राप्नोति तदव्ययं त्वया ज्ञेयम्। कीदृशं त्रिषु लिङ्गेषु सदृशमेकप्रकारम्। पुनः कीदृशम्। सर्वासु विभक्तिषु सदृशं च। पुनः कीदृशम्। सर्वेषु वचनेषु सदृशम् ॥ १ ॥ "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः। आपं चैव हसान्तानां यथा वाचा निशा दिशा ॥ २ ॥" भागुरिराचार्योऽवाप्योरुपसर्गयोरल्लोपं वष्टि वाञ्छतीत्यर्थः। च पुनः हसान्तानां शब्दानामापं वष्टि ॥ २ ॥ अल्लोपे यथा। वगाहः। अवगाहः। पिधानम्। अपिधानम्। अपिना साहचर्यादादेरेवाकारो लुप्यते। नान्त्य इति भावः ॥ ७ ॥

इति सुबोधिन्यामव्ययानि ॥ १४ ॥

(त०) **सदृशमिति** श्रुतिर्लिङ्गसंख्याकारकाभावपरा (ख) ॥ **यथा वाचेति** ॥ परिगणनमिदमित्येके। अन्ये तु उदाहरणमात्रमित्याहुः ॥ **वगाह इति** ॥ आदिरेवाकारो लुप्यते नान्त्यः अपिना साहचर्यात् ॥ ७ ॥

श्रीविद्यानगरस्थायिलोकेशकरशर्मणा। कृतायामिह टीकायामव्ययव्याकृतिर्गता ॥

इति तत्त्वदीपिकायामव्ययानि ॥ १४ ॥

अथ स्त्रीप्रत्ययाः ॥ १५ ॥

आबतः स्त्रियाम् ॥ अकारान्तान्नाम्नः स्त्रियां वर्तमानादाप् प्रत्ययः

(क) अत्र विभक्तिवचनशब्दौ संख्याकारकपरौ। न तु प्रत्ययपरौ। अन्यतरग्रहणवैयर्थ्यात्।

(ख) **लिङ्गकारकेति**। लिङ्गकारकसंख्याभावः परस्तात्पर्यविषयभूतः यस्या इति विग्रहः। मूले लिङ्गेष्वित्यादिषु सप्तमी हि षष्ठी चानादरे विहिताः। तथा च लिङ्गकारकसंख्याः—अनादृत्य यन्न व्येति विकारं न प्राप्नोति किन्तु सदृशमेकप्रकारमेव भवति तदव्ययमित्युदाहृतश्रुतिरर्थः।

इति चक्रधराख्यायां टिप्पण्यामव्ययप्रकरणं समाप्तम्।

भवति(क) ॥ सर्वा । माया ॥ १ ॥

(सु०) आबतः स्त्रियाम् ॥ अत इति तपरग्रहणम् । तेनाधिकृतस्य नाम्नो विशेषणात् तदन्तविधिः । स्त्रियामिति प्रकृत्यर्थविशेषणम् । स्त्रियां वर्तमानाददन्तान्नाम्नः आप् स्यात् । पित्त्वं स्वरार्थम् । स्त्र्यादिकं लिङ्गत्रयं तु पारिभाषिकमेव लिङ्गानुशासनादिभ्यो निर्णेयम् ॥ माया । शठताऽविद्या वा ॥ १ ॥

(व०) आबतः स्त्रियामिति ।। आप् अतः स्त्रियामिति च्छेदः । अत इति तपरकरणाद्व्यक्तेर्ग्रहणम् । न तु स्वरूपस्य नापि आङ्गदित्यादौ अच्छब्दान्तस्य । तुम् तदर्थायामिति निर्देशात् । नापि ङसेरादेशस्याच्छब्दस्य स्त्रियां वृत्त्यभावात् । अधिकृतस्य नाम्नो विशेषणात्तदन्तविधिः । स्त्रियामिति प्रकृतिविशेषणमित्यभिप्रेत्याह—स्त्रियां वर्त्तमानादिति ।। १ ।।

(अजादेश्च) अजा । एडका । अश्वा । चटका । मूषिका । बाला । वत्सा । होडा । मन्दा । विलाता । संफला । भस्रफला । अजिनफला । शणफला । पिण्डफला(ख) । सत्पुष्पा । प्राक्पुष्पा । प्रत्यक्पुष्पा । काण्ड-

---

(क) अत्रेदमवधेयम् । स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः ।
उभयोरन्तरं यच्च तदभावे नपुंसकम् ॥

इति लक्षणलक्षितमवयवसंस्थानविशेषात्मकं लौकिकं स्त्रीपुंसयोर्लिङ्गम् । तदभावे तयोरुभयोरभावे सति यदुभयोरन्तरं सदृशं तन्नपुंसकमित्यर्थः । तदिदं लौकिकं लिङ्गमस्मिन् शास्त्रे नोपयुज्यते । तस्य अचेतने खट्वा मालादौ बाधात् स्त्रीप्रत्ययानापत्तेः । दारानित्यादौ 'सोनः पुंसः' इति नत्वानापत्तेश्च । किं तु सत्त्वरजस्तमसां प्राकृतगुणानां वृद्धिः पुंस्त्वम् । अपचयः स्त्रीत्वम् । स्थितिमात्रं नपुंसकत्वम् । अत एव उत्कर्षापकर्षसत्त्वेऽपि स्थितिमात्रमादाय 'सामान्ये नपुंसकम्' इति प्रवादः । उत्कर्षापकर्षसाम्यात्मकावस्थात्रयसाधारणस्थितिमात्रविवक्षायां नपुंसकं भवतीति तदर्थः । ईदृशमवस्थात्रयं केवलान्वयि । अयं पदार्थः, इयं व्यक्तिः, इदं वस्तु, इतिव्यवहारस्य सार्वत्रिकत्वात् । तच्चेदं लिङ्गमर्थनिष्ठमेव । तदुक्तं भाष्ये—"एकार्थे शब्दान्यत्वात् दृष्टं लिङ्गान्यत्वमवयवान्यत्वाच्च" इति ॥ एकस्मिन्नेवार्थे पुष्यः तारका नक्षत्रमिति शब्दनानात्वदर्शनात् । कुटीकुटीरादौ रेफाद्यवयवोपजनने लिङ्गभेददर्शनाच्च । स्तनकेशाद्यतिरिक्तमेव लिङ्गमित्यर्थ इति कैयटः । पुंलिङ्गः शब्द इत्यादिव्यवहारस्तु वाच्यवाचकयोरभेदोपचाराद् बोध्यः । न च उपचयादिधर्माणां विरुद्धत्वादेकत्र समावेशायोगादेकस्य द्वित्रिलिङ्गतानापत्तिरिति वाच्यम् । एकैकस्मिन् वस्तुनि क्षणभेदेन त्रयाणां धर्माणामपि समावेशोपपत्तेः । उक्तं च भाष्ये—"कश्चिदपि सत्त्वादिधर्मः क्वचिन्मुहूर्त्तमपि नावतिष्ठते यावदनेन वर्धितव्यमपायेन वा युज्यते' इति । न चैवं सति युगपद् द्वित्रिलिङ्गत्वानापत्तिरिति वाच्यम् । न हि व्यवहारे स्वसमकालिकपदार्थसत्ता प्रयोजिका । तथा सति भूतभविष्यद्व्यवहारोच्छेदापातात् । तत्र कश्चिच्छब्द एकलिङ्गविशिष्ट एवार्थे प्रयोज्यः । कश्चित्तु द्विलिङ्गे । कश्चित्तु त्रिलिङ्गे इत्येतत्तु लिङ्गानुशासनशास्त्रादवगन्तव्यम् । एषां पुंस्त्रीनपुंसकशब्दानां वृद्ध्यादिशब्दवदस्मिन् शास्त्रे संकेतश्च लिङ्गानुशासनत एव ज्ञेयः । उक्तं च भाष्ये—'अवश्यं तावत् कश्चित् स्वकृतान्त आस्थेयः' वैयाकरणसिद्धान्त इत्यर्थः, । 'कृतान्तौ यमसिद्धान्तौ' इत्यमरः। तत्र टघादिसंज्ञावल्लघुसंज्ञामकृत्वा महासंज्ञाकरणसामर्थ्यात् सति सम्भवे स्तनकेशवतीत्यादिलौकिकं लिङ्गमप्यत्राश्रीयते । अन्यथा 'पशुना यजेत' इत्यत्र स्त्रीव्यक्तावपि सत्त्वाद्युपचयात्मकपुंस्त्वाद्यनपायात् 'आके नास्त्रियाम्' इति नाभावस्याविरोधात् स्त्रीपशुरप्यालभ्येत ।

(ख) एकफलेति चान्द्रदौर्गादयः । काशिकाकृच्च ।

पुष्पा । प्रान्तपुष्पा । एकपुष्पा । शूद्रा । क्रुञ्चा । उष्णिहा । देवविशा । ज्येष्ठा । कनिष्ठा । मध्यमा । इति पुंयोगेऽपि । त्रिफला । अमूला । कोकिला जातावपि । इत्यादि ॥ २ ॥

(सु०) अजादेश्च ॥ अजशब्द आदिर्यस्येति बहुव्रीहिः । अजादेर्गणादाप् तस्य स्त्रीत्वे द्योत्ये ॥ अजा । एडका । अश्वा । चटका । मूषिका । शूद्रा । अमूला । संफला । भस्त्रफला । अजिनफला । शणफला । प्रत्यक्फला । पिण्डफला । सत्पुष्पा । प्राक्पुष्पा । काण्डपुष्पा । प्रान्तपुष्पा । एकपुष्पा । क्रुञ्चा । उष्णिहा । देवविशा । इत्यादिषु जातेरयोपधादितीप् प्राप्तः । बाला । वत्सा । होडा । मन्दा । विलाता । इत्यादिषु अनन्त्यवयोवाचिन इतीप् प्राप्तः । ज्येष्ठाकनिष्ठामध्यमाकोकिलेत्यादिषु पुंयोगे चेतीप् प्राप्तः । त्रिफलाध्यनीकेत्यादौ समाहारेऽत ईबितीप् प्राप्तः । स ईबजादेरित्यनेन बाध्यते । अजादेः स्त्रीत्वाभावात् पञ्चानामजानां समाहार इति पञ्चाजी । अत्राप् न । अत्र हि समासार्थसमाहारनिष्ठं स्त्रीत्वं न त्वजादिनिष्ठम् । चटकेत्यत्र काप्यत इति इकारो न क्षिपकादीनां नेति निषेधात् । मुषेर्दीर्घश्चेति किक्प्रत्यये इकारमध्यो मूषिकाशब्दः । होडेति भिल्लस्त्री । मन्देत्यप्रौढा स्त्री । विलातेति नवयौवना स्त्री । सम्फलेत्यादय एकपुष्पान्ता ओषधिविशेषाः । भस्त्रेव फलानि यस्या इति विग्रहः । कुक्कुट्यादिषु पाठात्पुंवद्भावः । शूद्रेति जातावेवाप् । महत्पूर्वात् शूद्रशब्दात्तु ईबेव । महाशूद्री । "आभीरी तु महाशूद्री जातिपुंयोगयोः समाः" इत्यमरः ॥ पुंयोगे त्वीबेव । शूद्री । क्रुञ्चेत्यादित्रयोऽमी हसान्ता इत्येके । भाष्ये तु क्रुञ्चानालभेत । उष्णिहककुभावित्यादिप्रयोगमुदाहृत्यादन्ता अपि स्वीकृताः । पचाद्यप्रत्ययेन नाम्युपधात्क इति कप्रत्ययेन च रूपसिद्धेः । उष्णिहेति छन्दोजातिः । देवविशेति देवानां प्रजा ॥ पुंयोगेऽपि । यदा ज्येष्ठादयः प्रथमजातादौ वर्तन्ते तदा अदन्तत्वादेवाप् । यदा ज्येष्ठस्य स्त्रीति पुंयोगविवक्षा तदाऽप्याप् भवतीति सूचयितुमपिशब्दः । कोकिलस्य स्त्री कोकिला । जातिवाचकादप्यजादेरबेव भवति न तु जातेरितीप् । तेन जातावपि कोकिलेत्येव । नञ्पूर्वान्मूलशब्दाज्जातावप्याप् । अमूलेत्योषधिजातिः । अनञ्पूर्वात्तु शतमूलीत्येव ॥ २ ॥

(त०) अजादेश्चेति ॥ ईब्बाधनार्थमिदम् । अजादौ जातिलक्षण ईप् प्राप्तः । बालेति 'वयसि प्रथमे' इतीप् प्राप्तः । पुंयोगेऽपीति ॥ यदि ज्येष्ठादयः प्रथमजातादौ वर्तन्ते तदाऽदन्तत्वादेवाप् । यदा ज्येष्ठस्य स्त्रीति पुंयोगो विवक्ष्यते तदाऽपि आप् भवतीति सूचयितुमपिशब्दः । एतद्बीजं तु अतः स्त्रियामाबिति सूत्रणीये विपरीतनिर्देशाद्विकल्पादिलाभः ॥ २ ॥

(पादो वा ईप्) द्विपदी—द्विपाद् ॥ ३ ॥

(सु०) पादो वा ईप् ॥ कृतसमासान्तात्पादशब्दादीप् वा स्यात् ॥ द्वौ पादौ यस्याः सा इति बहुव्रीहौ संख्यासुव्यादिपूर्वस्येति पादशब्दस्यान्तलोपः । द्विपाद् । ईपि तु शसादौ स्वरे तद्धितयस्वरयोरिति पद् । द्विपदी छन्दोजातिः ॥ ३ ॥

आबृचि ॥ ऋचि वाच्यायां सत्यां पादान्तादाप् स्यात् ॥ द्विपदा ऋक् ॥ ४

(सु०) आवृचि॥ ऋचि वाच्यायां तु द्विपदा एकपदा ऋक् इत्येव भवति ॥४॥

काप्यतः ॥ कापि परे पूर्वस्याकारस्येकारो भवति(क) ॥ कारिका । पाचिका । पाठिका ॥ अतः किम् ॥ नौका ॥ तपरः किम् । राका ॥५॥

(सु०) काप्यतः ॥ कापि इ अत इति छेदः । ककारेण सहितः आप् काप् तस्मिन् ॥ प्रत्ययस्यैव को गृह्यते आपा साहचर्यात् । स्त्रियां वर्तमानस्य नाम्नोऽतःस्थाने इकारो भवति कापि परे । करोतेः तृवुणाविति वुण् । णित्वाद् वृद्धिः ॥ कारिका ॥ एवं पचतेः पाचिका ॥ अतः किम् । नौका । नौशब्दात्स्वार्थे कप्रत्ययः ॥ ककाराभावे तु शक्नोतीति शका । पचाद्यप्रत्ययः ॥ तपरः किम् । राका ॥ मामकनरकयोरत इः । ककारस्य प्रत्ययत्वाभावादप्राप्तौ वचनम् । ममेयं मामिका । अणीनयोरिति ममकादेशः । णित्वाद्वृद्धिः । अजादित्वादाप् ॥ नरान् कायतीति 'कै शब्दे' अस्मात् आतो ड इति डप्रत्ययः । आप् इत्वं च । नरिका ॥ ५ ॥

(त०) काप्यत इति ॥ कापि इ अत इति छेदः । कसहित आप् काप् तस्मिन् । अत्र कप्रत्यय गृह्यते आपा साहचर्यात् । तेन शक्नोतीति शकेत्यत्र न ॥ अत इ कापीति वक्तव्ये विपरीतनिर्देशादन्यदपि भवति तेन क्वचित्प्रत्ययस्थे केऽपि न । क्वचिदप्रत्ययस्थेऽपि भवति ॥ नरान्कायति नारिकेति मामिकेत्यत्र च । एवं स्थिते साहचर्यं न सर्वत्र नियामकमित्युक्तिर्गौरवग्रस्तत्वादुपेक्षिता । स्त्रियामित्यत्रानुवर्तते । स्त्रियां वर्तमानस्य नाम्नोऽत इर्भवतीति व्याख्येयम् । तेन कारकमाप्नोति कारकाप् इत्यत्र नेत्वम् ॥ अतः किम् । मातृका ।५।

(क्षिपकादीनां न) क्षिपका । ध्रुवका । कन्यका । चटका । यका । सका । उपत्यका । अधित्यका ॥ ६ ॥

(सु०) क्षिपकादीनां न ॥ एषामत इकारो न कापि ॥ क्षिपेर्नाम्युपधात् क इति कः । ध्रुव स्थैर्ये इत्यस्मादपि कः । अथवा ध्रु गतिस्थैर्ययोरस्मात्पचाद्यप्रत्ययः । कुटादित्वात् ङित्वेन गुणाभावे नुधातोरित्युव् । क्षिपा एव क्षिपका शास्त्रविशेषः ॥ ध्रुवा एव ध्रुवका भाजनम् ॥ चट भेदनेऽस्मात्पचाद्यः । चटका ॥ सर्वत्रापि अज्ञातादौ के पुनरपि च ह्रस्वो वेति ह्रस्वः ॥ या एव यका । सा एव सका । आभ्यामाख्याताव्ययसर्वादेरित्यकः ॥ उपाधिभ्यामासन्नरूढयोरिति त्यकः । उपत्यका । अधित्यका । "उपत्यकाऽद्रेरासन्ना भूमिरूर्ध्वमधित्यका" इत्यमरः ॥ ६ ॥

(त०) क्षिपकेति । एतद्बीजं तु उक्तमेव ॥ ६ ॥

(तारका ज्योतिषि) अन्यत्र तारिका ॥ ७ ॥

(सु) तारका ज्योतिषि ॥ तरतेर्वुण् । अकादेशो वृद्धिश्च । ज्योतिर्नक्षत्रं नेत्रकनीनिका च । तयोरर्थे तारका । अन्यत्र तु तारिका ॥ ७ ॥

(वर्णका तान्तवे) वर्णिकाऽन्या ॥ ८ ॥

(क) ककारेणाव्यवहित आप् काप् तस्मिन् । ततश्च बहवः परिव्राजका यस्यां सा बहुपरिव्राजकेत्यत्रापः स्यादिपरत्वेन तेन व्यवधानान्न । आप्प्रत्यये साहचर्यात् ककारोऽपि प्रत्ययसम्बन्ध्येव बोध्यः । एवं च शक्नोतीति शक्कृशक्ताविस्यादेः पचाद्यचि आप्प्रत्यये च शकेत्यादौ न ।

(सु०) वर्णका तान्तवे ॥ तन्तूनां विकारस्तान्तवं तस्मिन् ॥ वर्णका प्रावारविशेषः । वर्ण वर्णक्रियाविस्तारगुणवचनेष्विति चौरादिकाद्वुण् । ग्रन्थविशेषस्य व्याख्यात्री स्तोत्रकर्त्री वर्णिका ॥ ८ ॥

(वर्तका शकुनौ प्राचाम्) उदीचां तु वर्तिका ॥ ९ ॥

(सु०) वर्तयतीति वर्तिका ॥ वुण् प्रत्ययः । शकुनावेव वाच्येऽयं विकल्पः । अन्यस्मिन्नर्थे तु नित्यमित्वम् । प्राचां पूर्वाचार्याणां मते इतोऽभावः । उदीचामाधुनिकानां मते इत्वमित्यर्थः ॥ ९ ॥

(अष्टका श्राद्धे) अष्टिकाऽन्या ॥ १० ॥

(सु०) अश्नन्ति ब्राह्मणा यस्यां साऽष्टका । इष्यशिभ्यां तक इति तकः । अष्टौ परिमाणमस्य इत्यष्टिका ॥ १० ॥

(क्वचिद्वा) पुत्रका—पुत्रिका । सूतका—सूतिका । वृन्दारका—वृन्दारिका । आर्यका—आर्यिका । चटकका—चटकिका । निर्भस्त्रका । निर्भस्त्रिका । एषका—एषिका । अजका—अजिका । ज्ञका—ज्ञिका । द्वके—द्विके । निःस्वका-निःस्विका ॥ ११ ॥

(सु०) क्वचिद्वा ॥ वा अ इति च्छेदः । क्वचित् पूर्वस्याकारो वा भवति कापि परे ॥ पुत्री एवेति ह्रस्वो वेति ह्रस्वे कृते पुत्रिका । पक्षे पूर्वस्य ईपोऽकारः पुत्रकेति ॥ सूतशब्दात् स्वार्थे कः । सूता एव सूतिका—सूतका ॥ वृन्दमस्यास्तीति शृङ्गवृन्दाभ्यामारकः । वृन्दारिका—वृन्दारका ॥ देवतावाची वृन्दारकशब्दः पुंलिङ्ग एव । अन्यत्र त्रिलिङ्गः । तथा च त्रिषूत्तरे इत्युपक्रम्य "वृन्दारकौ रूपिमुख्यौ" इत्यमरः ॥ आर्या एव आर्यका । पक्षे इत्वम् । आर्यिका॥ चटका एव चटकका—चटकिका ॥ निष्क्रान्ता भस्त्राया इति निर्भस्त्रा । पञ्चमीतत्पुरुषः । निर्भस्त्रा एवेति निर्भस्त्रका—निर्भस्त्रिका ॥ एषा एव एषका—एषिका । अकः ॥ अजा एव अजका—अजिका । ज्ञा एव ज्ञका—ज्ञिका ॥ द्वे एव द्वके-द्विके ॥ आख्याताव्ययसर्वादेरित्यकः ॥ निर्गता स्वात् या सा निःस्वा । निःस्वा एवेति निःस्वका—निःस्विका । स्वार्थे कः ॥ ११ ॥

(त०) क्वचिद्वेति ॥ अत्रापि विपरीतनिर्देश एव मूलम् ॥ ११ ॥

ह्रस्वो वा ॥ कापि परे तरादौ च पूर्वस्य ह्रस्वो वा(क) ॥ गङ्गाका—गङ्गका—गङ्गिका ॥ नदिका—नदीका ॥ श्रेयसितरा—श्रेयसीतरा ॥ वाग्रहणादेव-संध्यक्षराणां न । गोका । नौका ॥ १२ ॥

(सु०) ह्रस्वो वा ॥ कापि तरादौ प्रत्यये च परे स्त्रियां विहितस्य अन्त्य ह्रस्वोऽत इश्च वा स्यात् । वाशब्दो व्यवस्थार्थस्तेन तरादाविति लब्धम् । गङ्गा एव गङ्गका । ह्रस्वाभावे गङ्गाका । काप्यत इतीत्वे गङ्गिका ॥ ह्रस्वा नदीति नदिका-नदीका । स्वार्थे कः ॥ अतिशयेन श्रेयसीति श्रेयसितरा—श्रेयसीतरा । 'तरतमेयस्विष्ठाः प्रकर्षे' इति तरप्रत्ययः ॥ स्त्रियां विहितस्य किम् । लक्ष्मीतरा ॥ चमूतरा ॥ १२ ॥

(क) कापीति पूर्वतः तरादाविति वाशब्दव्यवस्थयोक्तम् । ते च तरतमरूपकल्पादयः ।

(त०) ॥ह्रस्वे वेति॥ वा आ इति छेदः। स्त्रियामित्यनुवर्तते। स्त्रियां वर्तमानान्नाम्नः परस्याकारस्य ह्रस्व इश्च वा भवतीत्यर्थः ॥ वा इत्यस्य व्यवस्थितत्वं बोध्यम्। तेन तरादावपि। नदीतर इत्यत्र तु 'प्रत्ययाप्रत्ययोः प्रत्ययस्यैव ग्रहणम्' इति परिभाषाबलान्न ह्रस्वत्वम्। क्वचिदीपो नित्यं ह्रस्वः॥ ब्राह्मणितरा। कप्रत्यये समानस्य ह्रस्वः॥ आर्यका। कालिका। जम्बुका। टाडका इति कृतेन केन कल्याणपञ्चमीकः॥ आपो वा। बहुविपकः-बहुविपाकः॥ एवं चैतदर्थलाभाय वाशब्दस्य व्यवस्थितत्वाश्रयणेऽवश्यं कर्तव्ये अ वेति हित्वा ह्रस्वग्रहणं वाक्यान्तरलाभाय। वाक्यान्तरं चेदम् नाम्नः परस्य स्त्रियां विहितस्य स्वरस्य ह्रस्वो वा स्यात् स्त्रीलिङ्गे परे। तच्च स्त्रीलिङ्गं लक्ष्यानुसारात्तरादिकमेव गृह्यते। इत्यादिव्याख्यानं गौरवग्रस्तत्वादुपेक्षितम्। किञ्च अ वेति सूत्रिते नदिकेत्यादि न सिध्येत् इति ॥ १२ ॥

(न्रण ईप्) दण्डिनी। दन्तिनी। मघोनी। शुनी। पौंस्नी। स्त्रैणी। चौरी। हर्त्री। कर्त्री ॥ १३ ॥

(सु०) नॄण ईप् ॥ न् च आ च अण् च एषां समाहारो नॄण् तस्मान्नॄणः। अणिति प्रत्ययः। नाम्नो विशेषणात्तदन्तविधिः। न च प्रत्ययविधौ प्रतिषेधः शङ्क्यः स्त्रीप्रत्ययेषु तदन्तविधिस्वीकारात्। नान्तात् ऋदन्तात् अणन्ताच्च स्त्रियामीप् स्यात्। दण्डोऽस्या अस्तीति दण्डिनी ॥ मान्तोपधाद्वन्विनावितीन्। मघोनी ॥ शुना। श्वादेरिति वत्योत्वम् ॥ कर्त्री। करोतेस्तृवुणाविति तृप्रत्ययः ॥ १३ ॥

यस्य लोपः ॥ इवर्णावर्णयोर्लोपो भवति तद्धितस्य स्वरे यकारे ईपि च ॥ औपगवी। ऐन्द्री। ईप्यनोऽल्लोपः। राज्ञी। द्विदाम्नी ॥ १४ ॥

(सु०) यस्य लोपः ॥ इश्च अश्च यं तस्य यस्य लोपः स्यात्तद्धितयस्वरयोरीपि च ॥ यथा गार्ग्यः। काव्यम्। वासिष्ठः। मौनम्। उपगोरपत्यं स्त्री औपगवी। अपत्येऽणित्यण् ॥ इन्द्रो देवता अस्या इति ऐन्द्री दिक्। देवतेदमर्थे इत्यण्। ईप्यनोऽल्लोपः ॥ अन्नन्तस्योपधाकारस्य लोपः स्यादीपि। राज्ञः स्त्री राज्ञी। द्वे दाम्नी यस्याः सा द्विदाम्नी ॥ १४ ॥

(त०) यस्य लोप इति ॥ इश्च अश्च यं तस्य ॥ स्वरौ यकारश्च तद्धितस्यैव प्रकरणात्। अदे आतो ढ इति लिङ्गाभ्यां त्यादिकृत्स्वरो न अस्त्यादिति लिङ्गाच्च यकारस्य न ग्रहणम्। अत एव न दीर्घयोरेव। एर्लोप इति तु न सूत्रितं तन्त्रादिना यकारलोपार्थम्। तेन गार्गी तैपं पौषं कानीन इत्यादि सिद्धम् ॥ जात्याश्रयणाद्दीर्घयोरपि ॥ ईप्यन इति ॥ ईपि परे अनोऽकारस्य लोप इत्यर्थः ॥ एतन्मूलं तु नो वेत्यत्र वा इत्यस्य व्यवस्थितत्वाश्रयणम् ॥ १४ ॥

षट्त्रितः ॥ षकारटकारउकारऋकारानुबन्धात् स्त्रियामीप् प्रत्ययो भवति॥ ष-वराकी॥ ट-कुरुचरी। ऊरुद्वयसी। ऊरुदघ्नी। ऊरुमात्री। इत्वरी॥ उ-गोमती। विदुषी॥ ऋ-पचन्ती। दीव्यन्ती। तुदती तुदन्ती। प्राची-प्राञ्ची। प्रतीची-प्रत्यञ्ची। उदीची-उदञ्ची। तिरश्ची-तिर्यञ्ची। स्तनन्धयी ॥१५॥

(सु०) षूञितः ॥ ष् च ट् च उश्च आ चेति षूञः षूञः इतो यस्य स षूञित् तस्मात् षूञितः । वृणोतेः 'षाकोकण' इति षाकप्रत्ययः । यस्येत्यलोपः । वराकी । कुरुचरी । कुरुषु चरतीति । अधिकरणोपपदाच्चरतेरटाविति टः ॥ गोशब्दात् 'अस्त्यर्थे' इति मतुः । गावः सन्ति यस्याः सा गोमती ॥ विदेर्वा वसुरिति वसुप्रत्ययः । वसोर्वं उरित्युत्वम् । विदुषी ॥ पचेः शतृशानौ तिप्तेवदिति शतृप्रत्ययः । अप् कर्तरीत्यप् । पचन्ती ॥ दिवेः शतृप्रत्यये दिवादेर्य इति यप्रत्ययः । दीव्यन्ती । अप्ययोरान्नित्यमिति नुम् ॥ तुदेः शतृप्रत्यये तुदादेर इत्यप्रत्ययः । तुदती । तुदन्ती ॥ वाऽऽडीपोः शतुरिति वा नुम् ॥१५॥

(त०) षूञित इति ॥ ष् च ट् च उश्च आ च ते षूञस्ते इतो यस्य स षूञित् तस्मात् षूञितः । षिदन्ताट्टिदन्तादुदन्तादादन्तान्नाम्नः स्त्रियामीप् इत्यर्थः ॥ वराकीति ॥ वरणशीलेति विग्रहे वृञ् धातो षाकोकण इति षाकप्रत्ययः । गुण इति गुणः । कुरुषु चरतीति विग्रहे चर गतावित्यतोऽटाविति टप्रत्ययः । गौणत्वे तु नेप् । बहुवराका । बहुकुरुचरा । विदुषी । पचन्ती ॥ उदन्तादादन्तात्तु गौणत्वेऽपि । प्रियविदुषी । प्रियपचन्ती । गौणमुख्यन्यायस्यानित्यत्वात् । ष्वद् इत्यादौ तु धातोश्चेत् त्रिस्कार्यं तर्ह्यन्ततेरेव इति नियमेन प्राप्तिर्बाधिता ॥ १५ ॥

(मन्नन्तान्नेप्) सीमा, सीमानौ । दामा, दामानौ ॥ १६ ॥

(सु०) मन्नन्तान्नेप् । मन्नन्तान्नाम्न इप् न भवति ॥ सीमा । दामा । राजवत् ।१६॥

(त०) मन्नन्तादिति ॥ एतन्मूलं तु आवतः स्त्रियामिति सूत्रे विपरीतनिर्देश एव । एवमुत्तरत्रापि ॥ १६ ॥

(अन्नन्ताद्बहुव्रीहेर्न) बहुयज्वा, बहुयज्वानौ ॥ १७ ॥

(सु०) अन्नन्ताद्बहुव्रीहेर्न ॥ नान्तत्वात्प्राप्त ईप् स न भवति । बहवो यज्वानो यस्यां सा बहुयज्वा नगरी ॥ १७ ॥

डाब् वा ॥ मन्नन्तान्नाम्नोऽन्नन्ताद्बहुव्रीहेश्च डाब् वा स्यात् ॥ डित्वाट्टिलोपः ॥ सीमा, सीमे, सीमाः ॥ दामा दामे, दामाः ॥ बहुयज्वा, बहुयज्वे, बहुयज्वाः ॥ १८ ॥

(सु०) डाब् वा ॥ मन्नन्तान्नाम्नोऽन्नन्ताद्बहुव्रीहेश्च डाब् वा स्यात् । डित्वाट्टिलोपः । सीमा । दामा । बहुयज्वा । गङ्गावत् ॥ "सीमसीमे स्त्रियामुभे" इत्यमरः ॥१८॥

(उपधालोपिनो बहुव्रीहेर्वेप्) बहुराज्ञी—बहुराजा ॥१९॥

(सु०) उपधालोपिनो बहुव्रीहेर्वेप् ॥ अन्नन्ताद्बहुव्रीहेरुपधालोपिनो वेप् स्यात् ॥ बहवो राजानो यस्यां सा बहुराज्ञी ॥ ईपि अन इत्यल्लोपः । ईबभावे डाप् पक्षे डाबीपोरभावः ॥ १९ ॥

नदादेः ॥ स्त्रियामीप्(क) ॥ नदी । गौरी । सरसी । सखी । अशिश्वी । अनड्वाही । अनडुही इत्यादि ॥ २० ॥

(क) नदादेराकृतिगणत्वात्सोपर्णेयी पीवरी जित्वरी शर्वरी द्वादशी पञ्चमीप्रभृतयोऽविहितलक्षणा नदादौ ज्ञेयाः ।

(सु०) नदादेः ॥ नद आदिर्यस्य स नदादिस्तस्मान्नदादेर्गणात् स्त्रियामीप् स्यात् ॥ अनुपसर्जनादेवायं गौणमुख्यन्यायात् । नद इत्यव्यक्तं शब्दं करोतीति पचाद्यच्प्रत्ययः । यस्येत्यल्लोपः । नदी ॥ गौणे तु नदीमतिक्रान्ता स्त्री अतिनदा ॥ सुपर्णशब्दादपत्येऽर्थे ण्यण् प्रत्ययः । आदिस्वरवृद्धिश्च । सुपर्णाया अपत्यं स्त्री सौपर्णेयी ॥ ऊरुः प्रमाणं यस्याः सा ऊरुद्वयसी नदी । यस्येत्यल्लोपः 'प्रमाणे द्वयसट्दघ्नट्मात्रटः' इति द्वयसडादिः ॥ अक्षैर्दीव्यति 'केनेयेका' इति इकप्रत्ययः । आक्षिकी ॥ इण्नशजिसर्तिभ्यः क्वरबिति क्वरप् ॥ एति परपुरुषं तच्छीला इत्वरी अनसी । क्वरब्द्वयसडाद्यन्तोदाहरणचतुष्टयं ट्विन्त इत्यत्र वक्तुमुचितम् । क्वचित्तु तथैव पाठस्तत्र न दोषः ॥ चुरा शीलमस्या इति चौरी । अञ्प्रत्ययान्तः स्त्रीपुंसाभ्यामिति नञ्स्नञौ । स्त्रियां भवा स्त्रैणी । पुंसि भवा पौंस्नी ॥ शक्तिः प्रहरणमस्या इति शाक्तीकी । शक्तियष्ट्योरीकणितीकण् ॥ गर्गस्यापत्यमिति गर्गादेरिति ण्यः । गार्ग्यः । स्त्र्यपत्ये तु नदादित्वादीप् । यस्येत्यल्लोपः । हलात्तद्धितस्येति यलोपे गार्गी । पक्षे गार्ग्यायणीति । ण्यन्ताद्गार्ग्यशब्दात् स्त्रियामायनणि नदादित्वादीप् स्वार्थे ॥ लोहितस्यापत्यं स्त्री लौहितायनी । लोहितादिर्गर्गाद्यन्तर्गणः । ण्यान्ताल्लौहित्यशब्दात् स्त्रियामायनण् ॥ कतस्यापत्यं स्त्रीति ण्यन्तात् कात्यशब्दात् स्त्रियामायनण् ॥ आसुरस्यापत्यं स्त्रीति अणन्तादासुरशब्दात्स्त्रियामायनण् ॥ २० ॥

(त०) नदादेरिति ॥ नद आदिर्यस्य स नदादिर्गणः तस्मात् नदादेः । नदडादयो यद्यपि टितो निपातितास्तथापि इहाटित एव बोध्याः । स्वरार्थत्वं तु इहानपयुक्तमेव । वैदिकानामप्रतिपाद्यत्वात् । अत इत्यनुवृत्तं यथासंभवं विशेषणीयम् । अन्यथा सख्रोत्यादि न सिद्ध्येत् । यदि तु पत्न्यादित्वमेषां तदाऽनुवृत्तविशेषणत्वेन संकोचः । नदमिच्छन्ती कुर्वन्ती वा नदीर्नदित्यत्रातिव्याप्तिवारणायात इत्यनुवृत्तिश्चावश्यमभ्युपेया । एकदेशविकृतन्यायेन नदशब्दत्वात् प्राप्तिः ॥ एवं वराकमिच्छन्ती कुर्वन्ती वा वाराकीर्वराक् इत्यत्रापि नेप् अनुवृत्तेस्तत्रापि सत्त्वात् ॥ २० ॥

(अनन्त्यवयोवाचिनोऽदन्तात् स्त्रियामीप्) (क) कुमारी । किशोरी । वधूटी । चिरण्टी । तरुणी । तलुनी । अदन्तात्किम् । शिशुः ॥ २१ ॥

(सु०) अनन्त्यवयोवाचिनोऽदन्तात् स्त्रियामीप् ॥ कालकृता शरीराऽवस्था वयः । वयांसि चत्वारि त्रीणि च सन्ति । यथा । "आद्ये वयसि नाधीतं द्वितीये नार्जितं धनम् ॥ तृतीये न तपस्तप्तं चतुर्थे किं करिष्यति ॥ पिता रक्षति कौमारे भर्ता रक्षति यौवने ॥ पुत्रस्तु स्थविरीभावे न स्त्री स्वातन्त्र्यमर्हति ॥" उपचयापचयलक्षणे द्वे वयसी इत्यन्ये । वधूटचिरण्टतरुणतलुनशब्दा यौवनवाचिनः ॥ कुमारस्तु प्रथमवयोवाची ॥ अल्पवयाः अथवा किशोरी ॥ २१ ॥

(त०) कुमारीति ॥ प्रथमवयोवाची एष शब्दः न तु स्त्रीत्वप्रयुक्तः । वृद्धकुमा

(क) कालकृता शरीरावस्था वयः। अत्र वासुदेवः 'तत्र यद्यपि केचित्कौमारयौवनमध्यत्ववृद्धत्वानि चत्वार्याहुः । अन्ये तु कौमारयौवनस्थविरत्वानि त्रीणीच्छन्ति । अपरे—

'आषोडशाद्भवेद्बालो यावत्क्षीरनिवर्त्तकः, मध्यमः सप्ततिर्यावत् परतो वृद्ध उच्यते ।' इत्यन्यथा त्रिण्याहुः । तथापि यावत्यो वृद्धिमत्योऽवस्थास्ताः सर्वा एकीकृत्य प्रथमं वयः । याश्चापचयवत्यस्ता राशीकृत्य द्वितीयमिति ।

रीति तु गौणः प्रयोगः तरुणी शालेत्यपि मुख्यार्थे उत्पादितस्य गौर्वाहीक इतिवद्गौणत्वेऽपि संभवात् ॥ २१ ॥

(ऊधसोऽन्तस्य बहुव्रीहेर्नङ् स्त्रियाम्) कुण्डोध्नी । द्व्यूध्नी । अत्यूध्नी ॥ २२ ॥

(सु०) **ऊधसोऽन्तस्य बहुव्रीहेर्नङ् स्त्रियाम्** ॥ अकार उच्चारणार्थः । बहुव्रीहिग्रहणेनैव तदन्तलाभादन्तग्रहणं स्पष्टप्रतिपत्त्यर्थम् । अण ईबिति प्राप्तस्येपो निषेधः अनेन प्रतिषिध्यते । यथा । डाप् वेति वैकल्पिको डाप् । उपधालोपिनो बहुव्रीहेर्वेति वैकल्पिक ईप् । अन्नन्ताद्बहुव्रीहेर्नेति निषेधश्च । कुण्डमिव ऊधो यस्याः सा । ईप्यनोऽल्लोप इत्यल्लोपे कुण्डोध्नी ॥ द्वे ऊधसी यस्याः सा द्व्यूध्नी ॥ अतिशयितमूधो यस्याः सा अत्यूध्नी ॥ स्त्रीयामिति किम् , कुण्डोधो धेनुकम् ॥ बहुव्रीहेरिति किम् । प्राप्ता ऊधः प्राप्तोधाः । द्वितीयातत्पुरुषः ॥२२॥

संख्यादेर्दाम्न ईप् ॥ संख्यादेर्बहुव्रीहेर्दामान्ताच्च ॥ डाबीपोर्विकल्पेन प्राप्तयोर्वचनम् । द्विदाम्नी ॥ २३ ॥

वयोवाचिनो हायनस्येप् ॥ संख्यादेर्बहुव्रीहेर्वयोवाचिहायनान्तादीप् स्यात् । आपि प्राप्ते वचनम् ॥ २४ ॥

(त्रिचतुर्भ्यां हायनस्य णत्वम्) त्रिहायणी । चतुर्हायणी ॥२५॥

(सु०) **त्रिचतुर्भ्यां हायनस्य णत्वम्** ॥ आभ्यां परस्य वयोवाचकस्य हायनस्य णत्वं वाच्यम् ॥ त्रयो हायना यस्याः सा त्रिहायणी ॥ चत्वारो हायना यस्याः सा चतुर्हायणी बाला । "हायनोऽस्त्री शरत्समाः" इत्यमरः ॥ २५ ॥

इन्द्रादेरानीप् ॥ स्त्रियां पुंयोगे (क) ॥ इन्द्राणी । वरुणानी । भवानी । शर्वाणी । रुद्राणी । मृडानी ॥ २६ ॥

(सु०) **इन्द्रादेरानीप्** ॥ इन्द्र आदिर्यस्य स इन्द्रादिस्तस्मादिन्द्रादेर्गणात् स्त्रियामानीप् स्यात् ॥ पुंयोगेत्यपकृष्यते । पित्करणसामर्थ्याद्वसेप इत्यस्यानीपोऽपि ग्रहणं भवति ॥ ननु ह्रस्वादिरेवानीबस्तु किमनेन दीर्घोच्चारणेन । अत्राहुः । ब्रह्माणीति सिद्ध्यर्थं दीर्घग्रहणम् । ब्रह्मन्शब्दादानीपि कृते नो वेति टिलोपे ब्रह्माणीति ॥ अन्ये त्वाहुः । ब्रह्माणमानयति जीवयतीति 'अन प्राणने' ण्यन्तादस्मात्कार्येऽणित्यण् प्रत्ययः । नूण ईबितीपि च कृते ब्रह्माणीति सिद्ध्यत्येव ॥ माधवस्तु इन्द्रं करोति इन्द्रयति, इन्द्रेति 'नाम्नो णिङ् करणे' इति ण्यन्तात् क्विपि इन्द्र् तस्य इन्द्रः स्त्री इन्द्राणीति दीर्घपाठाद्वदति तन्न । क्विबन्तस्य क्रियाशब्दत्वेन पुंशब्दत्वाभावात् ॥ किंच इन्द्रमिच्छतीति इन्द्रीयति । नाम्नो य ई चास्येति यप्रत्ययान्तात् क्विपि कृते इन्द्रीः । इन्द्रियः स्त्री इन्द्राणीत्यतिव्याप्तेश्च ।

(क) ननु इन्द्रादेरित्य।दिना ऽनीबेव विधीयतां सवर्णदीर्घत्वे चेन्द्राणीत्यादिसिद्धेः। विधानसामर्थ्याच्च यस्य लोप इत्यल्लोपो न स्यात्। अन्यथा नीपमेव कुर्यात् इति चेत्सत्यम् । इन्द्रमाचष्ट इन्द्रयति । इन्द्रयतीतीन्द्र। तस्य स्त्री इन्द्राणीत्यादावपि दीर्घश्रुत्यर्थमानीब्विधिः । इति माधवः ।

वस्तुतस्तु इस्वादिपाठेऽपि हानिर्न । इन्द्रस्य स्त्री इन्द्राणी ॥ वरुणस्य स्त्री वरुणानी ॥ भवशर्वमृडरुद्राः पर्यायशब्दाः ॥ २६ ॥

(त०) इन्द्रादेरानीविति ॥ अत्र 'पुंयोगे च' इत्यतः 'पुंयोगे' इत्यनुकृष्यते । दीर्घोच्चारणं तु क्वचिदतद्धितेऽपि यस्य लोप इति ज्ञापनार्थम् । अन्यथा अनीपि लोपे एवं न स्यात् । आकारोच्चारणस्य तु न समर्थं धर्मादनि सुधर्मेत्यादावपि तत्सामर्थ्याल्लोपाभावप्रसङ्गात् । इन्द्रं करोति इन्द्रयति ततः क्विपि इन्द्र् तस्य इन्द्रः स्त्री इन्द्रमिच्छतः इन्द्रियः स्त्रीत्यादौ अतः इत्यनुवृत्तेरनदन्तत्वादेव न । प्राणाणीति प्राणमानयति जीवयतीति विग्रहे 'अन प्राणने' इत्यतो ण्यन्तात्कर्मण्यणि अणन्तत्वात् त्रण ईपि णत्वे च सिद्ध्यति । सूत्रं तु इन्द्रस्य स्त्रीति वाक्ये इन्द्रीत्यनिष्टरूपवारणायेति बोध्यम् । इन्द्रादेरानन्वेति तु न सूत्रितम्, आगमलिङ्गाभावेन सर्वादेशप्रसङ्गात् । अनुगपि न कृतः अल्लोपः स्वर इति लोपप्रसङ्गात् । अकारोच्चारणस्य तु प्रकृत्यकारकरणार्थत्वेन चरितार्थत्वान्न सामर्थ्यम् । शर्वशब्दे च । अत्राहुः । आनुक् सुवचं मात्रालाघवादिति । अत्रेदं वक्तव्यं मात्रालाघवेऽपि प्रक्रियागौरवस्य सत्त्वेन तुल्यत्वात् । तथा हि । आनुकि सवर्णे दीर्घः सह, त्रण ईविति सूत्रद्वयम् आनीपि तु दीर्घसूत्रमेकमेवेति लाघवम् ॥ २६ ॥

(आचार्यादणत्वम्) आचार्यानी ॥ २७ ॥

(सु०) आचार्यादणत्वम् ॥ आचार्यशब्दात्परस्यानीपो नस्य णत्वं न स्यात् ॥ आचार्यस्य स्त्री आचार्यानी-पुंयोगाभावे आचार्या । स्वयं व्याख्यात्री ॥ २७ ॥

(हिमारण्ययोर्महत्त्वे) महद्धिमं हिमानी ॥ महदरण्यमरण्यानी २८

(सु०) हिमारण्ययोर्महत्त्वे ॥ महत्त्वयोगे आभ्यामानीप् स्त्रीत्वं च विधीयते ॥ महद्धिमं हिमानी ॥ "हिमानी हिमसंहतिः" इत्यमरः ॥ महदरण्यमरण्यानी । "महारण्यमरण्यानी" इत्यमरः ॥ २८ ॥

(त०) महत्त्वे इति ॥ लक्षणया महत्त्वम् । न दीर्घत्वमिति भावः । तदन्तश्च स्त्रियामिति वक्तव्यम् । अन्यथा धौ ह्रस्वः स्त्रियां य्वोरित्यादेः प्रवृत्तिर्न स्यात् स्त्रियमाभावात् । २८

(यवाद्दोषे) दुष्टो यवो यवानी ॥ २९ ॥

(सु०) यवाद्दोषे ॥ यवादानीप् स्त्रीत्वं च दोषेऽर्थे ॥ दुष्टो यवो यवानी ॥ यवत्वजात्यभावे तदाकारानुकृतिर्दोषः । यवाकारानुकृतिमजात्यन्तरमेवानेनाभिधीयते ॥ २९ ॥

(त०) यवाद्दोष इति ॥ यवानीति जात्यन्तरमेवानेन विधीयते । अयमेव चास्य दोषः । यदि तु यवत्वजातेरभावेऽपि तदाकारानुकृतिः ॥ २९ ॥

(यवनाल्लिप्याम्) यवनानां लिपिर्यवनानी ॥ ३० ॥

(सु०) यवनाल्लिप्याम् ॥ यवनशब्दादानीप् लिप्यर्थे । स च स्त्रीलिङ्ग एव । देवतेदमर्थे इत्यणो बाधक आनीप् विधीयते । यवनानां लिपिर्यवनानी । लिखिताक्षरविन्यासो लिपिः ॥ ३० ॥

(मातुलोपाध्यायाभ्यां वा) मातुलानी–मातुली ॥ उपाध्यायानी–उपाध्यायी ॥ ३१ ॥

(सु०) मातुलोपाध्यायाभ्यां वा ॥ आभ्यामानीप् वा स्यात् । पक्षे पुंयोगे चेतीप् ॥ मातुर्भ्राता मातुलस्तस्य स्त्री मातुलानी–मातुली ॥ उपाध्यायस्य स्त्री उपाध्यायानी—उपाध्यायी ॥ ३१ ॥

(अर्यक्षत्रियोपाध्यायेभ्यो वा स्वार्थे) अर्याणी–अर्या ॥ क्षत्रियाणी–क्षत्रिया ॥ उपाध्यायानी–उपाध्याया ॥ ३२ ॥

(सु०) अर्यक्षत्रियोपाध्यायेभ्यो वा स्वार्थे ॥ एभ्यः स्वार्थे आनीप् वा स्यात् । पक्षे आप् ॥ अर्याणि—अर्या । स्वामिनी वैश्या वेत्यर्थः । अर्यः स्वामिवैश्ययोरित्यर्थद्वयेऽपि निपातनात् ॥ क्षत्रियाणी—क्षत्रिया । क्षत्रियजातीया स्त्रीत्यर्थः ॥ पुंयोगे तु अर्यी क्षत्रियी ॥ या तु स्वयमेवाध्यापिका तत्र वा ङीप् वाच्यः । पक्षे आप् । उपाध्यायी उपाध्याया । उपेत्यास्या अधीयते इत्यपादाने स्त्रियां घञ् । "उपाध्यायान्युपाध्यायी" इत्यमरः ॥ ३२ ॥

(त०) आर्याणीति ॥ स्वामिनी वैश्या वा स्वार्थे इति ॥ पुंयोगेऽसतीत्यर्थः॥३२॥

पुंयोगे च ॥ अदन्तात्स्त्रियामीप् । शूद्री । गणकी ॥ ३३ ॥

(सु०) पुंयोगे च ॥ इह पुमिति षष्ठयन्तं सानुकृतिकं पृथक् पदम् । तच्चावर्त्यते । द्विरुच्चारणमावृत्तिः । पुंसः पुंस इति । योगे इति भावे निमित्ते वा सप्तमी । अधिकारान्नामेति लभ्यते । यत् पुंसो नाम पुंवाचकशब्दोऽदन्तः पुंसो योगे स्त्रियां वर्तते तत ईप् स्यात् ॥ योगः सम्बन्धः स चेह दाम्पत्यरूप एवेति नाग्रहः । किन्तु जन्यजनकभावोऽपि गृह्यते । तेन केकयस्य क्षत्रियस्य पुत्री केकयीत्यादि सिद्धम् । तदा च भट्टिः । "प्राक्केकयीतो भरतस्ततोऽभूत्" इति(क) ॥ कल्यादित्वात्केकयदुहिता कैकेयीत्यपी । तथा प्रागुक्तः "कैकेयि कामाः फलितास्तवेति" इति कालिदासेन(ख) ॥ पुंयोगे किम् । देवता । अयं हि संज्ञाशब्दः स्वभावात् स्त्रियां वर्तते न तु पुंवाचकशब्दयोगे ॥ अतः किम् । भानोः स्त्री भानुः ॥ ३३ ॥

(त०) गणकीति ॥ गणकस्य स्त्रीत्यर्थः । स्त्रियां वृत्तिस्तु साहचर्यात् । तस्येयमिति सम्बन्धात् । तद्धितस्त्वभेदविवक्षातो न । यदि भेदविवक्षा तथा गणकेत्यपि भवत्येव । पुंयोगश्च न दाम्पत्यरूप एव किंतु जन्यजनकभावलक्षणोऽपि तेन केकयीत्यपि।३३।

(पालकान्तान्न) गोपालिका । अश्वपालिका ॥ ३४ ॥

(सु०) पालकान्तान्न ॥ पुंयोगे ईब् न स्यात् । गोपालकस्य स्त्री गोपालिका।३४।

(त०) पालकान्तान्नेति ॥ चकारस्य व्यवस्थितत्वार्थत्वादित्यर्थः ॥ ३४ ॥

(सूर्याद्देवतायां चाप्) सूर्यस्य स्त्री देवता सूर्या । अन्या सूरी ॥३५॥

(सु०) सूर्याद्देवतायां चाप् ॥ सूर्यशब्दात् पुंयोगे आप् स्याम् देवतायां ईपोऽपवादः ॥ देवतायां किम् । सूर्यस्य स्त्री सूरी मानुषी कुन्तीत्यर्थः । सूर्यागस्त्ययोरिति यलोपः ॥ ३५ ॥

(क) सम्पूर्णश्लोको यथा—

कौशल्ययासावि सुखेन रामः प्राक्केकयीतो भरतस्ततोऽभूत्। प्रासोष्ट शत्रुघ्नमुदारचेष्टमेका सुमित्रा सह लक्ष्मणेन

(ख) कैकेयीति श्लोकः पूर्वोत्तरोक्तः ।

(त०) सूरीति । सूर्यागस्त्ययोरीये ईपि चेति यलोपः ॥ ३९ ॥

(जातेरयोपधात्) जातिवाचिनोऽयकारोपधादकारान्तात्स्त्रिया-मीप् प्रत्ययो भवति (क) ॥ महिषी । हंसी ॥ योपधात्तु । क्षत्रिया । वैश्या ॥ ३६ ॥

(सु०) जातेरयोपधात् ॥ जातिवाचकाद्य उपधा यस्य स योपधः न योपधः अयोपधस्तस्मादयोपधात् अदन्तात्स्त्रियामीप् स्यात् ॥ जातिलक्षणमाह । "आकृतिग्रहणा जातिर्लिङ्गानां च न सर्वभाक् । सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह ॥ १ ॥" आकृतिर्ग्रहणं यस्याः सा आकृतिग्रहणा जातिरुच्यते । आकृतिः संस्थानम् । गृह्यतेऽनेनेति ग्रहणम् । करणे ल्युट् । अवयवसन्निवेशविशेषव्यङ्ग्येत्यर्थः । यथा तटी । तटादेः सर्वलिङ्ग-त्वेऽपि आकृतिग्रहणत्वाज्जातित्वं भवति । अनेन लक्षणेन गोत्वादिजातिर्लक्षिता । ब्राह्म-णत्वादिजातिस्तु न लक्षिता । ब्राह्मणक्षत्रियादीनां ह्यवयवसंस्थानस्य सदृशत्वाद् ब्राह्म-णादिष्वव्याप्तिवारणाय लक्षणान्तरमाह । चकारो भिन्नक्रमार्थः । या सकृदाख्यातनिर्ग्राह्या सा जातिरुच्यते । सकृदेकवारमाख्यातोपदिष्टा सती निर्ग्राह्या निश्चेतुं शक्या सा जातिरि-त्यर्थः । कीदृशी सा लिङ्गानां न सर्वभाक् । लिङ्गानामिति कर्मणि षष्ठी । सर्वाणि भज-तीति सर्वभाक् । या सर्वाणि लिङ्गानि न भजतीत्यर्थः । सर्वशब्दस्य लिङ्गापेक्षत्वेऽपि गमकत्वात् भजो ण्विप्रत्ययः समासश्च । असर्वलिङ्गत्वे सत्येकस्यां व्यक्तौ कथनाद्व्यक्त्य-न्तरे कथनं विनापि सुग्रहो जातिरिति लक्षणान्तरम् । यथा वृषली । एकस्यां हि व्यक्तौ वृषलत्वे कथिते तदपत्यतत्सहोदरादौ कथनं विनापि वृषलत्वस्य सुग्रहः ॥ सकृदित्यादि किम् । देवदत्ता । यस्यां हि व्यक्तौ देवदत्तत्वं कथ्यते तत्समकालमन्या देवदत्ताव्यक्तिर-प्रसिद्धेति न देवदत्तत्वं जातिः । उक्तलक्षणद्वयरहितत्वात् । तृतीयलक्षणमाह । चरणैः सह गोत्रं जातिरुच्यते । चरणशब्देन शाखाध्येतार उच्यन्ते । गोत्रशब्देनापत्यमुच्यते । अपत्यप्रत्ययान्तः शाखाध्येतृवाचकशब्दो जातिवाचक इत्यर्थः ॥ गोत्रस्यानाकृतिग्रहण-त्वात् सर्वलिङ्गत्वाच्च पृथगुपादानम् । चरणशब्दानामध्ययनक्रियासम्बन्धेन प्रवृत्तत्वात् क्रियाशब्दा एव न जातिशब्दा इति चरणग्रहणं कृतम् । आकृतिग्रहणा यथा । महिषी । हंसी ॥ असर्वलिङ्गा यथा । ब्राह्मणी । वृषली ॥ गोत्रलक्षणा यथा । पैतृष्वस्रीयी । औप-गवी अणन्तनिमित्तकमीपं परत्वादयं बाधते इति भावः । चरणलक्षणा यथा । कठेन प्रोक्त-मधीयाना कठी । कारकादित्यण्प्रत्ययस्य लुक् च ॥ अत इति किम् । तित्तिरिः । गौः ॥ ३६ ॥

(त०) जातेरयोपधादिति ॥ जातिलक्षणमुच्यते "आकृतिग्रहणा जातिर्लिङ्गानां च न सर्वभाक् । सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह ॥" आकृतिग्रहणा जातिः । आकृतिः संस्थानं ग्रहणं यस्याः सा आकृतिग्रहणा । अवयवसन्निवेशविशेषव्यङ्ग्येत्यर्थः ।

(क) जातिलक्षणं महाभाष्ये—

'प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद्गुणैः । असर्वलिङ्गां बह्वर्थां तां जातिं कवयो विदुः ॥' इति ।

अस्यायमर्थः—या सत्त्वस्य द्रव्यस्य प्रादुर्भावविनाशाभ्यामाविर्भावतिरोभावौ प्राप्नोति । यावद्-द्रव्यभाविनीत्यर्थः । अत एव वृद्धस्थविरेत्यत्रेव न भवति । अयावद्द्रव्यभावित्वेन वृद्धत्वादेरजातित्वात् गुणैश्च युगपद्द्रव्येण सम्बध्यते । यथा निर्गुणं न भवति तथा जातिरहितमपीत्यर्थः । बह्वर्थामिति । अर्थशब्दो विषयवाची । बहुविषयां बहुव्यक्तिव्यापिनीमित्यर्थः । असर्वलिङ्गामिति तु ब्राह्मणी वृषली-त्याद्यर्थं लक्षणान्तरम् । न च प्राच्यलक्षणसंकोचकमिति तटादेः सर्वलिङ्गत्वेऽपि जातित्वं भवत्येव ।

अनेन गोत्वादिजातिर्लक्षिता ॥ ब्राह्मणत्वादिजातिस्तु न ब्राह्मणक्षत्रियादीनां संस्थानस्य- साहश्यात् । अतो लक्षणान्तरमाह । लिङ्गानां चेत्यादि ॥ सर्वाणि लिङ्गानि न भजती- त्ययमर्थो विवक्षितः । सर्वशब्दस्य लिङ्गापेक्षत्वेऽपि भजो विण्प्रत्ययः समासश्च बोधक- त्वात् । लिङ्गानामिति कर्मणि षष्ठी । सर्वं लिङ्गं न भजतीत्यर्थः ॥ सकृदिति ॥ अस- र्वलिङ्गत्वे सत्येकस्यां व्यक्तौ कथनाद्व्यक्त्यन्तरे कथनं विनापि सुग्रहा जातिरिति लक्षणा- न्तरम् । अक्षरार्थस्तु एकस्मिन्पिण्डे सकृदेकवारमाख्याता अयं गौरित्युपदिष्टा पिण्डान्त- रेषु निग्राह्या निश्चेतुं शक्येत्यर्थः ॥ अप्राप्तप्रापणं चेदं न तु पर्वलक्षणसङ्कोचकं तेन तटादे- र्जातित्वम् । देवतादौ तु उपदेशाभावान्न लक्षणसमन्वयः । येषु सर्वेषु लिङ्गेष्वाचार्या जा- तिवाचित्वमुपदिशन्ति तेष्वेव वदन्तीत्यर्थः ॥ गोत्रं च चरणैः सहेति ॥ गोत्रशब्देना- पत्यमुच्यते । चरणशब्देन शाखाध्यायिन उच्यन्ते । तेनापत्यप्रयान्तः शाखाध्येतृवाची शब्दो जातिवाचक इत्यर्थः ॥ कुक्कुटी सूकरीति प्रथमस्योदाहरणम् ॥ ब्राह्मणी वृषलीति द्विती- यस्य ॥ गार्गी पैतृष्वस्रीयीति तृतीयस्य ॥ कठी वराकीति चतुर्थस्य ॥ गवयेत्यादिनोक्त- स्यानित्यत्वादिति भावः ॥ ३६ ॥

(क्वचिन्न) बलाका (क) ॥ ३७ ॥

(सु०) क्वचिन्न ॥ यः शब्दो जातिवाची अयोपधः स्त्रियां नियतश्च ततो नेप् भव- तीत्यर्थः । "बलाका बिसकण्ठिका" इत्यमरः ॥ ३७ ॥

(गवयहयमुकयमनुष्यमत्स्यानामनिषेधः) गवयी । हयी । मुकयी (ख) ॥ हसात्तद्धितयस्येति लोपः । मनुषी ॥ ३८ ॥

(सु०) गवयहयमुकयमनुष्यमत्स्यानामनिषेधः ॥ योपधेभ्योऽप्येभ्य ईप् स्यात् ॥ हसात्तद्धितयस्येति लोपः । हसात्परस्य तद्धितयकारस्य लोपः स्यादीपि ॥ यस्ये- त्यलोपः । मनुषी ॥ ३८ ॥

(त०) गवयहयेति ॥ हसात्तद्धितेत्यादि । एतद्बीजं तु यस्येति सूत्रव्याख्या- नावसरे चोक्तम् ॥ ३८ ॥

(मत्स्यस्य यलोपः) मत्सी ॥ ३९ ॥

(सु०) मत्स्यस्य यलोपः ॥ मत्स्यशब्दस्य यकारस्य लोपः स्यादीपि । यस्ये- त्यलोपः । मत्सी ॥ ३९ ॥

(सूर्यागस्त्ययोरीये ईपि च) सूरी । अगस्ती ॥ ४० ॥

(सु०) सूर्यागस्त्ययोरीये ईपि च ॥ अनयोर्यकारस्य लोपः स्यात् ईयप्रत्यये ईप्प्रत्यये च ॥ सूरीयः । सूरी । अगस्तीयः । अगस्ती ॥ ४० ॥

(क) अत्र केचित्—'जातेरयोपधात्' इति सूत्रे 'नोवे'त्यतो मण्डूकप्लुत्या वानुवृत्तेर्मक्षिका बलाके- त्यादौ स्त्रीमात्रविषयत्वाज्जातिवाचिनो न । इत्याहुः । बलाकात्वस्य आकृतिव्यङ्ग्यतया जातित्वेऽपि नियतस्त्रीलिङ्गत्वान्नेप् । यद्यपि बलां कायतीति यौगिकत्वे त्रिलिङ्गकत्वमस्ति, तथापि प्रवृत्तिनिमित्तैक्ये स्त्रीलिङ्गान्यलिङ्गरहितभिन्नत्वमिति विवक्षणान्न दोषः । जातिविशेषे नियतस्त्रीलिङ्गत्वात् । भाष्ये तु अनियतस्त्रीलिङ्गत्वमङ्गीकृत्य अजादित्वादापिति समाहितम् ।

(ख) गवयी गोसदृशश्चतुष्पाज्जातिविशेषः । मुकयी चतुष्पाज्जातिविशेषः ।

(तिष्यपुष्ययोर्नक्षत्राणि यलोपः) तैषी । पौषी ॥ ४१ ॥

(सु०) तिष्यपुष्ययोर्नक्षत्राणि यलोपः ॥ अनयोर्यकारस्य लोपः स्यात् । नक्षत्रसम्बन्धी योऽण् स नक्षत्राण् । नक्षत्रेण युक्तः काल इत्यण् । नक्षत्रे भव इत्यण् च तस्मिन् परतः ॥ तिष्येण युक्तः कालस्तैषः । पुष्येण युक्तः कालः पौषः । तथा तिष्ये भवस्तैषः । पुष्ये भवः पौषः । स्त्रियां तूण ईबितीप् । यस्येत्यलोपः । तैषी । पौषी ॥४१॥

• **(जानपदादिभ्योऽर्थविशेषे ईप्)** जानपदी–वृत्तिश्चेत् । अन्या जानपदी ॥ कुण्डी–अमत्रं चेत् । कुण्डाऽन्या ॥ गोणी–आवपनं चेत् । गोणाऽन्या ॥ स्थली–अकृत्रिमा चेत् । स्थलाऽन्या ॥ भाजी—श्राणा चेत् । भाजाऽन्या ॥ नागी–स्थूला चेत् । नागाऽन्या ॥ काली–वर्णश्चेत् कालाऽन्या ॥ नीली ओषधिप्राणिनोः । नीलाऽन्या ॥ संज्ञायां वा । नीला–नीली ॥ कुशी–अयोविकारे । कुशाऽन्या ॥ कामुकी–मैथुनेच्छायाम् । कामुकाऽन्या ॥ कबरी–केशविन्यासे । कबरान्या ॥ ४२ ॥

(सु०) पाणिनिसूत्रम् । जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु(क) एभ्य एकादशभ्य एष्वर्थेष्वीप् स्यात् ॥ जनपदे देशे भवा जानपदी । भवार्थ अण् वर्तते । वृत्तिर्जीविका चेद्यदि । अन्येति ॥ अन्याऽप्येवं जानपदी । वृत्त्यभावे आद्युदात्त इति स्वरे भेदः ॥ "अस्त्री कमण्डलुः कुण्डी" इत्यमरः ॥ अमत्रं पात्रम् । कुण्डो स्त्रीविषयत्वाभावादप्राप्त ईप् विधीयते । अन्या कुण्डा । कुडि दाहे । अस्माद्गुरोर्हसादित्यङ्प्रत्यये रूपम् । यस्तु "अमृते जारजः कुण्डः" इति मनुष्यजातिवाची कुण्डशब्दस्ततो जातिलक्षण ईप् भवत्येव ॥ ओप्यते निक्षिप्यते धान्यं यस्मिन् तदावपनम् । गोणी । आङ्पूर्वाद्वपेरधिकरणे युट् । अन्या गोणेति यथेच्छं नाम ॥ अकृत्रिमा पुरुषेणासंस्कृता भूमिः स्थली । पुरुषकृता तु स्थला ॥ पुष्टा चेत् नागी । अन्या नागा ॥ वर्णयुक्ताचेत् काली । अन्या काला । अनाच्छादनं चेन्नीली ओषधिविशेषः । प्राणिनि तु नीली गौः । आच्छादने तु नीला शाटी ॥ अयसो लोहस्य विकारः अयोविकारः, फाल इति प्रसिद्धः । तत्र कुशी । अन्या कुशा । वेदे औदुम्बरसङ्कुं कुशा इति व्यवहरन्ति । "वल्गावक्षेपणी कुशा" इति हैमकोशे ॥ मैथुनेच्छायां सुरतवाञ्छायां कामुकी । वनादिकं कामयितुं शालं यस्याः सा कामुका । षाकोकण इत्युकण् ॥ केशविन्यासे केशरचनायां कबरी । अन्या कबरा । चित्रेत्यर्थः(ख)॥४२॥

(क) **जानपद** ॥ जानपदेत्यादि कबरादित्यन्तमेकपदम् । समाहारद्वन्द्वात् पञ्चमी । **जानपदीति** । जनपदे भवेत्यर्थः ।

(ख) **वृत्तिरीति** । जीविका गम्याचेदित्यर्थः । **कुण्डीति** । 'पिठरं स्थाल्युखाकुण्डम्' इत्यमरः । **अन्याकुण्डेति** । दहनीयेत्यर्थः । तदेव विशदयति—**कुडिदाहे इति** । **गुरोश्चेति** । गुरुमतो हसान्ताद्धातोरप्रत्ययः स्यात् भावकर्मणोः स्त्रियामिति तदर्थः । ननु 'अमृते जारजः कुण्डो मृते भर्तरि गोलकः' इति मनुष्यजातिविशेषवाची कुण्डशब्दोऽपि प्रत्युदाहरणं किं न स्यात्—इत्यत आह—**यस्त्विति** । **जातिलक्षण इति** । जातेरयोपधात्' इति जातिनिमित्तक इत्यर्थः । ननु अमत्रेऽपि

(त०) जानपदेत्यादि ॥ पुंयोगे इत्यत्र चकारस्य व्यवस्थितत्वाश्रयणादिति भावः ॥ आवपन इति ॥ ओप्यते निक्षिप्यते धान्यं यस्मिन् तत्तस्मिन् । गोणाऽन्या याहच्छिकं नाम ॥ अकृत्रिमायामिति ॥ असंस्कृतायामित्यर्थः । श्राणेति ॥ पक्वेत्यर्थः । अयो-विकार इति ॥ फाल इत्यर्थः ॥ कुशा आदुम्बराः शङ्कवः ॥ ४२ ॥

(शोणाद्वा) शोणी–शोणा ॥ ४३ ॥

(सु०) शोणाद्वा ॥ शोणशब्दाद्वा ङीप् स्यात् ॥ "शोणः कोकनदच्छविः" इत्यमरः ॥

(बहुव्रीहेर्जातिपूर्वात् क्तान्तात्) ऊरुभिन्नी ॥ ४४ ॥

(बहुव्रीहेर्जातिपूर्वात् क्तान्तात् ॥ जातिवाचिपूर्वपदात् क्तान्तादन्ताद्बहुव्रीहेः स्त्रियामीप् ॥ भिन्नावूरू यस्या इति बहुव्रीहौ । भिन्नशब्दस्य बहुव्रीहौ विशेषणसप्तम्यन्त-क्तान्तानामिति पूर्वनिपाते प्राप्ते क्वचिन्नेति परनिपातः ॥ ४४ ॥

(त०) बहुव्रीहेरिति ॥ एतद्बीजं तु चकार एव ॥ ४४ ॥

(जातान्ताच्च) दन्तजाता ॥ ४५ ॥

(सु०) जातान्ताच्च ॥ जातशब्दान्ताद्बहुव्रीहेर्जातिवाचिपूर्वपदाद्दीप् न । दन्ता जाता यस्याः सा दन्तजाता ॥ ४५ ॥

(अस्वाङ्गपूर्वपदाद्वा) सुरापीति—सुरापीता ॥ ४६ ॥

(सु०) अस्वाङ्गपूर्वपदाद्वा ॥ अस्वाङ्गवाचिपूर्वपदात् क्तान्तादन्ताद्बहुव्रीहेः स्त्रियां वेप् स्यात् । पीता सुरा यया सा सुरापीता । क्वचिन्नेति क्तान्तस्य परनिपातः ॥ बहुव्रीहेर्जातिपूर्वपदादित्यनेन नित्ये प्राप्ते विकल्पार्थमेतत् ॥ ४६ ॥

(त०) सुरापीतीति । नाम्नः कृतेति व्युत्पत्तेः प्रागेव समासे सिबन्ते न । समासे तु सुरापीतेत्यादिकमेव ॥ ४६ ॥

(पाणिगृहीती भार्यायाम्) अन्या पाणिगृहीता ॥ ४७ ॥

(सु०) पाणिगृहीती भार्यायाम् ॥ यस्याः पाणिरग्निसाक्षिको गृह्यते तस्यां वाच्यायां पाणिगृहीतशब्दादीप् स्यात् ॥ अन्येति ॥ कौतुकादिना पाणिर्गृहीतो यस्या दास्यादेः सा पाणिगृहीता ॥ ४७ ॥

(क्रीतान्तात्करणादेः) वस्त्रक्रीती । क्वचिन्न । धनक्रीता ॥४७॥

(सु०) क्रीतान्तात्करणादेः ॥ आदिशब्दो ह्यवयववचनः । करणमादिरवयवो यस्य तस्मात् करणादेरेकपदादित्यर्थः । क्रीतान्तादन्तात् करणादेः स्त्रियामीप् स्यात् ॥ वस्त्रेण क्रीतेति वस्त्रक्रीती ॥ करणादेरिति किम् । गवा क्रीता ॥ अश्वेन क्रीता ॥ ४८ ॥

वाच्ये कुण्डशब्दाज्जातिलक्षणेऽपि सिद्धे तद्वचनं व्यर्थम् । न च अमत्र एवेपिति नियमार्थं तदिति वाच्यम् । एवं सति मनुष्यजातिविशेषवाचित्वे ईपोऽनुपपत्तेरित्यत आह—स्त्रीविषयत्वादिति । अमत्रे कुण्डशब्दो नित्यस्त्रीलिङ्गः । पदान्तरं विना स्त्रियां वर्तमानत्वं नित्यस्त्रीत्वमिति स्वीकारात् । 'कुण्डी-कमण्डलौ जारात् पतिवत्नीसुते पुमान्' इति मेदिनीकोषाच्च । अनाच्छादनं चेदिति । वस्त्रभिन्नं गवादिकमित्यर्थः । अयोविकारश्चेदिति । फाल इति प्रसिद्धः । 'लाङ्गललुहा' इत्युत्कलभाषा । अन्याकुशेति । वेदे इति । छन्दोगसूत्रे 'प्रस्तोता तु कुशाः कारयेद्यज्ञियस्य वृक्षस्य खदिरस्य दीर्घ-सत्रेष्वेके प्रादेशमात्रीः कुशपृष्ठास्त्वक्तस्समामञ्जते' इति प्रसिद्धा । वनादिकमिति । आदिना वनादीच्छावतीत्यर्थः ।

(क्रान्तादल्पत्वे) अभ्रलिप्ती द्यौः ॥ अल्पत्वे किम् । चन्दनलिप्ताऽन्या मूर्तिः ॥ ४९ ॥

(सु०) क्रान्तादल्पत्वे ॥ करणादेः क्रान्तादन्तात्स्त्रियामीप् स्यादल्पत्वे द्योत्ये । अल्पैरभ्रैर्लिप्तेति अभ्रलिप्ती ॥ ४९ ॥

स्वाङ्गाद्वा ॥ स्वाङ्गवाचिनोऽदन्तादसंयोगोपधादुपसर्जनाद्वा स्त्रियामीप् ॥ सुमुखी–सुमुखा । सुकेशी–सुकेशा । संयोगोपधात्तु सुगुल्फा ॥ ५० ॥

(सु०) **स्वाङ्गाद्वा** ॥ स्वाङ्गवाचकादकारान्तादसंयोगोपधाद्गौणाद्वा स्त्रियामीप् स्यात् ॥ यथा सुष्ठु मुखं यस्याः सा सुमुखी ॥ सुष्ठु केशा यस्याः सा सुकेशी । पक्षे आबत इत्याप् ॥ असंयोगोपधात्किम् । सुष्ठु गुल्फौ यस्याः सा सुगुल्फा ॥ उपसर्जनात्किम् । शोभना शिखेति सुशिखा । शोङो ह्रस्वश्चेति खप्रत्ययः । आबत इत्याप् ॥ किंच यत्रत्यम् अङ्गं स्वाङ्गं गृह्येत तदा सुमुखा शालेत्यत्रापीप् स्यात् । मुखस्य शालाङ्गत्वात् । सुकेशी रथ्येत्यत्र चेप् न स्यात् । केशानां रथ्याङ्गत्वाभावात् । अतोऽव्याप्त्यतिव्याप्तिपरिहारार्थमाह । तत्स्वाङ्गं त्रिधा । तथा च । "अद्रवन्मूर्तिमत्स्वाङ्गं प्राणिस्थमविकारजम् ॥ अतत्स्थं तत्र दृष्टं च तेन चेत्तत्तथा युतम्(क) ॥ १ ॥" तत्स्वाङ्गमुच्यते । कीदृशम् । अद्रवत् द्रवतीति द्रवत् न द्रवदद्रवत् ॥ सुष्ठु स्वेदो यस्याः सा सुस्वेदा । द्रवत्वादत्र स्वाङ्गं न ॥ पुनः कीदृशम् । मूर्तिमत् । स्पर्शवद्द्रव्यपरिमाणं मूर्तिः । मूर्तिरस्यास्तीति तन्मूर्तिमत् । सुष्ठु ज्ञानं यस्याः सा सुज्ञाना । अमूर्तत्वात् अत्र स्वाङ्गं न ॥ पुनः कीदृशम् । प्राणिस्थम् । मुखनासिकान्तः संचारो वायुः प्राणः । प्राणोऽस्यास्तीति प्राणी । प्राणिनि तिष्ठतीति तत्प्राणिस्थम् । सुष्ठु मुखं यस्याः सा सुमुखा शाला । अप्राणिस्थत्वादत्र स्वाङ्गं न ॥ पुनः कीदृशम् । अविकारजम् । वातपित्तकफानां विकृतिर्विकारः । विकाराज्जातं विकारजं न विकारजम् अविकारजम् । सुष्ठु शोफो यस्याः सा सुशोफा । "शोफस्तु श्वयथुः शोथः" इत्यमरः ॥ विकारजत्वादत्र स्वाङ्गं न ॥ यदि प्राणिस्थं स्वाङ्गं तर्हि रथ्यादिगतानां केशादीनां स्वाङ्गत्वं न स्यात् । सुकेशी रथ्या इति न सिद्ध्यत्यतो द्वितीयं लक्षणमाह । च पुनः अतत्स्थं तत्र दृष्टं स्वाङ्गमुच्यते । कदाचित्तत्र प्राणिनि दृष्टं तस्मिन् प्राणिनि तिष्ठतीति तत्स्थं न तत्स्थम् अतत्स्थम् अप्राणिस्थमित्यर्थः । अप्राणि-

---

(क) अद्रवमित्यादिवाक्यं भाष्यकृतः । अथ व्याख्या—शरीरान्तरसञ्चारी वायुः प्राणः सोऽस्यास्तीति प्राणी तत्र तिष्ठतीति प्राणिस्थं तत्स्वाङ्गम् । एवं सति स्वेदस्यापि प्राणिस्थत्वात्स्वाङ्गता स्यात्तत्राह—**अद्रवमिति** । तस्य तु द्रवत्वान्न । एवमपि ज्ञानस्य प्राणिस्थत्वाददद्रवत्वाच्च स्वाङ्गता स्यादत आह—**मूर्त्तिमदिति** । असर्वगतद्रव्यपरिमाणं काठिन्यादि स्पर्शविशेषो वा मूर्त्तिर्यस्यास्तीति तथा । ज्ञानस्यात्मगुणत्वेन परिमाणलक्षणस्य गुणस्पर्शलक्षणस्य वा तत्रानङ्गीकारादमूर्त्तिमत्त्वं ज्ञानस्येत्यर्थः । एवमपि शोफादेश्चोक्तलक्षणवत्त्वात्स्वाङ्गतास्यादत आह—**अविकारजमिति** । विकारो वातादिवैषम्यं ततो न जातम् । शोफादिस्तु विकारजः । रथ्यादिपतितकेशादेःस्वाङ्गतासङ्ग्रहार्थमाह—**अतत्स्थं तत्र दृष्टमिति** । तत्र प्राणिनि न दृष्टम् । अन्यदा तत्रावर्त्तमानमपि स्वाङ्गम् । एवमपि प्रतिपाद्यावयवानां मुखादीनां प्राणिस्थेनाविशेषादिना सम्बन्धः । तथा यत्तत्प्राणिनामपि सम्बधं स्यात्तदपि तथेत्यर्थः । प्राणिमुखादिसदृशमप्राणिमुखाद्यपि स्वाङ्गमिति भावः ।

उदाहरणं तु । क्रमेण सुमुखा शाला ॥ बहुस्वेदा । सुज्ञाना । सुशोफा । इत्यादि ॥

स्थस्यापि केशादेः पूर्वं प्राणिनि दृष्टत्वात् स्वाङ्गम् । एवमपि प्रतिमादिगतस्तनमुखादीनां स्वाङ्गत्वं न प्राप्नोति । प्राणिन्यदृष्टत्वात् । सुस्तनी प्रतिमेति न सिध्यत्यतस्तृतीयलक्षणमाह । तेन चेत्तत् तथा युतम् । अतत्स्थमित्यनुपज्यते । एतादृशं तदप्राणिस्थं मुखादिस्वाङ्गमुच्यते । कीदृशम् । चेद्यदि तेन प्राण्यङ्गेन मुखादिना सह तथा युतं प्राणिवद्युतं सहितं यथा प्राणियुतं तद्वदप्राणिनि युतं भवतीत्यर्थः । सुष्ठु स्तनौ यस्याः सा सुस्तनी प्रतिमा । प्राणिसदृशे प्रतिमादौ प्राणिनि इवेति प्राणिवत् स्तनादेः स्थितत्वात् स्वाङ्गमस्ति ॥५०॥

(त०) स्वाङ्गाच्चेति ॥ स्वमङ्गं स्वाङ्गमित्युक्तौ सुमुखा शालेत्यत्रातिव्याप्तिः । मुखस्य शालावयवत्वात् । दीर्घकेशी रथ्येत्यत्राव्याप्तिश्च । केशानां रथ्याङ्गत्वाभावात् अतस्तत्परिहाराय स्वाङ्गलक्षणमुच्यते । "अद्रवन् मूर्तिमत्स्वाङ्गं प्राणिस्थमविकारजम् । अतत्स्थं तत्र दृष्टं च तेन चेत्तत्तथा युतम् ॥" प्राणिस्थं स्वाङ्गं प्राणिनि तिष्ठतीति प्राणिस्थम् । एतेन श्लक्ष्णमुखा शालेत्यत्र न भवति । अप्राणिस्थत्वात् ॥ द्रवतीति द्रवत् । ततोऽन्यदद्रवत् । एवं च सुस्वेदाऽत्र न भवति द्रवत्वात् ॥ मूर्तिमदिति ॥ असर्वगतद्रव्यपरिमाणं मूर्तिः । असर्वगतानि यानि द्रव्याणि तेषां यत्परिमाणं ह्रस्वत्वादि सा मूर्तिः । स्पर्शनद्रव्यपरिमाणं मूर्तिरित्यन्ये । साऽस्यास्तीति तन्मूर्तिमत् । एवं च बहुज्ञानाऽत्र न भवति अमूर्तत्वात् । अविकारजमिति ॥ विकारो वातादिवैषम्यं ततो यज्जायते तन्न भवतीत्यविकारजम् । एवं सुशोफाऽत्र न भवती ॥ अतत्स्थमिति ॥ सांप्रतमप्राणिस्थमपि कदाचित्प्राणिनि दृष्टं चेत्तदपि स्वाङ्गं भवत्येवेत्यर्थः ॥ तथा च दीर्घकेशी रथ्येत्यत्र भवत्येव । इदानीम् अप्राणिस्थस्यापि पूर्वं प्राणिनि दृष्टत्वात् ॥ तेन चेदिति ॥ अतत्स्थमित्यनुपज्यते । अप्राणिस्थमपि मुखादि स्वाङ्गं तेन चेत् मुखादिना तत् अप्राणि द्रव्यं तथा युतं भवति । यथा प्राणि द्रव्यमित्यर्थः । एवं दीर्घमुखी प्रतिमेति भवति प्राणिवत्प्राणिसदृशेऽपि स्थितत्वात् ॥ ५० ॥

(नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाद्वा) तुङ्गनासिकी–तुङ्गनासिका । मन्दोदरी–मन्दोदरा । बिम्बोष्ठी–बिम्बोष्ठा ॥ एवं सुजङ्घी । सुदन्ती । सुकर्णी । सुशृङ्गी ॥ ५१ ॥

(सु०) नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाद्वा ॥ एभ्यो ङेप् स्यात् ॥ नासिकोदरयोर्न क्रोडादिबहुस्वरादिति ओष्ठादीनां पञ्चानां तु असंयोगोपधादिति निषेधे प्राप्ते वचनम् ॥ तुङ्गा नासिका यस्याः सा तुङ्गनासिकी ॥ मन्दम् उदरं यस्याः सा मन्दोदरी ॥ बिम्बवत् ओष्ठौ यस्याः सा बिम्बोष्ठी ॥ सुष्ठु जङ्घे यस्या सा सुजङ्घी । पक्षे आप् सुजङ्घेति ५१

(त०) नासिकेत्यादि ॥ वाग्रहणादेतत्सर्वम् । नासिकोदरयोर्बहुस्वरादप्राप्तिः । ओष्ठादीनां तु संयोगोपधत्वादप्राप्तिः ॥ ५१ ॥

(अङ्गगात्रकण्ठपुच्छाच्च) । स्वङ्गी । सुगात्री । सुकण्ठी । सुपुच्छी । पक्षे स्वङ्गेत्यादि ॥ ५२ ॥

(सु०) अङ्गगात्रकण्ठपुच्छाच्च ॥ एभ्यो ङेप् स्यात् ॥ असंयोगोपधादिति निषेधे प्राप्ते वचनम् ॥ सुष्ठु अङ्गं यस्याः सा स्वङ्गी ॥ सुष्ठु गात्रं यस्याः सा सुगात्री ॥ सुष्ठु कण्ठो यस्याः सा सुकण्ठी ॥ सुष्ठु पुच्छं यस्याः सा सुपुच्छी ॥ पक्षे आप् ॥ ५२ ॥

(कबरमणिविषशरेभ्यः परात् पुच्छान्नित्यम्) कबरपुच्छी । मणिपुच्छी । विषपुच्छी । शरपुच्छी ॥ ५३ ॥

(सु०) कबरमणिविषशरेभ्यः परात् पुच्छान्नित्यम् ॥ ईप् स्यात् ॥ कबरं चित्रं पुच्छं यस्याः सा कबरपुच्छी ॥ मणिः पुच्छे यस्याः सा मणिपुच्छी ॥ शरः पुच्छे यस्याः सा शरपुच्छी ॥ विषं पुच्छे यस्याः सा विषपुच्छी ॥ ६३ ॥

(उपमानात्पक्षपुच्छाभ्याम्) श्येनपक्षी । श्येनपुच्छी ॥५४॥

(सु०) उपमानात्पक्षपुच्छाभ्याम् ॥ उपमानात्पराभ्यां पक्षपुच्छाभ्यां नित्यमीप् ॥ श्येनवत् पक्षौ यस्याः सा श्येनपक्षी ॥ श्येन इव पुच्छं यस्याः सा श्येनपुच्छी।६४।

(न क्रोडादिबहुस्वरात्) कल्याणक्रोडा । सुजघना ॥ ५५ ॥

(सु०) न क्रोडादिबहुस्वरात् ॥ क्रोडादेर्बहुस्वराच्च स्वाङ्गान्नेप्स्यात् ॥ अश्वानामुरः क्रोडा ॥ सुष्ठु जघनं यस्याः सा सुजघना ॥ ६५ ॥

(त०) कल्याणक्रोडेति ॥ अश्वानामुरः क्रोडा । स्त्रीलिङ्गोऽयमिति हरदत्तादयः । तत्रान्यार्थत्वेन ह्रस्वत्वेऽदन्तत्वादीपः प्राप्तिः ॥ अमरस्तु 'न ना क्रोडं भुजान्तरम्' इत्याह ॥ रत्नमणिस्तु पुंस्त्वमाह । गणे च क्रोडेति प्रातिपदिकमात्रं पठ्यते न तु आबन्तमिति गणरत्नमहोदधिकारः । एवं चाविशेषाल्लिङ्गत्रयेऽपि उदाहरणं बोध्यम् ॥ माधवस्तु तुदादिगणे 'क्रुड् निमज्जने' इति धातोराह । क्रोडः घञ् । क्रोडा अश्वानामुरः । अयं स्वभावतो विशेषविषयः । क्रोडादिषु आबन्तस्यैव पाठात् । भुजान्तरमात्रवचनस्य क्रोडशब्दस्य बहुव्रीहौ स्वाङ्गलक्षण ईप्विकल्पो भवत्येव ।।कल्याणक्रोडी । कल्याणक्रोडादिराकृतिगणः।६६।

(सहनञ्विद्यमानपूर्वाच्च) सकेशा । अकेशा । विद्यमाननासिका५६

(सु०) सहनञ्विद्यमानपूर्वाच्च ॥ सहेत्यादित्रिकपूर्वात्स्वाङ्गान्नेप् स्यात् ॥ सह केशैः वर्तते या सकेशा । सहादेरिति सहस्य सः ॥ अविद्यमानाः केशाः यस्याः सा अकेशा । ना इति नञोऽकारादेशः ॥ विद्यमाना नासिका यस्याः सा विद्यमाननासिका । स्वाङ्गाद्वेत्यस्य नासिकोदरौष्ठेत्यस्य च बाधकोऽयं परत्वात् ॥ ६६ ॥

(नखमुखात्संज्ञायाम्) शूर्पणखा । गौरमुखा ॥ संज्ञायां किम् । ताम्रमुखी कन्या ॥ ५७ ॥

(सु०) नखमुखात् संज्ञायाम् ॥ आभ्यामीप् न स्यात् संज्ञार्थं ॥ शूर्पणखा । *रावणस्य स्वसुर्नाम ॥ यदा शूर्पवन्नखानि यस्याः सा इति योगमात्रं विवक्ष्यते न तु संज्ञा* तदा ईप् स्यादेव णत्वाभावश्च ॥ गौरमुखेति कस्याश्चित् संज्ञा ॥ असंज्ञायां । ताम्रं मुखं यस्याः सा ताम्रमुखी ॥ ६८ ॥

वोर्गुणात् ॥ उदन्ताद्गुणवाचिनो वा स्त्रियामीप् स्यात् (क) ॥ पट्वी-

---

(क) वो । वा आरिति च्छेदः । न स्वोरिति विच्छिद्य गुणादौ प्रत्ययो भवतीति । युक्तगुणस्य प्राक्निर्देशात् । सतो हि कार्यिण कार्येण भाव्यमिति ओरित्यपि उवर्णस्य ग्रहणं न स्वोकारस्य प्रकृत्या गुणस्यादन्तत्वाभावात्तत्रापि तदन्तस्य ग्रहणं न केवलस्य उमात्रस्य गुणस्याभावात् । ओर्गुणाच्चेति स्वभिप्रेते ओर्गुणादित्येव निर्दिशेत । गुणशब्दोऽपि गुणवचनपट्वादिपरः न तु स्वरूपपरः । स्वरूपस्याऽनुद-

पटुः । बह्वी-बहुः ॥ ५९ ॥

(सु०) वोर्गुणात् ॥ वा ओरिति छेदः । गुणशब्दोऽत्र गुणवत्परो न तु गुणमात्रवाचिपरो गुणमात्रवाचकानां स्त्रीलिङ्गाभावात् । "गुणे शुक्लादयः पुंसि" इत्युक्तत्वात् ॥ उदन्तादिति किम् । शुचिः ॥ गुणात्किम् । आखुः ॥ महाभाष्ये गुणलक्षणम् । "सत्त्वे निविशतेऽपैति पृथग्जातिषु दृश्यते । आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः(क) ॥१॥" स गुण उच्यते । यः सत्त्वे द्रव्ये निविशते । द्रव्यमुपैतीत्यर्थः ॥ ननु द्रव्ये द्रव्यत्वं तत्रातिव्याप्तिरत आह । यः पृथक् द्रव्यादपैति अपगच्छति । द्रव्यं जहातीत्यर्थः ॥ यथा पीततायां जातायां नीलता फलादपैति नैवं द्रव्यत्वं द्रव्यादपैति । ननु गोषु गोत्वं तद्वधादेश्चापैति तत्रातिव्याप्तिरत आह । यः पृथग्जातिषु दृश्यते । द्रव्यान्तरेष्ववलोक्यते । यथाऽभ्रे दृष्टा नीलता तृणादिष्वपि दृश्यते न तथा गोत्वं पृथग्जातिषु दृश्यते ॥ एवं तर्हि द्रव्ये क्रिया वर्तते सा द्रव्यादपैति पृथग्जातिषु दृश्यते चेति तत्रातिव्याप्तिरत आह । य आधेय उत्पाद्यः । स पुनः यः अक्रियाजोऽनुत्पाद्य इत्यर्थः । उत्पाद्यो यथा । घटादेः पाकजो रूपादिः । अनुत्पाद्यो यथा । आकाशादेर्महत्त्वादिः । क्रिया तु सर्वाऽप्युत्पाद्यैव ॥ ननूत्पाद्यायाः क्रियाया द्वैविध्याभावाद्गुणत्वाभावः । एवं तर्हि द्रव्यस्य गुणत्वं प्राप्नोति । तथा हि । अवयवि द्रव्यं ह्यवयवद्रव्येषु निविशते संयोगविनाशादवयवद्रव्यादपैति । पृथग्जातिषु हस्तपादादिषु दृश्यते । द्रव्यमुत्पाद्यानुत्पाद्यभेदेन द्विविधम् । तत्र निरवयवस्यात्मपरमाण्वादेरनुत्पाद्यत्वं नित्यत्वात् । अवयविद्रव्यस्य घटादेस्तूत्पाद्यत्वमस्त्यनित्यत्वादत आह । योऽसत्त्वप्रकृतिरद्रव्यस्वभावो द्रव्याद्भिन्न इत्यर्थः ॥ ६१ ॥

(त०) वोर्गुणादिति ॥ वा ओः गुणादिति छेदः । औरिति तु न । औः प्रत्यय इति व्याख्यायां न कार्यिणः प्रागनुद्देशात् । सतो हि कार्यिणः कार्येण भाव्यमिति । ओरित्यपि उवर्णान्तस्यैव ग्रहणम् न त्वोकारान्तस्य गुणस्य तदभावात् । केवलस्यापि

न्तत्वात्तत्रापि गुणवत्परो न गुणमात्रवाचिपरः । गुणैकार्थानां स्त्रियामप्रवृत्तेः । तथा चोक्तममरेण—

"गुणे शुक्लादयः पुंसि" । इति माधवः । गुणशब्देन मतुप उपादानादभेदोपचाराद्वा गुणवद्वाचको गृह्यते इति वासुदेवः ।

(क) सत्त्वे इति । सत्त्वं द्रव्यम् । वाक्यस्यान्ययोगव्यवच्छेदकत्वात्सत्त्वे निविशते इत्यनेन सत्त्वस्य द्रव्यमात्रवृत्तित्वं लभ्यते । ततश्च सत्ताव्यवच्छेदः । तस्या द्रव्यगुणकर्मसु वृत्तेः । एवं च द्रव्यत्वस्य द्रव्यमात्रवृत्तित्वात्तत्रातिव्याप्तिः स्यादत आह—अपैति । अपगच्छति । यथा तत्त्वादेव यथा पीततायां जातायामाम्रादेर्नीलिमा । न चैवं द्रव्यत्वादिर्द्रव्यादेरपैति । यद्येवं गोत्वं सास्नादिमति वर्तमानमश्वादेरपैति । अत आह—पृथग्जातिषु दृश्यत इति । गोत्वं हि द्रव्यत्वावान्तरनानाजातिषु न दृश्यते । गुणस्य चाम्रादौ दृष्टस्य नीलादेस्तृणादिष्वपि दर्शनात् । एवं सकलजातिव्यवच्छेदे पूर्वोक्तविशेषणविशिष्टत्वात्कर्मण्यतिव्याप्तिवारणायाह—आधेयश्चाक्रियाजश्चेति । आधेय उत्पाद्यः पुष्पादियोगाद्वस्त्रादिष्विव गन्धनम् । अक्रियायां नित्यः आकाशादौ महत्त्वादिः । कर्म तूत्पाद्यमेव । नन्वेवं द्रव्येऽतिव्याप्तिः । तस्य स्वारम्भकावयवेषु निवेशात्तन्नाशादपगमादुत्पाद्यरूपत्वाच्चेत्यत आह—सोऽसत्त्वप्रकृतिर्गुण इति । गुणो न द्रव्यस्वभावः । द्रव्यं तु द्रव्यस्वभावमिति । ननु सत्तादीनां नित्यत्वानुत्पाद्योभयरूपत्वाभावादेतातिप्रसङ्गाभावात्पर्याप्तं विशेषणचैयर्थ्यमिति चेत्सत्यम् । नित्यगुणसंग्रहार्थमधिकरणोत्पाद्यगुणेनास्योभयरूपत्ववत् वाक्यद्रव्यरूपजात्योर्मिलितयोरुत्पाद्यानुत्पाद्यरूपत्वादतिप्रसङ्गः स्यात्तद्वारणाय तदिति दिक् । 'कर्मणो व्यतिरिक्तो जातिमात्राश्रयो गुणः' इति तान्त्रिकाः इति वासुदेवः ।

उमात्रस्य गुणस्याभावात् । गुणशब्दोऽपि न स्वरूपपरः तस्यानुदन्तत्वात् । गुणमात्रवाचिपरोऽपि न तस्य स्त्रियामप्रवृत्तेः "गुणे शुक्लादयः पुंसि" इति वचनात् ॥ गुणलक्षणं तु "उपैत्यन्यज्जहात्यन्यद् दृष्टो द्रव्यान्तरेष्वपि । वाचकः सर्वलिङ्गानां द्रव्यादन्यो गुणः स्मृतः" इति ॥

(खरुसंयोगोपधान्न) खरुः । पाण्डुः ॥६० ॥

(सु०) **खरुसंयोगोपधान्न** ॥ खरुशब्दात् संयोगोपधगुणवाचिनः शब्दाच्च नेप् स्यात् ॥ खरुः पतिंवरा कन्या । पाणिग्रहणोत्कण्ठावतीत्यर्थः ॥ ६० ॥

(त०) **खरुसंयोगेत्यादि** ॥ वाशब्दादेतत् । खरुः पतिंवरा कन्या । तत्र पाणिग्रहणोत्कण्ठाभिधायित्वाद् गुणवचनत्वम् (क) ॥ ६० ॥

(कृदिकारादक्त्यर्थात्) आजी–आजिः । धूली–धूलिः । रात्री–रात्रिः । शकटी–शकटिः ॥ अक्त्यर्थात् किम् । भूतिः । अजननि ॥ ६१ ॥

(सु०) **कृदिकारादक्त्यर्थात्** ॥ क्त्यादिभिन्नात्कृत्संबन्धिन इकारात् स्त्रियां नेप् स्यात् ॥ आजी संग्रामः ॥ धूली रजः ॥ अक्त्यर्थात् किम् । भूतिः । क्तिरिति स्त्रियां भावेऽर्थे क्तिः ॥ आक्रोशे नञ्यनिरिति जनेरनिप्रत्ययः । न जायते इत्यजननिः ॥ ६१ ॥

(पद्धत्यादिभ्यो वा) पद्धती–पद्धतिः ॥ ६२ ॥

(सु०) **पद्धत्यादिभ्यो वा** ॥ स्त्रियामेभ्यो नेप् स्यात् ॥ पद्भ्यां हन्यते इति पद्धतिर्मार्गः । क्तिप्रत्ययान्तत्वादप्राप्ते विध्यर्थम् । पद्धतिशब्दो गणे पठ्यते । पद्धतिपष्टिविकटविशालकल्याणपुराणचण्डकृपाणअहनित्यादयः ॥ ६२ ॥

ऐ च मन्वादेः ॥ मनुपूतक्रतुवृषाकप्यग्निकुसितकुसिदानामै आदेश इप् च स्त्रियां पुंयोगे ॥ पूतक्रतायी । कुसितायी । कुसिदायी । वृषाकपायी । अग्नायी ॥ ६३ ॥

(सु०) **ऐ च मन्वादेः** ॥ मनुरादिर्यस्य स मन्वादिस्तस्मान्मन्वादेः । आदिशब्दः प्रकारे । स्त्रियां मन्वादेरीप् स्यात् पुंयोगे एषामन्तस्यैकारादेशश्च ॥ पूतः क्रतुर्यस्य येन वा पूतक्रतुः । पूतक्रतोः स्त्री पूतक्रतायी ॥ पुंयोगे किम् । पूतक्रतुः स्त्री । "यया तु क्रतवः पूताः स्यात्पूतक्रतुरेव सा" इत्यमरः ॥ अग्नेः स्त्री अग्नायी । "अथाग्नायी स्वाहा च हुतभुक्प्रिया" इत्यमरः ॥ वर्षति कामनिति वृषः । नाम्युपधात्क इति कः । आकम्पयति पापानित्याकपिः, अत्रान्तर्भावितणिप्रत्ययार्थोऽस्ति । 'इत्वखि' इति इप्रत्ययः । इदित इति न नुम् । आगमजमनित्यमित्युक्तत्वात् । वृषश्चासौ आकपिश्च वृषाकपिः वृषाकपेः स्त्री वृषाकपायी । "हरविष्णू वृषाकपी" इति । वृषाकपायी श्रीगर्यौ" इति चामरः ॥ ६३ ॥

(त०) **ऐ च मन्वादेरिति** ॥ मनुरादिर्यस्य स मन्वादिः । आदिशब्दः प्रकारे । तेन वृषाकप्यग्निकुसितकुसिदा गृहीताः ॥ **पूतक्रतायीति** ॥ पूतः क्रतुर्येन स पूतक्रतुः तस्य स्त्रीत्यर्थः **वृषाकपायीति** ॥ वर्षति कामनिति वृषः । नाम्युपधात्कः । आकम्पयति पापानिति आकपिः । अन्तर्भावितण्यन्तः । इत्वखीति इः । यस्त्वागमजमनित्यमिति तन्न इप्रत्यये कित्वाभावादेव नुमोऽप्राप्तेरागमजत्वेनानित्यत्वाश्रयणस्य व्यर्थत्वात् । वृष-

---

(क) वाशब्दादेतदिति । अयं भावः 'वोर्गुणादिति' वाशब्दव्यवस्थैव खरुसंयोगोपधान्नेति ।

आसावाकपिश्च वृषाकपिस्तस्य स्त्रीत्यर्थः ॥ "हरविष्णू वृषाकपी॥", "वृषाकपायी श्रीगौर्यौ ॥" इति अमरः ॥ पुंयोगे किम् । पूताः क्रतवो यया सा पूतक्रतुरेव ॥ ६३ ॥

(मनोरैऔ वा) मनावी–मनायी–मनुः ॥ ६४ ॥

(सु०) मनोरैऔ वा ॥ मनुशब्दस्यौकारादेशः ऐकारादेशश्च वा ईपि ॥ मनोः स्त्री मनावी-मनायी-मनुः ईबभावः ॥ ६४ ॥

पत्न्यादयः ॥ पत्न्यादयो निपात्यन्ते(क) ॥ पत्नी । सपत्नी । एकपत्नी । वीरपत्नी । सखी । अशिश्वी । अनड्वाही–अनडुही ॥ ६५ ॥

(सु०) पत्न्यादयः ॥ पत्नी आदिर्येषां ते पत्न्यादयः ॥ आदिशब्दः प्रकारे । पतिशब्दान्तस्य नान्तत्वं निपात्यते । नृण ईबितीप् । पत्नी ॥ समानः पतिर्यस्याः सा सपत्नी । सहादेरिति समानस्य सभावः ॥ एकः पतिर्यस्याः सा एकपत्नी ॥ वीरः पतिर्यस्याः सा वीरपत्नी ॥ सखिशब्दशिशुशब्दाभ्यामीप् निपात्यते । सखी ॥ न विद्यते शिशुर्यस्याः सा अशिश्वी । "अशिश्वी तु शिशुं विना" इत्यमरः ॥ अनडुहः स्त्रियामीप् निपात्यते । अनडुहश्चेति वाऽऽम् । अनड्वाही–अनडुही ॥ प्रागादिशब्दादीक् निपात्यते गतौ । प्राची पूर्वा दिक् । नो कोप इति लोपः । पूजायां तु प्राञ्ची । पूजार्थाञ्चतेर्नेति नलोपाभावः । गतौ अचेर्दीर्घश्चेत्यकारलोपः ॥ पूर्वद्दीर्घं प्रतीची पश्चिमा दिक् । पूजायां प्रत्यञ्ची ॥ उदीची उत्तरा दिक् । तिरश्चादय इति उदीचादेशः ॥ अवाची दक्षिणा दिक् । "प्राच्यवाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः । उत्तरा दिगुदीची स्यात्" इत्यमरः ॥ ६५ ॥

(त०) पत्न्यादय इति ॥ नत्वं निपात्यते । ईप् तु नान्तत्वादेव ॥ ६५ ॥

(क्वचिद्वा) दृढपत्नी–दृढपतिः । वृषलपत्नी–वृषलपतिः । एता–एनी । हरिता–हरिणी । रोहिता–रोहिणी । श्येता–श्येनी । असिता–असिक्नी । पलिता–पलिक्नी । इत्यादि ॥ ६६ ॥

(सु०) क्वचिद्वा ॥ क्वचिद्वा निपातनं भवति ॥ दृढः पतिर्यस्याः सा दृढपत्नी दृढपतिः । वृषलः शूद्रः पतिर्यस्याः सा वृषलपत्नी–वृषलपतिः ॥ एतशब्दात् स्त्रियामीप् तकारस्य नकारादेशश्च वा निपात्यते । एता–एनी । कर्बुरेत्यर्थः ॥ "चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे" इत्यमरः हरिता–हरिणी । हरिद्वर्णेत्यर्थः ॥ रोहिता–रोहिणी । रक्तेत्यर्थः ॥ श्येता–श्येनी । श्वेतेत्यर्थः ॥ असितपलितशब्दयोरीप् तकारस्य क्नादेशश्च वा निपात्यते । असिता–असिक्नी । कृष्णेत्यर्थः ॥ पलिता–पलिक्नी । वृद्धेत्यर्थः ॥ ६६ ॥

(त०) क्वचिद्वेति ॥ पुंयोगे इत्यतश्चकारानुवृत्तेरिति भावः ॥ ६६ ॥

(इतो मनुष्यजातेरीप्) दाक्षी । अवन्ती । कुन्ती ॥ ६७ ॥

(सु) इतो मनुष्यजातेरीप् ॥ मनुष्यजातिवाचिन इकारान्तात् स्त्रियामीप् स्यात् ॥ दक्षस्यापत्यं दाक्षिः । अत इञितीञ् । अत्र गोत्रलक्षणा जातिः ॥ अवन्तेरपत्यं स्त्री । कुन्तेरपत्यं स्त्री । स्त्रियामवन्तिकुन्तीत्यपत्यप्रत्ययस्य लुक् । अत्रापि गोत्रलक्षणा जातिः ॥ ६७ ॥

(क) पत्नीति यज्ञसंयोगे एवेति माधववासुदेवौ । तत्रोन्नेयम् ।

उत ऊः ॥ उदन्ताद्योपधान्मनुष्यजातिवाचिनः स्त्रियामूः प्रत्ययः(क)॥ कुरूः ॥ अयोपधात्किम् । अध्वर्युः स्त्री ॥ ६८ ॥

(सु०) उत ऊः ॥ कुरारप्रत्यं स्त्री कुरूः । स्त्रियामवन्तिकुन्तिकुर्विभ्यपत्यप्रत्ययस्य लुक् । अत्रापि गोत्रलक्षणा जातिः ॥ अयोपधात्किम् । अध्वर्युर्ब्राह्मणी । शाखाध्येत्री शाखाध्यायिवंशोद्भवा वेत्यर्थः ॥ अत्र चरणलक्षणा जातिः ॥ अध्वरं यातीति विग्रहे मृग-य्वादयश्चेत्यौणादिकेन सूत्रेण याधातोः कुप्रत्यये अध्वरशब्दस्यान्त्यलोपश्च ॥ ६८ ॥

(त०) उत ऊरिति ॥ अत्राहुः । ओरित्यनुवर्तमाने उत इति किमर्थम् । न च वाच्यमूदन्तान्मा भूदिति वधूरित्यादौ सत्यसति विशेषाभावादतस्तदनुवृत्तौ तत्सम्बद्ध-स्य गुणशब्दस्याप्यनुवृत्तिः स्यादिति पुनरुक्तमिति माधवस्तन्न, लत्वं यवत्वमिति वि-शेषसत्त्वात् । अत्रेदमवधेयम् । मनुष्यजातिवाचिन उदन्तादूप्रत्ययस्य विधानेन खलप्वा-दिशब्दानां क्रियावाचकत्वेन जातिवाचित्वाभावादेवाप्राप्तौ विशेषस्यासम्भवात् । अथात्र मनुष्यजातिर्न विवक्षितेति न वाच्यम् । ऊङुत इति सूत्रविवरणे उदन्तान्मनुष्यजातिवा-चिन इति दीक्षितादिभिः सर्वैरेवोक्तत्वात् ॥ ६८ ॥

(**पङ्गोश्च**) पङ्गूः ॥ ६९ ॥

(सु) पङ्गोश्च ॥ पङ्गुशब्दो गुणवाची तस्मात् स्त्रियामूः स्यात् ॥ ६९ ॥

(**श्वशुरस्योकाराकारलोप ऊश्च**) श्वश्रूः ॥ ७० ॥

(सु०) श्वशुरस्योकाराकारलोप ऊश्च ॥ श्वशुरशब्दात् स्त्रियामूः स्यात् उका-राकारयोर्लोपश्च ॥ सन्निहितत्वादन्तस्यैवालोपो न त्वादेः । पुंयोगे चेतीपो निवारणार्थ-मिदम् ॥ ७० ॥

(त०) श्वशुरस्येत्यादि ॥ एतन्मूलं तु दीर्घकरणमेवान्यथा उदन्तत्वात्सवर्णदीर्घे-णापि सिद्धेरूकरणं वृथा स्यात् । पुंयोगलक्षण ईपि प्राप्ते ऊः । तत्संयोगेन च विधीय-मानोऽलोपः सन्निहितत्वादन्तस्यैवाकारस्य न त्वादेः ॥ ७० ॥

ऊरूत्तरपदादौपम्ये ॥ उपमानवाचिपूर्वपदादूरूत्तरपदादूः ॥ कर-भोरूः ॥ ७१ ॥

(सु०) ऊरूत्तरपदादौपम्ये ॥ उपमानवाचिपूर्वपदादूरूत्तरपदादूः ॥ उपमीयते-ऽनेन तदुपमानम् अधिकगुणविशिष्टमित्यर्थः ॥ करभवत् ऊरू यस्याः सा करभोरूः । "मणिबन्धादाकनिष्ठं करस्य करभो बहिः" इत्यमरः ॥ ७१ ॥

(त०) उपमानवाचिपूर्वपदादिति ॥ "धात्रीकराभ्यां करभोपमोरुः" इत्यत्र तु न । करभशब्दस्योपमानवाचित्वेऽपि पूर्वपदत्वाभावात् ॥ ७१ ॥

(**संहितशफलक्षणवामसहितसहादेरनौपम्येऽपि**) सं-हितोरूः । शफोरूः । लक्षणोरूः । वामोरूः । सहितोरूः । सहोरूः ॥ ७२ ॥

(सु०) संहितशफलक्षणवामसहितसहादेरनौपम्येऽपि ॥ संहितादिपूर्वप-

(क) अत्राह वासुदेवः । इह पूर्वतो वानुवृत्त्यैव धेनुः रज्जुरित्यादौ न । यद्यपि ह्रस्वाकारविधानेऽ-पि दीर्घादेशाद्दीर्घश्रवणमुपपद्यते । तथापि दीर्घविधानसामर्थ्याद् ब्रह्मबन्धूः जीवबन्धूरित्यादौ समासा-न्तकप्रत्ययाभावार्थमित्यनुसन्धेयम् । इति ।

दादूरूत्तरपदादान्नः स्त्रियामूः स्यात् ॥ उपमीयते अनयेत्युपमा तस्या भाव औपम्यं न औपम्यम् अनौपम्यं तस्मिन् । संहितौ मिलितौ ऊरू यस्याः सा संहितोरूः ॥ शफाविव ऊरू यस्याः सा शफोरूः । "शफं क्लीबे खुरः पुमान्" इत्यमरेण क्लीबत्वमुक्तं तथापि कोशान्तरे पुंस्त्वम् ॥ "शफः खुरे गवादीनां मूले विटपिनामपि" इति हेमचन्द्रः ॥ लक्षणमस्त्यस्मिन् स लक्षणः । अस्त्यर्थे अप्रत्ययः । लक्षणौ ऊरू यस्याः सा लक्षणोरूः ॥ वामौ सुन्दरौ ऊरू यस्याः सा वामोरूः ॥ हितेन सह सहितौ सहितौ ऊरू यस्याः सा सहितोरूः ॥ सहेते इति सहौ । सहौ ऊरूः यस्याः सा सहोरूः ७२ ॥

(त०) शफोरूरिति ॥ शफौ खुरौ ताविव । संश्लिष्टत्वादुपचारः । यद्यपि "शफं क्लीबे खुरः पुमान्" इत्यमरस्तथापि शफशब्दस्य पुंस्त्वमपि बहुसंमतम् । "शफः खुरे गवादीनां मूले विटपिनामपि" इति हेमचन्द्रकोशाच्च ॥ ७२ ॥

(नृनरयोर्वृद्धिश्च) नारी ॥ ७३ ॥

(सु०) **नृनरयोर्वृद्धिश्च** ॥ नृशब्दात् नृण ईवित्ति ईपि प्राप्ते नरशब्दात् जातिलक्षणे ईपि प्राप्ते वृद्ध्यर्थं वचनम् ॥ नुर्नरस्य वा स्त्री नारी ॥ ७३ ॥

(त०) **नृनरयोरिति** ॥ नृशब्दात् नृण ईवित्यनेन । नरशब्दात्तु जातिलक्षण एव ॥ ननु नरशब्देऽन्त्याकारस्य षष्ठीनिर्दिष्टत्वात् वृद्धिरस्त्विति न वाच्यम् । न चान्त्यवृद्धिविफला लोपं बाधित्वा प्रवृत्तेः । उच्यते । नरस्य अः नरः हलादित्वाट्टेर्लोपः । ना च नरश्च नृनरौ तयोरित्यर्थः । प्रश्लेषसामर्थ्यान्नान्त्याकारो गृह्यते ॥ ७३ ॥

यूनस्तिः ॥ युवन्शब्दात् स्त्रियां तिः (क) । युवतिः ॥ ७४ ॥

इति स्त्रिप्रत्ययाः ॥ १५ ॥

(सु०) **यूनस्तिः** ॥ नृण ईवित्यस्यापवादः । नाम्नो न इति सूत्रे कश्चित् स्यादौ रसे इत्यनुवर्तयन्ति तन्मते युवन्शब्दात्तिप्रत्यये नलोपः कथं स्यात् । स्यादीनां रसस्य परत्वाभावात् । उच्यते । न ङः इति च्छेदः कर्तव्यः । युवन्शब्दात्स्त्रियामिप्रत्ययो यूनोऽन्त्यस्य तादेशश्चेति । कथं तर्हि "युवतीकरनिर्मथितम्" इति प्रयोगः ॥ यौति मिश्रीकरोति पत्या सहेति यौतिः शत्रन्तात् ऋवित इति ईपि कृते बोध्यः । अत्रापि अनुपसर्जनादिति वक्तव्यम् । गौणे तु बहवो युवानो यस्यां बहुयुवा पूः । स्त्रीप्रत्ययान्तेभ्यः शब्देभ्यः प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति परिभाषया स्याद्युत्पत्तिर्बोध्या॥७४॥

इति सुबोधिन्यां स्त्रीप्रत्ययाः ॥ १५ ॥

(त०) **यूनस्तिरिति** ॥ वसां रस इत्यतो रस इत्यनुवृत्तेस्स्यादावपि रसे नलोपः । यद्वा तु ङः इति च्छित्वा युवन्शब्दस्य तादेश इश्च प्रत्ययः स्त्रियामित्यर्थो वाच्यः । युवतीति यौतेः शत्रन्तादीपि बोध्यम् ॥ ७४ ॥

श्रीविद्यानगरस्थार्यलोकेशकरशर्मणा । कृतायामिह टीकायां स्त्रीप्रत्ययविचारणम् ॥

इति तत्त्वदीपिकायां स्त्रीप्रत्ययाः ॥ १५ ॥

(क) **यूनस्तिरिति** । युवन्शब्दात्तिप्रत्ययो भवति । ईपोऽपवादः । न लोपः । युवतिः । अथ कथं 'युवतीकरनिर्मथितम्' इति । उच्यते । यौति मिश्रीकरोति पत्या सहेति यौतिः शत्रन्तात् ऋवित इति ईपि कृते 'युवती' इति बोध्यः । इति चक्रधरास्यायां टिप्पण्यां स्त्रीप्रत्ययाः समाप्ताः ॥ १५ ॥

अथ विभक्त्यर्थाः ॥ १६ ॥

लिङ्गार्थे प्रथमा ॥ नामार्थमात्रे लिङ्गमात्राधिक्ये च प्रथमा विभक्तिः ॥ नियतोपस्थितिको नामार्थः । उच्चैः । नीचैः । कृष्णः । श्रीः । ज्ञानम् । द्रोणः । खारी । आढकम् । एकः । द्वौ । बहवः । अलिङ्गा नियतलिङ्गाश्च नामार्थमात्रे इत्यस्योदाहरणम् । अनियतलिङ्गास्तु लिङ्गमात्राधिक्य इत्यस्य । तटः । तटी । तटम् ॥ १ ॥

(सु०) अथ कारकप्रकरणम् (क) । स्वादयः प्रत्यया नाम्नो विहितास्तेषामर्थविशेषे व्यवस्थां दर्शयितुमारमते ॥ **लिङ्गार्थे प्रथमा** ॥ लिङ्गं च अर्थश्चानयोः समाहारो लिङ्गार्थम् । तस्मिन् लिङ्गार्थे । अर्थे प्रथमेत्युक्ते कस्यार्थे इत्याकाङ्क्षायां यस्मान्नाम्नः स्वादिविभक्तिर्विहिता तस्य नाम्नोऽर्थं एवेति नामार्थमात्रम् । "मात्रं कार्त्स्न्येऽवधारणे" इत्यमरः । तत्र प्रथमा विभक्तिर्भवति । स को नामार्थः । नियतोपस्थितिकः । नियतोपस्थितिर्यस्य स नियतोपस्थितिकः । तस्मिन् नाम्नि उच्चारिते यस्यार्थस्य नियमेनोपस्थितिः स नियतोपस्थितिको नामार्थ एव शक्य इत्युच्यते (ख) । अनियतलिङ्गग्रहणार्थं

(क) **कारकमिति** । ननु किं नाम कारकत्वम् । अत्र केचित् । क्रियानिमित्तत्वं कारकत्वमिति । तत्र चैत्रस्य तण्डुलं पचतीत्यादौ तण्डुलसम्पादनद्वारा चैत्रस्य पाकनिमित्तत्वात्तत्र कारकत्वापत्तेर्दुर्वारत्वात् । सम्प्रदानादेरनुमतिप्रकाशनद्वारेव चैत्रस्य तण्डुलसम्पादनद्वारा पाकनिमित्तत्वसुगमात् ।

अथ 'विभक्त्यर्थद्वारा क्रियान्वयित्वं कारकत्व'मिति लक्षणम् । स्तोकं पचतीत्यादौ क्रियाविशेषणेऽति प्रसङ्गवारणाय विभक्त्यर्थद्वारेति । स्तोकमित्यत्र द्वितीया हि साधुत्वार्था । गुरुविप्रतपस्विदुर्गतानां प्रतिकुर्वीतभिषक् स्वभेषजैरित्यादौ नामाध्याहारः कर्तव्योऽतो नातिव्याप्तिः । सम्बन्धिनः क्रियानिमित्तत्वेऽपि क्रियान्वयित्वाभावान्नातिव्याप्तिः । वस्तुतस्तु सम्बन्धाधिकषष्ठीभिन्नविभक्त्यर्थकद्वारा क्रियान्वयित्वं कारकत्वमिति तेन मातुः स्मरति इत्यादौ न कर्मकारकत्वानुपपत्तिः । न वा चैत्रस्य पुत्रो गच्छतीत्यादौ कारकत्वापत्तिः ।

(ख) अत्र अर्थशब्दो यदि वृत्तिविषयपरो जातिव्यक्तिलिङ्गं त्रिकं च नामार्थ इत्याश्रीयते, तदा लिङ्गस्यापि साम्यत्वमिति रघुनाथादयः । विस्तरस्तु लघुभाष्येऽवलोकनीयः । वृत्तिस्तु शक्तिलक्षणान्यतरसम्बन्धः । गौणी तु लक्षणान्तर्गता पृथगिति केचित् । शक्तिस्तु सकलजन्यप्रकारविषयानुभवसिद्धानामकं पदार्थान्तरमिति **मीमांसकाः** । लाघवात् संकेत एवाभिधानतत्पदार्थान्तरमिति **नैयायिकाः** । सङ्केतश्चास्मात्पदादयमर्थो बोद्धव्य इतीश्वरेच्छारूपः । ईश्वरीयज्ञानस्येच्छायाः कृतेर्वा शक्तिरूपत्वमिति विनिगमनाविरहादतिरिक्तैव शक्तिरिति **नव्याः** । बोधकत्वमेव शक्तिरिति केचिद्बोधजनकत्वमत उक्तं **विवरणे**–बोधजननसामर्थ्यमेव शब्दस्यार्थेन सम्बन्ध इति । न त्वस्मात्पदादयमर्थो बोद्धव्य इत्याकारा शक्तिः । इदं पदमिममर्थं बोधयत्वित्याकारेच्छाज्ञानं कृतिर्वा सा इत्यत्र विनिगमनाविरहेण सर्वेषां तत्त्वे गौरवात् अतिरिक्तेत्यपि न सम्यक्, अतिरिक्तपदार्थस्याश्रयभेदेन विषयभेदेन च भिन्नत्वेऽनन्तपदार्थकल्पनायां गौरवस्य स्पष्टत्वात् । न चैवं लक्षणादौ गङ्गापदस्य तीरबोधकत्वेन तत्रापि शक्तेरेव सत्त्वादिति वाच्यम् । इष्टापत्तेः । यथा नैयायिकैर्लाघवात्सर्वानुभवसिद्धापि व्यञ्जना लक्षणयैव निर्वाहेऽतिरिक्ता न स्वीक्रियते तथास्माभिरपि ततः शाब्दबुद्धित्वावच्छिन्नं प्रति बोधजनकज्ञानजन्योपस्थितत्वेनैव कारणतेत्येक एव कार्यकारणभाव इति लक्षणा न स्वीक्रियते इति दिक् । स्वशक्यसम्बन्धो लक्षणा । स्वलाक्षणिकं पदं तस्य यच्छक्यं वाच्यं तत्सम्बन्धो लक्षणेत्यर्थः । सा द्विधा । गौणी तदन्या च । तद्भिन्नत्वे सति तद्गतभूयो धर्मवत्त्वं सादृश्यम् । तदात्मकशक्यसम्बन्धो गौणी । यथा–गौर्वाहीकः । अत्र गवाभेदस्यावा-

लिङ्गेति। लिङ्गे लिङ्गमात्राधिक्येऽपि प्रथमा। यद्यपि लिङ्गमात्र इत्येवाक्षरार्थस्तथापि नामार्थं विना लिङ्गादिप्रतीतेरसंभवादाधिक्ये इत्युक्तम्। प्रथमादयः सप्तम्यन्ताः प्राचां संज्ञास्ताभिरिहापि व्यवहारः। ननु सिंहो माणवक इत्यादौ प्रथमा न स्यात्। उच्यते शक्यार्थमादाय प्रथमाविभक्तेरुत्पत्तौ सत्यां पश्चात्पदान्तरसमभिहारो लक्ष्यार्थबोधकोऽस्तीति॥ ननु वीरः पुरुष इत्यादौ प्रथमा न स्यात्। वीराभिन्नः पुरुष इत्यभेदसंसर्गस्याधिकस्य भानात् (क)। उच्यते। अत्र पदसंस्कारपक्षाभ्युपगमोऽस्ति। ततोऽन्तरङ्गत्वात् प्रथमप्रवृत्तपदसंस्कारेण प्रथमारूपे कृते पश्चाद्बहिरङ्गत्वात् अभेदसंसर्गो वाक्यार्थः कर्तव्य इति। नास्ति लिङ्गं येषां ते अलिङ्गाः। नियतं निश्चितं लिङ्गं येषां ते नियतलिङ्गा इति। उभयेषां नामार्थमात्रे उदाहरणं यथा। उच्चैरिह पदत्वाद्विसर्गसिद्धिः। किंचास्य प्रथमान्तत्वात् संग्राम उच्चैस्तव संग्राम उच्चस्ते इति विद्यमानपूर्वादिति सूत्रेण ते मे आदेशयोर्विकल्पसिद्धिरपि फलम्। कृष्णः। अयं नीलद्रव्येऽनियतलिङ्गस्तथापि वासुदेवे नियतलिङ्गाः। ज्ञायते तत् ज्ञानम्। भावे युट्। खारी द्रोण आढकमित्यत्रापि नामार्थं एव प्रथमा। परिमाणार्थस्य नियतज्ञानात्। द्रोणो व्रीहिरित्यत्र तु द्रोणपरिच्छिन्नाभिन्नो व्रीहिरित्यभेदान्वयः। नामार्थयोरभेदान्वयस्य व्युत्पन्नत्वात्॥ ननु एक द्वौ बहव इत्यत्र नाम्नैव संख्याया अभिधानात् प्रथमा न स्यात्। उच्यते। न केवला प्रकृतिः प्रयोक्तव्या नापि केवलः प्रत्यय इति नियमात् प्रथमोत्पत्तिर्बोध्या। अनियतं लिङ्गं येषां ते अनियतलिङ्गास्तेषामनियतलिङ्गमेवेति लिङ्गमात्रम्। अधिकस्य भाव आधिक्यं लिङ्गमात्रस्य आधिक्यं लिङ्गमात्राधिक्यं तस्मिन्। उदाहरणं बोध्यम्। किंच भाष्यकारमते पञ्चकः प्रातिपदिकार्थः। स्वार्थद्रव्यलिङ्गसंख्याकारकाणि इति। यथा दधि मध्वित्यादौ विनापि विभक्तिं प्रातिपदिकादेव तावतामर्थानां प्रतीतेः। कैयटमते आदितश्चतुष्कं प्रातिपदिकार्थः। वृत्तिकारमते आदितस्त्रिकं प्रातिपदिकार्थः। संख्याकर्मादयस्तु विभक्त्यर्था इति। आदितो द्विकं प्रातिपदिकार्थ इत्यन्ये (ख)। लिङ्गमात्रादि वाच्यमित्युक्तत्वात्। तत्र स्वार्थो विशे-

---

धात् गोपदेन गोसदृशो लक्ष्यते। गोसादृश्यं च गोगतजाड्यमान्द्यादिकमेव। तथा च जडो मन्दश्च वाहीक इति शाब्दबोधः। अन्या त्रिधा—जहत्स्वार्थाऽजहत्स्वार्था जहदजहत्स्वार्था च। यत्र शक्यार्थस्य केनापि रूपेण लक्ष्यार्थानन्वयस्तत्राद्या। यथा गङ्गायां घोषः। यत्र शक्यार्थस्यापि तदन्वयस्तत्रापरा। यथा छत्रिणो यान्ति। काकेभ्यो दधि रक्षताम्। यत्र शक्यार्थैकदेशबाधेनैकदेशान्वयस्तत्र तृतीया। यथा सोऽयं देवदत्तः तत्त्वमसीत्यादौ। व्यञ्जना। लक्षणान्तर्भूता न व्यङ्ग्यार्थबोधिका व्यञ्जना। यथाऽर्कोऽयमस्तं गतः। आलङ्कारिकास्तु व्यञ्जनाख्यं वृत्यन्तरमैच्छन् इति साहित्यदर्पणादौ विस्तरो ज्ञेयः।

(क) **अधिकस्य भानादिति**। संसर्गमर्यादयेति शेषः। तदुक्तं गदाधरेण **व्युत्पत्तिवादे**—"एकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते। स च क्वचिदभेदः क्वचिच्च तदतिरिक्त एवाधाराधेयप्रतियोग्यनुयोगिविषयविषयिभावादिः" इति। अभेदश्च तत्तद्धर्मावच्छिन्नभेदाभावः। वीरः पुरुष इत्यादौ वीरत्वादिप्रकारेण भासमानानां तत्तद्व्यक्तीनां स्वस्मिन् सम्बन्धतया भासते।

(ख) तदुक्तम्—"स्वार्थो द्रव्यञ्च लिङ्गञ्च संख्या कारकमेव च

अमी पञ्चैव लिङ्गार्थास्त्रयः केषांचिदग्रिमाः।" इति।

अत्र स्वार्थो विशेषणम्। द्रव्यम् उक्तार्थश्च विशेष्यम्, लिङ्गं पुंस्त्वादि, संख्या एकत्वादिः, कारकं कर्मादि। तथाहि गोनित्या इत्यत्र स्वरूपविशेषणत्वात्स्वार्थः। शब्दो ह्यर्थं प्रतिपादयन् दीपवत्स्वरूपमपि प्रतिपादयति। जातिः शक्यत्वात् द्रव्यम्। एवं पटीयः शुक्लः नीलो घटः पाचको मैत्रः दण्डी चैत्रः इत्या-

षणं द्रव्यं विशेष्यं द्रव्यगुणक्रियासन्निधाने द्रव्यवाचकस्यैव प्राधान्यमित्युक्तत्वात्। लिङ्गं स्त्रीत्वादि। संख्या एकत्वादि। कारकं कर्मादि ॥ १ ॥

(त०) लिङ्गार्थे प्रथमेति ॥ लिङ्गं च अर्थश्च लिङ्गार्थं तस्मिन् लिङ्गार्थे। लिङ्गे अर्थे च प्रथमेत्यर्थः। कस्यार्थे इत्याकाङ्क्षायां यस्मात्स्यादिर्विभक्तिस्तस्यार्थे। स्यादयश्च नाम्नो विधीयन्ते अतो नामार्थं इति लब्धमेव ॥ नामार्थमाह ॥ **नियमोपस्थितिक** इति ॥ नियता उपस्थितिर्यस्य सः। यस्मान्नाम्नो योऽर्थो नियमेन भासते स तस्यार्थः। नियतत्वलाभश्चामन्त्रण इति सूत्रारम्भात्। नामार्थ एव द्विविधः तं दर्शयति—**अलिङ्गा** इत्यादि ॥ नालिङ्गा संख्या इत्यर्थः। प्रथमे उदाहरणमव्ययम्। द्वितीय उदाहरणं कृष्ण इत्यादि। यद्यपि नीलरूपवत्परोऽयमनियतलिङ्गस्तथापि वासुदेवे भगवति नियतलिङ्ग एवेति भावात्। कृष्णादौ लिङ्गमेव नामार्थस्तस्य नियमेन भानात्। तटादौ तु लिङ्गं नामार्थव्यतिरेकेणास्तीति लिङ्गमात्राधिक्ये नामार्थे प्रथमाविधानात्। कारकसंबन्धयोस्तु नाम्नो नियतभानाभावान्न तयोराधिक्ये प्रथमा। यदि त्वर्थशब्दो वृत्तिपरः वृत्तिस्तु शक्तिर्लक्षणा च गौणी तु लक्षणान्तर्भूता पृथग्वाऽस्तु त्रिकं च नामार्थ इत्याश्रीयते। तदा लिङ्गे इत्यपि माऽस्तु लक्ष्याणां विचित्रत्वेऽपि न क्षतिः नियमांशत्यागात्। शक्यं लक्ष्यं गौणं च पुलिङ्गं स्त्रीलिङ्गं नपुंसकलिङ्गं च लक्ष्यमिति वैचित्र्यम्। शक्य एवेति नियमस्य पुंस्त्वादिना लिङ्गस्य वाच्यतेति नियमस्य च त्यागात्। लिङ्गत्वेनैव लिङ्गस्य वाच्यताभ्युपगमात्। खारीत्यादिपरिमाणमपि नामार्थ एव नियमेन लाभात्। एक इत्यादिसंख्यायास्तु नाम्नैवाभिधानात्तदभिधायिका प्रथमा न इति चेत्सत्यं न केवला प्रकृतिः प्रयोक्तव्येति नियमात्। अन्यप्रयोगेऽप्येषोऽन्वयः स्यादिति अनुवादकप्रयोगस्यैव न्याय्यत्वात् ॥ ननु कृष्ण इत्यादावस्तीत्यध्याहारेणान्योक्ते प्रथमेत्यनेनैव सिद्धे किमेतेनेति चेत्सत्यम्। अध्याहारे गौरवात्। शुक्लोऽयं न पीत इत्यादौ सविशेषणवाक्येऽध्याहारस्यानावश्यकत्वाच्च ॥ ननु तस्मात्सिऔजसिति सूत्रेणैव विभक्तिविधानात्किं कारकप्रकरणेनेति चेत्सत्यम्। सिद्धे सत्यारम्भो नियमार्थः। स च द्विविधः। विभक्तिनियमोऽर्थनियमश्च। आद्ये नामार्थ एव प्रथमा। कार्य एव द्वितीया। करण एव तृतीयेत्यादि। अत्र पक्षेऽव्ययेभ्यो न प्राप्तिः। द्वितीये तु नामार्थे प्रथमैव। कार्ये द्वितीयैवेत्यादि। अत्र पक्षेऽव्ययेभ्योऽपि भवन्ति ॥ १ ॥

आमन्त्रणे च ॥ अभिमुखीकरणे प्रथमा॥ हे देव, हे देवौ, हे देवाः ॥ २ ॥

(सु०) आमन्त्रणे च ॥ संबोधनाधिक्येऽप्राप्तौ वचनम्। आमन्त्र्यते प्रसन्नः क्रियते अनेनेति करणे युट्। अनभिमुखोऽभिमुखः क्रियते अनेनेत्यभिमुखीकरणमनुकूलकरणम्। तत्र प्रथमा भवति। 'देव मां पाहि' इति वाक्ये देवसंबन्धिसंबोधनविषयिका मत्कर्मकरक्षणक्रियेति बोधः। "सम्बोधनपदं यच्च तत्क्रियाया विशेषणम्" इत्युक्तत्वादिह संबोधनं प्रकृत्यर्थ प्रति विशेष्यं क्रियां प्रति विशेषणमिति ॥ २ ॥

(त०) आमन्त्रणे इति ॥ आमन्त्रणमभिमुखीकरणमनुकूलकरणमिति यावत्।

दौ जातिगुणक्रियासम्बन्धाः स्वार्थाः विशेषणत्वात्, गुणघटमैत्रचैत्रादयो द्रव्याणि विशेष्यत्वात्। गौः सुन्दर इत्यादौ तु शक्याश्रयतया व्यक्तिरेव द्रव्यम्, जातिस्तु स्वार्थ इति। यद्यपि प्रयोजननिर्वाहकारितया व्यक्तयो जातेर्भिन्ना एव, तथापि ता एव व्यक्तयस्तिरोहितभेदा जातिरुच्यते। तदुक्तम्—"अर्थक्रियाकारित्वा भिन्ना व्यक्तय एव च, ता एव व्यक्तयस्त्यक्तभेदा जातिरुदाहृता" इति। धर्मधर्मिणोरभेदवादिमते नेदम्।

आमन्त्र्यते प्रयत्नः क्रियतेऽनेनेति साधने युट् । इह सम्बोधनं प्रकृत्यर्थं प्रति विशेष्यं क्रियां प्रति विशेषणमिति सिद्धान्तः(क) । "सम्बोधनपदं यच्च तत् क्रियाया विशेषणम्" इत्युक्तत्वात् । एवं देव मां पाहीति वाक्यस्य देवसम्बन्धिसम्बोधनविषयकमत्कर्मकं रक्षणमर्थः(ख) ॥ २ ॥

(भोस्भगोस्अघोस् भवद्भगवदघवतां वा निपात्या धौ) भो हर । भगो नमस्ते अघो याहि ॥ ३ ॥

(स०) भोस्भगोस्अघोस् भवद्भगवदघवतां वा निपात्या धौ ॥ धिविषये एषां स्थाने एते निपात्यन्ते वा । हे भोः । हे भवन् । हे पूज्येत्यर्थः ॥ हे भगोः । हे भगवन् । हे ज्ञानिन्नित्यर्थः ॥ हे अघोः । हे अघवन् । हे पापिष्ठेत्यर्थः ॥ भोस् इत्यनेन विसर्गलोपः । भो हर ॥ इति प्रथमा(ग) ॥ ३ ॥

(त०) भोस्भगोस् इति ॥ योग्यताबलाद्भवदादयः स्थानिनः आक्षिप्यन्ते ॥ इति प्रथमा ॥ ३ ॥

(क) **इह सम्बोधनमिति** । "सिद्धस्याभिमुखीभावमात्रं सम्बोधनं विदुः, प्राप्ताभिमुख्यो ह्यर्थात्मा क्रियासु विनियुज्यते । सम्बोधनं न वाक्यार्थ इति वृद्धस्य आगमः ।" इति हर्युक्तेः क्रियासु विनियोगफलकोऽभिमुखीभावः सम्बोधनम्' इति सूचितम् ।

अत्र सिद्धस्येत्यनेन तस्यानुवाद्यत्वम् । विनियुज्यत इत्यनेन प्रवर्त्तनाविषयक्रियासम्बन्धस्तस्येति बोधितम् । एवं च सम्बोधनविभक्तेरनुवाद्यविषयतयाऽनुवाद्यस्य च विधेय एवान्वयेन विधेयतायाश्च क्रियानिष्ठत्वेन तस्यामेवान्वय इति युक्तम् । सम्बोध्यतावच्छेदकरूपेण सम्बोध्यस्य सिद्धिं विनाऽनुपाद्यत्वासम्भवेन राजा भव युध्यस्व इन्द्रशत्रुर्वर्धस्वेत्यादौ न सम्बोधनविभक्तिः । अत एव राजन् युध्यस्वेत्यस्य कुमारावस्थायां राजा भव युध्यस्वेत्यस्य राजावस्थायां न प्रयोगः । व्रजानि देवदत्तेत्यादावपि जानीहीत्यध्याहारो वाक्यैकदेशन्यायेन वा । तत्र व्रजनस्य कर्मत्वाद् देवदत्तस्योद्देश्यत्वाद् उभयोःसमानवाक्यस्थत्वम् । उद्देश्यविधेयभावो वाक्यार्थः । अभिमुखीभवनानुकूलस्य सम्बोधनविभक्त्यन्तशब्दप्रयोगरूपस्य व्यापारस्येतरनैरपेक्ष्येणैव प्रतीतेस्तन्न वाक्यार्थ इति तदर्थ इति बोध्यम् ।

तत्र वाक्यैकदेशन्यायेन, अध्याहारेण वा व्रजानि देवदत्तेत्यनेनैव जानीहीत्येतद्घटितवाक्यार्थबोध इति 'एकतिङ् वाक्यम्' इति वाक्यलक्षणमपि श्रूयमाणैकतिङन्तपदघटितमित्यर्थकं तत्रास्त्येवेति निघातसिद्धिः । एतन्मूलक एव सम्बोधनस्य कर्तृकारकत्वव्यवहारो वृद्धानाम् । तस्यैव त्वंपदार्थत्वेन विनियोज्यक्रियाकर्तृत्वात् ।

(ख) **एवमिति** । 'अभिमुखीभवद्देवोद्देश्यकप्रवर्त्तनाविषयो मत्कर्मकं रक्षणम्' इति 'अभिमुखीभवद्देवदत्तोद्देश्यकप्रवर्त्तनाविषया मत्कर्तृकगमनकर्मकं ज्ञानमित्यर्थः ।

(ग) कुत्रचित्त सारस्वतादौ प्रथमाविभक्तिविचारप्रकरणे प्रथमाया अर्थविशेषे वचनविशेषमाह— **'जातावेकस्मिन् बहुत्वं वा** । गौरयं गाव इमे । सम्पन्नो यवः सम्पन्ना यवाः । **स्वरूपाणां बहुषु द्वयोश्चैकत्वम्** । दीर्घाः यवाः । दीर्घौ यवौ दीर्घो यवः । **युष्मदो गौरवे त्वेकत्वे द्वित्वे च बहुवचनम्** । त्वं मे गुरुः । युवां मे गुरू । यूयं मे गुरवः । **द्विवर्जं त्यदादिमात्राच्च** । द्विवर्जं त्यदादिमात्रादेकत्वे द्वित्वे च बहुवचनं वा भवति । ते कुत्र तव गुरवस्तत्र ते विराजन्ते । **पूज्यवाचिभ्यस्त्वादराधिक्ये** । पितरः समादिशन्ति । तत्र भवन्तः कुर्वन्ति **अस्मदोऽविशेषणस्य च** । अविशेषणस्यास्मच्छब्दस्य प्रयोगे एकत्वे द्वित्वे बहुवचनं वा भवति । अहं पठामि । आवां पठावः । वयं पठामः । सविशेषणस्य तु पण्डितोऽहं पठामि । **क्वचिद्व्यभिचरति च—**

'सा बाला वयमप्रगल्भमनसः सा स्त्री वयं कातराः, सा पीनोन्नतिमत्पयोधरयुगं धत्ते सखेदा वयम् । साक्रान्ता जघनस्थलेन गुरुणा गन्तुं न शक्ता वयं, दोषैरन्यजनाश्रयैरपटवो जाता स्म इत्यद्भुतम्'' ।

शेषाः कार्ये कर्तृसाधनयोर्दानपात्रे विश्लेषावधौ सम्बन्ध आधारभावयोः ॥ द्वितीयाद्या विभक्तय एष्वर्थेषु भवन्ति ॥ कार्ये कर्मकारके द्वितीया (क)।

कटं करोति कारूको रूपं पश्यति चाक्षुषः।
राज्यं प्राप्नोति धर्मिष्ठः सोमं सुनोति सोमपाः ॥ ४ ॥

(४०) **शेषाः कार्ये कर्तृसाधनयोर्दानपात्रे विश्लेषावधौ सम्बन्ध आधारभावयोः ॥** शिष्यन्ते इति शेषाः। कर्मणि घञ् प्रत्ययः। प्रथमायाः शेषाः अन्याः

(क) **कार्ये कर्मकारके इति**। सूत्रं **शेषाः कार्ये इत्यादि**। एतेन कर्मणो यौगिकलक्षणमुक्तं भवति। किं तत्। उच्यते। यत् क्रियते कर्त्रा स्वक्रियया निष्पाद्यते तत् कार्यं=कर्मेति। करोतेर्निखिलक्रियावाचकत्वात् कर्तृव्यापारैर्यत् साध्यते तत् कर्मेत्यर्थः। अतएव क्रियाव्याप्यं कर्मेति **क्रमदीश्वरः**। 'कर्तुरीप्सिततमं कर्मेति' **पाणिनिः**। कर्तुः किं माषेष्वश्वं बध्नाति। कर्मण ईप्सिता माषा न कर्तुः। तमब्ग्रहणं किम्। पयसा ओदनं भुङ्क्ते। इत्यादि परिष्कृतं **भट्टोजिना**। तथा चानीप्सितम्। ओदनं भुञ्जानो विषं भुङ्क्ते इति च। **अपरे तु**—कर्तृभिन्नत्वे सति क्रियाजन्यफलशालित्वं कर्मत्वमिति। परसमवेतक्रियाजन्यफलशालित्वं कर्मत्वमिति **जयकृष्णः**। 'वाराणसीं व्रजति' इत्यादौ संयोगरूपफलशालित्वेऽपि कर्तरि नातिव्याप्तिः। वस्तुतस्तु कर्मशब्दस्य यौगिकत्वादेव फलनिरूपिताश्रये सर्वत्र द्वितीयासिद्धत्वात् कर्मसंज्ञाविधायकानि सूत्रान्तराणि न कृतानीति। तच्च कर्म द्विविधम्। ईप्सितानीप्सितकर्मभेदात्। तत्र प्रथमं त्रिविधम् 'निर्वर्त्य-विकार्य-प्राप्यं चेति। यदसदुत्पद्यते सदेवाभिव्यज्यते तन्निर्वर्त्यम्। वैशेषिकादिमते घटो सन्नेवोत्पाद्यते। सांख्यादिसत्कार्यवादिमते तु पटः सन्नेवाभिव्यज्यते। उदाहरणं—कटं करोतीति मूले। प्रकृतधातूपात्तोत्पत्त्याख्यफलशालित्वं निर्वर्त्यमिति सामान्यलक्षणम्। यत्र तु साध्यत्वेन विषयत्वरूपकर्मत्वं तन्निर्वर्त्यमिति सारमञ्जर्यां जयकृष्णः। यल्लब्धसत्ताकमेवावस्थान्तरमापद्यते तद्विकार्यम्। यत्र तु प्रकृत्युच्छेदजनितरूपान्तरवत्त्वं तद्विकार्यमिति जयकृष्णः। तदपि द्विविधम्। किञ्चित्प्रकृत्युच्छेदसंभूतं। किञ्चिद्गुणान्तरोत्पत्त्या च। तत्राद्यं यथा—काष्ठं भस्म करोतीत्यादि। प्रकृतेः प्रकृतिभूतस्यात्मन उच्छेदसम्भूतत्वाद्विकार्यत्वम्। द्वितीयं यथा सुवर्णं कुण्डलं करोतीत्यादि। नन्वत्र काष्ठादौ कथं धातूपात्तफलाश्रयमिति चेदुच्यते, प्रकृतिविकारयोरभेदविवक्षया निरूढयानुत्पत्त्याश्रयत्वमित्यन्यत्र विस्तरः। परे तु संस्कार्यमपि पृथक्कर्मेति वदन्ति। व्रीहीन् प्रोक्षति पुत्रमुपनयतीत्यत्र प्रत्यक्षानुमानाभ्यां क्रियाकृतः कश्चिद्विशेषो न दृश्यते तत्प्राप्यम्। यथा आदित्यं पश्यतीति। न ह्यत्रादित्ये दर्शनक्रियया कश्चिद्विशेषः क्रियते। यद्यपि विषयतारूपः क्रियाकृतो विशेषो भवत्येव, अन्यथा कर्मत्वानुपपत्तेस्तथापि प्रतिपत्तृव्यतिरिक्तपुरुषापेक्षया विशेषो न गम्यते इति बोध्यम्। यत्र कर्मणो धात्वर्थजन्यफलवत्त्वं तत्प्राप्यमिति जयकृष्णः। द्वितीयं चतुर्विधम्। औदासीन्यप्राप्यद्वेष्यसंज्ञान्तरानाख्यतान्यपूर्वकभेदात्। औदासीन्यप्राप्यं यथा—तृणं स्पृशतीति। द्वेष्यं यथा—विषं भुङ्क्ते। संज्ञान्तरैरनाख्यातं यथा—गां दोग्धि पय इति। अन्यपूर्वकं यथा क्रूरमभिक्रुध्यति। अक्षान् दीव्यति।

तदुक्तं हरिणा—निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतम्। तत्रेप्सिततमं कर्म चतुर्धान्यत्तु कल्पितम्

तथा सञ्जायते पूर्वं जन्मनो यत्प्रकाशते। तन्निर्वर्त्यं विकार्यं च कर्म द्वेधा व्यवस्थितम् ॥
प्रकृत्युच्छेदसम्भूतं किञ्चित्काष्ठादि भस्मवत्। किञ्चिद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्।
क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते। दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते
औदासीन्येन यत्प्राप्यं यच्च कर्तुरनीप्सितम्। संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम्' इति।

प्रकृत्यनुच्छेदतदुच्छेदाभ्यां संस्कार्यविकार्ययोर्भेदो न वास्तव इति वासुदेवः। सारमञ्जर्यादौ तु त्रिविधमेवोदाहृतम्। अनेकवैमत्यात्संस्कार्यस्य न वास्तवो भेद इति गुरवः।

षड् विभक्तयस्ताः कार्यादिषु षट्सु यथाक्रमं प्रवर्तन्ते इत्यर्थः ॥ कार्ये द्वितीया ॥ क्रियते कर्त्रा स्वक्रियया निष्पाद्यते यत्तत् कार्यम् । धातूपात्तफलमित्यर्थः । तस्मिन् अनुक्ते कार्ये कर्मणि द्वितीया स्यात् । उक्ते कर्मणि तु प्रथमैव । उक्तं त्वाख्यातकृत्तद्धितसमासनिपातै- र्भवति ॥ आख्यातोक्ते हरिः सेव्यते ॥ कृदुक्ते लक्ष्म्या सेवितो हरिः ॥ तद्धितोक्ते शतेन क्रीतः शत्यः ॥ कारकात्क्रियायुक्ते इति शेषः ॥ समासोक्ते प्राप्त आनन्दो यं स प्राप्तानन्दः॥ निपातोक्ते 'विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतमिति ॥ "कटं करोति कारुको रूपं पश्यति चाक्षुषः । राज्यं प्राप्नोति धर्मिष्ठः सोमं सुनोति सोमपाः ॥ १ ॥" अत्र सर्वत्रा- ख्यातादिनाऽनुक्ते कर्मणि द्वितीया । कारुकः पुमान् कटं करोति । कटनिष्ठोत्पत्त्यनुकूला- एककर्तृका वर्तमाना करोतिक्रियेति शाब्दबोधः(क) ॥ चक्षुषा पश्यतीति चाक्षुषः पुमान् । कारकादित्यण् । रूपं पश्यति । रूपनिष्ठसाक्षात्कारोत्पत्त्यनुकूला एककर्तृका वर्तमाना दृशि- क्रिया ॥ धर्मोऽस्त्यस्येति धर्मी । अस्त्यर्थे इन् । अतिशयेन धर्मीति इष्ठप्रत्ययः । धर्मिष्ठः पुमान् । राज्ञः कर्मेति राज्यं प्राप्नोति । राज्यनिष्ठोत्पत्त्यनुकूला एककर्तृका वर्तमाना प्रा- प्नोतिक्रिया ॥ सोमं पिबतीति सोमपाः पुरुषः । सोमममृतवल्लीं सुनोति खण्डयतीत्य- र्थः । सोमनिष्ठखण्डनोत्पत्त्यनुकूला एककर्तृका वर्तमाना सुनोतिक्रियेति । क्रियाप्रधानमा- ख्यातमिति सिद्धान्तात् क्रियाविशेष्यकः शाब्दबोधः कर्तव्यः(ख) ॥ यास्कोऽप्याह ।

(क) ननु कोऽयं शाब्दबोधः । तत्राह—एकपदार्थेऽपरपदार्थान्वयावगाहि ज्ञानं शाब्दबोधः । सम- वायेनात्मनिष्ठो गुणविशेषः । केचिदिमं प्रत्यक्षानुमित्याद्यतिरिक्तं न मन्यन्ते । तद्धि नैयायिकादयो न सहन्ते । तथा च शब्दशक्तिप्रकाशिकायां जगदीशः—

'साकाङ्क्षशब्दैर्यो बोधस्तदर्थान्वयगोचरः । सोऽयं नियन्त्रितार्थत्वान्न प्रत्यक्षं न चानुमा ।'

इत्यादिकारिकाव्याख्यानावसरे शाब्दबोधस्य प्रत्यक्षानुमितित्वरूपखण्डनपुरःसरमतिरिक्तत्वं प्रद- र्शितमिति तत्रोन्नेयम् । शाब्दबोधप्रकारमाह भाषापरिच्छेदे विश्वनाथः—

यथा—पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः । शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी' ॥

ननु तादृशशाब्दबोधे किं कारणमित्यपेक्षायामाह विश्वनाथो भाषापरिच्छेदे—

यथा—"आसत्तिर्योग्यताकाङ्क्षातात्पर्यज्ञानमिष्यते, कारणम्' इति ।

आसत्तिर्यत्पदार्थेन यत्पदार्थस्यान्वयोऽपेक्षितस्तयोरव्यवधानम् । तेन गिरिर्भुक्तमग्निमान् देवदत्तेन इत्यादावसत्तिविरहान्न शाब्दबोधः । योग्यता एकपदार्थेऽपरपदार्थसम्बन्धः । योग्यताज्ञानस्याकारणत्वे वह्निना सिञ्चतीति वाक्यादपि सेके वह्निकरणकत्वरूपार्थस्य बोधः स्यात् । योग्यताज्ञानस्य कारणत्वे तु उक्तस्थले सेके वह्निकरणकत्वाभावरूपयोग्यतानिश्चयेन प्रतिबन्धान्न शाब्दबोधः । तदभावनिश्चयस्य लौ- किकसन्निकर्षाजन्यदोषविशेषाजन्यतज्ज्ञानमात्रे प्रतिबन्धकत्वात् शाब्दबोधं प्रत्यपि प्रतिबन्धकत्वं सिद्धम् , ननु तर्हि भ्रमरूपस्य शाब्दबोधस्यानुपपत्तिरिति चेन्न, तत्रापि योग्यताभ्रमेण भ्रमात्मकशाब्दबोधस्योप- पत्त्या सामञ्जस्यात् । यत्पदेन विना यस्य पदस्यान्वयाननुभावकत्वं तेन सह तस्याकाङ्क्षा॥आकाङ्क्षाया अकारणत्वे घटः कर्मत्वम् आनयनं कृतिरित्यादौ शाब्दबोधप्रसङ्गः स्यात् । आकाङ्क्षायाः कारणत्वे घटः कर्मत्वमित्यादौ तदभावान्न शाब्दबोधः । सविस्तरस्तु मुक्तावल्यादाववगन्तव्यम् ।

(ख) केचित्तु नामार्थमुख्यविशेष्यकशाब्दबोधो भवतीति वदन्ति । तेषां मते शाब्दबोधस्य सर्वत्र प्रथमान्तार्थमुख्यविशेष्यत्वनियमात् । यथा 'चैत्रस्तण्डुलं पचती'त्यत्र तण्डुलपदेन तण्डुलपदार्थोपस्थितिः, द्वितीयया कर्मतारूपफलोपस्थितिः, वृत्तित्वं संसर्गः । तेन तण्डुलवृत्तिकर्मत्वमिति बोधः । पचधातुना पाकोपस्थितिः, तत्रानुकूलत्वसंसर्गेण तादृशकर्मत्वान्वयः । तेन तण्डुलवृत्तिकर्मतानुकूलपाक इति बोधः । तत आख्यातेन कृत्युपस्थितिः, तत्रानुकूलत्वसंसर्गेण तादृशपाकेऽन्वयः । तेन तण्डुलवृत्तिकर्मतानुकूल-

भावप्रधानमाख्यातं, सत्त्वप्रधानानि नामानीति। एवम् मृगो धावतीत्यादौ तु मृगकर्तृकम् अनं दृशिक्रियां प्रति कर्म। प्रधानं तु दृशिक्रियैव। उक्तं च। "सुबन्तं हि यथाऽनेकं तिङन्तस्य विशेषणम्। तथा तिङन्तमप्याहुस्तिङन्तस्य विशेषणम्॥१॥" (क) इति॥ ननु उक्ते कर्मणि प्रथमेत्युक्तम्। तेन पक्वमोदनं भुङ्क्ते इत्यत्र द्वितीया न स्यात्। कृत्प्रत्ययेन कर्मण उक्तत्वात्। उच्यते। इह हि पचिभुजिनिरूपिते द्वे कर्मत्वशक्ती। तत्र प्रधानीभूतभुजिक्रियानिरूपितामनुक्तां शक्तिमादाय द्वितीयोत्पत्तिर्भवतीति। उक्तं च हरिणा–प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्॥ शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते॥१॥ प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते। यदा गुणे तदा तद्वदनुक्ताऽपि प्रतीयते॥२॥" अत एव। पक्वौदना भुज्यते देवदत्तेनेत्यत्र भुजिप्रत्ययेन उक्ते कर्मणि प्रथमैव भवति। पचेरप्राधान्यात्।

अथ प्रसङ्गात्पाणिनिसूत्राणि लिख्यन्ते॥ अकथितं च॥ अपादानादिविशेषैरनुक्तं कारकं कर्मसंज्ञं स्यात्(ख)। "दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम्। कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम्॥१॥" दुहादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णां कर्मणा यद्युज्यते तदेवाकथितं कर्म ज्ञेयम्। कर्मणा युज्यते इति कर्मयुक्। क्विबन्तम्। मुख्यकर्मणा सह क्रियया सम्बध्यमानमपादानादिविशेषैरकथितं यत्कारकं तत्कर्मसंज्ञकं भवतीत्यर्थः। एतेन दुहादीनां द्विकर्मकत्वमुक्तम्(ग)। दुह प्रपूरणे। गां दोग्धि पयः स इत्यत्र पयः कर्मकं गोसम्बन्धि दोहनमर्थः(घ)। पयोऽत्र मुख्यं कर्म,

---

पाकानुकूलकृतिरिति बोधः। ततश्चैत्रपदेन चैत्रोपस्थितिः, तत्राश्रयत्वसंसर्गेण तादृशकृतेरन्वयः। तेन तण्डुलवृत्तिकर्मतानुकूलपाकानुकूलकृत्याश्रयश्चैत्र इति वाक्यार्थबोधः।

(क) विशिष्यते सम्बुध्यते येन तत् विशेषणम्। इतरव्यावर्तकमिति यावत्। विशिष्यते विशेषणपदैः सम्बुध्यते सम्यक् ज्ञायते यत् तद्विशेष्यम्।

(ख) **अकथितं चेति**। केनाकथितमित्याशंकायामाह—**अपादानादिविशेषैरिति**। अपादानं सम्प्रदानमधिकरणं कर्म करणं कर्ता हेतुरित्येतैर्विशेषैरित्यर्थः। **अनुक्तमिति**। अविवक्षितमिति पाठः। अपादानादिविशेषोक्ते तु गोर्दोग्धि पयः। बलेर्याचते वसुधाम्। अजेऽवरुणद्धि गाम्। इत्येवं पञ्चम्यादय एव भवन्तीति। अथ **तत्त्वबोधिनी**—"एतेन पाणिनिना कांस्यपात्र्यां दोग्धीत्यत्र करणाधिकरणयोरतिप्रसङ्गः। तयोस्तु दण्डेन करोति, कटे निघ्नतीत्यादिरवकाशो दुहादिपरिगणनादित्याक्षेपो निरस्तः। करणाधिकरणयोरिह विवक्षितत्वात्। यदि तु सूत्रेऽकथितशब्दोऽप्रधानपर्यायो न त्वनुक्तपर्याय इत्यभ्युपगम्येत, तदा स्यादेवायमाक्षेपो न त्वन्यथा" इति। **कारकमिति**। ततश्च ब्राह्मणस्य पुत्रं पृच्छतीत्यत्र नातिप्रसङ्गः।

(ग) **दुह्याजिति**। इह तु दण्डिग्रहणार्थो न तु नियमार्थः। प्रच्छीत्यागन्तुकेनेकारेण निर्देशो न त्विका 'ग्रहिज्या'—संप्रसारणप्रसङ्गात्। **द्विकर्मकत्वमुक्तमिति**। अन्ये त्वाहुः—कर्मयुगित्यत्र कर्मशब्देन क्रियोच्यते इति क्रियान्वयीत्यर्थः। अत्र केचित्—कर्मयुगिति कर्मयुक्तत्वं च भुविशास्यतिरिक्तधातुयोगे धात्वर्थव्यापारात्प्रागेव कर्मसंबद्धत्वम्। तेन 'पाणिना कांस्यपात्र्यां दोग्धि' इत्यत्र करणाधिकरणयोरविवक्षायामपि न कर्मसंज्ञापत्तिः।

(घ) **'गोसंबन्धि' इति**। 'इह 'राज्ञः पुरुष' इत्युक्ते राजा पुरुषमपेक्षते–'ममाय'मिति, पुरुषोऽपि राजानमपेक्षते अहमस्य' इति, तयोरभिसंबन्धस्य षष्ठी वाचिका तथा 'काष्ठं श्रित' इति क्रियाकारकयोरभिसंबन्धस्य द्वितीयावाचिका भविष्यति" इति समर्थसूत्रभाष्यानुरोधेनात्र क्रियाकर्मभाव एव संबन्धो ग्राह्य इति 'गोकर्मकम्' इत्येव बोधोऽङ्गीकार्य्यः। अन्तः स्थितद्रवद्रव्यनिष्ठविभागानुकूलव्यापारो दुहेर-

धातूपात्तफलाश्रयत्वात् । गौस्तु पयसो निमित्ततामात्रेणोपात्ता न त्ववधिभावेनेत्यपादानसंज्ञाया अप्रवृत्तेरनेन कर्मसंज्ञा । विवक्षायां त्वपादानादिसंज्ञा भवत्येव । विवक्षातः कारकविभक्तयो नाना भवन्तीति शाब्दिका इत्युक्तत्वात्। गोर्दोग्धि पयः स इति ॥ टुयाचृ याञ्चायाम् । बलिं याचते वसुधां हरिः । अत्र प्रार्थनार्थस्य याचतेर्वसुधा मुख्यं कर्म । तेन कर्मणा युक्तो बलिः । तस्यापादानत्वाविवक्षायामनेन कर्मसंज्ञा(क) । अपादानविवक्षायां तु बलेर्याचते वसुधामिति ॥ अविनीतं विनयं याचते सः । अविनीतं विनयायानुनयतीत्यर्थः । अविनीतमिति मुख्यं कर्म विनयस्य तादर्थ्याविवक्षायामनेन कर्मसंज्ञा(ख) । विवक्षायां तु अविनीतं विनयाय याचते ॥ डुपचष् पाके तण्डुलानोदनं पचति सः । ओदनं निर्वर्तयतीत्यर्थः । ओदनमिति मुख्यं कर्म । करणत्वाविवक्षायां तण्डुलानित्यत्रानेन कर्मसंज्ञा (ग) । विवक्षायां तु तण्डुलैरोदनं पचतीति ॥ दण्ड दण्डग्रहणे चुरादिः । गर्गान् शतं दण्डयति सः । शतमिति मुख्यं कर्म । गर्गानित्यत्र त्वपादानत्वाविवक्षायामनेन कर्मसंज्ञा(घ) । विवक्षायां तु गर्गेभ्यः शतं दण्डयतीति ॥ रुधिर आवरणे । व्रजमवरुणद्धि गां सः । गामिति मुख्यं कर्म व्रजमित्यत्र त्वधिकरणत्वाविवक्षायामनेन कर्मसंज्ञा(ङ) । विवक्षायां तु व्रजेऽवरुणद्धि गामिति ॥ प्रच्छ ज्ञीप्सायाम् । माणवकं पन्थानं पृच्छति सः । पन्थानमिति मुख्यं कर्म । तादर्थ्याविवक्षायां माणवकमित्यत्रानेन कर्मसंज्ञा(च) । विवक्षायां तु माणवकाय पन्थानं पृच्छति ॥ चिञ्

र्थः। पयसः कर्मता तु 'कर्तुरीप्सिततमम्' इत्यनेनेति तदेव मुख्यं कर्म गौस्तु दोहनात् प्राक् पयसा युक्तत्वेन कर्मयुक्तादप्रधानं कर्मेति 'अप्रधाने दुहादीनाम्'इति प्रत्ययः। यदा तु अन्तःस्थितद्रवद्रव्यनिष्ठविभागानुकूलव्यापारानुकूलव्यापारो दुहेरर्थः, तदा 'कर्तुरीप्सित'—इत्यनेनैवोभयोः कर्मत्वे प्रधानव्यापारजन्यव्यापाररूपफलाश्रयत्वेन गोः कर्मत्वं मुख्यम्, विभागाश्रयत्वेन पयसो गौणं कर्मत्वमिति 'प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्' इति प्रधानकर्मणि गवि प्रत्ययः। प्रधानकर्मत्वं च कर्तृप्रत्ययसमभिव्याहारे प्रकृतधात्वर्थप्रधानव्यापारजन्यफलाश्रयत्वम् ।

(क) प्रार्थनार्थस्येति । परस्वत्वनिवृत्तिपूर्वकस्वस्वत्वोत्पत्त्यनुकूलव्यापारस्यैव याच्यर्थत्वेन स्वस्वत्वोत्पत्तिरूपफलाश्रयत्वेन वसुधाया मुख्यं कर्मत्वम्। बलौ वसुधायाःस्वामित्वसंबन्धात् कर्मयुक्तत्वमिति गौणकर्मत्वमितिभाव'।

(ख) मुख्यं कर्मेति । अत्र स्वीकारानुकूलव्यापारार्थत्वाद्याचेः स्वीकाररूपफलाश्रयत्वाद्विनयस्य मुख्यं कर्मत्वम्। अविनीते विनयस्य स्वविषयकज्ञानवत्त्वेन वृत्तित्वात्कर्मयुक्तत्वेन गौणकर्मत्वमिति भावः।

(ग) तण्डुलानिति । निर्वर्त्यमानस्य पचेरोदनो मुख्यं कर्म । ओदनं निर्वर्त्तयतीत्यर्थः । तण्डुलास्तु करणत्वाविवक्षायामकथितं कर्म । अन्ये त्वाहुः–'द्व्यर्थः पचिः' इति भाष्यपर्यालोचनया तण्डुलानोदनं पचतीत्यस्य तण्डुलान्विक्लेदयन्नोदनं निर्वर्त्तयतीत्यर्थः। दुह्यादिषु पचेः परिगणनमप्रामाणिकं भाष्यकैयटयोरनुक्तत्वादिति तत्त्वबोधिनी ।

(घ)गर्गानिति। स्वसम्प्रदानकदानानुकूलव्यापारानुकूलशासनरूपव्यापारार्थत्वेन दण्डेर्द्विकर्मकत्वे स्वसम्प्रदानकदानानुकूलव्यापाररूपफलाश्रयत्वेन गर्गा प्रधानं कर्म स्वसम्प्रदानकदानाश्रयत्वे शतमप्रधानं कर्मेति सर्वेष्टसिद्धौ परिगणनायामस्याप्रामाणिकः पाठ इति ज्ञेयम्॥ उद्देश्यतालक्षणं प्राधान्यं तु शतस्यैवेति अनुद्देश्यगर्गानुरोधान्नोद्देश्यशतावृत्तिरिति न वृद्धिसंज्ञासूत्रस्थभाष्यवैमत्यम्।

(ङ) गामिति मुख्यमिति । निर्गमप्रतिबन्धपूर्वकचिरस्थित्यनुकूलव्यापारस्य रुधेरर्थत्वे चिरस्थित्याश्रयत्वेन गोः प्रधानं कर्म। व्यापाराद्यर्थत्वेन 'कर्तुरित्येवोभयोः कर्मत्वे सत्यसौलभ्येन चिरस्थित्यनुकूलव्यापाराश्रयत्वेन व्रजे प्रधानकर्मता गोर्गौणकर्मतेति ज्ञेयम् ।

(च) पन्थानं पृच्छतीति । जिज्ञासाविषयार्थज्ञानानुकूलव्यापारस्य प्रच्छिधात्वर्थत्वे विषयतास-

चयने । वृक्षमवचिनोति फलानि सः । फलानीति मुख्यं कर्म वृक्षमित्यत्रापादानत्वाविवक्षायामनेन कर्मसंज्ञा(क) । विवक्षायां तु वृक्षादवचिनोति फलानीति ॥ ब्रूञ् व्यक्तायां वाचि । शासु अनुशिष्टौ । माणवकं धर्मं ब्रूते शास्ति वा सः । धर्ममिति मुख्यं कर्म । माणवकमित्यत्र तु तादर्थ्याविवक्षायामनेन कर्मसंज्ञा(ख) । विवक्षायां तु माणवकाय धर्मं ब्रूते शास्तीति वा ॥ जि जये । शतं जयति देवदत्तं सः । शतमिति मुख्यं कर्म । देवदत्तमित्यत्र स्वपादानत्वाविवक्षायामनेन कर्मसंज्ञा(ग) । विवक्षायां तु शतं जयति देवदत्तात्सः ॥ मन्थ विलोडने । सुधां क्षीरनिधिं मथ्नाति हरिः । सधामिति मुख्यं कर्म । क्षीरनिधिमित्यत्राधिकरणत्वविवक्षायामनेन कर्मसंज्ञा (घ) । विवक्षायां तु सुधां क्षीरनिधौ मथ्नाति ॥ मुष स्तेये । देवदत्तं शतं मुष्णाति । शतमिति मुख्यं कर्म । देवदत्तमित्यत्रापादानत्वाविवक्षयामनेन कर्मसंज्ञा(ङ) । विवक्षायां तु देवदत्ताच्छतं मुष्णाति सः ॥ णीञ् प्रापणे । हृञ् हरणे । कृष विलेखने । वह प्रापणे । ग्राममजां नयति सः । एवं हरतीत्यादि । अजामिति मुख्यं कर्म । ग्राममित्यत्र स्वधिकरणत्वाविवक्षायामनेन कर्मसंज्ञा विवक्षायां तु ग्रामेऽजां नयति हरति कर्षति वहति वेति ॥ एतदर्थका धातवो ऽन्येऽपि संज्ञेयाः। माणवकं धर्मं भाषते अभिधत्ते वक्तीत्यादि ॥ **अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्** ॥ कुरून् स्वपिति । मासमास्ते। गोदोहमास्ते । क्रोशमास्ते(च)॥ **गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि**

म्बन्धेन जिज्ञासाविषयार्थज्ञानरूपफलाश्रयस्य पथो मुख्यकर्मत्वम् । ज्ञानाश्रयस्य माणवकस्य कर्मयुक्तत्वेन गौणकर्मत्वम् ।

(क) **वृक्षमवचिनोतीति** । विभागपुरःसरादानानुकूलव्यापारार्थकचिञः फलानामादानाश्रयत्वेन मुख्यकर्मत्वम् । व्यापारात्पूर्वं फलसम्बन्धिनो वृक्षस्य गौणकर्मत्वम् । आदानानुकूलविभागानुकूलव्यापारानुकूलव्यापारार्थत्वे 'कर्त्तु' रित्येवं द्वयोरपि कर्मत्वे विभागानुकूलव्यापाराश्रयत्वेन वृक्षस्य मुख्यकर्मत्वम् । विभागाश्रयत्वेन फलानां गौणकर्मत्वमिति ज्ञेयम् ।

(ख) **ब्रूते शास्तीति** । ज्ञानानुकूलः शब्दप्रयोगरूपो ब्रूञोऽर्थः । प्रवृत्तिपर्यवसायी सः शासेरर्थः । फलतावच्छेदकविषयतासंसर्गेण ज्ञानाश्रयतया धर्मस्य मुख्यकर्मत्वम्। वचनादिकर्मणा धर्मेण माणवकस्याभिप्रेयमाणत्वात्प्राप्तायाः सम्प्रदानसंज्ञाया अविवक्षायां कर्तृव्यापारोत्तरं तज्ज्ञानाश्रयत्वेन कर्मयुक्तत्वाद् गौणकर्मत्वम् । ज्ञानानुकूलव्यापारानुकूलव्यापारार्थत्वेन 'कर्त्तु' रित्येव द्वयोः कर्मत्वे पुनर्ज्ञानानुकूलव्यापाराश्रयत्वेन माणवकस्य मुख्यकर्मत्वम् । विषयतया ज्ञानाश्रयत्वेन धर्मस्य गौणकर्मत्वम् ।

(ग) **शतं जयतीति** । स्वस्वत्वोत्पत्त्यनुकूलव्यापारानुकूलव्यापारार्थकजयतेः प्रयोगे 'कर्त्तु'रित्येव द्वयोरपि कर्मत्वे स्वस्वत्वोत्पत्त्याश्रयत्वेन शतस्य गौणकर्मत्वम् । स्वस्वत्वोत्पत्त्यनुकूलव्यापाराश्रयत्वेन देवदत्तस्य मुख्यकर्मत्वमिति परिगणनायां जिधातोः पाठस्यायुक्तिकत्वमिति ज्ञेयम् ।

(घ) **क्षीरनिधिं मथ्नातीति** । अन्तःस्थितद्रव्यप्रकाशनानुकूलव्यापारानुकूलव्यापारार्थकमन्थतेः प्रयोगे 'कर्त्तु'रित्येव द्वयोरपि कर्मत्वे प्रकाशाश्रयत्वेनामृतस्य गौणकर्मत्वम् । प्रकाशानुकूलव्यापाराश्रयत्वेन क्षीरनिधेर्मुख्यकर्मत्वमिति परिगणनायां मन्थधातुपाठस्याप्रामाणिकत्वमिति ज्ञेयम् ।

(ङ) **देवदत्तं शतं मुष्णातीति** । स्वस्वत्वोत्पत्त्यनुकूलाज्ञानानुकूलव्यापारस्य मुषधात्वर्थे 'कर्त्तु' रित्येव द्वयोरपि कर्मत्वे स्वस्वत्वोत्पत्त्याश्रयत्वेन शतस्य गौणकर्मत्वम् । अज्ञानाश्रयत्वेन देवदत्तस्य मुख्यकर्मत्वमिति परिगणनायां मुषधातोः पाठाप्रामाणिकमिति ज्ञेयम् । इत्येवं यथायथरूपेण 'अजां ग्रामं नयति हरति' इत्यादौ बोध्यम् ।

(च) **देश इति** ग्रामसमूहात्मककुरुपाञ्चालावन्त्यादिपरोऽत्र देशशब्दो न तु ग्रामादिरपि तेन

(ण्ये) कर्ता स णौ(ण्यौ) ॥ गत्याद्यर्थानां शब्दकर्मकाणामकर्मकाणां च धातूनामणौ यः कर्ता स णौ कर्म स्यात् । प्रत्यवसानं भक्षणम् । शब्दः कर्म कारकं येषां ते शब्दकर्मकाः । अनुत्पन्ने णिप्रत्यये शुद्धधातुवाच्यां क्रियां प्रति यः कर्ता स णिप्रत्ययान्तधातुवाच्यां क्रियां प्रति कर्मसंज्ञः स्यादित्यर्थः(क) । यथा "शत्रूनगमयत्स्वर्गं वेदार्थं स्वानवेदयत् । आशयच्चामृतं देवान् वेदमध्यापयद्विधिम् ॥ आसयत्सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः॥" गत्यर्थो यथा । शत्रवः स्वर्गमगच्छन् । तान् शत्रून् श्रीहरिः स्वर्गमगमयदिति । गमेरणि-प्रत्ययान्तावस्थायां शत्रवः कर्तारस्ते ण्यन्तावस्थायां कर्माभवन् । स्वर्गकर्मकं शत्रुनिष्ठं गमनं तदनुकूलो हरिकर्तृकश्चिरातीतो व्यापारः ॥ बुद्ध्यर्थो यथा । स्वे स्वकीयाः वेदार्थ-मविदुस्तान् स्वान् श्रीहरिर्वेदार्थमवेदयत् । विदेरण्यन्तावस्थायां स्वे कर्तारस्ते ण्यन्ताव-स्थायां कर्माभवन् ॥ प्रत्यवसानार्थो यथा । देवाः अमृतमश्नन् ॥ तान् देवान् श्रीहरिर-मृतमाशयत् । अशेरण्यन्तावस्थायां देवाः कर्तारस्ते ण्यन्तावस्थायां कर्माभवन् ॥ शब्द-कर्मको यथा विधिर्वेदमध्यैत । तं ब्राह्मणं श्रीहरिर्वेदमध्यापयदपाठयदित्यर्थः । अण्यन्ताव-स्थायां विधिः कर्ता स ण्यन्तावस्थायां कर्माभवत् ॥ अकर्मको यथा । सलिले जले पृथ्वी

ग्रामे स्वपितीत्यत्र द्वितीया न भवति । अत्र च 'अधिपूर्वाणां शीङ्स्थासा'०इति लिङ्गम् । अन्यथा अधिशेते, अधितिष्ठति, अध्यास्ते वा वैकुण्ठं हरिरित्यत्राप्यनेनैव कर्मत्वसिद्धेस्तद्वैयर्थ्यं स्पष्टमेवेत्यभिप्रेत्योदाहर-ति—कुरूनिति । देवदत्त इति शेषः । कुरुषु निद्रां करोतीत्यर्थः ॥ कुर्वादिशब्दाः जनपदविशेषेषु स्वभा-वान्नित्यबहुवचनान्ताः ।

गोदोहमिति । न चेह कालत्वात् सिद्धिः । लोके कालत्वेन प्रसिद्धस्य मासादेरेव कालशब्देन ग्रहणात् । तेन घटमास्ते इत्यादि न भवति । जन्यमात्रं कालोपाधिरिति घटादेरपि कालत्वात् । यत्तु प्राचा—"अकर्मकधातुभिर्योगे देशकालाध्वभावैर्भ्यां द्वितीया" इति केचिदित्युक्त्वा नदीमास्ते इत्युदाहृतम् । तदसङ्गतम् । ग्रामसमूहः कुर्वादिरिव देशो गृह्यते न तु देशमात्रम् । तेन ग्रामं स्वपितीति न भवतीत्याक-रात् विस्तरस्तु तत्त्वबोधिन्यां बोध्यः ।

(क) **शब्दकर्मणामिति** । कर्मशब्दोऽत्र कारकपरः । न तु क्रियापरः । कृत्रिमे कार्यसम्प्रत्ययात् । कर्मग्रहणसामर्थ्याच्च । अन्यथा 'गतिबुद्धिप्रत्यवसानशब्दार्थाकर्मकाणामित्येव ब्रूयात् । गतीत्यादि किम् । पाचयत्योदनं देवदत्तेन । अण्यन्तानां किम् । गमयति देवदत्तो यज्ञदत्तं—तमपरः प्रयुङ्क्ते—गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्रः । विष्णुमित्रकर्तृकः यज्ञदत्तकर्मकगमनानुकूलदेवदत्तकर्तृकव्यापारानुकूलो वर्तमानो व्यापारः । इति शाब्दबोधः । 'नीवह्योर्न' । नाययति वाहयति वा भारं भृत्येन । 'नियन्तृकर्तृकस्य वहेरनिषेधः' । वाहयति रथं वाहान् सूतः । 'आदिखाद्योर्न' । आदयति खादयति वान्नं बटुना । 'भक्षेर-हिंसार्थस्य न । भक्षयत्यन्नं बटुना । अहिंसार्थस्य किम् । भक्षयति बलीवर्दान् सस्यम् । 'जल्पतिप्रभृती-नामुपसंख्यानम्'। जल्पयति भाषयति वा धर्मं पुत्रं देवदत्तः। 'दृशेश्च'। दर्शयति हरिं भक्तान् । सूत्रे ज्ञान-सामान्यार्थानामेव ग्रहणं न तु तद्विशेषार्थानामित्यनेन ज्ञाप्यते । तेन स्मरतिजिघ्रतीत्यादीनां न । स्मार-यति घ्रापयति वा देवदत्तेन । 'शब्दायतेर्न' 'शब्दाययति देवदत्तेन । धात्वर्थसंगृहीतकर्मत्वेनाकर्म-कत्वात्प्राप्तिः । येषां देशकालादिभिन्नं कर्म न संभवति तेऽत्राकर्मकाः । न त्वविवक्षितकर्माणो-ऽपि । तेन मासमासयति देवदत्तमित्यादौ कर्मत्वं भवत्येव । देवदत्तेन पाचयतीत्यादौ तु न । 'हृक्रोरन्यतरस्याम्' हृक्रोरणौ यः कर्ता स णौ वा कर्म स्यात् । हारयति कारयति वा भृत्यं भृत्येन वा कटम् । 'अभिवादिदृशोरात्मनेपदे वेति वाच्यम्' । अभिवादयते दर्शयते देवं भक्तं भक्तेन वा । 'क्रियाविशेषणं कर्म' । क्रियाविशेषणं कर्मसंज्ञं नपुंसकलिङ्गमेकवचनं च स्यात्। स्तोकं पचति । इत्यादि तन्त्रान्तराम्नेयम् कुत्रचित् क्रियाविशेषणानामपि करणत्वम् । प्रत्यक्षेण पश्यति । कार्त्स्न्येन करोति । सुखादीनां वा । सुखं सुखेन वा करोतीत्यादिप्रयोगानुसारेण बोध्यम् ।

आस्ते तां पृथ्वीं श्रीहरिः सलिले आसयत् स्थापयति स्म । आसेरण्यन्तावस्थायां पृथ्वी कर्त्री सा ण्यन्तावस्थायां कर्माभवत् । स श्रीहरिर्मे मम गतिः स्यादित्यन्वयः(क) ॥४॥

इति द्वितीया ॥

(त०) शेषाः कार्ये इत्यादि ॥ शिष्यन्त इति शेषाः कर्मणि घञ् । उक्तायाः प्रथमाया अन्याः षड्विभक्तयः शेषाः द्वितीयाद्या इति यावत् । कार्यादयोऽर्थाश्च षड्भिः पदैर्निर्दिष्टास्तेषां यथाक्रमं प्रवृत्तिः । तत्र प्रथमनिर्दिष्टमाह—कार्ये इति ॥ क्रियते कर्त्रा प्रवर्त्यते । यद्वा स्वव्यापारेण यागं वर्गं च साधयति । तदाश्रये च द्वितीया । तत्सम्बन्धात् द्वितीयावाच्यस्तदाश्रय एव न तु फलं तस्य धातुनैव लाभात् । अनन्यलभ्यस्य शब्दार्थत्वात् । वाच्यतावच्छेदकत्वाश्रयत्वमत एव नाश्रयत्वं वाच्यम् । आश्रयत्वस्य वाच्यतावच्छेदकत्वे गौरवात् । तच्च कर्म द्विविधम् । ईप्सितमनीप्सितं च । तत्रेप्सितं त्रिविधम् । निर्वर्त्यं विकार्यं प्राप्यं च । अनीप्सितं तु चतुर्विधम् । औदासीन्येन प्राप्यं द्वेष्यं संज्ञान्तरैरनाख्यातम् अन्यपूर्वकं चेति । तत्र निर्वर्त्यं यथा । पूर्वमनुत्पन्नमेवोत्पद्यते सदवस्थात्वात्प्रकटीभवति । तत् विकार्यं तु द्विविधम् । प्रकृत्युच्छेदसम्भूतं गुणान्तरोत्पत्त्या वा । कटं करोतीत्यादि । कटं पूर्वमसन्तमुत्पादयतीत्यर्थः ॥ रूपं पश्यतीति प्राप्यम् । चाक्षुष इति । प्रशस्तचक्षुरस्यास्तीति चाक्षुषः । प्रशंसायां मत्वर्थीयोऽण् । शब्दं प्राप्नोतीति संस्कार्यं पृथगिच्छतीति संस्कार्यम् कर्म । सोमं सुनोतीति गुणान्तरोत्पत्त्या विकार्यम् । अन्यदप्युदाह्रियते । प्रकृत्युच्छेदसंभूतविकार्यं यथा । प्रकृतेः प्रकृतिभूतस्यात्मनः उच्छेदसम्भूतम् । तद्यथा । काष्ठं भस्म करोति । औदासीन्यं तु तृणं स्पृशति द्वेष्यं तु विषं भुङ्क्ते । संज्ञान्तरैरनाख्याते यथा । गां दोग्धि पयः । अन्यपूर्वकं यथा । क्रूरमभिक्रुध्यति । अक्षान् दीव्यति । ईप्सितानीप्सितयोः शाब्दबोधस्त्वेक एव । ईप्सितत्वादेस्तत्र भानाभावात् । कटं करोति कारुकः इत्यस्य कटनिष्ठोत्पत्त्यनुकूल एककारुको भिन्नाश्रयको वर्तमानो व्यापारः ॥ विषं भुङ्क्ते इत्यत्र गलादधोदेशसंयोगस्यानुकूल एकाश्रयको व्यापारः । इत्यादावीप्सितानीप्सितयोरभानादेकरूप एव शाब्दबोधः । एवं च कर्मशब्दस्य यौगिकत्वादेव सिद्धे कर्मसंज्ञाविधायकानि नानासूत्राणि कृतानि । कर्मणि द्वितीयेत्यस्य फलनिरूपिताश्रये सर्वत्र द्वितीयायाः सिद्धत्वात् । असत्कार्यवादे तु निर्वर्त्यस्य कर्मकारकत्वाप्राप्तिः । तस्यासत्वादेव फलाश्रयत्वानुपपत्तेः । क्रियाजनकत्वाभावात्कारकत्वानुपपत्तेश्च । क्रियां कुर्वत् हि कारकमिति सिद्धान्तत्वात् ॥ ४ ॥

इति द्वितीया ॥

कर्तरि करणे च तृतीया ॥

भिन्नः शरेण रामेण रावणो लोकरावणः ।
कराग्रेण विदीर्णोऽपि वानरैर्युध्यते पुनः ॥ ५ ॥

(मु०) कर्तरि करणे च तृतीया ॥ क्रियां करोति स कर्ता । धातूपात्तव्या-

---

(क) स्वर्गकर्मकं शत्रुनिष्ठं यद्गमनं तदनुकूलो यन्निष्ठो व्यापारः सः श्रीहरिर्मे गतिरिति वाक्यार्थः एवं सर्ववाक्यार्थो बोध्यः ।

पाराश्रय इत्यर्थः । उक्तं च—"धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते" इति । व्यापाराश्रयः कर्तेत्युक्तम् । व्यापारो धातुवाच्य आश्रयस्तृतीयावाच्योऽनन्यलभ्यत्वात् । स त्रिविधः । स्वतन्त्रः प्रयोजकः कर्मकर्ता चेति(क) । क्रिया साध्यतेऽनेनेति साधनं क्रियासिद्ध्युपकारकमित्यर्थः । तदेव करणम्(ख) । अत्र तृतीयाया व्यापार आश्रयश्च पृथग् वाच्यौ । तत्र सर्वत्र प्रकृत्यर्थ आश्रयं अभेदेन संसर्गेण विशेषणम् । व्यापारस्तु भावनायां विशेषणं भवति(ग) । उक्तं च-"क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् । विवक्ष्यते यदा यत्र तत्तत्र करणं स्मृतम्(घ) ॥ १ ॥" तत्रानुक्ते कर्तरि करणे च तृतीया विभक्तिर्भवति । रामेण कर्त्रा शरेण करणेन रावणो भिन्नः । कीदृशः । लोकान् रावयतीति लोकरावणः । भिदेः कर्मणि क्तः । यद्यपि क्रियां प्रति कारकाणां विशेषणतैव तथापि कृदुक्तानां कारकाणां विशेष्यतैव ज्ञेया । सत्त्वप्रधानानि नामानीत्युक्तत्वात् । रामनिष्ठो यो व्यापारो धनुराकर्षणादिस्तत्प्रेरितो यो बाणस्तदभिन्नाश्रयको यो व्यापारः शरीरभेदाना-

---

(क) **क्रियां करोतीति** । स्वातन्त्र्येणेति शेषः । तथा च पाणिनिः—'स्वतन्त्रः कर्ता' इति । अथ किमिदं स्वातन्त्र्यम् ? न तावत्पराप्रयोज्यत्वम्, प्रयोज्यकर्तुः कर्तृत्वानुपपत्तेः । अत्राहुः—'प्रधानीभूतधात्वर्थाश्रयत्वं स्वातन्त्र्यम्' इति । स्थाल्यादीनां वस्तुतः स्वातन्त्र्याभावेऽपि विवक्षातः स्थाली पचति काष्ठानि पचन्तीति प्रयोगः साधुरेव । तथोक्तं भट्टोजिना–क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात् । इति तस्य बीजम् ।

उक्तमिति । अयं सम्पूर्णश्लोकः—धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते ।
व्यापारे च प्रधानत्वात् स्वतन्त्र्य इति चोच्यते ।

व्यापाराश्रय इति । नैयायिकास्तु 'क्रियानुकूलकृतिमत्त्वं कर्तृत्वमिति वदन्ति । आस्तामन्यत्र विस्तरः । **त्रिविध इति** । यथा हरिः सेव्यतेऽत्र स्वतन्त्रः । तदभिन्नाश्रयको हरिकर्मकसेवानुकूलव्यापार इति शाब्दबोधः । कार्यते हरिणाऽत्र प्रयोजकः । हर्यभिन्नाश्रयक उत्पादनानुकूलो व्यापार इति शाब्दबोधः । गमयति कृष्णं गोकुलमत्र कर्मकर्ता । गोकुलकर्मकगमनानुकूलकृष्णाश्रयकव्यापारानुकूलो व्यापार इति शाब्दबोधः । व्यापाराश्रयः कर्ता फलाश्रयं कर्मेति सर्वत्रोह्यम् ।

(ख) साधकतमं करणमिति पाणिनिः । क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञं स्यात् । तमब्ग्रहणं किं ? गङ्गायां घोष इति भट्टोजिः । यद्व्यापारानन्तरं फलनिष्पत्तिस्तत्प्रकृष्टम् । तत् करणं बाह्याभ्यन्तरभेदेन द्विविधम् । बाह्यं शरीरादि । अभ्यन्तरं चित्तादि । सूत्रे—साधकतमश्च कारकान्तरासहकृतत्वे सति फलहेतुत्वम् । कारकान्तरव्यापारमनुत्पाद्य फलहेतुत्वमित्यर्थः । अन्ये तु—व्यापारवत्कारणं करणमिति । व्यापारत्वं च तज्जन्यत्वे सति तज्जन्यजनकत्वमिति । ननु 'चक्षुषा घटं पश्यति' इत्यादौ विषयेन्द्रियसन्निकर्षरूपस्य व्यापारस्योभयनिष्ठत्वाद् यथा 'चक्षुषा' इत्यस्य व्यापारवत्त्वेन कारणत्वेन च करणे तृतीया भवति तथा घटस्यापि विषयविधया कारणत्वाद् व्यापारवत्त्वाच्च कथं न तृतीयेति चेन्न, करणलक्षणघटककारणपदस्य असाधारणकारणरूपार्थत्वात् । अथ वा तदभिन्नत्वे सतीति विशेषणदानेन तद्वारणसम्भवात् ।

(ग) **भावनायामिति** । ननु केयं भावनेति । अत्राहुः—'भावना नाम भवितुर्भवनानुकूलो भावयितुर्व्यापारविशेषः' इति । तथा हि—यजेतेत्यादावस्त्यंशद्वयं यजिः प्रत्ययश्च । प्रत्ययेऽप्यस्त्यंशद्वयम् ! आख्यातत्वं लिङ्त्वञ्च । तत्राख्यातत्वं सर्वलकारसाधारणम् । लिङ्त्वन्तु लिङ्येव । उभाभ्यामप्यंशाभ्यां भावनैवोच्यते । सा च शाब्दीत्वार्थीत्वभेदेन द्विधा विस्तरस्त्वन्यत्र द्रष्टव्यः ।

(घ) **क्रियाया इति** । विवक्ष्यत इत्यनेन 'स्थाली पचति' इत्यादौ स्थाल्यादीनामपि करणत्वमस्तीति सूचितम् । आह च—"वस्तुतस्तदनिर्देश्यं, न हि वस्तु व्यवस्थितम् । स्थाल्या पच्यत इत्येषा, विवक्षा दृश्यते यतः" इति ॥

विस्तत्साध्यप्राणवियोगाश्रयो रावण इत्यर्थः ॥ रावणं हन्ति । रावणो हन्यते । इत्यत्र तु क्रियाविशेष्यकः शाब्दबोधः । भावप्रधानमाख्यातमित्युक्तत्वात् । रावणनिष्ठो यः प्राणवियोगः शराभिन्नाश्रयशरीरभेदनादिव्यापारसाध्यसाधनानुकूलो रामनिष्ठधनुराकर्षणादिव्यापार इत्यर्थः । अनुक्ते कर्तरि किम् । हरिः करोति । पाचकः । कर्तरि वुण् । तद्धितोक्त शाब्दिकः । इकः प्रत्ययः । समासोक्ते कृतं विश्वं येन स कृतविश्वः ॥ अनुक्ते करणे किम् । जीवत्यनेनेति जीवनः । करणे युट् प्रत्ययः ॥ ५ ॥

इति तृतीया ॥

(त०) कर्तरि करणे चेति ॥ क्रियां करोतीति कर्ता धातूपात्तव्यापाराश्रयः । यदा यदीयो व्यापारो धातुनोपादीयते तदा स कर्ता । काष्ठानि पचन्ति । आ विक्लृत्तेः सम्यग्ज्वलन्तीत्यर्थः । अग्निः पचति । सम्यक्पाचयतीत्यर्थः । स्थाली पचति । स्वस्मिन्समावेशयतीत्यर्थः । तत्र व्यापारस्य धातुनैव लाभादाश्रयमात्रं तृतीयावाच्यम् । अनन्यलभ्यस्य शब्दार्थत्वात् । स च त्रिविधः । स्वतन्त्रः प्रयोजकः कर्मकर्ता चेति । तद्यथा । मया हरिः सेव्यते । कार्यते हरिणा । गमयति कृष्णं गोकुलम् । मदभिन्नाश्रयको हरिकर्मकसेवानुकूलव्यापारः । हर्यभिन्नाश्रयक उत्पादनानुकूलो व्यापारः । गोकुलकर्मकगमनानुकूलकृष्णाश्रयकव्यापारानुकूलो व्यापार इति शाब्दबोधः । क्रिया साध्यतेऽनेनेति साधनं क्रियासिद्ध्युपकारकम् । तदेव करणं व्यापारवत्कारककरणमविलम्बेन क्रियोत्पादनं वा । तत्र तृतीया । तस्याश्च व्यापार आश्रयश्च पृथक्पृथग् वाच्यौ ॥ भिन्नः शरेणेत्यादि ॥ एकरामाश्रयको यो व्यापारस्तत्प्रेरितो यः शरस्तदभिन्नाश्रयको यो व्यापारः संयोगभेदनादिः तत्साध्यो यः प्राणवियोगस्तदाश्रयो रावण इत्यर्थः ॥ ५ ॥

इति तृतीया ॥

दानपात्रे चतुर्थी ॥ वेदविदे गां ददाति ॥ ६ ॥

(मु०) दानपात्रे चतुर्थी । दीयते इति तद्दानम् । कर्मणि युट् । दानस्य पात्रं दानपात्रं दानयोग्यमित्यर्थः । "योग्यभाजनयोः पात्रम्" इत्यमरः ॥ अस्य संप्रदान संज्ञा । सम्यक्प्रदीयतेऽस्मै तत्संप्रदानम्(क) । अपुनर्ग्रहणाय स्वस्वत्वनिवृत्तिपूर्वकं यत् परस्वत्वोत्पा

(क) सम्प्रदानमिति । तथा च पाणिनिः–'कर्मणा यमभिप्रैति स संप्रदानम्' । अयमर्थः—करणीभूतकर्मजन्यफलभागित्वेनोद्देश्यत्वं सम्प्रदानत्वम् । स्वस्वत्वध्वंससपूर्वकपरस्वोत्वोत्पत्त्यवच्छिन्नत्यागस्य दानपदार्थत्वात् । अथ वा उद्देश्यगतस्वामित्वसम्पादकत्यागस्य दानपदार्थत्वात् । वेदविदे गां ददातीत्यत्र वेदविदुद्देश्यकं यद्गोवृत्तिस्वत्वं गोनिरूपितस्वामित्वं वा तज्जनको यस्त्यागस्तदनुकूलकृतिमानिति शब्दबोधः वैयाकरणमते तु–वेदविदुद्देश्यको गोनिष्ठो यः स्वस्वत्वत्यागस्तदनुकूल एकाश्रयको वर्तमानव्यापार इति । तत्कारणं त्रिविधम् । अनिराकर्तृ । प्रेरकम् । अनुमन्तृ चेति । तत्रानिराकर्तृ यथा-आदित्यायार्घ्यं ददाति । प्रेरकं यथा-विप्राय गां ददाति । मह्यं गां ददातु प्रेरितो ददातीत्यर्थः । अनुमन्तृ यथा–गुरवे गां ददाति । गुरुर्हि न प्रार्थयते दीयमानं तामनुमन्ते भद्रं कृतमिति । तदुक्तं हरिणा—

'अनिराकरणात्कर्तुस्त्यागं यत् कर्मणेप्सितम् । प्रेरणानुमतिभ्याञ्च लभते सम्प्रदानताम् ।' इति ॥

अथात्र दानसम्बन्धे किञ्चित्प्राचां वचनम्—

"न विद्यया केवलया तपसा वापि पात्रता । यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्तितम् ॥
सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे । अधीते शतसाहस्रमनन्तं वेदपारगे ॥
पूजानुग्रहकाभ्यामिः स्वद्रव्यस्य परार्पणम् । दानं तस्यार्पणस्थानं सम्प्रदानं प्रकीर्तितम् ॥

दुर्मं तद्दानम् । अत एव रजकस्य वस्त्रं ददातीत्यादौ न चतुर्थी । रजकस्येति संबन्धे षष्ठी । श्रोत्रियाय कन्यां ददातीत्यादौ चतुर्थी न स्यात् स्वत्वत्यागाभावात् । उच्यते । स्वस्य भावः स्वत्वम् आत्मत्वम् आत्मीयत्वं ज्ञातित्वं धनत्वं च । आत्मत्वात्मीयत्वयोस्त्यागो नास्तीति ज्ञातित्वस्य त्यागोऽस्ति । परगोत्रप्रवेशाद्धनत्वस्य च त्यागः । अतोऽत्र परस्व- स्वत्यापादानरूपं मुख्यं दानम् । तत्र दानपात्रे अनुक्ते संप्रदाने कारके चतुर्थी स्यात्। वेदं वेत्तीति वेदवित्तस्मै वेदविदे चैत्रो गां ददाति । अत्र चतुर्थ्या उद्देश्योऽर्थः । वेदविदु- द्देश्यकः गोनिष्ठस्वत्वत्यागानुकूल एककर्तृको वर्तमानो व्यापारः ॥ अनुक्ते किम् । दानी- यो विप्रः । दीयतेऽस्मै इति दानीयो विप्रः । बाहुलकात्संप्रदाने अनीयप्रत्ययः ॥ ६ ॥

(त०) दानपात्रे चतुर्थी ॥ दीयते इति दानम् । कर्मणि युट् , दानस्य पात्रं योग्यमित्यर्थः । "योग्यभाजनयोः पात्रम्" इत्यमरः ॥ वेदविदे गां ददाति । वेदविदुद्दे- श्यको गोनिष्ठो यः स्वत्वत्यागस्तदनुकूल एकाश्रयको वर्तमानव्यापार इत्यर्थः ॥ तथा च स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वापादनं दानम् । खण्डिकोपाध्यायस्तस्मै चपेटां ददातीत्या- दौ तु उद्देश्यकत्वाच्चतुर्थी । श्रोत्रियाय कन्यां ददातीत्यत्र स्वात्मतात्मीयतयोरत्यागेऽपि- परगोत्रत्वेन ज्ञातित्वस्यैव त्यागादिति वृद्धाः । परस्वत्वापादनरूपस्य दानस्य च सत्त्वा- त् । स्वस्य भावः स्वत्वं स्वशब्दस्यार्थचतुष्टये आत्मात्मीयज्ञातिधनरूपे वृत्तेः ॥ ६ ॥

(क्रियया यमाप्नोति तत्रापि चतुर्थी) पत्ये शेते ॥ ७ ॥

(सु०) क्रियया यमाप्नोति तत्रापि चतुर्थी ॥ क्रियया कर्ता यमाप्नोति संबन्धाद् यमभिप्रैति तत्र चतुर्थी स्यात् ॥ पत्ये शेते । शयनक्रियया पतिमभिप्रैति तदा- भिमुख्येन शेते इत्यर्थः ॥ राज्ञे करं ददाति । दानक्रियया राजानमभिप्रैति तदाभिमुख्येन ददातीत्यर्थः ॥ इति चतुर्थी ॥ ७ ॥

(त०) पत्ये शेत इति । पत्युद्देश्यकशयनानुकूल एकाश्रयको व्यापारः ॥ ७ ॥

इति चतुर्थी ॥

विश्लेषावधौ पञ्चमी ॥ विश्लेषो विभागस्तस्यावधौ पञ्चमी ॥ हिमवतोऽवतरति गङ्गा । धावतोऽश्वादपतत् ॥ ८ ॥

(सु०) विश्लेषावधौ पञ्चमी ॥ श्लेषणं श्लेषः संयोगः । विगतो विरुद्धो वा श्लेषो विश्लेषो विभागः । अवधीयते एकरूपतया ज्ञायते सोऽवधिः । विश्लेषस्यावधिर्वि- श्लेषावधिस्तस्मिन् विश्लेषावधौ ॥ अस्यापादानसंज्ञा (क) । उक्तं च हरिणा । "अपा-

गुरुदेवद्विजातीनां भावशुद्ध्या कृतं हि यत् । ध्यानावनतिदानैश्च पूजामाननमुच्यते ॥
विरूपोन्मत्तनिःस्वानामकुत्सापूर्वकं हि यत् । पूरणं दानमन्नाद्यमनुग्रह उदाहृतः ॥
यत्किञ्चित्फलमुद्दिश्य दानयज्ञजपादिकम् । क्रियते कायिकं यच्च तत्काम्येति प्रकीर्तितम् ॥
दानपात्रं सम्प्रदानं त्रिधा तच्च निरूपितम् । देहीति प्रेरणात्किंचित् प्रेरकं याचको यथा ॥
महत्त्वाद्याचते नैव भक्त्या ददन्तु मन्यते । अनुमन्तृकमेतत्स्याद् गुणवानतिथिर्यथा ॥
न स्वीकरोति माहात्म्यान्न निराकुरुते तथा । अनिराकर्तृकं तत्स्याद्यथा चैत्यः कृपानिधिः ॥" इति ।

(क) उक्तं हि पाणिनिना—'ध्रुवमपायेऽपादानम्' अपाये विभागाश्रये यद्ध्रुवं विभागजनकक्रिया- शून्यं तदपादानकारकं भवतीत्यर्थः । नैयायिकैस्तु—परकीयक्रियाजन्यविभागाश्रयत्वमपादानत्वमिति प्रोच्यते । तच्चापादानं त्रिविधम् । उक्तं च हरिणा—

ये यदुदासीनं चलं वा यदि वाऽचलम् । ध्रुवमेवातदावेशात्तदपादानमुच्यते ।" अपाये विश्लेषे साध्ये सति ध्रुवमवधिभूतं कारकमतदावेशात् विश्लेषजनकक्रियानावेशादपादानमुच्यते। कीदृशम् । चलमचलमुदासीनं वेत्यर्थः । तत्रानुक्ते अपादानकारके पञ्चमी स्यात् । अत्र प्रकृत्यर्थः पञ्चम्यर्थेऽवधावभेदेन संसर्गेण विशेषणं प्रत्ययार्थोऽवधिस्तु क्रियायां विशेषणं भवति कारकाणां क्रिययैव संबन्धात् । हिमवतः पर्वताद्गङ्गाऽवतरति । अत्रावतरणविशिष्टाया गङ्गाया विश्लेषावधिभूता हिमवान् । हिमवदभिन्नावधिकनिःसरणानुकूलो गङ्गाभिन्नाश्रयको वर्तमानो व्यापारः ॥ धावतोऽश्वाच्चैत्रः पतति । पतनक्रियाविशिष्टस्य चैत्रस्य विश्लेषावधिरश्वः । शीघ्रगत्यनुकूलव्यापाराश्रयोऽश्वस्तदभिन्नावधिकं चैत्रनिष्ठं पतनमित्यर्थः ॥ अनुक्ते किम् । उपाध्यायो विप्रः । उप समीपेऽधीतेऽस्मादित्यपादाने घञ् ॥ ८ ॥

इति पञ्चमी ॥

(त०) विश्लेषेति ॥ श्लेषणं श्लेषः संयोगः विगतः श्लेषो विश्लेषः ॥ फलितार्थमाह—विभाग इति ॥ अवधाविति ॥ अवधीयते एकरूपतया ज्ञायते सोऽवधिः । प्रकृतधातूपात्तगत्याद्यनाश्रयत्वे सति तज्जन्यविभागाश्रयः ॥ हिमवत इति ॥ हिमवदभिन्नावधिकनिःसरणपूर्वकः अवतरणानुकूलगङ्गाऽभिन्नाश्रयको वर्तमानो व्यापारः ॥ धावत इति ॥ शीघ्रगत्यनुकूलो यो व्यापारस्तदाश्रयो योऽश्वस्तदवधिकोऽधोदेशसंयोगानुकूल एकाश्रयकोऽतीतो व्यापारः । इह क्रियाविशिष्टस्याप्यश्वस्य प्रकृतधातूपात्तक्रियां प्रत्यवधित्वं न विरुध्यते । तथा परस्परात् मेषावपसरत इत्यत्र सृधातुना गतिद्वयस्याप्युपादानादेकमेषनिष्ठां गतिं प्रत्यपरस्य विश्लेषावधित्वमस्त्येव । मेषावधिको यः उत्तरदेशसंयोगस्तदनुकूलो मेषाभिन्नाश्रयको वर्तमानो व्यापारः। पर्वतात्पततोऽश्वात्पतति चैत्रः । पर्वताभिन्नावधिकोऽधोदेशसंयोगानुकूलो यो व्यापारस्तदाश्रयो योऽश्वस्तदवधिकोऽधोदेशसंयोगानुकूलएकचैत्राभिन्नाश्रयको वर्तमानो व्यापारः । विश्लेषश्च कश्चिन्मानसोऽपि कश्चिदव्याहृतक्रियापेक्षयाऽपि । अधर्माज्जुगुप्सते । स्वार्थाद्धीयत इत्यादौ मानसाधर्मविश्लेषाव्याहृतनिःसरणक्रियापेक्षया विश्लेषयोरवधित्वस्य सत्त्वात् ॥ इति पञ्चमी ॥ ८ ॥

सम्बन्धे षष्ठी ॥ राज्ञः पुरुषः(क) ॥ ९ ॥

(मु०) संबन्धे षष्ठी ॥ विशेष्यविशेषणविश्लिष्टः संबन्धः । आह च । एतौ सं-

---

'निर्दिष्टविषयं किञ्चिदुपात्तविषयं तथा । अपेक्षितक्रियं चेति त्रिधापादानमुच्यते ॥'

यत्रोपात्तधातुनाऽपायलक्षणः संज्ञाविषयो निर्दिश्यते तन्निर्दिष्टविषयम् । यथा—'विद्यालयादागच्छति । यत्र धातुर्धात्वन्तरार्थाङ्गं स्वार्थमाह तदुपात्तविषयम् । यथा—'बलाहकाद् विद्योतते विद्युत् । यत्र क्रिया न श्रूयते प्रमाणान्तरेण तु प्रतीयते तदपेक्षितक्रियम् । यथा—आगच्छन्तं दण्डिनं प्रत्यक्षेण पश्यन्नाह—। 'कुतो दण्डी' इति । सोपि तदेव प्रत्यक्षमागमनमुपजीवन्नाह—'मथुरायाः' इति ॥ अत्रायमाशयः—विश्लेषद्विधा । शाब्दो मानसश्च । आद्यो 'हिमवतोऽवतरति गङ्गा' । द्वितीयः—अधर्माज्जुगुप्सते विरमति प्रमाद्यति वा । अत्र संश्लेषकविश्लेषाभावान्मानसः । तत एव पञ्चमी तन्त्रान्तरे तु जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्' इति वार्त्तिकं कृत्वोदाहृतम्—पापाज्जुगुप्सते । विरमति । प्रमाद्यति' इति । एवं सर्वत्र पञ्चम्यनेनैव यथासम्भवं मृग्या । सर्वत्रात्र बुद्धिकल्पनातो विश्लेषोऽस्तीति विश्लेषावधावेव पञ्चमी सिद्धेति न तदर्थं यत्नान्तरं कृतं सूत्रकृतेति माधवः ।

(क) सम्बन्धे षष्ठीति । कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव । सतां गतम् । सर्पिषो जानीते । एधोदकस्योपस्कुरुते । भजे शम्भोश्चरणयोः । फलानां तृप्तः ।

बद्धौ इति प्रतीतिजनकः संबन्धः । समानार्थो न नियतज्ञानाभावात् । स संबन्धो द्विविधः । क्रियाकारकसंबन्धो द्रव्यगुणसंबन्धश्चेति । क्रियाकारकसंबन्धोऽपि द्विविधः । विशेषः सामान्यं चेति । तत्र विशेषे कर्मकत्वादिरूपे संबन्धे विहिता अपवादभूता द्वितीयाद्या विभक्तः । सामान्यसंबन्धे तु षष्ठी । उक्तं च । "संबन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः । श्रुतायामश्रुतायां च क्रियायां सोऽभिधीयते" ॥ नटस्य शृणोति । माषाणामश्नाति । नटसंबन्धिश्रवणानुकूल एककर्तृको व्यापारः । माषसंबन्धिभोजनानुकूल एककर्तृको व्यापारः । विशेषविवक्षायां तु नटेन गीतं शृणोति । माषानश्नातीति ॥ द्रव्यगुणसंबन्धो यथा । राज्ञः पुरुषः । अत्र सेव्यसेवकरूपः ॥ राज्ञः पुत्रः । अत्र पितृपुत्ररूपः ॥ तन्तूनां पटः । अवयवावयविरूपः ॥ पटस्य रूपम् । गुणगुणिरूपः ॥ माषाणां राशिः । समूहसमूहिरूपः ॥ कुरूणां राजा । पाल्यपालकरूपः ॥ चैत्रस्य वाहनम् । वाह्यवाहकरूपः ॥ शब्दस्यार्थः । अत्र वाच्यवाचकरूपः ॥ चक्षुषो विषयो रूपम् । अत्र बोध्यबोधकरूपः ॥ अग्नेर्धूमः । अत्र व्याप्यव्यापकरूपः । पटस्याभावः । अत्र प्रतियोग्यनुयोगिरूपः ॥ उपगोरपत्यम् । अत्रापत्यापत्यवद्रूपः ॥ कुशूलस्यान्नम् । अत्राधाराधेयरूपः । इत्यादि ॥ ननु सम्बन्धस्योभयनिष्ठत्वात् कस्मात्षष्ठी । उच्यते । विशेषणात्षष्ठी भवति । उक्तं च । "भेद्यभेदकयोः श्लिष्टः संबन्धोऽन्योन्यमीक्ष्यते । द्विष्ठो यद्यपि संबन्धः षष्ठ्युत्पत्तिस्तु भेदकात्" ॥ भेद्यभेदकयोः स्वरूपं यथा । "परार्थे स्वार्थनिक्षेपाद्प्रधानं विशेषणम् । विशेष्यं तु प्रधानं स्यात्स्वार्थस्यैव प्रकाशनात्" ॥ (क)ननु शुक्लः पट इत्यत्रापि विशेषणे षष्ठी स्यात् । मैवं वद । विशेषणस्याभेदविवक्षातो न षष्ठी । विशेषणस्य भेदविवक्षायां तु षष्ठी भवत्येव । उक्तं च । "नाम्नो द्विधैव संबन्धः सर्वथा क्वचिद्व्यवस्थितः । सामानाधिकरण्येन षष्ठ्या वापि क्वचिद्भवेत्" ॥ अत्र प्रकृत्यर्थः प्रत्ययार्थे संबन्धे विशेषणम् । प्रत्ययार्थः संबन्धस्तु पुरुषे विशेषणं भवति । राज्ञः पुरुषः । राजनिरूपितसेवकत्वसंबन्धवान्पुरुषः ॥ इति षष्ठी ॥ ९ ॥

(त०) सम्बन्धे षष्ठीति ॥ एतौ संबद्धाविति प्रतीतिजनकः संबन्धस्तत्र षष्ठीत्यर्थः । स च द्विविधः । क्रियाकारकसंबन्धद्रव्यगुणसंबन्धभेदात् । आद्यो द्विविधः । सामान्यं विशेषश्च । विशेषः कर्मत्वादिरूपः । तत्र द्वितीयादिरपवादः । सामान्ये षष्ठी । तद्यथा । नटस्य शृणोति । नटसंबन्धिश्रवणानुकूलो वर्तमानो व्यापारः । विशेषे तु नटेन गीतं शृणोति । नटाभिन्नाश्रयको यो व्यापारस्तत्साध्यगीताभिन्नाश्रयं यत् गानतानादि तदनुकूल एकाभिन्नाश्रयो वर्तमानो व्यापारः । अन्त्यं दर्शयति—राज्ञ इति ॥ राजसंबन्धवान् पुरुष इत्यर्थः । संबन्धश्चात्र सेव्यसेवकरूपः । एवमन्यत्राप्यूह्यम् ॥ नन्वत्र संबन्धस्योभयनिष्ठत्वात्कथं षष्ठी एकस्मात्कुतो वेति चेत्सत्यम् । विशेषणस्याप्रधानत्वेन ततः षष्ठी । राज्ञः पुरुष इत्यत्र प्रकृत्यर्थो विशेषणं पुरुषस्तु नामार्थमात्रनिष्ठ एव प्रतिपाद्यते न विशेषणत्वेन । यदा तु विशेषणत्वेन विवक्षितस्तदा षष्ठी भवत्येव । पुरुषस्य

(क) विशेषणात् षष्ठीति । राज्ञः पुरुष इत्यादौ क्रियायोगिनः पुरुषादयः प्रधानभूता राजादिभिरप्रधानभूतैर्विशिष्यन्त इति राज्ञ इत्यादौ षष्ठी । पुरुषादौ तु लिङ्गार्था प्रथमैव । यदा पुनः पुरुषो विशेषणं तदा पुरुषस्य राजेत्येव । यदा चोभावपि अप्रधानत्वेन विवक्ष्येते तदोभाभ्यामपि षष्ठ्येव । यथा— राज्ञः पुरुषस्य वस्त्रमिति ।

राजेति । यथा । "परार्थं स्वार्थनिक्षेपादप्रधानं विशेषणम् । विशेष्यं तु प्रधानं स्यात्स्वार्थस्यैव प्रकाशनात्" इति ॥ शुक्लः पट इत्यत्र तु अभेदविवक्षणान्न षष्ठी । भेदविवक्षायामेव षष्ठीति विधानात्। राहोः शिर इत्यत्र तु सतोऽप्यभेदस्याविवक्षा ॥ यथाऽनुदरा कन्येति । भेदवतो वस्तुनः असतोऽप्यभेदस्य विवक्षा यथा । समुद्रः कुण्डिका । जलाधिक्यात्कुण्डिकायां समुद्रत्वम् । अगस्त्यापेक्षया समुद्रस्यापि कुण्डिकात्वम् । इति षष्ठी ॥९॥

आधारे सप्तमी ॥ औपश्लेषिकः सामीपिकाऽभिव्यापको वैषयिको नैमित्तिक औपचारिकश्चेति षोढा सः ॥

कटे शेते कुमारोऽसौ वटे गावः सुशेरते ।
तिलेषु विद्यते तैलं हृदि ब्रह्मामृतं परम् ॥
युद्धे संनह्यते धीरोऽङ्गुल्यग्रे करिणां शतम् ॥ १० ॥

(मु०) **आधारे सप्तमी** ॥ आध्रियन्ते क्रिया अस्मिन्नित्याधारः । संज्ञायामकर्तरि चेत्यधिकरणे घञ् । अधिकरणमित्यर्थः (क) । स आधारः षड्विधाः अस्येति षोढा। अन्यत्र सिद्धयोराधाराधेययोः प्रादेशिकः सम्बन्ध उपश्लेषः । उप उपरि श्लेषः उपश्लेषः

(क) उक्तं च पाणिनिना—'आधारोऽधिकरणम्' इति । कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणसंज्ञः स्यात् ।, कर्तृकर्मान्यतरद्वारा क्रियाश्रयत्वे सति तत्क्रियोपकारकत्वमधिकरणत्वमिति नैयायिकाः। उपकारकत्वं तु निष्पादकत्वम् ॥ तेन पीठे स्थित्वा गृहे स्थाल्यामोदनं पचतीत्यत्र सप्तम्यर्थोऽधिकरणत्वम् । कर्तृप्रभृतिष्वतिव्याप्तिवारणाय सत्यन्तम् । गेहस्य तु पाकक्रियाश्रयत्वं तदुपकारकत्वञ्च कर्तृद्वारा । स्थाल्यास्त्वोदनरूपकर्मद्वारा । क्रियाश्रयत्वं तदुपकारकत्वञ्चेति बोध्यम् । पीठस्य तु स्थितिक्रियापेक्षयेति निष्कर्ष इति कृष्णः । **षड्विध इति** । केचित्तु त्रैविध्यं मन्यन्ते आधारस्य ॥ आधारत्रितयपक्षे सामीपिकनैमित्तिकौपचारिकानामौपश्लेषिकेऽन्तर्गतिः । तदुक्तम्—

"कर्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियाम् । उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम् ।
आधारस्त्रिविधो ज्ञेयः कटाकाशतिलेषु च । निमित्तादिप्रभेदाच्च षड्विधः कैश्चिदिष्यते" ॥
अत्र "कैश्चिदिष्यते" इति वचनात् षड्विधपक्षस्यापि नाप्रामाण्यम् । इति ॥

औपश्लेषिक इति । आधाराधेययोरभिव्याप्य वृत्तिसम्बन्ध उपश्लेषः । तत्र भव औपश्लेषिकः । यथा—'कटे शेते' इति मूलम् । कटाभिन्नाधारको निद्रानुकूल एककुमाराभिन्नाश्रयको वर्तमानो व्यापारः । **सामीपिक इति** । समीपः सान्निध्यं संयुक्तसंयोगात्मकत्वम् , तत्र भवः सामीपिकः । यथा—'वटे गाव' इति मूलम् । एकवटाभिन्नाधारकनिद्रानुकूलो बहुगोऽभिन्नाश्रयकवर्तमानो व्यापारः । **अभिव्यापक इति** । पृथग्देशयोराधाराधेययोः । सर्वावयवसम्बन्धिकोऽभिव्यापकः । यथा—'तिलेष्विति' मूलम् । बहुतिलाभिन्नाधारक आत्मधारणानुकूल एकतैलाभिन्नाश्रयको वर्तमानो व्यापारः। **वैषयिक इति** । आप्राप्तिरूपसंयोगसमवायातिरिक्तसम्बन्धेन यदधिकरणं तद् वैषयिकम् । यथा—'हृदि ब्रह्मेति' मूलम् । हृदयाभिन्नाधारक आत्मधारणानुकूलः स्फुरणानुकूलो वा एकब्रह्माभिन्नाश्रयको वर्त्तमानोव्यापारः । **नैमित्तिक इति** । निमित्तं हेतुस्तत्र भवं नैमित्तिकं निमित्तं फलं तदस्यास्तीति वा नैमित्तिकः । यथा—'युद्धे सन्नह्यते धीरः" इति मूलम् । कवचसन्नहनस्य युद्धफलकत्वात् तन्निमित्तम् । युद्धाभिन्नाधारकः कवचबन्धनानुकूल एकधीराभिन्नाश्रयको वर्त्तमानो व्यापारः । औपचारिक इति । उपचारो नामारोपः । तत्र भव औपचारिकः । यथा—'अङ्गुल्यग्रे करिणां शतमिति' मूलम् । अङ्गुल्यग्राभिन्नाधारक आत्मधारणानुकूलः करिसम्बन्धिशताभिन्नाश्रयको वर्तमानो व्यापारः । करिभूम्योराधाराधेयभावोऽङ्गुल्यग्रे आरोप्यत इति बोध्यम् ।

उपश्लेषोऽस्यास्तीति उपश्लेषो भव इति वा औपश्लेषिकः । 'अइकौ च मत्वर्थे' इतीकः। णितो वेति णित्वाद्वृद्धिः । भवार्थे इको वा ॥ सामीप्यं सांनिध्यम् । सामीप्ये भवः सामीप्यमस्यास्तीति वा सामीपिकः । केनेयेका इतीकः । अइकौ चेति वा इकः ॥ अभिप्रदेशयोराधाराधेययोः सर्वावयवसंबन्धिकः अभिव्यापकः । अभितः सर्वतो व्याप्यते आधेयेनेत्यभिव्यापकः । कर्मणि घञ् । ततः स्वार्थे कः ॥ अन्यत्र भावो विषयः । विषये भवो वैषयिकः । केनेयेका इति इकः ॥ निमित्तं हेतुः । निमित्ते भवो नैमित्तिकः । केनेयेका इति इकः । निमित्तं फलं तदस्यास्तीति वा अइकौ चेतीकः ॥ अन्यत्र विद्यमानस्य सम्बन्धस्यान्यत्रारोपः उपचारः । उपचारे भव औपचारिकः । केनेयेका इतीकः । उपचारोऽस्याऽस्तीति वा । अइकौ चेतीकः ॥ अत्राधिकरणे कारके सप्तमी स्यात् । अत्र सप्तम्या आश्रयोऽर्थः । प्रकृत्यर्थस्त्वभेदेन संसर्गेणाश्रये विशेषणम् । आश्रयस्तु क्रियायां विशेषणं भवति । कारकाणां क्रिययैवान्वयात् । उक्तं च । "आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा । यथायथं विभक्त्यर्थाः सुपां कर्मेति वाक्यतः" ॥ १ ॥ कर्मणि द्वितीया । कर्तृसाधनयोस्तृतीया । आधारे सप्तमी । नामाश्रयाऽर्थो निरूप्यभेदाभेदः । अवधिः पञ्चम्यर्थः । उद्देश्यः चतुर्थ्यर्थः । सम्बन्धः षष्ठ्यर्थः । शक्तिः प्रथमार्थः । यथासंख्यं षण्णामुदाहरणान्याह । असौ कुमारः कटे शेते । गावः वटे सुशेरते स्वपन्ति । तैलं तिलेषु विद्यते । हृदि अमृतं सुखरूपं परमुत्तमं निरुपाधिकं ब्रह्म वर्तते । हृदयब्रह्मणोः प्रकाश्यप्रकाशकरूपः सम्बन्धः । धीरः संनह्यते युद्धे कवचबन्धनस्य युद्धफलकत्वात्तन्निमित्तम् ॥ करिणां शतमङ्गुल्यग्रे वर्तते । करिभूम्योराधाराधेयरूपः सम्बन्धः अङ्गुल्यग्रे आरोप्यते ॥१०॥

(त०) आधारे सप्तमीति ॥ आध्रियते क्रियाऽस्मिन् इत्याधारः । कर्तृकर्मद्वारा क्रियाधारत्वं न तु (क)साक्षात् । आधारस्य षड्विधत्वमाह—औपश्लेषिक इत्यादि ॥ उप उपश्लेषः संयोगः सोऽस्यास्तीति अइकावितीकः । णितो वेति णित्वाद्वृद्धिः ॥ समीपे भवः सामीपिकः केनेयेका इतीकः । अभितः सर्वतो व्याप्यते आधेयैरिति अभिपूर्वादाप्नोतेः कर्मणि घञन्तात्स्वार्थे कः ॥ अपृथग्देशयोराधाराधेययोः सर्वावयवसम्बन्धिकः ॥ विषयः प्रकाशनसामर्थ्यं तदस्यास्तीति पूर्ववत्प्रक्रिया ॥ निमित्तं हेतुस्तत्र भवः फलं वा तदस्यास्तीति वा पूर्ववत् ॥ अन्यत्र विद्यमानस्य सम्बन्धस्यान्यत्रारोप उपचारः। तत्र भवः सोऽस्यास्तीति वौपचारिकः ॥ निमित्तप्रभेदाच्च 'षड्विधः कैश्चिदिष्यते' इति (ख)वचनादस्य पक्षस्यापि प्रामाण्यम् । उदाहरणान्याह । कटे शेते कुमारोऽसौ । एककटाभिन्नाधारको निद्रानुकूल एककुमारभिन्नाश्रयकवर्तमानो व्यापारः ॥ वटे गावः सुशेरते । एकवटाभिन्नाधारकनिद्रानुकूलो बहुगोऽभिन्नाश्रयकवर्तमानो व्यापारः ॥ तिलेषु विद्यते तैलम् । बहुतिलाभिन्नाधारक आत्मधारणानुकूल एकतैलाभिन्नाश्रयको वर्तमानो व्यापारः । हृदि ब्रह्मामृतं परं विद्यते इति योज्यम् । हृदयभिन्नाधारक आत्मधारणानुकूलः स्फुरणानुकूलो वा एकब्रह्माभिन्नाश्रयको वर्तमानो व्यापारः । अमृतं सुखरूपं मरणशून्यं वा । परमुत्तमम् उपाधिशून्यमित्यर्थः । द्वयमपि ब्रह्मविशेषणम् । प्रकाश्यतासम्बन्धेन

(क) अस्य विशेषसमालोचना उपर्युक्ताधारलक्षणव्याख्याटिप्पण्यां कृता ।

(ख) 'कैश्चिदिष्यते' इति सम्पूर्णश्लोकः प्रागुक्तः ।

ब्रह्म मनसि वर्तते(क) ॥ युद्धे सन्नह्यते धीरः । युद्धाभिन्नाधारकः कवचबन्धनानुकूलः एकधीराभिन्नाश्रयको वर्तमानो व्यापारः । कवचबन्धनस्य युद्धफलकत्वात्तन्निमित्तम् ॥ अङ्गुल्यग्रे करिणां शतम् । विद्यते इत्यस्यानुषङ्गः । अङ्गुल्यग्राभिन्नाधारक आत्मधारणानुकूलः करिसंबन्धिशताभिन्नाश्रयको वर्तमानो व्यापारः । करिभूम्योराधाराधेयभावोऽङ्गुल्यग्रे आरोप्यते ॥ औपश्लेषिकत्वादिकं तु शाब्दबोधे न भासते अन्यपदोच्चारणाननुभासते गौर्वाहीक इत्यत्रोपसर्जनत्ववत् ॥ १० ॥

(क्रियालक्षणं भावस्तत्रापि सप्तमी) वर्षति देवे चोर आयातः ॥ गोषु दुह्यमानासु गतः ॥ ११ ॥

(म०) क्रियालक्षणं भावस्तत्रापि सप्तमी ॥ भवनं भावः क्रिया प्रसिद्धैव ग्राह्या व्याख्यानात् । भावोऽस्ति यस्मिन् स भावः । मत्वर्थीयोऽप्रत्ययः । प्रसिद्धक्रियावानित्यर्थः । प्रसिद्धक्रियावांस्तु सापेक्षत्वादप्रसिद्धक्रियावन्तं संलक्ष्यैव भवति । अत आह । क्रियालक्षणम् । क्रियायां प्रसिद्धं क्रियाया लक्षणं चिह्नम् । निराश्रयायाः क्रियाया असंभवादाश्रय आक्षिप्यते । अप्रसिद्धक्रियावतो लक्षणमित्यर्थः । लक्षणरूपा प्रसिद्धा लक्षणया वा प्रसिद्धैव संभवति प्रसिद्धया अप्रसिद्धायाः साधनौचित्यात् । लक्ष्यलक्षणभावसंबन्धे षष्ठ्यां प्राप्तायां सप्तमी विधीयते । अप्रसिद्धक्रियावल्लक्षणे प्रसिद्धक्रियावति कर्तरि कर्मणि च सप्तमी स्यादित्यर्थः ॥ कर्तर्युदाहरणमाह–देवे मेघे वर्षति सति चोर आयातः । अत्र देवनिष्ठा प्रसिद्धा क्रिया सा चोरनिष्ठामसिद्धां क्रियां लक्षयति वर्षतीत्यत्र लक्षणहेत्वोः क्रियाया इति सूत्रेण कर्तरि शतृप्रत्ययः । कर्ता च देवः अतस्तयोः सामानाधिकरण्यात् सप्तमी ॥ कर्मण्युदाहरणमाह । गोषु दुह्यमानासु सतीषु चोरो गतः । दुह्यमानास्वित्यत्र कर्मणि यक् ॥

इति सप्तमी ॥ ११ ॥

(त०) क्रियालक्षणं भाव इति ॥ भवनं भावः क्रिया । भावोऽस्यास्तीति मत्वर्थीयोऽप्रत्ययः । लक्ष्यत इति लक्षणम् । क्रियायां लक्षणं क्रियालक्षणं बोधकमिति यावत् । अप्रसिद्धक्रियाबोधिका या प्रसिद्धक्रिया तद्वतः सप्तमीत्यर्थः ॥ वर्षतीत्यादि ॥ देवाभिन्नाश्रयिका या वर्षणक्रिया तयोपलक्षितभूतं यदागमनं तदाश्रयश्चोर इत्यर्थः । इतोऽन्यार्थे द्वितीयादिसिद्ध्यर्थं शेषा इत्यस्य योगविभागः कार्यः ॥

इति सप्तमी ॥

(विनासहनमस्तेर्निर्द्धारणस्वाम्यादिभिश्च) एतैर्योगे द्वितीयाद्या विभक्तयः ॥ विनादियोगे द्वितीया । विना पापं सर्वं फलति । अन्तरेणाक्षिणी किं जीवितेन । अन्तरा त्वां मां हरिः । जपमनु प्रावर्षत् । अनु हरिं सुराः भक्तो हरिमभि । उपहरिं सुराः । नदीमन्ववसिता सेना ।

(क) ब्रह्मेति । 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद् ब्रह्म' इति, 'सत्यं ज्ञानमानन्दं ब्रह्म' इत्यादिश्रुत्या च जगत्कारणभूतं सत्यरूपं ज्ञानरूपमानन्दरूपं ब्रह्म ॥ ननु 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' 'अवाङ्मनसगोचरम्' इत्यादिनानुपपन्नं ब्रह्मणो मनोगोचरत्वमित्यत आह—प्रकाश्यतासम्बन्धेनेति । वस्तुतस्तु मनसि वर्तत इति भाक्तप्रयोगः ।

अति देवान् कृष्णः । अभितो ग्रामम् । सर्वतो नगरम् । धिग् जाल्मम् । उपर्युपरि पर्वतम् । अध्यधि लोकम् । अध्यधि सुखम् । अधोऽधो ग्रामम् । उभयत कृष्णम् ॥ एवं परितःसमयानिकषाहाप्रतिपरियोगेपि ॥ १२ ॥

(७०) अथोपपदविभक्तिमाह-**विनासहनमस्कृतेनिर्द्धारणस्वाम्यादिभिश्च** ॥ विना च सहश्च नमश्च ऋते च निर्द्धारणं च स्वामी च ते विनासहनमस्कृतेनिर्द्धारणस्वामिनः ते आदयो येषां ते विनासहनमस्कृतेनिर्द्धारणस्वाम्यादयस्तैर्विनासहनमस्कृतेनिर्द्धारणस्वाम्यादिभिः । 'द्वन्द्वान्ते श्रूयमाणः प्रत्येकं संबध्यते' इत्यादिशब्दः प्रत्येकं योज्यः । शेषा इत्यनुवर्तते । शेषा द्वितीयाद्या विभक्तयो यथाक्रममेषां योगे भवन्ति ॥ विनादियोगे द्वितीया । पापं विना सर्वं फलति । पापस्याभावे सर्वं कर्म फलप्रदं भवतीत्यर्थः ॥ अक्षिणी अन्तरेण । नेत्रयोरभावे चक्षुषी विना इत्यर्थः ॥ अन्तरेणेति निपातो मध्यार्थकोऽपि यथा । "मृणालसूत्रामलमन्तरेण स्थितश्चलच्चामरयोर्द्वयं सः" (क) इत्यत्र चलच्चामरयोर्द्वयस्य मध्ये स्थित इत्यर्थः ॥ अन्तरा त्वां मां तव मम च मध्ये इत्यर्थः । योगे इति किम् । अन्तरा त्वां मां हरेर्मूर्तिः । अत्र हरिशब्दान्न द्वितीया अन्तराशब्देनान्वयाभावात् ॥ हेतुसहहीनार्थकानुयोगे द्वितीया । यथा । जपमनु मेघः प्रावर्षत् । हेतुभूतजपोपलक्षितं वर्षणमित्यर्थः । हेतौ तृतीयाबाधिका द्वितीयाऽत्र ॥ नदीमनु नद्या सह सेना अवसिता । संबद्धेत्यर्थः(ख) । षिञ् बन्धने । अस्मात् क्तः । षष्ठीबाधिका द्वितीयाऽत्र ॥ अनुहरिं सुराः हरेर्हीना इत्यर्थः(ग) ॥ भक्तो हरिमभि हरिमभिवर्तत इत्यर्थः ॥ उत्कृष्टादेव द्वितीया नापकृष्टात् । शक्तिस्वभावात् ॥ हीनार्थकोपयोगे द्वितीया यथा । उपहरिं सुराः हरेर्हीना इत्यर्थः । अत्राप्युत्कृष्टादेव द्वितीया नापकृष्टात् ॥ अतिक्रमणपूजार्थकातियोगे द्वितीया यथा । उचितादधिकस्यानुष्ठानमतिक्रमणम् । अतिदेवान् कृष्णः । देवानतिक्रान्तो देवानां पूज्यश्चेत्यर्थः । अभितो ग्रामं ग्रामस्य पार्श्वद्वये इत्यर्थः ॥ सर्वतो ग्रामं ग्रामस्य समन्तादित्यर्थः ॥ जाल्मं मूर्खं धिक् तस्य निन्दनेत्यर्थः ॥ उपर्युपरि पर्वतम् । पर्वतस्योर्ध्वमित्यर्थः ॥ अध्यधि दुःखं सुखस्योपरिष्टात्समीपकाले दुःखमित्यर्थः ॥ अधोऽधो ग्रामं ग्रामस्याधस्तात् समीपदेशे इत्यर्थः ॥ उभयतः कृष्णम् । कृष्णस्य पार्श्वद्वये इत्यर्थः ॥ परितः सर्वत इत्यर्थः ॥ समया-निकषा-निपातौ समीपार्थकौ । "विलङ्घ्य लङ्कां निकषा हनिष्यति" इति माघः(घ) ॥ हा मूर्खम् । तस्य शोच्यतेत्यर्थः ॥ 'बुभुक्षितं न प्रतिभाति किंचित् ।' बुभुक्षितस्य पुरुषस्य किंचित् प्रतिभाति नेत्यर्थः ॥ १२ ॥

(क) सम्पूर्णश्लोकोऽयम्—

'मृणालसूत्रामलमन्तरेण स्थितश्चलच्चामरयोर्द्वयं सः ।
भेजेऽभितः पातुकसिद्धसिन्धोरभूतपूर्वां रुचमम्बुराशेः' ॥ तृ० स० श्लो० ३ ॥

(ख) नदीप्रतियोगिकसाहित्यसम्बन्धविशिष्टा सेनेत्यर्थः ।

(ग) हरेर्हीनेति । स्वावधिकापकर्षरूपहीनत्वसंम्बन्धोऽनुद्योत्यो द्वितीयाविभक्तेरर्थः ।

(घ) सम्पूर्णश्लोको यथा—

'स्मरत्यदो दाशरथिर्भवन् भवानमुं वनान्तादवनितापहारिणम् ।
पयोधिमाबद्धचलज्जलाविलं विलङ्घ्य लङ्कां निकषा हनिष्यति' ॥ इति ॥ प्र० स० श्लो० ६८॥

(त०) कारकविभक्तिं दर्शयित्वोपपदविभक्तिं दर्शयति–विनासहेत्यादि ॥ विना च सहश्च नमश्च ऋते च निर्द्धारणं च स्वामी च ते आद्यो येषामिति द्वन्द्वगर्भो बहुव्रीहिः । द्वन्द्वान्ते श्रूयमाणत्वादादिशब्दः प्रत्येकं संबध्यते । द्वितीयादीनां चात्र यथाक्रममन्वयः ॥ **विनावियोगे इति** ॥ **विना पापमिति** । पापसंबन्धाभावे सर्वं कर्म फलप्रदं भवतीत्यर्थः । द्वितीयाद्या उपपदविभक्तयः षष्ठ्यपवादाः ॥ **जपमनु इति**॥ हेतुभूतजपोपलक्षितमतीतकालमेकाश्रयकं वर्षणमित्यर्थः ॥ **उपहरिमिति** ॥ हरेर्हीना इत्यर्थः ॥ **नदीमिति**॥ नद्या सह संबद्धेत्यर्थः । षिञ् बन्धने क्तः ॥ **अतिदेवानिति** ॥ देवानां पूज्य इत्यर्थः॥ **अभित इति** ॥ उभयत इत्यर्थः ॥ **धिगिति** ॥ निर्भर्त्सननिन्दयोः ॥ **उपरीति** ॥ पर्वतस्योपरिष्टात्समीपे देश इत्यर्थः ॥ **अधीति** ॥ सुखस्योपरिष्टात्समीपकाले दुःखमित्यर्थः॥ **अध इति** ॥ ग्रामस्याधस्तात्समीपदेश इत्यर्थः ॥ १२ ॥

(कालाध्वनोर्नैरन्तर्ये) मासमधीते । क्रोशं पर्वतः । मासं गुडधानाः । मासं कल्याणी । क्रोशं कुटिला नदी ॥ नैरन्तर्ये किम् । मासस्य द्विरधीते । क्रोशस्यैकदेशे पर्वतः(क) ॥ १३ ॥

(सु०) कालाध्वनोर्नैरन्तर्ये ॥ कालश्च अध्वा च कालाध्वानौ तयोः कालाध्वनोः । निर्गतमन्तरं यस्मात्तत् निरन्तरं निरन्तरस्य भावो नैरन्तर्यं तस्मिन्नैरन्तर्ये । क्रियागुणद्रव्यैः सह कालाध्वनोर्निरन्तरसंबन्धे कालाध्ववाचकाद् द्वितीया स्यात् ॥ मासमधीते । निरन्तरा मासस्याध्ययनक्रियेत्यर्थः ॥ क्रोशं पर्वतः । निरन्तरः क्रोशस्य पर्वत इत्यर्थः ॥ मासं गुडधानाः । निरन्तरा मासस्य गुडेन मिश्रा धानाः गुडधानाः । "धाना भृष्टयवे स्त्रियाम्" इत्यमरः ॥ मासं कल्याणी । निरन्तरा मासस्य शोभनगुणवती ॥ क्रोशमधीते । निरन्तरा क्रोशस्याध्ययनक्रिया ॥ क्रोशं कुटिला नदी । निरन्तरा क्रोशस्य वक्रा नदी ॥ **लक्षणेत्थंभूताख्यानभागवीप्सार्थकानां प्रतिपर्यनूनां योगे द्वितीया ।** लक्षणे यथा । वृक्षं प्रति पर्यनु वा विद्योतते विद्युत् ॥ लक्ष्यलक्षणभावसंबन्धं प्रत्यादयो द्योतयन्त्यत्र(ख) ॥ इत्थंभूताख्याने । भक्तो विष्णुं प्रति पर्यनु वा । विष्णोर्भक्तश्च विषयविषयिभावसंबन्धं प्रत्यादयो द्योतयन्त्यत्र । भक्तः कृष्णस्य कंचित्प्रकारं भक्तत्वं प्राप्त इत्यर्थः (ग) । भागे यथा । लक्ष्मीः कृष्णं प्रति पर्यनु वा । लक्ष्मीरूपस्य भागस्य कृष्णेन सह स्वस्वामिसंबन्धः । तं प्रत्यादयो द्योतयन्त्यत्र । कृष्णस्य भाग इत्यर्थः(घ) ॥ वीप्सायाम् । वृक्षं प्रति पर्यनु वा वृक्षं वृक्षमित्यर्थः ॥ लक्षणेत्थंभूताख्यानवीप्सार्थकाभियोगे

(क) **कालाध्वनेति** । येन कालेन अध्वना वा गुणक्रियाद्रव्यैरभावे चावयवानतिरेकेण निरन्तरसन्निकर्षस्तद्वृत्तिभ्यामेव सम्बन्धेन द्वितीयेत्यर्थः । तेन मासं शयनाभाव इत्यपि सेत्स्यति । **मासमिति** । मासपदेन सावयवत्रिंशद्दिनसमूहः कथ्यते । द्वितीयाया अर्थो व्यापकत्वम् ।

(ख) **वृक्ष प्रतीति** । वृक्षसम्बन्धिद्योतनमर्थः । सम्बन्धश्च लक्ष्यलक्षणभावः । वृक्षप्रकाशेन हि तत्समीपदेशविशेषावच्छिन्ना विद्युद्बोध्यत इति वृक्षो लक्षणम् ।

(ग) **इत्थं भूतेति** । इत्थं किञ्चित्प्रकारं भूतः प्राप्त इति इत्थम्भूतः । इत्थंभूत आख्यायतेऽनेनेतीत्थं भूताख्यानम् ।

(घ) **कृष्णस्य भाग इति** । कृष्णस्वामिकेति बोधः ॥ अथ वा–स्वनिष्ठस्वामित्वनिरूपितस्वत्वसम्बन्धेन कृष्णविशिष्टा लक्ष्मीरिति ।

द्वितीया ॥ लक्षणे यथा । हरिमभि वर्तते मुक्तिः । हरिं लक्षयित्वेत्यर्थः । लक्ष्यलक्षणभाव-सम्बन्धोऽत्र । इत्थंभूताख्याने । भक्तो हरिमभि । विषयविषयिभावसंबन्धोऽत्र । हरेः कंचित्प्रकारं भक्तत्वं प्राप्त इत्यर्थः ॥ वीप्सायाम् । देवमभिनमति । देवंदेवमित्यर्थः ॥ पृथग्नानादक्षिणेन उत्तरेण इत्यादियोगेऽपि द्वितीया ॥ १३ ॥

(त०) कालाध्वनोरिति ॥ कालश्च अध्वा च कालाध्वनौ तयोः । निर्गतमन्तरं यस्मात्तन्निरन्तरम् । तस्य भावः नैरन्तर्यं तस्मिन् । क्रियागुणद्रव्यैः कालाध्वनोः निरन्तरं संबन्धे कालाध्वभ्यां द्वितीया ॥ मासमिति ॥ निरन्तरं माससंबन्धी एकाश्रयोऽध्ययनानुकूलो व्यापारः ॥ मासं कल्याणीति ॥ अव्यवच्छिन्नमाससंबन्धिशोभनगुणवती ॥ मासं गुडेति ॥ अव्यवच्छिन्नमाससंबन्धी इत्यर्थः ॥ १३ ॥

(अधिपूर्वाणां शीङ्स्थाऽऽसामाधारः कर्म) अधिशेते अधितिष्ठति अध्यास्ते वा वैकुण्ठं हरिः (क) ॥ १४ ॥

(सु०) अधिपूर्वाणां शीङ्स्थाऽऽसामाधारः कर्म ॥ शीङ् स्वप्ने । ष्ठा गतिनिवृत्तौ । आस उपवेशने । अधिपूर्वकाणामेषामाधारः कर्मसंज्ञकः स्यादनुक्ते कर्मणि द्वितीयेत्यर्थः ॥ १४ ॥

(त०) अधिशेते इत्यादि ॥ अत्र त्रयाणां फलं स्थितिः । अवस्थानजन्यवैकुण्ठनिष्ठसंयोगानुकूल एकहर्यभिन्नाश्रयको वर्तमानो व्यापारः ॥ १४ ॥

(अभिनिपूर्वस्य विशः) अभिनिविशते सन्मार्गम् (ख) ॥ १५ ॥

(सु०) अभिनिपूर्वस्य विशः ॥ द्वन्द्वेऽल्पस्वरप्रधानेतिनेः पूर्वनिपाते कर्तव्ये विपरीतोच्चारणमीदृशसङ्घातविवक्षार्थम् । अभिनीत्येतत्सङ्घातपूर्वस्य 'विश प्रवेशने' इत्यस्याधारः कर्मसंज्ञकः स्यात् ॥ १५ ॥

(त०) अभिनि इति ॥ नेरल्पस्वरत्वेन पूर्वनिपाते कर्तव्ये विपरीतोच्चारणमीदृशसमुदायविवक्षार्थम् । तेनेह न । "निविशते यदि शूकशिखा पदे" इति(ग) ॥ अभिनिविशत इति । अभिनिवेशजन्यसन्मार्गाभिन्नाश्रयः सम्बन्धस्तदनुकूल एकाभिन्नाश्रयको वर्तमानो व्यापारः ॥ १५ ॥

(उपान्वध्याङ्पूर्वस्य वसः) उपवसति अनुवसति अधिवसति आवसति वा वैकुण्ठं हरिः (घ) ॥ १६ ॥

(सु०) उपान्वध्याङ्पूर्वस्य वसः ॥ उपादिपूर्वस्य वसेराधारः कर्मसंज्ञकः स्यात्

(क) अधिपूर्वाणामिति । अधिकरणसंज्ञापवादोऽयम् । अधिस्तु सप्तम्यर्थस्याधारस्य द्योतकः । वैकुण्ठे शेते तिष्ठत्यास्ते वेत्यर्थः ।

(ख) अभिनिविशते सन्मार्गमिति । आग्रहवानित्यर्थः । अप्रतिहतप्रवृत्तिमानिति यावत् ।

(ग) सम्पूर्णश्लोको यथा—

'निविशते यदि शूकशिखा पदे सृजति सा कियतीमिव न व्यथाम् ।
मृदुतनोर्वितनोतु कथं न तामवनिभृत्तु निविश्य हृदि स्थितः ॥' इति । नै० तु ।

(घ) उपान्विति । उप-अनु-अधि-आङ्-इत्येतेषां द्वन्द्वः । उपवसतीति । वैकुण्ठे वसतीत्यर्थः । उपसर्गा आधारत्वद्योतकाः ।

लुग्विकरणाऽलुग्विकरणयोरलुग्विकरणस्यैव ग्रहणमिति न्यायात् 'वस निवासे' इति भौवादिक एव गृह्यते न तु 'वस आच्छादने' इत्यादिकः ॥ १६ ॥

(त०) उपवसतीत्यादि ॥ वैकुण्ठाभिन्नाश्रयको वासजन्यो यः संयोगस्तदनुकूल एकहर्यभिन्नाश्रयको वर्तमानो व्यापारः ॥ १६ ॥

(**नाभुक्त्यर्थस्य**) वने उपवसति । इत्यादि(क) ॥ १७ ॥

(सु०) **नाभुक्त्यर्थस्य** ॥ भोजननिवृत्तिवाचकस्य वसेराधारः कर्मसंज्ञो न ॥ उपवसति उपवासं करोतीत्यर्थः ॥ इति पुनरपि द्वितीया ॥ १७ ॥

(**सहादियोगे तृतीया**) सह शिष्येणागतो गुरुः ॥ एवं साकं सार्द्धं समंयोगेऽपि(ख) ॥ १८ ॥

(सु०) **सहादियोगे तृतीया** ॥ सहार्थकशब्दस्य योगे तृतीया विभक्तिर्भवति ॥ गुरुः शिष्येण सहागतः । गुरोरागमनक्रियया शाब्दः सम्बन्धः शिष्यस्य त्वार्थः सम्बन्धः । अत एव शिष्यस्याप्राधान्यम् । षष्ठ्या बाधिकेयम् ॥ ननु सम्बन्धे तृतीया । सम्बन्धश्चोभयनिष्ठोऽत उभाभ्यां तृतीया स्यात् । मैवं वद । यस्मात्षष्ठी प्राप्ता तस्मादेव तृतीया । षष्ठी चाप्रधानाद्विहिता । ततस्तृतीयाऽप्यप्रधानादेव भवति । उत्सर्गसमानदेशा अपवादा भवन्तीत्युक्तत्वात् । सहार्थविवक्षायां विनापि सहार्थप्रयोगं तृतीया भवति । त्वमहं सिनेत्यादिनिर्देशात् । एवं साकं सार्द्धं समं अमा पृथक् विना नाना इत्यादियोगेऽपि तृतीया ॥ १८ ॥

(त०) सहादियोग इति ॥ शिष्येण सहेति ॥ गुरौ तु न तृतीया तस्य प्रधानत्वात् । अथाप्रधाने तृतीयेति चेत् कथं गुरुणा सहागतः शिष्य इत्यत्र सा । गुरोः प्रधानत्वादिति चेत् सत्यम् । न ह्यत्र लौकिकं प्राधान्यं किन्तु शाब्दम् । तच्च शब्दप्रतिपादित-

---

(क) ननु 'एकादशीमुपवसन्ति निरम्बुभक्ष्याः' इत्यादौ भोजननिवृत्तिवाचकस्योपपूर्वस्य वसतेः राधारस्य कथं कर्मसंज्ञेति चेदुच्यते, केवलभोजननिवृत्तिवाचकस्य वसतेराधारस्य कर्मसंज्ञा न स्यात् । प्रकृष्टार्थकभोजननिवृत्तिवाचकस्य वसतेराधारस्य कर्मसंज्ञा स्यादेवेति नात्राशङ्कावसरः ।

(ख) **सहादियोग इति** । अत्र माधवः । ननु क्रियागुणद्रव्यैर्द्वयोः सम्बन्धे सति सहशब्दप्रयोग इति द्वयोः सम्बन्धाविशेषात्कथं गुरोर्न तृतीया । उच्यते । नाममात्रापेक्षयाऽन्तरङ्गयाऽन्यांऽऽप्रथमया बाधितत्वात् । एवं च क्रियादिभिः प्रागभिसम्बन्धादप्रधानादन्तरङ्गया तत्तद्विभक्त्या व्याप्तविषया तृतीय प्रागेव सहार्थेन सम्बन्धादप्रधानादेव भवति । यस्य हि साक्षात् क्रियादिना सम्बन्धः शब्दवाच्यस्तस्य प्राधान्यं यस्य तु सहार्थान्यथानुपपत्त्या प्रतीयमानस्तस्याप्राधान्यमिति विवेक्तव्यम् । 'सहागतौ गुरुशिष्यौ' इत्यादौ तु द्वयोः क्रियादियोगेऽन्तरङ्गा प्रथमा, पश्चात् सहयोगेऽपि न निवर्त्तते । ग्रामं न गच्छतीत्यादौ पश्चान्नञ्योगे द्वितीयावत् । ननु शिष्येण सहागतो गुरुरित्यत्र शिष्यस्यापि सहार्थसामर्थ्यात् प्रतीयमानकर्तृत्वमस्त्येवेति कर्तृकरणयोरित्यत्र तृतीया सेत्स्यतीति किमत्र सहग्रहणेन, न चात्राप्यन्योक्ते प्रथमा स्यादिति वाच्यम्, मुख्यस्य गुरोरेव कर्त्तुः क्तादिभिरभिधानाद् गौणस्य त्वन्योक्तत्वात् । उच्यते । इह तर्हि शिष्येण समागमनं गुरोरित्यत्र कर्तृकार्म्ययोरिति शिष्यादपि षष्ठी स्यात् । तथा तिलैः सह माषान् वपतीति तिलानामपि कर्मत्वप्रतीतेर्द्वितीया स्यात् । तथा शिष्येण सह स्थूलो गोमांश्चेति द्रव्यगुणसम्बन्धप्रतिपादनतात्पर्य्यक्रियागन्धस्यैवाऽभावात् कर्तृगन्धोऽपि नास्तीति तृतीया न स्यात् । किञ्च मित्रः शरेण रामेणेत्यादौ मुख्ये कर्त्तरि सम्भवति गौणमुख्यन्यायेन शिष्येण सहागतो गुरुरित्यत्र गौणे कर्त्तरि तृतीया न स्यादित्यपि सहग्रहणमत्र कर्त्तव्यमिति यत्किञ्चिदेतत् ।

क्रियात्वम् । अर्थलब्धक्रियात्वमप्राधान्यम् । तच्च यदा यस्य तदा तस्यैव प्राधान्याप्राधान्ये ॥ शिष्येण सहागतो गुरुरित्यत्रागमने शिष्यस्यापि कर्तृत्वमन्यथा साहित्यं न स्यात् इति कर्तृसाधनयोरित्येव तृतीया किमनेनेति, चेत्सत्यम् । शिष्येण सहागमनं गुरोरित्यत्र शिष्यादपि कर्तृकार्ययोरिति षष्ठी प्राप्ता तदपवादार्थमिदमिति गृहाण । सहार्थविवक्षायां सहादिप्रयोगाभावेऽपि तृतीया सिनेत्यादिनिर्देशात् ॥ १८ ॥

येनाङ्गविकारः ॥ येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते ततस्तृतीया ॥ अक्ष्णा काणः ॥ अङ्गविकारः । किम् । अक्षि काणमस्य(क)॥१९॥

(सु०) **येनाङ्गविकारः** ॥ अङ्गमस्यास्तीति सोऽङ्गः । अस्त्यर्थेऽप्रत्ययः । अङ्गीत्यर्थः ॥ अङ्गस्याङ्गिनो विकार अङ्गविकारः । अक्ष्णा काणः । अक्ष्णः काणत्ववि शिष्ट इत्यर्थः ॥ १९ ॥

(त) **अङ्गिन** इति ॥ अङ्गमस्यास्तीति सोऽङ्गी तस्येत्यर्थः ॥ १९ ॥

(कश्चित्प्रकारं प्राप्तस्य लक्षणे) जटाभिस्तापसः ॥ २० ॥

(सु०) **कश्चित्प्रकारं प्राप्तस्य लक्षणे** ।। सामान्यस्य भेदको विशेषः प्रकारः । स लक्ष्यतेऽनेनेति लक्षणं चिह्नम् । कश्चित्प्रकारं प्राप्तस्य लक्षणे तृतीया स्यात् ॥ जटाभिस्तापसः । जटाज्ञाप्यतापसत्वविशिष्टः(ख) । जटाभिर्ज्ञाप्यं यत्तापसत्वं तद्विशिष्ट इत्यर्थः । इह जटानां लक्षणत्वम् । तेन लक्ष्यलक्षणभावः सम्बन्धोऽत्र ॥ २० ॥

(त०) **जटाभिरिति** ॥ जटाज्ञाप्यतापसत्वविशिष्ट इत्यर्थः । लक्षणे किम् । अस्य जटाः ॥ २० ॥

(प्रकृत्यादिभ्यश्च) प्रकृत्या चारुः। प्रायेण याज्ञिकः। गोत्रेण गार्ग्यः। समेनैति। विषमेणैति। द्विद्रोणेन धान्यं क्रीणाति। सुखेन दुःखेन याति(ग) ॥२१॥

(क) **येनेति** । येनेत्यनेन प्रकृत्यर्थभूतमङ्गं परामृश्यते। न ह्यविकृतेन अङ्गेन अङ्गिनो विकारः सम्भवति । तदाह-येनाङ्गेनेत्यादिना । **अक्ष्णा काण इति** । काणशब्दः काणत्ववति वर्तते । तृतीयार्थः सम्बन्धः । अक्षिसम्बन्धिकाणत्वविशिष्ट इत्यर्थः । सम्बन्धश्च विकारप्रयुक्तत्वरूपः । अक्षिविकारप्रयुक्तकाणत्ववानिति यावत् । यद्यपि एकमाक्षिविकलं काणमित्युच्यते, तथापि अवयवधर्मस्य शरीरे तदवच्छिन्नात्मनि व्यवहारो निरूढः । द्वौ विप्राविति वत् अक्ष्णेति पदस्य प्रयोगः सामर्थ्यः ।

(ख) **जटाज्ञाप्येति** । न च ज्ञाने करणत्वादेव तृतीया सिद्धेति वाच्यम् , करणत्वाविवक्षायां लक्ष्यलक्षणभावमात्रविवक्षायां तृतीयार्थत्वात् ।

(ग) **प्रकृत्येति** । तृतीयार्थः सम्बन्धः । प्रकृतिः स्वभावः, तत् सम्बन्धिचारुत्ववानित्यर्थः । यदा तु स्वभावेनैवायमभिरूपो नत्वलङ्कारादिनेति करणान्तरव्युदासाय प्रकृतेः करणत्वं विवक्ष्यते तदा कर्तृकरणयोरित्येव सिद्धमिति भाष्यम् । **प्रायेणेति** । प्रायशब्दो बहुलवाची । बहुलाचारसम्बन्धियाज्ञिकत्ववानित्यर्थः । सम्बन्धश्च ज्ञाप्यज्ञापकभावः । **समेनैति विषमेणैति** । क्रियाविशेषणमेतत् । समं विषमं च गमनं करोतीत्यर्थः । कर्मणि द्वितीया प्राप्ताः, तद्बाधिकात्र तृतीयेति कश्चित् । समेन विषमेण वा पथा एतीत्यर्थे तु करणत्वादेव सिद्धमिति भाष्यम् । **सुखेनेति** । सुखजनकं यानं करोतीर्थः । क्रियाविशेषणम् । द्वितीया प्राप्ता, तद्बाधिका तृतीया । प्रकृत्यादीत्यादिपदात् नाम्ना सुतीक्ष्णः । नामसम्बन्धिसुतीक्ष्णत्ववानित्यर्थः । वह्नित्वेन वह्निं जानामीत्यत्र तु प्रकारत्वं तृतीयार्थः । वह्नित्वप्रकारकवह्निज्ञानवानस्मि इत्यर्थः । अत्रान्यत् किञ्चित् प्रस्तूयते—वा **सम्पूर्वजानातेः कर्म** । सम्पूर्वस्य जानातेः कर्म

(सु०) प्रकृत्यादिभ्यश्च ॥ प्रकृत्या स्वभावेन चारुरभिरूपः न स्वलंकारादिना । अत्र क्रियाया अश्रवणे कर्तृकरणत्वाभावात्षष्ठी प्राप्ता तद्बाधिका तृतीया ॥ प्रायेण बहुधा यज्ञं करोतीति याज्ञिकः ॥ गोत्रेण गार्ग्यः । गर्गगोत्रमस्येत्यर्थे । प्रातिपदिकार्थे प्रथमा प्राप्ता तद्बाधिका तृतीयाऽत्र ॥ समेन मार्गेण विषमेण मार्गेण स एति गच्छतीत्यर्थः । समविषमाभ्यां कर्मभ्यां द्वितीया प्राप्ता तद्बाधिका तृतीयाऽत्र ॥ द्वयोर्द्रोणयोः समाहारो द्विद्रोणम् । क्वचिन्नेति ङीत्वाभावः । द्विद्रोणपरिमितधान्यमूल्यवाचको द्विद्रोणशब्दः । द्रोणद्वयस्य द्रव्यस्य धान्यं क्रीणातीत्यर्थः॥ सुखेन दुःखेन याति। सुखं दुःखं यातीत्यर्थः॥ २१॥

(दिवः करणम्) कर्मसंज्ञं वा स्यात् ॥ अक्षैरक्षान्वा दीव्यति ॥२२॥

(सु०) दिवः करणम् ॥ दिवः करणस्य कर्मसंज्ञा वा स्यात् ॥ दिवु क्रीडादौ । अस्य करणं वा कर्म भवति । अक्षैः अक्षान् वा दीव्यति । किं च सकर्मकत्वादक्षैर्देव्यते देवदत्तो मैत्रेणेत्यत्र गतिबुद्धीत्यनेन ण्यावपि कर्तुः कर्मत्वं न ॥ २२ ॥

(तुल्यार्थयोगे) कृष्णेन तुल्यः । रामेण सदृशः ॥ २३ ॥

(सु०) तुल्यार्थयोगे ॥ तोलनं तुला तुलया संमितस्तुल्यः यप्रत्ययः । णितो वेति वृद्ध्यभावः । तुल्यार्थवाचकशब्दयोगे तृतीया वा स्यात् । पक्षे संबन्धे षष्ठी । तुलोपमाशब्दौ विना । उपमा तुला वा हरेर्नास्तीति । तुल्यः सदृशः समः कृष्णेन कृष्णस्य वा ॥ २३ ॥

(फलप्राप्तौ कालाध्वनोरत्यन्तसंयोगे तृतीया) अह्ना क्रोशेन वाऽनुवाकोऽधीतः ॥ फलप्राप्तौ किम् । मासमधीतो नायातः ॥२४॥

(सु०) फलप्राप्तौ कालाध्वनोरत्यन्तसंयोगे तृतीया ॥ अन्तं विराममतिक्रान्तोऽत्यन्तः । अत्यन्तश्चासौ संयोगश्चात्यन्तसंयोगस्तस्मिन् अत्यन्तसंयोगे । निरन्तरसंनिकर्षे कालाध्ववाचकाभ्यां तृतीया स्यात् फलप्राप्तौ सत्याम् । देवदत्तेनानुवाको ग्रन्थविशेषोऽह्ना दिनं यावन्निरन्तरं क्रोशेन एकक्रोशं यावन्निरन्तरं वाऽधीतः । कालाध्वनोरिति द्वितीयाबाधिकेयं तृतीया ॥ २४ ॥

(त०) फलेति ॥ फलप्राप्तौ किम् । मासमधीतो नायातः ॥ २४ ॥

(अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया) दास्या संयच्छते कामुकः । धर्म्ये तु भार्यायै संयच्छति(क) ॥ २५ ॥

(सु०) अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया ॥ निषिद्धाचारे

करणं वास्यात् । पितरं पित्रा वा संजानीते । 'यजतेः कर्मसम्प्रदाने' । यजेः प्रयोगे कर्मसम्प्रदाने करणकर्मणी स्याताम् । पशुना रुद्रं यजते । पशुं रुद्राय ददातीत्यर्थः ।

(क) अशिष्टेति । वैदिकमार्गानुयायिनश्शिष्टाः । वेदमार्गादपेता अशिष्टाः । तेषां व्यवहारः आचारः, तस्मिन् विषये दाणधातोः प्रयोगे सति चतुर्थ्यर्थे सम्प्रदाने तृतीया वाच्यत्यर्थः। दास्या संयच्छते कामुक इति । दास्यै कामुकः प्रयच्छतीत्यर्थः । कामुक इत्यनेन रत्यर्थमिति गम्यते। दास्यां रतिर्धर्मशास्त्रनिषिद्धत्वादशिष्टव्यवहार इति भावः । अशिष्टपदप्रयोजनमाह-धर्म्ये त्विति । धर्मादनपेत इत्यर्थः । न तृतीयेति शेषः ।

प्रतिपाद्ये दाणः प्रयोगे चतुर्थ्यर्थे तृतीया स्यात् ॥ दास्या संयच्छते कामी ॥ धर्म्ये तु भार्यायै संयच्छति ॥ इति पुनरपि तृतीया ॥ २५ ॥

(नम आदियोगे चतुर्थी) नमो नारायणाय ॥ एवं स्वस्तिस्वाहास्वधाऽलंवषड्योगे च ॥ २६ ॥

(सु०) **नम आदियोगे चतुर्थी** ॥ सम्बन्धसामान्ये षष्ठ्यां प्राप्तायां तद्बाधिका चतुर्थी ॥ नारायणाय हरये नमोऽस्तु ॥ प्रजाभ्यः स्वस्ति कल्याणम् ॥ अग्नये स्वाहा ॥ पितृभ्यः स्वधा ॥ अलमिति समर्थार्थस्य ग्रहणम्(क) । हरिर्दैत्येभ्योऽलं समर्थ इत्यर्थः ॥ इन्द्राय वषट् ॥ २६ ॥

(त०) **नमआदियोगे चतुर्थीति** ॥ नमस्करोति देवानित्यादौ तु उपपदविभक्तेरित्याद्युक्तमेव । स्वयंभुवे नमस्कृत्येत्यादौ तु स्वयंभुवमनुकूलयितुमित्यर्थे तुमोऽप्रयुक्तस्य कर्मणि चतुर्थी । एतच्च कार्यायेति सूत्रेण ज्ञापितम् । कार्यं विधातुमित्यर्थात् ॥ २६ ॥

(उपपदविभक्तेः कारकविभक्तिर्बलीयसीति) नमस्करोति देवान्(ख) ॥ २७ ॥

(सु०) ननु नमस्करोति देवानित्यत्र चतुर्थी स्यात् । नमः सम्बन्धसत्त्वादुच्यते— **उपपदविभक्तेः कारकविभक्तिर्बलीयसीति** ॥ उपपदं निमित्तं यस्याः सा उपपदनिमित्ता सा चासौ विभक्तिश्च उपपदविभक्तिः । शाकपार्थिवादित्वान्मध्यमपदलोपः । क्रियान्वयित्वं कारकत्वम् । कारकनिमित्ता विभक्तिर्बलीयसा बलिष्ठेत्यर्थः ॥ क्रियान्वयित्वाद्देवानित्यत्र द्वितीया ॥ २७ ॥

(त०) **उपपदविक्तेः कारकविभक्ति र्बलीयसीति** ॥ उप समीपे पदम् उपपदम् । उपपदं निमित्तं यस्याः सा उपपदनिमित्ता । सा चासौ विभक्तिश्च उपपदविभक्तिः । शाकपार्थिवादित्वात्तस्याः । तेन नमस्करोति देवानित्यत्र कर्मणि द्वितीयैव न चतुर्थी ॥२७॥

(प्रभ्वादियोगे षष्ठ्यपि) भोजनाय भोजनस्य वा प्रभुः समर्थः शक्तः ॥ कृष्णाय कृष्णस्य वा मद्रं भद्रं कुशलं सुखमायुष्यमर्थः प्रयोजनं वा भूयात् ॥ २८ ॥

(सु०) **प्रभ्वादियोगे षष्ठ्यपि** । प्रभ्वायुष्यमद्रभद्रकुशलसुखार्थहितार्थका प्रभ्वादयः । येषां योगे षष्ठीचतुर्थ्यौ भवतः । तत्रायुष्यादियोगे आशीर्वादेऽर्थ एव ॥ आशीर्वादे किम् । देवदत्तस्यायुष्यमस्ति ॥ २८ ॥

(क) **अलमिति** । न च 'अलं महीपाल तव श्रमेण' इत्यादौ चतुर्थी स्यादिति वाच्यम् । समर्थार्थकालंयोगस्य चतुर्थीप्रयोजकत्वात् । अत्र तु तदभावान्न चतुर्थी । करणतृतीयैव बोध्या । तथा च कौमुदी—"गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिकाः । अलं श्रमेण । श्रमेण साध्यं नास्तीत्यर्थः । इह साधनक्रियां प्रति श्रमः करणम्" इति ।

(ख) **नमस्करोतीति** । करशिरस्संयोगादिना तोषयतीत्यर्थः । करशिरस्संयोगादिमात्रार्थत्वे अकर्मकत्वापातात् ।

(रुच्यर्थधातुयोगे प्रीयमाणे) हरये रोचते भक्तिः(क) ॥२९॥

(सु०) रुच्यर्थधातुयोगे प्रीयमाणे ॥ रुचिर्दीप्तावपि । दीप्तिस्तत्र न विवक्षिता इत्यत उच्यते ; अन्यकर्तृकोऽभिलाषो रुचिः(ख) । रुचिरर्थो येषां ते रुच्यर्थाः । रुच्यर्थाश्च ते धातवश्च रुच्यर्थधातवस्तेषां योगः रुच्यर्थधातुयोगस्तस्मिन् । प्रीयते इति प्रीयमाणः । प्रीञ् तर्पणे । अस्मात् कर्मणि शानप्रत्ययः । तस्मिन् प्रीयमाणे चतुर्थी भवति ॥ हरिं प्रीणयतीत्यर्थे कर्मणि द्वितीयाप्राप्तौ चतुर्थी । हरिनिष्ठप्रीतेर्भक्तिः कर्त्री (ग) । भक्तिरात्मविषयमभिलाषं हरेरुत्पादयतीत्यर्थः ॥ प्रीयमाणे किम् । देवदत्ताय रोचते मोदकः पथि(घ) ॥ २९ ॥

(त०) हरय इति ॥ अन्यकर्तृकोऽभिलाषो रुचिः । हरिनिष्ठप्रतीतेर्भक्तिः कर्त्री । हरिं प्रीणयतीत्यर्थः । द्वितीयाप्राप्तौ वचनम् । शाब्दबोधस्त्वयम् । हर्षभिन्नाश्रयकप्रीत्यनुकूल एकसेवानिष्ठो वर्तमानो व्यापारः ॥ २९ ॥

(श्लाघह्नुङ्स्थाशपां प्रयोगे बोधयितुमिष्टे) गोपी कृष्णाय श्लाघते ह्नुते तिष्ठते शपते वा ॥ ३० ॥

(सु०) श्लाघह्नुङ्स्थाशपां प्रयोगे बोधयितुमिष्टे ॥ श्लाघृ कत्थने । ह्नुङ् अपनयने । ष्ठा गतिनिवृत्तौ । शप उपालम्भे । एषां प्रयोगे बोधयितुं ज्ञापयितुमिष्टे वाञ्छिते चतुर्थी स्यात् ॥ गोपी स्मरात्कन्दर्पात् कृष्णाय श्लाघते(ङ) । कृष्णं स्तौतीत्यर्थः ॥ सर्वत्र कर्मणि द्वितीयाप्राप्तौ चतुर्थी ॥ कृष्णाय ह्नुते । सपत्नीभ्यो ह्नुतमर्थं कृष्णं बोधयतीत्यर्थः । कृष्णाय तिष्ठते । स्थित्या स्वाभिप्रायं कृष्णं बोधयतीत्यर्थः । स्वाभिप्रायाविष्करणे निर्णेत्राख्यायामिति तिष्ठतेरात्मनेपदम् ॥ कृष्णाय शपते । उपालम्भेन स्वाभिप्रायं कृष्णं बोधयतीत्यर्थः ॥ ३० ॥

(त०) श्लाघह्नुङ् इति ॥ श्लाघत इति । श्लाघा स्तुतिः । कृष्णाय श्लाघते ।

(क) रुच्यर्थेति । 'रुच दीप्तावभिप्रीतौ च' । दीप्तिरिह न रुच्यर्थः, प्रीयमाण इति विरोधात् । प्रीयमाण इति । समवायेन प्रीत्याश्रय इत्यर्थः । हरये रोचत इति । भक्तिः स्वविषयां प्रीतिं हरौ जनयतीत्यर्थः । भक्तिगतव्यापारप्रयोज्यप्रीत्याश्रयत्वाद्धरेः कर्मत्वं प्राप्तम् । तदपवादोऽयम् ।

(ख) ननु हरिभक्तिमभिलषतीत्यत्रापि भक्तेः प्रीतिविषयत्वात् सम्प्रदानत्वं स्यात् । इत्यत आह—अन्यकर्तृक इति । समवायेन प्रीत्याश्रयापेक्षया यदन्यत् तत्कर्तृकाभिलाषः रुचधात्वर्थः । प्रीत्याश्रयकर्तृकः किञ्चिद्विषयक इच्छाविशेषोऽभिलाषः । तथाच—अभिलषतेः, रुच्यर्थकत्वाभावान्न तद्योगे सम्प्रदानत्वम् । प्रकृते च प्रीत्याश्रयो हरिः, तदपेक्षया यदन्यद्भक्तिः, तत्कर्तृकैव प्रीतिरिति रुच्यर्थयोगः ।

(ग) ननु भक्तेः सम्प्रदानत्वं कुतो न स्यात् । विषयतासम्बन्धेन भक्तेरपि प्रीत्याश्रयत्वात् । इत्यत आह—हरिनिष्ठप्रीतेरिति । हरेरेव समवायसम्बन्धेन प्रीत्याश्रयतया प्रीयमाणत्वाद् भक्तेः कर्त्र्या उक्तरीत्या प्रीयमाणत्वाभावाच्च न सम्प्रदानत्वमिति भावः । भक्तिर्हरिं प्रीणाति प्रीणयतीत्यादौ तु न भक्तेः सम्प्रदानत्वप्रसक्तिः । आख्यातेनोक्तत्वात् समवायेन प्रीत्याश्रयत्वाभावाच्च । नापि हरेः प्रीयमाणे इति कर्मणिशानप्रयोगबलेन प्रीधातुयोगे 'रुच्यर्थ' इत्यस्याप्रसक्तेर्विज्ञानात् । अन्यथा प्रीधातुकर्मणः सम्प्रदानत्वे कर्मणि शानस्य दौर्लभ्यात् ।

(घ) मोदकः पथीति । अत्र पथः प्रीयमाणत्वाभावान्न सम्प्रदानत्वमिति भावः ।

(ङ) गोपी स्मरादिति । मन्मथपीडावशात् गोपी आत्मस्तुत्या विरहवेदनां कृष्णं बोधयतीत्यर्थः ।

कृष्णं स्तौतीत्यर्थः ॥ कर्मत्वे प्राप्ते वचनमिदम् । अन्ये त्वाहुः । कृष्णाय आत्मानं परं वा श्लाघ्यं कथयतीत्यर्थः ॥ अस्मिंस्तु पक्षे शेषषष्ठ्यां प्राप्तायां वचनम् ॥ ह्नुत इति ॥ सपत्नीभ्यः कृष्णं ह्नुवाना तमेवार्थं कृष्णं बोधयतीत्यर्थः । यस्य कस्यचित् ह्नुतिं वा ॥ तिष्ठत इति ॥ स्थित्याऽभिप्रायं बोधयतीत्यर्थः । शाब्दबोधस्तु कृष्णोद्देश्यक आत्मभिन्नाश्रयकश्लाघ्यत्वादिबोधनानुकूल एकगोप्यभिन्नाश्रयको वर्तमानो व्यापारः । स्वाभिप्रायाविष्करणे निर्णयाख्यायामित्यात्मनेपदम् ॥ ३० ॥

(धारेरुत्तमर्णे) भक्ताय धारयति मोक्षं हरिः(क) ॥३१॥

(सु०) **धारेरुत्तमर्णे** ॥ धृङ् अवस्थाने । ण्यन्तः । धारयतेः प्रयोगे उत्तमर्णे चतुर्थी स्यात् ॥ उत्तमर्णो धनस्वामी । अत्रोत्तमर्णो भक्तः । हरिस्त्वधमर्णः । 'अधमर्णस्तु ग्राहकः' इति । भक्तेन पूर्वं भक्तिर्दत्ता तदर्थं हरिर्मोक्षं धारयति । धृङोऽकर्मकत्वात् गतिबुद्धीति सूत्रेणाण्यन्तावस्थायां कर्तुर्ण्यन्तावस्थायां कर्मत्वम् । अत्र च षष्ठीप्राप्तौ चतुर्थी विधीयते ॥ उत्तमर्णे किम् । देवदत्ताय शतं धारयति ग्रामे ॥ ३१ ॥

(त०) धारेरिति ॥ षष्ठीप्राप्तौ वचनम् ॥ भक्तायेति ॥ भक्तोद्देश्यकमोक्षकर्मकधारणानुकूल एकहर्यभिन्नाश्रयको वर्तमानो व्यापारः ॥ ३१ ॥

(स्पृहयतेरीप्सिते) पुष्पेभ्यः स्पृहयति ॥ ३२ ॥

(सु०) **स्पृहयतेरीप्सिते** ॥ स्पृहयतेः प्रयोग ईप्सिते वाञ्छिते चतुर्थी स्यात् ॥ स्पृह ईप्सायाम् । चुरादावदन्तः । कर्मणि द्वितीयाबाधिकेयम् । मैत्रः पुष्पेभ्यः स्पृहयति । पुष्पाणि स्पृहयतीत्यर्थः ॥ प्रकर्षविवक्षायां द्वितीयाऽपि ॥ ३२ ॥

(त०) **पुष्पेभ्यः स्पृहयति इति** ॥ पुष्पोद्देश्यकेच्छानुकूल एकाभिन्नाश्रयको वर्तमानो व्यापारः ॥ ३२ ॥

(क्रुधद्रुहेर्ष्यासूयार्थानाम्) यं प्रति कोपार्थादयस्तत्र ॥ हरये क्रुध्यति द्रुह्यति ईर्ष्यति असूयति इत्यादि(ख) ॥ ३३ ॥

(सु०) **क्रुधद्रुहेर्ष्यासूयार्थानाम्** ॥ क्रुधद्रुहेर्ष्यासूयार्थानां प्रयोगे यं प्रति कोपादयस्तत्र चतुर्थी ॥ क्रुध क्रोधे । द्रुह जिघांसायाम् । ईर्ष्य ईर्ष्यायाम् । असू येति कण्ड्वादियगन्तो धातुः । एषामर्थ इवार्थो येषां धातूनां तेषां प्रयोगे यं प्रति यस्मिन् कोपादयः क्रियन्ते तत्र चतुर्थी स्यात् ॥ क्रोधोऽमर्षः ॥ जिघांसाऽपकारः ॥ ईर्ष्या परसंपत्त्यसहनम् ॥ असूया गुणेषु दोषाविष्करणम् ॥ क्रुधद्रुहोरकर्मकत्वात् तद्योगे षष्ठीप्राप्तौ चतुर्थी । ईर्ष्यासूययोस्तु सकर्मकत्वात् द्वितीयाप्राप्तौ चतुर्थी । यं प्रति कोपादयः किम् । भार्यामीर्ष्यति ।

(क) **भक्तायेति** । भक्तसम्बन्धी यो मोक्षोऽपरिमितनित्यसुखविशेषस्तं धारयतीत्यर्थः । मोक्षो धरते । अवतिष्ठते इत्यर्थः । तं प्रेरयति, धारयति, अवस्थापयतीति यावत् । पूजयन् हि भक्तस्तुलसीदलादिद्रव्यं प्रयच्छति, तच्च गृह्णन् तुष्टो हरिस्तत्प्रत्तद्रव्यं मोक्षदानेन निष्क्रीणाति । तदाहुः पौराणिकाः—'तोयं वा पत्रं वा यद्वा किञ्चित् समर्पितं भक्त्या । तदृणं मत्वा देवो निःश्रेयसमेव निष्क्रयं मनुते । इत्यादि । तथा च—अत्र भक्तस्य ऋणदातृत्वेन उत्तमर्णत्वात् सम्प्रदानत्वं सम्बन्धषष्ठ्यपवादः ।

(ख) अस्य सूत्रस्यापवादोऽयम्, 'क्रुधद्रुहोरुपसृष्टयोः कर्म' । सोपसर्गयोरनयोर्योगे यं प्रति कोपः तत्कारकं कर्मसंज्ञं स्यात (हरिं) क्रूरमभिक्रुध्यति । अभिद्रुह्यतीत्यादि ।

मैनामन्याऽद्राक्षीदिति हेतोः(क) ॥ **चतुर्थी बलिहितसुखरक्षितैः** ॥ एभिर्योगे चतुर्थी स्यात् ॥ बलिः पूजापहारकः । ब्राह्मणाय बलिः हितं सुखं रक्षितं वा । चशब्दादन्येऽप्यनुक्तप्रयोगा ज्ञेयाः(ख) ॥ इति पुनरपि चतुर्थी ॥ ३३ ॥

(त०) **क्रुधद्रुह** इति ॥ क्रुध क्रोधे । द्रुह द्रोहे । ईर्ष्य ईर्ष्यायाम् । असूयेति कण्ड्वादियगन्तः । एषामर्थ इवार्थो येषां धातूनामित्यर्थः । तत्र क्रोधोऽमर्षः । ईर्ष्या असहनम् । असूया तु गुणेषु दोषारोपः ॥ ३३ ॥

(**ऋते आदियोगे पञ्चमी**) ऋते ज्ञानान्न मुक्तिः । अन्यो गृहाद्विहारः । आराद्वनात् । इतरो ग्रामात् । भिन्नः कृष्णात् । पूर्वो ग्रामात् । प्राग्ग्रामात् । दक्षिणा ग्रामात् ॥ ३४ ॥

(सु०) **ऋते आदियोगे पञ्चमी** ॥ ज्ञानादृते विना मुक्तिर्न । ऋतेयोगे द्वितीयाऽपि । ऋते द्वितीया चेति चान्द्रसूत्रोक्तत्वात् ॥ गृहादन्यो विहारो वनम् । वनादारात् । "अराद् दूरसमीपयोः" इत्यमरः ॥ दूरान्तिकयोगे षष्ठ्यपीति प्राप्ते पञ्चमी ॥ ग्रामादितरः। "इतरस्त्वन्यनीचयोः" इत्यमरः ॥ नीचार्थस्येतरस्य ग्रहणं न । कृष्णाद्भिन्नोऽन्य इत्यर्थः ॥ एवं पूर्वदक्षिणादियोगे अञ्चूत्तरपदयोगे च पञ्चमी ॥ ३४ ॥

(त०) **ऋते ज्ञानादिति** ॥ कथं तर्हि 'पुरुषाराधनमृते' इति । प्रमादोऽयमित्येके । ऋते द्वितीया चेति चान्द्रसूत्रात् द्वितीयाऽपि ॥ ३४ ॥

विनापृथग्नाना वा) विना कृष्णात् ॥३५ ॥

(क) **मैनामिति** । एनां भार्य्यामन्यो न पश्येत् इत्येतदर्थं भार्य्यागुणेषु दोषारोपणं करोतीत्यर्थः । नात्र भार्य्यां प्रति कोपः, किन्तु परेण दृश्यमानां तां न सहत इत्येव विवक्षितमिति बोध्यम् । एवं च क्रोधद्रोहेर्षासूयानां कोपमूलकत्व एवेदमिति भाष्ये स्थितम् । तथा च—कुप्यति कस्मैचिदित्याद्यसाध्वेव, कोपस्य कोपमूलकत्वाभावात् क्रुधार्थकत्वाभावाच्च । प्ररूढकोप एव हि क्रोधः 'न ह्यकुप्यतः क्रुध्यति' इति भाष्यात् ॥

(ख) 'राधीक्ष्योर्यस्य विप्रश्नः' एतयोर्यत् कारकं तत्र चतुर्थी स्यात् । यदीयो विविधप्रश्नः क्रियते । कृष्णाय राध्यति ईक्षते वा । पृष्टो गर्गः शुभाशुभं पर्यालोचयतीत्यर्थः । 'प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्त्ता' । आभ्यां परस्य शृणोतेर्योगे पूर्वस्य प्रवर्त्तनारूपस्य व्यापारस्य यः कर्त्ता तत्र चतुर्थी स्यात् । विप्राय गां प्रतिशृणोति वा । विप्रेण मह्यं देहीति प्रवर्त्तितस्तस्मै प्रतिजानीत इत्यर्थः । 'अनुप्रतिगृणश्च' । आभ्यां गृणातेः कारकं पूर्वव्यापारस्य कर्त्तरि चतुर्थी स्यात् । होत्रेऽनुगृणाति, प्रतिगृणाति वा । होता प्रथमं शंसति तमध्वर्युः प्रोत्साहयतीत्यर्थः । 'परिक्रयणे सम्प्रदानं वा' । नियतकालं भृत्या स्वीकरणं तत्र चतुर्थी वा स्यात् । शतेन शताय वा परिक्रीतः । मन्यकर्मण्यनादरे वाऽप्राणिषु । प्राणिवर्जे मन्यतेः कर्मणि चतुर्थी वा स्यात्तिरस्कारे । न त्वां तृणं मन्ये तृणाय वा । तनादियोगे न । नत्वां तृणं मन्वे ।

अत्र वार्त्तिकम्—'अप्राणिष्वित्यपनीय नौकाकान्नशुकशृगालवर्जेष्विति वाच्यम्' । तेन 'न त्वां नावं मन्ये' इत्यत्राऽप्राणित्वेऽपि चतुर्थी न । 'न त्वां शुने मन्ये' इत्यत्र प्राणित्वेऽपि भवत्येव । गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि । अध्वभिन्ने गत्यर्थानां कर्मण्येते स्तश्चेष्टायाम् । ग्रामं ग्रामाय वा गच्छति । चेष्टायां किम् । मनसा हरिं व्रजति । अनध्वनि किम् । पन्थानं गच्छति । गन्त्राऽधिष्ठितेऽध्वन्येवायं निषेधः । यदा तूत्पथात्पन्था एवाक्रमितुमिष्यते तदा चतुर्थी भवत्येव । उत्पथेन पथे गच्छति। इत्यादि पाणिन्यादिव्याकरणात्सविस्तरमुन्नेयम् ।

(सु०) विनापृथग्नाना वा ॥ विनापृथग्नानाभियोगे द्वितीयातृतीयापञ्चम्यो भवन्ति ॥ "हिरुङ् नाना च वर्जने" इत्यमरः ॥ ३५ ॥

(विद्यास्वीकारे पञ्चमी) उपाध्यायादधीते ॥ ३६ ॥

(सु०) विद्यास्वीकारे पञ्चमी ॥ विद्यास्वीकारे वक्तुः पञ्चमी भवति ॥ यथा उपेत्यास्मादधीयते इत्यपादाने यञ् । उपाध्यायादधीते शिष्यः । निःसरन्तं शब्दं ततो गृह्णातीत्यर्थः ॥ ३६ ॥

जनिकर्तुः प्रकृतिः ॥ जायमानस्य कार्यस्योपादानमपादानसंज्ञं स्यात् ॥ ब्रह्मणः प्रजाः प्रजायन्ते(क) ॥ ३७ ॥

(सु०) जनिकर्तुः प्रकृतिः ॥ उत्पद्यमानस्य कार्यस्य हेतोः पञ्चमी ॥ यथा । ब्रह्मणो धातुः प्रजाः प्रजायन्ते । उत्पद्यन्ते इत्यर्थः । तत उपक्रामन्ति निर्गच्छन्तीत्यर्थो वा । ब्रह्मा हिरण्यगर्भः स च हेतुरेव न पुनरुपादानम् । "प्रजा स्यात्संततौ जने" इत्यमरः॥

(यतश्चाध्वकालयोर्निर्माणं तत्र पञ्चमी) ॥ ३८ ॥

(पञ्चमीयुक्तादध्वनः प्रथमासप्तम्यौ कालात्सप्तमी)

वनाद्ग्रामो योजन योजने वा । कार्तिक्या आग्रहायणी मासे ॥ ३९ ॥

(सु०) यतश्चाध्वकालयोर्निर्माणं तत्र पञ्चमी ॥ यतश्चाध्वकालयोः परिच्छेदः क्रियते तस्मात्पञ्चमी भवति ॥ अध्ववाचकशब्दात्तु प्रथमासप्तम्यौ । कालवाचकात्तु सप्तम्येव । वनात् ग्रामो योजनं योजने वा ॥ अग्रे हायनं यस्याः सा आग्रहायणी । स्वार्थेऽण् । कार्तिक्याः पौर्णमास्या आग्रहायणी मासेऽस्ति ॥ ३८ ॥ ३९ ॥

(वर्जनेऽपपरिभ्यां पञ्चमी) अपहरेः संसारः । परि हरेः संसारः । आ मुक्तेः संसार ॥ ४० ॥

(सु०) वर्जनेऽपपरिभ्यां पञ्चमी ॥ वर्जनार्थयोरपपर्योर्योगे पञ्चमी । यथा । अपहरेः परिहरेः संसारः । हरिं वर्जयित्वेत्यर्थः ॥ मर्यादार्थकाङ्योगे पञ्चमी । यथा । आ मुक्तेः संसारः । मुक्तिं मर्यादीकृत्येत्यर्थः ॥ एवमभिविध्यर्थकाङ्योगेऽपि पञ्चमी(ख) । यथा । हा बालेभ्यो हरिभक्तिः । बालानभिव्याप्येत्यर्थः ॥ ४० ॥

(क) ब्रह्मण इति । हिरण्यगर्भादित्यर्थः । घटादिषु कुलालादिवत्तस्य प्रजोत्पत्तौ निमित्तकारणत्वमिति भावः । वृत्तिकृन्मतमेतदयुक्तम् । संयोगविश्लेषसत्त्वेन 'विश्लेषावधौ' इत्येव सिद्धत्वात् । अतोऽत्र योजनायामुपादानमित्युक्तम् । अत एव भाष्यकैयटयोः 'गोमयाद्वृश्चिका जायन्ते गोलोमाविलोमभ्यो दूर्वा जायन्ते' इत्युदाहृत्यपरिणामेषु प्रकृतिद्रव्यावयवानुस्यूतिसत्त्वेऽपि बुद्धिकृतविश्लेषसत्त्वात् 'विश्लेषावधौ' इत्येव सिद्धमिति प्रत्याख्यानं संगच्छते । एवं च 'ब्रह्मणः प्रजाः प्रजायन्ते' इत्यत्र ब्रह्मशब्देन मायोपहितमीश्वरचैतन्यमेव विवक्षितम् । तद्धि सर्वकार्योपादानमिति वेदान्तसिद्धान्तः । 'भुवः प्रभवः' । भवनं भूः । भूकर्तुः प्रभवस्तथा । हिमवतो गङ्गा प्रभवति । तत्र प्रकाशते इत्यर्थः । 'गम्यमानापि कारकविभक्तीनां निमित्तम्" । कस्मात्त्वम् ? नद्याः । 'प्रभृत्यर्थयोगे पञ्चमी' । भवात्प्रभृति-आरभ्य वा सेव्यो हरिः । बहिर्योगे पञ्चमी' । ग्रामाद्बहिः ।

(ख) पाणिनिसूत्रे 'आङ्मर्यादावचने' इति वचनग्रहणादेतल्लभ्यते ।

प्रतिः प्रतिनिधिप्रतिदानयोः ॥ यतः प्रतिनिधिः प्रतिदानं च तत्र प्रतियोगे पञ्चमी ॥ प्रद्युम्नः कृष्णात्प्रति । तिलेभ्यः प्रतियच्छति माषान् ॥ ४१ ॥

(सु०) **प्रतिः प्रतिनिधिप्रतिदानयोः** ॥ एतयोरर्थयोर्यः प्रतिस्तस्य योगे पञ्चमी स्यात् । मुख्यस्याभावे तत्सदृशो य उपादीयते स प्रतिनिधिः । दत्तस्य प्रतिनिर्यातनं प्रतिदानम् । षष्ठीबाधिका पञ्चमीयम् । कृष्णात् प्रति कृष्णस्य सदृश इत्यर्थः ॥ तिलेभ्यः प्रति । तिलानामादानेन मैत्रो माषान् यच्छति ददातीत्यर्थः ॥ ४१ ॥

(भीत्रार्थानां भयहेतौ पञ्चमी) चौराद्बिभेति । चौरात् त्रायते । व्याघ्रात् त्रस्यति । विद्युत्पाताच्चकितः ॥ ४२ ॥

(सु०) **भयहेतौ पञ्चमी** ॥ भयार्थानां त्राणार्थानां च प्रयोगे भयहेतोः पञ्चमी स्यात् । षष्ठीबाधिकेयम् ॥ मैत्रश्चौराद्बिभेति । चौरात् त्रायते ॥ ४२ ॥

(हेतौ तृतीयापञ्चम्यौ) जाड्याज्जाड्येन वा बद्धः । स्तोकात् स्तोकेन वा मुक्तः ॥ ४३ ॥

(सु०) **हेतौ तृतीयापञ्चम्यौ** ॥ गुणे वर्तमानात् हेतुवाचकशब्दादस्त्रीलिङ्गात्तृतीयापञ्चम्यौ स्तः ॥ जडस्य भावो जाड्यं तेन तस्माद्वा बद्धः । स्तोकेन स्तोकाद्वा । अनायासेन मुक्त इत्यर्थः ॥ गुणवाचकात् किम् । धनेन कुलम् ॥ अस्त्रीलिङ्गात्किम् । बुद्ध्या मुक्तः । तृतीयाप्राप्तौ पक्षे पञ्चमी विधीयते ॥ ४३ ॥

(दूरान्तिकयोर्योगे षष्ठ्यपि) ग्रामस्य दूरादन्तिकाद्वा इत्यादि ॥ ४४ ॥

(सु०) **दूरान्तिकयोर्योगे षष्ठ्यपि** ॥ अनयोर्योगे षष्ठी भवति । अपिशब्दाद्दूरान्तिकार्थकेभ्यो नामार्थमात्रे द्वितीयातृतीयापञ्चमीसप्तम्यो भवन्तीत्यर्थः ॥ ग्रामस्य दूरं दूरेण दूरात् दूरे वा ॥ अन्तिकम् अन्तिकेन अन्तिकात् अन्तिके वा ॥ इति पुनरपि पञ्चमी(क) ॥ ४४ ॥

निर्द्धारणे षष्ठीसप्तम्यौ । क्रियागुणजातिसंज्ञाभिः समुदायात्पृथक्करणं निर्द्धारणं यतस्ततः षष्ठीसप्तम्यौ ॥ क्रियापराणां क्रियापरेषु वा भगवदाराधकः श्रेष्ठः । गवां गोषु वा कृष्णा सम्पन्नक्षीरा । नृणां नृषु वा ब्राह्मणः श्रेष्ठः । छात्राणां छात्रेषु वा मैत्रः पटुः(ख) ॥ ४५ ॥

(क) **पुनरपीति** । 'पराजेरसोढः' । पराजेः प्रयोगेऽसह्योऽर्थोऽपादानं स्यात्तत्र पञ्चमी । अध्ययनात्पराजयते । ग्लायतीत्यर्थः असोढः किम् । शत्रून् पराजयते । अभिभवतीत्यर्थः 'वारणार्थानामीप्सितः' प्रवृत्तिविघातो वारणम् । वारणार्थानां धातूनां प्रयोगे ईप्सितोऽर्थोऽपादानं स्यात् । यवेभ्यो गां वारयति । ईप्सितः किम् । यवेभ्यो गां वारयति क्षेत्रे । 'अन्तर्धौ येनादर्शनमिच्छति' । व्यवधाने सति यत्कर्तृकस्यात्मनो दर्शनस्याभावमिच्छति तदपादानं स्यात् । मातुर्निलीयते कृष्णः । अन्तर्धौ किम् । चौरान् न दिदृक्षते । इच्छतिग्रहणं किम् । अदर्शनेच्छायां सत्यां सत्यपि दर्शने तथा स्यात् । देवदत्ताद्यज्ञदत्तो निलीयते । इत्यादि तन्त्रान्तराद् बोध्यम् ।

(ख) **निर्द्धारण इति** । क्रियया गुणेन जात्या वा धर्मविशेषणेन निर्द्धार्यमाणस्य समुदयाद्भिन्नीकरणं निर्द्धारणमित्यर्थः । क्रिया कर्मत्वजातिमती गमनादिरूपा । गुणः द्रव्यकर्मभिन्नत्वे सति समवा-

(सु०) निर्धारणे षष्ठीसप्तम्यौ ॥ निर्धारणादियोगे षष्ठीसप्तम्यौ । जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्द्धारणं तदस्ति साध्यत्वेनास्येति स निर्धारणः । 'अर्शआदित्यप्रत्ययः' । श्रेष्ठत्वादिहेतुरित्यर्थः । तथा च निर्धारणादियोगे निर्धारणाश्रयान्नाम्नः षष्ठीसप्तम्यौ स्तः । यतो निर्धार्यते तत एवेत्यर्थः ॥ इति पुनरपि षष्ठी(क) ॥ ४९ ॥

(त०) क्रियागुणेत्यादि ॥ निर्द्धारणमस्यास्तीति निर्द्धारणः अर्शआदित्यः । निर्द्धारणहेतुरिति यावत् । तथा च निर्द्धारणादियोगे षष्ठीति सम्यगेव न तु निर्द्धारणार्थे इति । अर्थपरो निर्द्धारणशब्दः । आदिशब्दस्य द्वन्द्वात्परत्वेन प्रत्येकं योगस्यानिर्वार्यत्वात् । किं च निर्द्धारणार्थे षष्ठीत्युक्ते कस्मात्षष्ठी निर्द्धारणाश्रयान्निर्द्धारणहेतोर्निर्द्धार्यमाणाद्वेति विनिगमनाभावः । योगे षष्ठीति मते तु हेतुयोगे विधानाद्धेतौ न निर्द्धार्यमाणादपि स्वनिष्ठत्वेनाभिधानान्न परिशेषान्निर्द्धारणाश्रयादेव॥ नन्वत्र समूहसमूहिलक्षणे संबन्धे एव षष्ठी किमनेनेति चेत्सत्यम् । स्वाम्यादित्वान्निर्द्धारणयोगे सप्तमी विधास्यते । तया बाधा मा भूदित्यतोऽपि षष्ठीविधानम् ॥ ४५ ॥

(स्वाम्यादियोगे षष्ठीसप्तम्यौ) गवां गोषु वा स्वामी अधिपतिः ईश्वरः दायादः प्रसूतः प्रतिभूर्वा ॥ ४६ ॥

(सु०) स्वाम्यादियोगे षष्ठीसप्तम्यौ ॥ स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैर्योगे षष्ठीसप्तम्यौ स्तः ॥ षष्ठीप्राप्तौ पाक्षिकसप्तम्यर्थं वचनम् ॥ "दायादौ सुतबान्धवौ" इत्यमरः ॥ गोषु प्रसूतः ॥ गा एवानुभवितुं जात इत्यर्थः ॥ प्रतिभूः साक्षी ॥४६॥

(त०) प्रसूत इति । गा एवानुभवितुं जात इत्यर्थः ॥ ४६ ॥

(अनादराधिक्ये क्रियालक्षणे षष्ठीसप्तम्यौ) रुदति रुदतो वा प्राव्राजीत् ॥ ४७ ॥

(सु०) अनादराधिक्ये क्रियालक्षणे षष्ठीसप्तम्यौ ॥ केवलभावलक्षणे सप्तम्येव अनादराधिक्ये तु षष्ठीसप्तम्यौ स्तः । रुदति रुदतो वा मत्रः प्राव्राजीत् । रुदन्तं पुत्रादिकमनादृत्य संन्यस्तवानित्यर्थः ॥ ४७ ॥

येन सामान्यवान् । जातिर्नित्यानेकसमवेतत्वम् । षष्ठीसप्तम्यौ चाप्रधानात्समुदायादेव न तु निर्द्धार्यमाणोऽवयवः समुदायाद्भिन्न इति यदाधारत्वेन विवक्ष्यते तदाधारत्वादेव वृक्षे शाखेति सामान्येन सप्तमी स्यात् । अथ यदावयवसम्बन्धमात्रं विवक्ष्यते तदा वृक्षस्य शाखेति सामान्येन सम्बन्ध इति षष्ठी स्यात्, इति चेत्, सत्यम्, तस्यैव प्रपञ्चार्थत्वात्, निर्धारणार्थकषष्ठ्या समासनिषेधार्थत्वाच्च । क्रियागुणजातिभिरित्यस्य सम्भवदुक्तिकत्वात् 'अमीषां छात्राणां मैत्रः पटुः' इत्यादौ संज्ञादिभिरपि व्यवच्छेदे भवत्वेवं । क्रियापराणां क्रियापरेषु वा भगवदाराधकः श्रेष्ठः । अत्र आराधना क्रिया गवां गोषु वा कृष्णा सम्पन्नक्षीरा । अत्र कृष्णो गुणः । नृणां नृषु वा ब्राह्मणः श्रेष्ठः । अत्र ब्राह्मणत्वं जातिः । आराधनक्रियया कृष्णगुणेन ब्राह्मणत्वजात्या च भगवदाराधकादयो विशिष्यन्ते ।

(क) अत्र किञ्चिदनुक्तं कथयामः—'तसादियुक्तात् षष्ठी' । ग्रामस्य दक्षिणतः, पुरः, पुरस्तात्, उपरि, उपरिष्टात् । ज्ञोऽविदर्थस्य करणे । जानातेरज्ञानार्थयोगे करणे षष्ठी स्यात् । सर्पिषो जानीते । अविदर्थस्य किम् । स्वरेण भृत्यं जानाति । कौमुद्यां सर्पिषो ज्ञानमिति प्रकृतोदाहरणं दत्तम् । अधीगर्थदयेषां कर्मणि वा । स्मृत्यर्थानां दयादीनां च धातूनां कर्मणि षष्ठी वा स्यात् । मातुः स्मरति मातरं स्म-

(त०) रुदतीति ॥ रुदन्तं पुत्रादिकमनादृत्य संन्यस्तवानित्यर्थः ॥ ४७ ॥

(आयुक्तकुशलाभ्यां योगे षष्ठीसप्तम्यौ तात्पर्ये) आयुक्तः कुशलो वा हरिपूजनस्य हरिपूजने वा ॥ ४८ ॥

(सु०) **आयुक्तकुशलाभ्यां योगे षष्ठीसप्तम्यौ तात्पर्ये** ॥ तत्परस्य भावः तात्पर्यं तस्मिन् तात्पर्येऽर्थे आभ्यां योगे षष्ठीसप्तम्यौ स्तः ॥ हरिपूजने हरिपूजनस्य वा आयुक्तः व्यापारित इत्यर्थः ॥ तात्पर्ये किम् । आयुक्तो गौः शकटे । ईषद्युक्त इत्यर्थः ।४८।

(साधुनिपुणाभ्यां पूजायां सप्तमी) मातरि साधुर्निपुणो वा ॥४९

(सु०) **साधुनिपुणाभ्यां पूजायां सप्तमी** ॥ 'पुण कर्मणि शुभे' निपूर्वकादस्मान्नाम्युपधादिति कः। निपुणः। साधुशब्दप्रयोगे तु पूजां विना साध्वसाधुप्रयोगे सप्तमी भवत्येव। पूजायामाभ्यां योगे सप्तमी स्यात्॥ पूजायां किम्। निपुणो राज्ञो भृत्यः(क)। इह तत्त्वकथने तात्पर्यम् ॥ **प्रतिपर्यनुयोगे न सप्तमी** ॥ साधुर्निपुणो वा मातरं प्रति पर्यनु वा ॥ ४९ ॥

(प्रसितोत्सुकाभ्यां योगे तृतीयासप्तम्यौ) प्रसित उत्सुको वा हरिणा हरौ वा (ख) ॥ ५० ॥

रति वा। सर्पिषो दयते सर्पिषं वा। जगतामीष्टे जगदीष्टे वा। सम्बन्धविवक्षायां सिद्धेऽपि मातुः स्मरणमित्यादौ समासभावार्थमिदम्। कौमुद्यां—मातुः स्मरणं, सर्पिषो दयनं, ईशनं वेत्युदाहृतम्। कृञः प्रतियत्ने वा। उपस्करेऽर्थे कृञः कर्मणि षष्ठी वा स्यात्। दध्नामुपस्कुरुते दधीनि वा। कौमुद्यामेधोदकस्योपस्करणमित्युदाहृतत्। रुजार्थानां भाववचनानामज्वरेः। भावकर्तृकाणां ज्वरिवर्जितानां रुजार्थानां कर्मणि षष्ठी वा स्यात्। चौरस्य रुजति रोगश्चौरं वा। कौमुद्यां चौरस्य रोगस्य रुजेत्युदाहृतम्। अज्वरिसन्ताप्योश्च। रोगस्य चौरज्वरः चौरसन्तापो वा। रोगकर्तृकं चौरज्वरसम्बन्धिज्वरादिकमित्यर्थः। इत्याद्युदाहृतं कौमुद्याम्। आशिषि नाथः कर्मणि वा। आशीरर्थस्य नाथतेः कर्मणि षष्ठी वा स्यात्। शिष्यस्य नाथते शिष्यं वा। आशिषि किम्। धनं नाथति। कौमुद्यां तु—सर्पिषो नाथनम्। आशिषि किम्। माणवकनाथनम्। तत्सम्बन्धिनी याच्ञा इत्यर्थ इत्युक्तम्। जासि निप्रहण नाटक्राथपिषां हिंसायाम्। हिंसार्थानामेषां कर्मणि षष्ठी वा स्यात्। चौरस्य चौरं वोज्जासयति, निप्रहन्ति, प्रणिहन्ति, निहन्ति, प्रहन्ति वा। चौरस्य चौरं वा नाटयति, क्राथयति वा। वृषलस्य वृषलं वा पिनष्टि। कौमुद्याम्—चौरस्योज्जासनम्। चौरस्य निप्रहणनं प्रणिहननं निहननं प्रहणनं प्रहणनं वा चौरस्योन्नाटनम्। चौरस्य क्राथनम्। वृषलस्य पेषणम्। हिंसायां किम्। धानापेषणम्। इत्युदाहृतम्। कृत्वोऽर्थप्रयोगे कालेऽधिकरणे। कृत्वोऽर्थानां प्रयोगे कालवाचिन्यधिकरणे षष्ठी स्यात्। पञ्चकृत्वोह्नो भुङ्क्ते। द्विरह्नोऽधीते। कौमुद्यां तु—पञ्चकृत्वोऽह्नो भोजनम्। द्विरह्नो भोजनम्। शेषे किम्। 'द्विरहन्यध्ययनम्। इत्युदाहृतम्।

(क) **निपुणो राज्ञ इति**। साधुशब्दप्रयोगे पूजां विना सप्तमी भवत्येव। साध्वसाधुप्रयोगे चेत्यादिवार्तिकात्।

(ख) अत्रेदं बोध्यम्। 'नक्षत्रे च लुपि 'नक्षत्रे प्रकृत्यर्थे यो लुप्संज्ञया लुप्यमानस्य प्रत्ययस्यार्थस्तत्र वर्त्तमानात्तृतीयासप्तम्यौ स्तोऽधिकरणे। मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत्। मूले श्रवणे इति वा। लुपि कम्। पुष्ये शनिः। 'सप्तमीपञ्चम्यौ कारकमध्ये'। शक्तिद्वयमध्ये यौ कालाध्वनौ ताभ्यां सप्तमीपञ्चम्यौ स्तः। अद्य भुक्त्वायं द्व्यहे द्व्यहाद् वा भोक्ता। कर्तृशक्त्योर्मध्येऽयं कालः इहस्थोऽयं क्रोशे

(सु०) प्रसितोत्सुकाभ्यां योगे तृतीयासप्तम्यौ ॥ "तत्परे प्रसितासक्तौ" इत्यमरः ॥ उत्सुकसाहचर्यात्प्रसितस्तत्परार्थक एव गृह्यते। तेन प्रकर्षेण सितः शुक्ल इत्यर्थे न॥

(त०) प्रसित इति "तत्परे प्रसितासक्तौ" इत्यमरः ॥ ६१ ॥

(साध्वसाधुप्रयोगे सप्तमी) साधुः कृष्णो मातर्यसाधुर्मातुले ॥

(सु०) साध्वसाधुप्रयोगे सप्तमी ॥ अत्र पूजा न विवक्षिता किंतु तत्त्वकथनं तत्रापि सप्तमी भवति । एतदर्थं साधुग्रहणम् । साधुनिपुणाभ्यामिति सूत्रे साधुग्रहणं तु पूजायां विवक्षितायां प्रत्यादियोगे सप्तमीनिवृत्त्यर्थमिति ॥

(निमित्तात्कर्मयोगे सप्तमी)

चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् ।
केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ॥ ५२ ॥

(सु०) निमित्तात्कर्मयोगे सप्तमी ॥ कर्मणो योगः सम्बन्धः कर्मयोगस्तस्मिन्कर्मयोगे निमित्तात्फलात्सप्तमी स्यात् ॥ निमित्तशब्देन कारणग्रहणे तु जाड्येन बद्ध इत्यादावप्यतिप्रसङ्गः स्यादित्यर्थः ॥ अत्र हेतुतृतीया तादर्थ्यचतुर्थी च प्राप्ता तन्निवारणार्थमिदम् ॥ मैत्रो द्वीपिनं चित्रकं हन्ति चर्मणि चर्मफलार्थम् । चर्मद्वीपिनोः समवायः सम्बन्धः । कुञ्जरं हन्ति दन्तयोर्दन्तफलार्थम् । दन्तकुञ्जरयोः समवायः सम्बन्धः ॥ चमरीं गां हन्ति केशेषु केशफलार्थम् ॥ केशचमर्योः समवायः सम्बन्धः ॥ मैत्रेण पुष्कलको गन्धमृगो हतः सीम्नि अण्डकोशफलार्थम् । अथ वा पुष्कलकः शङ्कुर्हतो निहितो निखात इत्यर्थः । सीम्नि सीमज्ञापनार्थम् । सीमपुष्कलकयोः संयोगः संबन्धः । "अथ पुष्कलको गन्धमृगे क्षपणकीलयोः" इति मेदिनी ॥ "सीमा घाटस्थितिक्षेत्रेष्वण्डकोशेषु च स्त्रियाम्" इति मेदिनी ॥ ६२ ॥

(त०) निमित्तादिति ॥ निमित्तमिह फलम् । योगः संयोगसमवायात्मकः ॥ सीम्नीति ॥ सीमाऽण्डकोशः । पुष्कलको गन्धमृगः । योगविशेषे किम् । वेतनेन धान्यं लुनाति६२

(क्तस्येन्विषयस्य कर्मणि) अधीती व्याकरणे ॥ ५३ ॥

(सु०) क्तस्येन्विषयस्य कर्मणि ॥ इन्नन्तस्य क्तस्य कर्मणि सप्तमी स्यात् ॥ द्वितीयाबाधिका सप्तमी ॥ अधीतमनेनेत्यधीती व्याकरणे । भावे क्तप्रत्ययस्ततः इष्टादिभ्य इति कर्तरीनूप्रत्यये कृते पश्चाद्गुणभूतक्रियया सम्बध्यमानं व्याकरणमनुक्तं कर्म ॥ ६३ ॥ इति पुनरपि सप्तमी ॥

(त०) अधीतमनेनेति विग्रहे इष्टादिभ्य इनिरित्यनेन इनिः ॥ ६३ ॥

(तादर्थ्ये चतुर्थी)

क्रोशाद् वा लक्ष्यं विध्येत् । कर्तृकर्मशक्त्योर्मध्येऽयं देशः । अधिकशब्देन योगे सप्तमी पञ्चम्यौ । लोके लोकाद् वाधिको हरिः । अधिरीश्वरे । स्वस्वामिभावसम्बन्धेऽधिः कर्मप्रवचनीयसंज्ञः स्यात् । 'यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी' । अत्र कर्मप्रवचनीययुक्ते सप्तमी स्यात् । उपपरार्धे हरेर्गुणाः । परार्धादधिका इत्यर्थः । ऐश्वर्ये तु स्वस्वामिभ्यां पर्यायेण सप्तमी । अधि भुवि रामः । अधिरामे भूः । कृष्णि वा । मामधिकरिष्यति । अन्यदूह्यम् ।

संयमाय श्रुतं धत्ते नरो धर्माय संयमम् ।
धर्मं मोक्षाय मेधावी धनं दानाय भुक्तये (क) ॥ ५४ ॥

(सु०) पुनश्चतुर्थीमाह ॥ तादर्थ्ये चतुर्थी तस्मै कार्यायेदं तदर्थं तदर्थस्य भावस्तादर्थ्यम् । भावे तत्त्वयण इति यण् । कृत्तद्धितसमासेभ्यः सम्बन्धाभिधानं भावप्रत्ययेनेति सिद्धान्तस्ततो यण्प्रत्ययेन सम्बन्धः । उच्यते । स च सम्बन्धोऽनेकधा न तु कार्यकारणभाव एव । तेन ब्राह्मणाय दधीत्यादौ चतुर्थी सिद्धयति । मौत्रः श्रुतं शास्त्रं धत्ते । कस्मै संयमाय । संयमं धत्ते । कस्मै धर्माय । मेधाऽस्ति यस्य स मेधावी बुद्धिमान् धर्मं धत्ते । कस्मै मोक्षाय । धनं धत्ते । कस्मै दानाय त्यागाय भुक्तये भोगाय चेति ॥५४॥

(त०) तादर्थ्यं इति ॥ तस्मै कार्यायेदं तदर्थं कारणम् । तस्य भावस्तादर्थ्यम् । जननोपकारकत्वरूपः सम्बन्धोऽभिधीयते । उपकारकत्वं चानेकधा । तेन विप्राय मक्षिकास्यादावपि भवति ॥

(तुमोऽप्रयुक्तस्य कर्मणि) फलेभ्यो याति(ख) ॥ ५५ ॥

(सु०) तुमोऽप्रयुक्तस्य कर्मणि ॥ क्रियावाचकप्रकृतिकमुपपदं यस्य तस्या प्रयुज्यमानस्य तुमन्तस्य कर्मणि चतुर्थी भवति ॥ द्वितीयाबाधिकेयम् ॥ फलेभ्यो याति । फलान्याहर्तुं यातीत्यर्थः । एवं स्वयंभुवे नमस्कृत्य । स्वयंभुवमनुकूलयितुमित्यर्थः ॥५५॥

(त०) फलेभ्यो यातीति । फलान्याहर्तुं यातीत्यर्थः ॥ ५५ ॥

(क्यब्लोपे कर्मण्याधारे च पञ्चमी) हर्म्यात्प्रेक्षते । आसनात्प्रेक्षते ॥ ५६ ॥

(सु०) पुनः पञ्चमीमाह ॥ क्यब्लोपे कर्मण्याधारे च पञ्चमी ॥ क्यबन्तस्य गम्यमानार्थत्वात् अप्रयोगे कर्मणि अधारे च पञ्चमी स्यात् ॥ क्यब्ग्रहणमिह क्यबर्थपरम् । तेन क्त्वाऽपि गृह्यते ॥ प्रासादात्प्रेक्षते । प्रासादमारुह्य ॥ आसनात् प्रेक्षते । आसने उपविश्येत्यर्थः । आसने स्थित्वा वा ॥ ५६ ॥

(त०) हर्म्यादिति ॥ हर्म्यमारुह्येत्यर्थः ॥ ५६ ॥

कर्तृकार्ययोरक्तादौ कृति षष्ठी ॥ कर्तरि कार्ये च षष्ठी क्तादिवर्जिते कृति प्रयुज्यमाने(ग) ॥ कृष्णस्य कृतिः । जगतः कर्ता कृष्णः ॥५७॥

(सु०) पुनः षष्ठीमाह ॥ कर्तृकार्ययोरक्तादौ कृति षष्ठी ॥ कृद्योगे कर्तरि क-

---

(क) अत्रेदं बोध्यम् क्लपि संपद्यमाने । क्लपिधातौ प्रयुज्यमाने सति सम्पद्यमानेऽर्थे वर्त्तमानाच्चतुर्थी स्यात् । भक्तिर्ज्ञानाय कल्पते—सम्पद्यते—जायते इत्यादि । उत्पातेन ज्ञापिते च । अशुभसूचक आकस्मिको भूतविकार उत्पातस्तेन सूचितेऽर्थे विद्यमानाच्चतुर्थी स्यादित्यर्थः । वाताय कपिला विद्युत् । हितयोगे च ब्राह्मणाय हितम् ।

(ख) अत्रेदं बोध्यम् । तुमर्थाच्च भाववचनात् । योगाय याति यष्टुं यातीत्यर्थः ।

(ग) अक्तादावित्यादिशब्दात् क्त क्तवतु कि उ इष्णु उक क्त्वाद्यन्ताव्यय शतृ शान क्वसु कान खलर्थ शीलार्थ तृच् भविष्यदर्थकाकभविष्यदाधमर्ण्येन इत्यादयो गृह्यन्ते । कमेरनिषेधः । लक्ष्म्याः कामुको हरिः ।

र्मणि च षष्ठी स्यात् क्तादीन् विना ॥ कृष्णेन क्रियते इति कृष्णस्य कृतिः । क्तिरिति स्त्रियां भावेऽर्थे क्तिः ॥ जगत् करोति इति जगतः कर्ता । तृवुणाविति कर्तरि तृप्रत्ययः ॥ कर्तृकार्ययोः किम् । शस्त्रेण भेत्तात्र करणे मा भूत् ॥ कृति किम् । कृतपूर्वी कटमत्र तद्धिते मा भूत् । कृतं पूर्वमनेनेति कारकादिति कर्तरीनिः ॥ ५७ ॥

(त०) कर्तृकार्ययोरिति ॥ क्तादौ तु तृणा ग्रहणं न तु तृ इत्यस्य । तेन कटस्य कर्तेत्यपि अनन्तरस्य विधिर्निषेधो वेति न्यायात् ॥ ५७ ॥

(गुणकर्मणि वा) नेताऽश्वस्य ग्रामं ग्रामस्य वा(क) ॥ ५८ ॥

(सु०) गुणकर्मणि वा ॥ अमुख्यकर्मणि वा षष्ठी स्यात् अक्तादौ कृति ॥ नेताऽश्वस्य ग्रामं ग्रामस्य वा । कर्तरि तृप्रत्ययः । ग्राममिति गौणकर्म ॥ ५८ ॥

(उभयप्राप्तौ कृति कर्तरि षष्ठी न) आश्चर्यो गवां दोहोऽगोपेन ५९

स्त्रीप्रत्यययोरकाकारयोर्योगे नोक्तम् ॥ भेदिका बिभित्सा वा रुद्रस्य जगतः ॥ ६० ॥

(सु०) उभयप्राप्तौ कृति कर्तरि षष्ठी न ॥ उभयोः कर्तृकर्मणोः प्राप्तिर्यस्मिन् स उभयप्राप्तिस्तस्मिन्नुभयप्राप्तौ कृत्प्रत्यये कर्तरि षष्ठी न स्यात्। कर्तृषष्ठीनिषेधकमिदम्। कर्मणि षष्ठी तु कर्तृकार्ययोरनेनैव ॥ अगोपेन गावो दुह्यन्ते इति दोहः । भावे घञ् । स्त्रीप्रत्यययोरकाकारयोर्योगे नोक्तम् । स्त्रियां क्तिरित्यधिकारे कृतयोरकाकारयोर्योगे कर्तरि कर्मणि चोभयत्र षष्ठी स्यात् । कर्तरि षष्ठी नेति पूर्वोक्तं न प्रवर्तते इत्यर्थः । भेदनं भेदिका । धात्वर्थनिर्देशे वुण् वक्तव्य इति वुण् । युवोरनाकावित्यकादेशः । 'आबतः स्त्रियाम्' इत्याप् । काप्यत इतीत्वम् भेत्तुमिच्छाबिभित्सा । भिदेः सप्रत्यये 'नानिटि से' इति न गुणः ॥ प्रत्ययान्तात् स्त्रियामङित्यङ् । तत आप् । रुद्रेण जगतः भिद्यते इति भेदिका रुद्रस्य जगतः । भावे वुण् ॥ रुद्रेण जगत् बिभित्स्यते इति बिभित्सा रुद्रस्य जगत् । भावेऽङ् ॥ ५९–६० ॥

(त०) उभयप्राप्ताविति कर्तृकर्मप्राप्तावित्यर्थः ॥ ५९ ॥

(शेषे कृति वा) शब्दानामनुशासनमाचार्येणाचार्यस्य वा ॥ ६१ ॥

(सु०) शेषे कृति वा ॥ शेषेऽककारभिन्ने कृन्मात्रप्रत्यये उभयप्राप्तौ कर्तरि षष्ठी वा स्यात् ॥ आचार्येण शब्दा अनुशिष्यन्तेऽनेनेति शब्दानामनुशासनमाचार्येणाचार्यस्य वा । साधनाधारयोरिति करणे युट् ॥ ६१ ॥

(वर्तमानाधारार्थक्तस्य योगे षष्ठी) राज्ञां मतो बुद्धः पूजितो वा । इदमेषां शयितम् ॥ क्तादौ तु कुर्वन् कुर्वाणः चकृवान् चक्राणः चक्रिर्वा सुखं हरिः । हरिं दिदृक्षुः अलङ्करिष्णुर्वा । दैत्यान् घातुको हरिः । जगत्स्रष्टा सुखं कर्तुम् । विष्णुना हता दैत्याः । दैत्यान् हतवान् हरिः । ईष-

(क) अश्वस्येति प्रधानकर्मणि षष्ठी ग्रामस्येति गौणकर्मणि वा षष्ठी ।

त्करः प्रपञ्चो हरिणा । सोमं पवमानः । आत्मानं मण्डयमानः । वेदमधीयन् । कर्ता लोकान् ॥ ६२ ॥

(सु०) वर्तमानाधारार्थक्तस्य योगे षष्ठी ॥ वर्तमानार्थस्याधिकरणवाचिनश्च क्तस्य योगे कर्तरि षष्ठी स्यात् ॥ अक्तादाविति निषेधस्यापवादोऽयं विधिः ॥ राज्ञां मतः। मीतामिति मतिबुद्धिपूजार्थेभ्यो वर्तमाने कर्मणि क्तः । 'पूजितो यः सुरासुरैः' इत्यादौ तु भूते क्तो बोध्यः ॥ इदमेषां शयितमासितं भुक्तं वा । 'क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः' इत्यधिकरणे क्तः । कर्तृकर्मणोः षष्ठीबाधकाः क्तादय उच्यन्ते ॥ हरिः सुखं कुर्वन् कुर्वाणः । शतृशानचौ लिप्तेबदिति शतृशानौ ॥ चकृवान् चक्राणः चक्रिः । क्वसुकानौ णवेदिति क्वसुकानौ 'आद्दतः किर्द्विश्च भूते' इति किः । मैत्रो हरिं दिदृक्षुः । सान्ताशंसभिक्षिभ्य उरित्युः ॥ अलंकरिष्णुः । 'इष्णुच्चुकञ्' इति शीले इष्णुः ॥ हरिर्दैत्यान् घातुकः । 'षाकोकणः इत्युकण् ॥ कृत्कर्तरीति कर्तरि प्रत्यया एते ॥ जगत् सृष्ट्वा । पूर्वकाले क्त्वेति क्त्वा ॥ सुखं कर्तुम् । तुम् तदर्थायां भविष्यतीति तुम् ॥ विष्णुना दैत्या हताः। हरिर्दैत्यान् हतवान् 'क्तक्तवतू' इति क्तक्तवतू प्रत्ययौ। हरिणा प्रपञ्च ईषत्करः । 'ईषद्दुःसुषु खल्' इति खल् ॥ मैत्रः सोमं पवमानः ॥ आत्मानं मण्डयमानः । मडि भूषायाम् । ताच्छील्यवयोवचनशक्तिष्वानशित्यानश् ॥ मैत्रो वेदमधीयन् । 'इङ्धार्योरकृच्छ्रिणि कर्तरि शतृ' इति शतृप्रत्ययः ॥ हरिर्लोकान् कर्ता । शीले तृन्निति तृन् ॥ ६२ ॥

(द्विषः शतुर्वा) मुरस्य मुरं वा द्विषन् ॥ ६३ ॥

(सु०) द्विषः शतुर्वा ॥ 'द्विष अप्रीतौ' । इत्यस्मात् द्विषः शत्राविति सूत्रेण विहितो यः शतृप्रत्ययस्तस्य योगे कर्मणि वा षष्ठी स्यात् ॥ क्तादिस्वाक्षिप्ये निषेधे प्राप्ते विकल्पार्थमिदम् ॥ अक्तादावित्ययं निषेधस्तु कारकषष्ठ्या एवानन्तरस्य विधिर्वा प्रतिषेधो वेति न्यायात् । संबन्धे षष्ठी तु स्यादेव । ब्राह्मणस्य कुर्वन्नरकस्य जिष्णुरित्यादि ॥ पूर्वं च आश्चर्यो गवां दोहोऽगोपेनेत्यत्र संबन्धविवक्षायां कर्तर्यपि षष्ठी भवतीति बोध्यम् ॥ ६३ ॥

(भविष्यत्यकस्य भविष्यदाधमर्ण्यार्थस्येनश्च योगे षष्ठी न) सतः पालकोऽवतरति । व्रजं गामी । शतं दायी ॥ ६४ ॥

(सु०) भविष्यत्यकस्य भविष्यदाधमर्ण्यार्थस्येनश्च योगे षष्ठी न ॥ 'तुमर्थे वुण्' इति भविष्यत्यर्थेऽपि वुण् प्रत्ययो भवति । युवोरनाकावित्यकादेशः । तस्य भविष्यदर्थकस्याकस्य योगे कर्मणि षष्ठी न स्यात् ॥ वस्तुत कालसामान्ये तृवुणाविति वुणुक्तस्तत्र न निषेधः । यथा ओदनस्य पाचकः । देशानां दर्शकः ॥ आवश्यकाधमर्ण्ययोर्णिनिरित्यादिना इनिप्रत्ययो भविष्यत्यर्थे आधमर्ण्येऽर्थे च भवति । तस्य योगे कर्मणि षष्ठी न । सत इति शतृप्रत्ययान्तम् । सज्जनान्पालयिष्यतीति पालकः । भविष्यत्यर्थे वुण् ॥ गमिष्यतीति गामी । भविष्यत्यर्थे णिनिः ॥ ददातीति दायी । अधमर्णो ग्राहकः। अधमर्णस्य भाव आधमर्ण्यं तस्मिन्नाधमर्ण्ये णिनिः ॥ ६४ ॥

(कृत्यानां कर्तरि वा षष्ठी) मया मम वा सेव्यो हरिः ॥६५॥

(सु०) कृत्यानां कर्तरि वा षष्ठी ॥ कृत्यसंज्ञकप्रत्ययानां योगे कर्तरि षष्ठी वा

स्यात् ॥ कर्तृकार्ययोरिति नित्यं प्राप्ते विकल्पार्थमिदम् ॥ हरिर्मया मम वा सेव्यः । षेवृ सेवायामस्मात् ऋहलान्ताद् घ्यणिति कर्मणि घ्यण् ॥ कर्तरि किम् । माणवकः साम्नां वेदानां गेयः । स्वराद्य इति कर्तरि यप्रत्ययविधानादुक्तं कर्म । तव्याऽनीयघ्यण्यक्यप एते पञ्च कृत्यप्रत्ययाः ॥ ६५ ॥

(उभयप्राप्तौ कृत्ये षष्ठी न) नेतव्या व्रजं गावः कृष्णेन ॥६६॥

(सु०) उभयप्राप्तौ कृत्ये षष्ठी न ॥ कर्तरि कर्मणि च प्राप्तौ सत्यां कृत्यप्रत्ययप्रयोगे उभयत्र षष्ठी न स्यात् ॥ उभयप्राप्तौ कृतीति सूत्रेण कर्तरि षष्ठीनिषेधे कर्मणि षष्ठीनिषेधार्थमिदम् ॥ गुणकर्मणि वेति सूत्रम् उभयप्राप्तिरहितस्थले नेता ग्रामं ग्रामस्य वाऽश्वस्येत्यादौ चरितार्थं बोध्यम् ॥ ६६ ॥

(त०) उभयप्राप्ताविति ॥ कर्तृकर्मप्राप्तावित्यर्थः ॥ ६६ ॥

(दूरनिकटार्थयोगे षष्ठीपञ्चम्यौ) दूरं निकटं वा ग्रामस्य ग्रामाद्वा ॥६७॥

(सु०) दूरनिकटार्थयोगे षष्ठीपञ्चम्यौ ॥ षष्ठ्यां प्राप्तायां पक्षे पञ्चम्यर्थं वचनम् ॥ ६७ ॥

(दूरनिकटार्थेभ्यो नामार्थमात्रेभ्यो द्वितीया तृतीया पञ्चमी सप्तमी) ग्रामस्य ग्रामाद्वा दूरं दूरेण दूरात् दूरे निकटं वा ॥६८॥

(द्यूतार्थस्य क्रयविक्रयरूपव्यवहारार्थस्य च दिवः कर्मणि षष्ठी) शतस्य दीव्यति ॥ ६९ ॥

(सु०) द्यूतार्थस्य क्रयविक्रयरूपव्यवहारार्थस्य च दिवः कर्मणि षष्ठी ॥ द्यूतमर्थो यस्य स द्यूतार्थस्तस्य द्यूतार्थस्य । क्रयश्च विक्रयश्च क्रयविक्रयौ क्रयविक्रयौ रूपं यस्य सः क्रयविक्रयरूपः क्रयविक्रयरूपश्चासौ व्यवहारश्च क्रयविक्रयरूपव्यवहारः क्रयविक्रयरूपव्यवहारोऽर्थो यस्य स क्रयविक्रयरूपव्यवहारार्थस्तस्य क्रयविक्रयरूपव्यवहारार्थस्य च दिवः धातोः कर्मणि षष्ठी स्यात् ॥ द्यूतार्थस्यादि किम् । ब्राह्मणं दीव्यति । स्तौतीत्यर्थः ६९

(वोपसर्गस्य) शतस्य शतं वा प्रतिदीव्यति ॥ ७० ॥

(सु०) वोपसर्गस्य ॥ उपसर्गपूर्वकस्य दिवः कर्मणि वा षष्ठी स्यात् ॥ पूर्वसूत्रापवादः ॥ ७० ॥

(षष्ठी हेतुप्रयोगे) अन्नस्य हेतोर्वसति ॥ ७१ ॥

(सु०) षष्ठी हेतुप्रयोगे ॥ हेतुशब्दप्रयोगे षष्ठी स्यात् ॥ हेतुशब्दाच्च ॥ हेतौ तृतीयायां प्राप्तायामनेन षष्ठी ॥ ७१ ॥

(सर्वादेर्हेतुप्रयोगे हेतौ द्योत्ये च तृतीयाषष्ठ्यौ) केन हेतुना वसति । कस्य हेतोः ॥ ७२ ॥

(सु०) सर्वादेर्हेतुप्रयोगे हेतौ द्योत्ये च तृतीयाषष्ठ्यौ ॥ सर्वादिगणात्तृतीयाषष्ठ्यौ । तेन हेतुशब्दादपि तृतीयाषष्ठ्यौ ॥ ७२ ॥

(निमित्तपर्यायप्रयोगे सर्वादेः सर्वा विभक्तयोऽसर्वा-

देस्तृतीयादयः) को हेतुः । किं प्रयोजनम् । कं हेतुम् । केन हेतुना । ज्ञानेन निमित्तेन हरिः सेव्यः । ज्ञानाय निमित्ताय ॥ ७३ ॥

(सु०) **निमित्तपर्यायप्रयोगे सर्वादेः सर्वा विभक्तयोऽसर्वादेस्तृतीयादयः** ॥ सर्वादेर्निमित्तपर्यायप्रयोगे सर्वा विभक्तयः स्युः । असर्वादेस्तु प्रथमाद्वितीये न स्तः अन्याः स्युः । षष्ठी हेतुप्रयोगे सर्वादेर्हेतुप्रयोगे इति च सूत्रद्वयं गतार्थं बोध्यम् ॥७३॥

(त०) **निमित्तपर्यायप्रयोग** इति ॥ चकारस्यानुक्तसमुच्चयार्थस्यानुवर्तनात् एतत्सर्वार्थलाभः ॥ **सर्वा विभक्तय** इति ॥ सर्वादेरित्यर्थः ॥ ७३ ॥

अन्योक्ते प्रथमा ॥ आख्यातकृत्समासतद्धितनिपातोक्ते कारके सम्बन्धे च प्रथमा स्यात् ॥ घटः क्रियते । हरिः करोति । कृष्णः कंसं हतवान् । कृष्णेन कंसो हतः । पचनोऽग्निः । दानीयो विप्रः । उपाध्यायः । पचनी स्थाली । प्राप्तानन्दः । ऊढरथः । उपहृतपशुः । उद्धृतौदना । पीताम्बरः । वीरपुरुषः । कौङ्कुमम् । माथुरः । धनवान् । दृषद्वती । विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतमिति । क्रमादमुं नारद इत्यबोधि सः(क) ॥७४॥

इति विभक्त्यर्थाः ॥ १६ ॥

(सु०) **अन्योक्ते प्रथमा** ॥ कार्ये द्वितीया स्यात् । अन्योक्ते कार्ये तु प्रथमा ॥ कर्तरि तृतीया । अन्योक्ते कर्तरि प्रथमा ॥ करणे तृतीया । अन्योक्ते करणे प्रथमा ॥ संप्रदाने चतुर्थी । अन्योक्ते संप्रदाने प्रथमा ॥ अपादाने पञ्चमी । अन्योक्ते अपादाने प्रथमा ॥ संबन्धे षष्ठी । अन्योक्ते संबन्धे प्रथमा ॥ अधिकरणे सप्तमी । अन्योक्ते अधिकरणे प्रथमा ॥ आख्यातोक्ते यथा । घटः क्रियते मैत्रेण । आद्भुर्वीति कर्मण्यात् । यक् चतुर्ष्विति यक् ॥ हरिः सुखं करोति । 'कर्तरि पंच' इति कर्तरि परस्मैपदम् । तनादेरुविस्युप् ॥ कृदुक्तं यथा । कृष्णः कंसं हतवान् । 'क्तक्तवतू' इति कर्तरि क्तवतुः ॥ कृष्णेन कंसो हतः । कर्मणि क्तः ॥ पच्यतेऽनेनेति पचनोऽग्निः । साधनाधारयोर्युडिति करणे युट् ॥ दीयतेऽस्मा इति दानीयः । तव्यानीयाविति संप्रदानेऽनीयः ॥ उप समीपे गत्वा अधीयतेऽस्मादित्युपाध्यायः । संज्ञायामकर्तरि चेत्यपादाने घञ् ॥ पच्यतेऽस्यामिति पचनी । साधनाधारयोरित्यधिकरणे युट् । स्थाली हण्डिका ॥ समासोक्ते यथा । प्राप्त आनन्दो यं स प्राप्तानन्दः ॥ ऊढो रथो येन स ऊढरथोऽनड्वान् वृषभः ॥ उपहृतः पशुर्यस्मै स उपहृतपशू रुद्रः ॥ उद्धृत ओदनो यस्याः सा उद्धृतौदना स्थाली ॥ पीतमम्बरं यस्य स

(क) हतः स दैत्यः प्राप्तश्रीर्नैत एवार्हति क्षयम् ।
विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम् ॥ इति कुमारसम्भवे ।
चयस्त्विषामित्यवधारितं पुरा ततः शरीरीति विभाविताकृतिम् ।
विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि सः ॥ इति माघे ।
छन्दसि स्यादिः सर्वत्र । दध्ना जुहोति । पुनन्तु ब्रह्मणस्पतिः, व्रजतीर्विरेजुः ।
कर्ता कर्म च करणं सम्प्रदानं तथैव च । अपादानाधिकरणमित्याहुः कारकाणि षट् ॥
इति चक्रधराख्यटिप्पण्यां कारकप्रकरणं समाप्तम् ॥ १६ ॥

पीताम्बरो हरिः ॥ वीराः पुरुषा यस्मिन् स वीरपुरुषो ग्रामः ॥ तद्धितोक्ते यथा । कुङ्कुमेन रक्तं वस्त्रं कौङ्कुमम् । तद्धितेनोक्तं कर्म । मथुराया आगतः माथुरः ॥ अण्प्रत्ययः ॥ धनमस्यास्तीति धनवान् । मान्तोपधाद्वत्विनौ इति वतुः । दृषद उपलाः सन्त्यस्यामिति दृषद्वती भूमिः ॥ निपातोक्ते यथा । विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतमित्यत्र संवर्द्धयेति भावे क्यप् । कथवन्तस्य क्रियापदस्य विषवृक्षमिति द्वितीयान्तं कर्म तत्रासांप्रतमित्यनेन निपातेनोक्तत्वात् प्रथमा । स्वयमात्मना छेत्तुमसांप्रतं न युज्यते इत्यर्थः ॥ क्रमादमुं नारद इत्यबोधि सः । अबोधीत्यत्र दीपजनबुधेति कर्तरीण् । तस्य नारदमिति द्वितीयान्तं कर्म । तत्र इति निपातयोगात्प्रथमा । उक्तं च । "यस्मिन्नर्थे विधीयन्ते लकारास्तद्धिताः कृतः । समासो वा भवेद्यत्र स उक्तः प्रथमा ततः ॥"

इति कारकप्रक्रिया ॥ १६ ॥

(त०) **अन्योक्ते प्रथमेति** ॥ अन्येन उक्तम् अन्योक्तं तस्मिन् कार्ये इत्यादौ प्रत्येकं संबध्यते । प्रत्येकाभिप्रायादेकवचननिर्देशः ॥ कार्ये द्वितीया, अन्योक्ते प्रथमा ॥ कर्तरि तृतीया, अन्योक्ते प्रथमेत्यादि ॥ **पचनोऽग्निरिति** ॥ पच्यतेऽनेनेति करणे युट् ॥ **दानीय इति** ॥ दीयतेऽस्मै इति विग्रहः ॥ **उपाध्यायादिति** ॥ उप समीपे गत्वाऽधीयतेऽस्मादित्युपाध्यायः ॥ पच्यतेऽस्यामिति पचनी ॥ प्राप्त आनन्दो यं स प्राप्तानन्दः ॥ ऊढः रथो येन सः ॥ उपहृतः पशुर्यस्मै सः ॥ उद्धृतः ओदनो यस्याः सा ॥ पीतमम्बरं यस्य ॥ वीराः पुरुषा यस्मिन् ॥ कुङ्कुमेन रक्तम् । मथुराया आगतः । धनं विद्यते यस्य ॥ दृषद्विद्यते यस्याः सा ॥ **असांप्रतमिति** ॥ असांप्रतमित्यस्य न युज्यत इत्यर्थः ॥ इदानीं द्विकर्मकोदाहरणमुच्यते । "दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम् । कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम् ॥" दुहादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णां कर्मणा यद्युज्यते तदेव गौणं कर्मेति परिगणनं कर्तव्यमित्यर्थः ॥ एतदर्थका अन्येऽपि ग्राह्याः ॥ **गां दोग्धि पयः** इत्यादि ॥ अत्र गोर्गौणत्वं पश्चादपेक्षणात् । पयआदिकं तु मुख्यमादावेवापेक्षणात् । कर्मणि प्रत्ययेन तु दुहादीनां गौणं न्यादीनां तु मुख्यं कर्मोक्तं भवति । गौर्दुह्यते पयः । ग्राममजा नीयते इत्यादि ॥ ण्यन्तानां कर्तरि गां दोहयति पयो गोपेन चैत्रः ॥ ण्यन्तात्कर्मणि गौर्दोह्यते पयो गोपेन चैत्रेणेत्यादि ॥

श्रीविद्यानगरस्थायिलोकेशकरशर्मणा । कृतायामिह टीकायां विभक्त्यर्थनिरूपणम् ॥

इति विभक्त्यर्थनिरूपणम् ॥ १६ ॥

अथ समासाः ॥ १७ ॥

समासश्चान्वये नाम्नाम् । नाम्नामन्वये सति समासो भवति ॥ चकारात्कृत्तद्धितधातुसंज्ञाप्रयोजकप्रत्यया अपि ॥ १ ॥

(सु०) **समासश्चान्वये नाम्नाम्** ॥ नाम्नी च नामानि च नामानि तेषां नाम्नाम्(क) । यद्यप्यविभक्ति नामेति संकेतितम् । तथाप्यत्र नाम्नामिति विभक्त्यन्तानामेव ग्रहणम् । समासप्रत्यययोः अलुक् क्वचिदित्यादिज्ञापकात् । अत्र विधिरिति शेषः । प्रथमा-

(क) नाम्नीति । एतेन द्वयोर्वा बहूनां वा पदानां समासो भवतीत्यर्थो लभ्यते ।

न्तानां पदानां पदयोर्वाऽन्वये सति यो विधिः स समाससंज्ञो भवति(क) । चकारस्त्वनुक्तसमुच्चयार्थः । तेन पदानामन्वये सत्येव कृत्तद्धितधातुसंज्ञाप्रयोजकप्रत्यया अपि भवन्ति ॥ समानि एकीभूतानि पदानि अर्था वाऽऽसते यस्मिन्स समासः ॥ 'आस उपवेशने' अस्मादाधारे घञ् ॥ सममेकमर्थमासयन्ति दीपयन्त्यस्मिन्समुदाये इति वा समासः । 'अस दीप्तौ ।' ण्यन्तादस्मात्स्वरात् इत्याधारेऽप्रत्ययः ॥ संश्लिष्टानि एकीभूतानि पदानि अस्यन्ते उच्चार्यन्तेऽस्मिन्निति वा समासः । आधारे घञ् ॥ समानां संश्लिष्टानां पदानामेकतामापन्नामासनमुच्चारणमिति वा समासः । भावे घञ् ॥ समसनं समासो वा । संपूर्वादस्यतेर्भावे घञ् ॥ अनेकपदस्य एकपदीभवनमित्यर्थः ॥ समस्यते इति वा समासः(ख)। संज्ञायामकर्तरि चेति कर्मणि घञ् ॥ अनु अन्तर्मध्ये यन्ति पदार्था यस्मिन्नर्थे इत्यन्वयः । इण् गतावस्मात् स्वरात् इत्यप्रत्ययः ॥ अनु अन्तः पदार्थानामयनं गमनमिति वाऽन्वयः । एकार्थीभावः ॥ अनु सहान्येन यन्ति सम्बन्धं लभन्ते पदानि यस्मिन्निति वाऽन्वयः । स्वरात् इत्याधारेऽप्रत्ययः ॥ अनु सहान्येन ईयन्ते सम्बन्धं प्राप्यन्ते पदान्यस्मिन्निति वाऽन्वयः ॥ सोऽन्वयो द्विधा । व्यपेक्षालक्षणः एकार्थीभावलक्षणश्चेति । तत्र व्यपेक्षालक्षणे विग्रहवाक्यमेव । एकार्थीभावलक्षणे तु वृत्तिरेव । तत्र स्वार्थपर्यवसायिनां पदानामाकाङ्क्षासंनिधियोग्यत्वेषु सत्सु यः परस्परसम्बन्धः स व्यपेक्षालक्षणः । विशिष्टकार्यरूपः एकार्थीभावलक्षणः ॥ विशेषेण गृह्यते ज्ञायते वृत्त्यर्थोऽनेनेति विग्रहः (ग) । विग्रहस्य वाक्यं विग्रहवाक्यम् । विग्रहवाक्यमपि द्विधा । लौकिकमलौकिकं चेति । प्रयोगार्हं परिनिष्ठितं साधु लौकिकम् । यथा । राज्ञः पुरुष इति । व्यपेक्षालक्षणः सम्बन्धो ह्यत्रैव ॥ अपरिनिष्ठितं प्रयोगानर्हमसाधु अलौकिकम् । यथा राजन् अस् पुरुष सु इति । समाससंज्ञादिकं चास्मिन्नेन प्रवर्तते इति ॥ परार्थाभिधानं वृत्तिः । परः स्वार्थादन्यो योऽर्थः स परार्थः । अथवा स्वस्मात् परस्य शब्दस्य योऽर्थः स परार्थः । तस्याभिधानं प्रतिपादनं परार्थाभिधानं सा वृत्तिः । कृत्तद्धितसमासैकशेषयङ्लुगन्तधातुरूपा इति पञ्च वृत्तयः । वृत्तिरपि द्विधा । जहत्स्वार्थाऽजहत्स्वार्था चेति । जहति स्वार्थं पदानि यस्यां सा जहत्स्वार्था । उक्तं च । "वृत्तौ वर्तिपदानामार्थक्यं पदे वर्णवत्" इति । यथा। वृषभ इत्यत्र वृषशब्दः सुकृतादेर्वाचकः भशब्दस्तु नक्षत्राणां वाचकः वृषभपदं तु बलीवर्दे शक्तम् । शक्तावयवानामानर्थक्यम् ॥ एवं कवलशब्दे । को वाय्वादेर्वाचकः । वो वरुणवाचकः । लः पृथिवीवाचकः । कवलपदं ग्रासे शक्तम् । शक्तौ तेषामानार्थक्यम् । तथा राजपुरुषशब्दयोः पृथक्शक्तयोरपि राजसंबन्धिनि पुरुषे शक्तिः । तत्र राजपुरुषशब्दयोरानर्थक्यम् । तदन्याजहत्स्वार्था ॥ १ ॥

(त०) समासश्चान्वयं नाम्नामिति ॥ समानि एकीभूतानि पदानि अर्था वा आसतेऽस्मिन्स समासः । आधारे घञ् ॥ अनु अन्तर्यन्ति पदार्था यस्मिन्नर्थे सोऽन्वयः ।

(क) उक्तं च पाणिनीये—'समर्थः पदविधिः' पदसम्बन्धी विधिः समर्थाश्रितो भवतीत्यर्थः ।इति॥

(ख) वस्तुतस्तु—एकवाचकतां प्राप्तो भिन्नार्थकानेकपदसमूहः समास इति समासचन्द्रिका ।

(ग) अत एव समासे भिन्नैव शक्तिरिति । ह्येतदुक्तम्–'समासे खलु भिन्नैव शक्तिः पंकजशब्दवत्'इति ॥ नैयायिकास्तु—समासे समुदायशक्तिं नाङ्गीकुर्वन्ति । लक्षणयैव निर्वाह इत्याहुः । तदुक्तं कृष्णेन—'समासे न शक्ति'रिति । शक्तिस्तु पदनिष्ठैव चेति ।

आधारे स्वरादः ॥ नाम्नामिति बहुवचनाद्द्वयोर्बहूनां च समासः । अन्वयो व्यपेक्षा परस्परापेक्षेति यावत् । चकारस्यानुक्तसमुच्चयार्थत्वादन्यवृत्तिलाभोऽपीत्याह-चकारादिति । धातुसंज्ञाप्रयोजकेति ॥ धातुसंज्ञां प्रयोजयन्तीति ते । येषु सत्सु संज्ञा भवतीति भावः ते च यङादयः । तेऽप्यन्वये सत्येव भवन्तीति बोध्यम् । यद्यपि नामसंज्ञा विभक्तिरहितस्यैव तथाप्यत्र सविभक्तिकानामेव समासः समासप्रत्यययोरिति लुग्विधानात् ज्ञापकात् । अत्राहुः । स्पष्टार्थपदानामिति तु नोक्तम् । पचति भवति पश्यति धावतीत्यादावन्वयसत्त्वेन समासप्रसङ्गात् । सति च तस्मिन् यथेष्टं प्रयोगो न स्यात् इति ॥ अत्रेदं वक्तव्यम् । नाम्नामित्युपादानात् आख्यातनिराकरणमिति त्वदभिमतम् । एवं च पर्यभूषत् पचतभृज्जतेत्यादौ कथं समासः । अथ 'नाम्नाम्' इति योगं विभज्य कतिपयतिङन्तोत्तरपदः समासः स च चन्द्रस्येव । आख्यातस्याख्यातेन क्रियासातत्यादौ च समास इति चेत्तदा तत्र तत्र तेनैव नियमेन विधानात् अन्यत्र प्राप्तिर्वारितैवेति किं तन्निराकरणाय पदान्तरेणेति । यत्तु अथार्थविभक्तिविशिष्टानां पदानां समासो निरूप्यते इत्युक्तं प्राचा तत्रार्थवदिति व्यर्थम् । विभक्तिविशिष्टत्वेनैव तल्लाभात् । किञ्च विभक्तिविशिष्टानामित्यपि व्यर्थं पदग्रहणेनैव तदर्थप्रतीतेः । विभक्त्यन्तं पदमित्यनेन हि विभक्तिविशिष्टस्यैव पदसंज्ञाविधानात् ॥ १ ॥

पूर्वेऽव्ययेऽव्ययीभावः ॥ अव्यये पूर्वपदे सति योऽन्वयः सोऽव्ययीभावसंज्ञकः समासो भवति(क) ॥ २ ॥

(सु०) **पूर्वेऽव्ययेऽव्ययीभावः** ॥ अव्यये पूर्वपदे सति पदयोर्योऽन्वय एकार्थीभावलक्षणः सोऽव्ययीभावसंज्ञकः समासोऽस्ति ॥ पूर्वग्रहणादेवाव्ययस्य पूर्वनिपातोऽव्ययीभावे । अन्यथाऽव्यये इत्येव सिद्धे किं तेन ॥ २ ॥

(त०) **पूर्वेऽव्ययेऽव्ययीभाव** इति ॥ पूर्वे इत्यस्य ग्रहणसामर्थ्याद्व्ययस्य पूर्वनिपातः । विभक्त्याद्यर्थेषु वर्तमाने एवाव्यये पूर्वे सतीति बोध्यम् । अन्यथाऽस्तिधन इत्यादावतिव्याप्त्यापत्तेः ॥ २ ॥

समासप्रत्यययोः ॥ समासे वर्तमानाया विभक्तेः प्रत्यये परे लुग्भवति ॥ नामत्वात्स्यादिः ॥ ३ ॥

(सु०) **समासप्रत्यययोः** ॥ प्रतीयते कर्तृकर्माद्यर्थोऽनेनेति प्रत्ययः । इण् गतावस्मात् स्वराद इत्यप्रत्ययः ॥ अथवा अय गतावस्मात्पचाद्यप्रत्यये प्रत्ययते प्रत्याययत्यर्थमिति प्रत्ययः । अन्तर्भावितण्यर्थः ॥ समासश्च प्रत्ययश्च समासप्रत्ययौ तयोः । भावे सप्तमीयम् ॥ समासे सति प्रत्यये च सति वर्तमानायाः स्यादिरूपाया विभक्तेर्लुक् स्यात्॥

(क) प्रायेण पूर्वपदप्रधानोऽव्ययीभाव इति लक्षणं समायाति ।

अथ—षोढा समासाः सैकपादर्षाविंशतिधा पुनः । नित्यानित्यत्वयोगेन लुगलुक्त्वेन च द्विधा ॥
तत्राष्टधा तत्पुरुषः सप्तधा कर्मधारयः । सप्तधा च बहुव्रीहिर्द्विगुराभाषितो द्विधा ॥
द्वन्द्वोऽपि द्विविधो ज्ञेयोऽव्ययीभावो द्विधा मतः । तेषां पुनः समासानां प्राधान्यं स्याच्चतुर्विधम् ॥
चकारबहुलो द्वन्द्वः स चासौ कर्मधारयः । यस्य येषां बहुव्रीहिः शेषस्तत्पुरुषः स्मृतः ॥
कर्तृकर्मक्रियायुक्तः प्रयोगः स्यात् सकर्मकः । अकर्मकः कर्मशून्यः कर्मद्वन्द्वो द्विकर्मकः ॥

ततः कृत्तद्धितसमासाश्चेति नामसंज्ञायां स्याद्युत्पत्तिर्भवतीत्यर्थः ॥ ३ ॥

(त०) समासप्रत्यययोरिति ॥ अत्रान्वयाभावेऽपि निपातनाद्द्वन्द्वः समासः। यद्वा भावे सप्तमीयम् । तथा च समासे सति प्रत्यये सतीति बोध्यम् । प्रतीयते कर्माद्य-नेनेति प्रत्ययः । इण् गतौ । स्वरादः ॥ ननूक्तार्थानामप्रयोग इति न्यायेनैव विभक्तेरप्र-योगो भविष्यति । चशब्दादेरिव वृत्तौ तदर्थस्यान्तर्भावात् । परार्थाभिधानस्यैव वृत्तिपदा-र्थत्वात्समासस्य च वृत्त्यन्तर्भावात् इति किमनेनेति चेत्सत्यम् । राजाश्व इत्यादौ प्रत्य यलक्षणेन पदकार्यार्थं स्वाभाविकया अपि निवृत्तेः सूत्रेण विधानात् ॥ ३ ॥

स नपुंसकम् ॥ अव्ययीभावो नपुंसकलिङ्गो भवति ॥ नपुंसकस्येति ह्रस्वः ॥ ४ ॥

(सु०) **स नपुंसकम्** । तच्छब्देन संनिहितोऽव्ययीभावः परामृश्यते । स्त्री च पु-मांश्च स्त्रीपुंसौ । नस्त्रीपुंसाविति न पुंसकम् । स्त्रीपुंसशब्दस्य पुंसकभावः सहादित्वान्निपा-त्यते । नपुंसकत्वान्नपुंसकस्येति । ह्रस्वविधानम् ॥ ४ ॥

(त०) **स नपुंसकमिति** ॥ तच्छब्दस्य पूर्वपरामर्शित्वादव्ययीभावो गृह्यते । न स्त्री न पुमानिति नपुंसकं स्त्रीपुंसशब्दस्य पुंसकभावो निपातनात्सहादित्वाद्वा । अ-त्राहुः । सन्निधानादेवानुवृत्तिलाभे सिद्धे स्पष्टार्थं सग्रहणमिति ध्येयमिति । अत्रेदमवधे-यम् । कार्यिणः पूर्वकथनमग्रिमस्यैव कार्यत्वविज्ञानार्थमव्ययीभावानुवृत्तावपि विपरीता-र्थप्रसङ्गः स्यात् । नपुंसकलिङ्गमव्ययीभावसंज्ञं स्यात् इति । तन्निराकरणाय तच्छब्दस्या-वश्यकत्वात् ॥ ४ ॥

अव्ययीभावात् ॥ विभक्तेर्लुक् अधिस्त्रि(क) ॥ ५ ॥

(सु०) **अव्ययीभावात्** ॥ ननु अनव्ययमव्ययं भवतीत्यव्ययीभावः । 'अभूतत-द्भावे' इति च्विः । ज्वलादेर्ण इति भवतेर्णप्रत्ययः । अथवा अनव्ययस्य अव्ययत्वेन भव-नमस्मिन्नेकार्थीभावे इति अव्ययीभावः । भावे आधारे वा घञ् । एवमन्वर्थसंज्ञाविज्ञा-नात् अव्ययादिति लुक् प्राप्तिरस्त्येव किमर्थमेतत् । मैवम् । तत्पुरुषादिसंज्ञावदस्य अन्व-र्थत्वाभावात् । तर्हि तु योगविभागो माऽस्तु । अव्ययीभावादतोऽमनत इत्येकयोग एवा-स्तु । लुक् तु अव्ययादित्यनेन सिद्ध एव । अतो योगविभाग एव ज्ञापयत्यत्रान्वर्थसंज्ञा नास्तीति । अस्माद्विभक्तेर्लुक् स्यात् ॥ अथ पाणिनिसूत्रम् । "**अव्ययं विभक्तिस-मीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगप-द्यसादृश्यसंपत्तिसाकल्यान्तवचनेषु** ॥" विभक्त्यादिष्वर्थेषु विद्यमानमव्ययमन्वये सति सुबन्तेन नाम्ना सह समस्यते ॥ विभक्त्यर्थेऽव्यये यथा स्त्रियामित्यधिस्त्रि । लौकि-कविग्रहवाक्यमिदम् । सप्तम्यर्थस्य द्योतकोऽधिः । स्त्री ङि अधि इत्यलौकिकविग्रहवा-क्यम् । अत्र निपातेनोक्तेऽप्यधिकरणे समासविधानसामर्थ्यात् सप्तमी । अन्यैस्तु स्त्रिय-मधिकृत्येति व्याख्यातं तदसत् । अधिहरीत्यत्राधिकृत्येत्यर्थस्याप्रतीतेः । क्रमादमुं नारद इत्यबोधि स इत्यादौ समासो न । इति शब्दस्य प्रकृतपरामर्शकत्वेन कर्मत्वमात्रानभिधा-

(क) अधिस्त्रीति । विभक्त्यर्थाव्यये उदाहरणमिदम् । स्त्रियामित्यधिस्त्रि । अधिः सप्तम्यर्थद्योतकः ।

यकत्वात् । एवं च विभक्तिशब्दः सप्तम्यां पर्यवस्यति ॥ समीपार्थेऽव्यये यथा । कुम्भस्य समीपमिति उपकुम्भम् ॥ समयाग्रामम् । निकषा लङ्काम् । आराद्वनादित्यत्र तु नाव्ययीभावो विनादियोगे द्वितीयेति ऋतेआदियोगे पञ्चमीति च विधानसामर्थ्यात् ॥ ५ ॥

(त०) अव्ययीभावादिति ॥ विभज्यते विविच्य बोध्यते कर्तृकर्माद्यर्थोऽनयेति विभक्तिः यौगरूढत्वात्कृत्स्यादिषु नातिव्याप्तिः । स्यादेः सिप इति वा वक्तमुचितम् । कुम्भकार इत्यत्र तु धातोरेव प्रत्ययविधानान्न स्यादेर्लुक् ॥ अधिहरि इति ॥ हिपाम् इतीति विग्रहः । नित्यसमासोऽयम् । अस्वपदविग्रहत्वात् । तथा चोक्तम् । अविग्रहो नित्यसमासोऽस्वपदविग्रहो वेति ॥ विग्रहश्च द्विविधः । लौकिकोऽलौकिकश्च । परिनिष्ठितत्वात्साधुर्लौकिकः प्रयोगानर्होऽसाधुरलौकिकः ॥ ५ ॥

अतोऽमनतः ॥ अदन्तादव्ययीभावाद्विभक्तेरलुक् । अतं वर्जयित्वाऽमादेशः । कुम्भस्य समीपमुपकुम्भम्(क) ॥ ६ ॥

(सु०) अतोऽमनतः ॥ विशेषणत्वात्तदन्तविधिः अदन्तादव्ययीभावात् । अनत इति षष्ठी । न अत् अनत् तस्या अनतो विभक्तेरमादेशः स्यात् ॥ ६ ॥

(त०) अतोऽमनतः इति ॥ अत इत्यस्य विशेषणत्वात्तदन्तलाभ इत्याशयेनादन्तादित्युक्तम् । अलुक्क्वचिदित्यतोऽलुगित्यनुवर्तते । तथा च वाक्यभेदेन व्याख्यानम् । ननु किं वाक्यभेदेनोभयविधानम् अमादेशस्यैव लुग्बाधकताऽस्तु इति चेन्न । टादावमादेशाभावे लुक्प्रवृत्तेरनिवार्यत्वापत्तेः । अम्विधानं तु सर्वादेशार्थम् । अनत इत्येकवचनं त्वव्ययीभावस्यैकवचनान्तत्वाभिप्रायेण । सर्ववचनान्तत्वपक्षे तु अनत इत्याद्युपलक्षणं वचनत्रयस्यापि ॥ ६ ॥

वा टाङ्योः ॥ अदन्तादव्ययीभावाट्टाङ्योरम्वा ॥ उपकुम्भम्—उपकुम्भेन वा कृतम् । उपकुम्भम्—उपकुम्भे वा निधेहि ॥ अनतः किम् । उपकुम्भात् ॥ मद्राणां समृद्धिः सुमद्रम् । यवनानां व्यृद्धिर्दुर्यवनम् । मक्षिकाणामभावो निर्मक्षिकम् । हिमस्यात्ययोऽतिहिमम् । निद्रा संप्रति न युज्यते इत्यतिनिद्रम् । हरिशब्दस्य प्रकाश इति इतिहरि । विष्णोः पश्चादनुविष्णु । रूपस्य योग्यमनुरूपम् । अर्थमर्थं प्रति प्रत्यर्थम् । शक्तिमनतिक्रम्य करोति यथाशक्ति । हरेः सादृश्यं सहरि । सहादेः सादिरिति सहस्य सः । ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठम् । चक्रेण युगपत्सचक्रम् । सदृशः सख्या ससखि । क्षत्राणां संपत्तिः सक्षत्रम् । तृणमप्यपरित्यज्य सतृणमत्ति । अग्निग्रन्थपर्यन्तमधीते

(क) कुम्भस्य समीपमिति । अत्र समस्यमानस्य उपशब्दस्य स्थाने समीपमिति प्रयुक्तम् । कुम्भस्य उप इति तु न विग्रहः । नित्यसमासत्वेनास्वपदविग्रहौचित्यात् ।

ननु समया ग्रामं, निकषा लङ्काम्, आरात् वनादित्यत्रापि समयाद्यव्ययानां समीपार्थकत्वात् अव्ययीभावः स्यात् । ततश्च 'ग्रामं समया, ग्रामं निकषा वनादारात्' इति च प्रयोगो न स्यात् ।

साग्नि(क) ॥ ७ ॥

(सु०) वा टाङ्योः ॥ कुत्रचिद्भवति कुत्रचिन्न भवतीयं व्यवस्थितविभाषा । तस्या आश्रयणात् सुमद्रम् उन्मत्तगङ्गमित्यादौ सप्तम्या नित्यमेवाऽम् ॥ समृद्ध्यर्थे यथा । ऋद्धेराधिक्यं समृद्धिः । मद्राणां देशविशेषाणां समृद्धिः सुमद्रम् । उत्तरपदार्थप्राधान्ये तु तत्पुरुषोऽपि भवति । समृद्धा मद्रा इति सुमद्राः ॥ वृद्ध्यर्थे यथा । विगता ऋद्धिर्व्यृद्धिः । यवनानां व्यृद्धिरिति दुर्यवनम् । इह तेषामृद्ध्यभावे समासः ॥ अर्थाभावे यथा । मक्षिकाणामभाव इति निर्मक्षिकम् । संसर्गाभावेऽयं समासः ॥ अत्यये यथा । हिमस्यात्ययो ध्वंस इति अतिहिमम् ॥ असंप्रत्यर्थे यथा । संप्रतीत्यव्ययमिदानोमित्यर्थे । युजिक्रियान्तर्भावेण नञ्समासः सौत्रो बोध्यः । निद्रा संप्रति न युज्यते इत्यतिनिद्रम् ॥ शब्दप्रादुर्भावे यथा । हरिशब्दस्य प्रकाश इति इतिहरि । षष्ठ्यन्तेन हरिशब्देन सह प्रकाशार्थस्येतिशब्दस्य समासः । विष्णोः पश्चादिति अनुविष्णु । पश्चाच्छब्दस्य तु नायमव्ययीभावो भवति । ततः पश्चात् स्रंसते इति भाष्यप्रयोगात् । सति चात्राव्ययीभावे पश्चाच्छब्दस्य पूर्वनिपातः स्यादित्यर्थः ॥ यथार्थे यथा । योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि यथार्थाः । तत्रानुरूपता योग्यता । रूपस्य योग्यमिति अनुरूपम् ॥ पदार्थानां व्याप्तुमिच्छा वीप्सा । अर्थमर्थं प्रतीति प्रत्यर्थम् । समासे वीप्साया अन्तर्भावान्न द्विः । वीप्सार्थकप्रतियोगे द्वितीयाविधानात् वाक्यमपि । पदार्थानतिक्रमः पदार्थानतिवृत्तिः । शक्तिमनतिक्रम्येति यथाशक्ति ॥ हरेः सादृश्यमिति वक्ष्यमाणेन सहादेः सादिरित्यनेन सहस्य सादेशः । सहरि ॥ अनुपूर्व्यार्थे यथा । अनुपूर्वस्य भाव इत्यानुपूर्व्यम् । भावे तत्त्वयणइति यण् । ज्येष्ठस्यानुपूर्व्येणेति अनुज्येष्ठम् ॥ यौगपद्ये यथा । चक्रेण युगपत्समकालमिति सहादेरित्यनेन सहस्य सः । सचक्रम् ॥ सादृश्ये यथा । यथार्थत्वेनैव सिद्धे पुनः सादृश्यग्रहणं गुणभूतेऽपिऽसादृश्ये यथा स्यादित्येतदर्थम् । सदृशः सख्या इति सहादेरित्यनेन सहस्य सः । ससखि ॥ संपत्तौ यथा । अनुरूप आत्मभावः संपत्तिः । क्षत्राणां संपत्तिरिति सहादेरित्यनेन सहस्य सः । सक्षत्रम् ॥ साकल्ये यथा । तृणमप्यपरित्यज्येति सहादेरिति सहस्य सः । सतृणम् । साकल्येनात्ति इत्यर्थः ॥ अन्तवचने यथा । उच्यते तद्वचनम् अन्तस्य वचनम् अन्तवचनं तस्मिन् । अग्निशब्दोऽग्निप्रतिपादकग्रन्थे वर्तते । अस्वपदविग्रहो नित्यसमासोऽयम् । अग्निग्रन्थपर्यन्तमिति साग्नि अधीते ॥ ७ ॥

(त०) वा टाङ्योरिति ॥ अव्ययीभावादिति किम् । कृष्णश्रितेन । अन्दतात्किम् । अधिस्त्रि । वेत्यस्य व्यवस्थितत्वाश्रयणात्सुमद्रमुन्मत्तगङ्गमित्यादौ सप्तम्या नित्यमम्भावः । उपकुम्भमिति ॥ कुम्भस्य समीपे इत्यर्थः । व्यृद्धिरिति ॥ विगता ऋद्धिः व्यृद्धिः ॥ अत्यय इति ॥ अत्ययो ध्वंसः ॥ निद्रेत्यादि । असंप्रत्यर्थेनातिशब्देनाव्ययीभावः । तत्र असंप्रतीत्यस्य संप्रत्यभाव इत्यर्थमुक्त्वतोपभोग्यवस्तुनो यो वर्तमानः

(क) अग्निग्रन्थपर्यन्तमिति । अग्निशब्देन अग्निचयनप्रतिपादको ग्रन्थो विवक्षितः ।। तेनान्तावयवेन सहितं ग्रन्थमिति विग्रहः । अग्निग्रन्थपर्य्यन्तमिति बहुव्रीहिः । ग्रन्थमिति अन्यपदार्थाध्याहारः । अधीत इति तु न समासप्रविष्टम् । अन्तावयवेनाग्निग्रन्थेन सहितं वेदकल्पसूत्रादिभागमधीते इत्यर्थः । अत्र कृत्स्नस्याध्येतव्यत्वाद् अग्निग्रन्थपर्यन्ताध्ययने तत्कात्स्न्यानवगमात् साकल्यात् पृथगुक्तिः ।

कालस्तस्यैव निषेधः क्रियत इत्युक्तं केनचित्तन्न । न हि भूतले घटो नास्तीत्यनेन हि भूतलनिषेधः केनचिद्दूरीक्रियते ॥ ७ ॥

यथाऽसादृश्ये ॥ यथाशब्दः सादृश्ये न समस्यते ॥ यथा हरिस्तथा हरः ॥ ८ ॥

(सु०) **यथाऽसादृश्ये** ॥ असादृश्ये एव यथाशब्दः समस्यते । सादृश्ये इति यथार्थे इति वा प्राप्तं निषिध्यते । यथा हरिस्तथा हरः । यथाशब्दो हरे रुपमानत्वं द्योतयति ॥८॥

(त०) **यथाऽसादृश्य** इति ॥ असादृश्य इति छेदः । यथाशब्दस्याव्ययत्वादेव सिद्धे सूत्रारम्भसामर्थ्यात् । योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि यथार्थाः । योग्यता अनुरूपता । वीप्सा पदार्थानां व्याप्तुमिच्छा । पदार्थानतिवृत्तिः पदार्थानतिक्रमः । उदाहरणानि तु पूर्वमेवोक्तानि ॥ ८ ॥

अवधारणार्थे यावति च ॥ अवधारणार्थे यावच्छब्दे प्रयुज्यमाने योऽन्वयः सोऽव्ययीभावसंज्ञकः समासो भवति ॥ यावन्तः श्लोकाः तावन्तोऽच्युतप्रणामा यावच्छ्लोकम् ॥ ९ ॥

(सु०) **अवधारणार्थे यावति च** ॥ यावच्छब्दस्याव्ययत्वादेव सिद्धे नियमार्थमिदम् । अवधारणे एव यावदव्ययं समस्यते नान्यस्मिन्नर्थे । "यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे" इत्यमरः ॥ यत्परिमाणं येषां ते यावन्तः । एतत्किंयत्तद्भ्य इति वतुः । यत्तदेतदामित्यात्वम् । तत्परिमाणं येषां ते तावन्तः । तद्धितान्तेन विग्रहः । समासस्त्वव्ययेनैव । अस्वपदविग्रहोऽयम् ॥ अवधारणे किम् ॥ यावद्दत्तं तावद् भुक्तम् । नावधारयामि कियन्मया भुक्तमिति ॥ ९ ॥

(त०) **अवधारणार्थे यावति** चेति ॥ निश्चयार्थे यावच्छब्दे इत्यर्थः ॥ **यावच्छ्लोक**मिति ॥ तद्धितान्तेन विग्रहः । समासस्त्वव्ययेनेत्यस्वपदविग्रहोऽयम् । तथा च । यावच्छब्दस्याव्ययत्वादेव सिद्धे नियमार्थमिदमवधारणे एव यावदव्ययं समस्यते नान्यस्मिन्निति । "यावत्तावच्च साकल्येऽवधौ मानेऽवधारण" इत्यनेकार्थत्वान्नियम उपपद्यते । अवधारणे किम् । यावद्दत्तं तावद्भुक्तम् । नावधारयामि कियन्मया भुक्तमिति ॥ ९ ॥

(क्वचिदनव्ययपूर्वपदोऽप्यव्ययीभावः) उन्मत्ता गङ्गा यस्मिन् देशे इत्युन्मत्तगङ्गम् । शाकस्य लेशः शाकप्रति । अक्षेण विपरीतं वृत्तमक्षपरि । शलाकया विपरीतं वृत्तं शलाकापरि । एकपरि ॥ १० ॥

(सु०) **क्वचिदनव्ययपूर्वपदोऽप्यव्ययीभावः** ॥ अन्यपदार्थे स्याद्यन्तं नदीवाचिभिः सह नित्यं समस्यते संज्ञायाम् ॥ उन्मत्ता गङ्गा यस्मिन् । पुंवद्वेति पुंवद्भावः । तत् उन्मत्तगङ्गं देशः । बहुव्रीह्यर्थे अव्ययीभावः । नित्यसमासोऽयम् ॥ लेशार्थेन प्रतिना सह स्याद्यन्तं नित्यं समस्यते । "लवलेशकणाणवः" इत्यमरः ॥ शाकस्य लेश इति शाकप्रति ॥ **अक्षशलाकासंख्याः परिणा नित्यं समस्यन्ते** । द्यूतव्यवहारे पराजये एवार्थे । अक्षेण विपरीतं वृत्तमिति अक्षपरि । पूर्वं यथा वृत्तं तथा न वृत्तमित्यर्थः ॥

शलाकया विपरीतं वृत्तमिति शलाकापरि ॥ एकेन विपरीतं वृत्तमिति एकपरि । एते नित्यसमासाः ॥ १० ॥

(क्वचिद्वा) अपविष्णोः । अपविष्णु । परिविष्णोः । परिविष्णु । बहिर्वनात् बहिर्वनम् । प्राग्वनात् प्राग्वनम् । आमुक्तेः आमुक्ति । अभ्यग्निम् । अभ्यग्नि । प्रत्यग्निम् । प्रत्यग्नि । वनस्य समीपमुपवनम् । गङ्गामनु अनुगङ्गम् । तिष्ठन्ति गावो यस्मिन्काले स तिष्ठद्गु ॥ आयतीगवम् ॥ पारे गङ्गायाः पारेगङ्गम् । मध्ये गङ्गयाः मध्येगङ्गम् ॥ इत्यादयो निपात्याः । खले यवा यस्मिन् काले खलेयवम् । द्वौ मुनी वंश्यौ द्विमुनि । त्रिमुनि व्याकरणस्य । सप्त गङ्गाः समाहृताः सप्तगङ्गम् । द्वियमुनम् ॥ ११ ॥

(सु०) अथ वैकल्पिकाः समासाः ॥ क्वचिद्वा ॥ अपपरिबहिरञ्चूत्तरपदाः पञ्चम्या सह समस्यन्ते वा ॥ अपपरी वर्जनार्थकौ ग्राह्यौ ॥ बहिर्योगे तु ऋतेआदित्वात्पञ्चमी सा सर्वत्र न । "करस्य करभो बहिः" इत्यमरोक्तेः ॥ अञ्चुधातुरुत्तरपदं यस्य सोऽञ्चूत्तरपदः । यथा । प्राग्वनमिति ॥ मर्यादाभिविध्यर्थकाङ् पञ्चम्यन्ते वा समस्यते । आमुक्ति संसारः । आबालं हरिभक्तिः ॥ अभिप्रती आभिमुख्यार्थकौ चिह्नवाचिना सह वा समस्येते । अभ्यग्नि शलभाः पतन्ति । अत्र लक्ष्यलक्षणभावे विनादित्वात् द्वितीया ॥ दैर्घ्यसमीपार्थकोऽनुश्चिह्नवाचिना षष्ठ्यन्तेन सह वा समस्यते । वनस्य समीपमिति अनुवनम् अशनिर्गतः । लक्षणभूतस्य वनस्य समीपं गत इत्यर्थः ॥ गङ्गाया अनु इति अनुगङ्गं सेना । गङ्गादैर्घ्यसदृशदैर्घ्योपलक्षितेत्यर्थः ॥ समासाभावे गङ्गामनु । विनादित्वात् द्वितीयैव । समासे तु विध्यर्थत्वात्षष्ठी ॥ तिष्ठन्ति गावो यस्मिन्काले स तिष्ठद्गु दोहनकालः । गोरिति ह्रस्वः । निपातनाच्छतृप्रत्ययः ॥ आयन्त्यो गावो यस्मिन्काले स आयतीगवं संध्या । निपातनाद्वप्रत्ययः । ओऽवित्यव् पुंवद्भावाभावश्च ॥ खले यवा यस्मिन् काले स खलेयवम् । सप्तम्या अलुग् निपातनात् । इह बहुव्रीहिविषये अव्ययीभावः ॥ पारमध्यशब्दौ षष्ठ्यन्तेन वा समस्येते एदन्तत्वं चानयोर्निपात्यते । गङ्गायाः पारमिति पारेगङ्गम् । गङ्गाया मध्यमिति मध्येगङ्गम् । पक्षे षष्ठीतत्पुरुषोऽपि । गङ्गायाः पारमिति गङ्गापारम् । एवं गङ्गामध्यम् । वाक्यमपि । गङ्गायाः पारम् । गङ्गाया मध्यमिति ॥ वंश्यवाचिना सह संख्या वा समस्यते । वंशः संतानः । स द्विविधो विद्यया जन्मना च । तत्र भवो वंश्यः । द्वौ मुनि वंश्यौ पाणिनिकात्यायनाविति द्विमुनि । त्रयो मुनयो वंश्या इति त्रिमुनि । व्याकरणस्येति संबन्धे षष्ठी । अन्यपदार्थप्राधान्यविवक्षायां तु त्रयो मुनयो वंश्या यस्मिंस्त्रिमुनि । बहुव्रीहिरेवायम् ॥ जन्मना वंश्यो यथा । एकविंशतिर्भारद्वाजा वंश्या इति एकविंशतिभारद्वाजम् ॥ नदीवाचिना सह संख्या समस्यते । समाहारार्थे । सप्त गङ्गाः समाहृताः इति सप्तगङ्गम् । द्वे यमुने समाहृते इति । पुंवद्वेति पुंवद्भावः । द्वियमुनम् । द्विगोरपवादोऽयमव्ययीभावः ॥ ११ ॥

(त०) इत्यादयो निपात्या इति ॥ सहादित्वादिति भावः ॥ ११ ॥

टाड्काः ॥ समासे सति ट अ ड क इत्येते प्रत्यया भवन्ति ॥ शरदः समीपमुपशरदम् ॥ प्रतिविपाशम् ॥ १२ ॥

(सु०) अथ समासान्तप्रत्ययानाह । समासस्य समासोत्तरपदस्य वा चरमावयवाः समासान्ता इत्यर्थः ॥ **टाड्काः** ॥ टश्च अश्च डश्च कश्च ते टाड्काः । समासे इत्यनुवर्तते । टकार ईबर्थः । अकारोऽदन्तत्वफलकः । डष्टिलोपार्थः । कः श्रवणार्थः न स्वित्संज्ञकः । प्रयोजनाभावात ॥ अव्ययीभावे शरदादिभ्यष्टप्रत्यय एव । शरद् विपाश् अनस् मनस् उपानह् दिव् हिमवत् अनडुह् दिश् दृश् विश् चेतस् चतुर् त्यद् तद् यद् किम् एते शरदादयः । शरदः समीपमिति उपशरदम् । टः । विपाशं प्रतीति प्रतिविपाशम् । विनादित्वात् प्रतियोगे द्वितीया । "विपाशा तु विपाट् स्त्रियाम्" इत्यमरः ॥ १२ ॥

(त०) **टाड्का** इति ॥ टश्च अश्च डश्च कश्च ते टाड्काः । समासइत्यन्वय इत्यतोऽनुवृत्तं समास इति सप्तम्या विपरिणम्यत इत्याह—**समासे सतीति** ॥ समासे चिकीर्षिते नाम्नष्टादयो भवन्तीति बोध्यम् । ततो विभक्तिं विधाय टाद्यन्तेन समासः तेन समासस्यान्तावयवाष्टादयः । ततश्चोपशरदमित्यादावव्ययीभावस्यादन्तत्वाद्विभक्तेरम् सिध्यति । अन्यथा अव्ययीभावात् परत्वेनाकारस्यादन्तत्वाभावान्नाम् सिद्ध्येदिति भावः । टस्त्वीबर्थः । राजगवीत्यादौ ॥ इत्यव्ययीभावः ॥ १२ ॥

(जराया जरस्) उपजरसम् । अक्षि प्रति प्रत्यक्षम् ॥ अक्ष्णः परं परोक्षम् । परशब्दस्य परस् । परोक्ष इति ज्ञापकात् । अन्वक्षम् । उपराजम् ॥ क्लीबे वाऽन्लोपश्च ॥ उपचर्मम्—उपचर्म ॥ झसान्ताद्वा । उपसमिधम्—उपसमित् ॥ नद्यादिभ्यो वा ॥ उपनदम्—उपनदि ॥ १३ ॥

इत्यव्ययीभावः ॥

(सु०) **जराया रजस्** ॥ अव्ययीभावे जराशब्दस्य जरसादेशष्टप्रत्ययश्च ॥ जरायाः समीपमिति उपजरसम् । टः । प्रतिपरसमनुभ्योऽक्षिशब्दादव्ययीभावे टः । अक्षिप्रतीति प्रत्यक्षम् । यस्येतीकारलोपः ॥ अक्ष्णः परविषय इति परोक्षम् । परस्य परसादेशे सस्य विसर्गे च कृतेऽतोऽत्युरित्युत्वम् । ओत्वे एदोतोऽत इत्यल्लोपः । परोक्षम् । अक्ष्णो योग्यम् इति समक्षम् ॥ अक्ष्णः पश्चादिति अन्वक्षम् ॥ अन्नन्तादव्ययीभावाट्टः । राज्ञः समीपमिति उपराजम् ॥ नो वेति टिलोपः ॥ आत्मनि इति अध्यात्मम् ॥ वैकल्पिकं टप्रत्ययमाह ॥ अव्ययीभावे नान्तनपुंसकाद्गिरिशब्दात् झसप्रत्याहारान्तात् नदीपौर्णमास्याग्रहायणीभ्यश्च वा टः । चर्मणः समीपमिति उपचर्मम्—उपचर्म ॥ गिरेः समीपमिति उपगिरम् । उपगिरि । समिधः समीपमिति उपसमीधम् । उपसमित् । नद्याः समीपमिति उपनदम् ॥ नपुंसकस्येति ह्रस्वे उपनदि ॥ पौर्णमास्याः समीपमिति उपपौर्णमासम् । उपपौर्णमासि ॥ आग्रहायण्याः समीपमिति उपाग्रहायणम्—उपाग्रहायणि ॥ १३ ॥

इत्यव्ययीभावः ॥

अमादौ तत्पुरुषः ॥ द्वितीयाद्यन्ते पूर्वपदे सति योऽन्वयः स त-

त्पुरुषसंज्ञः समासो भवति(क) ॥ ग्रामं प्राप्तो ग्रामप्राप्तः । कृष्णाश्रितः । कूपपतितः । ग्रामगतः । खट्वारूढः । मुहूर्तसुखम् । दुःखातीतः । ग्रामगमी । अन्नबुभुक्षुः । दात्रेण छिन्नम् दात्रच्छिन्नम् । मासेन पूर्वो मासपूर्वः । मातृसदृशः । पितृसदृशः । माषोनम् । वाक्कलहः । आचारनिपुणः । गुडमिश्रः । मासावरः । हरित्रातः । नखभिन्नः । दध्योदनः । गुडधानाः । यूपाय दारु यूपदारु ॥ अर्थस्य विशेष्यलिङ्गता । द्विजायायं द्विजार्थः सूपः । द्विजार्था शाटी । द्विजार्थं पयः ॥ भूतबलिः । गोहितम् । गोसुखम् । गोरक्षितम् । चौराद्भयं चौरभयम् । सुखापेतः । दुःखापोढः । व्याघ्रभीतः । राज्ञः पुरुषः राजपुरुषः । द्विजयाजकः । देवपूजकः ॥ १४ ॥

(सु०) अमादौ तत्पुरुषः ॥ अम् आदिऽर्यस्य सोऽमादिस्तस्मिन्नमादौ प्रत्यये सुप्पर्यन्ते प्रत्ययग्रहणे तदन्तग्रहणमिति परिभाषयाऽमाद्यन्ते द्वितीयाद्यन्ते पूर्वं इत्यनुवर्तते पूर्वपदे सति यो नाम्नामन्वयः स तत्पुरुषसंज्ञः स्यात् । पूर्वं इत्युक्तत्वात् द्वितीयाद्यन्तस्य पूर्वनिपातश्च ॥

श्रितातीतपतितगतात्यस्तप्राप्तापन्नगामिबुभुक्षुभिः सह द्वितीयान्तं समस्यते (ख) । श्रितादिष्वापन्नान्तेषु गत्यर्थादकर्मकादिति कर्तरि क्तः श्रयादीनां गतिविशेषार्थत्वात् ॥ कृष्णं श्रित इति कृष्णश्रितः । अक्ताविति षष्ठीनिषेधः । कर्मणि क्तप्रत्यये तु कृष्णः श्रितो येनेति बहुव्रीहिरेव । तत्र च बहुव्रीहौ विशेषणसप्तम्यन्तक्तान्तानामिति श्रितस्य पूर्वनिपाते समासान्तकप्रत्यये च श्रितकृष्णक इति ॥ दुःखमतीत इति दुःखातीतः । अति पूर्वकादिणः कर्तरि क्तः ॥ 'पत गतौ' चुरादिरदन्तोऽस्मात्कर्तरि क्ते कूपपतितः ॥ ग्रामगतः ॥ तुहिनमत्यस्त इति तुहिनात्यस्तः । अत्यासो व्यतिक्रमः सोऽपि गतिविशेष एवेति कर्तरि क्तः ॥ सुखप्राप्तः ॥ दुःखापन्नः ॥ ग्रामं गमीति ग्रामगमी । गमेरिनिरित्यौणादिको भविष्यत्काले इनिः । भविष्यत्यकस्येति सूत्रेण षष्ठीनिषेधात्कर्मणि द्वितीया ॥ अन्नं बुभुक्षुरिति अन्नबुभुक्षुः । सान्ताऽऽशंसभिक्षिभ्य इत्युप्रत्ययः ॥

द्वितीयान्तः खट्वाशब्दः कालवाची च क्तान्तेन समस्यते (ग) । खट्-

---

(क) अथ तत्पुरुषः । प्रायेणोत्तरपदप्रधानस्तत्पुरुषः । स द्विधा । व्यधिकरणः, समानाधिकरणश्चेति । तत्र भिन्नविभक्तिकपदघटितो व्यधिकरणः । सोऽपि द्वेधा । नित्योऽनित्यश्च । अनित्यो द्वितीयादिस्तत्पुरुषः । केचित्प्रथमातत्पुरुषोऽस्तीति कथयन्ते । उदाहरणम्—अर्धं पिप्पल्याः, अर्धपिप्पली । पूर्वं कायस्य, पूर्वकायः । इत्यादि । प्रथमातत्पुरुषोऽयम् । नित्यो द्विविधः । सुबन्तसमासः कृदन्तसमासश्चेति । सर्वेषामुदाहरणमुन्नेयम् ।

(ख) 'द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः' । द्वितीयान्तं श्रितादिप्रकृतिकैः सुबन्तैः सह वा समस्यते । स तत्पुरुषः । 'गम्यादीनामुपसंख्यानम्' । इत्यादि पाणिनीयसूत्रवार्त्तिकमवलम्ब्याह—श्रितेत्यादि ।

(ग) 'खट्वा क्षेपे', 'कालाः', इति पाणिनीसूत्रमवलम्ब्याह—द्वितीयान्तः खट्वाशब्द इत्यादि । खट्वा अम् आरूढ सु इत्यलौकिकविग्रहः । *लौकिकविग्रहस्तु नास्तीत्यत आह-नित्यसमासो-*

वारूढो जाल्मः । नित्यसमासोऽयम् । "जाल्मोऽसमीक्ष्यकारी स्यात्" इत्यमरः ॥ मासं प्रमित इति मासप्रमितः । 'माङ् माने' कर्तरि क्तः ॥

अत्यन्तसंयोगे द्वितीयान्तः कालवाची स्याद्यन्तेन समस्यते (क) मुहूर्तं सुखमिति मुहूर्त्तसुखम् । कालाध्वनोरिति द्वितीया ॥

तृतीयान्तं तदर्थकृतगुणवचनेन सह समस्यते (ख) । गुणमुक्त्वा यो द्रव्यमुक्तवान् स गुणवचनः । कर्तरि युट् । गुणश्चात्र 'सत्त्वे निविशते' इत्यादिलक्षणलक्षितो गृह्यते । छिन्नमस्त्यस्मिन्निति छिन्नम् । दात्रेण छिन्नमिति दात्रच्छिन्नम् । करणे तृतीया। 'छिदिर् द्वैधीकरणे ।' अस्माद्भावे क्ते छिन्नशब्दः क्रियारूपापन्ने गुणे वर्तित्वा पश्चात् छिन्नमस्त्यस्मिन्निति छिन्नमित्यस्त्यर्थे लक्षणया तद्वति द्रव्ये वर्तते इति गुणवचनः ॥

तृतीयान्तं पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णावरैः सह समस्यते (ग) । तुल्यार्थयोगे इति समसदृशयोगे तृतीया । अन्यैर्योगे तु समासविधानसामर्थ्यात् तृतीया । हेतौ तृतीया वा ॥ मासेन पूर्वं इति मासपूर्वः ॥ मात्रा सदृश इति मातृसदृशः ॥ पित्रा सम इति पितृसमः ॥ माषेण ऊनम् इति माषोनम् ॥ माषेण विकल इति माषविकलः ॥ वाचा कलह इति वाक्कलहः ॥ आचारेण निपुण इति आचारनिपुणः ॥ गुडेन मिश्र इति गुडमिश्रः ॥ आचारेण श्लक्ष्ण इत्याचारश्लक्ष्णः ॥ मासेन अवरोऽर्वागिति मासावरः ।

तृतीयान्ते कर्तृकरणे कृदन्तेन सह बहुलं समस्येते (घ)। हरिणा त्रात इति हरित्रातः । कर्मणि क्तः । कर्तरि तृतीया ॥ नखैर्भिन्न इति नखभिन्न । कर्मणि क्तः । करणे तृतीया ॥ वातेन छेद्यम् इति वातच्छेद्यं तृणम् । शक्यार्थे यः ॥ काकेन पेयेति काकपेया नदी । शक्यार्थे यः ॥ **बहुलग्रहणात् क्वचिन्न** । दात्रेण लूनवान् । हस्तेन कुर्वन् ॥

ऽयमिति । न हि वाक्येन निन्दावगम्यते । वृत्त्यर्थबोधक वाक्यं लौकिकविग्रहः । तत्र खट्वामारूढ इति वाक्यं हि गृहस्थाश्रमिणि निन्दां न गमयति । खट्वारूढ इति समासस्तु रूढ्या निन्दां गमयति । तथा च भाष्यम्—'अधीत्य स्नात्वा गुर्वनुज्ञातेन खट्वा आरोढव्या । यस्तावदन्यथा करोति, स खट्वारूढोऽयं जाल्म इत्युच्यते' इति ।

(क) 'अत्यन्तसंयोगे च' इति पाणिनिसूत्रमभित्याह-**अत्यन्तसंयोगे इति** ।

(ख) 'तृतीयातत्कृतार्थेन गुणवचनेन' इति पाणिनिसूत्रमाश्रित्योक्तम्—**तृतीयान्तमिति** । अयमर्थः—तृतीयान्तं तृतीयान्तार्थकृतगुणवचनेनार्थशब्देन सह समस्यते इति ।

सत्त्वे विनिशते इति । लक्षणमिदं [२१४] पृष्ठे सुबोधिनीटीकायां मत्कृतचक्रधराख्यटिप्पण्यां च द्रष्टव्यम् । तत्कृत इति किम् , अक्ष्णा काणः ।

(ग) पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः, इति पाणिनिसूत्रम्' 'अवरस्योपसंख्यानम्' इति वार्त्तिकमुपजीव्याह—**तृतीयान्तं पूर्वसदृशेत्यादि** ।

(घ) 'कर्तृकरणे कृता बहुलम्' इति पाणिनिसूत्रमाश्रित्याह—**तृतीयान्ते कर्तृकरणे इति** । **नखैर्भिन्न इति** । कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' इति परिभाषया '**नखनिर्भिन्न**' इति । कर्तृकरणे किम् । भिक्षाभिरुषितः । हेतावेषा तृतीया । बहुलग्रहणं सर्वोपाधिव्यभिचारार्थम् । तेन दात्रेण लूनवान् इत्यादौ न । कृदन्तेन किम् । काष्ठैः पचतितराम् ।

'कृत्यैरधिकार्थवचने' 'स्तुतिनिन्दाफलकमर्थवादवचनमधिकार्थवचनम्' इत्यवलम्ब्योदाहृतम् 'वातच्छेद्यम्' 'काकपेया' इति ।

संस्कारकद्रव्यवाचकं तृतीयान्तमन्नेन सह समस्यते (क)। दध्ना उपसिक्त ओदन इति दध्योदनः। उपसेकक्रियाद्वाराऽन्वयः। "भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री" इत्यमरः॥ गुडेन मिश्रा धानाः गुडधानाः मिश्रणक्रियाद्वाराऽन्वयः। "धाना भृष्टयवे स्त्रियाम्" इत्यमरः॥

तदर्थार्थबलिहितसुखरक्षितैः सहचतुर्थ्यन्तं समस्यते (ख)। यूपाय दारु इति यूपदारु। तादर्थ्ये चतुर्थी॥ **अर्थेन नित्यसमासो विशेष्यलिङ्गता च**। एतद्वार्तिकाभावे तु विकल्पाधिकारात् पक्षे द्विजायार्थ इत्यपि स्यात्। द्वन्द्वतत्पुरुषयोः परपदस्यैवेति वक्ष्यमाणेन सर्वत्र पुंलिङ्गप्रयोगश्च स्यादर्थशब्दस्य पुंल्लिङ्गत्वादत इदमुक्तम्॥ भूतेभ्यो बलिरिति भूतबलिः॥ गोभ्यो हितमिति गोहितम्॥ गोभ्यः सुखमिति गोसुखम्॥ गोभ्यो रक्षितमिति गोरक्षितम्॥

भयभीतभीतिभीभिरपेतापोढमुक्तपतितापत्रस्तैश्च सह पञ्चम्यन्तं समस्यते (ग)। चौराद्भयमिति चौरभयम्॥ एवं वृकभीतः॥ सिंहभीतिः॥ राजभीः॥ सुखादपेत इति सुखापेतः॥ एवं कल्पनापोढः॥ चक्रमुक्तः॥ स्वर्गपतितः॥ तरङ्गापत्रस्त इति॥

राज्ञः पुरुष इति राजपुरुषः। सम्बन्धे षष्ठी। राजन् अस् पुरुष सि इत्यलौकिकविग्रहे समासे कृते समासप्रत्यययोरिति विभक्तेर्लुकि अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वान्नाम्नो नो लोपशिति नलोपः॥

याजकादिभिः सह षष्ठ्यन्तं समस्यते। याजकपूजकपरिचारकपरिवेषकस्नातकाध्यापकोत्पादकहोतृपोतृभर्तृनप्तृगणका याजकादयः(घ)॥ १४॥

(त०) **अमादौ तत्पुरुष इति**॥ अम् आदिर्यस्य स अमादिः प्रत्ययः सुप्पर्यन्तः। 'पूर्वेऽव्यये' इत्यतः पूर्वे इत्यनुवर्तते। अम् द्वितीयैकवचनमेव गृह्यते न त्वमो गत्यादिकर्तृवाची व्याख्यानात्। तस्य च प्रत्ययत्वात्प्रत्ययग्रहणे च तदन्तलाभ इत्याशये-

---

(क) 'अन्नेन व्यञ्जन'मिति पाणिनिसूत्रमुपजीव्याह—**संस्कारकेत्यादि**। संस्क्रियते गुणविशेषवत्तया क्रियते अनेनेति संस्कारः। उपसेकादिसाधनं दध्यादि। तद्वाचकमित्यर्थः। **दध्योदन इति**। नन्विह दध्नेति करणत्वस्य उपसिक्तपदापेक्षत्वाद् असामर्थ्यात् कथमिह समास इत्याह—**उपसेकक्रियेति**। उपसेकक्रियां विना दध्न अन्नसंस्कारत्वानुपपत्त्या दध्ना इत्यस्य दधिकारकोपसेके वृत्तेर्नासामर्थ्यमिति भावः। तदुक्तं भाष्ये 'युक्तार्थसम्प्रत्ययाच्च सामर्थम्' इति।

'भक्ष्येण मिश्रीकरणम्' इति पाणिनिसूत्रमवलम्ब्योदाहृतम्—'गुडधाना'-इति। **मिश्रणक्रियेति**। गुडेनेत्यस्य गुडकरणकमिश्रणे वृत्तेर्नासामर्थ्यमिति भावः।

(ख) 'चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः' इति पाणिनिसूत्रमाश्रित्याह—**तदर्थार्थेत्यादि**। अयमर्थः—चतुर्थ्यन्तार्थाय यत्तद्वाचिना अर्थादिभिश्च चतुर्थ्यन्तं समस्यते। तदर्थेन प्रकृतिविकृतिभाव एव। बलिरक्षितग्रहणात् ज्ञापकात्। यूपाय दारु यूपदारु। नेह। रन्धनाय स्थाली। अश्वघासादयस्तु षष्ठीसमासः।

(ग) स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन। स्तोक-अन्तिक-दूर-एतदर्थकानि कृच्छ्र एतानि पञ्चम्यन्तानि क्तप्रत्ययेन समस्यन्ते। अलुक्।

(घ) ननु 'षष्ठी' इत्यादिना 'राजपुरुष' इत्यादिवत् देवयाजक इत्यादिसिद्धौ तृजकाभ्यां कर्तरि न समस्यते इत्यस्य प्रतिप्रसवोऽयमिति कौमुदी। उदाहरणम्—ब्राह्मणयाजकः, देवपूजक इत्यादि।

ह-द्वितीयाद्यन्त इति ॥ यत्तु वासुदेवेन अम् आदिर्येषां ते अमादय इत्युक्त्वा द्वितीयाद्याः सप्तम्यन्ता विभक्तयस्तासां चेत्याद्युक्तं तदविचारैः । पुँल्लिङ्गस्य समासार्थत्वेन स्त्रीलिङ्गस्य विशेष्यत्वानुचितत्वात् । बहुवचनान्तविग्रहस्यायुक्तत्वाच्च ॥ १४ ॥

(**क्वचित्षष्ठी न समस्यते**) नृणां द्विजः । सतां षष्ठः । काकस्य कार्ष्ण्यम् । फलानां सुहितः । इदमेषां शयितम् । अपां स्रष्टा । ओदनस्य पाचकः । भवतः शायिका ॥ १५ ॥

(सु०) **क्वचित्षष्ठी न समस्यते** ॥ **निर्द्धारणे या षष्ठी सा न समस्यते**(क) नृणां द्विज इत्यत्र क्रियागुणजातिसंज्ञाभिरिति षष्ठी ॥

पूरणगुणतृप्त्यर्थैः सह षष्ठ्यन्तं न समस्यते । पूरणार्थे सतां षष्ठः । षण्णां संख्यानां पूरणः षष्ठः । षट्कतिकतिपयचतुर्भ्यं इति थट् ॥ गुणार्थे । काकस्य कार्ष्ण्यम् । कृष्णस्य भावः कार्ष्ण्यम् । अनित्योऽयं गुणेन निषेधः । संज्ञाप्रमाणमर्थगौरवं बुद्धिमान्द्यमित्यादिनिर्देशात् ॥ फलानां सुहितस्तृप्तः । करणे षष्ठी ॥ तृतीयासमासस्तु स्यादेव ॥

अधिकरणवाचिना क्तेन षष्ठी न समस्यते । इदमेषामासितं गतं भुक्तं वा । स्थैर्यगतिभक्षणार्थेभ्य इत्यधिकरणे क्तः । एषामिति कर्तरि षष्ठी ॥

वर्तमानाधारार्थक्तस्येत्यनेन कर्त्रर्थकाभ्यां तृजकाभ्यां सह षष्ठी न समस्यते । अपां स्रष्टा । ओदनस्य पाचकः तृन्वुणाविति कर्तरि तृन्वुण्प्रत्ययौ । अपामिति ओदनस्येति च कर्तृकार्ययोरित्यनेन कर्मणि षष्ठी ॥

कर्तृषष्ठ्यन्तमकेन सह न समस्यते(ख) । भवतः शायिका । आधारे वुण् प्रत्ययो भवतीति । कर्तरि षष्ठी ॥

वर्तमानार्थक्तेन सह षष्ठी न समस्यते । राज्ञां मतो बुद्धः पूजितो वा । राज्ञामिति कर्तरि षष्ठी ॥ १६ ॥

(**क्वचिदमाद्यन्तस्य परत्वम्**) रायमतिक्रान्तोऽतिरैः । नावमतिक्रान्तोऽतिनौः । पूर्वं भूतो भूतपूर्वः । कायस्य पूर्वः पूर्वकायः । अपरकायः । अधरकायः । उत्तरकायः । अह्नो मध्यं मध्याह्नः । सायाह्नः । मध्यरात्रः । पश्चिमरात्रः । अर्द्धपिप्पली ॥ १६ ॥

(सु०) **क्वचिदमाद्यन्तस्य परत्वम्** ॥ तत्पुरुषे क्वचिदमाद्यन्तस्य पदस्य परनि-

---

(क) **नृणां द्विज इति** । अत्र नृणामिति षष्ठ्यन्तस्य द्विजशब्देन समासो न स्यात् । ननु पुरुषाणामुत्तमः पुरुषोत्तम इति कथं समास इति चेदुच्यते । पुरुषोत्तम इत्यादौ न निर्द्धारणे षष्ठी तु शेष एव । यतो निर्द्धारणम् , यच्च निर्धार्य्यते, यश्च निर्धारणहेतुः । एतत् त्रयसन्निधान एव तस्याः प्रवृत्तिरिति कैयटः ।

केचित्तु—'उत्तमः पुरुषस्त्वन्यः, परमात्मेत्युदाहृतः' इति गीतावाक्यात्कर्मधारय एव । उत्तमशब्दस्य विशेषणत्वेऽपि राजदन्तादिवत् परनिपातः । इत्याहुः ।

(ख) नित्यं क्रीडाजीविकयोः । एतयोरर्थयोरकेन नित्यं षष्ठी समस्यते । उद्दालकपुष्पभञ्जिका । दन्तलेखकः ।

पातो भवति ॥ रायमतिक्रान्त इति अतिराः । अत्यादयः क्रान्ताद्यर्थे द्वितीययेति समासः । 'रैस्भि' इत्यनेनाकारः ॥ पूर्वं भूत इति भूतपूर्वः ॥

पूर्वापराधरोत्तरावयवा एकसंख्यावयविना समस्यन्ते(क) । कायस्य पूर्वं इति पूर्वकायः ॥ कायस्यापरो देशः अपरकायः । कायस्याधरो देश इति अधरकायः ॥ कायस्योत्तरो देश इति उत्तरकायः ॥ **एकदेशः कालवाचिना समस्यते** । अह्नो मध्यमिति मध्याह्नः । राजाहःसखिभ्य इति टः । नो वेस्युपधालोपः ॥ अह्नः पूर्वं इति पूर्वाह्णः ॥ अह्नः साय इति सायाह्नः । स्यनेर्घञि अवसानवचनः सायशब्दः ॥ रात्रेर्मध्यमिति मध्यरात्रः ॥ रात्रेः पश्चिममिति पश्चिमरात्रः । टाडका इत्यनेनाप्रत्ययः ॥

नपुंसकोऽर्द्धशब्दोऽवयविना सह समस्यते । "पुंस्यर्द्धोऽर्द्धं समेंऽशके" इत्यमरः ॥ अर्द्धं पिप्पल्या इति अर्द्धपिप्पली । द्वन्द्वतत्पुरुषयोरिति परवल्लिङ्गत्वात् स्त्रीत्वम् । भाष्ये तु अर्द्धपिप्पलीति कर्मधारये उक्तम् । समुदाये दृष्टाः शब्दा अवयवेष्वपि वर्तन्ते इति न्यायात् ॥ १६ ॥

(त०) **क्वचिदमाद्यन्तस्येति** ॥ अन्त्यस्वरादिष्टिरिति ज्ञापकादिति भावः ॥ अन्ते भवोऽन्त्यः । स्वरेषु अन्त्यः अन्त्यस्वरः । स आदिर्यस्य सः ॥ १६ ॥

(**क्वचिद्वा**) द्वितीयं भिक्षायाः द्वितीयभिक्षा–भिक्षाद्वितीयम् । तृतीयभिक्षा–भिक्षातृतीयम् । चतुर्थभिक्षा–भिक्षाचतुर्थम् । तुरीयाभिक्षा–भिक्षातुरीयम् । जीविकाप्राप्तः–प्राप्तजीविकः । आपन्नजीविकः–जीविकापन्नः ॥ १७ ॥

(सु०) **क्वचिद्वा** ॥ **द्वितीयतृतीयचतुर्थतुर्याण्येकदेशिना सह समस्यन्ते अमाद्यन्तस्य परनिपातश्च वा** ॥ द्वितीयं भिक्षाया इति द्वितीयभिक्षा-भिक्षाद्वितीयम् ॥ तृतीयं भिक्षाया इति तृतीयभिक्षा–भिक्षातृतीयम् ॥ चतुर्थं भिक्षाया इति चतुर्थभिक्षा-भिक्षाचतुर्थम् ॥ तुरीयं भिक्षाया इति तुरीयभिक्षा–भिक्षातुरीयम् ॥ **द्वितीयान्तस्य प्राप्तापन्नयोः परयोर्वा परनिपातः** । जीविकां प्राप्त इति जीविकाप्राप्तः । प्राप्तजीविकः (ख) । अन्यार्थे इति ह्रस्वः । द्विगुप्राप्तपन्नेति वक्ष्यमाणेन परवल्लिङ्गं न॥१७॥

(त०) **प्राप्तजीविक इति** ॥ तत्पुरुषसंज्ञाविधिसामर्थ्यात्तया व्यवहारोऽनुमातव्यः स च द्वन्द्वतत्पुरुषयोः परपदस्यैव लिङ्गमित्यादि तस्य च ज्ञापकसिद्धत्वात् ज्ञापकसिद्धं न सर्वत्रेति वचनादत्र न लिङ्गम् ॥ १७ ॥

(परिमाणवता सह समस्यतेऽमाद्यन्तस्य परनिपातश्च तत्पुरुषे) (ग) ॥ १८ ॥

(सु०) **परिमाणवता सह समस्यतेऽमाद्यन्तस्य परनिपातश्च तत्पुरुषे** ॥ परिमीयते परिच्छिद्यते येन तत्परिमाणं परिमाणमस्यास्तीति परिमाणवान् । तेन यस्य

(क) अयमर्थः । अवयविना सह पूर्वादयः समस्यन्ते । एकत्वसंख्याविशिष्टश्चेदवयवी । इति ।

(ख) **प्राप्तजीविक इति** । तत्पुरुषसंज्ञाविधिसामर्थ्यात्तया व्यवहारोऽनुमातव्यः । स च द्वन्द्वतत्पुरुषयोः परपदस्यैव लिङ्गमित्यादि तस्य च ज्ञापकसिद्धत्वात् । ज्ञापकसिद्धं न सर्वत्रेति वचनादत्र न परस्य लिङ्गम् । स्त्रियाम्—जीविकां प्राप्ता इति प्राप्ताजीविका ।

(ग) उदाहरणम्—मासजातः । द्व्यहजातः ।

हि जननादूर्ध्वं मासा जातः स मासजात उच्यते । इह विग्रहे षष्ठीनिर्दिष्टस्य प्राधान्यं द्योतयितुं यस्येत्युक्तम् । यद्यपि मासो जातो यस्येति बहुव्रीहिणाऽपि सिद्ध्यति बहुव्रीहौ क्वचिन्नेति क्तान्तस्य पूर्वनिपातनिषेधात् । तथापि जातवतो मासो यस्येति स मासजातवानित्याद्यर्थमिदम् ॥ १९ ॥

(समासे क्वचिदैकपद्यं णत्वहेतुः) शराणां वनं शरवणम् । आम्राणां वनमाम्रवणम् । प्लक्षवणम् । शूर्पणखा ॥ १९ ॥

(सु०) **समासे क्वचिदैकपद्यं णत्वहेतुः** ॥ एकपदस्य भाव ऐकपद्यम् । समासे क्वचित् णत्वस्य हेतुरस्ति ॥ शराणां वनमिति शरवणम् ॥ आम्राणां वनमिति आम्रवणम् ॥ प्लक्षाणां वनमिति प्लक्षवणम् ॥ शूर्पणखा । अत्र संज्ञाया णत्वम् ॥ १९ ॥

(क्वचिद्वा) माषवापिणौ–माषवापिनौ । व्रीहिवापाणि–व्रीहिवापानि । व्रीहिवापेण-व्रीहिवापेन । सुरापाणम्-सुरापानम् । अक्षेषु शौण्डोऽक्षशौण्डः ॥२०॥

(सु०) **क्वचिद्वा** ॥ क्वचित्समासे णत्वं वा भवति ॥ माषान् वारंवारं वपतीति माषवापी । 'बहुलमाभीक्ष्ण्ये' इति णिनिः ॥ व्रीहीन्वपतीति कार्येऽणित्यण् ॥ व्रीहिवापं तानि व्रीहिवापाणि । णत्वाभावे व्रीहिवापानीति ॥ व्रीहीन् वारंवारं वपतीति व्रीहिवापः तेन व्रीहिवापेण । णत्वाभावे व्रीहिवापेनेति ॥ **शौण्डधूर्तकितवव्याडप्रवीणसंवीताध्यन्तरपटपण्डितकुशलनिपुणसिद्धशुष्कपक्वबन्धैः सह सप्तम्यन्तं समस्यते** । अक्षेषु शौण्डः प्रवीण इति अक्षशौण्डः ॥ २० ॥

(पात्रे समितादयो निपात्याः) पात्रेसमिताः । गेहेशूरः । गेहेनर्दी ॥ २१ ॥

(सु०) **पात्रे समितादयो निपात्याः** ॥ पात्रे समितादयः शब्दा निन्दार्थं निपात्यन्ते ॥ पात्रेसमिताः । भोजनसमये एव संगता भवन्ति न तु कार्ये । संपूर्वादिणः क्तः ॥ गेहेनर्दी । 'नर्द शब्दे । अस्माण्णिनिः । सप्तम्या अलुगत्र । एषां समासान्तरे प्रवेशो न भवतीत्यर्थः ॥ २१ ॥

(त०) **पात्रेसमिता इति** ॥ भोजनसमय एव संगता न तु कार्यकाल इत्यर्थः । अत्र सप्तम्या अलुक् ॥ २१ ॥

नञि ॥ नञि पूर्वपदे सति योऽन्वयः स तत्पुरुषसंज्ञः समासो भवति(क) २२

(सु०) **नञि** ॥ द्वौ नञौ प्रसज्यपर्युदासार्थकौ । पर्युदासार्थकस्य नञ एकार्थीभावे समासः । व्यपेक्षायां तु वाक्यमेव भवति । प्रसज्यप्रतिषेधार्थस्य तु क्रिययैवान्वयो न

(क) तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।

अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः । इति केचित् ।

अथ पर्युदासप्रसज्यार्थत्वेन नञो द्विविधत्वात्पर्युदासार्थस्योत्तरपदेनान्वयात्समासः ।

प्रसज्यार्थस्य तु क्रिययैवान्वयादुत्तरपदेनान्वयाभावान्न समासः ।

ननु तर्हि 'असूर्यंपश्या राजदाराः' इत्यादौ कथं समास इति चेदुच्यते । 'इण्‌तन्यकर्त्तरि' इत्यत्र हि 'नहि कर्त्तरि' इत्यर्थात् प्रसज्यार्थस्य समासदर्शनादनन्वयेऽपि क्वचित्समास इति ।

नाम्ना । अनन्वयेऽपि क्वापि नाम्ना समासः । इण् तन्यकर्तरीति ज्ञापकात् ॥ कर्तरि न भवतीति तदर्थः । तेनासूर्यपश्या राजदारा इत्यादि सिद्धम् । तदन्यतद्विरुद्धतदभावा इति त्रयो नञोऽर्थाः । "तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ॥ अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ॥ १ ॥" इति केचित् । यथा । अब्राह्मणः । अपापम् । अनश्वः । अनुदरा कन्या ॥ अपशवः । अधर्मः । नञ्समासो हि अर्थाभावेऽव्ययीभावेन सह विकल्प्यते । अद्रुतायामसंहितमिति वार्त्तिकप्रयोगात् ॥ २२ ॥

(त०) नञिति ॥ पर्युदासप्रसज्यार्थत्वेन नञो द्विविधत्वात्पर्युदासार्थस्योत्तरपदेनान्वयात्समासः । व्यपेक्षायां वाक्यमपि । प्रसज्यार्थस्य तु क्रिययैवान्वयादुत्तरपदेनान्वयाभावान्न समासः ॥ नन्वेवमसूर्यपश्यानि मुखानीत्यादौ कथं समास इति चेत्सत्यम् । इण् तन्यकर्तरीत्यत्र हि नहि कर्तरीत्यर्थात्प्रसज्यार्थस्य समासदर्शनादनन्वयेऽपि क्वचित्समासः ॥ २२ ॥

ना ॥ समासे नञो नस्यादेशः(क) ॥ धर्मविरुद्धोऽधर्मः । ज्ञानविरुद्धमज्ञानम् । संशयस्यासम्भवोऽसंशयः ॥ २३ ॥

(सु०) ना ॥ इति ॥ न अ इति च्छेदः ॥ आख्यातान्ते परेऽपि समासे नञो नकारस्याऽनादेशो भवति निन्दार्थे ॥ अपचसि त्वं जाल्म । कुत्सितं पचसीत्यर्थः ॥ २३ ॥

(त०) ना इति ॥ न अ इति च्छेदः ॥ अत्र नञित्यनुवर्तते इत्याह—नञ इति ॥ नकारस्यानुबन्धत्वादकारस्याकारादेशे प्रयोजनाभावात्सर्वादेशः । नञ्समासस्तु प्रतिपदोक्तोऽपि नानुवर्तते अविघ्नमित्याद्यव्ययीभावेऽविद्य इत्यादिबहुव्रीहौ चाव्याप्तेः । परिभाषायास्त्वनित्यत्वात् ॥ २३ ॥

अन्स्वरे । समासे नञो नस्यान् स्यात् स्वरे ॥ अश्वादन्योऽनश्वः(ख)॥२४॥

(सु०) **अन्स्वरे** ॥ अनश्व इत्यत्र ङ्णनो ह्रस्वादिति द्वित्वं तु न अनपीति निर्देशात्॥२४॥

(त०) अनश्व इति ॥ अनपीत्यादिलिङ्गात् ङ्णनो ह्रस्वादिति द्वित्वं न ॥ २४ ॥

(**निरनुबन्धकस्य तु नानौ**) नाकः । नक्षत्रम् । नक्रः । नासत्यौ । नैकधाः ॥ २५ ॥

(सु०) **निरनुबन्धकस्य तु नानौ** ॥ निरनुबन्धकस्य अश्च अन् च अनौ तौ न भवतः । सानुबन्धकस्य तु भवत इत्यर्थः ॥ **नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकनैकधाशब्देषु नशब्देन समासः**। न भ्राजते इति नभ्राट् क्विबन्तः । न पातीति नपात् । शत्रन्तः । न वेत्तीति नवेदाः । असुप्रत्ययान्तः ॥ सत्सु साधव इति सत्याः । यप्रत्ययः । न सत्याः असत्याः । न असत्याः नासत्याः ॥ न

(क) ना । अत्र माधवः—न अ इति च्छेदः । अत्र न इति नकाराकारयोर्लुप्तषष्ठीद्विवचनान्तो निर्देशः । ततश्च नकाराकारयोः स्थानेऽयमादेशः स्यात् । अन्यथा त्वकारस्याकारे प्रयोजनाभावादन्त्याभावे अन्त्यसदेशस्येति नकारमात्रस्याकारे सवर्णदीर्घे चाकारः । श्रूयतेऽत्र प्रमाणं ना इति निर्देशः । अन्यथा—नञोऽनुवृत्तेरादेशमेव निर्दिशेत् धनपतिरित्यादौ धनावयवस्य नस्यमार्थक्यादर्थवद्ग्रहणपरिभाषयानात्वम् । यामनपुत्र इत्यादौ च न प्रत्ययस्यार्थवत्त्वेऽपि नञित्यनुवृत्तेर्नात्वम् । अत एव च भ्राजत इति न भ्राट्, न क्रामतीति नक्रम्, नैकधा, नात्राकमस्तीति नाकमित्यादिषु नाकारोऽनादेशश्च भवति।

(ख) ननु अनश्व इत्यादौ 'ङ्णनो' इति द्वित्वं कथं नेति चेदुच्यते । अनपीति ज्ञापकाद्द्वित्वं न ।

मुञ्चतीति नमुचिः । नाम्युपधात्किरिति किः ॥ न कुलमस्येति नकुलः ॥ न खं छिद्रमस्येति नखः ॥ न स्त्रीपुंसौ इति नपुंसकः । स्त्रीपुंसयोः पुंसकभावो निपातनात् ॥ न क्षरतीति नक्षत्रम् । 'क्षर संचलने' भ्वादिः । निवासगत्योस्तुदादिः । अनयोः क्षत्रमिति निपात्यते ॥ न क्रामतीति नक्रः । डप्रत्ययः ॥ न अकमस्मिन्निति नाकः ॥ न एकधा नैकधा ॥२९॥

इति तत्पुरुषः ॥

(त०) निरनुबन्धकस्येति ॥ निर्गतोऽनुबन्धो यस्येति निरनुबन्धकः । तस्येत्यर्थः । लक्ष्यानुसाराच्च व्यवस्था । तस्य समासो नित्यः ॥ २९ ॥

इति तत्पुरुषः ॥

चार्थे द्वन्द्वः ॥ समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः(क) ॥ तत्रेश्वरं गुरुं च भजस्वेति प्रत्येकमेकक्रियाभिसम्बन्धः समुच्चयः ॥ बटो भिक्षामट गां चानयेति क्रमेण क्रियाद्वयसम्बन्धोऽन्वाचयः ॥ मिलितयोरेकत्रान्वय इतरेतरयोगः । संहतिः समाहारः । तत्राद्ययोर्न समासोऽस्त्यनन्वयात् ॥ २६ ॥

(सु०) चार्थे द्वन्द्वः ॥ चस्यार्थश्चार्थः । जातावेकवचनम् । चार्थाश्चत्वारः । प्रत्येकमेकक्रियाभिसंबन्धः समुच्चयः । एकमेकं प्रतीति प्रत्येकम् । परस्परं निरपेक्षस्यानेकस्यैकक्रियायामन्वय इत्यर्थः । त्वमीश्वरं गुरुं च भजस्वेत्यत्र भजनक्रियायाम् ईश्वरगुर्वोः प्रत्येकं संबन्धात्समुच्चयः । एकक्रियायामित्युपलक्षणम् । तेन परस्परनिरपेक्षस्यानेकस्यैकस्मिन् संबन्धिन्यन्वयः समुच्चय इत्यर्थः । राज्ञो गजश्चाश्वश्चात्र द्रव्ये द्रव्ययोः समुच्चयः । पटः शुक्लो रक्तश्चात्र द्रव्ये गुणयोः समुच्चयः । रक्तः पटः कम्बलश्चात्र गुणे द्रव्ययोः समुच्चयः । अनेके एकस्मिन्समुच्चीयन्ते इति समुच्चयः ॥ क्रमेण क्रियाद्वयसंबन्धोऽन्वाचयः । परस्परनिरपेक्षस्यानेकस्य क्रियाद्वयेऽन्वयोऽन्वाचयः । यदैकस्य प्राधान्यात् तदनुरोधेन त्वितरदन्वाचीयते तदाऽन्वाचयः । यथा । भिक्षामट गां चानयेत्यत्र भिक्षाटनस्य प्रधानता गवानयनस्य त्वानुषङ्गिकता ॥ मिलितयोर्मिलितानां वैकक्रियान्वय इतरेतरयोगः । परस्परसापेक्षकस्यानेकस्यैकक्रियायामन्वय इतरेतरयोगः ॥ संहतिः समाहारः । परस्परसापेक्षस्यानेकस्य समूहरूपेणान्वयः समाहार इत्यर्थः ॥ चार्थे द्वन्द्वसमासो भवति । द्वौ द्वावर्थौ अभिदधात्येकाऽस्मिन्निति द्वन्द्वः । बहूनामप्युपलक्षणमिदम् । ननु द्वन्द्वसंज्ञायाः किं प्रयोजनम् । उच्यते । द्वन्द्वतत्पुरुषयोः परपदस्यैव लिङ्गमिति द्वन्द्वेऽल्पस्वरप्रधानेकारोकारान्तानां पूर्वनिपात इति 'ऋतां द्वन्द्वे' पूर्वपदस्याऽऽत्वमित्यादि च प्रयोजनम् ॥ आद्ययोः समुच्चयान्वाचययोः समासो न । परस्परसाहित्याभावात् । अन्ययोः समाहारेतरेतरयोगयोः समासोऽस्ति । परस्परसाहित्यसत्त्वात् । इतरेतरयोगे साहित्यं विशेषणं द्रव्यं विशेष्यम् । समाहारे तु साहित्यं प्रधानं द्रव्यं विशेषणं साहित्यप्रधानत्वादेकवचनम् ॥२६॥

(क) उभयपदार्थप्रधानो द्वन्द्वः । यदा परस्परनिरपेक्षाः पदार्थाः एकस्मिन् सम्बन्धिनि समुच्चीयन्ते तदा समुच्चयः । यदा त्वेकस्याप्राधान्यात्तदनुरोधेन त्वितरदन्वाचीयते तदान्वाचयः । परस्परसापेक्षयोरवयवप्राधान्येन एकक्रियायामन्वय इतरेतरयोगः । परस्परसापेक्षाणामेवावयवभेदतिरोधानेन संहतिरूपेणान्वयः समाहारः ।

(त०) चार्थे द्वन्द्वः इति ॥ चस्यार्थश्चार्थस्तस्मिन् । जातावेकवचनम् । चार्था-नान-समुच्चयेत्यादि । यदा परस्परनिरपेक्षाः पदार्थाः एकस्मिन्सम्बन्धिनि समुच्चीयन्ते तदा समुच्चयः । तत्स्वरूपनिरूपणान्वययोग्यत्वाभावात्समासाभाव इत्याह—तत्रेति । तेष्वर्थेष्वित्यर्थः । ईश्वरं भजस्व गुरुं च भजस्वेत्येकस्या एव भजनक्रियाया ईश्वरगुरुभ्यां प्रत्येकं संबन्धात्समुच्चयः । यदा त्वेकस्याप्राधान्यात्तदनुरोधेन त्वितरदन्वाचीयते तदाऽन्वाचयः । तदाह—बटो भिक्षामटेति ॥ अत्र प्रधानं भिक्षाटनं गवानयनं त्वप्रधानम् । अदर्शनाद्गामनानयन्नप्यटत्येव भिक्षां भिक्षामनटंस्तु न गामानयति । अटन्नपि नान्विष्य गामानयति ॥ मिलितयोरिति ॥ परस्परसापेक्षयोरवयवप्राधान्येन एकक्रियायामन्वयः इत्यर्थः ॥ संहतिरिति ॥ परस्परसापेक्षाणामेवावयवभेदतिरोधानेन संहतिरूपेणान्वय इत्यर्थः ॥ तत्राद्ययोरिति ॥ समुच्चयान्वाचययोरित्यर्थः ॥ अनन्वयादिति । अन्वय परस्परसापेक्षत्वं तदभावादित्यर्थः ॥ २६ ॥

(द्वन्द्वेऽल्पस्वरप्रधानेकारोकारान्तानां पूर्वनिपातः(क)·
पटुश्च गुप्तश्च पटुगुप्तौ । अग्निश्च मारुतश्च अग्निमारुतौ । भोक्तृभोग्यौ । धवखदिरौ । इन्द्राश्वरथाः । तापसपर्वतौ ॥ २७ ॥

(सु०) द्वन्द्वेऽल्पस्वरप्रधानेकारोकारान्तानां पूर्वनिपातः ॥ द्वन्द्वेऽल्पस्वरशब्दस्य पूर्वनिपातः॥ यथा धवश्च खदिरश्च धवखदिरौ । समासेनोक्तार्थत्वाच्च शब्दाप्रयोगः ॥२७॥

(त०) पूर्वनिपातनियममाह—द्वन्द्व इति ॥ अल्पस्वरत्वं समस्यमानपदापेक्षया ॥ पटुश्चेति ॥ समासेनोक्तार्थत्वाच्चशब्दाप्रयोगः । अनेकप्राप्तावेकस्य नियमः ॥ हरिहरगुरवः हरिगुरुहराः ॥ २७ ॥

(द्वन्द्वे स्वराद्यदन्तस्य पूर्वनिपातः) ईशकृष्णौ ॥ २८ ॥

(सु०) द्वन्द्वे स्वराद्यदन्तस्य पूर्वनिपातः ॥ स्वर आदिर्यस्य स स्वरादिः । अत् अन्ते यस्य सोऽदन्तः । स्वरादिश्चासावदन्तश्च स्वराद्यदन्तस्तस्य ॥ ईशश्च कृष्णश्च ईशकृष्णौ ॥ बहूनां द्वन्द्वे नियमो न । इन्द्राश्वरथाः अश्वरथेन्द्रा वा ॥ प्रधानस्य पूर्वनिपातो यथा तापसश्च पर्वतश्च तापसपर्वतौ ॥ भोक्ता च भोग्यश्च भोक्तृभोग्यौ ॥ इकारोकारान्तानां पूर्वनिपातो यथा । पटुश्च गुप्तश्च पटुगुप्तौ । अग्निमारुतौ ॥ २८ ॥

(त०) स्वराद्यदन्तस्येति ॥ स्वर आदिर्यस्य स स्वरादिः । अत् अन्ते यस्य सोऽदन्तः । स चासौ स चेति स तस्येत्यर्थः ॥ २८ ॥

(देवताद्वन्द्वे पूर्वपदस्याकारः) इन्द्राबृहस्पती। अग्नाविष्णू(ख)॥२९॥

(क) अल्पस्वरस्य प्रधानस्याभ्यर्हितस्य च इकारान्तस्य उकारान्तस्य च पूर्वनिपात इत्यर्थः ।
अल्पस्वरत्वञ्च समस्यमानपदापेक्षया । अनेकप्राप्तावेकस्य नियमः । हरिहरगुरवः । हरिगुरुहराः । शङ्खदुन्दुभिवीणाः । वीणाशङ्खदुन्दुभयः ।

(ख) देवतावाचकानामन्योन्यद्वन्द्वसमासे पूर्वपदान्त्यस्वरस्य दीर्घो वक्तव्य इत्यर्थः । अत्र तत्त्वदीपिकाकारेण यदुक्तमनाकरत्वादुपेक्षितमिति । तदयुक्तम् । सरस्वतीसूत्रव्याकर्तुर्वासुदेवस्य भाष्यानधीनत्वात् । तद् व्याख्यानं तु सारस्वते । न तु चन्द्रिकायाम् । चन्द्रिकाव्याख्यातुः प्रतिज्ञा मतंबुद्धा पतञ्जलेरिति । न पुनः सारस्वतव्याख्यातुः । इति ध्येयम् ।

(सु०) देवताद्वन्द्वे पूर्वपदस्याकारः ॥ इन्द्रश्च बृहस्पतिश्च इन्द्राबृहस्पती । अग्निश्च विष्णुश्च अग्नाविष्णू ॥ २९ ॥

(त०) देवताद्वन्द्वे पूर्वपदस्याकार इति ॥ यत्तु प्राचा देवताद्वन्द्वे पूर्वपदस्य दीर्घ इत्युक्तम् । यच्च तद्वासुदेवेन व्याख्यातं देवतावाचकानामन्योऽन्यद्वन्द्वसमासे पूर्वपदान्त्यस्वरस्य दीर्घो वक्तव्य इत्यर्थ इति । तत्सर्वमनाकरत्वादुपेक्षितम् ॥ तथा च पाणिनिः । 'देवताद्वन्द्वे च' इहोत्तरपदे परे आनङ् । अग्नाविष्णू इत्यादावात्वमेवोक्तवान् ॥ २९ ॥

(क्वचिन्न) अग्निवायू ॥ ३० ॥

(सु०) क्वचिन्न ॥ देवताद्वन्द्वे पूर्ववदस्यात्वं न भवति क्वचित् ॥ अग्निवायू वाय्वग्नी वा । ३० ।

(त०) क्वचिन्नेति ॥ ज्ञापकसिद्धं न सर्वत्रेत्युक्तेः । ज्ञापितं चैतत् द्वन्द्वसंज्ञासामर्थ्यात् । अन्यथा चार्थत्वेनैव व्यवहारः स्यात् ॥ ३० ॥

इति द्वन्द्वः ॥

(ईदग्नेः सोमवरुणयोः ॥ ३१ ॥

(सु०) ईदग्नेः सोमवरुणयोः ॥ आत्वस्यापवादोऽयम् । देवताद्वन्द्वे पूर्वपदस्य अग्नेरीत् स्यात् सोमवरुणयोः परयोः ॥ ३१ ॥

(अग्न्यादेः सोमादीनां सस्य षः) अग्नीषोमौ । अग्नीवरुणौ ॥ ३२ ॥

(सु०) अग्न्यादेः सोमादीनां सस्य षः ॥ अग्नीषोमौ । आदिशब्दात् अग्निः स्तूयतेऽस्मिन्नित्यधिकरणे क्विप् । अग्निष्टुत् यज्ञविशेषः । अग्नीनां स्तोम इति अग्निष्टोमः, सोमयज्ञस्य संस्थास्वाद्यसंस्था । ज्योतिःष्टोमः । अयःष्टोमः । अङ्गुलिषङ्गः । भीरुष्ठानमित्यादि ॥ प्राणितूर्यसेनाङ्गानां द्वन्द्व एकवत् । प्राणितूर्यसेनानामङ्गानि प्राणितूर्यसेनाङ्गानि तेषाम् । अङ्गशब्दः प्रत्येकमन्वेति द्वन्द्वान्ते श्रूयमाणत्वात् । प्राण्यङ्गानां प्राण्यङ्गैः सह सेनाङ्गानां सेनाङ्गैः सह यो द्वन्द्वः स एकवद्भवति । एकेन द्वन्द्वे त्वेकवद्भावे न । यथा । मार्दङ्गिकाश्वारोहा । प्राण्यङ्गे दन्ताश्च ओष्ठौ च दन्तोष्ठम् । तूर्याङ्गे मृदङ्गवादनं शिल्पमस्येत्यर्थे ठक्प्रत्ययः । णितो वेति वृद्धिः ॥ प्रणुवन्ति स्तुतिं कुर्वन्त्यनेनेति पणवो गायनपटहः । 'णु स्तुतौ' अस्मात्स्वरादहस्यप्रत्ययः । प्रोपसर्गस्य निपातनाद्रेफलोपे नस्य णत्वं च पणव इति । पणववादनं शिल्पमस्येतीकप्रत्ययः । मार्दङ्गिकश्च पाणविकश्च मार्दङ्गिकपाणविकम् ॥ सेनाङ्गे रथेन चरन्ति इति रथिकाः । चरतीत्यर्थे ठकः । रथिकाश्च अश्वारोहाश्च तेषां समाहारो रथिकाश्वारोहम् ॥ ननु समाहारस्यैकत्वादेकत्वे सिद्धे किमर्थमिदम् । उच्यते प्राण्यङ्गादीनां प्राण्यङ्गादिभिः समाहार एव यथा स्यादिति । नियमार्थमिति ॥ प्राणिवर्ज जातिवाचिनां क्षुद्रजन्तूनां च द्वन्द्वे एकवत् । धानाश्च शष्कुल्यश्च तासां समाहारो धानाशष्कुली ॥ प्राणिनां तु विट्शूद्राः ॥ द्रव्यजातिरेवात्र ग्राह्या । तेन रूपरसावित्यादौ न ॥ यूकाश्च लिक्षाश्च यूकालिक्षम् ॥ विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम्(क) । वृक्षादिसहानां भेदकानां पर्यायाणामश्ववडवेत्यादीनां त्रयाणां च द्वन्द्व एकवद्वा ॥ भूताश्च अशोकाश्च तेषां समाहारो भूताशोकम्—भूताशोकाः ॥ रुरवश्च पृषताश्च

(क) पाणिनिसूत्रमिदम् । विकल्पेनैकवदित्यर्थः ।

तेषां समाहारो रुरुपृषतम्–रुरुपृषताः ॥ कुशाश्च काशाश्च तेषां समाहारः कुशकाशम्–कुशकाशाः ॥ व्रीहयश्च यवाश्च तेषां समाहारो व्रीहियवम्–व्रीहियवाः ॥ दधि च घृतं च तयोः समाहारो दधिघृतम्–दधिघृते ॥ गावश्च महिषाश्च तेषां समाहारो गोमहिषम्–गोमहिषाः ॥ शुकाश्च बकाश्च तेषां समाहारः शुकबकम्–शुकबकाः ॥ अश्वश्च वडवा च तयोः समाहारोऽश्ववडवम्–अश्ववडवौ । अश्ववडवयोर्द्वन्द्वः । पूर्वा च अपरा च तयोः समाहारः पूर्वापरम्—पूर्वापरे ॥ अधरा च उत्तरा च तयोः समाहारोऽधरोत्तरम्—अधरोत्तरे ॥

फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानां बहुप्रकृतिद्वन्द्व एकवत् । एषां बहुवचनान्ता प्रकृतिः कारणं यस्य स बहुप्रकृतिर्द्वन्द्व एकवद्भवतीति नियम्यते । बदराणि च आमलकानि चेति बदरामलकम् । प्राणिवर्जजातीत्यनेन एकवद्भावे प्राप्ते नियमः ॥ रथिकाश्चाश्वारोहाश्चेति रथिकाश्वारोहम् । सेनाङ्गत्वान्नित्ये एकवद्भावे प्राप्ते नियमः ॥ प्लक्षाश्च न्यग्रोधाश्चेति प्लक्षन्यग्रोधम् । विभाषा वृक्षेति वैकल्पिके एकवद्भावे प्राप्ते नियमः ॥ रुरवश्च पृषताश्चेति रुरुपृषतम् ॥ शुकाश्च बकाश्चेति शुकबकम् । विभाषेति वैकल्पिके एकवद्भावे प्राप्ते नियमः ॥ नकुलपर्यन्ताः क्षुद्रजवः ॥ यूकाश्च लिक्षाश्चेति यूकालिक्षम् । क्षुद्रजन्तूनामित्येकवद्भावे प्राप्ते नियमः ॥ व्रीहयश्च यवाश्चेति व्रीहियवम् ॥ कुशाश्च काशाश्चेति कुशकाशम् । अत्रापि विभाषेति वैकल्पिके एकवद्भावे प्राप्ते नियमः । द्विप्रकृतौ एकवचनान्तयोर्द्वयोः प्रकृत्योर्द्वन्द्वे नास्त्येकवद्भाव इत्यर्थः ॥ बदरामलके रथिकाश्वारोहौ प्लक्षन्यग्रोधौ रुरुपृषतौ शुकबकौ यूकालिक्षे व्रीहियवौ कुशकाशाविति ॥ ऋतां द्वन्द्वे पूर्वपदस्यात्वमिति वक्ष्यमाणेनात्वम् । 'उद्ऋतृनप्तृ' इत्यनेनार् । होतापोतारौ ॥ 'पञ्चसु' इत्यनेनार् । मातापितरौ ॥ पुत्रे चेति वक्ष्यमाणेनात्वम् । पितापुत्रौ ॥ मातरपितरौ निपात्यौ । **मातृशब्दस्यारङादेशो निपात्यते उदीचामाचार्याणां मते ॥** त्यदादीनि शिष्यन्ते सर्वैः सहोक्तौ । सर्वैः शब्दैः सहोक्तानि त्यदादीनि शिष्यन्तेऽन्यानि पदानि लुप्यन्ते द्वन्द्वे इत्यर्थः ॥ ३२ ॥

(समाहारे एकवद्भावः) ॥ ३३ ॥

(सू०) समाहारे एकवद्भावः ॥ एकवद्भवनमित्येकवद्भावः ॥ ३३ ॥

(एकत्वे द्विगुद्वन्द्वौ) नपुंसकलिङ्गौ भवतः ॥ पाणिपादम् । मार्दङ्गिकपाणविकम् । रथिकाश्वारोहम् । पदकक्रमकम् । बदरामलकम् । शशकुशपलाशम् ॥ ३४ ॥

(सू०) एकत्वे द्विगुद्वन्द्वौ ॥ एकत्वे वर्तमानौ द्विगुद्वन्द्वौ नपुंसकलिङ्गौ भवतः ॥ एकत्वे किम् । पञ्चकपालाः पुरोडाशाः ॥ परवल्लिङ्गापवादोऽयं विधिः ॥ पाणी च पादौ च तेषां समाहारः पाणिपादम् ॥ मार्दङ्गिकश्च पाणविकश्च तयोः समाहारो मार्दङ्गिकपाणविकम् ॥ रथिकाश्च अश्वारोहाश्च तेषां समाहारो रथिकाश्वारोहम् ॥ पदान्यधीते इति पदकः । क्रममधीते इति क्रमकः । कप्रत्ययः । पदकश्च क्रमकश्च तयोः समाहारः पदकक्रमकम् ॥ बदराणि च आमलकानि च तेषां समाहारो बदरामलकम् ॥ शशाश्च कुशाश्च पलाशाश्च तेषां समाहारः शशकुशपलाशम् ॥ अथ समासान्तप्रत्ययाः । चवर्गान्तात्

दपहान्ताच्च टः समाहारे । वाक्त्वचम् । वाक्स्रजम् । शमीदृषदम् । वाक्त्विषम् । छत्रोपानहम् ॥ समाहारे किम् । प्रावृट्शरदौ । अहः पूर्वाद्रात्रिशब्दादः समाहारे । अहश्च रात्रिश्च तयोः समाहारोऽहोरात्रः । रात्राह्नाहान्ता इति पुंस्त्वम् ॥३४॥

इति द्वन्द्वः ॥

(संख्यापूर्वो द्विगुः) तद्धितार्थे । पञ्चकपालः(क) ॥३५॥

(सु०) संख्यापूर्वो द्विगुः ॥ संख्या पूर्वा यस्य स संख्यापूर्वः समासो द्विगुसंज्ञो भवति ॥ समाससंज्ञाफलं समासप्रत्ययोरिति । द्विगुसंज्ञाफलमेकत्वे द्विगुद्वन्द्वाविति ॥ द्वौ गावौ शब्दौ यस्मिन्नित्यन्वर्थसंज्ञाबलात् द्वयोरेव द्विगुसमाहारे द्विगावेकवद्भावः । तद्धितार्थे द्विगौ तु नैकवद्भावः । किन्तु विशेषनिघ्नता ॥ पञ्चसु कपालेषु संस्कृतः पुरोडाशः । संस्कृतार्थेऽण् । लुग् बहुत्वे क्वचिदित्यत्र क्वचिद्ग्रहणात् द्विगोर्लुगनपत्ये । द्विगोर्निमित्तस्याऽनपत्यार्थस्य स्वरादेस्तद्धितस्य लुग्वक्तव्य इत्यर्थो बोध्यः । पञ्चकपालः ॥

(त०) संख्यापूर्वो द्विगुरिति ॥ संख्या पूर्वा यस्य सः । संख्याशब्देन च तद्वाचकपदमुच्यते । तथा च संख्यावाचकपदयोर्योऽन्वयः स समाससंज्ञो द्विगुसंज्ञश्चेत्यर्थः ॥ समाहारेऽत ईबित्यस्य वक्ष्यमाणत्वात् समाहारे एवायमिष्यते तद्धितार्थे च । यत्तूत्तरपदे चेत्युक्त्वा पञ्च गावो धनमस्येति विगृह्य पञ्चगवधन इति सिद्धये वासुदेवादिभिः पाणिनीयानुसारेणोत्तरपदविषयत्वमप्यस्योक्तम् । तदिहानुपयोगीत्युपेक्षितम् । तत्र तस्य स्वरार्थत्वात् स्वरस्यात्राव्युत्पादनात् । पञ्चानां गवां समाहारः पञ्चगवम् । टाडका इत्यः । एतद्धनमस्येति द्विगुगर्भबहुव्रीहिणा गतार्थत्वाच्च । अत्राहुः । द्वयोः पुत्रो द्विपुत्रः । द्वौ च दश च द्वादश । द्वौ पुत्रौ यस्य स द्विपुत्र इत्यादौ परत्वात्तत्पुरुषद्वन्द्वबहुव्रीहिसंज्ञा भवन्तीति । अत्रेदमवधेयम् । द्विगुसमासस्य समाहारतद्धितार्थयोरेव विधानादत्र तदभावादेवाप्राप्तौ किं परत्वानुधावनक्लेशेनेति विभाव्यम् ॥ पञ्चकपाल इति ॥ पञ्चसु कपालेषु संस्कृतः पञ्चकपालः पुरोडाशः ॥ एवं चतुरो वेदानधीते चतुर्वेदः । अत्र संस्कृतादिष्वणादिः । तस्य लुग्बहुत्वे क्वचिदिति लुक् । यद्वा तद्धितार्थस्य द्विगुनवोक्तत्वात्तद्धितार्थप्रयोगः ॥ ३६ ॥

समाहारेऽत ईप् द्विगुः ॥ समाहारेऽर्थे द्विगुः समासो भवति ततोऽकारान्तादीप् प्रत्ययः ॥ दशानां ग्रामाणां समाहारो दशग्रामी । पञ्चाग्नि ॥३६॥

(सु०) समाहारेऽत ईप् द्विगुः ॥ समाहरणं समाहारः । भावे घञ् । समाहारे राशीकरणेऽर्थे द्विगुः समासो भवति । अदन्तात् द्विगोः स्त्रियामीप् ॥ दशानां ग्रामाणां समाहारो दशग्रामी । यस्येत्यलोपः ॥ ननु विप्रकीर्णानामेकत्र राशीकरणं समाहारार्थः । स च दशानां ग्रामाणां न सम्भवति । उच्यते । एकक्रियायां समन्वयात् बुद्ध्या राशीकरणस्य सम्भवात्(क) । उदाहरणम् । पञ्च अग्नयः समाहृता इति पञ्चाग्नि ॥३६॥

(क) पञ्चकपाल इति । अत्र संस्कृतादिष्वणादिः । तस्य लुग्बहुत्वे क्वचिदिति लुक् । यद्वा तद्धितार्थस्य द्विगुनैवोक्तत्वात्तद्धितार्थयोरप्रयोगः ।

(क) विप्रकीर्णानां विक्षिप्तानाम् । राशीकरणमेकत्रीकरणम् । अय भावः । दशानां ग्रामाणामेकत्रीकरणासम्भवेऽपि बुद्ध्यैकत्रीकरणसम्भवात् 'दशग्रामी'ति समाहारः ॥

(त०) समाहारेऽत ईप् द्विगुरिति ॥ औत्तराधर्यं राशीकरणं समाहारः ॥ दृ-शग्रामोति ॥ ननु विप्रकीर्णानामेकत्र राशीकरणं समाहारार्थः । स च ग्रामाणां न सम्भ-वतीति चेत् न एकक्रियायां समन्वयात् बुद्ध्या राशीकरणसम्भवात् ॥ ३६ ॥

क्वचिन्न ॥ पञ्चपात्रम् । चतुर्युगम् । त्रिभुवनम् ॥ आबन्ताद्वा ॥ पञ्च-खट्वी—पञ्चखट्वम् ॥ ३७ ॥

(सु०) **क्वचिन्न** ॥ क्वचिददन्तात् द्विगोरीप् न स्यात् ॥ पञ्चानां पात्राणां समा-हारः पञ्चपात्रम् ॥ चतुर्णां युगानां समाहारः चतुर्युगम् ॥ त्रयाणां भवनानां समाहारः त्रिभुवनम् ॥ समासान्तानग्रे वक्ष्यामि ॥ ३७ ॥ इति द्विगुः ॥

(त०) अत्र वोर्गुणादित्यतो वेत्यस्यानुवृत्तेस्तस्य च व्यवस्थितत्वात्—**क्वचिन्ने-ति** ॥ एकापूपमित्यत्र तु दरिद्रस्यकस्मिन्ननेकत्वारोपेणारोपितबहुत्वाश्रये समाहारे द्वि-गुः ॥ त्रिलोकनाथ इत्यादौ तु त्र्यवयवो लोकस्त्रिलोकस्तन्नाथ इत्येवं प्रकारः ॥ ३७ ॥

इति द्विगुः ॥

बहुव्रीहिरन्यार्थे ॥ अन्यपदार्थे योऽन्वयः स बहुव्रीहिसंज्ञः(क)॥३८॥

(सु०) **बहुव्रीहिरन्यार्थे** ॥ बहुव्रीहिरित्यस्य पूर्वोच्चारणसामर्थ्यादन्यपदार्थाभा-वेऽपि बहुव्रीहिः कुत्रचिद्भवति ॥ यथा द्वौ वा त्रयो वा द्वित्राः ॥ पञ्च वा षट् वा पञ्च-षाः ॥ द्वौ वा दश वा द्विदशाः ॥ त्रयश्च दश वा त्रिदशाः(ख) ॥ डप्रत्ययान्तानेतानग्रे प्रवक्ष्यामि । पदानां समासविधानादन्यशब्देन पदं गृह्यते(ग) । अन्यस्य समस्यमानप-दिभिन्नस्य पदस्यार्थः अन्यार्थस्तस्मिन् । अमादाविस्यस्यानुवर्त्तनात् द्वितीयाद्यन्तं विशे-षणं कर्तव्यम्(घ) । अत्र हि द्वितीयाद्यन्तपदेन प्रकृत्यर्थोपसर्जनकः प्रत्ययार्थः कर्मादिभि-रभिधीयते । प्रथमान्तेन तु प्रातिपदिकार्थमात्रम् । यद्यपि त्रिकपक्षे संख्या प्रत्ययार्थस्त-थापि तस्याः प्रकृत्यर्थं प्रति विशेषणत्वान्न प्रकृत्यर्थोपसर्जनकः प्रत्ययार्थः प्रथमान्तस्या-स्ति(ङ) । एवं च द्वितीयान्ताद्यर्थे इति स्थितम् । तथा परिशेषात् समस्यमानं प्रथमा-न्तमेव लब्धम् । अप्रथमाविभक्त्यर्थे बहुव्रीहिरिति समानाधिकरणानामिति च फलितम् । अनेकं प्रथमान्तमप्रथमार्थेऽन्यार्थे वर्तमानं समस्यते स बहुव्रीहिः । समस्यमानपदेतरपदार्थे समस्यमानपदानामन्वयो बहुव्रीहिरित्यर्थः । कण्ठेकाल इत्यादिस्तु बहुव्रीहौ विशेषणसप्त-

---

(क) **बहुव्रीहिसंज्ञ इति** । अन्यपदार्थप्रधानो बहुव्रीहिरिति समायाति । अत्र केषांचित्—'नञ्तत्पुरुषभिन्नत्वे सति लाक्षणिकोत्तरपदत्वं बहुव्रीहित्व'मिति लक्षणम् । चित्रा गावो यस्येति चित्रगु-रित्यादौ गोपदं गोस्वामिनि लाक्षणिकं चित्रपदं च चित्रपदस्यापरपदार्थैकदेशे गवि अभेदान्वयस्तेन चित्राभिन्नगोस्वामीति बोधः । अथवा चित्रपदं तात्पर्यग्राहकं गोपदं चित्रगोस्वामिनि लाक्षणिकम् । तेन 'पदार्थः पदार्थेनान्वेति, न तु पदार्थैकदेशे' इति व्युत्पत्तेरभङ्गः । इति ॥

(ख) 'द्वौ वा त्रयो वा, द्वित्रा' इत्यादौ बहुव्रीहित्वस्थापनायाह—**अन्यपदार्थाभावेऽपीति** । बहुव्रीहिरन्यार्थे इत्यत्र विधेयस्य प्राक्कथनादेतल्लभ्यत इति भावः ।

(ग) सूत्रघटकान्यपदार्थं व्याचष्टे—**पदानामिति** ।

(घ) 'अमादौ तत्पुरुषः' इत्यत अमादावित्यनुवर्त्तते । तदाह—**अमादावितीति** ।

(ङ) वृत्तिकारमते स्वार्थद्रव्यसङ्ख्यारूपं त्रिकं नामार्थः । इति कारकप्रकरणे उक्तमस्ति ।

न्यन्तक्तान्तानामिति ज्ञापकाद्भवतीत्यर्थः । अतः स द्विधा । समानाधिकरण एव व्यधिकरणस्तु कुत्रचित् सम्भवति समानाधिकरणे वैयधिकरण्यस्यान्यत्वमित्युक्तत्वात् । किञ्च बहुव्रीहितत्पुरुषयोर्विषयविभागो यथा विज्ञायेत एतदर्थं सूत्रेऽन्यग्रहणं कृतम् । द्वितीयाद्यन्तमन्यपदार्थे क्रमेणोदाहरति । प्राप्तमुदकं यमिति समासोक्तत्वात् कर्मादौ प्रथमा । प्राप्तोदको ग्रामः (क) । ऊढो रथो येन स ऊढरथोऽनड्वान्(ख) । उपहृतः पशुर्यस्मै स उपहृतपशू रुद्रः । उद्धृत ओदनो यस्याः सा उद्धृतौदना स्थाली । पीतम् अम्बरं यस्य स पीताम्बरः । वीरः पुरुषो यस्मिन् स वीरपुरुषो ग्राम (ग) इति ॥ ३८ ॥

(त०) बहुव्रीहिरन्यार्थे इति ॥ अन्यस्य समस्यमानपदाद्भिन्नस्य पदस्यार्थः अन्यार्थस्तस्मिन् । यद्वा । अन्यस्याः प्रथमाभिन्नाया विभक्तेरर्थः अन्यार्थस्तस्मिन् । यद्वा तन्त्रादिना उभयमपि । तथा चाप्रथमार्थे बहुव्रीहिः ॥ ३८ ॥

(बहुव्रीहौ विशेषणसप्तम्यन्तक्तान्तसर्वादिसंख्यानां पूर्वनिपातः(घ)) बहु धनं यस्य स बहुधनः । अस्तिधनः । लम्बकर्णः । कण्ठेकालः । वहेगडुः । कृतकटः । सर्वप्रियः । द्विपुत्रः ॥ ३९ ॥

(सु०) बहुव्रीहौ विशेषणसप्तम्यन्तक्तान्तसर्वादिसंख्यानां पूर्वनिपातः ॥ बहुव्रीहौ विशेषणं सप्तम्यन्तं क्तान्तं च पूर्वं प्रयोज्यम् । विशेषणं यथा । बहुधनः ॥ अस्तीति सत्तार्थेऽव्ययम् । अस्ति धनं यस्य सोऽस्तिधनः ॥ लम्बौ कर्णौ यस्य स लम्बकर्णः ॥ सप्तम्यन्तं यथा । कण्ठेकालः । वहेगडुः । सप्तम्या अलुगत्र ॥ क्तान्तं यथा । कृतः कटो येन स कृतकटः ॥ सर्वादिः संख्या च यथा । बहुव्रीहौ सर्वादिगणः संख्या च पूर्वं प्रयोज्या । सर्वः प्रियो यस्य स सर्वप्रियः । द्वौ पुत्रौ यस्य स द्विपुत्रः ॥ त्रिपुत्रः ॥ ३९ ॥

(त०) बहुव्रीहिसंज्ञाप्रयोजनं पूर्वनिपातनियममाह—बहुव्रीहाविति ॥ सर्वादिसंख्ययोस्तु संख्यायाः । त्र्यन्यः ॥ संख्ययोस्त्वल्पीयस्याः । द्वित्राः ॥ बहुधन इति ॥ अतद्गुणसंविज्ञानोऽयम् ॥ तस्यान्यपदार्थस्य गुणाः विशेषणानि समस्यमानपदार्थाः कार्यभाक्त्वेन संविज्ञायन्तेऽस्मिन्निति तद्गुणसंविज्ञानस्तदन्योऽतद्गुणसंविज्ञानः ॥ अस्तिधन इति ॥ अस्तीति तिबन्तप्रतिरूपकमव्ययम् । समासे भिन्नां शक्तिं मन्वानानां वैयाकरणानां मतं द्रढयितुं वाक्यसमासयोः शाब्दबोधे भेदं प्रदर्श्यते । तथाहि । प्राप्तमुदकं यमित्यस्य यत्कर्मकप्राप्तिकर्तृ उदकमिति बोधः ॥ प्राप्तोदक इत्यस्य उदककर्तृकप्राप्तिकर्मीभूतो ग्राम इति बोधः ॥ एवं प्राप्तानन्दः ॥ ऊढो रथो येनेत्यस्य यदाश्रयवहनसाध्यदेशान्तरप्राप्त्याश्रयो रथ इति बोधः ॥ ऊढरथ इत्यस्य तु रथकर्मकवहनाश्रयोऽश्वः ॥ छिन्नः वृक्षो येनेत्यस्य यत्करणकद्वैधीभावाश्रयो वृक्षः । छिन्नवृक्ष इत्यस्य वृक्षाश्रयद्वैधीभावानुकूलव्या-

---

(क) प्राप्तमिति । 'गत्यर्थाकर्मकात्' इति कर्त्तरि क्तः । अत्र विग्रहवाक्ये ग्रामकर्मकप्राप्तिकर्त्तृ उदकमित्येव ग्रामस्य विशेषणतया । विशेष्यत्वेन प्राप्तस्य उदकस्य बोधः । समासे तु एकार्थीभावमहिमा उदककर्तृकप्राप्तिकर्मीभूतः ग्राम इत्येवं ग्रामस्य विशेष्यतया । तद्विशेषणतया तु प्राप्तस्य उदकस्य बोधः ।

(ख) ऊढो रथो येनेति विग्रहः । (ग) अत्र कर्मादीनां समासेनाभिहितत्वात् प्रथमैव ।

(घ) बहुव्रीहाविति । बहुव्रीहावित्यस्योपलक्षणत्वाद्रक्तलतेत्यादौ कर्मधारयेऽपि विशेषणस्य पूर्वनिपात इति—वासुदेवः ।

पाराश्रयः कुठारः ॥ उपहृतः पशुर्यस्मै इत्यस्य यदुद्देश्यकोपहरणाश्रयः पशुरिति । उपहृतपशुरित्यस्य तु पशुकर्मकोपहारोद्देश्यो रुद्रः ॥ एवं दत्तार्घः सूर्यः ॥ उद्धृतमन्नं यस्मादित्यस्य यदवधिकोद्धरणाश्रयोऽन्नमिति बोधः ॥ उद्धृतान्न इत्यसान्नकर्मोद्धरणावधिः कटाहः ॥ पीतमम्बरं यस्येत्यस्य यत्सम्बन्धि पीताभिन्नमम्बरमित्यर्थः॥ पीताम्बर इत्यस्य तु पीताभिन्नाम्बरः स्वामीत्यर्थः ॥ एवं चित्रगुरित्यस्य ॥ वीराः पुरुषा यस्मिन्नित्यस्य यदाधारसत्ताश्रयवीराभिन्नाः पुरुषा इति बोधः ॥ वीरपुरुष इत्यस्य तु वीराभिन्नपुरुषसत्ताश्रयो ग्राम इति । ३९ ।

(क्वचिन्न) चन्द्रशेखरः । पद्मनाभः । दन्तजातः । ऊरुभिन्नः ॥४०॥

(सु०) क्वचिन्न ॥ बहुव्रीहौ क्वचिद्विशेषणसप्तम्यन्तक्तान्तानां पूर्वनिपातो न भवति ॥ चन्द्रः शेखरे यस्य स चन्द्रशेखरः । पद्मं नाभौ यस्य स पद्मनाभः । टाडका इत्यनेनाप्रत्ययः ॥ दन्ता जाता यस्य स दन्तजातः ॥ ऊरू भिन्नो यस्य स ऊरुभिन्नः ॥ ४० ॥

(त०) क्वचिन्नेति ॥ ज्ञापकसिद्धस्यासार्वत्रिकत्वादिति भावः ॥ ४० ॥

(क्वचिद्वा) प्रियगुडः । गुडप्रियः । आहिताग्निः । अग्न्याहितः । अस्युद्यतः । उद्यतासिः ॥ ४१ ॥

(सु०) क्वचिद्वा ॥ बहुव्रीहौ क्वचिद्विशेषणसप्तम्यन्तक्तान्तानां वा पूर्वनिपातो भवति ॥ प्रियो गुडो यस्य स प्रियगुडः । गुडप्रियो वा ॥ आहितः अग्निर्येन स आहिताग्निः । अग्न्याहितो वा ॥ असिरुद्यतो येन स उद्यतासिः । अस्युद्यतो वा ॥ ४१ ॥

(नञ्दुःसुभ्यः प्रजामेधयोरसुक्) अप्रजाः । दुर्मेधाः सुप्रजाः॥४२।

(सु०) नञ्दुःसुभ्य प्रजामेधयोरसुक् ॥ नञादिभ्यः पराभ्यां प्रजामेधाभ्यामसुक् प्रत्ययः स्याद्बहुव्रीहौ । न प्रजा यस्य सः । ना इत्यनेनादादेशः । असुकप्रत्यये यस्य लोप इत्यालोपः । अत्वसोरिति दीर्घः । अप्रजाः ॥ दुःप्रजाः ॥ सुप्रजाः ॥ अमेधाः ॥ दुर्मेधाः ॥ सुमेधाः । अल्पमेधस इति काशिका ॥ ४२ ॥

(त०) नञ्दुःसुभ्य इति ॥ नञ्दुःसुभ्यः परयोः प्रजामेधाशब्दयोरसुगागमो बहुव्रीहावित्यर्थः ॥ अप्रजा इति ॥ न प्रजा यस्येति विग्रहेऽसुकि यस्येत्यालोपे अत्वसोः साविति दीर्घे रूपसिद्धिः । एतच्च प्राचामनुरोधेन । वस्तुतस्तु प्रजामेधाभ्यामसित्येवावक्तुमुचितम् । तथा चास् प्रत्यय एव न त्वागमः । एतेन यद्यप्यसुक उकारानुबन्धत्वादिदितो नुर्मिति नुम् प्राप्नोति तथापि वाऽऽदीशोः शतुरित्यतो वानुकर्षणान्नेति वासुदेवोक्तिः प्रत्युक्ता ॥ ४२ ॥

(धर्मादन्) सुधर्मा । रूपवति भार्या यस्य ॥ ४३ ॥

(सु०) धर्मादन् ॥ धर्मशब्दादन् प्रत्ययः स्यात् द्विपदबहुव्रीहौ ॥ सुष्ठु धर्मो यस्य स सुधर्मा ॥ ननु अकारो व्यर्थः नप्रत्ययेनैव रूपसिद्धेरिति चेत् उच्यते । धर्मं करोत्याचष्टे वेति धर्मनाम्नो णिडिष्करणे इति ण्यन्तात् क्विपि धर्मिति । परमो धर्म यस्य एकदेशविकृतस्यानन्यत्वात् अन् । स परमधर्मा । इत्याद्यर्थमकारोच्चारणं बोध्यम्(क) ॥ ४३ ॥

(क) सुष्ठु धर्मो यस्येति न् प्रत्ययेन सुधर्मेति सिद्धौ सत्यामन्प्रत्ययकरणं किमर्थमित्याशङ्कते नन्वित्यादिना । उत्तरमाह—धर्ममिति । धर्मिति । क्विप्प्रत्ययस्य सर्वावयवलोपित्वादिति भावः ॥

(त०) धर्मादिति ॥ केवलात्पूर्वपदात्परो यो धर्मशब्दस्तदन्ताद्बहुव्रीहेरन् प्रत्यय॰ इत्यर्थः ॥ केवलात्किम् । परमः स्वो धर्मो यस्येति त्रिपदे बहुव्रीहौ मा भूत । यत्तु वा॰ सुदेवेनोक्तम् । केवलात्पदाद्यः केवलो धर्मशब्दस्तस्मादन् प्रत्ययो वक्तव्य इत्यर्थः ॥ तेनेह न । परमः स्वो धर्मः परमः स्वधर्मो व यस्य स परमस्वधर्म इत्यत्रेति तन्न । आद्ये परमस्व इत्यस्य कर्मधारयेणकपद्यात्केवलमस्त्येव । अन्ते धर्मशब्दस्य केवलविशेषणत्वं व्यर्थम् । धर्मशब्दस्य बहुव्रीह्यवयवीभूतपूर्वपदात्परत्वस्याभावात् । उक्तं च दीक्षितैरपि संदिग्धसाध्यधर्मेत्यादौ तु कर्मधारयपूर्वपदो बहुव्रीहिः । एवं परमस्वधर्मेत्यपि साध्वेवेति॥४३॥

अन्यार्थे ॥ स्त्रीप्रत्ययान्तस्यान्यार्थे वर्तमानस्य ह्रस्वः (क) ॥४४॥

(सु०) अन्यार्थे ॥ अन्यार्थे गौणत्वे वर्तमानस्य स्त्रीप्रत्ययान्तस्य नाम्नो ह्रस्वो भवति ॥ स्त्रीप्रत्ययस्येति किम् । अतिलक्ष्मीः । अतिचमूः ॥ गौणत्वे किम् । राजकुमारी । ब्रह्मविद्या ॥ किञ्च नपुंसकात्स्यमोर्लुगित्यतो लुगित्यनुवर्त्य वाक्यभेदेन व्याख्येयम् । तथाहि अन्यस्य तद्धितस्यार्थे वर्तमानं यत् स्त्रीप्रत्ययान्तं तदवयवस्य स्त्रीप्रत्ययस्य लुक् स्यात् । यथा पञ्चभिः पट्विभिः क्रीतः पञ्चपटुः ॥ पञ्चभिर्ब्राह्मणीभिः क्रीतः पञ्चब्राह्मणः ॥ पञ्चभिरिन्द्राणीभिः क्रीतः पञ्चेन्द्रः ॥ पञ्च अग्नाय्यो देवता अस्येतिप ञ्चाग्निः॥ पञ्च मनाय्यो देवता अस्येति पञ्चमनुः ॥ अत्र हि संख्यापूर्वो द्विगुरित्यनेन तद्धितार्थे द्विगुः। ततोऽण् प्रत्ययः । तस्य लुग् बहुत्वे क्वचिदित्यनेन लुक् तद्धितार्थे गौणस्य स्त्रीप्रत्ययस्यानेन लुक् क्रियते इत्यर्थः ॥ रूपवती भार्या यस्येति लौकिकविग्रहः ॥ ४४ ॥

(त०) अन्यार्थे इति ॥ अन्यस्यार्थः अन्यार्थस्तस्मिन् । वर्तमानस्येत्यध्याहार्यं कारकविभक्तेः क्रियान्वयस्य नियमात् । ह्रस्वो वेत्यतो ह्रस्वानुवृत्तेः स्वरस्येति लभ्यते । त्रिचतुरोरित्यतः स्त्रियामित्यनुवृत्तं तच्च विहितविशेषणमित्याशयेनाह—स्त्रीप्रत्ययान्तस्येत्यादि ॥ अन्यार्थे किम् , राजकुमारी ॥ स्त्रीप्रत्यान्तस्येति किम् । अतिलक्ष्मीः । स्त्रीप्रत्ययान्तस्येति समासविशेषणाद्द्वित्वफलमित्यादौ न ह्रस्वः । न चात्रान्यार्थत्वमेव कथमिति चेच्छृणु । अन्यार्थवृत्तित्वं हि गौणत्वम् । तच्चात्राप्यस्त्येव । अत्रोत्तरपदार्थस्येव प्राधान्यात्पूर्ववदार्थस्य गौणत्वस्वीकारात् । वेत्यस्याप्यनुवृत्तेस्तस्य च व्यवस्थितत्वाश्रयणाद्बहुश्रेयसीत्यादौ न । यत्तु प्राचोक्तं स्त्रीलिङ्गस्येति । यच्च वासुदेवेन व्याख्यातं त्रिचतुरोः स्त्रियामित्यतो विभक्तिविपरिणामेन स्त्रिया इति षष्ठ्यन्तमनुवर्तते इति । तन्न । अतिलक्ष्मीरित्यादावतिव्याप्तेः ॥ ४४ ॥

पुंवद्वा ॥ समासे समानाधिकरणे स्त्रीलिङ्गे परे पूर्वस्योक्तपुंस्कस्य स्त्रीलिङ्गस्य पुंलिङ्गस्येव रूपम् ॥ रूपवद्भार्यः ॥ उक्तपुंस्कस्य किम् । छायाद्वितीयः । गङ्गाभार्यः (ख) ॥ ४५ ॥

ननु धर्मादनिति सूत्रश्रुत्याऽदकारान्तधर्मशब्दादेवान्प्रत्ययप्राप्तौ परमो धर्म यस्येत्यत्र समासेऽनपि न प्राप्नोतीत्याशङ्कायामाह—एकदेशेत्यादि ।

(क) त्रिचतुरोः स्त्रियामित्यतो विभक्तिविपरिणामेनास्त्रिया इति षष्ठयन्तमनुवर्त्तते । ह्रस्वो वेत्यतश्च ह्रस्व इत्यभिप्रेत्य व्याचष्टे—स्त्रीप्रत्ययेत्यादि ।

(ख) एकविभक्त्यन्तानामेकार्थनिष्ठत्वं सामानाधिकरण्यम् । एकाधिकरणवर्त्तित्वमित्यर्थः ।

(सु) पुंवद्वा ॥ उक्तः पुमान् येन तदुक्तपुंस्कं तस्योक्तपुंस्कस्य स्त्रीवाचकप्रत्ययान्तस्य नाम्नः पुंवाचकस्येव रूपं भवति समानाधिकरणे स्त्रीलिङ्गे समासस्य चरमावयवे रूढमुत्तरपदं तस्मिन्नुत्तरपदे सति ॥ एकविभक्त्यन्तानाम् एकार्थनिष्ठत्वं समानाधिकरणत्वम् ॥ किंच यद्यत्र उक्तः पुमान् येन तदुक्तपुंस्कमित्युच्यते तर्हि कुटीभार्यः, द्रोणीभार्य्य इत्यादावतिप्रसङ्गः स्यात् । कुटीद्रोणीशब्दाभ्यामर्थान्तरे पुंल्लिङ्गस्याप्युक्तत्वात् । तथा च । "कुटः कोटे शिलाकुट्टे घटे गृहे कुटी सुरा । चित्रगुच्छे कुम्भदास्योः कूटं पूर्णायन्त्रयोः" इति हैमः ॥ "द्रोणः पार्थगुरौ काके माने द्रोणी तु नीवृति । नौभेदे शैलसन्धौ च" इति हैमः ॥ उक्तपुंस्कस्येति किम् । छायद्वितीयः ॥ गङ्गा भार्या यस्य स गङ्गाभार्यः । अत्रानयोर्नित्यस्त्रीत्वम् । अलौकिकविग्रहे रूपवती स् भार्या स् इति 'अन्यार्थे' इत्यनेन ह्रस्वः । पुंवद्वेत्यनेनेपो निवृत्तिः ॥ ४५ ॥

(ऊप्रत्ययान्तस्य न) वामोरूभार्यः ॥ ४६ ॥

(सु०) ऊप्रत्ययान्तस्य न ॥ उक्तपुंस्कस्य ऊप्रत्ययान्तस्य स्त्रीलिङ्गस्य पुंवद्भावो न भवति समानाधिकरणे स्त्रीलिङ्गे परे ॥ वामोरूः भार्या यस्य स वामोरूभार्यः । संहितशफलक्षणवामसहितसहादेरित्यूप्रत्ययः ॥ ४६ ॥

(पूरणार्थप्रत्ययान्ते प्रियादौ च न) कल्याणी पञ्चमी यासां रात्रीणां ताः कल्याणीपञ्चमा रात्रयः । कल्याणीप्रियः(क) ॥ ४७ ॥

(सु०) पूरणार्थप्रत्ययान्ते प्रियादौ च न ॥ उक्तपुंस्कस्य स्त्रीलिङ्गस्य पुंवद्भावो न भवति समानाधिकरणे स्त्रीलिङ्गे पूरणार्थप्रत्ययान्ते प्रियादौ च परे ॥ अलौकिकविग्रहे कल्याणी स् पञ्चमी स् इति । 'अन्यार्थे' इत्यनेन ह्रस्वः । 'पूरणार्थे पञ्चादेर्मट्' इति मट्प्रत्ययः । पूरणार्थप्रत्ययान्ते' इत्यनेन कल्याणी इत्यत्र पुंवद्भावो न । ततः समासान्तप्रत्ययः । यस्येतीकारलोपे ततः स्त्रियामाप् । कल्याणीपञ्चमाः ॥ प्रिया मनोज्ञा कल्याणी सुभगा दुर्भगा भक्तिः सचिवा स्वसा कान्ता क्षान्ता समा चपला दुहिता वामा अबला तनया । षोडश प्रियादयः ॥ कल्याणी प्रिया यस्य स कल्याणीप्रियः ॥ ४७ ॥

(त०) पुंवद्वेति ॥ वाशब्दस्य व्यवस्थितत्वाश्रयणादप्रत्ययान्तस्य नेत्यादिकं दर्शयति कल्याणी पञ्चमी इति ॥ ४७ ॥

(तरतमचरट्कल्पदेश्यदेशीयरूपपाशादौ पुंवत्) दर्शनीयतरा । दर्शनीयतमा । दर्शनीयचरी । दर्शनीयपाशा ॥ ४८ ॥

(सु०) तरतमचरट्कल्पदेश्यदेशीयरूपपाशादौ पुंवत् एषु परेषु स्त्रियाः पुंवद्भवति ॥ अतिशयेन दर्शनीयेति दर्शनीयतरा । दर्शनीयतमा । तरतमेयस्विष्ठा इति तरतमौ ॥ भूतपूर्वा दर्शनीयेति दर्शनीयचरी । भूतपूर्वे चरडिति चरट् । टिड्ढाणञ् इतीप् ॥ ईषन्न्यूना दर्शनीयेति दर्शनीयकल्पा । दर्शनीयदेशीया । ईषदसमाप्तौ कल्पदेश्यदेशीया

(क) पूरणेति । उक्तपुंस्कस्य स्त्रीलिङ्गस्य पुंवद्भावो न स्यात् समानाधिकरणे स्त्रीलिङ्गे पूरणार्थे प्रत्ययान्ते प्रियादौ च परे । पुंवद्वेति वा शब्दस्य व्यवस्थितत्वाश्रयणादप्रत्ययान्तस्य नेत्यादिकं दर्शयति— कल्याणीपञ्चमा इति ।

इति कल्पदेशीयौ ॥ प्रशस्ता दर्शनीयेति दर्शनीयरूपा । प्रशंसायां रूप इति रूपः ॥ कुत्सिता दर्शनीयेति दर्शनीयपाशा । कुत्सायां पाश इति पाशः ॥ आदिशब्दात् प्रवल् जातीयधाय्यादयो ज्ञेयाः । बह्वीषु बहुत्र बहुतः । पट्वीप्रकारवती पटुजातीया । प्रकारे जातीय इति जातीयप्रत्ययः ॥ बहुधा । किंसर्वादिबहुभ्यः प्रकारे धा ॥ अजाभ्यो हिता अजथ्या । अजाविभ्यां थ्य इति थ्यप्रत्ययः ॥ ४८ ॥

(त०) दर्शनीयतरेति ॥ अतिशयेन दर्शनीयेति विग्रहः ॥ ४८ ॥

(शसि बह्वल्पार्थस्य पुंवत्) बह्वीभ्यो देहि बहुशः । अल्पशः ॥४९॥

(सु०) शसि बह्वल्पार्थस्य पुंवत् ॥ बह्वल्पार्थस्य स्त्रीप्रत्ययान्तस्य पुंवद्भावो भवति शसि । बह्वीभ्य इति बहुशः । अल्पाभ्य इत्यल्पशः । बह्वल्पार्थात्कारकादिति शस् । ४९ ।

(त्वतलोर्गुणवचनस्य) शुक्लाया भावः शुक्लत्वम् । शुक्लता(क) ॥५०॥

(सु०) त्वतलोर्गुणवचनस्य ॥ गुणवचनस्य शब्दस्य पुंवद्भावो भवति त्वतलोः परयोः ॥

(त०) त्वतलोर्गुणवचनस्येति । गुणवचनस्येति किम् । कर्त्र्या भावः कर्त्रीत्वम् । ५० ।

(कुक्कुट्यादीनामण्डादिषु) कुक्कुट्या अण्डं कुक्कुटाण्डम् । मृगपदम् । मृगक्षीरम् । काकशावः ॥ ५१ ॥

(सु०) कुक्कुट्यादीनामण्डादिषु ॥ कुक्कुट्यादीनां पुंवद्भावो भवत्यण्डादिषु परतः ॥ कुक्कुट्या अण्डमिति कुक्कुटाण्डम् । मृग्याः पदमिति मृगपदम् । मृग्याः क्षीरमिति मृगक्षीरम् । काक्याः शाव इति काकशावः ॥ ५१ ॥

(सर्वादेः समासादौ पुंवत्) दक्षिणस्याः पूर्वस्याश्च अन्तरालं मध्ये या दिक् सा दक्षिणपूर्वा ॥ सर्वा प्रधानमस्येति सर्वमयः । सर्वां करोति सर्वंकरः(ख) ॥ ५२ ॥

(सु०) सर्वादेः समासादौ पुंवत् ॥ सर्वादेर्गण य पुंवद्भावो भवति समासादौ । आदिशब्दात् कृत्तद्धितयङाद्यन्तधातुषु च ॥ समासे यथा । दक्षिणस्याः पूर्वस्याश्च दिशोर्मध्ये या दिक् सा दक्षिणपूर्वा ॥ तद्धिते यथा । सर्वा प्रधानमस्येति प्राचुर्यविकारप्राधान्यादिषु मयडिति मयट् । सर्वमयः ॥ कृति यथा सर्वां करोतीति सर्वंकरः । इत्खीति खः । खिति पदस्येति मुम् ॥ यङाद्यन्तधातुषु यथा । सर्वामिच्छतीति काम्यश्चेति काम्यप्रत्ययः । सर्वकाम्यः ॥ ५२ ॥

(त०) समासादाविति । समासादिवृत्तावित्यर्थः । तथा च कृत्तद्धितसमासैकशेषधातुसंज्ञाप्रयोजकप्रत्ययेष्वित्यर्थः ॥ ५२ ॥

(यङ्मानिनोः पुंवत्) एनीवाचरति एतायते । दर्शनीयां मन्यते दर्शनीयमानी चैत्रः (ग) ॥ ५३ ॥

(क) कर्त्र्या भावः कर्त्रीत्वमित्यादौ पुंवद्भावनिराकरणामाह—गुणवचनस्येति ।

(ख) समासादावित्यादिना कृत्तद्धितसमासैकशेषधातुसंज्ञाप्रयोजकप्रत्ययानां ग्रहणम् ।

(ग) प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति स्वभिन्नां काञ्चिद्दर्शनीयां मन्यते या सा दर्शनीयमानी ।

(सु०) यङ्मानिनोः पुंवत् ॥ एतयोः परतः स्त्रीलिङ्गस्य पुंवद्भवति । एनीवाचरतीति कर्तुर्यङिति यङि ईपो निवृत्तौ तन्निर्मित्तकस्य नत्वस्यापि निवृत्तिः । 'ये' इति दीर्घः । एतायते ॥ दर्शनीयां मन्यते इति मनेः कर्तरि णिनिः । दर्शनीयमानी । प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति स्वभिन्नां कांचिद्दर्शनीयां मन्यते यो सा दर्शनीयमानिनी । इहापि पुंवत् । नृ्ण ईप् ॥ ५३ ॥

(त०) एतायत इति ॥ ईपो निवृत्तौ तन्निमित्तकस्य नत्वस्यापि निवृत्तिः ॥५३॥

(अकतद्धिताभ्यां कोपधस्य न) पाचिकाभार्यः । रसिकाभार्यः ॥५४॥

(सु०) अकतद्धिताभ्यां कोपधस्य न ॥ अकतद्धितप्रत्ययाभ्यां कृत्वा कोपधस्य स्त्रीलिङ्गस्य पुंवद्भावो न भवति ॥ पचतीति तृवुणाविति वुण् । युवोरित्यकादेशे आबत इत्याप् । काप्यत इतीत्वम् । पाचिका भार्या यस्य स पाचिकाभार्यः । 'अन्यार्थं' इति ह्रस्वः ॥ रसोऽस्त्यस्या इति 'अइकौ च मत्वर्थे' इतीकः । रसिका भार्या यस्येति रसिकाभार्यः । 'अन्यार्थं' इति ह्रस्वः ॥ एवं मद्रेषु भवा मद्रिका । भवार्थे कः । आप् । काप्यत इतीत्वम् । मद्रिकेवाचरतीति मद्रिकायते । मद्रिकां मन्यते इति मद्रिकामानिनी । अत्र यङ्मानिनोरिति पुंवद्भावे प्राप्ते निषेधः ॥ ५४ ॥

(संज्ञापूरणार्थप्रत्यययोर्न) दत्ताभार्यः । पञ्चमीभार्यः ॥५५॥

(सु०) संज्ञापूरणार्थप्रत्यययोर्न ॥ अनयोः पुंवद्भावो न भवति । दत्ता भार्या यस्येति दत्तां मन्यते इति स्त्रियां पुंसि च संज्ञाभूतोऽयं दत्तशब्दो भाषितपुंस्कोऽस्ति(क)। दत्ताभार्यः ॥ दत्तामानिनी ॥ पञ्चमी भार्या यस्येति पञ्चमीभार्यः ॥ कुत्सिता पञ्चमीति पञ्चमीपाशा ॥ पञ्चादेर्मडिति संख्यापूरणे मट । पञ्चमीपाशेत्यत्र तरतमेति प्राप्ते निषेधः॥५५।

(वृद्धिहेतोस्तद्धितस्यारक्तविकारार्थस्य न (ख)) माथुरीभार्यः ॥ अरक्ते किम् । कषायेण रक्ता कन्था काषायी । काषायी कन्था यस्य स काषायकन्थः ॥ अविकारे किम् । हेम्नो विकारो हैमी मुद्रिका यस्येति हैममुद्रिकः ॥ ५६ ॥

(सु०) वृद्धिहेतोस्तद्धितस्यारक्तविकारार्थस्य न ॥ आदिस्वरस्येति सूत्रेण विहिता या वृद्धिस्तस्या हेतुर्यस्तद्धितोऽरक्तविकारोऽर्थो यस्य सोऽरक्तविकारार्थस्तस्यारक्तविकारार्थस्य तद्धितस्य पुंवद्भावनिषेधो भवति ॥ मथुरायां भवा माथुरी । भावार्थेऽण् आदिस्वरस्येति वृद्धिः । नृ्ण इतीप् । माथुरी भार्या यस्य स माथुरीभार्यः । माथुरीवाचरतीति माथुरीयते । कर्तुर्यङिति यङ् । माथुरीं मन्यते इति माथुरीमानिनी । अत्र पुंवद्भावो न ॥ वृद्धिहेतोरिति किम् । मध्ये भवा मध्यमा । मध्यान्म इति भावार्थ मः । मध्यमा भार्या यस्य स मध्यमभार्यः ॥ तद्धितस्येति किम् । काण्डं लुनातीति काण्ड-

---

(क) दत्तशब्दोऽयं डित्थादिशब्दवन्न । किं तु दानक्रियां पुरस्कृत्यैव स्त्रियां पुंसि च संज्ञाभूतः प्रवृत्तः । अतस्तस्य भाषितपुंस्कत्वात् पुंवत्त्वे प्राप्ते निषेधोऽयमित्यर्थः ।

(ख) वृद्धिहेतोरिति । हेतुर्निमित्तमित्यर्थः । रक्तं च विकारश्चेति समाहारद्वन्द्वः । ततो नञ्तत्पुरुषः । रक्तविकारभिन्नेऽर्थे विद्यमानस्येत्यर्थः ।

कावी । कार्येऽणित्यण् । कृद्यम् । काण्डलावी भार्या यस्य स काण्डलावभार्यः ॥ आदिस्वरस्येति विहिता । वृद्धिरिति किम् । तत्परिमाणमस्या अस्तीति तावती। एतत्किंयत्तद्भ्य इति वतुः । यत्तदेतदामित्याकारः । तावती भार्या यस्य स तावद्भार्यः ॥ अरक्तविकारार्थस्येति किम् । कषायेण रक्ता काषायी । "कारकात् क्रियायुक्ते" इति तेन रक्तमित्यर्थेऽण् । नूण इतीप् । काषायकन्थः। पुंवद्भावादीपो निवृत्तिः ॥ हेम्नो विकारो हैमी। विकारार्थेऽण् । नूण इतीप् । हैमी मुद्रिका यस्य स हैममुद्रिकः । पुंवद्भावः ॥ ५६ ॥

(त०) वृद्धिहेतोरिति ॥ यस्मिन् तद्धिते आदिस्वरस्य वृद्धिरित्यर्थः ॥ ५६ ॥

(युटि सति पुंवत्) वैयाकरणभार्यः ॥ ५७ ॥

(सु०) **युटि सति पुंवत्** ॥ वृद्धिहेतोस्तद्धितस्यारक्तविकारार्थस्य स्त्रीप्रत्ययान्तस्य पुंवद्भावो भवति युडागमे कृते सति ॥ व्याकरणमधीते वेत्ति वा इत्यर्थे अण् । न संयिव्वोरिति युट् । पश्चाद्वृद्धिः । नूण इतीप् । वैयाकरणी भार्या यस्य स वैयाकरणभार्यः ॥ सुष्ठु अश्वो यस्य स स्वश्वः । स्वश्वस्यापत्यं स्त्री उट्वृद्धी । सौवश्वी भार्या यस्य स सौवश्वभार्यः ॥ ५७ ॥

(स्वाङ्गादीपोऽमानिनि न) सुकेशी भार्या यस्य स सुकेशीभार्यः । मानिनि तु सुकेशमानिनी ॥ ५८ ॥

(सु०) **स्वाङ्गादीपोऽमानिनि न** ॥ स्वाङ्गात्परस्य ईप्प्रत्ययस्य पुंवद्भावो न भवति । मानिन्शब्दे परे तु पुंवद्भावो भवतीत्यर्थः ॥ सुष्ठु केशा यस्याः सा स्वाङ्गादीप् । सुकेशी भार्या यस्य स सुकेशीभार्यः ॥ स्वाङ्गात्किम् । पट्वी भार्या यस्य स पटुभार्यः ॥ ईप् इति किम् । न विद्यन्ते केशा यस्याः सा अकेशा । सहनञिती्निषेधः । अकेशा भार्या यस्य सोऽकेशभार्यः । पुंवद्भावः । सुकेशीं मन्यते यः स सुकेशमानी। स्त्री तु सुकेशमानिनी ॥ ५८ ॥

(जातिवाचिनः स्त्रीप्रत्ययान्तस्य न) शूद्राभार्यः । ब्राह्मणीभार्य इत्यादि ॥ ५९ ॥

(सु०) **जातिवाचिनः स्त्रीप्रत्ययान्तस्य न** ॥ जातिवाचिशब्दात्परस्य स्त्रीप्रत्ययस्य पुंवद्भावो न भवति ॥ शूद्रा भार्या यस्य स शूद्राभार्यः । आजादेरित्याप् ॥ ब्राह्मणी भार्या यस्य स ब्राह्मणीभार्यः । जातेरितीप् ॥ ५९ ॥

(गोः) गोशब्दस्यान्यार्थे वर्तमानस्य ह्रस्वो भवति (क) ॥ पञ्च गावो यस्य स पञ्चगुः ॥ ६० ॥

(सु०) **गोः** ॥अन्यार्थं वर्तमानो यो गोशब्दस्तदन्तस्य नाम्नो ह्रस्वो भवति ॥ पञ्च गावो यस्य स पञ्चगुः । पञ्चभिर्गोभिः क्रीतः स पञ्चगुः । क्रीतार्थे इकस्य लुक् वा ॥ अन्यार्थे किम् । अतिशयितो गौरतिगौः ॥ ६० ॥

(त०) गोरिति ॥ अन्यार्थे यो गोशब्दस्तदन्तस्य नाम्नो ह्रस्व इत्यर्थः ॥ यथा श्रुते तु गोक्षीरमित्यत्रापि गोशब्दस्योत्तरपदार्थे वर्तमानत्वेनान्यार्थत्वाद्ध्रस्वः प्रसज्येत ।

(क) अन्यार्थे वर्तमानगोशब्दान्तस्य ह्रस्वो भवतीत्यर्थः । अन्यथा गोक्षीरमित्यादौ ह्रस्वः प्रसज्येत।

गोरन्यार्थे इत्येकयोगस्तु न कृतः स्त्रीप्रत्ययस्याग्रहणप्रसङ्गात् । गोस्त्रीत्यपि गौरवादेव नोक्तम् ॥

(संख्यासुव्याघ्रादिपूर्वस्य पादशब्दस्यान्तलोपः) सहस्रं पादा यस्य स सहस्रपात् ॥ ६१ ॥

(सु०) संख्यासुव्याघ्रादिपूर्वस्य पादशब्दस्यान्तलोपः ॥ संख्यासुपूर्वस्य व्याघ्रादिपूर्वस्य च पादस्यान्तस्य लोपः स्यात् बहुव्रीहौ । समासान्तोऽयमादेशो ज्ञेयः । अन्यथा समासान्तः कः प्रसज्येत । सहस्रं पदा यस्य स सहस्रपाद् ॥ ६१ ॥

(शसादौ स्वरे तद्धितयस्वरयोरीपीकारे च पदादेशः) सहस्रपदः । व्याघ्रपदी कुले । वैयाघ्रपदः । वैयाघ्रपद्यः । द्विपाद् , द्विपादौ, द्विपादः । सुपात् । व्याघ्रपात् ॥ टाडकाः । मध्याह्नः । पूर्वाह्णः(क) ॥ ६२ ॥

(सु०) शसादौ स्वरे तद्धितयस्वरयोरीपीकारे च पदादेशः ॥ पादशब्दस्य पदादेशः स्यात् शसादौ स्वरे ॥ सहस्रपदः ॥ ईपि । द्विपदी ॥ पादो वेतीप् ॥ ईकारे व्याघ्रपदी कुले ॥ तद्धितये वैयाघ्रपद्यः । ण्ययुटौ ॥ तद्धितस्वरे वैयाघ्रपदः । अण् ॥ अन्यपदार्थाभावे समानाधिकरणाऽभावे च क्वचिद्बहुव्रीहिर्भवति । यथा । पुत्रेण सह वर्तते यः स सपुत्रः । सह इत्यस्य तृतीयान्तेन समासः । संख्येयार्थया संख्यया सहाव्ययासन्नादूराधिकसंख्याः समस्यन्ते स बहुव्रीहिर्भवति । दशानां समीपे ये सन्ति ते उपदशाः । नव एकादश वेत्यर्थः । उपशब्दो हि समीपे समीपिनि च वर्तते । समीपेऽव्ययीभावः । समीपिनि तु बहुव्रीहिर्भवतीति ॥ आसन्ना विंशतेर्ये सन्ति ते आसन्नविंशाः । डप्रत्ययः । विंशतेस्तिलोपो डितीति तिलोपः ॥ अदूरास्त्रिंशत इति अदूरत्रिंशाः ॥ अधिकाश्चत्वारिंशत इति अधिकचत्वारिंशाः ॥ द्वौ वा त्रयो वा द्वित्राः । वार्थेऽयं बहुव्रीहिः ॥ द्विरावृत्ता दश द्विदशाः । विंशतिरित्यर्थः । सुप्रत्ययार्थेऽयं बहुव्रीहिः ॥ दिङ्नामान्यन्तराले समस्यन्ते स बहुव्रीहिः । दक्षिणपूर्वा ॥ तेषु गृहीत्वा इदं युद्धं प्रवृत्तमित्यर्थे तेन प्रहृत्येदं युद्धं प्रवृत्तमित्यर्थे च सप्तम्यन्तयोस्तृतीयान्तयोश्च पदयोः समासो भवति क्रियाव्यतिहारे द्योत्ये स बहुव्रीहिः । अत्र पूर्वपदस्य दीर्घः । वक्ष्यमाणः समासान्त इप्रत्ययः । इप्रत्ययान्तस्याव्ययसंज्ञा च । केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तमिति केशाकेशि ॥ दण्डैश्च दण्डैश्च प्रहृत्येदं युद्धं प्रवृत्तमिति दण्डादण्डि ॥ मुष्टिभिर्मुष्टिभिः प्रहृत्येदं युद्धं प्रवृत्तमिति मुष्टीमुष्टि ॥ बाहुषु बाहुषु गृहीत्वा इदं युद्धं प्रवृत्तमिति वोऽव् यस्वरे ह्रस्ववादेशः । बाहूबाहवि ॥ अथ समासान्तप्रत्यया उच्यन्ते ॥ पूरणार्थप्रत्ययान्तं यत् स्त्रीलिङ्गं तदन्तात् प्रमाण्यन्ताच्च बहुव्रीहेरः ॥ कल्याणीपञ्चमा रात्रयः । अत्र संख्यापूरणे मट् । पूरणार्थप्रत्ययान्ते इति पुंवद्भावनिषेधः ॥ स्त्री प्रमाणी यस्य स स्त्रीप्रमाणः । नित्यस्त्रीत्वान्न पुंवद्भावः ॥ प्रमाति अनयेति प्रमाणी । करणे युट् । प्रधाने कार्यसंप्रत्यय इति न्यायात् प्रधाने पूरणार्थप्रत्ययान्तस्त्रीलिङ्ग एवाप्रत्ययः पुंवद्भावनिषेधश्च । रात्रिः पूरणार्थप्रत्ययवाच्या चेत्युक्तोदाहरणे मुख्या । अन्यत्र तु कल्याणपञ्चमीकः पक्षः । क एव ॥ न-

---

(क) अह्नो मध्य इति विग्रहे क्वचिदमाद्यन्तस्य परत्वमित्यहन्शब्दस्य परनिपाते नो वेत्यनेनोपधालोपे रूपसिद्धिः । रात्राह्नाहान्ताः" इति पुंस्त्वम् ।

क्षत्रार्थे नेतृशब्दान्तात् बहुव्रीहेरः । मृगो मृगशीर्षनक्षत्रं नेता नायको यासां ताः मृगनेत्रा रात्रयः ॥ अन्तर्बहिःपूर्वपदाल्लोमन्नन्ताद्बहुव्रीहेः । अन्तर्लोमः । बहिर्लोमः । नो वेति टिलोपः ॥ नासिकान्ताद्बहुव्रीहेरः । स्थूलपूर्वात्तु न । द्रुरिव नासिका यस्येति सहादेरिति नासिकाया नस् द्रुणसः । खरा नासिका यस्य स खरणसः । उभयत्र संज्ञायामः । असंज्ञायां खुरखराभ्यां नासिकाया वा अप्रत्ययः । खुरणसः—खुरणाः । खरणसः—खरणाः ॥ उपसर्गाच्च नासिकाया अः असंज्ञायाम् । उन्नता नासिका यस्य स उन्नसः । प्रगता नासिका यस्य स प्रणसः ॥ स्थूलपूर्वात्किम् । स्थूलनासिकः ॥ सुप्रातसुश्वसुदिवशारिकुक्षिचतुरश्रैणीपदाजपदप्रोष्ठपदा अप्रत्ययान्ता निपात्यन्ते बहुव्रीहौ । शोभनं प्रातरस्येति सुप्रातः । रनिवृत्तिर्निपातनात् ॥ शोभनं श्वोऽस्येति सुश्वः । सनिवृत्तिर्निपातनात् ॥ शोभनं दिवाऽस्येति सुदिवः ॥ शारेरिव कुक्षिरस्येति शारिकुक्षः ॥ चतस्रोऽश्रयोऽस्येति चतुरश्रः । तालव्यशस्य दन्त्यः सो निपातनात् । एण्या इव पादा यस्येति एणीपदः ॥ अजपदः । प्रोष्ठपदः । निपातनात्पदादेशः ॥ नञ्दुःसुपूर्वपदाद्धलिसक्थिशक्त्यन्ताद्बहुव्रीहेरो वा । अहलः—अहलिः । असक्थः—असक्थिः । अशक्तः—अशक्तिः ॥ ईदूदन्तस्त्रीलिङ्गोत्तरपदादृदन्तोत्तरपदाच्च बहुव्रीहेः कः । कल्याणी पञ्चमी रात्रिर्यस्मिन् स कल्याणपञ्चमीकः पक्षः ॥ बहवः कर्तारो यस्य स बहुकर्तृकः प्रासादः ॥ उरःप्रभृत्यन्ताद्बहुव्रीहेः कः । व्यूढं विशालमुरो यस्य स व्यूढोरस्कः ॥ प्रियं सर्पिर्यस्य स प्रियसर्पिष्कः । वाचस्पत्यादित्वात् सषौ । इहोरःप्रभृतौ पुमान् अनड्वान् पयः नौः लक्ष्मीरित्याद्येकवचनान्तादेव कः । द्विवचनबहुवचनान्तेभ्यस्तु वैकल्पिकः को भवतीति विवेकः । यथा । द्विपुमान्—द्विपुंस्कः । नञ्पूर्वादर्थात्को बहुव्रीहौ । अनर्थकः ॥ इन्नन्ताद्बहुव्रीहेः क स्त्रियाम् । बहुदण्डिका नगरी ॥ अनुक्तसमासान्ताद्बहुव्रीहेर्वा कः । महायशस्कः—महायशाः ॥ आबन्तस्य वा ह्रस्वः के । बहुमालकः—बहुमालाकः । काभावे बहुमालः ॥ ईयसुप्रत्ययान्तोत्तरपदाद्बहुव्रीहेर्न कः । बहवः श्रेयांसोऽस्य स बहुश्रेयान् । 'अन्यार्थे' इति ह्रस्वे प्राप्ते ईयसुप्रत्ययान्तस्य स्त्रीलिङ्गस्य ह्रस्वो न बहुव्रीहौ । बहव्यः श्रेयस्योऽस्य स बहुश्रेयसी ॥ बहुव्रीहौ किम् । अतिश्रेयसिः ॥ संख्येये बहुव्रीहेर्डो न तु बहुगणाभ्याम् । उपदशाः ॥ बहुगणाभ्यां तु उपबहवः । उपगणाः ॥ स्वाङ्गवाचिसक्थ्यक्ष्यन्ताद्बहुव्रीहेष्टः । टित्वादीप् । दीर्घे सक्थिनी यस्य स दीर्घसक्थः । जलजाक्षी । स्वाङ्गवाचीति किम् । दीर्घसक्थि शकटम् । स्थूलानी अक्षीणि पर्वाणि यस्याः सा स्थूलाक्षा वेणुयष्टिः । वक्ष्यमाणो डप्रत्ययः ॥ अङ्गुल्यन्ताद्बहुव्रीहेष्टो दारुण्यर्थे । पञ्चाङ्गुलयो यस्य तत्पञ्चाङ्गुलं दारु । अङ्गुलिसदृशावयवं धान्यादिविक्षेपकाष्ठम् ॥ बहुव्रीहेरिति किम् । द्वे अङ्गुली प्रमाणमस्या इति द्व्यङ्गुला यष्टिः ॥ तद्धितार्थे द्विगुः । 'प्रमाणे द्वयसट्दघ्नट्मात्रटः' इति मात्रट् तस्य लुक् च । ततः समासान्तोऽप्रत्ययः ॥ दारुणि किम् । पञ्चाङ्गुलिर्हस्तः ॥ द्वित्रिपूर्वात् मूर्द्धान्ताद्बहुव्रीहेष्टः । द्विमूर्द्धः । त्रिमूर्द्धः । नो वेति टिलोपः ॥ सुहरिततृणसोमेभ्यः परात् जम्भादन् बहुव्रीहौ । 'जम्भो भक्ष्ये च दन्ते च' इति ॥ शोभनो जम्भो यस्य स सुजम्भा । हरितजम्भा ॥ तृणं जम्भो भक्ष्यं यस्य तृणमिव जम्भा दन्ता यस्येति वा तृणजम्भा । सोमजम्भा ॥ व्याधयोगे दक्षिणेर्मेत्यन्नन्तं निपात्यते बहुव्रीहौ । दक्षिणे ईर्मं व्रणं यस्य स

दक्षिणेर्मा मृगः । व्याधेन कृतव्रण इत्यर्थः ॥ क्रियाव्यतिहारे बहुव्रीहेरिः । केशाकेशि । मुसलामुसलि । प्रहरणेऽर्थे द्विदण्डि । द्विमुसलि । उभाहस्ति । उभयाहस्ति । इतिइप्रत्ययान्ता निपात्यन्ते बहुव्रीहौ । द्वौ दण्डो यस्मिन् प्रहरणे तद् द्विदण्डि । द्विमुसलि । उभाहस्ति । उभयाहस्ति । निपातनाद्वा उभयेति ॥ इति बहुव्रीहिः ॥ अथ द्विगुतत्पुरुषकर्मधारयसमासान्ताः ॥ गोन्ताद् द्विगुतत्पुरुषकर्मधारयाट्टो न तु तद्धितलुकि ॥ पञ्चगवम् ॥ तद्धितलुकि नेति किम् । पञ्चभिर्गोभिः क्रीत इति पञ्चगुः । क्रीतार्थे इकस्तस्य लुक् च । देवगवी ॥ परमगवी ॥ संख्याव्ययादेरङ्गुल्यन्ताद् द्विगुतत्पुरुषकर्मधारयादः । द्वे अङ्गुली प्रमाणमस्येति द्व्यङ्गुलं दारु । प्रमाणे द्वयसडिति मात्रट् तस्य लुक् च ॥ निर्गतमङ्गुलिभ्य इति निरङ्गुलम् ॥ एकाङ्गुला । सर्वैकदेशसंख्यातपुण्यसंख्याव्ययेभ्यो रात्रेरः द्विगुतत्पुरुषकर्मधारये । सर्वा चासौ रात्रिश्चेति । रात्राह्नाहान्ता इति पुंस्त्वम् । सर्वरात्रः । रात्रेः पूर्वमिति पूर्वरात्रः । संख्यातरात्रः । पुण्यरात्रः । द्वयोः रात्र्योः समाहार इति । संख्यापूर्वं रात्रमिति क्लीबता । द्विरात्रम् । अतिक्रान्तो रात्रिमित्यतिरात्रः ॥ राजाहः सखिभ्यष्टो द्विगुतत्पुरुषकर्मधारये । कविराजः । उत्तमाहः । रात्राह्नाहान्ता इति पुंस्त्वम् ॥ पुण्याहम् । पुण्यसुदिनाभ्यामिति क्लीबता ॥ कृष्णसखः ॥ पञ्चाहम् ॥ मुख्यवाचिन उरसष्टः तत्पुरुषे । अश्वानामुर इवेत्यश्वोरसम् । मुख्योऽश्व इत्यर्थः ॥ अनोऽश्मायःसरोभ्यष्टो जातिसंज्ञार्थे तत्पुरुषकर्मधारये । उपानसम् । अमृताश्मः ॥ कालायसः । मण्डूकसरसमिति जातिः ॥ महानसम् ॥ पिण्डाश्मः ॥ लोहितायसम् ॥ जलसरसमिति संज्ञा ॥ ग्रामकौटाभ्यां तक्ष्णस्तत्पुरुषकर्मधारये । ग्रामस्य तक्षा ग्रामतक्षः । साधारण इत्यर्थः । कुट्यां भवः कौटः स्वतन्त्रः । कौटश्चासौ तक्षा च कौटतक्षः ॥ अतेः शुनष्टस्तत्पुरुषे । श्वानमतिक्रान्तो जवेनेत्यतिश्वो वराहः । अतिश्वो सेनेत्यर्थः ॥ अप्राणिविषयकोपमानवाचिनः शुनष्टस्तत्पुरुषे । आकृष्यतेऽनेन खलादिगतं धान्यमित्याकर्षः । काष्ठविशेषः । आकर्षः श्वेवेति आकर्षश्वः ॥ अप्राणिविषयकेति किम् । वानरः श्वेवेति वानरश्वा ॥ उत्तरमृगपूर्वोपमानात् सक्थ्नष्टस्तत्पुरुषे । उत्तरसक्थम् । मृगसक्थम् । पूर्वसक्थम् । फलकसक्थम् ॥ नौशब्दान्तात् द्विगोष्टो न तु तद्धितलुकि । द्विनावम् । त्रिनावम् ॥ न तु तद्धितलुकीति किम् । पञ्चभिर्नौभिः क्रीत इति पञ्चनौः । अत्र क्रीतार्थे इकस्तस्य लुक् च ॥ अर्द्धपूर्वान्नावष्टस्तत्पुरुषे । नावोऽर्द्धमित्यर्द्धनावम् । क्लीबत्वं लोकात् ॥ खारीशब्दान्ताद् द्विगोरर्द्धपूर्वात् । खार्यन्तात् तत्पुरुषाच्च वा टः । द्विखारम् । टाभावे । द्विखारि । क्लीबत्वं लोकात् । अर्द्धखारम् ॥ द्वन्द्वतत्पुरुषयोरिति परपदलिङ्गे अर्द्धखारी ॥ द्विगौ द्वित्रिभ्यामञ्जलेष्टो वा न तु तद्धितलुकि । द्व्यञ्जलम् । द्व्यञ्जलिः ॥ न तु तद्धितलुकीति किम् । द्वाभ्यामञ्जलिभ्यां क्रीत इति द्व्यञ्जलिः । क्रीतार्थे इकस्तस्य लुक् च ॥ ब्रह्मशब्दान्तात्तत्पुरुषाट्टो जानपदेऽर्थे । सुराष्ट्रे ब्रह्मा सुराष्ट्रब्रह्मः ॥ कुमहद्भ्यां ब्रह्मणष्टो वा तत्पुरुषकर्मधारये । कुत्सितो ब्रह्मा कुब्रह्मः—कुब्रह्मा । महाब्रह्मः—महाब्रह्मा । ब्राह्मणपर्यायो ब्रह्मन्शब्दः ॥ संख्यान्तात्तत्पुरुषाड्डः । निर्गतानि त्रिंशत इति निस्त्रिंशानि वर्षाणि चैत्रस्य । निर्गतस्त्रिंशतोऽङ्गुलिभ्य इति निस्त्रिंशः खड्गः ॥ इति द्विगुतत्पुरुषकर्मधारयसमासान्ताः ॥ अथ सकलसमाससाधारणसमासान्ताः ॥ ऋक्पूरब्धूःपथामोऽक्षे या धूस्तत्र तु न ॥ ऋचोऽर्द्धमिति अर्द्धर्चः ।

अर्द्धर्चोदयो इति पुंस्त्वम् ॥ अनृचबहुवृचशब्दावध्येतर्येव । नेह । अनृक् साम बह्वृक् सूक्तम् । वैकल्पिकः कप्रत्ययस्तु भवत्येव । अनृक्कम् बह्वृक्कमिति ॥ विष्णोः पूरिति विष्णुपुरम् । क्लीबत्वं लोकात् । विमलापं सरः ॥ द्व्यन्तरुपसर्गेभ्यः कृतसमासान्तस्याऽपस्यादेरिः । द्विर्गता आपो यस्मिन्निति द्वीपम् । अन्तर्गता आपोऽस्मिन्निति अन्तरीपम् । प्रतिकूला आपोऽस्मिन्निति प्रतीपम् । सङ्गता आपोऽस्मिन्निति समीपम् । कथं तर्हि समापो देवयजनमिति । समा आपो यस्मिन्निति समापः । देवा इज्यन्तेऽस्मिन्निति देवयजनम् । यज्ञभूमिरिति ज्ञेयम् । कृत समासान्तग्रहणान्नेह । स्वप् सरः । पूजनार्थेति निषेधात्समासान्ताभावः । अवर्णान्तादुपसर्गात्कृतसमासान्तस्यापस्यादेरीर्वा । प्रेपम्—परेपम्—प्रापम्—परापम् ॥ अनोः कृतसमासान्तस्यापस्यादेरूः । अनुगता आपोऽस्मिन्निति अनूपो देशः । "जलप्रायमनूपं स्यात्" इत्यमरः ॥ राजधुरा ॥ अक्षे इति किम् । अक्षधूः । दृढधूरक्षः । सखिपथो रम्यपथो देशः । प्रत्यन्ववपूर्वाभ्यां सामलोमभ्यामः । प्रतिसामम् । अनुसामम् । अवसामम् । प्रतिलोमम् । अवलोमम् । बहुव्रीह्यव्ययीभावप्रादिसमासा अत्र ॥ कृष्णोदकपाण्डुसंख्यापूर्वाया भूमेरः । कृष्णभूमः । उदग्भूमः । पाण्डुभूमः । द्विभूमः । त्रिभूमः प्रासादः । बहुव्रीहावेव ॥ संख्याया नदीगोदावरीभ्यामः । पञ्चनदम् । सप्तगोदावरम् । अव्ययीभावे एतौ ॥ नाभेरः । पद्मं नाभावस्येति पद्माकारा नाभिरस्येति वा पद्मनाभः ॥ अचक्षुःपर्यायादक्ष्णोऽप्रत्ययः । गवां किरणानामक्षि रन्ध्रमिवेति गवाक्षः ॥ ब्रह्महस्तिपल्यराजभ्यो वर्चसोऽप्रत्ययः । ब्रह्मवर्चसम् । हस्तिवर्चसम् । पलं मांसमश्नातीति पल्यो मांसभोजी पल्यवर्चसम् । राजवर्चसम् । षष्ठीतत्पुरुषोऽत्र ॥ अवसमन्धेभ्यस्तमसोऽप्रत्ययः । अवहीनं तम इति अवतमसम् । समन्तात् तम इति सन्तमसम् । अन्धयतीति अन्धम् । 'अन्ध दृष्ट्युपघाते' चुरादिरस्मात्पचाद्यप्रत्ययः । अन्धं गाढं तम इत्यन्धतमसम् ॥ श्वस्शब्दाद्वसीयः श्रेयोभ्यामः । वसुशब्दः प्रशस्तवाची तस्मादीयसुप्रत्यये वसीय इति । श्वस्शब्दस्तु कालवाच्यप्यत्राशीर्विषयताद्योतकोऽस्ति । श्वोवसीयसम् । श्वःश्रेयसम् । कर्मधारयोऽत्र ॥ अन्ववतप्तेभ्यो रहःशब्दादः । रह इत्यनेनाऽप्रकाशमुच्यते । अनुगतं रह इत्यनुरहसम् । अवहीनं रह इत्यवरहसम् । अनुगतं रहोऽस्मिन्नित्यादि बहुव्रीहिर्वा । तप्तं च तद् रहश्चेति तप्तरहसम् । परेणानधिगम्यमित्यर्थः ॥ प्रतेरुरसश्शब्दादः । उरसि इति प्रत्युरसम् । सप्तम्यर्थे अव्ययीभावोऽयम् ॥ अप्रत्ययान्तमनुगवं दीर्घत्वे निपात्यते । अनुगवं यानम् । गोदैर्घ्यसदृशदैर्घ्योपलक्षितमित्यर्थः ॥ उपसर्गादध्वशब्दादः । प्रगतोऽध्वानमिति प्राध्वो रथः ॥ अचतुरविचतुरसुचतुरस्त्रिचतुरउपचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाऽक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाऽहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः । अप्रत्ययान्ता निपात्यन्ते । अविद्यमानानि चत्वार्यस्येति अचतुरः । विचतुरः । सुचतुरः । त्रयश्चत्वारो वेति त्रिचतुराः । चतुर्णां समीपे ये सन्ति ते उपचतुराः । एते पञ्च बहुव्रीहयः । तेन तत्पुरुषे अचत्वारो विचत्वार इत्येवं भवतीति भावो ॥ स्त्रीपुंसौ ॥ धेन्वनडुहौ ॥ ऋक्सामे । वाङ्मनसे । अक्षिणी च भ्रुवौ च अक्षिभ्रुवम् । प्राण्यङ्गत्वादेकवद्भावः । दाराश्च गावश्च

दारगवम् । ऊरू च अष्ठीवन्तौ च ऊर्वष्ठीवम् । निपातनाट्टिलोपः । "जानुरुपर्वाष्ठीवदस्त्रि-याम्" इति "सक्थि क्लीबे पुमानूरुः" इति चामरः ॥ पदष्ठीवम् । निपातनात् पादस्य पद । प्राण्यङ्गत्वादेकवद्भावश्च । नक्तं च दिवा च नक्तंदिवम् । रात्रौ च दिवा च रात्रिंदिवम् । रात्रेर्मान्तत्वं निपातनात् । अहनि च दिवा चेति अहर्दिवम् । वीप्सायां द्वन्द्वो निपात्यते । अहन्यहनीत्यर्थः । एते एकादश द्वन्द्वाः ॥ रजः अपि अपरिस्यज्येति सरजसम् । साकल्येऽव्ययीभावोऽयम् । बहुव्रीहौ तु रजसा सह वर्तते इति सरजसं पङ्कजमिति । निश्चितं श्रेय इति निःश्रेयसम् । तत्पुरुष एवायम् । बहुव्रीहौ तु न । निश्चितं श्रेयो येनेति निःश्रेयान् पुरुषः । पुरुषस्यायुः पुरुषायुषम् । तत्पुरुषोऽयम् । द्व्यायुषम् । त्र्यायुषम् । एतौ द्विगू । ऋग्यजुषम् । द्वन्द्वोऽयम् । जातोक्षः । महोक्षः । वृद्धोक्षः । एते त्रयः कर्मधारयाः । शुनः समीपम् उपशुनम् । टिलोपाभावः सम्प्रसारणं च निपात्यतेऽव्ययीभावे । गोष्ठे श्वेति गोष्ठश्वः । सप्तमीतत्पुरुष एवायम् । षष्ठीतत्पुरुषे तु न । गोष्ठश्वा । पूजनार्थस्वतिपूर्वकान्नाम्नः समासान्ता न । बहुव्रीहौ तु भवन्ति । सुराजा । अतिराजा । पूजनार्थेति किम् । गामतिक्रान्तोऽतिगवः । बहुव्रीहौ किम् । सुष्ठु सक्थिनी यस्य सः सुसक्थः । सुष्ठु अक्षिणी यस्य स स्वक्षः । टप्रत्ययोऽत्र । निन्दार्थककिम्पूर्वान्नाम्नः समासान्ता न । कुत्सितो राजा किंराजा । किंसखा । किङ्गौः ॥ निन्दार्थेति किम् । किंराजः । किंसखः । किंगवः । नञ्तत्पुरुषात्समासान्ता न । अराजा । असखा ॥ तत्पुरुषात् किम् । न विद्यते धूर्यस्य तत् अधुरं शकटम् । नञ्पूर्वपथिशब्दाद्वा सामासान्तस्तत्पुरुषे । अपथम्-अपन्थाः । अपथः । तत्पुरुषे क्लीबमिति क्लीबत्वम् ॥ तत्पुरुषे किम् । अपथो देशः । बहुव्रीहिरत्र । अपथम् । अर्थाभावेऽव्ययीभावोऽयम् ॥ इति सकलसमाससाधारणाः प्रत्ययाः ॥ अथ प्रकृतमनुसरामः ॥ अह्नो मध्यमिति मध्याह्नः । अह्नः पूर्व इति पूर्वाह्णः । कवीनां राजेति कविराजः । कृष्णस्य सखेति कृष्णसखः । राजाहःसखिभ्यष्ट इति टप्रत्ययः ॥ ६२ ॥

(त) मध्याह्न इति ॥ अह्नो मध्य इति विग्रहे क्वचिदमाद्यन्तस्य परत्वमित्यहन्-शब्दस्य परनिपाते नो वेत्यनेनोपधालोपे रूपसिद्धिः । रात्राह्नाहान्ता पुंसीति नियमात्पुंस्त्वम् ॥ ६२ ॥

नो वा ॥ नान्तस्य टेर्लोपः स्वरे यकारे च परे । वाग्रहणात्क्वचिन्न । क्वचिदुपधालोपः ॥ कविराजः । कृष्णसखः । देवगवी । परमगवी । राजपुरम् । एकधुरम् । सर्वधुरम् । वाङ्मनसे । दक्षिणापथः । अहोरात्रः । द्वित्राः । पञ्चषाः । बहुकर्तृकः । बहुलक्ष्मीकः । स्त्रीपुंसौ । ऋक्सामे । महोक्षः । वृद्धोक्षः । द्व्यायुषम् । त्र्यायुषम् । ग्रामतक्षः । फलकसक्थम् । मृगसक्थम् । पूर्वसक्थम् । अर्द्धखारम् । अर्द्धनावम् ॥ ६३ ॥

(सु०) नो वा ॥ नान्तस्य नाम्नष्टेर्लोपस्तद्धिते ये स्वरे च ॥ अत्र समासान्तास्तद्धितान्तर्भूता ज्ञेयाः । अत्र वेति व्यवस्थार्थम् । तेन क्वचिट्टिलोपः । क्वचिदुपधालोपः । क्वचिन्नोभयम् । टिलोपो यथा । उडुलोम्नोऽपत्यमिति औडुलोमिः ॥ राज्ञः कर्मेति रा-

ज्यम् ॥ कविराजः ॥ उपधालोपो यथा। वृत्रघ्नोऽपत्यं वार्त्रघ्नः । तक्ष्णोऽपत्यं ताक्ष्णः । अह्नः पूर्वः पूर्वाह्णः ॥ नोभयं यथा । ब्रह्मणोऽपत्यं ब्राह्मण इत्यादि ॥ देवानां गौर्देवगवी । परमा चासौ गौश्च परमगवी । गोन्ताद् द्विगुतत्पुरुषकर्मधारयात् इति टः ॥ राजपुरम् । एकधुरम् । सर्वधुरः । कर्मधारये पुंवत् । ऋक्पूरब्धूःपथाम इत्यप्रत्ययः ॥ वाक् च मनश्च वाङ्मनसम् । अचतुरविचतुरेत्यनेनाप्रत्ययो द्वन्द्वे ॥ दक्षिणापथः । ऋक्पूरब्धूःपथाम इत्यप्रत्ययः ॥ अहश्च रात्रिश्च अहोरात्रः । 'अहः पूर्वाद्रात्रिशब्दादः समाहारे' इत्यप्रत्ययः ॥ रात्राह्नाहान्ता इति पुंस्त्वम् ॥ द्वौ वा त्रयो वा द्वित्राः । पञ्च वा षट् वा पञ्चषाः । संख्येये बहुव्रीहेर्डः इति डः ॥ बहुकर्तृकः । बहुलक्ष्मीकः । ईदूदन्तस्त्रीलिङ्गोत्तरपदादृदन्तोत्तरपदाच्च बहुव्रीहेः क इति कप्रत्ययः ॥ स्त्रीपुंसौ ॥ ऋक्साम । अचतुरविचतुरेत्यनेन द्वन्द्वेऽप्रत्ययः ॥ महोक्षः । जातोक्षः । वृद्धोक्षः । अचतुरविचतुरेत्यनेन कर्मधारयेऽप्रत्ययः ॥ पुरुषायुषम् । अचतुरविचतुरेत्यनेन तत्पुरुषेऽप्रत्ययः । द्व्यायुषम् । त्र्यायुषम् । अचतुरेत्यनेन द्विगावप्रत्ययः ॥ ग्रामतक्षः । ग्रामकौटाभ्यां तक्ष्णष्ट इति तत्पुरुषे टः ॥ फलकसक्थः । मृगसक्थः । पूर्वसक्थः । 'उत्तरमृगपूर्वोपमानात् सक्थ्नष्टस्तत्पुरुषे' इति टप्रत्ययः । फलकमिव सक्थि अस्येति बहुव्रीहौ तु स्वाङ्गवाचिसक्थ्यक्ष्यन्ताद्बहुव्रीहेष्ट इति टप्रत्ययो बोध्यः ॥ अर्द्धखारम् । खारीशब्दान्ताद् द्विगोरर्धपूर्वात्खार्यन्तात्तत्पुरुषाद्वा ट इति टः ॥ अर्द्धनावम् । 'अर्द्धपूर्वान्नावष्टस्तत्पुरुषे' इति टः ॥ ६३ ॥

इति बहुव्रीहिः ॥

(त०) नो वेति ॥ वोऽव्ययस्यर इत्यतः यस्वरयोरनुवृत्तिः । डिति टेरित्यतष्टेरित्यस्य । नामाधिकारान्नान्तस्यैवेत्याशयेनाह—**नान्तस्येति** ॥ नाम्न इति शेषः । वेत्यस्य व्यवस्थितत्वादाह ॥ **वाग्रहणादिति** ॥ **पूर्वसक्थमिति** ॥ सक्थ्नः पूर्वमिति । विग्रहः ॥ **अर्द्धखारमिति** ॥ खार्या अर्द्धमिति विग्रहः । एवमर्द्धनावमित्यपि ॥ ६३ ॥

इति बहुव्रीहिः ॥

कर्मधारयस्तुल्यार्थे ॥ पदद्वये तुल्यार्थे एकार्थनिष्ठे सति कर्मधारयः समासो भवति(क) ॥ ६४ ॥

(सु०) **कर्मधारयस्तुल्यार्थे** ॥ समस्यमानयोर्द्वयोः पदयोर्विशेषणविशेष्यधर्मयोर्यत्र परस्परं तुल्यार्थता तत्रैव समासो भवति नान्यत्र । भ्रमरादिसाधारणरूपेण प्रतिपन्नो नीलार्थः उत्पलार्थेन नीलोत्पले स्थाप्यते । रक्तादिसाधारणरूपेण प्रतिपन्न उत्पलार्थोऽपि नीलार्थेन नीले स्थाप्यते इति भवति द्वयोस्तुल्यार्थता । पदयोर्द्वयं पदद्वयं तस्मिन्ने-

---

(क) उत्तरपदप्रधानः कर्मधारयः । द्विगुकर्मधारयौ तत्पुरुषभेदाविति केचित् । तेषां मते चतुर्विधः कर्मधारयः । द्विगुभिन्नत्वे सति समानविभक्तिमत्पदप्रकृतिकत्वे सत्यभेदबोधकत्वं कर्मधारयत्वमिति मञ्जरी ।

कर्मधारय इति । तुल्यत्वं नाम समानार्थत्वं तच्च बहुशः पदद्वये दृष्टमित्यत आह—**पदद्वये इति** । तेन नीलाचलघट इत्यादौ बहुपदेऽप्यदोषः ।

एकार्थनिष्ठे सतीति । भिन्नप्रवृत्तिनिमित्तत्वेऽप्यर्थसमासमहिम्ना एकस्मिन्नर्थे निष्ठा वृत्तिर्यस्येत्यर्थः । अतश्च कुम्भकलशादावनतिप्रसङ्गः । नीलपदे नीलघटादिभ्यो व्यावृत्त्य एकस्मिन्नसितसरोजे वर्त्तत इति एकार्थनिष्ठत्वम् ।

कार्ये निष्ठा वृत्तिर्यस्य भिन्नप्रवृत्तिनिमित्तकस्य पदद्वयस्य तदेकार्थं निष्ठं तस्मिन् सति य एकार्थीभावः स कर्मधारयसंज्ञकः समासो भवति ॥ भिन्नार्थानामेकरूपेणैकत्रान्वयविवक्षायां द्वन्द्वः ॥ भिन्नार्थयोर्विशेष्यविशेषणभावेनैकत्रान्वयविवक्षायां कर्मधारय इत्यर्थः ॥ विशेष्यतेऽनेनेति विशेषणम् । 'शिषॢ विशेषणे' करणे युट् । भेदकं व्यावर्तकमिति । यत्साधारणाकारेण प्रतिपन्नं बहुप्रकारं वस्तु प्रकारान्तरेभ्यो व्यवच्छिद्य एकस्मिन् प्रकारे व्यवस्थापयति तद्विशेषणम् । व्यवस्थाप्यमानं तु विशेष्यं भेद्यं प्रधानमिति । अत्र लौकिकविग्रहे भेदद्योतकश्चशब्दो धर्मभेदद्योतनाय प्रयुज्यते । धर्मभेदबोधनाय सर्वादिश्च । द्रव्यगुणक्रियासन्निधाने द्रव्यवाचकस्यैव प्राधान्यमित्यतो द्रव्यस्य प्राधान्यात् गुणक्रिययोश्चाप्राधान्याद् गुणद्रव्ययोः क्रियाद्रव्ययोश्च समासे गुणक्रिययोरेव पूर्वनिपातो बोध्यः । यत्र तु गुणशब्दयोः क्रियाशब्दयोर्गुणक्रियाशब्दयोर्वा समासस्तत्रानियम एव । खञ्जकुब्जः । कुब्जखञ्जः । याचकपाठकः । पाठकयाचकः । खञ्जपाचकः । पाचकखञ्जः । द्रव्यशब्दयोः समासे तु इत्थं नियमः । शिंशपावृक्षः । इह वृक्षत्वस्य व्यापकत्वात्प्राधान्यं शिंशपात्वस्य तु विपर्ययादप्राधान्यम् इत्येवं सर्वत्र विशेषणस्य पूर्वनिपातो बोध्यः । इसादिरिति निर्देशाद्विशेष्यस्यापि पूर्वनिपातश्च ॥ ६४ ॥

(त०) कर्मधारयस्तुल्यार्थ इति ॥ पदद्वय इति । एकार्थनिष्ठे इति ॥ भिन्नप्रवृत्तिनिमित्ते सति एकस्मिन्नर्थे निष्ठा वृत्तिर्यस्येत्यर्थः ॥ भिन्नार्थानामेकरूपेणैकत्रान्वयविवक्षायां द्वन्द्वः ॥ विशेषणविशेष्यभावे तु कर्मधारय इति विवेकः ॥ पूर्वनिपाते त्वनियमः ॥ इसादिरिति लिङ्गात् । तथाहि । आदिश्चासौ इसश्चेति आदिइस इति स्यात । लक्ष्यानुसाराच्च व्यवस्था । विशेष्यतेऽनेनेति विशेषणम् । 'शिषॢ विशेषणे' इत्यतः करणे युट् । यत्साधारण्येन प्रतिपन्नं बहुप्रकारं वस्तु प्रकारान्तरेभ्यो व्यवच्छिद्य एकस्मिन् प्रकारे व्यवस्थापयति तद्विशेषणम् ॥ ६४ ॥

(**कर्मधारये पूर्वं पुंवत्**) नीलमुत्पलं नीलोत्पलम्(क) । रक्तलता । पुंस्कोकिलः । ब्राह्मणभार्या । दत्तभार्या । सुकेशभार्या । स्नातानुलिप्तः । एकनाथः । सर्वयाज्ञिकाः । जरन्नैयायिकाः । पुराणमीमांसकाः । नवपाठकाः । केवलवैयाकरणाः ॥ ६५ ॥

(सु०) कर्मधारये पूर्वं पुंवत् ॥ स्त्रीलिङ्गमुक्तपुंस्कं पूर्वपदं पुंवद्भवति कर्मधारये ॥ पूरणार्थप्रत्ययान्ते प्रियादौ च नेत्यप्राप्तः पुंवद्भावो विधीयते ॥ महती चासौ नवमी चेति । पद्मादेरिति मट् । पुंवद्भावे कृते महादेरित्यात्वम् । महानवमी ॥ महाप्रिया ॥ तथाऽकृतद्धितास्यां कोपधस्य नेति १ संज्ञापूरणार्थप्रत्यययोर्नेति २ वृद्धिहेतोस्तद्धितस्यारक्तविकारार्थस्य नेति३ स्वाङ्गादीपोऽमानिनि नेति ४ जातिवाचिनः स्त्रीप्रत्ययान्तस्य नेति ५ पञ्चसूत्र्या प्रतिषिद्धः पुंवद्भावोऽप्यत्र विधीयते । क्रमेणोदाहरणानि । यथा पाचकस्त्री । दत्तभार्या॥ पञ्चमभार्या ॥ स्रुघ्ने भवा स्रौघ्नी । भवार्थेऽण् । स्रौघ्नी चासौ भार्या च स्रौघ्नभार्या ॥ सुकेशभार्या ॥ ब्राह्मणभार्या ॥ रक्ता चासौ लता च रक्तलता ॥ पुमांश्चासौ को

(क) नीलोत्पलमिति । नीलपदेन नीलगुणविशिष्टं वस्तु, उत्पलपदेन उत्पलसामान्यम् । अनयोरभेदः संसर्गः । तेन नीलाभिन्नमुत्पलमिति शाब्दबोधः । एवमन्यत्रापि बोध्यम् ।

किलश्च पुंस्कोकिलिः ॥ ब्राह्मणी चासौ भार्या च ब्राह्मणभार्या ॥ दत्ता चासौ भार्या च दत्तभार्या ॥ सुकेशी चासौ भार्या च सुकेशभार्या ॥ पूर्वं स्नातः पश्चादनुलिप्तः स्नातानुलिप्तः ॥ एकाश्चासौ नाथश्चैकनाथः ॥ दिक्संख्ये इति नियमबाधनार्थमुदाहरणम् । यज्ञमधीयते विदन्ति वा ते याज्ञिकाः । इकप्रत्ययः सर्वे च ते याज्ञिकाश्च सर्वयाज्ञिकाः ॥ जरन्तश्च ते नैयायिकाश्चेति । जीर्यतेरतृ' इति भूतेऽर्थेऽतृ । न्यायमधीयते विदन्ति वा ते नैयायिकाः । जरन्नैयायिकाः । जीर्णनैयायिका इत्यर्थः । युट् वृद्धिश्च ॥ मीमांसामधीयते विदन्ति वा ते मीमांसका 'केनेयेका' इति कप्रत्यये ह्रस्वत्वम् । पुराणाश्च ते मीमांसकाश्च पुराणमीमांसकाः ॥ पठन्ति ते पाठकाः । तृवुणाविति वुण् ॥ नवशब्दः संख्यावाच्यत्र न गृह्यते । 'दिक्संख्ये' इति नियमात् । नवाश्चते पाठकाश्च नवपाठकाः ॥ व्याकरणमधीयते विदन्ति वा वैयाकरणाः ॥ अण् युट् वृद्धिश्च । केवलाश्च ते वैयाकरणाश्च केवलवैयाकरणाः ॥ ६५ ॥ इति कर्मधारयः ॥

(त०) नीलमुत्पलमिति । अत्र हि नीलार्थो भ्रमरादिसाधारणरूपेण प्रतिपन्न उत्पलार्थेनोत्पले व्यवस्थाप्यते उत्पलार्थोऽपि रक्तादिसाधारणरूपेण प्रतिपन्नो नीलार्थेन नीले व्यवस्थाप्यते इति । यत्तु वासुदेवेनोक्तम् । तुल्यार्थत्वं नाम समानार्थत्वं तच्च प्रायशः पदयोर्दृष्टमिति 'परद्वये' इत्युक्तम् । तेन नीलोज्ज्वलघट इत्यादौ बहुपदोऽप्यदोष इति । तन्न । बहुपदानां कर्मधारयत्वासंभवात् । अनेकपदत्वं द्वन्द्वबहुव्रीह्योरेवेति दीक्षितेनोक्तनियमोऽप्यत्रानुकूलः । कर्मधारयसंज्ञाविधानानुमितफलं तु पूर्वपदस्योक्तपुंस्कस्य पुंवद्भाव इत्याशयेनाह—रक्तलतेति ॥ रक्ता चासौ लतेति विग्रहः । अत्र रक्तशब्दस्य गुणवचनत्वेन विशेषणत्वात्पूर्वनिपातः । तथा च गुणद्रव्ययोर्गुणस्य क्रियाद्रव्ययोश्च क्रियायाः गुणशब्दक्रियाशब्दयोस्त्वनियमः पूर्वनिपाते इति बोध्यम् । अत्र लौकिकविग्रहे भेदद्योतकश्चशब्दो धर्मभेदद्योतनाय प्रयुज्यते । सर्वादिश्च धर्मभेदबोधनाय प्रयुज्यते । अत्रार्थे च स्थूला चासौ पृषती चेति शेषोक्तिरनुकूला । तदभावे च एकोऽसहायोऽच् एकाजिति तदुक्तिरेवेति द्वयमपि सम्यगेवेति ॥ ६५ ॥

इति कर्मधारयः ॥

नाम्नश्च कृता समासः ॥ प्रादेरुपसर्गस्य नाम्नश्च कृदन्तेन सह तत्पुरुषः समासो भवति (क) ॥ व्याघ्रः । कच्छपः । कुम्भकारः ॥ ६६ ॥

(सु०) नाम्नश्च कृता समासः ॥ पुनस्तत्पुरुषमाह । स्याद्यन्तस्य नाम्नः कृता कृत्प्रत्ययान्तेन सह योऽन्वयः स च पुनः प्रादेः कृता योऽन्वयः स च तत्पुरुषसंज्ञः स्यात् ॥ व्याजिघ्रतीति व्याघ्रः । उपसर्गे आदन्तादिति कः । चशब्देन प्रादेः समासः ॥ कच्छेन पिबतीति कच्छपः । नाम्नि चेति डः । कच्छेनेति नाम्नः कृदन्तेन समासः ॥ कुम्भं करोतीति कुम्भकारः । कार्येऽण् इत्यणप्रत्ययः । इह कुम्भ ङस् कार स् इत्यलौकिकं प्रक्रिया-

(क) नाम्नश्चेति । यद्यपि उपसर्गाणामपि नामत्वमस्त्येव तथापि नामाख्यातनिपातोपसर्ग इत्यादौ भिन्नत्वेन निर्देशात् पृथगुक्तिः । समाससामान्यस्य समास इति पूर्वोक्तयोगेनैव सिद्धे समास इति विशेषपरम् । स चोत्तरपदार्थप्रधानस्तत्पुरुष इत्यभिप्रेत्योक्तम्—तत्पुरुष इति । अथ वा प्रमादौ तत्पुरुष इत्यत मण्डूकप्लुतिन्यायेन तत्पुरुष इत्यनुवर्तते ।

व्यस्यम् । अमिति तु नोक्तम् । कृद्योगे षष्ठीविधानात् । उपपदस्य कृता समासः ॥ ६६ ॥

(त०) नाम्नश्चेति ॥ प्रादिरुपसर्ग इत्यतो विभक्तिविपरिणामेन प्रादिरित्यनुवर्तते । प्रादेरपि नामत्वेन ग्रहणेऽपि नामाख्यातनिपातोपसर्गस्यत्र भिन्नत्वेन निर्देशात् पृथगुक्तिः ॥ ६६ ॥

शाकपार्थिवादीनां मध्यमपदलोपः (क) ॥ शाकप्रियः पार्थिवः शाकपार्थिवः । देवपूजको ब्राह्मणो देवब्राह्मणः ॥ ६७ ॥

(सु०) शाकपार्थिवादीनां मध्यमपदलोपः ॥ पृथिव्या ईश्वरः पार्थिवः । ईश्वरेऽर्थेऽण् । शाकः प्रियो यस्य स शाकप्रिय इत्यस्य पार्थिवशब्देन समासे कृते प्रिय इति मध्यमपदस्य लोपः । शाकपार्थिवः । बहुव्रीहिगर्भः कर्मधारयः ॥ देवानां पूजक इति षष्ठीतत्पुरुषः । तस्य ब्राह्मणशब्देन कर्मधारये पूजक इति मध्यमपदस्य लोपः । देवब्राह्मणः ॥ ६७ ॥

(त०) शाकपार्थिवादीनामिति ॥ मध्यमपदलोप इति पाठस्तु पूर्वपदस्य द्विपदत्वापेक्षयैव । अन्यथा कर्मधारयस्य त्रिपदत्वासंभवादसंगतं संपद्येत । शाकपार्थिव इति बहुव्रीहिगर्भः कर्मधारयः । देवब्राह्मण इति षष्ठीतत्पुरुषगर्भः । उत्तरपदलोप इति पाठे पूर्वपदान्तर्गतमुत्तरपदं ग्राह्यं न तु कर्मधारयस्य पार्थिवादेर्लोपप्रसङ्गात् ॥ ६७ ॥

सहादेः सादिः ॥ समासे सति सहादेः सादिरादेशः । सह पुत्रेण सपुत्रः । सहाञ्चतीति सध्र्यङ् । समञ्चतीति सम्यङ् । तिरोऽञ्चतीति तिर्यङ् । विष्वद्र्यङ् । देवद्र्यङ् । लक्ष्मीर्जाया यस्य स लक्ष्मीजानिः । कुत्सितमन्नं कदन्नम् । ईषदुष्णं कोष्णम् । कवोष्णम् । कदुष्णम् । द्यौश्च भूमिश्च द्यावाभूमी । जाया च पतिश्च जम्पती । दम्पती । मातरपितरौ । कुपुरुषः । कापुरुषः ॥ ६८ ॥

(सु०) सहादेः सादिः ॥ अनन्ताः सहादयः । सहादयश्च प्रयोगानुसारेण बोध्याः (ख) बहुव्रीहेरवयवस्य सहस्य सो वा । यथा । पुत्रेण सहेति स सपुत्रः सहपुत्रो वा । बहुव्रीहिरयम् ॥ सहाञ्चतीति सहस्य सध्रिरादेशः क्विबन्तेऽञ्चतौ परे । सध्र्यङ् ॥ सङ्गतमञ्चतीति संशब्दस्य समिरादेशः क्विबन्तेऽञ्चतौ परे । सम्यङ् ॥ तिरोऽञ्चतीति तिरःशब्दस्य तिरिरादेशः क्विबन्तेऽञ्चतौ तिर्यङ् ॥ विष्वगञ्चतीति विष्वग्देवयोरदसश्च टेरद्रिरादेशः क्विबन्तेऽञ्चतौ । विष्वद्र्यङ् ॥ देवानञ्चतीति देवद्र्यङ् ॥ एते तत्पुरुषा बोध्याः ॥ लक्ष्मीर्जायाऽस्येति जायाया जानिरादेशो ब ब्रीहौ । लक्ष्मीजानिः ॥ कुत्सितमन्नमिति कुशब्दस्य कत् स्वराद्युत्तरपदे तत्पुरुषे । कदन्नम् ॥ त्रिवद्रथतृणेषु कुशब्दस्य कत् । कुत्सितास्त्रय इति कत्त्रयः । कद्वदः । कद्रथः । कत्तृणम् ॥ ईषदर्थे कुशब्दस्य कादेशः । ईषज्जलं काजलम् ॥ कुत्सितः पन्था इति । ऋक्पूरित्यप्रत्ययः । संख्याव्ययाभ्यामिति

(क) पूर्वपदस्य द्विपदत्वापेक्षया मध्यपदलोप इति पाठः । अन्यथा कर्मधारयस्य त्रिपदत्वासम्भवादसङ्गतं सम्पद्येत ।

(ख) काल्या दास इति कालिदास इत्यत्र ह्रस्वत्वम् ।

क्लीबता । कापथम् । काक्षः । अक्षशब्देन तत्पुरुषोऽक्षिशब्देन बहुव्रीहिर्वा समासः ॥ उष्णे परे कुशब्दस्य काकवकदादेशा ईषदर्थे । कोष्णम् । कवोष्णम् । कदुष्णम् ॥ द्यौश्च भूमिश्चेति देवताद्वन्द्वे दिवशब्दस्य द्यावा । द्यावाभूमी । पृथिवीशब्दे दिवशब्दस्य द्यावा दिवश्च । द्यावापृथिव्यौ । दिवस्पृथिव्यौ ॥ जाया च पतिश्चेति जायाया जं दं वा द्वन्द्वे । जम्पती । दम्पती । जंदंशब्दावव्ययौ दारवचनौ । तयोः पत्या सह द्वन्द्वे जम्पती । दम्पती । इति चान्द्राः । "दाराः पुंसि बहुत्वे च दं कलत्रे नपुंसकम्" इत्यमरमाला ॥ "पत्न्यां जं दमकिञ्चस्ये", इति नामप्रपञ्चः ॥ माता च पिता चेति मातुररङ् द्वन्द्वे । मातरपितरौ । पुरुषे कुशब्दस्य वा का । कुपुरुषः । कापुरुषः ॥ ६८ ॥

(त०) सहादेः सादिरिति॥ आदिशब्द उभयत्र प्रकारे । प्रकारश्च सादृश्यम् । सह आदिः सदृशो यस्य । सादृश्यं च अविहितादेशाश्रयत्वेन ग्राह्यम् । स आदिः सदृशो यस्य । सादृश्यं चाविहितादिश्यमानत्वरूपेण ग्राह्यम् । अत्र सहादयः सादयश्चानन्ताः प्रयोगवशात् ज्ञातव्याः । सध्र्यञ्चिति । सहस्य सध्रिरादेशः । समः समिः तिरस्तिरिरित्यादि सर्वमूह्यम् ॥ ६८ ॥

षष उत्वं दतृदशधासूत्तरपदादेः ष्टुत्वम् ॥ षट् च दश च षोडश । षट् दन्ता यस्य षोडन् । संख्यायाः प्रकारे धा । षट् प्रकाराः षोढा । षड्धा । महान् ईश्वरो महेश्वरः । महादेवः । खरा नासिका यस्य स खरणसः—खरणाः । खुरणसः—खुरणाः । उन्नता नासिका यस्य स उन्नसः । प्रणसः । विगता नासिका यस्य स विग्रः । विख्यः । चतस्रोऽश्रयो यस्य स चतुरस्रः । प्रोष्ठो गौस्तस्येव पादौ यस्य स प्रोष्ठपदः । प्रगते जानुनी अस्य प्रज्ञुः । संज्ञुः ॥ ६९ ॥

(सु०) षष उत्वं दतृदशधासूत्तरपदादेः ष्टुत्वम॥ षट् च दश चेति । दतृदशधापरस्य षष उत्वं परस्य ष्टुत्वं च धाप्रत्यये वा ॥ षोडश । षोढा । षड्धा । षट् प्रकारा अस्येति प्रकारे धेति धाप्रत्ययः ॥ षट् दन्ता अस्येति संख्यापूर्वस्य दन्तस्य दतृ वयोऽर्थे । मितो नुमिति नुम् । षोडन् ॥ सुदन् । स्त्रियां ङीति ङीप् । सुदती ॥ महांश्चासौ ईश्वरश्चेति । महत आकारोऽन्तादेशः समानाधिकरणे उत्तरपदे जातीये च । महेश्वरः ॥ महादेवः ॥ समानाधिकरणे किम् । महतः सेवा महत्सेवा ॥ महान् प्रकारो महाजातीयः ॥ खरा नासिका यस्येति खुरश्चनासिका यस्येति च नासिकाया नस् बहुव्रीहावप्रत्यये । खुरखराभ्यां नासिकाया नस् अप्रत्ययश्च वा । खरणसः । अप्रत्ययः । पुंवद्वेति पुंवत् । अत्वसोः साविति दीर्घे खरणाः ॥ खुरणसः । अप्रत्ययः । खुरणाः ॥ उन्नता नासिका अस्येति उन्नसः । अप्रत्ययः ॥ प्रगता नासिकाऽस्येति प्रणसः । अप्रत्ययः ॥ वेर्नासिकायाः ग्रख्यौ । विगता नासिकाऽस्येति विग्रः । विख्यः । वेः खुरुषग्रा इति शाकटायनसूत्राद्विखुर्विख्यो विग्र इति रूपत्रयं च ॥ "खरणाः स्यात् खरणसो विग्रो विखुर्विनासिकः" इति रभसः ॥ चतस्रोऽश्रयोऽस्येति ताळव्यस्थाने दन्त्यसो निपात्यते । चतुरस्रः । अ-

प्रत्ययः ॥ प्रोष्ठो गौस्तस्येव पादावस्येति पादस्य पद् निपात्यते । अप्रत्ययः । प्रोष्ठपद् ॥ प्रसम्भ्यां जानुनोर्ज्ञुश्च वा बहुव्रीहौ । प्रगते जानुनी यस्य स प्रज्ञुः । संज्ञुः ॥६९॥

(ऊर्ध्वाद्वा ज्ञुः) ऊर्ध्वज्ञुः । ऊर्ध्वजानुः ॥ ७० ॥

(सु०) ऊर्ध्वाद्वा ज्ञुः ॥ ऊर्ध्वज्ञुः । ऊर्ध्वजानुः ॥ ७० ॥

(बहुव्रीहौ धनुषोऽनङ्) अधिज्यधन्वा । शार्ङ्गं धनुरस्य शार्ङ्गधन्वा । उद्गन्धिः । सुगन्धिः । पूतिगन्धिः । सुरभिगन्धिः । द्विदन् । चतुर्दन् । अमुमञ्चतीति अमुमुयङ् । अदमुयङ् । अदद्र्यङ् । कौमुदगन्ध्यायाः पुत्रः कौमुदगन्धीपुत्रः । कौमुदगन्धीपतिः । समानं ज्योतिरस्य सज्योतिः ॥ सनाभिः । सनामा । सवयाः । सब्रह्मचारी । सतीर्थ्यः । क्षीरोदः । सुरोदः । लवणोदः । शुद्धोदः । पृषोदरः । वारिवाहको बलाहकः । गूढोत्मा(क) । दक्षिणतीरम् । दाक्षिणतारम् । इत्यादि ॥ ७१ ॥

(सु०) बहुव्रीहौ धनुषोऽनङ् ॥ धनुरन्तस्य बहुव्रीहेरनङ् संज्ञायां च वा ॥ शृङ्गस्य विकारः शार्ङ्गम् अण् । शार्ङ्गं धनुरस्येति शार्ङ्गधन्वा ॥ संज्ञायां तु शतधन्वा शतधनुः ॥ उत्पूतिसुसुरभिभ्य गुणवाचिनो गन्धस्येकारान्तादेशो बहुव्रीहौ । उद्गन्धिः । पूतिगन्धिः । सुगन्धिः । सुरभिगन्धिः ॥ गुणवाचिन इति किम् । शोभना गन्धा द्रव्याण्यस्य सुगन्ध आपणिकः ॥ अल्पवाचिनो गन्धस्येत्वं बहुव्रीहौ । सूपस्य गन्धो लेशो यस्मिन् तत् सूपगन्धि भोजनम् । घृतगन्धि ॥ उपमानाद्गन्धस्येकारान्तादेशः । पद्मस्येव गन्धोऽस्य पद्मगन्धिः ॥ "गन्धस्तु सौरभे नृत्ये गन्धके गर्वलेशयोः । स एव द्रव्यवचनो बहुत्वे पुंसि च स्मृतः" इति । द्वौ दन्तावस्येति संख्यासुपूर्वस्येति दत् द्विदन् ॥ चतुर्दन् ॥ अमुमञ्चतीति अदस् अच् इति स्थिते । विष्वगिति टेरद्रिः । अदद्रि अच् इत्यत्र यत्वम् । अदसोऽसेर्दादु दो म इत्यनेन दाभ्यां परयोः रकाराकारयोरुकारौ दकारयोश्च मकारौ अमुमुयङ् । अन्त्यबाधेऽन्त्यसदेशस्यादेश इति वदतां मते परदकाररकारस्यैव मुत्वम् । अदमुयङ् ॥ त्यदाद्यत्वे एव मुत्वं नान्यत्रेति पक्षे अदद्र्यङ् ॥ कुमुदस्येव गन्धोऽस्येति उपमानाद्गन्धस्येतीकारादेश इति कुमुदगन्धिः । कुमुदगन्धेरपत्यं स्त्री कौमुदगन्ध्या । अपत्ये ष्यः । कौमुदगन्ध्यायाः पुत्र इति कौमुदगन्ध्यायाः पतिरिति वा ह्रस्वस्य स्थाने ईत्वं निपात्यते । कौमुदन्धापुत्रः कौमुदगन्धीपतिः ॥ समानं ज्योतिरस्येति । ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुतीर्थ्यब्रह्मचारिषु । समानस्य सः । सज्योतिः । सनाभिः । सनामा । सवयाः । ब्रह्म देवः तदध्ययनार्थं व्रतमपि ब्रह्म । ब्रह्म चरतीति ब्रह्मचारी 'व्रते' इति णिनिः । समानः ब्रह्मचारीति सब्रह्मचारी ॥ समाने तीर्थे वसतीति सतीर्थ्यः । वसत्यर्थे यप्रत्ययः ॥ उत्तरपदोदकस्योदः । क्षीरोदः । सुरोदः । लवणोदः । शुद्धोदः ॥ पृषतः उदरमिति तलोपः । पृषोदरम् ॥ वारिणो वाहक इति पूर्वपदस्य बः उत्तरपदादेश्च लत्वं बलाहकः ॥ गूढोत्मा अत्राकारस्य स्थाने उत्वम् ॥ 'अवे-

---

(क) गूढोत्मा । अत्राकारस्थाने उत्वम् ।

वर्णागमाद्धंसः सिंहो वर्णविपर्ययात् । गूढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरम् (क) ॥१॥" हन्तेः पचादित्वादच्प्रत्यये समागमात् हंस इति । हिंसेः पचादित्वादच्प्रत्यये हकारसकारयोर्व्यत्ययात् सिंह इति ॥ दिक्शब्देभ्यस्तीरस्य तारो वा । सर्वादेः समासादाविति पुंवत् । दक्षिणतारं दक्षिणतीरमित्यादि ॥ ७१ ॥

अलुक् क्वचित् ॥ क्वचित्समासे तद्धिते च विभक्तेरलुक्(ख) ॥ कृच्छ्रान्मुक्तः । स्तोकान्मुक्तः । दूरान्मुक्तः । निकटान्मुक्तः । अप्सुयोनिः । सरसिजम् । उरसिलोमा । हृदिस्पृक् । कण्ठेकालः । वाचोयुक्तिः । दिशोदण्डः । पश्यतोहरः । खेशयः । ग्रामेवासः । ग्रामेवासी । चोरस्यकुलम् । ओजसाकृतम् । सहसाकृतम् । सम्भसाकृतम् । पुंसानुजः । जनुषान्धः । आत्मनापञ्चमः । त्वचिसारः । गविष्ठिरः । युधिष्ठिरः । परस्मैपदम् । परस्मैभाषा । आत्मनेपदम् । आत्मनेभाषा । मध्येगुरुः । अन्तेगुरु । स्तम्बेरमः । कर्णेजपः । पूर्वाह्णेतरे । पूर्वाह्णेतमे । आमुष्यायणः । आमुष्यकुलिका । आमुष्यपुत्रिका । मातृपितृभ्यां स्वसुः सस्य षः मातृष्वसा । पितृष्वसा । मातृपितृभ्यां वा मातुःस्वसा–मातुःष्वसा । पितुः स्वसा—पितुस्वषा होतुरन्तेवासी । होतुःपुत्रः । पितुरन्तेवासी । पितुःपुत्रः । देवानांप्रिय इति च मूर्खे । दिवोदासः । शुनःशेपः । शुनःपुच्छः । इत्यादि ॥ ७२ ॥

(सु०) **अलुक् क्वचित्** ॥ समासप्रत्यययोरित्यस्यापवादः । कृच्छ्रस्तोकदूरार्थनिकटार्थेभ्यः पञ्चम्या अलुक् उत्तरपदे ॥ कृच्छ्रान्मुक्तः । "स्यात्कष्टं कृच्छ्रमाभीलम्" इत्यमरः । उत्तरपदे किम् । निष्क्रान्तः स्तोकादिति निःस्तोकः । द्विवचनबहुवचनान्तानां तु समासो नेष्यतेऽनभिधानात् । तेन स्तोकाभ्यां मुक्त इत्यादौ वाक्यमेव ॥ अप्सु योनिरुत्पत्तिर्यस्येति अपः सप्तम्या अलुक् योनिजचरमतिषु । अप्सुयोनिः । अप्सुजः । अप्सुचरः । अप्सुमतिः ॥ हसान्ताददन्ताच्च सप्तम्या अलुक् संज्ञायाम् । सरसिजम् । अदन्तात्तु अरण्येतिलक इत्यादि ॥ स्वाङ्गात् सप्तम्या अलुग् अकामे परे । मूर्द्धमस्तकाभ्यां तु न । उरसिलोमा ॥ अकामे किम् । मुखे कामोऽस्य मुखकामः । मूर्द्धमस्तकाभ्यां नेति किम् । मूर्द्धशिखः । मस्तकशिखः । हृदयं स्पृशतीति दिवहृद्भ्यां सप्तम्या अलुक् । हृदिस्पृक् । कर्मणोऽधिकरणत्वविवक्षायां सप्तमी । एवं दिविस्पृक् ॥ कण्ठेकालः । स्वाङ्गात् सप्तम्या अलुगित्यलुक् ॥ वाग्दिक्पश्यद्भ्यः षष्ठ्याः अलुग् युक्तिदण्डहरेषु । वाचोयुक्तिः । दिशोदण्डः । पश्यतोहरः । पश्यन्तमनादृत्य हरतीत्यर्थः ॥ 'अनादराधिक्ये' इति षष्ठी । अका-

---

(क) सारस्वतादौ—वर्णागमो गवेन्द्रादौ सिंहे वर्णविपर्ययः ।
षोडशादौ विकारः स्याद्वर्णनाशः पृषोदरे ॥ इत्याकारेणोद्धृतम् ।

(ख) **अलुगिति** । अत्र वासुदेवः—समासप्रत्यययोरिति प्राप्तस्यापवादत्वात् कृदन्ते च तत्प्राप्त्यभावात् सरसिजमित्यादौ नाम्नश्च कृता समास एव प्राप्तलुक्प्रतिषेधात्कृदन्ते इत्यसम्यक्पाठ इति ।

लात्सप्तम्या अलुग्वा शयवासवासिषु । खेशयः—खशयः । ग्रामेवासः ग्रामवासः । ग्रामेवासी ग्रामवासी । षष्ठ्या अलुगाक्रोशेऽर्थे । चोरस्यकुलम् ॥ आक्रोशे किम् । ब्राह्मणकुलम् ॥ ओजस्सहसम्भस्तमसओम्भस्तृतीयाया अलुक् । ओजसाकृतम् । अम्भसाकृतम् । सहसाकृतम् । तमसाकृतम् । अञ्जसाकृतम् । आर्जवेन कृतमित्यर्थः ॥ पुंसोऽनुजे जनुषोऽन्धे च तृतीयया अलुक् । यस्याऽग्रजः पुमान् स पुंसानुजः । जनुषान्धः । जात्यन्ध इत्यर्थः । "जनुर्जननजन्मानि" इत्यमरः ॥ आत्मनस्तृतीयाया अलुक् पूरणार्थप्रत्ययान्ते परे । आत्मनापञ्चमः ॥ पूरणार्थं किम् । आत्मकृतम् ॥ त्वचिसारः ॥ हलान्ताददन्ताच्च सप्तम्या अलुक् संज्ञायामित्यलुक् ॥ गोः सप्तम्या अलुक् स्थिरे । गविष्ठिरः ॥ युधिष्ठिरः । हलान्तादिति सप्तम्या अलुक् ॥ परशब्दादात्मशब्दाच्च चतुर्थ्या अलुक् वैयाकरणाख्यायाम् । परस्मैपदम् । परस्मैभाषा । आत्मनेपदम् । आत्मनेभाषा । तादर्थ्ये चतुर्थ्या अलुगत्र ॥ मध्यान्ताभ्यां सप्तम्या अलुग्गुरौ परे । मध्येगुरुः । अन्तेगुरुः ॥ तत्पुरुषे सप्तम्या अलुक् कृत्प्रत्ययान्ते बहुलम् । स्तम्बेरमः । स्तम्बे तीर रमते इति स्तम्बेरमो हस्ती । कर्णेजपः । कर्णेजपः सूचकः ॥ कालवाचकात्सप्तम्या अलुग् वा तरतमकालतनेषु पूर्वाह्णेतरे–पूर्वाह्णतरे । पूर्वाह्णेतमे–पूर्वाह्णतमे । पूर्वाह्णेकाले–पूर्वाह्णकाले । पूर्वाह्णेतने–पूर्वाह्णतने ॥ अदसः षष्ठ्या अलुगायनपुत्रिकाकुलिकासु । अमुष्यापत्यं नडादित्वादायनण् । आमुष्यायणः । अमुष्य पुत्रस्य भावः आमुष्यपुत्रिका । अमुष्य कुलस्य भावः आमुष्यकुलिका । भावार्थं कः ॥ ऋदन्तात्षष्ठ्या अलुग् वा । स्वसृपत्योः । मातृपितृभ्यां स्वसुः सस्य षः स्यात्समासे । मातृष्वसा । पितृष्वसा । मातृपितृभ्यां वा । आभ्यां स्वसुः सस्य षो वा स्यात् समासे । मातुःष्वसा—मातुःस्वसा । पितुःष्वसा—पितुःस्वसा । विद्यासम्बन्धयोनिसम्बन्धवाचिन ऋदन्तात्षष्ठ्या अलुक् । होतुरन्तेवासी । होतुःपुत्रः । पितुरन्तेवासी । पितुःपुत्रः ॥ देवानांप्रिय इति मूर्खेऽर्थे षष्ठ्या अलुक् । अन्यत्र देवप्रियः ॥ दिवो दासे परे षष्ठ्या अलुक् । दिवोदासः ॥ शुनः षष्ठ्या अलुक् शेपपुच्छलाङ्गूलेषु । शेपःसकारान्तः । "स्याल्लिङ्गं चिह्नशेफसाः" इत्यमरोक्तेः । शीङ औणादिके पप्रत्यये पोपधतोऽपि । शुन इव शेपमस्य स शुनःशेपः । शुन इव पुच्छमस्य स शुनःपुच्छः । शुन इव लाङ्गूलमस्य स शुनोलाङ्गूलः बहुव्रीहयस्त्रयोऽप्यमी ऋषिविशेषाणां संज्ञा ॥ इत्यलुक् समासः ॥ ७२ ॥

(त०) अलुक् क्वचिदिति ॥ समासप्रत्यययोरित्यस्यापवादः ॥ कृच्छ्रान्मुक्त इत्यस्य पक्षे सिद्धत्वेऽपि कृच्छ्रमुक्तामत्यनिष्टापत्तिवारणायेदमावश्यकम् ॥ हृदिस्पृगिति॥ हृदयं स्पृशतीति विग्रहः । कर्मणोऽधिकरणत्वविवक्षायां सप्तमी ॥ आमुष्यकुलिकेति ॥ अमुष्य कुलस्य भावः । एवममुष्य पुत्रस्य भाव इत्यपि ॥ देवानांप्रिय इति ॥ मूर्खा हि देवानां प्रीतिं जनयन्ति देवपशुत्वात् ॥ शुनःशेप इति ॥ शुन इव शेपमस्येति विग्रहः । एवं पुच्छलाङ्गूलाभ्यामपि बहुव्रीहिः । ऋषिविशेषाणामेताः संज्ञाः ॥ ७२ ॥

तरतमरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ईबन्तस्यानेकस्वरस्य ह्रस्वो भाषितपुंस्कस्य ॥ (क)ब्राह्मणितरा । ब्राह्मणितमा ।

(क) जातिवाचिनस्त्रीप्रत्ययान्तस्य इति नेति निषेधात् तरतमचरडिति पुंवद्भावो न ।

ब्राह्मणिरूपा । ब्राह्मणिकल्पा । ब्राह्मणिचेली ॥ ७३ ॥

(सु०) तरतमरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ईबन्तस्यानेकस्वरस्य ह्रस्वो भाषितपुंस्कस्य ॥ अतिशयेन ब्राह्मणीति ब्राह्मणितरा । ब्राह्मणितमा । तरतमवर्ह्विति पुंवद्भावो न । जातिवाचिनः स्त्रीप्रत्ययान्तस्य नेति निषेधात् 'तरतमेयस्विष्ठाः प्रकर्षे' इति तरतमौ । प्रशस्ता ब्राह्मणीति ब्राह्मणिरूपा । प्रशंसायामिति रूपः ॥ ईषन्न्यूना ब्राह्मणीति ब्राह्मणिकल्पा । ईषदसमाप्तौ कल्पेति कल्पप्रत्ययः ॥ चेलादीनि वृत्तिविषये समासादौ कुत्सनवाचीनि सन्ति । कुत्सिता ब्राह्मणी । ङ्यित इतीप् । ब्राह्मणिचेली ॥ उक्तपुंस्कस्येति किम् । आमलकीतरा । कुवलीतरा । आमलकीकुवलीशब्दौ वृक्षे नित्यस्त्रीलिङ्गौ ॥ ७३ ॥

(अनीबन्तस्य स्त्रीप्रत्ययान्तस्येबन्तस्यैकस्वरस्य वा ह्रस्वस्तरादौ) ब्रह्मबन्धूतरा—ब्रह्मबन्धुतरा । स्त्रीतरा स्त्रितरा ॥७४॥

(सु०) अनीबन्तस्य स्त्रीप्रत्ययान्तस्य ईबन्तस्यैकस्वरस्य वा ह्रस्वस्तरादौ ॥ अनीबन्तस्य स्त्रीप्रत्ययान्तस्य वा ह्रस्वः एकस्वरस्य ईबन्तस्य च वा ह्रस्वो भवति तरतमरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु परेषु ॥ उत ऊरित्यूप्रत्ययः । अतिशयेन ब्रह्मबन्धूरिति तरतमेयस्विष्ठा इति तरप्रत्ययः ब्रह्मबन्धूतरा ॥ ७४ ॥

(ॠितः परस्य वा) विदुषितरा-विद्वत्तरा । भवतितरा—भवत्तरा । पचतितरा-पचत्तरा ॥ ७५ ॥

(सु०) ॠितः परस्य वा ॥ उश्च ऋ च तयोः समाहारः ॠ । ॠ इत् यस्य स ॠित् तस्मात् ॠितः ॥ उकारेत ऋकारेतश्च परस्य ईप्प्रत्ययस्य ह्रस्वो वा भवति तरादौ ॥ विदुषितरा । ङ्यित इतीप् । वसोर्व उरित्युत्वम् । ह्रस्वाभावे तरतमवर्ह्विति पुंवद्भावः । विद्वत्तरा । विदुषीतरेत्यपि कैश्चिदुदाहृतं तन्निर्मूलम् (क) ॥ ७५ ॥

(त०) ॠितः परस्येति ॥ उश्च ऋ च ॠौ ताविते यस्य स तथा तस्मात्॥७५॥

(इष्टकेषीकामालानां चिततूलभारिषु ह्रस्वः) इष्टकचितम् । पक्वेष्टकचितम् । इषीकतूलम् । मुञ्जेषीकतूलम् । मालभारी । उत्पलमालभारी ॥ ७६ ॥

(सु०) इष्टकेषीकामालानां चिततूलभारिषु ह्रस्वः ॥ इष्टकादीनां तदन्तानां च ह्रस्वो भवति चितादिषु ॥ इष्टकाभिश्चितमितीष्टकचितम् । तदन्ते पक्वेष्टकचितम् ॥ इषीकाणां तूलमिषीकतूलम् ॥ मालां बिभर्ति इति मालभारी । कर्तरि णिनिः हारिण्विति पाठान्तरम् ॥ ७६ ॥

(त०) मालभारीति ॥ मालां बिभर्तीति विग्रहः । ताच्छील्ये णिनिः ॥७६॥

(कारे सत्यागदस्य मुम्) सत्यङ्कारः । अगदङ्कारः ॥ ७७ ॥

(सु०) कारे सत्यागदस्य मुम् ॥ सत्यागदयोर्मुम् स्यात् कारे ॥ सत्यंकारः ।

(क) कैश्चिदिति अस्वरसोद्भावनम् । निर्मूलमिति । प्रमाणाभावादिति भावः ।

त्पथकरणमित्यर्थः ॥ अगदङ्कारो वैद्यः ॥ ७७ ॥

(त०) सत्यङ्कार इति ॥ समयकरणम् ॥ अगदङ्कारो वैद्यः ॥ ७७ ॥

(अस्तोश्च) अस्तुङ्कारः ॥ ७८ ॥

(सु०) अस्तोश्च ॥ अस्तु इत्यस्य मुम् स्यात् कारे ॥ अस्तु इत्याख्यातप्रतिरूपकमव्ययम् । अस्तुङ्कारः अभ्युपगम इत्यर्थः ॥ ७८ ॥

(त०) अस्तुकारोऽभ्युपगमः अस्त्विति तिङन्तप्रतिरूपकमव्ययम् ॥ ७८ ॥

(धेनोर्भव्यायाम्) धेनुम्भव्या ॥ ७९ ॥

(सु०) धेनोर्भव्यायाम् ॥ धेनुशब्दस्य मुम् स्यात् भव्यायां परस्याम् ॥ धेनुश्चासौ भव्या चेति विग्रहः । धेनुंभव्या । भविष्यन्ती धेनुरित्यर्थः । निपातनाद्भविष्यति कर्तरि कृत्प्रत्ययः ॥ ७९ ॥

(त०) धेनुर्भव्येति ॥ धेनुश्चासौ भव्येति विग्रहः । भविष्यन्ती धेनुरित्यर्थः ॥७९॥

(लोकस्य पृणे) लोकम्पृणः ॥ ८० ॥

(सु०) लोकस्य पृणे ॥ लोकस्य मुम् स्यात् पृणे परे ॥ पृणधातुः प्रीणनार्थः । लोकम्पृणः सूर्यः ॥ ८० ॥

(इत्येऽनभ्यासस्य) मुम् ॥ अनभ्यासमित्यः ॥ ८१ ॥

(सु०) इत्येऽनभ्यासस्य ॥ अनभ्यासस्य मुम् स्यात् इत्ये परे ॥ अभ्यासं समीपम् अभ्यासभिन्नमनभ्यासम् । एतिस्तुशासिति इणः क्यप् । अनभ्यासमित्यः । दूरत परिहर्तव्य इत्यर्थः ॥ ८१ ॥

(त०) अनभ्यासमित्य इति । दूरतः परिहर्तव्य इत्यर्थः ॥ ८१ ॥

(भ्राष्ट्राग्न्योरिन्धे) भ्राष्ट्रमिन्धः । अग्निमिन्धः ॥ ८२ ॥

(सु०) भ्राष्ट्राग्न्योरिन्धे ॥ अनयोर्मुम् स्यादिन्धे परे ॥ 'इन्धी दीप्तौ' कर्मण्यण् । भ्राष्ट्रमिन्धः । अग्निमिन्धः । नाम्नश्च कृतेति समासः ॥ ८२ ॥

(गिलेऽगिलस्य) मुम् ॥ तिमिङ्गिलः ॥ ८३ ॥

(सु०) गिलेऽगिलस्य ॥ अगिलस्य गिलभिन्नस्य मुम् भवति गिले परे ॥ तिमिङ्गिलो मत्स्यविशेषः । गिरतेर्मूलविभुजादित्वात्कप्रत्ययः । गिरतं रेफस्य वा लत्वमिति लत्वम् ॥ ८३ ॥

(त०) तिमिङ्गिल इति ॥ मत्स्यविशेषः ॥ ८३ ॥

(गिलगिले च) तिमिङ्गिलगिलः ॥ ८४ ॥

(सु०) गिलगिले च ॥ अगिलस्य मुम् भवति गिलगिले परे ॥ तीमीनां गिलगिल इति तिमिङ्गिलगिलः ॥ ८४ ॥

(त०) गिलगिले चेति ॥ गिलं गिलतीति गिलगिलः । तिमीनां गिलगिलस्तिमिङ्गिलगिल इति विग्रहः॥ ८४ ॥

(उष्णभद्रयोः करणे) उष्णंकरणम् । भद्रंकरणम् ॥ ८५ ॥

(सु०) उष्णभद्रयोः करणे ॥ उष्णभद्रयोर्मुम् स्यात् करणे परे ॥ ८५ ॥

(रात्रेः कृति वा) रात्रिंचरः—रात्रिचरः । रात्रिमटः । रात्र्यटः ॥८६॥

(सु०) रात्रेः कृति वा ॥ रात्रेर्मुम् वा स्यात् कृत्प्रत्ययान्ते परे ॥ अखिदर्थमिदं सूत्रम् । खिति प्रत्यये खिति पदस्येति नित्यमेव मुम् स्यात् । अटाविति टप्रत्ययः । रात्रिंचरः ॥ ८६ ॥

(नहिवृतिवृषिव्यधिरुचिसहितनिषु) क्विबन्तेषु पूर्वस्य दीर्घः । उपानत् । नीवृत् । प्रावृट् । मर्मावित् । नीरुक् । अभीरुक् । ऋतीषट् । परीतत् ॥ ८७ ॥

(सु०) नहिवृतिवृषिव्यधिरुचिसहितनिषु ॥ क्विबन्तेषु पूर्वस्य दीर्घः ॥ क्विबन्तेषु परेषु पूर्वस्योपसर्गकारकस्य दीर्घः स्यात् ॥ णह बन्धने । वृतु वर्तने । वृषु सेचने । व्यध ताडने । रुच दीप्तौ । सह मर्षणे । तनु विस्तारे ॥ उपसमीपे नह्यते इति उपानत् । कर्मणि क्विप् । निवर्तते इयि नीवृत् । "नीवृज्जनपदो देश-" इत्यमरः ॥ प्रवर्षतीति प्रावृट् ॥ मर्माणि विध्यतीति मर्मावित् । श्वानं विध्यतीति नाम्नो नो लोपशिति नलोपः । श्वावित् । व्यधेः ग्रहांक्ङिति चेति सम्प्रसारणम् । निरोचते इति नीरुक् ॥ ऋतिं सहत इति ऋतीषट् "ऋतिर्जुगुप्साकल्याणगतिस्वर्द्धास्वथो ऋतुः" इति हैमः ॥ परि तनोतीति परीतत् ॥ क्विबन्तेष्विति किम् । परिणहनम् ॥ उपसर्गकारकस्येति किम् । पटुरुक् । तिग्मरुक् ॥८७॥

(त०) नह्योन्वृतीति ॥ उपनह्यत इति उपानत् ॥ निवर्तत इति नीवृत् ॥ प्रवर्षतीति प्रावृट् ॥ मर्माणि विध्यतीति मर्मावित् ॥ निरोचते इति नीरुक् ॥ ऋतिं सहते इति ऋतीषट् ॥ परितनातीति परीतत् ॥ ८७ ॥

(मत्वर्थे बहुस्वरस्य) अमरावती (क) ॥ ८८ ॥

(सु०) मत्वर्थे बहुस्वरस्य ॥ बहुस्वरस्य दीर्घः स्यात् संज्ञायामस्त्यर्थं परे ॥ अमराः सन्त्यस्याममरावती । मान्तोपधाद्वत्विनौ इति वत् । ऋन्नित इतीप् ॥ संज्ञायामिति किम् । बलवती ॥ बहुस्वरस्येति किम् ॥ व्रीहिमती ॥ ८८ ॥

(शरादेश्च) शरावती ॥ ८९ ॥

(सु०) शरादेश्च ॥ शरादेर्दीर्घः स्यात् अस्त्यर्थे । शराः सन्त्यस्यामिति शरावती। ८९।

(अजिरादेर्न) अजिरवती ॥ ९० ॥

(सु०) अजिरादेर्न ॥ अजिरादेर्दीर्घो न भवति अस्त्यर्थं । अजिरमस्त्यस्यां सा अजिरवती । "अङ्गणं चत्वराजिरे" इत्यमरः ॥ ९० ॥

(उपसर्गस्य घञ्यमनुष्ये वा दीर्घः) परिपाकः—परीपाकः । परिहासः—परीहासः ॥ अमनुष्ये किम् । निषादः ॥ ९१ ॥

(सु०) उपसर्गस्य घञ्यमनुष्ये वा दीर्घः ॥ उपसर्गस्य वा दीर्घः स्यात् घञन्ते परे न तु मनुष्येऽर्थे ॥ अमनुष्ये किम् । निषीदन्त्यस्मिन्नथमित्यधिकरणे घञ् । निषादः पुलिन्दो मनुष्यजातिः ॥ ९१ ॥

(क)'नगरी त्वमरावती' इत्यमरः ।

आदेश्च द्वन्द्वे ॥ द्वन्द्वे सति क्वचिदादेर्लोपः(क) ॥ माता च पिता च पितरौ । श्वश्रूश्च श्वशुरश्च श्वशुरौ । दुहिता च पुत्रश्च पुत्रौ । स्वसा च भ्राता च भ्रातरौ ॥ ९२ ॥

(सु०) **आदेश्च द्वन्द्वे** ॥ द्वन्द्वविषये भिन्नार्थानां च तुल्यार्थानां नाम्नामन्त्योऽवशिष्यते । आदीनां च लोपो भवतीत्यर्थः ॥ रामश्च रामश्च रामौ । घटश्च कुम्भश्च कुम्भौ। घटश्च कुम्भश्च कलशश्च कलशाः ॥ मातृश्वश्रूभ्यां सहोक्तौ पितृश्वशुरौ वा शिष्येते । माता च पिता चेति पितरौ मातापितरौ वा । "पितुर्दशगुणा माता गौरवेणातिरिच्यते" इति स्मृतेर्मातुः प्रधानत्वात्पूर्वनिपातः । 'ऋतां द्वन्द्वे' इति पूर्वस्यात्वम् ॥ श्वशुरौ । श्वश्रूश्वशुरौ वा ॥ स्वसृदुहितृभ्यां सहोक्तौ भ्रातृपुत्रौ शिष्येते । दुहिता च पुत्रश्च पुत्रौ ॥ स्वसा च भ्राता च भ्रातरौ ॥ ९२ ॥

(त०) **आदेश्च द्वन्द्वे** इति ॥ द्वन्द्वे समासे क्वचिदादिभूतस्य पदस्य लोपः ॥ अत्र यस्य लोप इत्यतो लोपग्रहणमनुवर्त्यं व्याख्यानम् । तदुदाहरणं पितरावित्यादि इति तु वृद्धाः। नव्यास्त्वेवमाहुः । अत्र नाम्नामित्यनुवृत्तं सद्विभक्तिपरं बोध्यं न तु पदार्थपरम् । द्वन्द्वे इत्यप्यर्थपरम् । आदेरित्येकवचनं विवक्षितम् । सूत्रे लिङ्गवचनमविवक्षितमित्युत्सर्गात् । 'तुल्यार्थे' इत्यनुवर्त्य विभक्तिव्यत्ययेन वाक्यभेदेन च व्याख्येयम् । तथा च समानानुपूर्वीकाणां भिन्नार्थानां तुल्यार्थानां भिन्नानुपूर्वीकाणां च नाम्नां मध्ये आदेः अथोः आदीनां चान्त्य आदेशः स्यात् । रामश्च रामश्च रामौ घटश्च कुम्भश्च कुम्भौ । घटश्च कुम्भश्च कलशश्च कलशाः । पूर्वपदानामन्त्यपदादेशस्तु न कृतः सविभक्तिकस्यादेशे तस्यैव श्रवणप्रसङ्गात् । द्विवचनबहुवचनयोरभावात् । द्वन्द्वे कृते इत्यपि न सर्वं सर्वेषामित्यादावीत्वविकल्पलुङभावादेः प्रसङ्गात् । द्वन्द्वार्थश्च सहविवक्षया । सहविवक्षा चेयम् । "अनुस्यूते च भेदानामेका प्रज्ञा प्रजायते । यदा सहविवक्षां तामाहुर्द्वन्द्वैकशेषयोः" इति॥९२॥

ऋतां द्वन्द्वे ॥ पूर्वस्यात्वम् ॥ मातापितरौ (ख) । होतापोतारौ । नेष्टोद्गातारौ ॥ ९३ ॥

(सु०) **ऋतां द्वन्द्वे** ॥ पूर्वपदस्यात्वम् । विद्यायोनिसम्बन्धवाचिनाम् ऋदन्तानां यो द्वन्द्वस्तत्र पूर्वपदस्यात्वं भवति ॥ षष्ठीनिर्दिष्टत्वादन्त्यस्यादेशः । द्वयोर्द्वन्द्वे एवात्वम् । माता च पिता चेति एकशेषाभावे मातापितरौ । पुत्रोत्पादनेऽनयोर्योनिकृतः सम्बन्धोऽत्र ॥ होता च पोता चेति होतापोतारौ । नेष्टा चोद्गाता च नेष्टोद्गातारौ । इह होमादिरूपविद्याकृतः सम्बन्ध एकस्मिन् यज्ञ आर्त्विज्यरूपो बोध्यः ॥ ९३ ॥

(त०) **ऋतां द्वन्द्व** इति । विद्यायोनिसम्बन्धवाचिनामेव ऋदन्तानामित्यर्थः । तेनेह न कर्तृभोक्तारौ ॥ ९३ ॥

(क) आदेश्चेति । यस्य लोप इत्यतो लोपे इत्यनुवर्त्याह लोप इति । ननु माता च पिता चेति विग्रहे समासावस्थायां कस्य वा पूर्वनिपात इति चेदुच्यते । 'पितुर्दशगुणा माता गौरवेणातिरिच्यते' इति मनुवचनात् मातुः प्राधान्यात् पूर्वनिपातः ।

(ख) माता पिता च विग्रहे समासे च 'धन्यो माता गरीयसी' इत्यादिवचनादत्रापि मातुःपूर्वनिपातो बोध्यः ।

(पुत्रे च) पितापुत्रौ । गावश्च गावश्च गाव इमाः । शुक्लश्च शुक्ला च शुक्लं च शुक्लम् । स य यश्च यौ । तौ वा ॥ ९४ ॥

(सु०) पुत्रे च ॥ विद्यायोनिसम्बन्धवाचिनाम् ऋदन्तानामात्वं भवति पुत्रे परे । पिता च पुत्रश्च पितापुत्रौ । अनयोर्योनिकृतः सम्बन्धो जन्यजनकभावलक्षणोऽत्र ॥ ग्राम्यपशुसमूहेष्वतरुणेष्वनेकखुरेषु सहोक्तौ स्त्रीलिङ्गोऽवशिष्यते । गावश्च गावश्चेति गावः । उभयत्र रूपस्य समानत्वात् स्त्रीलिङ्गशेषस्य फलमाह । इमा इति । ग्रामे भवा ग्राम्याः यण् ॥ ग्राम्येति किम् । रुरव इमे । मृगविशेषा वनचारिण इत्यर्थः ॥ पशुग्रहणं किम् । ब्राह्मण्यश्च ब्राह्मणाश्च ब्राह्मणाः ॥ समूहेषु किम् । एतौ गावौ ॥ अतरुणेषु किम् । वत्सा इमे ॥ अनेकखुरेषु किम् । अश्वा इमे । अश्वानामेक एव खुर इत्यर्थः ॥ अक्लीबेन सहोक्तौ क्लीबं शिष्यते । तच्च वा एकवत् तल्लक्षण एव विशेषश्चेत् । शुक्लः पटः शुक्ला शाटी शुक्लं वस्त्रम् । तदिदं शुक्लम् । तानीमानि शुक्लानि ॥ त्यदादीनां मिथः सहोक्तौ परं पूर्वं च शिष्यते । स च यश्च यौ तौ वा ॥ स्त्रिया सहोक्तौ पुमान् शिष्यते तल्लक्षण एव विशेषश्चेत् । हंसी च हंसश्च हंसौ । इह सर्वत्र एकशेषे कृतेऽनेकाभावात् द्वन्द्वसमासो न । तेन शिरसी शिरांसि इत्यादौ प्राण्यङ्गत्वादेकत्वावो न । पन्थानौ पन्थान इत्यादौ समासान्तप्रत्ययो न भवति ॥ इत्येकशेषः ॥ ९४ ॥

(त०) गाव इमा इति ॥ ग्राम्यपशुसंघेष्वतरुणेषु स्त्रिया एव एकशेष इत्यर्थः ॥ शुक्लमिति ॥ अक्लीबैः सहोक्तौ क्लीबमेव शिष्यते इत्यर्थः ॥ यौ तौ वेति ॥ त्यदादिषु परं विकल्पेनेत्यर्थः ॥ ९४ ॥

दिक्संख्ये संज्ञायाम् ॥ दिग्वाचिनः संख्यावाचिनश्च शब्दाः समानाधिकरणेन संज्ञायामेव समस्यन्ते स कर्मधारयः समासः । दक्षिणाग्निः(क) । सप्तर्षयः ॥ संज्ञायां किम् । पञ्च फलानि ॥ दिक्संख्ये किम् । शूर्पणखा ॥ ९५ ॥

(सु०) पुनः कर्मधारयमाह–दिक्संख्ये संज्ञायाम् ॥ दिक् च संख्या च दिक्संख्ये । दिग्वाचिनः संख्यावाचिनश्च शब्दास्तुल्यार्थेन सह समस्यन्ते स कर्मधारयः ॥ कर्मधारयस्तुल्यार्थ इत्यनेनैव सिद्धे नियमार्थमिदम् । संज्ञायामेवेति ॥ दक्षिणश्चासौ अग्निश्चेति दक्षिणाग्निः । सप्त च ते ऋषयश्च सप्तर्षयः । "दक्षिणाग्निर्गार्हपत्याहवनीयौ त्रयोऽग्नयः" इत्यमरः ॥ ९६ ॥

(त०) दिक्संख्ये संज्ञायामिति ॥ दिक् च संख्या च दिक्संख्ये । दिग्वाचिसंख्यावाचिनावित्यर्थः । कर्मधारयस्तुल्यार्थ इत्यनेनैव सिद्धे नियमार्थमिदम् । संज्ञायामेव नान्यत्रेत्यर्थः । दक्षिणाग्निरिति ॥ दक्षिणदिगवस्थिते वस्तुनि दक्षिणशब्दः । अतो

(क) दक्षिणाग्निरिति । दक्षिणशब्दो दक्षिणदिगवस्थितवस्तुनि वर्त्तते । तेन दानदेव्यांवृत्तौ दिगवस्थिते व्यवस्थाप्यते । अग्निशब्दोऽपि चित्रकादौ हुताशे व्यवस्थाप्यते । तेन विशेष्यविशेषणभावात् कर्मधारयः' । दक्षिणोऽग्निरित्यादौ वाक्ये संज्ञानवगमान्नित्यसमासत्वम् । अविग्रहस्य नित्यसमासत्वात् । अन्यथा दक्षिणाऽग्निरुन्मत्ता गङ्गा यत्रेत्यादिविग्रहस्य सर्वत्र दर्शनादविग्रहत्वासम्भव एव स्यात् ।

दानादेर्व्यावृत्तौ दिगवस्थिते व्यवस्थाप्यते अग्निशब्दोऽपि चित्रकादेर्व्यावृत्तौ हुताशे व्यव स्थाप्यते । अतो विशेषणविशेष्यभावात्कर्मधारयः ॥ संज्ञायां किम् । पञ्च फलानि ॥ दिक्संख्ये किम् । शूर्पणखा । दक्षिणाऽग्निरित्यादौ वाक्ये संज्ञानवगमान्नित्यसमासत्वम् । अविग्रहस्य नित्यसमासत्वात् । न विग्रहो यस्य लोके प्रयुज्यत इति शेषः । अन्यथा दक्षिणोऽग्निरुन्मत्ता गङ्गा यत्रेत्यादिविग्रहस्य सर्वत्र दर्शनादविग्रहत्वासम्भव एव स्यात् । अयमत्र संग्रह ॥ कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः । परार्थाभिधानं वृत्तिः । वृत्त्यर्थावबोधकं वाक्यं विग्रहः । स द्विधा । लौकिकोऽलौकिकश्च । तल्लक्षणं चो-क्तमेव । समासोऽपि द्विविधः । नित्योऽनित्यश्चेति । नित्योऽपि द्विविधः । अविग्रहोऽ-स्वपदविग्रहश्च । न स्वस्य समासस्य पदैर्विग्रहो यत्र सः समासः षड्विध इति प्रायो-वादः । द्विगव्ययीभावतत्पुरुषद्वन्द्वबहुव्रीहिकर्मधारयभिन्नस्यापि नाम्नश्च कृतेति विधा-नात् । एतेन नाम्नश्च कृता समास इति सूत्रे समासग्रहणं तत्पुरुषपरं समासस्य पूर्वेणैव विधानात् । अमादौ तत्पुरुष इत्यतो मण्डूकप्लुत्याऽनुवृत्तेर्वेति वासुदेवोक्तिः परास्ता ॥ तथा पूर्वपदार्थप्रधानोऽव्ययीभावः । उत्तरपदार्थप्रधानस्तत्पुरुषः । अन्यपदार्थप्रधानो बहु-व्रीहिः । उभयपदार्थप्रधानो द्वन्द्वः । विशेष्यपूर्वः कर्मधारयः पूर्वपदार्थप्रधानः । विशेषण-पूर्वस्तूत्तरपदार्थप्रधानः । द्विगुरन्यपदार्थप्रधान इत्यपि प्राचां प्रवादः प्रायोऽभिप्रायं सूचय-ति ॥ उन्मत्तगङ्गमित्याद्यव्ययीभावे अतिमालादौ तत्पुरुषे द्वित्रा इत्यादिबहुव्रीहौ दन्तोष्ठमि-त्यादिद्वन्द्वे चाभावात् । अनेकपदत्वं द्वन्द्वबहुव्रीह्योरेव । ऐकपद्यमेकविभक्तिकत्वं च समा-सप्रयोजनं पूर्वनिपातः समासान्तप्रत्ययादिश्च प्रयोजनम् ॥ ९५ ॥

(द्वन्द्वतत्पुरुषयोः परपदस्यैव लिङ्गम्) कुक्कुटमयूर्याविमे । मयूरीकुक्कुटाविमौ । अर्द्धपिप्पलीयम् ॥ ९६ ॥

(सु०) द्वन्द्वतत्पुरुषयोः परपदस्यैव लिङ्गम् ॥ इतरेतरयोगद्वन्द्वोऽत्र गृह्यते न समाहारद्वन्द्वः ॥ एकत्वे द्विगुद्वन्द्वावित्युक्तत्वात् । द्वन्द्वतत्पुरुषयोरिति सम्बन्धे षष्ठी । एतयोः परपदतुल्यं लिङ्गं भवति ॥ कुक्कुटश्च मयूरी च कुक्कुटमयूर्यौ । इमे इति स्त्रीलिङ्ग-निर्देशः ॥ मयूरी च कुक्कुटश्च मयूरीकुक्कुटौ । इमाविति पुंल्लिङ्गनिर्देशः ॥ पिप्पल्या अर्द्धमित्यर्धपिप्पली । इयमिति स्त्रीलिङ्गनिर्देशः ॥ ९६ ॥

(द्विगुप्राप्तापन्नालम्पूर्वप्रादिसमासे न) पञ्चकपालः । प्रा-प्तो जीविकां प्राप्तजीविकः । आपन्नजीविकः । अलं कुमार्यै अलङ्कुमारीः ॥ निष्कौशाम्बिः ॥ ९७ ॥

(सु०) द्विगुप्राप्तापन्नालंपूर्वप्रादिसमासे न ॥ द्विगुसमासे प्राप्तापन्नालंपूर्व-समासे प्रादिसमासे च परपदतुल्यं लिङ्गं न भवति ॥ पञ्चसु कपालेषु संस्कृतः । तद्धि-तार्थे द्विगुः । संस्कृतार्थेऽण् । तस्य लुक् च । तद्धितार्थे द्विगुर्विशेष्यनिघ्नः । पुरोदाश्यते इति । 'दाशृ दाने' कर्मणि घञ् । निपातनाद्दस्य डः । पुरोडाशः ॥ प्राप्तजीविकः ॥ आ-पन्नजीविकः । अलंकुमारिः । तत्पुरुषा एते । 'अन्यार्थं' इति ह्रस्वः ॥ प्रादिसमासो यथा । प्रादयो गताद्यर्थे प्रथमया । प्रगत आचार्यः प्राचार्यः । दुराचारः पुरुषो दुष्पु

दयः । प्रगतः पितामहः प्रपितामह इत्यादि ॥ अत्यादयः क्रान्ताद्यर्थे द्वितीयया । अतिक्रान्तो मालाम् अतिमालः । 'अन्यार्थे' इति ह्रस्वः ॥ अभिगतो मुखम् अभिमुखः । उद्गतो वेलाम् उद्वेलः । प्रतिगतोऽक्षं प्रत्यक्ष इत्यादि ॥ अवादयः क्रुष्टाद्यर्थे तृतीयया । अवक्रुष्टः कोकिलया अवकोकिलः । 'अन्यार्थे' इति ह्रस्वः । परिणद्धो वीरुधा परिवीरुत् । पर्यादयो ग्लानाद्यर्थे चतुर्थ्या । परिग्लानोऽध्ययनाय पर्यध्ययनः । गुरुकुलवासादिना परिग्लानोऽध्ययनायेत्यर्थः ॥ निरादयः क्रान्ताद्यर्थे पञ्चम्या । निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः । 'अन्यार्थे' इति ह्रस्वः । उत्क्रान्ता कुलात् उत्कुला । निर्गतमङ्गुलिभ्यो निरङ्गुलम् । अस्वपदविग्रहेण नित्यसमासा एते ॥ इति प्रादिसमासाः ॥ ९७ ॥

(त०) निष्कौशाम्बिरिति ॥ कौशाम्ब्या निर्गतः इति विग्रहः ॥ ९७ ॥

(अश्ववडवयोर्द्वन्द्वः पूर्ववल्लिङ्गः) अश्ववडवान् ॥ ९८ ॥

(सु०) अश्ववडयोर्द्वन्द्वः पूर्ववल्लिङ्गः ॥ अत्रे द्विवचनमविवक्षितम् । बहुत्वेऽपि पुँल्लिङ्गस्य दर्शनात् ॥ अश्वश्च वडवा च अश्ववडवौ । निपातनादापो निवृत्तिः । बहुत्वे पुंल्लिङ्गं दर्शयति । अश्ववडवान् । अश्ववडवैः । विभाषा वृक्षेति पक्षे समाहारद्वन्द्वेऽश्ववडवम् । क्रियाऽव्ययविशेषणानां क्लीबत्वमेकवचनं च । क्रियाविशेषणानामव्ययविशेषणानां चैकवचनं क्लीबत्वं च भवति ॥ ९८ ॥

(रात्राह्नाहान्ताः पुंस्येव) अहोरात्रः । पूर्वरात्रः । पूर्वाह्णः । द्व्यहः ।९९।

(सु०) रात्राह्नाहान्ताः पुंस्येव ॥ परवल्लिङ्गतापवादोऽप्ययं परत्वात्समाहारनपुंसकतां बाधते ॥ अप्रत्ययान्तो रात्रिशब्दष्टप्रत्ययान्तोऽहन्शब्दः । एतदन्ता द्वन्द्वद्विगुतत्पुरुषकर्मधारयाः पुंल्लिङ्गे एव भवन्ति । अहश्च रात्रिश्च अह्न इति नस्य सः । अहोरात्रः । अहःपूर्वाद्रात्रिशब्दादः समाहारे इत्यप्रत्ययः । रात्रेः पूर्वभागः पूर्वरात्रः । सर्वैकदेशेत्यप्रत्ययः ॥ अह्नः पूर्वं इति पूर्वाह्णः । राजाहःसखिभ्य इति टप्रत्ययः । नो वेत्युपधालोपः । द्वयोरह्नोः समाहार इति टः । नो वेति टिलोपः । द्व्यहः ॥ ९९ ॥

(संख्यापूर्वं रात्रं क्लीबम्) द्विरात्रम् । त्रिरात्रम् ॥ १०० ॥

(सु०) संख्यापूर्वं रात्रं क्लीबम् ॥ द्वयो रात्र्योः समाहारः तिसृणां रात्रीणां समाहार इति । सर्वैकदेशेत्यप्रत्ययः । द्विरात्रम् । त्रिरात्रम् ॥ १०० ॥

(अपथं तत्पुरुषे क्लीबम्) अपथम् ॥ १०१ ॥

(सु०) अपथं तत्पुरुषे क्लीबम् ॥ नञ्पूर्वः कृतसमासान्तः पथशब्दः क्लीबे स्यात् ॥ न पन्था इत्यपथम् । ऋक्पूरब्धूःपथामित्यप्रत्ययः ॥ तत्पुरुषे इति किम् । अपथो देशः कृतसमासान्तनिर्देशात् नेह । अपन्थाः । अत्र नञ्पूर्वात्पथिशब्दाद्वा समासान्तस्तत्पुरुषे इति विकल्पः ॥ १०१ ॥

(अर्द्धर्चादयः क्लीबपुंसोः) अर्द्धर्चम्-अर्द्धर्चः(क) । ध्वजम्-ध्वजः । तीर्थम्—तीर्थः । एवं शरीरमण्डपयूषदेहदेशांकुशकलश इत्यादि ॥१०२॥

(क) अर्धर्चमिति । ऋचोऽर्धमिति विग्रहे 'अर्धंनपुंसकम्' इति समासः । 'ऋक्पू' इति समासान्तोऽप्रत्ययः ।

(सु०) प्रसङ्गादाह ॥ अर्द्धर्चादयः क्लीबपुंसोः ॥ अर्द्धर्चादयः शब्दाः पुंसि क्लीबे च स्युः ॥ १०२ ॥

(आबन्तोत्तरपदाद् द्विगोर्वेप् (क)) पञ्चखट्वी–पञ्चखट्वम् १०३

(सु०) आबन्तोत्तरपदाद् द्विगोर्वेप् ॥ आबन्तोत्तरपदो द्विगुर्वा स्त्रियाम् । पञ्चानां खट्वानां समाहारः । नपुंसकस्येति ह्रस्वे कृते इदं प्रवर्तते । पञ्चखट्वम् । स्त्रियां तु समाहारेऽत इतीप् । पञ्चखट्वी ॥ १०३ ॥

(त०) पञ्चखट्वमिति ॥ पञ्चानां खट्वानां समाहार इति विग्रहः ॥ १०३ ॥

(अनो नलोपो द्विगोर्वेप्) पञ्चतक्षम्–पञ्चतक्षी ॥ १०४ ॥

(सु०) अनो नलोपो द्विगोर्वेप् ॥ अनो नलोपो द्विगोर्वा स्त्रियाम् ॥ इह वा-शब्दः स्त्रियामित्यनेन सम्बध्यते न तु न लोप इत्यनेन ॥ अन्नन्तस्य द्विगोर्नित्यं नलोपो भवति । अन्नन्तो द्विगुः स्त्रियां च वा । पञ्चानां तक्ष्णां समाहारः पञ्चतक्षम् । स्त्रियां तु समाहारेऽत इति ईप् । पञ्चतक्षी ॥ १०४ ॥

(पुण्यसुदिनाभ्यामह्नः क्लीबता) पुण्याहम् । सुदिनाहम्॥१०५॥

(सु०) पुण्यसुदिनाभ्यामह्नः क्लीबता ॥ आभ्यां परस्याहन्शब्दस्य क्लीबत्वं स्यात् ॥ पुण्यं च तदहश्चेति । राजाहःसखिभ्य इति टः । नो वेति टिलोपः । पुण्याहम् । सुदिनं च तदहश्चेति सुदिनशब्दः प्रशस्तपर्यायः । सुदिनाहम् । रात्राह्नाहन्तः पुंस्येवेत्यस्यापवादोऽयम् ॥ १०५ ॥

(त०) सुदिनाहमिति ॥ "सुदिनशब्दः प्रशस्तपर्यायः । "सुदिनासु निशासु कार्यमेतत्प्रविचिन्वीत विशेषतः" इत्यादिप्रयोगदर्शनात् ॥ १०५ ॥

(संख्याव्ययाभ्यां परस्य पथः क्लीबता) त्रिपथम् । विपथम् ॥ १०६ ॥

(सु०) संख्याव्ययाभ्यां परस्य पथः क्लीबता ॥ आभ्यां परः कृतसमासान्तः पथशब्दः क्लीबमित्यर्थः ॥ त्रयाणां पन्था इति रिक्पूरब्धूरित्यप्रत्ययः । त्रिपथम् ॥ विरूपः पन्था इति विपथम् ॥ ननु "व्यध्वो दुरध्वो विपथः कदध्वा कापथः समाः" इत्यमरे कथं पुंस्त्वम् । उच्यते । प्रमाद एवायमिति बहवः । वस्तुतस्तु 'पथ गतौ' इत्यस्मात्पचाद्यप्रत्यये पथति व्याप्नोतीति व्युत्पादितः पथशब्दः । तथा च त्रिकाण्डशेषः । "वाटः पथश्च मार्गः स्यात्" इति । अनेन समासे पुंस्त्वमुपपन्नम् । कापथ इत्यत्र कादेशस्तु ईषदर्थे बोध्यः । अथ च परवल्लिङ्गापवादत्वात्तत्पुरुषे एवेदं प्रवर्तते नान्यत्र । विपथा नगरी । बहुव्रीहिरयम् । पन्थानमतिक्रान्ता अतिपथा । इहापि न द्विगुप्राप्तापन्नालमिति परपदलिङ्गप्रतिषेधात् इति माधवः ॥ १०६ ॥

(त०) त्रिपथं विपथमिति ॥ "व्यध्वो दुरध्वो विपथः कदध्वा कापथः समाः" इत्यमरे "विपथकापथौ" इति रभसकोशे च पथ गतावित्यस्मात्पचाद्ये बोध्यम् । "वाटः पथश्च मार्गः स्यात्" इति त्रिकाण्डशेषोऽप्यत्रानुकूलः ॥ १०६ ॥

(क) आबन्तेत्यादि । अत्र स्त्रियामिति वक्तव्यम् ।

(सामान्ये नपुंसकम्(क)) मृदु पचति। प्रातः कमनीयम् ॥१०७॥

(सु०) सामान्ये नपुंसकम् ॥ अनियतलिङ्गविषयकमिदम् । तेनादिः पचती-त्यादौ पुंस्त्वमेव ॥ मृदु पचति । क्रियाविशेषणत्वात् द्वितीयान्तमिदम् । धातूपात्तक्रियां प्रति हि फलांशः कर्मीभूतः । फलसामानाधिकरण्ये द्वितीया ॥ १०७ ॥

(त०) मृदु पचतीति ॥ क्रियाविशेषणत्वाद्द्वितीयान्तमिदम्। धातूपात्तभावनां प्रति फलांशः कर्मीभूतः । तथा च फलसामानाधिकरण्ये द्वितीया । सामान्ये नपुंसकमिति-त्वनियतलिङ्गविषयम् । तेन आदिः पचतीत्यादौ प्रातरादिरिति पुंस्त्वमेव ॥ १०७ ॥

(उपज्ञोपक्रमान्तस्तत्पुरुषः क्लीबम्) उपज्ञायमानोपक्रम्यमाण-योः प्राथम्यं चेदाख्यातुमिष्यते। पाणिन्युपज्ञं ग्रन्थः। नन्दोपक्रमं द्रोणः ॥१०८॥

(सु०) उपज्ञोपक्रमान्तस्तत्पुरुषः क्लीबम् ॥ अनन्तत्पुरुषाधिकारोऽत्र ॥ उ-पज्ञान्त उपक्रमान्तश्च तत्पुरुषः क्लीबं स्यात् ॥ उपज्ञायते इत्युपज्ञा । 'षिद्भिदादिभ्योऽङ्' इति कर्मण्यङ् ॥ उपक्रम्यते इत्युपक्रमः । कर्मणि घञ् । मान्तस्य सेटो न वृद्धिरिति वृद्ध्यभा-वः । उपज्ञा च उपक्रमश्च उपज्ञोपक्रमौ, उपज्ञोपक्रमौ अन्ते यस्य स उपज्ञोपक्रमान्तः । "उपज्ञा ज्ञानमाद्यं स्याद् ज्ञात्वाऽऽरम्भ उपक्रमः" इत्यमरः ॥ उपज्ञायमानस्योपक्रम्यमा-णस्य च प्रथमस्य भावः प्राथम्यं चेद्यदि आख्यातुं वक्तुमिष्यते वाञ्छ्यते। पाणिनेरिति कर्तरि षष्ठी। नन्दस्योपक्रम इति नन्दोपक्रमम् ॥ १०८ ॥

(छायान्तश्च पूर्वपदार्थबाहुल्ये) इक्षूणां छाया इक्षुच्छायम्।१०९।

(सु०) छायान्तश्च पूर्वपदार्थबाहुल्ये ॥ छायान्तस्तत्पुरुषो नपुंसकं स्यात् पूर्वं च तत्पदं च पूर्वपदं पूर्वपदस्यार्थः पूर्वपदार्थः बहुलस्य भावो बाहुल्यम् । पूर्वपदार्थस्य बाहुल्यं पूर्वपदार्थबाहुल्यं तस्मिन् ॥ सेनासुराच्छायेत्यस्य विकल्पस्यापवादोऽयम् ॥१०९॥

(त०) इक्षुच्छायमिति ॥ "इक्षुच्छायानिषादिन्यः" इत्यत्र त्वाङ्प्रश्लेषो बोध्यः ॥

(राजपर्यायपूर्वो रक्षःपिशाचादिपूर्वश्च सभान्तः क्लीब-म्) इनसभम्। ईश्वरसभम्। नेह। राजसभा। रक्षःसभम्। पिशाचसभम्(ख)११०

(सु) राजपर्यायपूर्वो रक्षःपिशाचादिपूर्वश्च सभान्तः क्लीबम् ॥ राजपर्या-यपूर्वः सभान्तस्तत्पुरुषो रक्षःपिशाचादिपूर्वः सभान्तस्तत्पुरुषश्च नपुंसकं स्यात् ॥ इनेश्वर-शब्दौ राजपर्यायौ । इनस्य सभा इनसभम् । ईश्वरस्य सभा ईश्वरसभम् ॥ राजपर्यायपूर्वं इति किम् । राजसभा ॥ रक्षसः सभा रक्षःसभम्। पिशाचस्य सभा पिशाचसभम्॥११०॥

(त०) इनसभमिति ॥ 'नृपतिसभामगमन्न चेयमाना' इत्यत्र तु राजविशेषवाची नृपतिशब्दो बोध्यः ॥ ११० ॥

(सङ्घातार्थे सभान्तः) स्त्रीसभम्। स्त्रीसङ्घात इत्यर्थः ॥ १११ ॥

(सु०) सङ्घातार्थे सभान्तः॥ सङ्घातार्था या सभा तदन्तस्तत्पुरुषः क्लीबं स्यात् १११

(क) सामान्य इति । न्यायसिद्धमेतत् । विशेष्यविशेषणासन्निधाने सति स्त्रीत्वपुंस्त्वयोरभिव्यक्तौ 'उभयोरन्तरं यच्च तदभावे नपुंसकम्' इति लक्षणलक्षितनपुंसकत्वस्यैव न्याय्यत्वात् ।

(ख) 'नृपतिसभामगमन्न चेयमाना' इत्यत्र नृपतिरिति राजविशेषनाम ।

(सेनासुराच्छायाशालानिशान्तो वा) ब्राह्मणसेनम् । यवसुरम् । कुड्यच्छायम् । गोशालम् । श्वनिशम् । पक्षे ब्राह्मणसेनेत्यादि ॥११२॥

इति समासप्रक्रिया ॥ १७ ॥

(सु०) **सेनासुराच्छायाशालानिशान्तो वा ॥** एतदन्तस्तत्पुरुषः क्लीबं स्याद्वा ॥ श्वनिशम् । कृष्णचतुर्दशी ॥ अनञ्तत्पुरुष इत्यधिकारान्नेह । दृढसेनो राजा । दृढा सेना यस्येति बहुव्रीहिः ॥ असेना अविद्यमाना सेना इति नञ्पूर्वस्तत्पुरुषः ॥ अथ शेषमाह ॥ **कृत्तद्धितसमासैकशेषयङ्लुगन्तधातुरूपाः पञ्च वृत्तयः ॥** पञ्चानां वृत्तिरिति पूर्वाचार्यसंज्ञा । वृत्तिलक्षणमाह ॥ **परार्थाभिधानं वृत्तिः ॥** परस्य शब्दस्य योऽर्थस्तस्याभिधानं शब्दान्तरेण यत्र सा वृत्तिः । यथा राजपुरुष इत्यत्र राजशब्देन वाक्यावस्थायामनुक्तः पुरुषार्थोऽभिधीयते ॥ विग्रहलक्षणमाह ॥ **वृत्त्यर्थावबोधकं वाक्यं विग्रहः । स द्विधा ।** लौकिकोऽलौकिकश्च । परिनिष्ठितत्वात्साधुर्लौकिकः ॥ प्रयोगानर्होऽसाधुरलौकिकः । यथा । राज्ञः पुरुष इति लौकिकविग्रहः । राजन् अस् पुरुष सु इत्यलौकिकविग्रहः ॥ नित्यसमासलक्षणमाह ॥ **अविग्रहो नित्यसमासः ॥** लौकिकविग्रहरहितो नित्यसमासो ज्ञेयः । लोके यस्य विग्रहो न प्रयुज्यते इति भावः । **अस्वपदविग्रहो वा ।** समस्यमानयावत्पदैरघटितः अस्वपदविग्रहः । समासः षड्विध इति प्रायोवादः । अव्ययीभावतत्पुरुषद्वन्द्वद्विगुबहुव्रीहिकर्मधारयाधिकारबहिर्भूतस्यापि नाम्नश्च कृतेति विधानात् । तद्व्याख्याने तत्पुरुष इत्युक्तिस्तु प्राचामनुरोधेनेति ध्येयम् ॥ पूर्वपदार्थप्रधानोऽव्ययीभावः ॥ उत्तरपदार्थप्रधानस्तत्पुरुषः ॥ उभयपदार्थप्रधानो द्वन्द्वः ॥ संख्यापूर्वान्यपदार्थप्रधाना द्विगुः ॥ अन्यपदार्थप्रधानो बहुव्रीहिः ॥ विशेषणपूर्वः कर्मधारयः उत्तरपदार्थप्रधानः ॥ विशेष्यपूर्वस्तु पूर्वपदार्थप्रधानः ॥ इत्यपि न तु सार्वत्रिकः । सुपप्रति उन्मत्तगङ्गमित्याद्यव्ययीभावे अतिमालादौ तत्पुरुषे दन्तोष्ठमित्यादौ द्वन्द्वे द्वित्रा इत्यादौ बहुव्रीहौ चाऽभावात् ॥ अनेकपदत्वं द्वन्द्वबहुव्रीह्योरेव । किञ्च 'सिपां सिपा तिपा नाम्ना धातुनाऽथ तिपां तिपा । सिबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः ॥ १ ॥' प्रायोऽभिप्रायः । सिबन्तानां सिबन्तेन यथा । राजपुरुषः ॥ सिबन्तानां तिपा समासो वेदे एव भवति नान्यत्र । यथा पर्यभूषत् ॥ सिबन्तानां नाम्ना प्रातिपदिकेन यथा कुम्भकारः । अत्र सिबुत्पत्तेः प्रागेवोपपदसमासः ॥ सिबन्तानां धातुना यथा । क्विपि वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणामित्यादिनिपातनाद्धातुना समासः । कटप्रूः । अजस्रम् ॥ तिपां तिपा समासो यथा । क्रियासातत्ये आख्यातेन समस्यते । अश्नीत पिबतेत्येवं सततं यत्राभिधीयते सा अश्नीतपिबता । पचतभृज्जता । खादतमोदता ॥ तिपां सिपा यथा । एहीडादयोऽन्यार्थे समस्यन्ते । एहि ईड इति यस्मिन् कर्मणि तत् एहीडम् । कृन्त विचक्षण इति यस्यां क्रियायां सा कृन्तविचक्षणा ॥ इवेन नित्यसमासो विभक्त्यलोपश्च । जीमूतस्येव ॥ इति सर्वसमासशेषः । **जात्याख्यायामेकस्मिन्बहुवचनं वा ।** ब्राह्मणाः पूज्याः ब्राह्मणः पूज्यः । एकत्वे द्वित्वे चास्मदो

(क) जात्याख्यायामिति । आकृत्यधिकरणन्यायेन घटादिशब्दानां जातिवाचकात् जातेश्चैक-

बहुवचनं वा ॥ वयं ब्रूमः । अहं ब्रवीमि । आवां ब्रूवो वा ॥ उपमानानि सामान्यवचनैः सह समस्यन्ते । घनश्यामः । इह पूर्वं पदं तत्सदृशे लाक्षणिकमिति सूचयितुं लौकिकविग्रहे इवशब्दः प्रयुज्यते । उपमानस्य पूर्वनिपातनार्थमिदम् ॥ उपमेयं व्याघ्रादिभिः सामान्यप्रयोगे समस्यते । विशेष्यस्य पूर्वनिपातनार्थमिदम् । पुरुषो व्याघ्र इव शूर इत्यर्थः ॥ ११२ ॥ इति सुबोधिन्यां समासप्रक्रिया ॥ १७ ॥

(त०) श्रीविद्यानगरस्थायिलोकेशकरशर्मणा । कृतायामिह टीकायां समासविवृतिर्गता ॥ ११२ ॥ इति तत्त्वदीपिकायां समासप्रक्रिया ॥ १७ ॥

अथ तद्धितप्रक्रिया ॥ १८ ॥

(अपत्येऽण्) नाम्नोऽपत्येऽर्थेऽण् प्रत्ययः (क) ॥ १ ॥

(सु०) अथ तद्धितो निरूप्यते ॥ तेभ्यः स्याद्यन्तपदेभ्यो हितस्तद्धितः । विभक्त्यन्तनाम्न एव तद्धितोत्पत्तिर्भवतीत्यर्थः । अपत्येऽण् । षष्ठ्यन्तान्नाम्नोऽण् प्रत्ययो भवति अन्वये सत्यपत्यार्थे । अन्वयस्तु एकार्थीभाव एव वृत्तौ । वाच्ये तु व्यपेक्षालक्षणः । "आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी । आहुर्दुहितरं सर्वेऽपत्यं तोकं तयोः समे" इत्यमरः ॥ १ ॥

(त०) अपत्येऽणिति ॥ अत्र प्रकरणादिनाऽपत्यान्वयस्यासंभवात्परिशेषाद्वा नामलाभः । नाम्नोऽण इति ॥ अतः षष्ठ्यन्तस्यैवापत्यवद्भावसंबन्धे षष्ठ्या एवोचितत्वात् ॥ १ ॥

(आदिस्वरस्य ञ्णिति च वृद्धिः) स्वराणां मध्ये य आदिस्वरस्तस्य वृद्धिर्ञिति णिति च ताद्धिते (ख) ॥ २ ॥

(सु०) आदिस्वरस्य ञ्णिति च वृद्धिः ॥ स्वरेषु आदिः आदिस्वरः । निर्द्धारणार्थसप्तम्या समासः । क्वचिदसमाद्यन्तस्य परत्वमिति परनिपातः । निर्द्धारणषष्ठ्या तु न समासः निर्द्धारणे या षष्ठीति निषेधात् । यद्वा 'वोऽव्ययस्वरे' इत्यतः 'स्वरे' इत्यनुवर्त्य तच्च जातावेकवचनं निर्द्धारणसप्तम्यन्तम् । तथा च स्वरेषु य आदिस्वरस्तस्य वृद्धिरिति व्याख्याने आदिश्चासौ स्वरश्चेति कर्मधारयः । ञ् च ण् ञ्णौ तौ इतौ यस्य स ञ्णित् तस्मिन् ञ्णिति । प्रकरणात्तद्धिते इति लभ्यते । इच्छब्दस्तु प्रत्येकं संबध्यते द्वन्द्वान्ते श्रूयमाणत्वात् ॥ २ ॥

स्यादेकवचनमेव स्यादित्यारम्भः । जातिशब्दे एकत्वे बहुवचनं वा स्यात्, इत्यक्षरार्थः ।

इति चक्रधराभिधायां टिप्पण्यां समासप्रकरणम् ॥ १७ ॥

(क) अत्र वासुदेवः—समासश्चान्वये नाम्नामित्यत्र चशब्दात् समाससमाप्तावसरसङ्गत्या तद्घटितप्रत्ययान्निरूपयितुमुपक्रमत इति । अपत्येऽण् इति । नाम्नः षष्ठ्यन्तादण् वा स्यान्वये सति । इति इति लघुभाष्यम् । अपत्येन योगश्च नामस्यैव सम्भवति न धात्वाख्यातांशयोः । क्रियार्थत्वात् । नापि सिबन्तस्य, विभक्त्यर्थस्य प्राधान्यात् । प्रथमान्तस्य तु स्वार्थनिष्ठत्वादतः परिशेषान्नाम्नि लब्धे नाम्न इत्यत षष्ठ्यन्तस्यानुवृत्तिः । षष्ठी विवक्षणार्था ।

(ख) आदिस्वरस्येत्यादि । आदित्वं च स्वरापेक्षया । इत्यभिप्रेत्याह–स्वराणां मध्ये इति ।

(त०) आदिस्वरस्य ञ्णिति च वृद्धिरिति ॥ अत्र स्वराणाम् आदिः आदिस्वरः । स्वरेषु वा । निर्द्धारणार्थया षष्ठ्या सप्तम्या वा समासः । क्वचिद्माद्यन्तस्य परस्वस्येदमपि ज्ञापकम् । निर्द्धारणं च सजातीयापेक्षम् । तेन स्वर एव गृह्यते न तु हस इति लघुभाष्ये । अत्रेदमवधेयम् । निर्द्धारणषष्ठ्या समास इति तावत् व्याहतम् । तथाहि । क्वचित्षष्ठी न समस्यत इत्युक्तत्वात् । क्वचित्पदेन ग्रन्थान्तरोक्तनिर्द्धारणादिकाभात् । न निर्द्धारण इति पाणिनिसूत्रमेवात्रार्थेऽनुकूलमिति । तस्मात्सप्तम्यन्तेन समासः । कर्मधारयो वा । कर्मधारये च 'वोऽव्यस्वरे' इत्यतः स्वरे इत्यनुवर्त्य जातावेकवचनं बोध्यम् । तथा च स्वरेषु य आदिस्वरस्तस्य वृद्धिरिति व्याख्येयम् । ञ् च ण् च ञ्णौ ञ्णौ इतौ यस्य स ञ्णित् तस्मिन् प्रकरणात्तद्धितस्यैव विशेषणम् । अत्र णितीति वा ञितीति वा एकमेव कर्तव्यं सर्वत्र णकार एव ञकार एव वाऽनुबन्धत्वेन कार्यं इत्युक्तिस्तु अनेकस्थलेऽनुबन्धव्यत्यासकरणक्लेशादुपेक्षिता ॥ नन्वादेर्ञ्णिति च वृद्धिरित्येवास्तु किं स्वरग्रहणेनेति चेत्सत्यम् । हसस्य वृद्धिग्रहणेन वारणसंभवेऽपि यत्रादावेकस्वरः स्यात्तत्रैव वृद्धिर्न त्वादिहसात्परस्य स्वरस्येति शङ्कानिरासाय स्वरग्रहणस्यावश्यकत्वात् । आदित्वं तु यस्मात्पूर्वं नास्ति तत्त्वम् । एवमन्तत्वमपि यस्मात् परो नास्ति तत्त्वमेव । इत्थं च व्यपदेशिवद्भावो नापेक्ष्यः । यदि तु सत्यन्यस्मिन्नित्यपि विशेषणमुपादेयम् । यदा व्यपदेशिवद्भावेनैकस्वरस्य सिद्धिः ॥ २ ॥

(वोऽव्यस्वरे) उवर्णस्यौतश्चाव् तद्धितस्य यकारे स्वरे च (क) ॥ उपगोरपत्यमौपगवः । वैदुषः । वासिष्ठः । गौतमः । भार्गवः । आङ्गिरसः । वैदः । और्वः । वार्त्रघ्नः ॥ ३ ॥

(सु०) वाऽव्यस्वरे ॥ उश्च ओश्चानयोः समाहारो वो । एकत्वे द्विगुद्वन्द्वाविति नपुंसकत्वेऽपि न ह्रस्वः । अनुकार्यस्वरूपस्पष्टप्रतिपत्त्यर्थत्वात् ॥ यश्च स्वरश्च तयोः समाहारः यस्वरं तस्मिन् यस्वरे तद्धितसंबन्धिनि ॥ अत्रौकारस्य स्वरे अवि सिद्धे यकारार्थं तद्ग्रहणम् । वस्तुतस्तु क्वचिद्यकारेऽपि स्वरकार्यातिदेशादेव सिद्धिरित्योग्रहणं व्यर्थमिति ध्येयम् ॥ गामुपगत इत्युपगुः । नाम्नश्चेति समासः । गोरिति ह्रस्वः । यादवविशेषस्य उद्धवस्य पूर्वजः कश्चित् । "उद्धवं प्रकृत्यौपगविर्जगाम ॥" इति भागवतात् ॥ उपगोरपत्यमिति अणः प्रयोगे उक्तार्थानामप्रयोग इति न्यायादपत्यशब्दस्याप्रयोगः । वा टक्ङ्योरित्यतो वेत्यनुवर्तते । तेन पक्षे षष्ठी समासोऽपि । उपग्वपत्यमिति । समासस्य वैकल्पिकत्वाद्वाक्यमपि । औपगवः । स्त्रियां तु जातेरितीप् । औपगवी ॥ अन्वये किम् । कम्बलमुपगोरपत्यं चैत्रस्य ॥ विदुषोऽपत्यं वैदुषः ॥ वसिष्ठस्य ऋषेरपत्यं वासिष्ठः ॥ गौतमस्य ऋषेरपत्यं गौतमः ॥ भृगोर्ऋषेरपत्यं भार्गवः ॥ आङ्गिरस ऋषेरपत्यम् आङ्गिरसः ॥ विदस्यापत्यं वैदः ॥ उर्वस्यापत्यम् और्वः ॥ ३ ॥

(क) वोऽव्यस्वर इति । एतत्तद्धितप्रकरणस्थत्वात्तद्धिते परेति गोयानमित्यादौ अनतिप्रसङ्ग इति वासुदेवः । यद्यपि क्वचित् स्वरवद्यकार इति स्वरत्वातिदेशाद्यकारेऽपि अव् सम्भवति तथापि सूत्रस्य वक्ष्यमाणानुपजीवित्वादोकारोक्तिर्युक्तैव ।

(त०) वोऽव्यस्वर इति ॥ वो अव् य स्वरे इति छेदः । उश्च ओश्च एतयोः समाहारः वो । एकत्वे द्विगुद्वन्द्वावित्यस्यानित्यत्वान्नपुंसकाभावः । नपुंसकत्वं वा ह्रस्वस्यैवानित्यत्वम् । यश्च स्वरश्च यस्वरं तस्मिन् । अत्र ओकारस्य स्वरे अव्विधानस्य सिद्धत्वेऽपि यकारार्थमोग्रहणस्यावश्यकत्वात् तद्ग्रहणम् । वस्तुतस्तु क्वचिद्यकारेऽपि स्वरकार्यातिदेशादवसिद्धिरित्योकारग्रहणं न कर्तव्यम् । यस्वरयोश्च प्रकरणात्तद्धितयोरेव ग्रहणम् ॥ उपगोरपत्यमिति ॥ गामुपगत उपगुः । नाम्नश्चेति समासो गोरिति ह्रस्वः ॥ उपगुर्यादवविशेषः उद्धवपूर्वजेषु कश्चन । अणः प्रयोगे उक्तार्थानामप्रयोग इति न्यायादपत्यशब्दस्याप्रयोगः ॥ मृगापत्ये मृगत्वसत्त्वान्न तद्वाचिभ्यस्तद्धितः । उपगुत्वं त्वौपगवे नास्तीति भवत्यपत्यप्रत्ययः ॥ ३ ॥

(ऋ उरणि) ॥ संख्यासम्भद्रपूर्वस्य मातृशब्दस्य ऋत उर्भवत्यणि परे ॥ षाण्मातुरः । सांमातुरः । भाद्रमातुरः ॥ ४ ॥

(सु०) ऋ उरणि ॥ सामान्यशब्दस्यापि लक्ष्यानुसारात् विशेषपरत्वं बोध्यम् । तेन संख्यादिपूर्वस्य मातृशब्दस्य लाभः । षण्णां मातृणामपत्यमिति तद्धितार्थे द्विगुसमासोऽयम् । न तु षण्मातृणामपत्यमिति विग्रहः । दिक्संख्ये संज्ञायामिति नियमेनासंज्ञायां समासाभावात् । तद्धितान्तस्य संज्ञात्वेऽपि समासस्यासंज्ञात्वात् । आदिस्वरवृद्धिः । षो ड इति डत्वम् । कजिजवस्यापि ञम इति डस्य णः । उर् षाण्मातुरः ॥ द्वयोर्मात्रोरपत्यं द्वैमातुरः । द्वैमात्रेयश्च विनायकः ॥ सम्मातुरपत्यं साम्मातुरः ॥ भद्रमातुरपत्यं भाद्रमातुरः ॥ ४ ॥

(त०) ऋ उरणीति ॥ मातृशब्दस्येति जननीवाचकस्यैव ग्रहणं व्याख्यानात् ॥ षण्णां मातृणामपत्यमिति ॥ संख्यापूर्वो द्विगुरिति तद्धितार्थे द्विगुः । ञमे ञमा वेत्यत्र व्यस्थितत्वाश्रयणात्कजिजवस्यापि डकारस्य ञमानां मध्ये सवर्णत्वेन णकारः ॥ ४ ॥

(शिवादेश्चाण्) शैवः । गाङ्गः ॥ ५ ॥

(सु०) शिवादेश्चाण् ॥ शिवादेरण् स्यादपत्येऽर्थे ॥ इञपवादोऽयम् ॥ शिवस्यापत्यं शैवः ॥ लक्ष्यस्यापत्यं लाक्षः ॥ गङ्गाया अपत्यं गाङ्गः ॥ पक्षे गाङ्गेयः । इयण् ॥ शिव ककुत्स्थ वेतण्ड जरत् काश विपाश् तक्षन् विश्रवण रवण ऋष्टिषेण विरूपाक्ष इति शिवादिः ॥ ५ ॥

(त०) शिवादेश्चेति ॥ अत इति योगविभागात् शिवादेरकारान्तादप्यण् ॥ ५ ॥

(अत इञनृषेः) ॥ अकारान्तान्नाम्नोऽनृषिशब्दादपत्येऽर्थे इञ् ॥ दैवदत्तिः । श्रैधरिः । दाशरथिः । पौरन्दरिः ॥ ६ ॥

(सु०) अत इञनृषेः ॥ ऋषिवाचकाददन्तात्तु अणेव भवति । अनृषिवाचकमदन्तं यत्प्रातिपदिकं तत्प्रकृतिकात् षष्ठ्यन्तादिञ् स्यादपत्येऽर्थे(क) ॥ देवदत्तस्यापत्यं दैवदत्तिः ॥ श्रीधरस्यापत्यं श्रैधरिः ॥ दशरथस्यापत्यं दाशरथिः ॥ पुरन्दरस्यापत्यं पौरन्दरिः ॥ ६ ॥

(क) अत इत्यादौ अत इति योगविभागादिति शेषः । ननु कथं सावर्णिरित्यादिसिद्धिः । उच्यते । बाह्वादेश्चेत्यत्र इञ् इति योगविभागादनकारान्तादपीञ्सिद्ध्यतीति ।

(त०) अत इञनृषेरिति ॥ अत्रात इति योगविभागः । तेनाकारान्तादनृषिवाचकादण्यण् । भैमसेन इत्यादि ॥ ६ ॥

(बाह्वादेश्च) बाहोरपत्यं बाहविः । औडुलोमिः । गार्गिः । बैदिः । नाडिः । कौञ्जिः ॥ ७ ॥

(सु०) बाह्वादेश्च ॥ बाह्वादिभ्य इञ् स्यादपत्येऽर्थे ॥ बाह्वादिराकृतिगणोऽयम् । बाहोरपत्यं बाहविः ॥ उडूनीव लोमानि यस्य स उडुलोमा । "तारकाऽप्युडु वाऽस्त्रियाम" इत्यमर ॥ उडुलोम्नोऽपत्यं नो वेति टिलोपः औडुलोमिः । बहुत्वे त्वस्मादणितो वेत्यणित्वान्न वृद्धिः । उडुलोमाः ॥ गर्गस्यापत्यं गार्गिः ॥ बिदस्यापत्यं बैदिः ॥ नडस्यापत्यं नाडिः ॥ कुञ्जस्यापत्यं कौञ्जिः ॥ बाह्वादिर्यथा । विद् उर्व कश्यप कुशिक भरद्वाज उपमन्यु विश्वानर परश्री परशु इत्यादिः ॥ ७ ॥

(त०) बाह्वादेश्चेति ॥ इञ् इति द्वितीययोगविभागादनकारान्तादपीञ् सिध्यतीति भावः तेन सावर्णिरित्यादिसिद्धिः ॥ ७ ॥

(सुधातृव्यासवरुडनिषादचण्डालबिम्बानामकङ् च) सुधातुरपत्यं सौधातकिः । वैयासकिः । वारुडकिः । नैषादकिः । चाण्डालकिः । बैम्बकिः ॥ ८ ॥

(सु०) सुधातृव्यासवरुडनिषादचण्डालबिम्बानामकङ् च ॥ एषामकङादेशः स्यात् इञ्प्रत्ययश्चापत्येऽर्थे ॥ ङित्वादन्त्यस्य स्थानेऽकङ् ॥ सुधातुरपत्यं सौधातकिः ॥ वेदान् व्यसतीति वेदव्यासः । कार्येऽणित्यण् । भीमो भीमसेन इति वदेकदेशस्य ग्रहणम् । व्यासस्यापत्यमिति न सन्धिय्वोर्युट् चेति वक्ष्यमाणेनेडागमः । ततो वृद्धिर्वैयासकिः ॥ वरुडस्यापत्यं वारुडकिः । वरुडादयो जातिविशेषाः ॥ निषादस्यापत्यं नैषादकिः ॥ चण्डालस्यापत्यं चाण्डालकिः ॥ बिम्बस्यापत्यं बैम्बकिः ॥ ८ ॥

(त०) अकङ् चेति ॥ ङित्वादन्तस्यायमादेशः ॥ सौधातकिरिति ॥ सुधातुरपत्यमिति विग्रहः ॥ ८ ॥

ण्यायनणेयण्णीया गर्गनडात्रिस्त्रीपितृष्वस्रादेः(क) ॥

गर्गादेर्ण्यो नडादेरायनण् अत्र्यादेः स्त्रीप्रत्ययान्ताच्च एयण् पितृष्वस्रादेर्णीयोऽपत्येऽर्थे ॥ गार्ग्यः । वात्स्यः । कात्यः । वातण्ड्यः । आवट्यः । माण्डूक्यः । पौतिमाष्यः ॥ नाडायनः । चारायणः । गार्ग्यायणः । वात्स्यायनः । आमुष्यायणः ॥ आत्रेयः । कापेयः । नैधेयः ॥ गाङ्गेयः । माहेयः । गौधेयः । नाटेयः ॥ ९ ॥

(क) अत्रादिशब्दः प्रकारवाची न व्यवस्थार्थः । एतदादिगणस्यात्रादर्शनात् । स्त्रीशब्देन सन सम्बन्ध्यते ङीप्रत्ययस्येष्टत्वात् । स्वरूपग्रहणं च नेष्टम् । अव्यादिषु तस्य सुग्रहात् । नापि ङीविशेषग्रहः । तेषामप्यव्यादिषु सुवचत्वात् । यदा गर्गादिर्द्वन्द्वगर्भो द्वन्द्वस्तदा चैयणाविति द्विवचननिर्देशो नकार्य्यः । एवं यथाक्रमेण गर्गादिभ्योऽपत्येऽण् । गर्गादिशब्दास्तदपत्ये लाक्षणिकाः ।

(ब०) ण्यायनणेयण्णीया गर्गनडात्रिस्त्रीपितृष्वस्रादेः ॥ ण्यश्च आयनण् च एयण् च णीयश्च ते ण्यायनणेयण्णीयाः । गर्गश्च नडश्च अत्रिस्त्रियौ च पितृष्वसा च एषां समाहारो गर्गनडात्रिस्त्रीपितृष्वसृ । गर्गनडात्रिस्त्रीपितृष्वसृ आदिर्यस्य स गर्गनडात्रिस्त्रीपितृष्वस्रादिस्तस्मात् । द्वन्द्वान्ते श्रूयमाण आदिशब्दः प्रत्येकं सम्बध्यते । स्त्रीशब्देन स्त्रीप्रत्ययस्य ग्रहणात्स्त्र्यादिशब्दयोगः । इह स्वरूपग्रहणं नेष्टम् । अत्र्यादिषु तस्य तु सुग्रहत्वात् ॥ यथाक्रमेण गर्गादिभ्यो ण्योऽपत्येऽर्थे ॥ नडादेरायनण् अपत्येऽर्थे ॥ अत्र्यादेः स्त्रीप्रत्ययान्ताच्च एयण् अपत्येऽर्थे ॥ पितृष्वस्रादेर्णीयोऽपत्येऽर्थे ॥ इह आयनणेयणोरणन्तत्वादीप् । अन्तणकारपाठसामर्थ्यादर्थवद्ग्रहणपरिभाषाया अनित्यत्वात् । अन्यथा ण्यणीयवत् णायनणेयावित्येव ब्रूयादिति ॥ गर्गादिर्यथा ॥ गर्ग वत्स व्याघ्रपाद् पुलस्ति बभ्रु मण्डु वतण्ड शकल कण्व अगस्त्य (अगस्ति) कुण्डिनी याज्ञवल्क्य पराशर जमदग्नि इत्यादि ॥ नडादिर्यथा । कुञ्ज अश्व शङ्ख शकट इत्यादि ॥ अत्र्यादिर्यथा । अत्रि शुभ्र मृकण्डु अश्माद् नातृ विधवा गोधा प्रवाहण पाण्डु इत्यादि ॥ गर्गादिशब्दास्तदपत्ये लाक्षणिकाः । साक्षादपत्ये इञेव । अनन्तरापत्ये गार्गिरित्युक्तत्वात् । गर्गस्यापत्यमितीञोऽर्थः । गार्गेरपत्यं गार्ग्यः । वत्सस्यापत्यं वात्स्यः । कतस्यापत्यं कात्यः । वतण्डस्यापत्यं वातण्ड्यः । अवटस्यापत्यमावट्यः । मण्डूकस्यापत्यं मण्डूक्यः । पूतिमाषस्यापत्यं पौतिमाष्यः । स्त्रियां तु नडादित्वादीप् । हलात्तद्धितयस्येपीति यलोपः । गार्गी । वात्सी । नडादित्वात् । स्त्रियामायनणि गार्ग्यायणी । कात्यायनी । वातण्डी । वातण्ड्यायनी । माण्डूक्यायनी ॥ अजादित्वादाप्प्रत्यये आवट्या । पौतिमाष्या । नडस्यापत्यमितीञोऽर्थः । नाडेरपत्यं नाडायनः । चरस्यापत्यं चारायणः । ण्यान्तानामिञन्तानां च नडादित्वं बोध्यम् । गार्ग्यस्यापत्यं गार्ग्यायणः । वात्स्यस्याऽपत्यं वात्स्यायनः । दाक्षेरपत्यं दाक्षायणः । अमुष्यापत्यमामुष्यायणः । षठ्या अलुगत्र । अत्रेरपत्यमात्रेयः । कपेरपत्यं कापेयः ॥ ९ ॥

(त०) ण्यायनणेयण्णीया इति ॥ ण्यश्च आयनण् च एयण् च णीयश्च ते । गर्गश्च नडश्च अत्रिश्च स्त्री च पितृष्वसा च एतेषां समाहारस्तदादिर्यस्य स तथा तस्मात् । द्वन्द्वात्पर आदिशब्दः प्रत्येकमभिसम्बध्यते । स्त्रीतिप्रत्ययग्रहणात्स्त्र्यादिशब्दयोगः । अत्र नव्याः आदिशब्दोऽत्र प्रकारवाची न तु व्यवस्थार्थः । एतदादिगणस्यात्रादर्शनादित्याहुः । तन्मते गर्गादेर्गणात् ण्य इत्यादिर्वासुदेवोक्तिः प्रत्युक्ता । गर्गादिशब्दाश्च तदपत्ये लाक्षणिकाः तेन गर्गस्यापत्यं गर्गिः । गार्ग्य इत्यत्र गार्गेरपत्यमित्यर्थो बोध्यः । साक्षादपत्ये तु गार्गिरित्येवेति ॥ ९ ॥

(कल्याण्यादेरिनङ् च) काल्याणिनेयः । कौलटिनेयः ॥१०॥

(सु०) कल्याण्यादेरिनङ् च ॥ एषामिनङादेशः ॥ स्त्रीप्रत्ययान्तत्वादेयण्प्रत्ययः कल्याणी सुभगा दुर्भगा बन्धकी परस्त्री कुलटा इत्यादि ॥ कल्याण्या अपत्यं ङित्वादन्त्यस्थाने इनङ् । आदिस्वरवृद्धिः । यस्येतोलोपः । काल्याणिनेयः ॥ कुलान्यटति भिक्षार्थं हलादेरीषादाविति टेर्लोपः । सा कुलटा । सती भिक्षुक्यत्रेनङ्विधौ गृह्यते । या तु व्यभिचारार्थे कुलान्यटति तस्या एरण्प्रत्यये कौलटेरः ॥ एयणि तु कौलटेयः । सतीपक्षे

तु इनङ् वा भवति कौलटिनेयः कौलटेयः ॥ "अथ बान्धकिनेयः स्याद्बन्धुलश्चासतीसुतः । "कौलटेरः कौलटेयो भिक्षुकी तु सती यदि । तदा कौलटिनेयोऽस्याः कौलटेयोऽपि चात्मजः" इत्यमरः ॥ सुभगाया अपत्यमिति क्वचिद्वृद्धयोरिति वक्ष्यमाणेनोभयत्र वृद्धिः । इनङ् । सौभागिनेयः ॥ १० ॥

(त०) इनङ् चेति ङित्वादन्त्यादेशः ॥ काल्याणिनेय इति ॥ कल्याण्या अपत्यमिति विग्रहः ॥ १० ॥

(गोधादेरारणेरणौ) गौधारः । नाटारः । पाण्डारः । गौधेरः । नाटेरः । पाण्डेरः । पैतृष्वस्रीयः । मातृष्वस्रीयः ॥ ११ ॥

(सु०) **गोधादेरारणेरणौ** ॥ गोधादेरारणेरणौ प्रत्ययौ स्तः अपत्येऽर्थे ॥ गोधाया अपत्यं गौधारः ॥ नटया अपत्यं नाटारः यस्येति लोपः ॥ पण्डो नपुंसकस्तस्यापत्यं पाण्डारः । एरणि तु गौधेरः नाटेरः पाण्डेरः । पितृष्वस्रादेर्णीयः । पितृष्वसेति । मातृपितृभ्यां स्वसुरिति षत्वम् । पितृष्वसुरपत्यं पैतृष्वस्रीयः । मातृष्वसुरपत्यं मातृष्वस्रीः॥११॥

(त०) **गौधार** इति ॥ गोधाया अपत्यमिति विग्रहः ॥ **पाण्डार** इति ॥ पण्डस्यापत्यमिति विग्रहः ॥ ११ ॥

(पितृष्वस्रादेरेयणि टिलोपः) पैतृष्वसेयः । मातृष्वसेयः ॥१२॥

(सु०) **पितृष्वस्रादेरेयणि टिलोपः** ॥ पितृष्वस्रादेष्टेर्लोपः स्यादेयणि ॥ अस्त्र्यादित्वादेयण् । पैतृष्वसेयः ॥ १२ ॥

(त०) **पितृष्वसेय** इति ॥ पितृष्वसुरपत्यमिति विग्रहः । पितृष्वस्रादेरित्यत्र कृतषत्वनिर्देशात्समासे क्वचित्पूर्वपदादुत्तरपदस्थस्य सस्य षः । तेन ज्योतिःष्टोम इत्यादौ षत्वं च ॥ १२ ॥

(पाण्डोर्ड्यण्) पाण्ड्यः ॥ १३ ॥

(सु०) **पाण्डोड्र्यण्** ॥ पाण्डशब्दात् ड्यण् स्यादपत्येऽर्थे ॥ णित्करणं तु पाण्ड्या भार्या इत्यत्र वृद्धिहेतोस्तद्धितस्यारक्तविकारार्थस्येति पुंवद्भावप्रतिषेधार्थम् । पाण्डोरपत्यं पाण्ड्यः ॥ १३ ॥

(चटकादेरैरण्) चाटकस्यापत्यं चाटकैरः ॥ १४ ॥

(सु०) **चटकादेरैरण्** ॥ चटकशब्दादेरैरण् स्यादपत्येऽर्थे ॥ प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति परिभाषया स्त्रिया अपि । चटकस्य चटकाया वाऽपत्यं चाटकैरः॥१४॥

(त०) **चाटकैर** इति ॥ चटकस्य चटकाया वाऽपत्यमिति विग्रहः ॥ १४ ॥

(स्त्र्यपत्ये लुक्) चटका ॥ १५ ॥

(सु०) **स्त्र्यपत्ये लुक्** । चटकादैरणो लुक् स्यात् स्त्र्यपत्ये ॥ चटका । अजादित्वाद्दाप् ॥ १५ ॥

(त०) **चटकेति** ॥ चटकस्य चटकाया वाऽपत्यं स्त्रीति विग्रहः ॥ १५ ॥

(लुग्बहुत्वे क्वचित् (क)) प्रत्ययस्य ॥ गर्गाः । वसिष्ठाः । भृग-

---

(क) लुग्बहुत्व इति । लुगिति योगो विभज्यते । बहुत्वे क्वचिल्लुगिति वक्तव्ये पूर्वं विधेयनि-

वः । आङ्गिरसः । वत्साः । कुत्साः । गौतमाः । अत्रयः । बिदाः । अङ्गाः । वङ्गाः । कलिङ्गाः । विदेहाः ॥ १६ ॥

(सु०) लुग्बहुत्वे क्वचित् ॥ क्वचिदपत्यप्रत्ययस्य लुक् स्यात् तत्कृते बहुत्वे ॥ ण्यस्य लुक् । गर्गाः । वत्साः ॥ तत्कृते इति किम् । प्रियो गार्ग्यौ येषां ते प्रियगार्ग्याः । स्त्रियां तु न । । गार्ग्यः स्त्रियः ॥ अणो लुक् वसिष्ठाः । भृगवः । अङ्गिरसः । कुत्साः । गौतमाः । बिदाः । उर्वाः ॥ एयणो लुक् । अत्रयः ॥ जनपदक्षत्रियवाचिनोऽपत्यप्रत्ययस्य लुक् स्यात् । बहुत्वे अणो लुक् अङ्गाः । वङ्गाः । कलिङ्गाः । विदेहाः ॥ तद्राजन्यर्थे-ष्वपत्यप्रत्यया भवन्ति । इक्ष्वाकूणां राजेति निपातनाट्टिलोपः । ऐक्ष्वाकः ॥ पञ्चालानां राजा पाञ्चालः ॥ बहुत्वे लुक् । इक्ष्वाकवः । पञ्चाला इत्यादि ॥ एवमङ्गानां राजा आङ्ग इत्याद्यपि बोध्यम् ॥ १६ ॥

(त०) लुग्बहुत्वे क्वचिदिति ॥ क्वचित्ग्रहणाद्ग्रन्थान्तरोक्तलक्ष्यानुसारेण लुग्भवतीति बोध्यम् । ग्रन्थगौरवभयान्न तत्सर्वमुदाहृतम् ॥ १६ ॥

(स्त्रियामवन्तिकुन्तिकुरुशूरसेनादिभ्योऽबहुत्वेऽपि)

अवन्ती । कुन्ती । कुरूः । शूरसेनी ॥ १७ ॥

(सु०) स्त्रियामवन्तिकुन्तिकुरुशूरसेनादिभ्योऽबहुत्वेऽपि ॥ एभ्योऽपत्यार्थप्रत्ययस्य लुक् स्यात् स्त्रीप्रत्यये ॥ अवन्तेरपत्यं स्त्री अवन्ती । कुन्तेरपत्यं कौन्तेयः । स्त्री कुन्ती ॥ इतो मनुष्यजातेरितीप् । करोरपत्यं कौरव्यः । स्त्री कुरूः । उत ऊरित्यूप्रत्ययः ॥ शूरसेनस्यापत्यं शौरसेनः । स्त्री शूरसेनी ॥ अवन्तीत्यादि किम् । मद्रस्यापत्यं माद्रः । स्त्री माद्री । जातित्वादीप् ॥ १७ ॥

(त०) अवन्तीति ॥ अवन्तेरपत्यमिति विग्रहः । पुमांस्त्वावन्त्यः ॥ कुन्तीति ॥ कुन्तेरपत्यमिति विग्रहः ॥ कुरूरिति ॥ कुरोरपत्यं स्त्री कुरूः । उत ऊरित्यूः । पुमांस्तु कौरव्यः । शूरसेनस्यापत्यं शूरसेनी । पुमान् शौरसेनः ॥ १७ ॥

देवतेदमर्थे ॥ देवतार्थे इदमर्थे चोक्ता वक्ष्यमाणाश्च प्रत्ययाः(क) ॥ इन्द्रो देवताऽस्य ऐन्द्रम् । सौम्यम् । आग्नेयम् । गृहमेधीयम् । वास्तोष्पतीयम् । अग्नीषोमीयम् । मरुत्वतीयम् ॥ १८ ॥

(सु०) देवतेदमर्थे । देवता च इदं च अनयोः समाहारो देवतेदं देवतेदं चासौ

देशसामर्थ्यात् अपत्यबहुत्वे इत्युत्तरसूत्रारम्भात् ।

(क) अत्र लघुभाष्यम्—देवतेत्यादि । त्यज्यमानद्रव्ये उद्देश्यविशेषो देवता । मन्त्रस्तुत्या च । देवता च इदं चानयोः समाहारो देवतेदम् । स चासावर्थश्च तस्मिन् अणादयः प्रत्यया भवन्ति । द्वन्द्वान्ते श्रूयमाणत्वात्प्रत्येकमर्थशब्दः सम्बध्यते । तेन देवतार्थे इदमर्थे चेति फलितम् । देवतया हविश्च मन्त्रश्चाक्षिप्यते । प्रत्ययस्तु देवतासकाशात् आक्षेपलभ्ये एव देवताया हविषश्च प्रत्ययार्थत्वं देवतायाः प्रकृत्यर्थेन सहाभेदान्वयो हविषश्च स्वस्वेन ततश्च बहुव्रीहिरस्य च तुल्यविषयत्वात्प्रथमान्तादेवायं षष्ठ्यर्थे प्रत्ययः । कृत्या च सम्बन्धस्यान्तर्भावात्षष्ठ्यभावोऽन्योक्ते प्रथमेति तद्धितो नोक्तसम्बन्धे प्रथमा । इन्द्रो देवता अस्येति ऐन्द्रं दधि । विशेषणसमर्पणार्थं दध्यादिप्रयोगः । इत्यादि ।

अर्थश्च देवतेदमर्थस्तस्मिन् देवतेदमर्थे । त्यज्यमानद्रव्ये उद्देश्यविशेषो देवता । द्वन्द्वान्ते श्रूयमाणत्वात्प्रत्येकमर्थशब्दः सम्बध्यते । देवतार्थे इदमर्थे च उक्ता वक्ष्यमाणश्च प्रत्ययाः स्युः । अण् इञ् ण्यः आयनण् एयण् णीय आरण् एरण् इयण् ऐरण् एते उक्तप्रत्ययाः । इन्द्रो देवता अस्येति ऐन्द्रं हविः ॥ अत्र प्रथमान्तात्प्रत्ययो देवताऽस्येति षष्ठ्यर्थे । अन्योक्ते प्रथमेति तद्धितेनोक्ते सम्बन्धे प्रथमा । स्त्रियां तु नूण ईप् । । ऐन्द्री दिक् । सोमो देवताऽस्येति सौम्यं ण्यः । नदादित्वादीप् । सौमी ऋक् । हलात्तद्धितयस्येपीति यलोपः ॥ अग्निर्देवताऽस्येति आग्नेयम् । एयण् । अणन्तत्वादीप् । आग्नेयी ॥ गृहमेधशब्दोऽदन्तः । गृहमेधो देवताऽस्येति गृहमेधीयम् । गृहमेध्यम् ॥ वास्तोष्पतिर्देवताऽस्येति वास्तोष्पतीयम् । वास्तोष्पत्यम् । "वास्तोष्पतिः सुरपतिः" इत्यमरः ॥ वास्तोः पतिः वास्तोष्पतिः। "वेश्मभूर्वास्तुरस्त्रियाम्" इत्यमरः ॥ अग्नीषोमौ देवते अस्येति अग्नीषोमीयम् । अग्नीषोम्यम् ॥ मरुत्वान् देवताऽस्येति मरुत्वतीयम् । मरुत्वत्यम् । "इन्द्रो मरुत्वान्मघवा" इत्यमरः ॥ १८ ॥

(त०) देवतेदमर्थे इति ॥ देवता च इदं चानयोः समाहारः देवतेदम् । स चासावर्थश्च देवतेमर्थस्तयस्मिन् । द्वन्द्वान्ते श्रूयमाणत्वादर्थशब्दस्य प्रत्येकं योग इत्याशयेनाह—देवतार्थे इत्यादि । इन्द्रो देवताऽस्येति ॥ त्यज्यमानद्रव्ये उद्देश्यविशेषो देवता मन्त्रस्तुत्या च ॥ ननु देवतार्थस्यापि इदमर्थत्वाद्देवताग्रहणं व्यर्थमिति चेत्सत्यम् । इदमर्थं इन्द्रसम्बन्धि हविरिति बोधः । देवतार्थे तु इन्द्रदेवतोद्देश्यकं हविरिति विशेषबोधार्थं पृथक् ॥ १८ ॥

(अपोनपादपान्नपातोरपोनप्तृअपान्नप्तृआदेशौ) इयेययोः परतः ॥ अपोनप्त्रियम्—अपोनप्त्रीयम् । अपान्नप्त्रियम्—अपान्नप्त्रीयम् ॥१९॥

(सु०) अपोनपादपान्नपातोरपोनप्तृअपान्नप्तृआदेशौ ॥ इयेययोः परतः एतयो अपोनप्तृ अपान्नप्तृ आदेशौ स्तः ॥ अपोनपाद्देवताऽस्येति । अपान्नपाद्देवताऽस्येति ॥ १९ ॥

(त०) अपोनपादपान्नपातोरिति॥ अत्रादेशे यथासंख्यं न तु प्रत्यये व्याख्यानात् १९

(प्रावृष एण्यः) प्रावृड् देवताऽस्य प्रावृषेण्यम् । कः प्रजापतिर्देवताऽस्य कायम् ॥ २० ॥

(सु०) प्रावृष एण्यः ॥ अस्मादेण्यः प्रत्ययः स्यात् देवतार्थे ॥ प्रवर्षतीति प्रावृट् । नहिवृतीति दीर्घः । जातेऽर्थे तु इकः । प्रावृषि जातः प्रावृषिकः । प्रावृषेण्यः । "स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा अथ शरत् स्त्रियाम्" इत्यमरः ॥ कस्येकारान्तादेशोऽणि । को ब्रह्मा देवताऽस्येति । यस्येति लोपात्परत्वादादिवृद्धिः । आय् । कायं हविः ॥२०॥

(त०) कायमिति ॥ अत्र यस्य लोपं बाधित्वा परत्वाद्वृद्धिः ॥ २० ॥

क्वचिद् द्वयोः ॥ पूर्वोत्तरपदाद्योः स्वरयोः क्वचिद्वृद्धिर्भवति ञ्णिति ॥ अग्निमारुतम् ॥ २१ ॥

(सु०) क्वचिद् द्वयोः ॥ द्वयोरिति षष्ठ्यन्तं पदविशेषणम् । अग्नामरुतौ देवते

अस्येति अग्नेरिदिति वक्ष्यमाणेनेकारादेशः । उभयत्र वृद्धिः । आग्निमारुतम् । अण् । स्वाम्यर्थवाचकदेवताद्वन्द्वे एव पूर्वोत्तरपदादिस्वरवृद्धिविषयकमुदाहरणमेतत् । तेनेह न स्कन्दविशाखयोरयमिति स्कान्दविशाखः । अण् । पार्वतीनन्दनः स्कन्दः" इत्यमरः ॥ नेन्द्रस्य परस्य ॥ उभयत्र प्राप्तौ परस्येन्द्रशब्दस्य वृद्धिर्न भवति देवताद्वन्द्वे । सोमेन्द्रौ देवते अस्येति सौमेन्द्रः पशुः । अण् ॥ परस्येति किम् । इन्द्राग्नी देवते अस्येति ऐन्द्राग्नोऽण् । यस्येतीकारलोपः ॥ दीर्घात्परस्य वरुणस्य वृद्धिर्न भवति देवताद्वन्द्वे । इन्द्रावरुणौ देवते अस्येति । देवताद्वन्द्वे पूर्वस्येत्यात्वम् । ऐन्द्रावरुणम् । मित्रावरुणौ देवते अस्येति मैत्रावरुणम् । अण् ॥ दीर्घात्किम् । "अग्निवारुणीमनड्वाहीमालभेत" इति ॥ २१ ॥

(त०) क्वचिद् द्वयोरिति ॥ अत्रादिस्वरस्येति संपूर्णसूत्रमनुवर्तते । द्वयोरिति षष्ठ्यन्तं पदविशेषणम् । यद्यपि समासेनैकपद्यं तथाप्यन्तर्वर्तिन्या विभक्त्या पदद्वयत्वं बोध्यम् ॥ एदोतोऽत इति ज्ञापितमुत्तरस्यापदत्वं तु ज्ञापकसिद्धं न सर्वत्रेति वचनान्नेहाश्रयणीयम् ॥ आग्निमारुतमिति ॥ अग्नामरुतौ देवते अस्येति विग्रहः ॥ २१ ॥

अग्नेरिद्वृद्धौ ॥ वृद्धिमत्युत्तरपदे अग्नेरिदादेशः स्यात् ॥ आग्निवारुणम् । सौहार्दम् । सौभागिनेयः । सौभाग्यम् । साक्तुसैन्धवः । आनुशतिकम् । ऐहलौकिकम् । पारलौकिकम् । पौर्वाह्णिकम् ॥ २२ ॥

(सु०) अग्नेरिद्वृद्धौ ॥ अग्निशब्दस्येत्स्यात् वृद्धिमत्युत्तरपदे देवताद्वन्द्वे ॥ अलौकिके वाक्ये आत्वमीत्वं च बाधित्वा इत् । विष्णौ परे इत्वं न विष्णुशब्दे परेऽग्निशब्दस्येत्व । आग्नावैष्णवम् । अण् प्रत्ययः ॥ आग्निवारुणम् । उभयत्र वृद्धि । सुहृदो भावः सौहार्दम् । अण् ॥ सुभगाया अपत्यं सौभागिनेयः । पृयणनक्लौ वृद्धौ च ॥ सुभगस्य भावः सौभाग्यम् । ष्यः ॥ सक्तुप्रधानाः सिन्धवः सक्तुसिन्धवः । सक्तुसिन्धुषु भवः साक्तुसैन्धवः । अण् वृद्धौ । शतेन क्रीतः शतिकः । शतिकमनुगतोऽनुशतिकः । अनुशतिकस्येदम् आनुशातिकम् । अणवृद्धौ । इह लोके भवम् ऐहलौकिकम् । इकः ॥ परलोके भवं पारलौकिकम् ॥ २२ ॥

(त०) अग्नेरिदिति ॥ वृद्धिमत्युत्तरपदे अग्नेरिदादेशः स्यादित्यर्थः ॥ सौहार्दमिति ॥ सुहृदो भावः ॥ सौभागिनेय इति ॥ सुभगाया अपत्यमित्यर्थः ॥ साक्तुसैन्धव इति ॥ सक्तुप्रधानाः सिन्धवः सक्तुसिन्धवस्तेषु भवः । शतेन क्रीतः शतिकः । तमनुगतोऽनुशतिकस्तस्येदमानुशातिकम् ॥ २२ ॥

णितो वा ॥ उक्ता वक्ष्यमाणाश्च प्रत्यया णितो वा(क) ॥ स्वकीयः ।

(क) णितो वेति । अणादीनां णित्वे सिद्धे पक्षे निषेधार्थं वचनम् । कादीनामणित्वे पक्षे विधानार्थम् । स च कचिन्नित्यनिषेधः, कचिद्वैकल्पिकः' क्वचिदनिषेध एव प्रत्ययविधिरप्येवं णितो वेति णित्वबाहुल्यात् णिद्ग्रहणम् । यथा ब्राह्मणग्रामः । इमोऽपि मित्वविकल्पो भवत्येव । ग्लुचुकायनिर्यथा ।यद्वा—सोऽपि णिदेव कर्तव्यः । अर्थान्तरे विहितानां प्रत्ययानां णित्वमात्रमनेन व्यवस्थाप्यते । न त्वर्थान्तरेऽनेन प्रत्यया विधीयन्ते । विधेयभेदे वाक्यभेदप्रसङ्गात् । सत्यां गतौ तस्यान्याय्यत्वात् । किं च—धैनुकमापूपिकमित्यादौ कादीनां विधानं केन स्यात् । केनेयेका इति चेत्तर्हि तदेव विधायकमस्तु । कादीनामज्ञापकत्वेण णित्वमात्रं व्यवस्थाप्यते । विधिस्तु तेनैव ।

श्वशुरस्यापत्यं श्वाशुर्यः । पित्र्यम् । गव्यम् । पयस्यम् । कुल्यम् । तदीयम् । त्वदीयम् । मदीयम् ॥ २३ ॥

(सु०) णितो वा ॥ अणादयः कादयश्च णितो वा भवन्ति ॥ अणादीनां णित्वे सिद्धे पक्षे निषेधार्थं वचनम् । कादीनामणित्वे सिद्धे पक्षे विधानार्थम् । स च क्वचिन्नित्यनिषेधः । क्वचिद्वैकल्पिकः । क्वचिदनिषेध एव ॥ स्वस्रपत्यं स्वास्त्रीयः । णीयः ॥ श्वशुरस्यापत्यं यस्येत्यलोपः । श्वाशुर्यः पितुरिदमिति क्वचित्स्वरवद्यकार इति स्वरत्वात् रत्वम् । पित्र्यम् । ण्यः ॥ गोरिदं गव्यम् । ण्यः । स्वरत्वादव् ॥ पयसि भवं पयस्यम् ॥ कुले भवं कुल्यम् । ण्यः ॥ तस्येदं तदीयम् । तवेदम् । ममेदम् । 'त्वन्मदेकत्वे' इति त्वद् मद् । त्वदीयम् । मदीयम् ॥ २३ ॥

(त०) णितो वेति ॥ अत्र वेत्यस्य व्यवस्थितत्वात् क्वचिदणितोऽपि णित्वं क्वचित् णितोऽप्यणित्वं क्वचिद्विकल्प इति बोध्यम् ॥ णितो बहुत्वात् णित इत्युक्तिर्बाह्मणग्राम इति वत् । तेन ञितोऽपि ञित्त्वविकल्पो बोध्यः ॥ पित्र्यमिति ॥ पितुरिदमिति विग्रहे क्वचित्स्वरवद्य इति स्वरत्वाद्रत्वम् । एवं गव्यमित्यपि ॥ २३ ॥

(अन्यस्य दक्) अन्यदीयम् ॥ २४ ॥

(सु०) अन्यस्य दक् ॥ अन्यशब्दस्य दगागमो भवति णीये । अषष्ठीतृतीयान्तस्यान्यशब्दस्य दगागमो वाच्यः आशीराशाऽऽस्थाऽऽस्थितोत्सुकोतिकारकरागणीयेषु परतः ॥ अन्यदाशीः ॥ अन्यदाशा ॥ अन्यदास्था ॥ अन्यदास्थितः ॥ अन्यदुत्सुकः । अन्यदूतिः ॥ अन्यत्कारकः । अन्यद्रागः ॥ अषष्ठीतृतीयान्तस्येति किम् । अन्यस्यान्येन वा आशीः अन्याशीः ॥ कारकणीययोरषष्ठीतृतीयान्तस्येति निषेधो न वाच्यः ॥ अर्थे परे अन्यस्य वा दक् । अन्यदर्थः । अन्यार्थः । अन्यदीयम् ॥ २४ ॥

(पितुर्भ्रातरि व्यः) पितुर्भ्राता पितृव्यः ॥ २५ ॥

(सु०) पितुर्भ्रातरि व्यः ॥ पितृशब्दाद्व्यप्रत्ययो भवति भ्रात्रर्थे ॥ २५ ॥

(मातुर्भ्रातरि डुलः) मातुलः ॥ २६ ॥

(सु०) मातुर्भ्रातरि डुलः ॥ मातृशब्दात् डुलप्रत्ययो भवति भ्रात्रर्थे ॥ डित्वाट्टिलोपः ॥ २६ ॥

(मातृपितृभ्यां पितरि मातरि च डामहष्) मातुः पिता मातामहः । पितामहः । मातुर्माता मातामही । पितामही ॥ २७ ॥

(सु०) मातृपितृभ्यां पितरि मातरि च डामहष् ॥ आभ्यां डामहष् प्रत्ययः स्यात् पित्रर्थे मात्रर्थे च ॥ डित्वाट्टिलोपः ॥ षित्वात् स्त्रियाम् ङ्षित इतीप् ॥ २७ ॥

(त०) मातृपितृभ्यामिति ॥ षित्वादीप् ॥ २७ ॥

(अवेर्दुग्धे सोढदूसमरीसाः) अवेर्दुग्धम् अविसोढम् । अविदूसम् । अविमरीसम् ॥ २८ ॥

(सु०) अवेर्दुग्धे सोढदूसमरीसाः ॥ अविशब्दादेते प्रत्यया भवन्ति दुग्धेऽर्थे सकारपाठसामर्थ्यान्न षः ॥ अविसोढमिति ॥ २८ ॥

(**तिलान्निष्फलात्पिञ्जपेजौ**) निष्फलस्तिलस्तिलपिञ्जः । तिलपेजः ॥ २९ ॥

(सु०) तिलान्निष्फलात्पिञ्जपेजौ ॥ तिलशब्दादेतौ प्रत्ययौ स्तः निष्फलेऽर्थे ॥ तिलपिञ्जः । तिलपेजः । वन्ध्यस्तिल इत्यर्थः ॥ २९ ॥

(**कारकात् क्रियायुक्ते**) कारकादप्येते प्रत्ययाः क्रियायुक्ते कर्तरि कर्मणि च (क) ॥ कुङ्कुमेन । रक्तं कौङ्कुमम् । वस्त्रेण परिवृतो वास्त्रो रथः । काम्बलः । द्वैपः । वैयाघ्रः ॥ ३० ॥

(सु०) कारकात् क्रियायुक्ते ॥ कारकादणादयः कादयश्च प्रत्ययाः स्युः ॥ ननु कर्ता कर्म च करणं सम्प्रदानं तथैव च । अपादानाधिकरणे इत्याहुः कारकाणि षट् ॥' इत्यत्र कारकशब्दः सर्वस्मिन्नपि क्रियासाधने दृष्टः । स्वार्थिकः कारकः सञ्ज्ञीत्यत्र तु कर्तृमात्रे दृष्टस्तस्य कस्मान्न ग्रहणम् । उच्यते । अत्राद्यस्यैव ग्रहः । अन्यथा कर्तुरित्येवावक्ष्यत् । अथ का क्रिया किं च तद्युक्तम् । उच्यते । व्यापारो भावना सैवोत्पादना सैव च क्रियेति । उक्तं च "गुणभूतैरवयवैः समूहः क्रमजन्मनाम् । बुद्धया प्रकल्पितो भेदः क्रियेति व्यपदिश्यते ॥ १ ॥" इति । स्वभावतो गुणीभूतैरवयवैरवान्तरलक्षणैर्युक्तः क्रमजन्मनां क्षणानां समूहः आचार्यैः क्रिया व्यपदिश्यते । कीदृशः । सङ्कलनात्मिकया बुद्धयाऽभेद एकत्वं प्रकल्पितं तद्युक्तमेतया क्रियया युक्तम् । क्रिया चोत्पत्त्युत्पादनरूपा । उत्पत्तिः फलम् । उत्पादना व्यापारः । व्यापारेण युक्तः कर्ता । फलेन युक्तं कर्म । तस्मिन् क्रियायुक्ते कर्तरि कर्मणि च ॥ तेन रक्तं रागात् । रज्यते अनेनेति बाहुलकात् करणे घञ् । रागो रञ्जकद्रव्यम् । तृतीयान्ताद्रागवाचकात्प्रत्ययो रक्तमित्यर्थे । कुङ्कुमेन रक्तं वस्त्रं कौङ्कुमम् । रञ्जनक्रियायाः करणकारकात् कुङ्कुमादण् । तद्युक्तमत्र वस्त्रं कर्मेत्यादि ज्ञेयम् ॥ लाक्षया रक्तं लाक्षिकम् । रोचनया रक्तं रौचनिकम् । इकः ॥ नील्या रक्तं नीलम् अण् ॥ णितो वेति न वृद्धिः ॥ पीतेन रक्तं पीतकम् । कः ॥ तेन परिवृतो रथः । समन्ताद्वेष्टितः

(क) अत्र लघुभाष्यम्—**कारकादिति** । कारकशब्दः कर्तृमात्रे दृष्टः स्वार्थिकः कारको सञ्ज्ञीत्यत्र "कर्ता कर्म च करणं सम्प्रदानं तथैव च । अपादानाधिकरणे इत्याहुः कारकाणि षट्" इत्यत्र क्रियासाधने सर्वस्मिन्नपि दृष्टः । तत्र कस्यात्र ग्रहणम् । उच्यते । अत्राद्यस्य न ग्रहः । वसिष्ठेन दृष्टं वासिष्ठं साम । वररुचिना कृतो वाररुचो ग्रन्थः । इत्यादौ विधिसम्भवेऽपि कुंकुमेन रक्तं वस्त्रं कौङ्कुममित्यादावप्रसङ्गात् । इष्टं हि स्पष्टार्थं कर्तुरित्येवावक्ष्यत् । कर्तृकार्ययोरिति यथाकारकादिति कर्तृविधीयमानःप्रत्ययःकर्त्रर्थे न सम्भवत्येवातःकार्ये इत्येवावक्ष्यत् । न **क्रियायुक्त इति** । अतः परिशेषादन्त्य एव गृह्यते । अक्षैर्दीव्यत्याक्षिकः । धुरं वहति धुर्यः। संज्ञापूर्वकत्वान्न दीर्घः। मनुना प्रोक्तो मानवः। चर्मणा परिवृतश्चार्मण इत्यादि । क्रियायुक्ते किम् । काष्ठैः पाकः । रथेन गमनम् । तीर्थे दानम् । नात्र पाकादिः क्रियायुक्तः किन्तु क्रियैव । क्रियाग्रहणं किम् । कारकाद्युक्ते इत्येव वक्तव्यम् । ग्रामे दण्डी । गेहे घटः। दण्डघटत्वादियुक्तोऽपि स न क्रियायुक्तः। कारकात्क्रियायामित्येवास्तु । शब्दं करोतीति शाब्दिक इत्यादौ क्रियाया प्राधान्ये न मानं स्यान्न तु कर्तुः । यदि तु कर्तृकार्यग्रहणं मण्डूकप्लुत्यानुवर्तते तदा क्रियायुक्त इति मास्तु । इति ।

परिवृत उच्यते । तेनेति तृतीयान्तादणादयः परिवृतो रथ इत्यर्थे । वास्त्रो रथः । अण् ॥ कम्बलेन परिवृतो रथः काम्बलः॥ अण् ॥ द्वीपिनो विकारो द्वैपम् । द्वैपेन परिवृतो रथः द्वैपः॥ व्याघ्रस्य विकारो वैयाघ्रम् । युड्वृद्धी । वैयाघ्रेण परिवृतो वैयाघ्रो रथः ॥ ३० ॥

(त०) कारकात् क्रियायुक्ते इति ॥ कारकशब्दो यद्यपि द्व्यर्थः कर्तृपरः सर्वकारकपरश्च तथाप्यत्र सर्वकारकार्थ एव गृह्यते । अन्यथा कर्तुरित्येवावक्ष्यत् । क्रिया च धात्वर्थः । स च फलव्यापारात्मकः फलव्यापारयोर्धातुरित्युक्तत्वात् । ततश्च फलयुक्तं कर्म व्यापारयुक्तः कर्तेत्याशयेनाह—क्रियायुक्ते कर्तरीत्यादि ॥ कुङ्कुमेन रक्तमिति ॥ रञ्जनक्रियायाः करणकारकात् कुङ्कुमादण् । तद्युक्तमत्र वस्त्रं कर्मेति ॥ माथुर इत्यत्रागमनक्रियाया अपादानकारकान्मथुराशब्दादण् तद्युक्तोऽत्र कर्तेत्यादिकमूह्यम् ॥ कारकादिति किम् । फलानां संहितः । क्रियायुक्ते किम् । काष्ठैः पाकः । नात्र पाकादिः क्रियायुक्तः किन्तु क्रियैव ॥ क्रियेति किम् । गेहे घटः । अत्र घटत्वयुक्तो घटः न क्रियायुक्तः । क्रियायामित्युक्ते शब्दं करोति शाब्दिक इत्यादौ प्रधान्येन क्रियाया एव भानं स्यान्न तु कर्तुः । यदि कर्तृकार्यग्रहणं मण्डूकप्लुत्याऽनुवर्तते तदा कारकादित्येवास्तु ॥ ३० ॥

(पाण्डुकम्बलादिनिः) पाण्डुकम्बलेन सम्वीतः पाण्डुकम्बली रथः । वसिष्ठेन दृष्टं वासिष्ठं साम । कालेयम् । वररुचिना कृतो वाररुचो ग्रन्थः । मनुना प्रोक्तो मानवो धर्मः । मथुराया आगतो माथुरः । ग्रामादागतो ग्राम्यः । धुरं वहतीति धुर्यः-धौरेयः(क)। सर्वधुरीणः । एकधुरीणः॥३१॥

(सु०) पाण्डुकम्बलादिनिः ॥ पाण्डुकम्बलशब्दो राजास्तरणपाण्डुवर्णकम्बलस्य वाचकः । अस्त्यर्थेनैव सिद्धे वचनमणो निवृत्त्यर्थम् । इकार उच्चारणार्थः । तेन दृष्टं साम ॥ तेनेति तृतीयान्तादणादयः दृष्टं सामेत्यर्थे । वासिष्ठं साम । अण् ॥ कलिना दृष्टं साम कालेयम् । ढ्यण् । वामदेवेन दृष्टं साम वामदेव्यम् । ण्यः ॥ उशनसा दृष्टं साम निपातनाल्लोपो वा । औशनसम् । अण् ॥ तेन कृतो ग्रन्थः ॥ तेनेति तृतीयान्तादणादयः कृतो ग्रन्थ इत्यर्थे । वररुचिना कृतो वाररुचो ग्रन्थः ॥ तेन प्रोक्तम् ॥ तेनेति तृतीयान्तादणादयः प्रोक्तमित्यर्थे । मनुना प्रोक्तो मानवो धर्मः अण् ॥ तत आगतः ॥ तत इति पञ्चम्यन्तादणादयः आगत इत्यर्थे । माथुरः । अण् ॥ ग्राम्यः ॥ तद्वहति ॥ तदिति द्वितीयान्तादणादयो वहतीत्यर्थे । धुरं वहति धुर्यः । ण्यः । णितो वेति न वृद्धिः । 'य्वोर्वि हसे' इति दीर्घो न संज्ञापूर्वकत्वेन तस्यानित्यत्वात् । धौरेयः । ढ्यण् ॥ सर्वा चासौ धूश्चेति ऋक्पूरित्यप्रत्ययः । 'कर्मधारये' इति पुंवत् । सर्वधुरा तां वहति यस्येत्यालोपः । सर्वधुरीणः । ईनः ॥ एका चासौ धूश्चेति एकधुरा तां वहति एकधुरीणः । ईनः ॥ एकधुरः । अण् ॥ शकटं वहति शाकटो गौः । अण् ॥ हलं वहति हालिकः । इकः ॥ सीरं वहति सैरिकः । एकः ॥ रथं वहति रथ्यः । ण्यः ॥ युगं वहति युग्यः । ण्यः ॥३१॥

(त०) धुर्य इति ॥ संज्ञापूर्वकविधेरनित्यत्वात्क्वचिन्न दीर्घः ॥ एकधुरीण इति ॥ णित्त्वविकल्पान्न वृद्धिः ॥ ३१ ॥

(क) संज्ञापूर्वकविधेरनित्यत्वान्न दीर्घः—धुर्य इति ।

(मुखपार्श्वतसोर्लोप ईये) मुखतो भवं मुखतीयम् । पार्श्वतीयम् ॥ ३२ ॥

(सु०) मुखपार्श्वतसोर्लोप ईये ॥ मुखं च पार्श्वं च मुखपार्श्वे मुखपार्श्वयोस्तसौ मुखपार्श्वतसौ तयोः ॥ षष्ठीनिर्दिष्टत्वात्सलोपः । यस्येत्यलोपः । मुखतीयम् ॥ पार्श्वतो भवं पार्श्वतीयम् । णीयः ॥ ३२ ॥

(त०) मुखपार्श्वेति ॥ द्वन्द्वान्ते श्रूयमाणत्वात्तसः प्रत्येकं योगः ॥ मुखतीयमिति ॥ षष्ठीनिर्दिष्टस्येति सकारलोपे यस्येति लोपे च रूपसिद्धिः ॥ ३२ ॥

(देवस्वराजजनपराणां कुक् ईये) देवकीयम् । स्वकीयम् । राजकीयम् । जनकीयम् । परकीयम् ॥ ३३ ॥

(सु०) देवस्वराजजनपराणां कुक् ईये ॥ एषां कुक् स्यात् ईये ॥ देवस्येदं देवकीयम् ॥ स्वस्येदं स्वकीयम् ॥ राज्ञ इदं राजकीयम् । नाम्नो नो लोपशिति नलोपे कृते पश्चात् कुक् बोध्यः ॥ जनस्येदं जनकीयम् । परस्येदं परकीयम् ॥ ३३ ॥

(त०) देवस्येति ॥ देवकीयमिति ॥ देवस्येदमिति वाक्यम् ॥ राजकीयमिति ॥ अत्र नलोपे यत्नः । नाम्नो नो लोपशित्यस्य नान्तस्य नाम्न इति व्याख्यानात् प्रकृते कुकोराजान्स्यावयवत्वान्नान्तताभावात् । अतो नो वेत्यत्र व्यवस्थितत्वाश्रयणादत्र नलोपः॥ ३३ ॥

(मध्यान्मः) मध्यमः ॥ ३४ ॥

(सु०) मध्यान्मः ॥ अस्मान्मः प्रत्ययः स्यात् भवाद्यर्थे ॥ मध्ये भवो मध्यमः॥ ३४॥

(हेमन्तस्य वा तलोपोऽणि) हैमनम्—हैमन्तम् ॥ ३५ ॥

(सु०) हेमन्तस्य वा तलोपोऽणि ॥ हेमन्तादण् स्यात् तस्य लोपश्च वा ॥ हेमन्ते भवं हैमनं हैमन्तं च ॥ ३५ ॥

(त०) हैमनमिति ॥ हेमन्ते भवमिति विग्रहः ॥ टिलोपस्तूक्तयुक्तेरेव न ॥३५॥

(चिरपरुत्परारिभ्यस्त्नः) चिरत्नम् । परुत्नम् । परारित्नम् ॥३६॥

(सु०) चिरपरुत्परारिभ्यस्त्नः ॥ एभ्यस्त्नप्रत्ययः स्यात् ॥ चिरशब्दोऽदन्तः ॥ परुदित्यव्ययं पूर्वस्मिन् वत्सरे ॥ परारि पूर्वतरे वत्सरेऽव्ययम् ॥ ३६ ॥

(अग्रादिपश्चादन्ताड्डिमः) अग्रिमम् । आदिमम् । पश्चिमम् । अन्तिमम् ॥ ३७ ॥

(सु०) अग्रादिपश्चादन्ताड्डिमः ॥ एभ्यो डिमः प्रत्ययः स्यात् ॥ डित्वाट्टिलोपः । अग्रे भवम् अग्रिमम् ॥ आदौ भवम् आदिमम् ॥ पश्चाद्भवं पश्चिमम् ॥ अन्ते भवम् अन्तिमम् ॥ ३७ ॥

(त०) पश्चिममिति ॥ पश्चाद्भवम् । डित्वादादित्यस्य लोपः ॥ ३७ ॥

(हेतुमनुष्येभ्यो वा रूप्यमयटौ) समादागतं समरूप्यम् । सममयम् । समीयम् । देवदत्तरूप्यम् । देवदत्तमयम् । देवदत्तीयम् ॥ ३८ ॥

(सु०) हेतुमनुष्येभ्यो वा रूप्यमयटौ ॥ हेतुवाचकेभ्यो मनुष्यवाचकेभ्यश्च रूप्यमयटौ वा स्तः ॥ ट् ईबर्थः ॥ आगतमित्यर्थे समात् मार्गादागतं समरूप्यम् । सममयम् ॥ पक्षे णीयः । समीयम् ॥ देवदत्तादागतं देवदत्तरूप्यम् । देवदत्तमयम् । देवदत्तीयम् । णीयः ॥ दैवदत्तः । अण् ॥ ३८ ॥

(त०) हेतुमनुष्येभ्यो इति ॥ हेतुमनुष्यवाचिभ्य इत्यर्थः ॥ ३८ ॥

(छगलिनो णेयिनः) छगलिना प्रोक्तमधीयते ये छागलेयिनाः॥३९॥

(सु०) छगलिनो णेयिनः ॥ छगलिन्शब्दात् णेयिनः प्रत्ययः स्यात् प्रोक्तमधीते इत्यर्थे ॥ छगलिना प्रोक्तं शास्त्रमधीयते पठन्ति ये ते छागलेयिनाः । नो वेति टिलोपः॥३९॥

(त०) छागलेयिना इति ॥ णित्वाद्वृद्धिः ॥ ३९ ॥

(पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोर्णिनिः) पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीयते पाराशरिणो भिक्षवः । शैलालिनो नटाः ॥४०॥

(सु०) पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोर्णिनिः ॥ आभ्यां णिनिः स्यात् ॥ इकार उच्चारणार्थः पाराशर्यो व्यासः ॥ अनन्तरापत्येऽपि उपचाराद्गर्गादिभ्यो ण्यः । यस्येत्यलोपे क्वचिद्यलोप इति वक्ष्यमाणेन यलोपः । पाराशरिणः ॥ शिलालिना प्रोक्तं नटसूत्रमधीयते ये ते शैलालिनः ॥ ४० ॥

(त०) पाराशर्येति ॥ भिक्षुसूत्रे वाच्ये पाराशर्यशब्दात् नटसूत्रे शिलालिशब्दाद् णिनिरित्यर्थः ॥ पाराशरिण इति । कन्यादित्वाद्यलोपः ॥ ४० ॥

(कर्मन्दकृशाश्वादिनिः) उक्तविषये ॥ कर्मन्दिनः । कृशाश्विनः ४१

(सु०) कर्मन्दकृशाश्वादिनिः ॥ उक्तविषये आभ्यामिनिः स्यात् ॥ कर्मन्देन प्रोक्तं भिक्षुसूत्रमधीयते ये ते कर्मन्दिनो भिक्षवः । कृशाश्वेन प्रोक्तं नटसूत्रमधीयते ये ते कृशाश्विनो नटाः ॥ भिक्षुनटसूत्रयोः किम् । पाराशर्यस्येदं पाराशरम् ॥ शिलालिन इदं शैलालम् ॥ कार्मन्दम् ॥ कार्शाश्वम् । अण् ॥ ४१ ॥

(त०) उक्तविषये इति । भिक्षुनटसूत्रयोरित्यर्थः ॥ ४१ ॥

(त्रपुजतुनोः षण् विकारे) त्रापुषम् । जातुषम् ॥ ४२ ॥

(सु०) त्रपुजतुनोः षण् विकारे ॥ आभ्यां षण् स्याद्विकारे ॥ त्रपुणो विकारः त्रापुषम् ॥ जतुनो विकारः जातुषम् ॥ ४२ ॥

(शम्याः ष्लञ्) शामीली स्रुक् ॥ ४३ ॥

(सु०) शम्याः ष्लञ् ॥ शमीशब्दात् ष्लञ् स्यात् । षित्वादीप् ॥ शम्या विकारः शामीलं भस्म । ष्ञितः इवीप् । शामीली ॥ ४३ ॥

(त०) शामीलीति ॥ शम्या विकार इति विग्रहः । षित्वादीप् ॥ ४३ ॥

(शक्तियष्ट्योरीकण् प्रहरणे) शाक्तीकः । याष्टीकः ॥४४॥

(सु०) शक्तियष्ट्योरीकण् प्रहरणे ॥ आभ्यामीकण् स्यात् ॥ शक्तिः प्रहरणमस्य शाक्तीकः । यष्टिः प्रहरणमस्य याष्टीकः ॥ ४४ ॥

(त०) शाक्तीक इति ॥ शक्तिः प्रहरणमस्येति विग्रहः ॥ ४४ ॥

(विंशतित्रिंशद्भ्यां डककौ वा) ॥ ४५ ॥

(सु०) **विंशतित्रिंशद्भ्यां डकको वा** ॥ तेन क्रीतमित्यर्थे आभ्यां डककौ प्रत्ययौ स्तः ॥ असंज्ञायामर्थं डकः ॥ ४५ ॥

(विंशतेस्तिलोपो डिति) विंशकः । त्रिंशकः । विंशतिकः । त्रिंशत्कः ॥ ४६ ॥

(सु०) **विंशतेस्तिलोपो डिति** ॥ तिशब्दलोपः ॥ विंशकः । त्रिंशकः । संज्ञायां तु कः । विंशतिकः । त्रिंशत्कः ॥ ४६ ॥

(कर्मण उकञ्) कर्मणे प्रभवति कार्मुकम् ॥ ४७ ॥

(सु०) **कर्मण उकञ्** ॥ कर्मन्शब्दादुकञ् स्यात् तस्मै प्रभवतीत्यर्थे ॥ समर्थः शक्तः प्रभवतीत्युच्यते ॥ ४७ ॥

(मनोर्जातावपत्ये ष्यषणौ) मनोरपत्यं मनुष्यः । मानुषः ॥ जातौ किम् । मानवः ॥ ४८ ॥

(सु०) **मनोर्जातावपत्ये ष्यषणौ** ॥ मनुशब्दादेतौ स्तः अपत्यत्वे जातौ वाच्ये ॥ समुदायार्थो जातिः । मनुष्यः । मानुषः । जातिशब्दावेतौ ॥ ४८ ॥

(केनेयेकाः) कारकात्क इन इय इक इत्येते प्रत्ययाः भवन्ति कर्तरि कर्मणि चोक्तवक्ष्यमाणेष्वर्थेषु च णितो वा(क) ॥ क्रममधीते क्रमकः । पदकः ॥ ग्रामादागतस्तत्र जातो वा ग्रामीणः । सध्रीचीनः । समीचीनः । तिरश्चीनः । कुलस्यापत्यं कुलीनः । महाकुलीनः । आढयकुलीनः ॥४९॥

(सु०) **केनेयेकाः** ॥ कश्च ईनश्च इयश्च इकश्च ते केनेयेकाः ॥ क्रममधीते क्रमकः क्रमपदशिक्षामीमांसाः क्रमादयः । एभ्यः कः । पूर्वस्य ह्रस्वो निपातनात् । शिक्षकः ॥ मीमांसामधीते मीमांसकः ॥ ग्रामे भवः ग्रामीणः । ईनः । ग्राम्योऽपि ण्यः ॥ सध्र्यङ्ङेव सध्रीचीनः ॥ सम्यङ्ङेव समीचीनः ॥ तिर्यङ्ङेव तिरश्चीनः । सहाञ्चतीति सध्र्यङ् ॥ अञ्चत्यन्तान्नाम्नः स्वार्थे ईनो वा ॥ दिशि न । प्राक् प्राचीनम् । प्रत्यक् प्रतीचीनम् । अवाक् अवाचीनम् । अर्वाक् अर्वाचीनम् । अर्वन्तम् अञ्चतीति अर्वाक् । "निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः ।" इत्यमरः ॥ दिशि तु प्राची दिक् ॥ अचेर्दीर्घश्चेति अलोपे पूर्वकारदीर्घः ॥ उदीची दिक् । तिरश्चादय इति उदीचादेशः ॥ कुलस्यापत्यमिति कुलीनः ॥ तदन्तादपि । महच्च तत्कुलं चेति सहादेः सादिरिति महाकुलस्यापत्यं महाकुलीनः ॥ आढयं च तत् कुलं च आढ्यकुलम् । आढ्यकुलस्यापत्यमाढयकुलीनः ॥४९॥

(त०) **केनेयेका** ॥ इति ॥ कश्च ईनश्च इयश्च इकश्च ते । देवतेदमर्थ इत्यत्र देव-

(क) केनेयेका । कश्च ईनश्च इयश्च इकश्चैते पूर्वत्रापकर्षणादपत्यादिष्वर्थेषु भवन्ति । उत्तरत्रानुवर्त्तनात्स्वार्थादिषु मध्येऽसंयुज्यपाठाच्चानुक्तेष्वप्यर्थेषु भवन्ति । यदा देवतेदमर्थे इत्यत्रार्थे ग्रहणमधिकं कथं देवतेदमोरित्युक्ते शब्दे कार्यस्यासम्भवात् । अर्थे कार्यं विज्ञास्यते इत्यर्थे प्रत्ययलाभसम्भवात् । तत्र स्पष्टार्थमुक्तमिहानुवर्त्तते । तेनानुक्ते उक्ते चार्थे कादयः स्युः ।

तेदमोरिति वक्तव्येऽर्थग्रहणं स्पष्टार्थमिहानुवर्तते ॥ ततश्चोक्तानुक्तलाभ इत्याशयेनाह—छ-न्दतेत्यादि । सध्रीचीन इति ॥ सध्र्यङ्ङेवेति विग्रहे स्वार्थे ईनः । णित्वाभावान्न वृद्धिः॥ एवं सम्यङ्ङेव समीचीनः । अचेर्दीर्घश्चेत्यकारलोपे पूर्वस्येकारस्य दीर्घः । तस्यापि तद्धि-ते विधानात् ॥ ४९ ॥

(क्वचिद्यलोपः) कन्याया अपत्यं कानीनः । कात्यस्येमे कातीयाः छात्राः । गार्गीयाः । रेवत्या अपत्यं रैवतिकः । पुष्येण युक्ता पौर्णमासी पौषी । तैषी । क्षत्रस्यापत्यं क्षत्रियः । शुक्रो देवताऽस्य शुक्रियम् । इन्द्रस्य लिङ्गमिन्द्रियम् । अक्षैर्दीव्यतीत्याक्षिकः । कुद्दालैः खनति कौद्दालिकः । हलं वहति हालिकः । शब्दं करोति शाब्दिकः । दार्दुरिकः । धर्मं चरति धार्मिकः । आधर्मिकः । पक्षिणो हन्ति पाक्षिकः । शाकुनिकः । तैत्तिरिकः । मात्स्यिकः । मैनिकः । मार्गिकः । सारङ्गिकः । पुराणमधीते पौराणिकः । ऐतिहासिकः । वैदिकः (क) ॥ ५० ॥

(सु०) क्वचिद्यलोपः ॥ क्वचिद्धलात्परस्य यकारस्य लोपः स्यात् तद्धिते स्वरे न त्वाकारे ॥ कन्याया अपत्यमिति एयणोऽपवाद ईनः । यस्येत्यालोपः । ततो यलोपः । णितो वेति णित्वाद्वृद्धिः । कानीनो व्यासः कर्णश्च । अविवाहिताया अपत्यमित्यर्थः ॥ कात्यस्येमे गर्गादिण्यान्तात् णीये यलोपः । कातीयाः ॥ गार्ग्यस्येमे गार्गीयाः । यलोपः ॥ न त्वाकारे इति किम् । गार्ग्यायणः । इह न यलोपः ॥ रैवतिकः । णितो वेति णित्वा-द्वृद्धिः । रेवती अश्वपाली मणिपाली द्वारपाली इत्यादिरेवत्यादयः ॥ नक्षत्रेण युक्तः कालः ॥ तृतीयान्तनक्षत्रशब्दात्प्रत्यया युक्तः काल इत्यर्थः । पुष्येण युक्तं पौषमहः । अण् । तिष्यपुष्ययोर्नक्षत्राणीति यलोपः । स्त्रियां तु 'अण ईप्' । पौषी ॥ तिष्येण युक्ता तैषी ॥ क्षत्त्रशब्दाज्जातावियः । क्षत्त्रियः । क्षात्त्रिरन्यः ॥ शुक्रियं हविः । इयः ॥ इ-न्द्रस्यात्मनो लिङ्गं चिह्नमिति इन्द्रियम् ॥ तेन दीव्यति खनति जयति जितम् । तेनेति तृतीयान्तादिको दीव्यत्यादिष्वर्थेषु । णितो वेति णित्वाद्वृद्धिः । अक्षैः पाशकैर्दीव्यत्या-क्षिकः ॥ कुद्दालैः खनति कौद्दालिकः । "गोदारणं तु कुद्दालः" इति हैमः ॥ अक्षैर्जय-त्याक्षिकः । अक्षैर्जितम् आक्षिकम् ॥ हलं सीरं वहति हालिकः । इकः ॥ तेनेति तृती-यान्तादिकः संस्कृतेऽर्थे । दध्ना संस्कृतं दाधिकम् ॥ मरीचैः संस्कृतं मारीचिकम् ॥ शब्दं करोति शाब्दिकः ॥ प्रकृतिप्रत्ययविभागेन शब्दं व्युत्पादयतीत्यर्थः ॥ दर्दुरं करोति दार्दुरिकः ॥ इह दर्दुरशब्दः वाद्यभाण्डवाची । कुलाल इत्यर्थः ॥ धर्मं चरति धार्मिकः । सद्वृत्तइत्यर्थः ॥ अधर्मं चरत्याधर्मिकः । असद्वृत्त इत्यर्थः ॥ पक्षिणो हन्ति नो वेति टिलोपः । इकः । पाक्षिकः ॥ शकुनं हन्ति शाकुनिकः ॥ तित्तिरिं हन्ति तैत्तिरिकः ॥ मत्स्यं हन्ति मात्स्यिकः ॥ मीनं हन्ति मैनिकः ॥ मृगं हन्ति मार्गिकः ॥ सारङ्गं हन्ति सारङ्गिकः ॥ मयूरं हन्ति मायूरिकः ॥ पुराणमधीते पौराणिकः ॥ इतिहासमधीते वेत्ति वा

(क) मीनं हन्तीति मैनिकः । मत्स्यघाती । वेदमधीते वेत्ति वा वैदिकः ।

ऐतिहासिकः ॥ वेदमधीते वेत्ति वा वैदिकः ॥ णितो वेति णित्वाद्वृद्धिः ॥ ५० ॥

(त०) कानीन इति ॥ व्यासः कर्णश्च । णित्वाद्वृद्धिः ॥ शाकुनिक इत्यादीनां शाकुनीन् हन्तीत्यादि वाक्यम् । ऐतिहासिक इति ॥ इतिहासमधीते ॥ ५० ॥

(पील्वादिकर्णादिभ्यः कुणजाहौ पाकमूलयोः) पीलूनां पाकः पीलुकुणः । कर्णस्य मूलं कर्णजाहम् ॥ ५१ ॥

(सु०) पील्वादिकर्णादिभ्यः कुणजाहौ पाकमूलयोः ॥ पील्वादिभ्यः कर्णादिभ्यश्च कुणजाहौ प्रत्ययौ स्तः पाकमूलयोरर्थयोः पाकः परिणामः । मूलमुपक्रमः । पीलु कर्कन्धु शमी करीर बकुल बदर खदिर पील्वादयः । कर्ण अक्षि नख मुख केश पाद गुल्फ भ्रू शृङ्ग दन्त ओष्ठ पृष्ठ कर्णादयः ॥ ५१ ॥

(त०) पाकमूलयोरिति । यथाक्रममनयोरन्वय इत्याशयेनाह—पीलूनां पाक इत्यादि ॥ ५१ ॥

(पक्षात्तिर्मूले) पक्षस्य मूलं पक्षतिः ॥ ५२ ॥

(सु)पक्षात्तिर्मूले ॥ पक्षशब्दात्तिप्रत्ययः स्यात् मूलेऽर्थे ॥ पक्षतिः प्रतिपत् ॥ ५२ ॥

(चञ्चुचणौ वित्तेः) विद्यया वित्तो विद्याचञ्चुः । विद्याचणः ॥ ५३ ॥

(सु०) चञ्चुचणौ वित्तेः ॥ चञ्चुचणौ प्रत्ययौ स्तो वित्तेऽर्थे ॥ वित्तो भोग्यप्रतीतयोरिति निपातनात् दस्तस्येति नत्वं न ॥ ५३ ॥

(वेः शालशङ्कटौ) विस्तृतम् । विशालम् । विशङ्कटम् ॥ ५४ ॥

(सु०) वेः शालशङ्कटौ । वेः स्वार्थे एतौ स्तः ॥ विस्तृतम् ॥ विशालम् । विशङ्कटम् । विनञ्भ्यां नानाञौ न सह ॥ असहार्थे पृथग्भावे वर्तमानाभ्यां नानाञौ स्तः । विना । नाना ॥ ५४ ॥

(विसम्प्रोदः कटः) विकटम् । संकटम् । प्रकटम् । उत्कटम् ॥ ५५ ॥

(सु०)विसम्प्रोदः कटः ॥ एभ्यः कटप्रत्ययः स्यात् स्वार्थे ॥ विकटम् । विकृतम् ॥ संकटम् । संहतम् । संबाध इत्यर्थः ॥ प्रकटम् । प्रज्ञातम् । प्रकाशते इत्यर्थः । उत्कटमुद्भूतम् ॥ स्वशब्दावचौते कथंचिद्व्युत्पाद्यन्ते ॥ ५५ ॥

(अलाबूतिलोमाभङ्गाभ्यो रजसि) अलाबूनां रजोऽलाबूकटम् । तिलकटम् । उमाकटम् । भङ्गाकटम् ॥ ५६ ॥

(सु०) अलाबूतिलोमाभङ्गाभ्यो रजसि ॥ एभ्यो रजस्यभिधेये कटप्रत्ययः स्यात् ॥ रजसो विकारत्वात् विकारार्थे प्रत्ययानामपवादोऽयम् ॥ अलाबूनां रजः अलाबूकटम् ॥ तिलानां रजः तिलकटम् ॥ उमायाः रजः उमाकटम् ॥ भङ्गायाः रजः भङ्गाकटम् ॥ ५६ ॥

(गोष्ठादयः स्थानादिषु पशुनामभ्यः) गवां स्थानं गोगोष्ठम् । अश्वगोष्ठम् ॥ ५७ ॥

(सु०) गोष्ठादयः स्थानादिषु पशुनामभ्यः ॥ पशुनामभ्यो गोष्ठादयः प्रत्ययाः स्युः स्थानादिष्वर्थेषु ॥ ५७ ॥

(**संघाते कटः**) अवीनां संघातोऽविकटः (क) ॥ ५८ ॥

(सु०) **संघाते कटः** ॥ अप्रस्तुतावयवसमूहः संघातस्तत्र कटप्रत्ययः । सामूहिकानामपवादोऽयम् ॥ ५८ ॥

(**विस्तारे पटः**) अविपटः ॥ ५९ ॥

(सु०) **विस्तारे पटः** ॥ प्रस्तुतावयवः समूहो विस्तारस्तत्र पटः प्रत्ययः ॥ सामूहिकानामपवादोऽयम् ॥ ५९ ॥

(**द्वित्वे गोयुगः**) द्वावुष्ट्रौ उष्ट्रगोयुगम् ॥ ६० ॥

(सु०) **द्वित्वे गोयुगः** ॥ प्रकृत्यर्थस्य द्वित्वे द्योत्ये गोयुगप्रत्ययः स्यात् ॥ उष्ट्रगोयुगम् ॥ द्वयं युगमित्यादिवत् द्वयवयवसंघातप्राधान्यादेकवचनमित्यर्थः ॥ ६० ॥

(**षट्त्वे षड्गवः**) अश्वषड्गवम् ॥ ६१ ॥

(सु०) **षट्त्वे षड्गवः** ॥ षट्त्वे वाच्ये षड्गवप्रत्ययः स्यात् ॥ अश्वानां षट्त्वम् अश्वषड्गवम् । अवयवसंघातस्य प्राधान्यादेकवचनम् ॥ ६१ ॥

(त०) **अश्वषड्गवमिति** ॥ षट् अश्वा इत्यर्थः ॥ ६१ ॥

(**स्नेहे तैलः**) तिलतैलम् । सर्षपतैलम् ॥ ६२ ॥

(सु०) **स्नेहे तैलः** ॥ स्नेहे वाच्ये तैलप्रत्ययः ॥ तिलानां स्नेहः तिलतैलम् ॥ सर्षपाणां स्नेहः सर्षपतैलम् ॥ ६२ ॥

(**भवने क्षेत्रे शाकटशाकिनौ**) इक्षूणां भवनं क्षेत्रम् इक्षुशाकटम् । इक्षुशाकिनम् ॥ ६३ ॥

(सु०) **भवने क्षेत्रे शाकटशाकिनौ** ॥ भवने क्षेत्रे इत्यर्थे शाकटशाकिनौ प्रत्ययौ भवतः ॥ ६३ ॥

(**अवात्कुटारकटौ**) अवाचीनोऽवकुटारः । अवकटः ॥ ६४ ॥

(सु०) **अवात् कुटारकटौ** ॥ अवशब्दात् कुटारकटौ प्रत्ययौ भवतः अवाचीने हीनेऽर्थे अवकुटारावकटशब्दौ वेदे प्रसिद्धौ ॥ ६४ ॥

(**नासिकाया नते संज्ञायां टीटनाटभ्रटा अवात्**) नासिकाया नतम् अवटीटम् । अवनाटम् । अवभ्रटम् । तद्योगान्नासिकाऽवटीटा । पुरुषोऽवटीटः ॥ ६५ ॥

(सु०) **नासिकाया नते संज्ञायां टीटनाटभ्रटा अवात्** ॥ नासिकासाधनके नमने वर्तमानादवशब्दादेते प्रत्ययाः स्वार्थे संज्ञायां वाच्यायाम् ॥ नतमिति नपुंसके भावे क्तः । नमनं नीचैस्त्वम् । कथं तर्हि नासिकायां पुरुषे चावटीटशब्दप्रयोग इत्यत आह-तद्योगादिति ॥ ६५ ॥

(**नेर्बिडबिरीसौ**) निबिडम् । निबिरीसम् ॥ ६६ ॥

(क) अप्रस्तुतावयव इति । प्रस्तुतावयवस्तु विस्तरः ।

(सु०) नेर्बिडबिरीसौ ॥ उक्तेऽर्थे निशब्दान्नासिकाया नतेऽभिधेये बिडबिरीसौ प्रत्ययौ स्तः ॥ ६६ ॥

(इनपिटकाः प्रत्यया नेश्चिकचिचिकादेशाः) चिक्किनम् । चिपिटम् । चिक्कम् ॥ ६७ ॥

(सु०) इनपिटकाः प्रत्यया नेश्चिकचिचिकादेशाः ॥ उक्तेऽर्थे नासिकाया नतेऽभिधेये इनपिटकाः प्रत्ययाः स्युः ॥ निशब्दस्य चिकचिचिका यथाक्रममादेशाश्च ॥६७॥

(त०) इनपिटका इति ॥ यथाक्रमं प्रत्ययत्रयम् आदेशत्रयं च बोध्यम् ॥ ६७ ॥

(क्लिन्नस्य चिल्पिल्चुलो लः प्रत्ययोऽस्य चक्षुषी इत्यर्थे) क्लिन्ने चक्षुषी अस्य चिल्लः । पिल्लः ॥ चुल्लः ॥ ६८ ॥

(सु०) क्लिन्नस्य चिल्पिल्चुलो लः प्रत्ययोऽस्य चक्षुषी इत्यर्थे ॥ अस्य चक्षुषी एतस्मिन्नर्थे क्लिन्नशब्दाल्लप्रत्ययः स्यात् क्लिन्नस्य चिल् पिल् चुल् आदेशाश्च ॥ कथं तर्हि । "स्युः क्लिन्नाक्षे चुल्लचिल्लपिल्लाः क्लिन्नेऽक्ष्णि चाप्यमी" इत्यमरः । इति चेत् अत्राहुः । पुरुषे व्युत्पादितानां तदवयवे लक्षणा बोध्याऽत्र ॥ ६८ ॥

(उपाधिभ्यामासन्नारूढयोस्त्यकः) पर्वतस्यासन्ना भूमिरुपत्यका । आरूढा अधित्यका(क) ॥ ६९ ॥

(सु०) उपाधिभ्यामासन्नारूढयोस्त्यकः ॥ उपाधिभ्यां त्यकः प्रत्ययः स्यात् ॥ आसन्नं समीपम् । आरूढमुच्चस्थानम् । तत्र संज्ञायाम् । पर्वतस्यासन्नं स्थलमुपत्यका । आरूढस्थलमधित्यका । क्षिपकादित्वात् कात्पूर्वत इतीत्त्वं न ॥ ६९ ॥

(कर्मणष्ठो घटते इत्यर्थे) कर्मणि घटते कर्मठः ॥ ७० ॥

(सु०) कर्मणष्ठो घटते इत्यर्थे ॥ सप्तम्यन्तात् कर्मन्शब्दात् ठप्रत्ययः स्यात् घटते चेष्टते इत्यर्थे ॥ 'नो लोपः' इति नलोपः । "कर्मशूरस्तु कर्मठः" इत्यमरः ॥ ७० ॥

(साक्षाद्द्रष्टरि संज्ञायां डिनिः) साक्षाद्द्रष्टा साक्षी ॥ ७१ ॥

(सु०) साक्षाद्द्रष्टरि संज्ञायां डिनिः ॥ द्रष्टर्यर्थे साक्षादित्यव्ययात् डिनिः स्यात् संज्ञायामर्थे ॥ डित्वाट्टिलोपः । इनामिति दीर्घः । साक्षी ॥ ७१ ॥

(इष्टादिभ्यः इनिरनेनेत्यर्थे) इष्टमनेन इष्टी । अधीती । हैयङ्गवीनं श्रोत्रियः क्षत्रियोऽनुपदी इत्यादयो निपात्याः । ह्योगोदोहोद्भवं हैयङ्गवीनम् । छन्दोऽधीते श्रोत्रियः परक्षेत्रे चिकित्स्यः क्षत्रियः । अनुपदमन्वेष्टाऽनुपदी ॥७२॥

(सु०) इष्टादिभ्य इनिरनेनेत्यर्थे ॥ एभ्य इनि प्रत्ययः स्यात् अनेनेत्यर्थे ॥ अधीतमनेनेति अधीती ॥ हैयङ्गवीनं श्रोत्रियः क्षेत्रियोऽनुपदी इत्यादयो निपात्याः ॥ दुह्यते इति दोहः क्षीरम् । ह्योगोदोहस्य विकार इति ह्योगोदोहस्य हियङ्गुरादेशो विका-

---

(क) 'उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका' इत्यमरः । अधित्यकेत्यादौ 'कात्पूर्वत' इतीत्वप्राप्तौ क्षिपकादीनां न' इति निषेधान्नेत्वमिति बोध्यम् ।

रार्थे ईनप्रत्ययश्च निपात्यते । णितो वेति णित्वाद्वृद्धिः । 'वोऽव्यस्वरे' इत्यव् । हैयङ्गवीनं नवनीतम् ॥ छन्दसः श्रोत्रभावो निपात्यते 'तदधीते' इत्येतस्मिन्नर्थे इयप्रत्ययश्च । णितो वेति वृद्ध्यभावः । श्रोत्रियः ॥ परक्षेत्रशब्दात् सप्तम्यन्तात् इयप्रत्ययः परशब्दलोपश्च निपात्यते । क्षेत्रियो व्याधिः शरीरान्तरे चिकित्स्यः । अप्रतीकार्यं इत्यर्थः । अनुपदशब्दादन्वेष्टरि इन् प्रत्ययो निपात्यते । पदस्य पश्चादनुपदम् ॥ ७२ ॥

(**आख्याताव्ययसर्वादेष्टेः प्रागकः**) पचतकि । उच्चकैः । नाचकैः । सर्वकः । अयकम् । असकौ । त्वकम् अहकम् ॥ ७३ ॥

(सु०) आख्याताव्ययसर्वादेष्टेः प्रागकः ॥ एषां टेः प्राक् अकप्रत्ययः स्यात् स्वार्थे ॥ अन्त्योऽकार उच्चारणार्थः ॥ ७३ ॥

(**त्यतनौ**) भवाद्यर्थे त्यतनौ प्रत्ययौ स्तः अव्ययात् ॥ कुत्र भवः कुत्रत्यः । कुतस्त्यः । अमात्यः । इहत्यः ॥ अव्ययस्य तद्धितयस्वरयोष्टिलोपः ॥ बहिर्भवो बाह्यः । स्वः स्वर्गस्तत्र भवः सौवः । पौनः पुन्यम् । पौनः पुनिकः ॥ ७४ ॥

(सु०) त्यतनौ ॥ भवाद्यर्थे एतौ स्तः ॥ अमेहक्वतसूत्रेभ्य एव त्यः । अमाऽन्तिकसहार्थयोः । अमा भवः अमात्यः ॥ ७४ ॥

(**दक्षिणापश्चात्पुरसस्त्यण्**) दाक्षिणात्यः । पाश्चात्त्यः । पौरस्त्यः । ऐषमस्त्यम् । ऐषमस्तनम् ॥ ७५ ॥

(सु०) दक्षिणापश्चात् पुरसस्त्यण् ॥ एभ्यस्त्यण् स्यात् भवाद्यर्थे ॥ दक्षिणेत्यादन्तमव्ययम् । दक्षिणा भवः दाक्षिणात्यः ॥ ऐषमोह्यस्श्वस्भ्यो वा त्यः । पक्षे तनः ॥ अत्र वर्षे ऐषमः । अतीतेऽह्नि ह्यः । आगामिदिने श्वः ॥ ७५ ॥

(**श्वसस्तिकण्वा**) शौवस्तिकम् । अद्यतनः । ह्यस्तनः । श्वस्तनः ॥ सनातनः । सदातनः । पुरातनः । दोषातनः । सायंतनः । चिरन्तनः । प्राह्णेतनः ॥ ७६ ॥

(सु०) श्वसस्तिकण्वा ॥ श्वसव्ययात्तिकणपि स्यात् ॥ श्वो भवमिति द्वारादित्वात् युडागमवृद्धी । शौवस्तिकम् ॥ कालवाचिभ्योऽव्ययेभ्यः सायंचिरंप्राह्णेप्रगे इति चतुर्भ्यश्च तनः स्यात् ॥ दोषेति रात्रौ । दोषा भवः दोषातनः ॥ प्राह्णतनः ॥ प्रगे प्रातर्भवः प्रगेतनः । सप्तम्या अलुक् उभयत्र ॥ स्यतेर्घञि आतो युगिति युकि कृते सायशब्दोऽकारान्तो दिवसावसाने रूढः तस्य चिरशब्दोऽप्यदन्तस्तस्यापि प्रत्ययसंनियोगेन मान्तत्वं प्राह्णप्रगयोरेदन्तत्वं च निपात्यते इति वार्तिककृन्मतम् । भाष्ये तु सायं चिरं च मान्तमव्ययं स्वीकृतम् ॥ ७६ ॥

(त०) शौवस्तिकमिति ॥ श्वो भवमिति विग्रहः । द्वारादित्वाद्वकारात्पूर्वं युटि कृते पश्चाद्वृद्धिः ॥ प्राह्णेतन इति ॥ एदन्तत्वं निपातनात् ॥ ७६ ॥

(स्वार्थेऽपि) उक्ता वक्ष्यमाणाश्च प्रत्ययाः स्वार्थे स्युः(क) ॥ देवदत्त एव दैवदत्तकः। चोर एव चौरः। वय एव वायसः। रक्ष एव राक्षसः। चत्वारो वर्णाश्चातुर्वर्ण्यम्। समीपमेव सामीप्यम्। चत्वारो वेदाश्चातुर्वैद्यम्। प्रज्ञः एव प्राज्ञः। चातुराश्रम्यम्। त्रैलोक्यम्। अनन्त एवानन्त्यम्। आवसथ एवावसथ्यम्। इतिह एव ऐतिह्यम्। भेषजमेव भैषज्यम्॥७७॥

(सु०) स्वार्थेऽपि ॥ प्रकृत्यर्थेऽप्यणादयः स्युः ॥ देवदत्त एव दैवदत्तकः। णितो वेति णित्वाद् वृद्धिः ॥ चोर एव चौरः ॥ वय एव वायसः ॥ रक्ष एव राक्षसः। अण् चत्वारश्च ते वर्णाश्च चतुर्वर्णाः चतुर्वर्णा एव चातुर्वर्ण्यम्। ण्यः ॥ चतुरो वेदानधीते इति तद्धितार्थे द्विगुः। तमधीत इत्यर्थेऽण् तस्य लुक् च। चतुर्वेद एव चातुर्वैद्यः। ण्यः ॥ उभयत्र वृद्धिः ॥ चत्वारश्च ते वेदाश्च चतुर्वेदाः चतुर्वेदा एव चातुर्वैद्यमिति वा ॥ प्रज्ञ एव प्राज्ञः। अण् ॥ चत्वार आश्रमा एव चातुराश्रम्यम्। ण्यः ॥ त्रयश्च ते लोकाश्च त्रिलोकाः त्रिलोका एव त्रैलोक्यम् ॥ अनन्त एव आनन्त्यः। ण्यः ॥ आवसथ एवेति उपसर्गे वसेरथप्रत्ययः आवसथ्यं गृहम्। ण्यः ॥ इतिहेति निपातसमुदायः। ऐतिह्यम्। ण्यः ॥ भिषज्यतेः कण्ड्वादियगन्तात् क्विप्। भिषक् भिषजामिदं भेषजम्। अणि निपातनादेकारः ॥ भैषज्यम्। ण्यः ॥ ७७ ॥

(त०) स्वार्थेऽपीति ॥ वय एव वायस इति। स्वार्थिकाः प्रकृतितो लिङ्गवचनानि न व्यभिचरन्तीत्यस्यौत्सर्गिकत्वाल्लिङ्गविपर्ययः ॥ ७७ ॥

(भागरूपनामभ्यो धेयः) भाग एव भागधेयम्। नामधेयम्। रूपधेयम् ॥ ७८ ॥

(सु०) भागरूपनामभ्यो धेयः ॥ एभ्यो धेयप्रत्ययः स्यात्स्वार्थे ॥ "दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः" इति "आख्याह्वे अभिधानं च नामधेयं च नाम च" इति चामरः ॥ ७८ ॥

(देवात्तः) देव एव देवता ॥ ७९ ॥

(सु०) देवात्तः ॥ देवशब्दात्तप्रत्ययः स्यात् स्वार्थे ॥ तान्तं स्त्रियाम् ॥ ७९ ॥

(मृदस्तिकः) मृदेव मृत्तिका ॥ ८० ॥

(सु०) मृदस्तिकः ॥ मृद्शब्दात्तप्रत्ययः स्यात् स्वार्थे ॥ ८० ॥

(सस्नौ प्रशंसायाम्) प्रशस्ता मृत् मृत्सा। मृत्स्ना ॥ ८१ ॥

(सु०) सस्नौ प्रशंसायाम् ॥ रूपप्रत्ययस्यापवादौ मृदः सस्नौ प्रत्ययौ स्तः प्रशंसायामर्थे ॥ "मृन्मृत्तिका प्रशस्ता तु मृत्सा मृत्स्ना च मृत्तिका" इत्यमरः ॥ ८१ ॥

(अणिनयोर्युष्मदस्मदोर्युष्माकास्माकौ) युवयोर्युष्माकं वाऽयं यौष्माकः। यौष्माकीणः। आवयोरस्माकं वाऽयम् आस्माकः। आस्माकीनः॥८२॥

(क) स्वार्थिका प्रकृतितो लिङ्गवचनानि न व्यभिचरन्तीत्यस्यौत्सर्गिकत्वाल्लिङ्गविपर्ययः।

(सु०) अणीनयोर्युष्मदस्मदोर्युष्माकास्माकौ ॥ एतयोर्द्वित्वे बहुत्वे च वर्तमानयोर्युष्माकास्मकादेशौ स्तः अणीनयोः परतः ॥ ८२ ॥

(त०) अणीनयोरिति ॥ आदेशे यथासंख्यं न तुप्रत्यये ॥ ८२ ॥

(एकत्वे तवकममकौ) तवायं तावकः । ममायं मामकः । तावकीनः । मामकीनः ॥ ८३ ॥

(सु०) एकत्वे तवकममकौ ॥ एकत्वे वर्तमानयोर्युष्मदस्मदोस्तवकममकावादेशौ स्तः अणीनयोः परतः ॥ ८३ ॥

(वत्तुल्ये) साद्दश्येऽर्थे वत्प्रत्यः ॥ चन्द्रेण तुल्यं चन्द्रवत् । ब्राह्मणवत् । क्षत्रियवत् । मथुरायामिव मथुरावत् । पाटलिपुत्रे इव प्राकारः पाटलिपुवत् । चैत्रस्येव चैत्रवत् मैत्रस्य गृहम् ॥ ८४ ॥

(सु०) वत्तुल्ये ॥ तुल्यते साद्दश्येनोन्मीयते ज्ञायते इति 'तुल उन्माने' अस्मात् क्यप् तुल्यम् । यद्वा तोलनं तुला । षेरभावे भिदादङ् । तुलया संमितं तुल्यम् । कारकादिति ण्यः । णितो वेत्यणित्वम् । तृतीयान्तात् सप्तम्यन्तात् षष्ठ्यन्ताच्च वत्प्रत्ययः स्यात् तुल्ये साद्दश्येऽर्थे ॥ ब्राह्मणेन तुल्यं ब्राह्मणवदधीते ॥ तृतीयान्तात् तु क्रियातुल्ये इव गुणतुल्ये मा भूत् । पुत्रेण तुल्यः स्थूलः ॥ द्रव्यतुल्येऽपि न । गवा तुल्यो गवयः ॥ सप्तम्यन्तात् षष्ठ्यन्ताच्च क्रियातुल्येऽपि भवतीत्यर्थः । मथुरावत् पाटलिपुत्रे प्राकारः । मथुरायां याद्दशः प्राकारस्ताद्दशः पाटलिपुत्रे इत्यर्थः ॥ ८४ ॥

(त०) वत्तुल्ये इति ॥ अत्र क्रियाग्रहणमनुवर्तते । तच्च तुल्येन सम्बध्यते । तेन तुल्यायां क्रियायामित्यर्थो लभ्यते (क) । तोलनं तुला तया संमितमिति विग्रहे कारकादिति ण्यप्रत्यये णितो वेति णित्वाभावाद्वृद्ध्यभावः । चतुर्वेदित्यादिनिर्देशात् क्रियासादृश्याभावेऽपि षष्ठ्यन्तात्सप्तम्यन्ताच्च भवति इत्याशयेनाह—मथुरावदित्यादि ॥ योगविभागान्महानसवदित्यादावक्रियासाम्येऽपि भवति ॥ ८४ ॥

(अर्हेऽपि) विधिमर्हति विधिवत् ॥ ८५ ॥

(सु०) अर्हेऽपि ॥ अर्हेऽर्थेऽपि द्वितीयान्ताद्वत् स्यात् क्रियातुल्ये ॥ विधिमर्हति विधिवत्पूज्यते । विधानं विधिः । अर्हतीति अर्हः पचाद्यः ॥ ८५ ॥

(भावे तत्वयणः) शब्दस्य प्रवृत्तिनिमित्तं भावस्तत्र वाच्ये एते स्युः(ख) ॥ तान्तं स्त्रियाम् । त्वान्तं क्लीबम् । ब्राह्मणता ब्राह्मणत्वम् ब्राह्मण्यम् ॥ शुक्लता । शुक्लत्वम् । शौक्ल्यम् ॥ वैदुष्यम् ॥ ८६ ॥

(क) केचित्तु—तुल्य इति सामान्योक्तेर्विवक्षितार्थप्रयोगदर्शनात् पुत्रतुल्यस्थूल इत्यादौ अपि अस्तीत्यादिक्रियाध्याहाराद्गिरिगज इत्यादाविव वत्प्रत्ययेऽप्यदोषात्तृतीयान्तात्क्रियातुल्य इत्यादिविवक्षा नेति । चन्द्र इव घट इव.पटस्येवेति प्रथमासप्तमीषष्ठ्यन्तादपि वदित्याहुः ।

(ख) इदमर्थे प्राप्तस्यापवादोऽयम् । शब्दस्य प्रवृत्तिनिमित्तमिति । शक्यतावच्छेदकपरम् । कचिज्जातिः । कचिद्धर्मः । कचिदुपाधिर्वा ।

(सु०) भावे तत्वयणः ॥ तश्च त्वश्च यण् च ते तत्वयणः । भावे तत्वयणः प्रत्यया अणादयश्च स्युः ॥ भावशब्दोऽनेकार्थवचनः । अभिप्राये यथा अयं भावः। पदार्थमात्रे यथा । विचित्रा भावशक्तयः । शृङ्गारादिषु यथा । स्थायिभावः सञ्चारिभावः(क) । प्रवृत्तिनिमित्ते धात्वर्थमात्रे च भावः । तेष्वत्र कस्य ग्रहणम् । उच्यते । प्रवृत्तिनिमित्तवचनस्य भावस्यात्र ग्रहणम् । भवन्ति शब्दा अनेनेति व्युत्पत्तेः । अभिप्रायादिवचनस्यात्र अग्रहोऽनभिधानात् । तथा च सिद्धान्तकौमुद्यां प्रकृतिजन्यबोधे प्रकारो भाव इति । उक्तं च हरिटीकायाम् । कृत्तद्धितसमासेभ्यः सम्बन्धाभिधानं भावप्रत्ययेनेति। तेन पाचकत्वमित्यत्र कर्तृत्वरूपः सम्बन्धः ॥ औपगवत्वमित्यत्र जन्यत्वरूपः सम्बन्धः । राजपुरुषत्वमित्यत्र स्वत्वरूपसम्बन्धः ॥ तप्रत्ययान्तं स्त्रीलिङ्गम् । त्वप्रत्ययान्तं नपुंसकम् । यणन्तमुभयत्र । मैत्र्यं मैत्रीत्यादि । ब्राह्मणस्य भावः । यस्येत्यलोपः । ब्राह्मण्यम् । शुक्लाया भावः स्वतलोर्गुणवचनस्येति पुंवद्भावः । शुक्लत्वम् ॥ ८६ ॥

(त०) भावे तत्वयण इति ॥ तश्च त्वश्च यण् च ते ॥ भावशब्दोऽभिप्रायाद्यनेकार्थोऽप्यत्र प्रवृत्तिनिमित्तवचन एव गृह्यते न त्वभिप्रायाद्यर्थः । प्रवृत्तिनिमित्ताभिन्नानामनभिधानादित्याशयेनाह—शब्दस्येत्यादि ॥ प्रवृत्तेर्निमित्तं प्रवृत्तिनिमित्तं तस्मिन् प्रत्यया इत्यर्थः । अणन्तमुभयत्र । मैत्र्यम् । मैत्री ॥ ८६ ॥

(कर्मण्यपि) ब्राह्मणस्य कर्म ब्राह्मण्यम् । राज्यम् । स्तैन्यम् ॥८७॥

(सु०) कर्मण्यपि ॥ कर्मण्यर्थेऽपि तत्वयणः प्रत्यया अणादयश्च स्युः ॥ राज्ञो भावः कर्म वा नो वेति टिलोपः । राज्यम् । यण् ॥ स्तेनस्य चोरस्य भावः कर्म वा स्तैन्यम् । यण् ॥ ८७ ॥

(त०) कर्मण्यपीति ॥ अत्र क्रियानुवृत्तेः क्रियायामित्यर्थः ॥ ८८ ॥

(लोहितादेर्डिमन् भावे वा) लोहितिमा । लोहितता । लोहितत्वम् । लौहित्यम् । अणिमा । लघिमा । महतो भावो महिमा ॥ ८८ ॥

(सु०) लोहितादेर्डिमन् भावे वा ॥ लोहितादेर्गणात् डिमन् प्रत्ययस्तादयश्च भावे ॥ लोहितस्य भावः । डित्वाट्टिलोपः । लोहितिमा ॥ अणोर्भावः अणिमा ॥ लघोर्भावः लघिमा ॥ महतो भावः । टिलोपः महिमा ॥ ८८ ॥

(त०) लोहितिमेति ॥ लोहितस्य भाव इत्यर्थः ॥ ८८ ॥

(भावेऽणपि) लाघवम् । गौरवम् । यौवनम् । शैशवम् । मौनम् । हौत्रम् । औद्गात्रम् ॥ ८९ ॥

(सु०) भावेऽणपि ॥ अण् प्रत्ययोऽपि स्यात् भावे ॥ गुरोर्भावो गौरवम् । 'यो-

---

(क) साहित्यिकानां मतमिदम् । निर्विकारात्मिके चित्ते भावः प्रथमविक्रिया। तत्र स्थायिभावो यथा

अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः ।

आस्वादाङ्कुरकन्दोऽसौ भावः स्थायीति कथ्यते ॥ इति ।

तथा च—अन्तःकरणवृत्तिस्वरूपस्य रत्यादेराशुविनाशित्वेऽपि संस्कारात्मना चिरकालमवस्थायित्वा-यावद्रसप्रतीतिकालमनुसन्धानाच्च स्थायित्वम् सञ्चारित्वं । व्यभिचारिभावत्वम् । 'रत्यादयोऽप्यनियते रसे-स्युर्व्यभिचारिणः' इति विश्वनाथः ।

ऽव् यस्वरे' इत्यव् ॥ यूनो भावः नो वेति टिलोपो न यौवनम् ॥ शिशोर्भावः शैशवम् ।
मुनेर्भावः मौनम् ॥ होतुर्भावः हौत्रम् ॥ उद्गातुर्भावः औद्गात्रम् ॥ ८९ ॥

(त०) लाघवमिति लघोर्भाव इति विग्रहः ॥ ८९ ॥

(ऋ र इमनि) हसादेर्लघोर्ऋकारस्य रेफो भवति इमनि इष्ठेयसो-
श्च(क) ॥ पृथोर्भावः प्रथिमा । म्रदिमा । क्रशिमा । द्रढिमा ॥ लघोः किम् ।
कृष्णिमा ॥ हसादेः किम् । ऋजिमा ॥ ९० ॥

(सु०) ऋ र इमनि ॥ ऋ इति षष्ठ्यन्तं सांकेतिकम् ॥ पृथोर्भावः । टिलोपः
रत्वम् प्रथिमा । अणपि । पार्थवम् । मृदोर्भावः म्रदिमा, मार्दवम् ॥ कृशस्य भावः क्र-
शिमा ॥ दृढस्य भावः द्रढिमा ॥ कृष्णस्य भावः कृष्णिमा । लघोरभावान्न रत्वम् ॥
ऋजोर्भावः ऋजिमा । हसादित्वाभावान्न रत्वम् ॥ ९० ॥

(त०) ऋ र इमनि ॥ प्रयोगानुसरणमेव हसादेर्लघोरिति व्याख्याने शरणम् ।९०।

(बहोर्लोपो भू च बहोः) बहोः परेषामिमनादीनामिवर्णस्य
लोपो बहोर्भूरादेशश्च ॥ बहोर्भावो भूमा ॥ ९१ ॥

(सु०) बहोर्लोपो भू च बहोः ॥ बहुरुदन्तः । शेषं सुगमम् ॥ ९१ ॥

(त०) बहोरिति ॥ बहोरिति पञ्चम्यन्तम् । ततश्च पञ्चमीनिर्दिष्टत्वाल्लोप इवर्णं-
स्यैवेत्याशयेनेवर्णस्येत्युक्तम् । पुनर्ग्रहणात् बहोर्भूस्थानित्वम् ॥ ९१ ॥

(स्तेनाद्यो नलोपश्च) स्तेनस्य कर्म भावो वा स्तेयम् ॥ ९२ ॥

(सु०) स्तेनाद्यो नलोपश्च ॥ स्तेनशब्दाद्यप्रत्ययः स्याद्भावे कर्मणि चार्थे नलो-
पश्च ॥ स्तेन चौर्ये । पचाद्यः । स्तेयं चौर्यम् ॥ ९२ ॥

(समूहेऽर्थेऽपि) मयूराणां समूहो मायूरम् । काकम् । क्षैत्रम् ।
कैदारिकम् । गाणिक्यम् । ताद्धितयस्वरयोः पुंवत् । हास्तिकम् । गार्भिणम् ।
ग्रामता । जनता । बन्धुता । पाश्या । वात्या । खल्या । गव्या । वार्द्धकम् ।
कैदार्यम् । कावचिकम् । ब्राह्मण्यम् । वाडव्यम् । माणव्यम् । गजता । सहायता९३

(सु०) समूहेऽर्थेऽपि ॥ समूहेऽर्थेऽपि अणादयः प्रत्ययाः स्युः ॥ मयूराणां समूहः
अण् । मायूरम् ॥ काकानां समूहः काकम् ॥ क्षेत्राणां समूहः क्षैत्रम् ॥ केदाराणां समूहः।
इकः । णितो वेति णित्वाद्वृद्धिः । कैदारिकम् । गणिकानां समूहः । यण् गाणिक्यम् ॥
हस्तिनां समूहः । इकः । नो वेति टिलोपः । हास्तिकम् ॥ गर्भिणीनां समूहाऽण् । यस्य
लोप इति लोपः । गार्भिणम् । नो वेति टिलोपाऽभावोऽत्र ॥ ग्रामाणां समूहः । तः ।
ग्रामता ॥ जनानां समूहो जनता ॥ बन्धूनां समूहो बन्धुता ॥ पाशानां समूहः । यण् ।
पाश्या ॥ वातानां समूहो वात्या ॥ खलानां समूहः खल्या । णितो वेति न वृद्धिः ॥
गवां समूहो गव्या । 'वोऽव् यस्वरे' इत्यव् ॥ वृद्धानां समूहः । कः । णितो वेति णि-
त्वाद्वृद्धिः । वार्धकम् ॥ केदाराणां समूहः । यण् । कैदार्यम् ॥ कवचिनां समूहः ।

(क) वक्तव्यत्वेन प्रयोगानुसारित्वाद्धसादेर्लघोरित्येव नेह । ऋजिमा । कृष्णिमा ।

इकः । काकचिकम् ॥ ब्राह्मणानां समूहः । यण् । ब्राह्मण्यम् ॥ वाडवानां समूहो वाडव्यम् ॥ माणवानां समूहो माणव्यम् ॥ गजानां समूहः । तः । गजता ॥ सहायानां समूहः सहायता ॥ ९३ ॥

(त०) पाश्येति ॥ पाशानां समूह इति विग्रहः । बोध्यं लोकात् ॥ ९३ ॥

(पश्वां ड्वण्) पर्शूनां समूहः पार्श्वम् । साक्तुकम् । धैनुकम् । रथ्या ॥ ९४ ॥

(सु०) पश्वां ड्वण् ॥ पर्शुशब्दात् ड्वण् प्रत्ययः स्यात् । समूहे । डित्त्वाट्टिलोपः ॥ पर्शूनां समूहः पार्श्वम् ॥ सक्तूनां समूहः साक्तुकम् ॥ धेनूनां समूहः धैनुकम् ॥ रथानां समूहः । यण् । णितो वेति न वृद्धिः । रथ्या ॥ ९४ ॥

(त०) पार्श्वमिति ॥ डित्वाट्टिलोपः ॥ ९४ ॥

(खलगोरथेभ्य इनित्रकट्याः) खलिनि । गोत्रा । रथकट्या ॥ ९५ ॥

(सु०) खलगोरथेभ्य इनित्रकट्याः ॥ खलादिभ्यः क्रमात् एते स्युः ॥ खलानां समूहः । नृण इतीप् । खलिनी ॥ गवां समूहो गोत्रा ॥ रथानां समूहो रथकट्या ॥ ९५ ॥

(त०) खलगोरथेभ्य इति ॥ यथासंख्यं प्रत्ययाः ॥ खलिनीति ॥ खलानां समूहः । एवमन्यत्रापि ॥ ९५ ॥

(हिते च) सूर्याय हितः सूरीयः । आत्मनीनः । विश्वजनीनः(क) । मातृभोगीणः । अपूपाय हितम् अपूप्यम् । अपूपीयम् । आमिक्ष्यम्—आमिक्षीयम् । शङ्कव्यम् । गव्यम् । हविष्यम् । खल्यम् । यव्यम् ॥ ९६ ॥

(सु०) हिते च ॥ अणादयः प्रत्यया हितेऽर्थे च स्युः ॥ सूर्याय हित इति सूर्यागस्त्ययोरीये ईपि चेति यलोपः सूरीयः । णीयः ॥ आत्मने हितः । नो वेत्यस्य टिलोपो न । आत्मनीनः । ईनः ॥ विश्वजनाय हितः विश्वजनीनः । कर्मधारयादेवेष्यते । विश्वस्य जनः सर्वसाधारणो वेश्यादिरिति तत्पुरुषे विश्वो जनोऽस्येति बहुव्रीहौ च विश्वजनाय हितं विश्वजनीयम् । णीय एव ॥ मातुर्भोगः शरीरं मातृभोगः । मातृभोगाय हितः मातृभोगीणः । णत्वम् । "भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः" इत्यमरेण यद्यप्यहेरित्युक्तं तथापि प्रयोगबाहुल्याभिप्रायम् । तच्छक्तिस्तु शरीरमात्रेऽप्यस्ति इत्याकरः ॥ अपूपेभ्यो हितम् अपूप्यं चूर्णम् । ण्यः । णितो वेति न वृद्धिः अपूपीयः । णीयः ॥ आमिक्षायै हितं ण्यणीयौ । आमिक्ष्यम्-आमिक्षीयम् । 'हविः सान्नाय्यमामिक्षा शृतोष्णक्षीरगं दधि' इति हैमः ॥ आमीयते क्षिप्यते दधि यत्र सा आमिक्षा ॥ शङ्कवे हितं शङ्कव्यम् । ण्यः । णितो वेति न वृद्धिः । वोऽवित्यव् ॥ गवे हितं गव्यम् ॥ हविषे हितं हविष्यम् ॥ खलाय हितं खल्यम् ॥ यवेभ्यो हितं यव्यम् ॥ ९६ ॥

(त०) सूरीय इति ॥ सूर्यागस्त्ययोरितीये यलोपः ॥ ९६ ॥

(क) विश्वजनीन इति । विश्वजनाय हितः विश्वजनीनः । कर्मधारयादेवेष्यते । विश्वस्य जनः सर्वसाधारणो वेश्यादिरिति तत्पुरुषे विश्वो जनोऽस्येति बहुव्रीहौ च विश्वजनाय हितं विश्वजनीयम् । णीय एव ।

(शुनो वस्य उर्वा च दीर्घः) शुने हितं शून्यम् , शुन्यम्॥९७॥

(सु०) **शुनो वस्य उर्वा च दीर्घः** ॥ श्वन्शब्दस्य वकाराकारयोरुत्वं भवति उतश्च वा दीर्घः । नो वेति टिलोपो न भवति वाशब्दस्य व्यवस्थार्थत्वात् ॥ शून्यम् । शुन्यम् ॥ ९७ ॥

(ऊधसो नङ्) ऊधन्यः ॥ ९८ ॥

(सु०) **ऊधसो नङ्** ॥ ऊधस्शब्दस्य नङादेशो भवति ॥ ङित्वादन्त्यस्य स्थाने नङ् । अकार उच्चारणार्थः ॥ ऊधसे हितः । ञितो वेति न वृद्धिः । ऊधन्यः ॥ ९८ ॥

(त०) ऊधन्य इति ॥ ऊधसे हितः ॥ ९८ ॥

(अजाविभ्यां थ्यः) अजथ्या । अविथ्या ॥ ९९ ॥

(सु०) **अजाविभ्यां थ्यः** ॥ आभ्यां थ्यप्रत्ययः स्याद्धितेऽर्थे ॥ अजेभ्यो अजाभ्यो वा हिता अजथ्या । थ्यप्रत्ययस्य तरादौ पाठात् पुंवद्भावे रूपं तुल्यम् । अविभ्यो हिता अविथ्या ॥ सर्वस्मै हितं सार्वम् । अण् सार्वीयम् । णीयः वृद्धिः ॥ ९९ ॥

(त०) **अजथ्येति** ॥ अजायै हिता ॥ ९९ ॥

(अस्त्यर्थे मतुः)नाम्नः (क)॥गावोऽस्यास्मिन्वा सन्ति गोमान्। श्रीर्विद्यतेऽस्य श्रीमान् । विदुष्मान् । गोमती ॥ १०० ॥

(सु०) **अस्त्यर्थे मतुः** ॥ प्रथमान्तान्नाम्नो मतुप्रत्ययो भवति अस्यास्तीत्यर्थे अस्मिन्नस्तीत्यथ च ॥ उदित्वात्पुंसि ञितो नुमिति नुम् । स्त्रियां च ङ्वित इतीप् । क्लीबे शौ नुम् । "भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ॥ सम्बन्धेऽस्तिविवक्षायां भवन्ति मत्विनादयः(ख) ॥ १ ॥" अस्तीत्यस्य विवक्षायां ये मत्वादयः प्रत्यया विधीयन्ते ते भूमादिषु विषयेषु भवन्ति । भूमा बहुत्वम् । यथा गावोऽस्यास्मिन्वा सन्ति स गोमान् ॥ निन्दायां यथा । ककुदावर्तिनी कन्या ॥ प्रशंसायां यथा । रूपवान् ॥ नित्ययोगे यथा । क्षीरिणः वृक्षाः ॥ अतिशायने यथा । उदरिणी कन्या ॥ सम्बन्धः संसर्गः । संयोग इति यावत् । तत्र यथा । दण्डी पुरुषः ॥ श्रीरस्ति अस्यास्मिन्वा श्रीमान् विद्वांसोऽस्यास्मिन्वा सन्ति वसोर्व उरित्युत्वे षत्वम् । विदुष्मान् देशः ॥ ङ्वित इतीप् । गोमती ॥१००॥

(त०) **अस्त्यर्थे मतुरिति** ॥ अस्तीत्यत्र । लिङ्गवचने अविवक्षिते । कालस्तु विवक्षितः । तथा चास्तिकर्तृभूतात्प्रथमान्तान्नाम्नः भूमाद्यर्थे मतुप्रत्ययः । अस्तीत्यनेन स्वाम्याधारयोराक्षेपः । एवं च प्रथमान्तान्नाम्नोऽस्तिकर्तुरस्यास्मिन्नित्यर्थे मतुरिति पर्यवसितोऽर्थः । उक्तं च । "भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने । संसर्गेऽस्तिविवक्षायां जायन्ते मत्विनादयः ॥" अत्र दीक्षिताः । अस्तिविवक्षायां ये मतुबादयो विधीयन्ते ते भू-

---

(क) अस्त्यर्थे इति । अस्तेरर्थोऽस्त्यर्थो विद्यमानार्थस्तस्मिन्नाम इति प्रथमान्तपरम् । ततश्च प्रथमान्तान्नाम्नोऽस्त्युपाधिकान्मतुरित्यर्थः । अस्याऽस्मिन् वास्तीत्यर्थः ।

(ख) अत्र केचित्—

अस्ति विवक्षायां ये मतुबादयो विधीयन्ते ते भूमादिषु विषयेषु भवन्तीति वार्त्तिकार्थः । भूमा बहुत्वम् तच्चापेक्षा यस्य यावता तस्य तावता बोध्यम् । भूम्नि गोमान् ।।अन्यट्टीकायां बोध्यम् ।

मादिषु विषयेषु भवन्तीतिवार्तिकार्थः । भूमा बहुत्वम् । तदपेक्षा यस्य यावता तस्य तावता बोध्यम् । भूम्नि गोमान् ॥ निन्दायां ककुदावर्तिनी कन्या ॥ प्रशंसायां रूपवान् ॥ नित्ययोगे क्षीरिणो वृक्षाः ॥ अतिशायने उदरिणी कन्या ॥ संसर्गे दण्डी । संसर्गः संयोगः तेन संयुक्त एव न तु गृहावस्थितोऽपि दण्डः । एतेन एतदुदाहृत्य अस्त्यर्थोदाहरणं चोक्तमित्युक्तवन्तो वासुदेवादयो निरस्ताः । यद्यपि यदस्य तदस्मिन्नपि यदस्मिन् तदस्य भवत्येवेत्युभयनिर्देशो व्यर्थस्तथापि वृक्षवान्पर्वतः पुत्रवांश्चैत्र इत्यत्र पर्वते वृक्षसम्बन्धस्य चैत्रे पुत्राधारत्वस्य चासत्त्वादुभयनिर्देशः । असन्निहितपुत्रस्यापि पुत्रवानिति प्रतीतेः सामीपिकाधारत्वस्य विवक्षणादिति ॥ १०० ॥

(अइकौ च मत्वर्थे) नाम्नः अः इकस्त्वदन्तात्(क) ॥ अर्शसः । वैजयन्तः । दण्डिकः । धनिकः ॥ १०१ ॥

(सु०) अइकौ च मत्वर्थे ॥ प्रत्ययभ्रमनिरासाय संधिरत्र न कृतः ॥ अइकाविति-निर्देशेन समासे संहिताया अनित्यत्वं ज्ञापितम् । तेन पदान्तानां समानानामृतीत्यनेन सप्तऋषीणामित्यत्र वा संहिता भवति ॥ अर्शोऽस्यास्मिन्वाऽस्ति अर्शसः ॥ वैजयन्ती पताकाऽस्यास्मिन्वाऽस्ति वैजयन्तः । अः ॥ इकप्रत्ययस्तु अकारान्तादेव । दण्डोऽस्यास्मिन्वाऽस्ति दण्डिकः ॥ धनमस्यास्मिन्वाऽस्ति धनिकः । इकः ॥ १०१ ॥

(त०) अइकाविति ॥ अश्च इकश्च तौ । सन्ध्यभावोऽसन्देहार्थः ॥ १०१ ॥

(मान्तोपधाद्वन्विनौ) मान्तान्मान्तोपधादवर्णान्तादवर्णोपधाच्च वतुरिनस्त्वदन्तात् ॥ किम्वान् । लक्ष्मीवान् । धनवान् विद्यावान् । यशस्वान्(ख) । भास्वान् । क्षेत्री । दण्डी ॥ १०२ ॥

(सु०) मान्तोपधाद्वन्विनौ ॥ मश्च अश्च मौ अन्तश्च उपधा च अन्तोपधे मौ अन्तोपधे यस्य तत् मान्तोपधं तस्मान्मान्तोपधात् प्रथमान्ताद्वन्विनौ प्रत्ययौ भवतः अस्त्यर्थे । इन् प्रत्ययस्तु अकारान्तादेव ॥ मतोरपवादोऽयं विधिः ॥ यथासंख्यं तु न गुरुकरणात् । तथाहि । म् अन्ते यस्य तन्मन्तम् । अ उपधा यस्य तत् ओपधं मन्तं च औपधं मन्तं च ओपधं च अनयोः समाहारो मन्तौपधं तस्मान्मतौपधात् । इत्थं हि स्पष्टं यथासंख्यं लभ्यते । तदकरणाद्यथासंख्याभावः ॥ वतोरकारो त्रितो नुमिति नुमर्थः । इन्नित इतीवर्थश्च । किमस्यास्मिन्वाऽस्ति किंवान् ॥ लक्ष्मीरस्यास्मिन्वाऽस्ति लक्ष्मीवान् ॥ धनमस्यास्मिन्वाऽस्ति धनवान् ॥ विद्याऽस्यास्मिन्वाऽस्ति विद्यावान् ॥ यशोऽस्यास्ति अस्मिन्वाऽस्ति यशस्वान् ॥ भाः अस्यास्मिन्वाऽस्ति भास्वान् ॥ क्षेत्रमस्यास्मिन् वाऽस्ति क्षेत्री ॥ दण्डोऽस्यास्मिन्वाऽस्ति दण्डी ॥ १०२ ॥

(त०) मान्तोपधादिति ॥ मश्च अश्च मौ अन्तश्च उपधा च अन्तोपधे मौ अन्तो-

---

(क) अइकाविति सन्ध्यभावोऽसन्देहार्थः ।

(ख) यशस्वानिति । तान्तसान्तयोर्हसादावस्त्यर्थे अपदान्तता वाच्या । अतो न विसर्गः । यस्वरयोस्तु सर्वेषाम् भवदीय इत्यत्र तु सहादित्वाद् त्वं बोध्यम् । केचित्तु—अपदान्तेऽपि क्वचित्त्वपस्य जत्वं भवतीति वदन्ति । तेन भवदीय इति दत्वम् ।

पधे यस्य तस्मातोपधं तस्मात् । यथासंख्यं नाशङ्कनीयं लाघवमुत्सृज्य गौरवस्यानाश्रितत्वात् । तथाहि । मन्तौपधादित्येवोच्येत । म् अन्तं यस्य तन्मन्तम् । अ उपधा यस्य तद् ओपधं मन्तं च ओपधं च मन्तौपधं तस्मात् ओदौतोर्लाघवगौरवयोर्विशेषाभावात् । इत्याशयेनाह–मकारान्तादित्यादि ॥ यशस्वानिति ॥ तान्तसान्तयोर्हसादावस्त्यर्थे अपदान्तता वाच्या अतो न विसर्गः । यत्वरयोस्त सर्वेषाम् । भवदीय इत्यत्र तु सहादित्वाद्दत्वं बोध्यम्(क) ॥ १०२ ॥

यवादेर्न) यवमान् । भूमिमान् ॥ १०३ ॥

(सु०) **यवादेर्न** ॥ यवादेर्गणान्मतुरेव स्यात् वत्विनौ न ॥ यवा अस्यास्मिन् वा सन्ति यवमान् ॥ भूमिरस्यास्मिन्वाऽस्ति भूमिमान् ॥ १०३ ॥

(त०) **यवादेर्नेति** ॥ णितो वेत्यस्य व्यवस्थितस्य मण्डूकप्लुत्याऽनुवर्तनान्नेत्यर्थः॥

(तडिदादिभ्यश्च) ताडित्वान् । विद्युत्वान् । मायी । मायिकः । व्रीही । व्रीहिकः ॥ १०४ ॥

(सु०) **तडिदादिभ्यश्च** ॥ एभ्यो वतुइकइन्प्रत्ययाः स्युः अस्त्यर्थे ॥ तडिदस्यास्मिन् वाऽस्ति तडित्वान् ॥ विद्युदस्यास्मिन् वाऽस्ति विद्युत्वान् ॥ मायाऽस्यास्मिन् वाऽस्ति मायी । इन् ॥ मायिकः । इकः ॥ व्रीहयोऽस्यास्मिन् वा सन्ति व्रीहि । इन् व्रीहिकः । इकः ॥ १०४ ॥

(त०) **तडित्वानिति** ॥ अपदान्तत्वान्न दत्वम् ॥ १०४ ॥

(लोमपामपिच्छादिभ्यः शनेलाः) लोमशः । गिरिशः । पामनः । दद्रुणः । अङ्गना ॥ १०५ ॥

(सु०) **लोमपामपिच्छादिभ्यः शनेलाः** ॥ लोमादिभ्यः शः, पामादिभ्यो नः, पिच्छादिभ्य इलः, स्यादस्त्यर्थे ॥ लोमान्यस्यास्मिन्वा सन्ति लोमशः । लोमवान् । वतुः ॥ गिरिरस्याऽस्मिन् वाऽस्ति गिरिशः पामास्यास्मिन्वाऽस्ति पामनः ॥ नाम्नो नो लोपशधाविति नलोपः ॥ शाकीपलालीदद्रूणां ह्रस्वत्वं च नप्रत्यये । एषां ह्रस्वः । महच्छाकमस्त शाकी ई । तद्वत् शाकिनम् ॥ महत्पलालं पलाली । तद्वत् पलालिनम् ॥ दद्रुस्त्व रोगविशेषः । दद्रुरस्यास्मिन्वास्ति दद्रुणः । णत्वम् ॥ अङ्गमस्या अस्यां वाऽस्ति अङ्गना ॥ १०५ ॥

(त०) **लोमपामपिच्छादिभ्यः शनेला इति** ॥ यथासंख्यं बोध्यम् ॥१०५॥

(लक्ष्म्या अच्च) लक्ष्मणः ॥ १०६ ॥

(सु०) **लक्ष्म्या अच्च** ॥ लक्ष्मीशब्दस्याकारान्तादेशः स्यान्नप्रत्यये ॥ लक्ष्मीरस्यास्मिन्वाऽस्ति लक्ष्मणः । णत्वम् ॥ १०६ ॥

(त०) **लक्ष्मण इति** ॥ लक्ष्मीरस्यास्तीति विग्रहः ॥ १०६ ॥

(विष्वगित्युत्तरपदलोपश्चाकृतसन्धेः) विषुणः(ख) । पि-

(क) केषांचिन्मते—क्वचिदपदान्तेऽपि चपस्य जवत्वं भवति भवे परे इति । तेन भवदीय इति ।

(ख) यदि कृतसन्धेः स्यात्तदा वलोपे विष्ण इति स्यादित्यत आह—अकृतसन्धेरिति । विषुणा

च्छिलः । तुन्दिलः । फेनिलः ॥ १०७ ॥

(सु०)विष्वगित्युत्तरपदलोपश्चाकृतसन्धेः ॥ विष्वक्शब्दस्योत्तरपदस्य लोपः स्यात् सन्ध्यावकृते सति नप्रत्यये ॥ विषु साम्येऽव्ययम् । विषु अञ्चतीति विष्वक् । विष्वगस्यास्मिन्वाऽस्ति । विषुणः । विषुवदाख्यः कालः । 'समरात्रिंदिवे काले विषुवद्विषुणं (वं) च तत्' इत्यमरः ॥ पिच्छं विकृणमस्यास्मिन् वाऽस्ति पिच्छिलः ॥ तुन्दमस्यास्मिन्वा तुन्दिलः ॥ फेनमस्यास्मिन्वा फेनिलः ॥ उरसिलः । उरस्वान् ॥ पिच्छवान् ॥ १०७ ॥

(त०) विषुण इति ॥ विषु नाना अञ्चन्तीति विष्वञ्चि तान्यस्य सन्तीति विषुणः विषुवदाख्यः कालः । तस्य हि नानागतानि दिनानि सन्ति दिनान्तराणां न्यूनाधिकभावस्य तन्मूलकत्वात् । यदि कृतसन्धेः स्यात्तदा वलोपे विष्ण इति स्यादित्यत आह— अकृतसन्धेरिति ॥ १०७ ॥

(सिध्मादेर्लः) सिध्मलः । चूडालः ॥ १०८ ॥

(सु०) सिध्मादेर्लः ॥ सिध्मादेर्गणाल्लप्रत्ययः स्यादस्त्यर्थे ॥ पक्षे वतुः ॥ सिध्मवान् । वात दन्त बल ललाट वत्स अंसः फेन धमनि क्षुद्रजन्तु उपताप गडु मणि विजय निष्पाठ पांशु हनु पार्ष्णि चूडा सिध्मादयः ॥ पार्ष्णिधमन्योर्दीर्घश्च । पार्ष्णीलः । धमनीलः ॥ क्षुद्रजन्तुर्यथा । यूकालः । मक्षिकालः ॥ उपतापो रोगः । विपादिकाऽस्यास्ति विपादिकालः । 'पादस्फोटो विपादिका' इत्यमरः ॥ सिध्ममस्यास्मिन्वाऽस्ति सिध्मलः ॥ चूडाऽस्यास्मिन्वाऽस्ति चूडालः ॥ वातदन्तबलललाटानामूङ् च । वातूलः । इत्यादि ॥ १०८ ॥

(कुमुदनडवेतसेभ्यो ड्मतुः)कुमुद्वान् । नड्वान् । वेतस्वान् ॥ १०९ ॥

(सु०)कुमुदनडवेतसेभ्यो ड्मतुः ॥ एभ्यो ड्मतुप्रत्ययः स्यादस्त्यर्थे ॥ डित्वाट्टिलोपः ॥ कुमुदान्यस्यास्मिन्वा सन्ति कुमुद्वान् । नडा अस्यास्मिन् वा सन्ति नड्वान् ॥ वेतसा अस्यास्मिन् वा सन्ति वेतस्वान् ॥ १०९ ॥

(महिषाड्ड्मतुः) महिष्मान् देशः ॥ ११० ॥

(सु०) महिषाड्ड्मतुः ॥ महिषशब्दात् ड्मतुः स्यादस्त्यर्थे ॥ महिषा अस्यास्मिन् वा सन्ति महिष्मान् । टिलोपः ॥ ११० ॥

(नडशादाद् ड्वलः) नड्वलः । शाद्वलः ॥ १११ ॥

(सु) नडशादाद् ड्वलः ॥ आभ्यां ड्वलप्रत्ययः स्यादस्त्यर्थे ॥ नडा अस्यास्मिन्वा सन्ति नड्वलः । डित्वाट्टिलोपः ॥ शादोऽस्यास्मिन् वाऽस्ति शाद्वलः । 'शादो जम्बालशष्पयोः' इत्यमरः ॥ १११ ॥

(शिखाया वलः) शिखावलः ॥ ११२ ॥

(सु०) शिखाया वलः ॥ शिखाशब्दाद्वलप्रत्ययः स्यादस्त्यर्थे ॥ शिखाऽस्यास्मिन्वाऽस्ति शिखावलः ॥ ११२ ॥

इति । विषु नाना अञ्चन्तीति विष्वञ्चि तान्यस्य सन्तीति विषुणः । विषुवदाख्यः कालः । तस्य हि नानागतानि दिनानि सन्ति । दिनान्तराणां न्यूनाधिकभावस्य तन्मूलकत्वात् ।

(नडादीनामीये कुक्) नडकीयम् ॥ ११३ ॥

(सु०) नडादीनामीये कुक् ॥ नडादीनां कुगागमो भवति णीयप्रत्यये ॥ नड प्लक्ष बिल्व वेत्र वेतस कुञ्चा तक्षन् नडादयः । नडा अस्यास्मिन्वा सन्ति नडकीयम् ॥ ११३ ॥

(कुञ्चा ह्रस्वत्वं च) कुञ्चकीयम् ११४ ॥

(सु०) कुञ्चा ह्रस्वत्वं च ॥ कुञ्चाशब्दस्य ह्रस्वो भवति णीये ॥ कुञ्चाऽस्यास्मिन्वाऽस्ति कुञ्चकीयम् ॥ एवं तक्षकीयम् । निपातनान्नलोपः । बिल्वकीयम् ॥ वेत्रकीयम् ॥ ११४ ॥

(शृङ्गवृन्दाभ्यामारकः) शृङ्गारकः । वृन्दारकः ॥ ११५ ॥

(सु०) शृङ्गवृन्दाभ्यामारकः ॥ आभ्यामारकप्रत्ययः स्यादस्त्यर्थे ॥ शृङ्गमस्यास्मिन्वाऽस्ति शृङ्गारकः । 'शृङ्गं प्राधान्यसान्वोश्च' इत्यमरः ॥ वृन्दमस्याऽस्मिन् वाऽस्ति वृन्दारकः । 'वृन्दारकौ रूपिमुख्यौ' इत्यमरः ॥ ११५ ॥

(फलबर्हाभ्यामिनः) फलिनः । बर्हिणः ॥ ११६ ॥

(सु०) फलबर्हाभ्यामिनः ॥ आभ्यामिनप्रत्ययः स्यादस्त्यर्थे ॥ फलमस्यास्मिन्वाऽस्ति फलिनः ॥ बर्हमस्यास्मिन्वाऽस्ति बर्हिणः । णत्वम् ॥ ११६ ॥

(मलादिनः) मलिनः ॥ ११७ ॥

(ईमसश्च) मलीमसः ॥ ११८ ॥

(हृदयादालुः) हृदयालुः ॥ ११९ ॥

(सु०) हृदयादालुः ॥ हृदयशब्दादालुः प्रत्ययः स्यादस्त्यर्थे ॥ हृदयमस्यास्मिन्वाऽस्ति हृदयालुः । पक्षे हृदयी । हृदयिकः । हृदयवान् ॥ ११९ ॥

(शीतोष्णतृप्रेभ्यस्तदसहने) शीतं न सहते शीतालुः । उष्णालुः । तृप्रं दुःखं न सहते तृप्रालुः ॥ १२० ॥

(सु०) शीतोष्णतृप्रेभ्यस्तदसहने ॥ एभ्य आलुप्रत्ययः स्यात् प्रकृत्यर्थासहनेऽर्थे । शीतं न सहते स शीतालुः ॥ उष्णं न सहते उष्णालुः ॥ तृप्रं दुःखं न सहते तृप्रालुः ॥ तृप्रः पुरोडाशः । तृप्रं दुःखमित्यर्थः ॥ १२० ॥

(हिमादेलुः) हिमं न सहते हिमेलुः ॥ १२१ ॥

(सु०) हिमादेलुः ॥ हिमशब्दादेलुप्रत्ययः स्यात्तदसहनेऽर्थे । १२१ ॥

(बलादूलः) बलं न सहते बलूलः ॥ १२२ ॥

(सु०) बलादूलः ॥ बलशब्दादूलप्रत्ययः स्यात्तदसहनेऽर्थे ॥ १२२ ॥

(वातात्समूहे च) वातं न सहते वातानां समूहो वा वातूलः ॥ १२३ ॥

(सु०) वातात्समूहे च ॥ वातशब्दादूलप्रत्ययः स्यात्तदसहनेऽर्थे समूहेऽर्थे च बलूलवातूलशब्दावस्त्यर्थे च व्युत्पादितौ ॥ १२३ ॥

(तः पर्वमरुद्भ्याम्) पर्वतः । मरुत्तः ॥ १२४ ॥

(सु०) तः पर्वमरुद्भ्याम् ॥ आभ्यां तः प्रत्ययोऽस्त्यर्थे ॥ पर्वास्यास्मिन्वा-

स्ति । नाम्नो न इति नलोपः । पर्वतः । मरुदस्यास्मिन्वाऽस्ति मरुत्तः ॥ १२४ ॥

(ऊर्णाहंशुभंभ्यो युः) ऊर्णायुः(क) । अहंयुः । शुभंयुः ॥१२५॥

(सु०) ऊर्णाहंशुभंभ्यो युः ॥ एभ्यो युः प्रत्ययः स्यादस्त्यर्थे ॥ ऊर्णाऽस्यास्मिन् वाऽस्ति ऊर्णायुः । तत्र निपातनाद्यस्येत्याकोपो न । अहमिति मान्तमव्ययमहङ्कारे शुभमिति च शुभे । अहंयुरहङ्कारवान् । शुभंयुः शुभान्वितः ॥ १२५ ॥

(स्वादामिन्नैश्वर्ये) स्वमैश्वर्यमस्यास्मिन्वाऽस्ति स्वामी ॥१२६॥

(सु०) स्वादामिन्नैश्वर्ये ॥ ऐश्वर्ये स्वशब्दादामिन् प्रत्ययः स्यादस्त्यर्थे ॥ ईशिता हि ईश्वरस्तस्य भाव ऐश्वर्यम् ॥ ऐश्वर्ये किम् । स्ववान् । स्वं द्रव्यमस्यास्मिन्वाऽस्ति ॥ १२६ ॥

(वातातीसारपिशाचानामिनिः कुक् च) वातकी । अतीसारकी । पिशाचकी ॥ १२७ ॥

(सु०) वातातीसारपिशाचानामिनिः कुक् च ॥ एभ्यः इनिः प्रत्ययः स्यादस्त्यर्थे ॥ इकार उच्चारणार्थः ॥ एषां कुगागमश्च इनिप्रत्यये । वातोऽस्यास्मिन्वाऽस्ति वातकी । 'वातकी वातरोगी स्यात्' इत्यमरः ॥ अतीसारोऽस्यास्मिन्वाऽस्ति अतीसारकी । रोगे चायमिनिरिष्यते(ख) ॥ नेह । वातवती गुहा ॥ पिशाचोऽस्यास्मिन्वाऽस्ति पिशाचकी ॥ १२७ ॥

(ज्योत्स्नादिभ्योऽण्) ज्योत्स्नः । तामिस्रः । तापसः । सैकतः । शार्करः ॥ १२८ ॥

(सु०) ज्योत्स्नादिभ्योऽण् ॥ ज्योत्स्नादिभ्योऽण् स्यादस्त्यर्थे ॥ किञ्च ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसा अस्त्यर्थे निपात्यन्ते । ज्योतिरस्या अस्यां वाऽस्ति ज्योत्स्ना चन्द्रप्रभा । ज्योतिष्शब्दस्य निपातनादुपधालोपो नप्रत्ययश्च ॥ तमोऽस्यास्मिन्वा तमिस्रम् । तमस्शब्दस्योपधाया ह्रस्वं रप्रत्ययश्च ॥ शृङ्गमस्यास्मिन्वाऽस्ति शृङ्गिणः अत्र इनप्रत्ययो निपातनात् ॥ ऊर्जोऽस्यास्मिन्वाऽस्ति ऊर्जस्वी ऊर्जस्वलः विन्वलप्रत्ययौ निपातनात् ॥ गौरस्यास्मिन् वाऽस्ति गोमी । मिन् प्रत्ययो निपातनात् ॥ मलोऽस्यास्मिन्वाऽस्ति मलिनः मलीमसः । मलशब्दादिनेमसप्रत्ययौ निपातनादिति ॥ ज्योत्स्नाऽस्यास्मिन्वाऽस्तीत्यणि ज्योत्स्नः शुक्लपक्षः ॥ तमिस्रमस्यास्मिन्वाऽस्ति तामिस्रः कृष्णपक्षो नरकविशेषश्च ॥ 'तमिस्रा तामसी रात्रिर्ज्योत्स्नी चान्द्रिकयाऽन्विता' इत्यमरोक्तौ तु तामसत्वं तदाधिक्ये न त्वणन्तमिति न विरोधः ॥ तपोऽस्यास्मिन्वाऽस्ति तापसः । विन्प्रत्ययोऽपि । तपस्वी ॥ सिकताऽस्यास्मिन्वाऽस्ति सैकतः इलप्रत्यये सिकतिलः ॥ वतौ तु सिकतावान् शर्कराऽस्यास्मिन्वाऽस्ति शार्करः । अण् । शर्करिलः । इलः । शर्करावान् । वतुपक्षे प्रत्यय य लुक् च भवति ।

(क) ऊर्णायुरिति । अत्र निपातनाद् 'यस्येत्यालोपो न ।

(ख) रोग चायमिति । व्याख्यानादिति भावः । वातवती गुहेति । अत्र रोगस्याप्रतीतेरिनिकुकेनेति भावः ।

सिकता । शर्करा । "स्त्री शर्करा शर्करिलः शार्करः शर्करावति । देश एवादिमावेवमुन्नेयाः सिकतावति ॥" इत्यमरः ॥ १२८ ॥

(त०) ज्योत्स्न इति ॥ शुक्लपक्षे । तामिस्रः कृष्णपक्षे नरकविशेषे च ॥ १२८ ॥

(ऊषशुषिमुष्कमधुखमुखकुञ्जनगपांशुपाण्डुभ्यो रः)

ऊषरः । शुषिरम् । मुष्करः । मधुरः । खरः । मुखरः । कुञ्जरः । नगरम् । पांशुरः । पाण्डुरः ॥ १२९ ॥

(सु०) ऊषशुषिमुष्कमधुखमुखकुञ्जनगपांशुपाण्डुभ्यो रः एभ्यो रप्रत्ययः स्यादस्त्यर्थे ॥ ऊषोऽस्यास्मिन्वाऽस्ति ऊषरः । 'स्यादूषः क्षारमृत्तिका । ऊषवानूषरः' इत्यमरः ॥ शुषिरस्यास्मिन्वाऽस्ति शुषिरः । शुषिश्छिद्रम् । 'वंशादिकं तु शुषिरम्' इत्यमरः ॥ मुष्कोऽस्यास्मिन्वाऽस्ति मुष्करः । मुष्कोऽण्डः ॥ मधु माधुर्यमस्यास्मिन्वाऽस्ति मधुरः ॥ खमस्यास्मिन्वास्ति खरः । महत् कण्ठविवरं खम् । गर्दभे रूढोऽयम् ॥ मुखमस्यास्मिन्वाऽस्ति मुखरः वाचालः । कुञ्जो हस्तिहनुरस्यास्मिन्वाऽस्ति कुञ्जरः ॥ नगा वृक्षाः पर्वताश्च ते अस्यास्मिन्वा सन्ति नगरम् । जातिशब्दोऽयम् । तेन स्त्रियां जातिलक्षण ङीप् । नगरी । पांशु रजोऽस्यास्मिन्वाऽस्ति पांशुरः ॥ पाण्डुरस्यास्मिन्वाऽऽस्ति पाण्डुरः । हरिणः पाण्डुरः पाण्डुः' इत्यमरः ॥ १२९ ॥

(त०) ऊषशुषीति ॥ ऊषा इरिणाः । पांशवः रजांसि । शुषिश्छिद्रम् । कुञ्जो हस्तिहनुः ॥ नगरमिति ॥ नगाः वृक्षाः पर्वताश्च । जातिशब्दत्वान्नगरीत्यपि ॥ पाण्डुइति ॥ पाण्डुः शुक्लो वर्णस्तद्वान् ॥ १२९ ॥

(कच्छ्वा ह्रस्वत्वं च) कच्छुरः(क) ॥ १३० ॥

(सु०) कच्छ्वा ह्रस्वत्वं च ॥ कच्छूशब्दाद्रः स्यादस्त्यर्थे । कच्छू इत्यस्य ह्रस्वश्च ॥ कच्छूरस्यास्मिन्वाऽस्ति कच्छुरः । कच्छू रोगविशेषः ॥ १३० ॥

(त०) कच्छुर इति ॥ कच्छूः रोगविशेषस्तद्वान् ॥ १३० ॥

(द्युद्रुभ्यां मः) द्युमः । द्रुमः(ख) ॥ १३१ ॥

(सु०) द्युद्रुभ्यां मः ॥ आभ्यां मप्रत्ययः स्यादस्त्यर्थे ॥ द्यौरस्यास्मिन्वाऽस्ति द्युमः । दिव 'उ रसे' इत्युत्वम् ॥ द्रुः शाखा वृक्षश्च । द्रुरस्यास्मिन्वाऽस्ति द्रुमः । 'पलाशी द्रुद्रुमागमाः' इत्यमरः ॥ १३१ ॥

(त०) द्युद्रुभ्यां म इति ॥ द्यौरस्यास्तीति । दिव 'उ रसे' इत्युत्वम् । अव्युत्पन्नोऽपि द्युशब्दो दिनवाच्यस्ति ॥ द्रुर्वृक्षः सोऽस्यास्तीति जनकतयेति द्रुमोऽपि वृक्ष एव ॥ १३१ ॥

(केशादिभ्यो वः) केशवः । मणिवः । हिरण्यवः ॥ १३२ ॥

(सु०) केशादिभ्यो वः ॥ एभ्यो वः ॥ एभ्यो वः स्यादस्त्यर्थे ॥ केशा अस्यास्मिन्वा सन्ति केशवः । केशी । इनि । केशिकः । ठकः । केशवान् । वतुः ॥ मणिरस्या-

---

(क) कच्छूस्त्वग्रोगविशेषः । कच्छुरः पुमान् रोगविशेष इति बालमनोरमा ।

(ख) द्यौरस्यास्तीति द्युमः । अव्युत्पन्नोऽपि द्युशब्दो दिनवाच्यस्ति । द्रुर्वृक्ष सोऽस्याऽस्तीति जनकतयेति द्रुमोऽपि वृक्षएव ।रूढशब्दावेताविति बालमनोरमा ।

ऽस्मिन्वाऽस्ति मणिवः । नागविशेषः ॥ हिरण्यमस्यास्मिन् वाऽस्ति हिरण्यवो निधिविशेषः ॥

(त०) केशव इति ॥ प्रशस्ताः केशाः सन्त्यस्येति विग्रहः ॥ १३२ ॥

(अर्णसो लोपश्च) अर्णवः ॥ १३३ ॥

(सु०) अर्णसो लोपश्च ॥ अर्णस्शब्दाद्वः स्यादस्त्यर्थे । सस्य लोपश्च ॥ अर्णो जलं तद्वानर्णवः । अर्णस्वान् । वतुः ॥ १३३ ॥

(त०) अर्णव इति ॥ अर्णांसि जलानि सन्त्यस्येति ॥ १३३ ॥

(रजःकृष्यासुतिपरिषदो वलच्(क) रजस्वला ॥ १३४ ॥

(सु०) रजःकृष्यासुतिपरिषद्भ्यो वलः ॥ एभ्यो वलप्रत्ययः स्यादस्त्यर्थे ॥ रजोऽस्या अस्यां वाऽस्ति रजस्वला । 'रजः स्त्रीकुसुमेऽपि च' इत्यमरः ॥ १३४ ॥

(कृष्यादीनां वले दीर्घः) कृषीवलः । आसुतीवलः(ख) । परिषद्वलः ॥ १३५ ॥

(सु०) कृष्यादीनां वले दीर्घः ॥ वलप्रत्यये संज्ञायामेषां दीर्घः स्यात् ॥ कृषिरस्याऽस्मिन्वाऽस्ति कृषीवलः ॥ आसुतिरभिषवः । 'मद्यसन्धानमासुतिः' इति हैमः ॥ 'षुञ् अभिषवे' क्तिः ॥ आसुतिरस्यास्मिन्वाऽस्तिआसुतीवलः शौण्डिकः ॥ परितः सीदतीति परिषत् । क्विप् । पर्षदिति पाठान्तरम् । परिषदस्यास्मिन् वाऽस्ति परिषद्वलः । पर्षद्वलश्च । 'पर्षद्वलान्महाब्रह्मैराटनैकटिकाश्रमान्' इति भट्टिः ॥ १३५ ॥

(त०) परिषद्वल इति ॥ परितः सीदतीति परिषत् ॥ १३५ ॥

(अन्येभ्योऽपि) भ्रातृवलः । पुत्रवलः । दन्तावलः । बन्धुवलः ॥१३६॥

(सु०) अन्येभ्योऽपि ॥ वलप्रत्ययःस्यादस्त्यर्थे ॥ भ्राताऽस्यास्मिन्वास्ति भ्रातृवलः । पुत्रोऽस्यास्मिन्वाऽस्तिः पुत्रवलः । संज्ञाया अभावान्नेह दीर्घः ॥ दन्ता अस्यास्मिन्वा सन्ति दन्तावलो हस्ती । कृष्यादीनामिति दीर्घः ॥ १३६ ॥

(तुन्दिवलिवटेर्भः) तुन्दिभः । वलिभः । वटिभः ॥ १३७ ॥

(सु०) तुन्दिवलिवटेर्भः ॥ एभ्यो भप्रत्ययः स्यादस्त्यर्थे ॥ वृद्धा नाभिस्तुन्दिः । तुन्दिरस्यास्मिन्वाऽस्ति तुन्दिभः ॥ वलिरस्यास्मिन्वाऽस्ति वलिभः ॥ वटिरस्यास्मिन्वाऽस्ति वटिभः वाल्मीकगृहमित्यर्थः । पामादित्वाद्वलिनोऽपि ॥ १३७ ॥

(एतत्किमिदंयत्तद्भ्यः परिमाणे वतुः(ग) ॥ १३८ ॥

(सु०) एतत्किमिदंयत्तद्भ्यः परिमाणे वतुः ॥ एभ्यो वतुप्रत्ययः स्यात् परिमाणेऽर्थे ॥ परिमाणमिह परिच्छेदकमात्रम् ॥ १३८ ॥

(त०) एतत्किमिदंयत्तद्भ्यः परिमाणे वतुरिति ॥ मान्तोपधादित्यनेनैव सिद्धे परिमाणार्थं वचनम् ॥ १३८ ॥

(क) रज इति । रजस्, कृषि, आसुति, परिषत्, एभ्योऽस्त्यर्थे वलप्रत्ययः स्याद् इत्यर्थः ।

(ख) आसुतीवल इति । 'षुञ् अभिषवे' आङ्पूर्वात् स्त्रियां क्तिः । कृष्यादीनामिति वलप्रत्यये दीर्घः ।

(ग) एतदिति । मान्तोपधादित्यनेनैव सिद्धे परिमाणार्थं वचनमिदम् ।

(यत्तदेतदामा वतौ) यावान् । तावान् । एतावान् ॥ १३९ ॥

(सु०) यत्तदेतदामा वतौ ॥ वतुप्रत्यये परे एषामाकारान्तादेशः स्यात् ॥ यत्परिमाणमस्य यावान् ॥ तत्परिमाणमस्य तावान् ॥ एतत्परिमाणमस्य एतावान् ॥१३९॥

(त०) यत्तदेतदामा वताविति ॥ यत्तदेतच्छब्दानां वतुप्रत्यये परे आकारोऽन्तादेश इत्यर्थः ।। यावानिति ॥ यत् परिमाणमस्येति विग्रहः ॥ १३९ ॥

(किमः किर्वतोर्वस्य यः) कियान् ॥ १४० ॥

(सु०) किमः किर्वतोर्वस्य यः ॥ किम् शब्दस्य किरादेशः स्यात् वतुप्रत्ययस्य यकारश्च ॥ किं परिमाणमस्य कियान् ॥ १४० ॥

(इदम इश्वतोर्वस्य यः) इयान् ॥ १४१ ॥

(सु०) इदम इश्वतोर्वस्य यः ॥ इदम्शब्दाद्वतुः स्यात्परिमाणेऽर्थे इदम्स्थाने इशादेशश्च ॥ शित्त्वात्सर्वादेशः । वतुप्रत्ययस्य यकारश्च । इदं परिमाणमस्य स इयान् ॥१४१॥

(त०) इदम इशिति । शकारः सर्वादेशार्थः ॥ १४१ ॥

(श्रद्धादेर्लुः) श्रद्धालुः । कृपालुः । दयालुः ॥ १४२ ॥

(सु०) श्रद्धादेर्लुः ॥ लुप्रत्ययः स्यादस्त्यर्थे । श्रद्धाऽस्यास्मिन्वाऽस्ति श्रद्धालुः ॥ कृपाऽस्यास्मिन्वाऽस्ति कृपालुः ॥ दयाऽस्यास्मिन्वाऽस्ति दयालुः । स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाशीङ्भ्य इत्यालुप्रत्ययेनापीष्टसिद्धेरिदं सूत्रं चिन्त्यम् ॥ १४२ ॥

(औन्नत्ये दन्तादुरः) दन्तुरः ॥ १४३ ॥

(सु०) औन्नत्ये दन्तादुरः ॥ उन्नते वर्तमानाद्दन्तशब्दादुरप्रत्ययः स्यादस्त्यर्थे ॥ उन्नता दन्ताः सन्त्यस्य दन्तुरः ॥ औन्नत्ये किम् । दन्तवान् ॥ १४३ ॥

(अस्मायामेधास्रग्भ्यो विनिः) तपस्वी । ओजस्वी । वर्चस्वी । तेजस्वी । वचस्वी । मायावी । मेधावी । स्रग्वी ॥ १४४ ॥

(सु०) अस्मायामेधास्रग्भ्यो विनिः ॥ एभ्यो विनिः स्यादस्त्यर्थे ॥ पक्षे वतुरपि ॥ तपोऽस्यास्मिन्वाऽस्ति तपस्वी ॥ । ओजोऽस्यास्मिन्वाऽस्ति ओजस्वी ॥ वर्चोऽस्यास्मिन्वाऽस्ति वर्चस्वी ॥ तेजोऽस्यास्मिन्वाऽस्ति तेजस्वी ॥ वचोऽस्यास्मिन्वाऽवचस्वी । मनोऽस्यास्मिन्वाऽस्ति मनस्वी ॥ मायाऽस्यास्मिन् वाऽस्ति मायावी । मायी । मायिकः । इनिकौ ॥ मेधाऽस्यास्मिन्वाऽस्ति मेधावी ॥ स्रगस्यास्मिन्वाऽस्तीति चोः कुरित्यनेन सिद्धे परत्वात्प्राप्तं छशषेति षत्वं निराकृत्य दिशामित कुत्वम् । स्रग्वी ॥१४४॥

(त०) अस्मायेति ॥ असप्रत्ययग्रहणेन तदन्तस्य ग्रहणमिति असप्रत्ययान्तात् मायादेश्च विनिरित्यर्थः ॥ १४४ ॥

(आमयस्य दीर्घश्च) आमयावी ॥ १४५ ॥

(सु०) आमयस्य दीर्घश्च ॥ अस्मादपि विनिः स्यादस्त्यर्थे विनिप्रत्ययेऽस्य दीर्घश्च ॥ आमयोऽस्यास्मिन्वाऽस्ति आमयावी ॥ १४५ ॥

(वाचो ग्मिनिः (क)) वाग्मी ॥ १४६ ॥

(सु०) वाचो ग्मिनिः ॥ वाच्शब्दात् ग्मिन् प्रत्ययः स्यादस्त्यर्थे ॥ वागस्यास्मिन्वाऽस्ति । चस्य कुत्वे झत्वे जबा इति गत्वे वाग्ग्मी । गकारद्वयमस्ति ॥ १४६ ॥

(त०) वाचो ग्मिनिरिति ॥ गकारो मादित्वव्यावृत्त्यर्थः । तेन गत्वमेव । यद्वा ग् मिनिः इति च्छेदः ग् आदेशो मिन् प्रत्ययः ॥ १४६ ॥

(आलाटौ कुत्सितभाषिणि(ख)) वाचालः । वाचाटः ॥१४७॥

(सु०) आलाटौ कुत्सितभाषिणि ॥ वाचशब्दादेतौ स्तः कुत्सितबहुभाषकेऽर्थे ॥ कुत्सितं बहु भाषते वाचालः । वाचाटः ॥ यस्तु सम्यग्बहु भाषते स वाग्ग्मीत्येव(ग)१४७।

(त०) कुत्सिते ॥ कुत्सितमनन्वितं भाषितुं शीलमस्य स तथा तस्मिन्नित्यर्थः । प्रत्ययार्थे वाच्य इत्यर्थः ॥ १४७ ॥

(ईषदसमाप्तौ कल्पदेश्यदेशीयाः) ईषदपरिसमाप्तः सर्वज्ञः सर्वज्ञकल्पः । पटुदेश्यः । पटुदेशीयः । विद्वद्देशीयः ॥ १४८ ॥

(सु०) ईषदसमाप्तौ कल्पदेश्यदेशीयः ॥ प्रथमान्तान्नाम्नः आख्यातान्ताच्चैते स्युरीषदूनेऽर्थे ॥ ईषदसमाप्तौ ये प्रत्ययास्तेष्वभिधेयवदेव लिङ्गवचने स्तः । तेन गुडकल्पा द्राक्षा ॥ शर्कराकल्पो गुड इति ॥ ईषदूनः सर्वज्ञः सर्वज्ञकल्पः ॥ ईषदूनः पटु पटुदेश्यः ॥ ईषदूनो विद्वान् 'वसौ रसे' इति दत्वं विद्वद्देशीयः ॥ ईषदूनं पचति पचतिकल्पम् ॥ क्रियाप्रधानमाख्यातमिति क्रियायामौत्सर्गिकवचनं क्लीबत्वं च ॥ १४८ ॥

(त०) ईषदिति ॥ ईसदसमाप्तौ किञ्चिन्न्यूनत्वे ॥ १४८ ॥

(बहुर्वा उक्तार्थे स च प्रागेव) ईषदूनः पटुः बहुपटुः ॥१४९॥

(सु०) बहुर्वा उक्तार्थे स च प्रागेव ॥ ईषदसमाप्तिविशिष्टेऽर्थे प्रथमान्तान्नाम्नो बहुप्रत्ययः स्यात् स च प्रकृतेः प्रागेव न तु परतः ॥ लिङ्गसंख्ये अपि प्रकृतेरेव न तु तद्विपर्ययः । तेन बहुगुडो द्राक्षा । 'लघुर्बहुतृणं नरः' इत्यादौ न विशेष्यनिघ्नता ॥ १४९ ॥

(त०) बहुर्वा उक्तार्थे स च प्रागेव ॥ उक्तार्थे किञ्चिन्न्यूनत्वेऽर्थे बहुप्रत्ययो विकल्पेन भवति । स च बहुप्रत्ययः प्रकृतेः प्रागेव न तु परतः । लिङ्गसंख्ये अपि प्रकृतेरेव न तु तद्विपर्ययः । तेन बहुगुडो द्राक्षा 'लघुर्बहुतृणं नरः' इत्यादौ न विशेष्यनिघ्नता॥१४९॥

(प्रकारे जातीयः) पटुप्रकारः पटुजातीयः ॥ १५० ॥

(त०) प्रकारे जातीयः ॥ प्रकारवति जातीयप्रत्ययः स्यात् ॥ सामान्यस्य भेदकः प्रकारः ॥ १९० ॥

(क) ग्मिनिरिति । गकारो मादित्वव्यावृत्त्यर्थः । ग् आदेशो मिन्प्रत्ययश्च इति कस्यचिद्व्याख्यानम्

(ख) 'आलजाटचौ बहुभाषिणि' । 'कुत्सित इति वक्तव्यम्' इति कौमुदी । कुत्सितं बहु भाषते वाचालः वाचाटः ।

(ग) यस्तु सम्यगिति । न च अबहु, अकुत्सितं च यो वदति तत्रापि वाग्मीति कुतो न भवतीति वाच्यम् । यो हि सम्यक् बहु भाषते वाग्मीत्येव स भवतीति भाष्यबलेन पूर्वसूत्रस्य सम्यक् बहुभाषिण्येव प्रवृत्तेरभ्युपगमादिति भावः ।

(कुटीशमीशुण्डाभ्यो रो ह्रस्वत्वे) ह्रस्वा कुटी कुटीरः । शमीरः । शुण्डारः ॥ १५१ ॥

(सु०) कुटीशमीशुण्डाभ्यो रो ह्रस्वत्वे ॥ एभ्यो रः प्रत्ययो भवति ह्रस्वेऽर्थे ॥ ह्रस्वा कुटीति स्वार्थिकाः प्रकृतिलिङ्गमतिवर्तन्ते इति पुंलिङ्गताऽत्र । कुटीरः ॥ ह्रस्वा शमी शमीरः ॥ ह्रस्वा शुण्डा शुण्डारः ॥ १५१ ॥

(कुत्वा डुपः) ह्रस्वः कूतुः कुतुपः ॥ १५२ ॥

(सु०) कुत्वा डुपः ॥ कुतूशब्दात् डुपप्रत्ययः स्यात् ह्रस्वेऽर्थे । 'कुतूः कृत्तेः स्नेहपात्रं ह्रस्वा सा कुतुपः पुमान्' इत्यमरः ॥ १५२ ॥

(त०) कुतुप इति ॥ 'कुतूः कृत्तेः स्नेहपात्रं ह्रस्वा सा कुतुपः पुमान्' ॥ १५२ ॥

(कासूगोणीभ्यां ष्टरः) ह्रस्वा कासूः कासूतरी गोणीतरी ॥ १५३ ॥

(सु०) कासूगोणीभ्यां ष्टरः ॥ आभ्यां ष्टरप्रत्ययः स्यात् ह्रस्वे ॥ षित्वात् ङीषिति ङीप् ॥ ह्रस्वा कासूः कासूतरी । कासूः आयुधविशेषः ॥ ह्रस्वा गोणी गोणीतरी १५३

(त०) कासूरिति ॥ आयुधविशेषः कासूः । सा ह्रस्वेत्यर्थः ॥ १५३ ॥

(वत्सोक्षाश्वर्षभेभ्यस्तनुत्वे (क)) तनुर्वत्सः वत्सतरः । उक्षतरः । अश्वतरी । ऋषभतरः ॥ १५४ ॥

(सु०) वत्सोक्षाश्वर्षभेभ्यस्तनुत्वे ॥ एभ्यः ष्टरः स्यात् ॥ तनोर्भावस्तनुत्वम् न्यूनता । सा च प्रवृत्तिनिमित्तस्यैव प्रत्यासत्तेः । कश्चित्तु तत्सहचरितधर्मान्तराणामपि न्यूनता । तत्र वत्सः प्रथमवयाः । प्रथमवयसो न्यूनत्वं नाम वयोऽन्तरप्राप्तिः । उक्षा तरुणवयाः । तारुण्यस्य तनुत्वं तृतीयवयः प्राप्तिः ॥ आश्वायामश्वादुत्पन्नोऽश्वः । अश्वत्वं च जातिः । तत्सहचरितस्याश्वायामश्वादुत्पन्नत्वधर्मस्य न्यूनत्वमन्यपितृकता । तथा च गर्दभेनाश्वायामुत्पादितोऽश्वतरः । तरतमेति पुंवद्भावः । अश्वतरी भारस्य वोढा ॥ ऋषभस्य तनुत्वं भारोद्वहने मन्दशक्तिता । तद्वांस्तु ऋषभतरः । प्रवृत्तिनिमित्ततनुत्वे एवायम् ॥ १५४ ॥

(त०) वत्सतर इति ॥ द्वितीयं वयः प्राप्तः । उक्षतरः ॥ १५४ ॥

(देवतान्तात्तादर्थ्ये यः) अग्निदेवतायै इदमग्निदेवत्यम् ॥ १५५ ॥

(सु०) देवतान्तात्तादर्थ्ये यः ॥ तदर्थ एव तादर्थ्यम् । स्वार्थे ष्यञ् । अग्निश्चासौ देवता च अग्निदेवता तस्यै ॥ १५५ ॥

(पादार्घाभ्यां च) पादार्थमुदकं पाद्यम् । अर्घ्यम् ॥ १५६ ॥

(सु०) पादार्घाभ्यां च ॥ आभ्यां यः स्यात्तादर्थ्ये ॥ 'पाद्यं पादाय वारिणि' इति 'मूल्ये पूजाविधौ चार्घः' इति चामरः ॥ अर्घार्थमुदकमर्घ्यम् ॥ १५६ ॥

(नवस्य नू आदेशस्त्नप्तनप्खाः प्रत्ययाः स्वार्थे) नूत्नम् । नूतनम् । नवीनम् ॥ १५७ ॥

(क) वत्सेत्यादि । वत्स, उक्षन्, अश्व, ऋषभ, एभ्यस्तनुत्वविशिष्टवृत्तिभ्यः ष्टरप्रत्ययःस्यादित्यर्थः । तनुत्वं न्यूनत्वम् । वत्सः प्रथमवयाः । वयसश्च प्रथमस्य तनुत्वं उत्तरवयः प्राप्त्या ज्ञेयम् ।

(सु०) नवस्य नू आदेशस्त्नतनईनाः प्रत्ययाः स्वार्थे ॥ नवशब्दात्स्वार्थे एते स्युर्नवस्थाने नूश्च वा ॥ 'वोऽव्यस्वरे' इत्यव् । नवीनम् ॥ १५७ ॥

(त०) नवीनमिति ॥ नवशब्दात् ईनप्रत्ययः । उकारस्य वोऽव्यस्वर इत्यवादेशः ॥ १५७ ॥

(पुराणे प्रान्नश्च) प्रणम् । प्रत्नम् । प्रतनम् । प्रीणम् ॥ १५८ ॥

(सु०) पुराणे प्रान्नश्च ॥ प्रात्पुराणेऽर्थे नप्रत्ययः स्यात् चादुक्ताः त्नतनईनाः ॥ १५८ ॥

(अतिथेर्ण्यः) अतिथय इदमातिथ्यम् ॥ १५९ ॥

(सु०) अतिथेर्ण्यः ॥ अतिथिशब्दात्तादर्थ्ये ण्यः स्यात् ॥ १५९ ॥

(प्रशंसायां रूपः) प्रशस्तो वैयाकरणो वैयाकरणरूपः ॥ १६० ॥

(सु०) प्रशंसायां रूपः ॥ प्रथमान्तान्नाम्न आख्यातान्ताच्च रूपप्रत्ययः स्यात् प्रशंसायामर्थे ॥ प्रकृत्यर्थस्य परिपूर्णतेह प्रशंसा । न तु स्तुतिः । तेनेहापि रूपप्रत्ययः । चोररूपोऽयं यदक्ष्णोरप्यञ्जनं हरति । गुप्तवस्तुनोऽपहरणेन चौर्यं परिपूर्यते ॥ प्रशस्तं पचति पचतिरूपम् ॥ १६० ॥

(कुत्सायां पाशः) कुत्सितो भिषक् भिषक्पाशः ॥ १६१ ॥

(सु०) कुत्सायां पाशः ॥ प्रथमान्तान्नाम्नः पाशप्रत्ययः स्यात् कुत्सायामर्थे ॥ १६१ ॥

(भूतपूर्वे चरट्) पूर्वं दृष्टो दृष्टचरः । दृष्टचरी । आढ्यचरी ।१६२।

(सु०) भूतपूर्वे चरट् ॥ पूर्वं भूतो भूतपूर्वस्तत्र वर्तमानात्प्रथमान्ताच्चरट् स्यात् टित्वादीप् ॥ भूतपूर्वाऽऽढ्या आढ्यचरी । तरतमचरडिति पुंवत् ॥ १६२ ॥

(त०) भूतपूर्व इति ॥ पूर्वं भूतः प्राप्तः इति यावत् । टित्वादीप् ॥ १६२ ॥

(षष्ठ्या रूप्य च) ॥ १६३ ॥

(सु०) षष्ठ्या रूप्य च ॥ षष्ठ्यन्ताद् भूतपूर्वेऽर्थे रूप्यप्रत्ययो वा । पक्षे चरट् ॥ कृष्णस्य भूतपूर्वा गौः कृष्णरूप्यः । कृष्णचरः ॥ १६३ ॥

(प्राचुर्यविकारप्राधान्यादिषु मयट्) अन्नं प्रचुरमत्रान्नमयो यज्ञः । मृन्मयो घटः । स्त्रीमयो जाल्मः । अमृतं स्वरूपमस्यामृतमयश्चन्द्रः । आम्रस्य विकारोऽवयवो वा आम्रमयम् । शरमयम् ॥ १६४ ॥

(सु०) प्राचुर्यविकारप्राधान्यादिषु मयट् ॥ नाम्न एष्वर्थेषु मयट् स्यात् ॥ प्राचुर्ये अन्नमयो यज्ञः । विशेष्यनिघ्नताऽत्र ॥ विकारे मृदो विकारो मृन्मयः । मयट्प्रत्ययः । नमे ञवस्यापीति नः ॥ प्राधान्ये स्त्री प्रधानमस्य स्त्रीमयः ॥ आदिशब्दादन्येष्वप्यर्थेषु मयट् । यथा । अमृतमयोऽत्र स्वरूपे मयट् । आम्रमयमत्र विकारावयवयोर्मयट् ॥ शराणां विकारोऽवयवो वा शरमयम् ॥ १६४ ॥

(त०) प्राचुर्येति ॥ प्रचुरस्य भावः प्राचुर्यं बाहुल्यम् । प्राचुर्यं च विकारश्च प्राधान्यादिश्च ते तेषु ॥ जाल्मोऽसमीक्ष्यकारी ॥ अमृतमय इति ॥ आदिपदात्स्वरूपेऽपि १६४

(गोः पुरीषे) गोमयम् ॥ १६५ ॥

(सु०) गोः पुरीषे ॥ गोशब्दान्मयट् स्यात् पुरीषेऽर्थे ॥ गोः पुरीषं गोमयम् ॥ पुरीषे किम् । गव्यम् । पयसि ण्यः ॥ १६५ ॥

न सन्धिय्वोर्युट् च ॥ सन्धिजयोर्यकारवकारयोः सम्बन्धिन स्वरस्य न वृद्धिः । किन्तु तयोर्युडागमो यस्येट् वस्योट् पश्चाद्वृद्धिः । व्याकरणमधीते वेद वा वैयाकरणः(क) । स्वश्वं वेद सौवश्वः । व्यासस्यापत्यं वैयासकिः ॥ १६६ ॥

(सु०) न सन्धिय्वोर्युट् च ॥ सन्धानं संधिः 'नङ्ग्नौ' इति किप्रत्ययः । सन्धौ जातौ संधिजौ, य् च व् च य्वौ सन्धिजौ च ता य्वौ च सन्धिय्वौ । शाकपार्थिवादित्वान्मध्यमपदलोपः । माधवस्तु सन्धेर्य्वाविति षष्ठीतत्पुरुषमाह । इश्च उश्चानयोः समाहारो यु युसहितः ट् युट् । द्वन्द्वान्ते श्रूयमाणत्वात् टकारः प्रयेकं सम्बध्यते । इट् उट् इत्यर्थः । वैयाकरणः । अण् इट् वृद्धिः ॥ सुष्ठु अश्वः स्वश्वः । स्वश्वं वेत्तीति सौवश्वः । अण् । उड्वृद्धी ॥ वैयासकिः । अपत्ये इञ् । सुधातृव्यासेत्यकङ् । इड्वृद्धी ॥ १६६ ॥

(त०) न सन्धिय्वोर्युट् चेति ॥ संधानं पूर्वपरयोरव्यवधानेनोच्चारणं सन्धिः ॥ 'नङ्ग्नौ' इति किः । सन्धौ जातौ सन्धिजौ । 'क्विब्वनिड्डाः' इति जनेर्डः ॥ य् च व् च य्वौ संन्धिजौ च तौ य्वौ च सन्धिय्वौ शाकपार्थिवादिः । इश्च उश्चानयोः समाहारो यु तेन सहितः ट् युट् । द्वन्द्वान्ते श्रूयमाणत्वात् प्रत्येकं संबन्धः । इट् उट् इति ॥ सौस्थितिरित्यादिसिद्धये इदुतोरेव न संधिरिति नाशङ्कनीयम् । युट्करणसामर्थ्यात् । अन्यथा सवर्णदीर्घेण तद्विधानं व्यर्थं स्यात् । न च युड्विधिसामर्थ्यात्सवर्णदीर्घ एव न भविष्यतीति वाच्यम् । नञो वैयर्थ्यप्रसङ्गात् । युटः षष्ठ्यभावान्न वृद्धिनिषेधः । उत्सर्गसमानदेशा अपवादा भवन्तीति न्यायात् दध्यश्व इत्यादौ न । दधिप्रियोऽश्वो दध्यश्वस्तस्यायमिति । यकारात्स्वगतस्वव्यवधानव्यङ्ग्यव्यवहाराध्यायामप्रभृतीनां न निषेधयुटौ ॥ वैयाकरण इति ॥ कारकादित्यण् । यकारात्पूर्वमिट् । तस्य पश्चाद्वृद्धिः ॥ १६६ ॥

(द्वारादीनां च) द्वारादीनां सम्बन्धिनोः स्वरयोर्न वृद्धिः किंतु तयोर्युडागमः ॥ द्वारे नियुक्तो दौवारिकः ॥ व्यल्कशस्येदं वैयल्कशम् । सौवरम् । शौवम् । सौवग्रामिकः । नैयग्रोधम् । सौवादुमृदवम् । शौवस्तिकम् ॥ १६७ ॥

(सु०) द्वारादीनां च ॥ द्वारादीनामसंधिजयोरपि यकारवकारयोः युट् स्यात् ॥ पश्चाद्वृद्धिश्च । यस्य इट् वस्य उट् इत्यर्थः ॥ दौवारिकः । नियुक्तेऽर्थे इकः । उड्वृद्धी ॥ वैयल्कशम् । इदमर्थेऽण् । इड्वृद्धी ॥ स्वरस्येदं सौवरम् । उड्वृद्धी ॥ स्वग्रामे भवः सौवग्रामिकः । इकः । उड्वृद्धी ॥ न्यग्रोधस्येदं नैयग्रोधम् । अण् । इड्वृद्धी ॥ स्वादु च

(क) अत्र वासुदेवः । सन्धेः सम्बन्धिनौ य्वौ सन्धिय्वौ । सम्बन्धश्च जन्यजनकभावः । व्याकरण इत्यत्र वकारस्य सन्धिजत्वाद्यकारवकारयोर्विश्लेषं कृत्वा सन्धिजाद्यकारात्पूर्वमिकारः । एवं सकारवकारयोर्विश्लेषं कृत्वा वकारात्पूर्वमिकार इत्यर्थः ।

तत् मृदु च स्वादुमृदु स्वादुमृदुन इदं सौवादुमृदवम् । अण् । 'ओोऽन्यस्वरे ह्रस्वम् । उद्वृद्धी ॥ श्वो भवं शौवस्तिकम् । तिकण् । उद्वृद्धी ॥ श्वापदस्येदं निपातनात्पूर्वपद-स्य दीर्घः । अण् । वा उद्वृद्धी ॥ श्वापदं–शौवापदम् ॥ १६७ ॥

(त०) द्वारादीनामिति ॥ सन्धिजस्याभावेऽपि तौ । वस्तुतस्त्वन्तयोरित्येव सुवचम् । अन्तशब्दश्च पदान्तपरतया व्याख्येयः । अनन्त इत्यादौ तथैव व्याख्यानात् । शुनादिवच्छुडेव तु नागमः व्याख्यानतो विशेषप्रतिपत्तेः ॥ सौवरमिति ॥ स्वरस्येदम् ॥ शौवमिति ॥ शुन इदम् ॥ सौवग्रामिक इति ॥ स्वग्रामे भवः ॥ सौवादुमृदव-मिति ॥ स्वादु च तत् मृदु च तस्येदम् ॥ शौवस्तिकमिति ॥ श्वो भवम् । श्वस-स्तिकण् ॥ १६७ ॥

(इतो जातार्थे) लज्जा जाताऽस्य लज्जितः । फलितः । तार-कितम् ॥ १६८ ॥

(सु०) इतो जातार्थे ॥ प्रथमान्तान्नाम्नोऽस्य जातमित्यर्थे इतः प्रत्ययः स्यात्॥ यस्य लोप इत्यालोपः । लज्जितः ॥ फलानि जातान्यस्य फलितः॥ त्रपा जाताऽस्य त्रपि-तः ॥ तारका जाता अस्य तारकितं नभः ॥ एवं पुष्पितं पुलकितं रोमाञ्चितम् ॥१६८॥

(त०) इतो जातार्थे इति ॥ अस्य जातमित्यर्थे इत इत्यर्थः ॥ १६८ ॥

(तरतमेयस्विष्ठाः प्रकर्षे (क)) अतिशयेन शुक्लः शुक्लतरः । शुक्लतमः ॥ १६९ ॥

(सु०) तरतमेयस्विष्ठाः प्रकर्षे ॥ तरश्च तमश्च ईयसुश्च इष्ठश्च ते तरतमेयस्वि-ष्ठाः । प्रकर्ष इति प्रकृत्यर्थे विशेषणम् । प्रकर्षणं प्रकर्षः । प्रकर्षश्च नाधिक्यं किन्त्वभिभ-वो मतः । यद्यपि कृषिः केवलो विलेखने तथापि प्रपूर्वोऽभिभवेऽर्थे । यद्यपि द्रव्यस्य स्व-तः प्रकर्षो न तथापि गुणप्रकर्षात् प्रकर्षो भवति । उक्तं च । "द्रव्यस्याव्यपदेश्यस्य य उपादीयते गुणः । भेदका व्यपदेशाय तत्प्रकर्षोऽभिधीयते ॥ १ ॥ धर्मयोगं विना व्यपदे-ष्टुमशक्यस्य द्रव्यस्य व्यपदेशाय यो भेदको गुण उपादीयते प्रत्ययेन तस्य प्रकर्षोऽभिधी-यते । गुणक्रियाजातिसंज्ञाभेदेन चतुष्टयी शब्दानां प्रवृत्तिः । तत्र गुणक्रिययोः प्रवृत्तिनि-मित्तयोस्तत्प्रकर्षे प्रत्ययः । जातिशब्देभ्यस्तु जातेः सर्वत्रैकरूपत्वेन प्रकर्षाभावात्तत्सहच-रितादेवाह । दोहाद्या धर्मास्तत्प्रकर्षे प्रत्ययः । संज्ञाशब्देषु प्रकर्षो नास्ति । शब्दस्व-रूपस्यैव प्रवृत्तिनिमित्तत्वात् । तस्य च सर्वत्र तुल्यत्वात् । गुणशब्दो यथा । यस्य सा-मान्यतः श्वेतो गुणः स शुक्लः । यस्य तदपेक्षयाऽधिकः स शुक्लतमः ॥ यस्य ताभ्याम-प्यधिकः स शुक्लतमः ॥ यः किञ्चिज्जानाति स पटुः । ततोऽधिकं जानाति स पटुतरः । ततोऽप्यधिकं स पटुतमः ॥ क्रियाशब्दो यथा । यो विलम्बेन पचति स पाचकः । यस्तु ततः किञ्चिच्छीघ्रं पचति स पाचकतरः यस्त्वतिशीघ्रं पचति स पाचकतमः ॥ जातिशब्दो

(क) प्रकर्षश्चात्र नाधिक्यं किन्त्वभिमतो मतः । यद्यपि केवलः कृषिर्विलेखनार्थस्तथाप्युपसर्गवशाद-भिभवार्थोऽपि । प्रकर्षस्य जातीयप्रतियोगिकत्वात्संज्ञाजातिवाचकयोस्तदभावान्न तरादयः । तथा संख्या-परिमाणप्रमाणोन्मनवाचिभ्यो न । उक्तं च—

'ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः । आयामस्तु प्रमाणं स्यात् संख्याबाह्या तु सर्वतः" इति ॥

यथा । गौरयं हलं वहति । गोतरोऽयं हलं शकटं च वहति । गोतमोऽयं तौ गोर्णी च वहति ॥ इष्ठेयसुप्रत्ययौ गुणवचनादेव । संख्यापरिमाणप्रमाणोन्मानवाचिभ्यो न तरादयः। संख्या एकादि । परिमाणं कुडवद्रोणादि । प्रमाणं हस्तवितस्त्यादि । उन्मानं तुलादि ॥ उक्तं च "ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः । आयामस्तु प्रमाणं स्यात्संख्या बाह्या तु सर्वतः ॥ १ ॥" ॥ १६९ ॥

(त०) तरतमेयस्विष्ठा इति ॥ तरश्च तमश्च ईयसुश्च इष्ठश्च ते । प्रकर्षणं प्रकर्षः । प्रकर्षश्चात्र नाधिक्यं किन्त्वभिभवो मतः । यद्यपि केवलः कार्षविलेखनार्थस्तथाप्युपवर्गवशादभिभवार्थोऽपि । प्रकर्षस्य सजातीयप्रतियोगिकत्वात्संज्ञाजातिवाचकयोस्तदभावान्न तरादयः । तथा संख्यापरिमाणप्रमाणोन्मानवाचिभ्यो न । उक्तं च । "ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः । आयामस्तु प्रमाणं स्यात्संख्या बाह्या तु सर्वतः ॥" ऊर्ध्वमानं तुलादिः ॥ परिमाणं द्रोणादिः ॥ प्रमाणं हस्तवितस्त्यादिः ॥ संख्या एको द्वावित्यादिः ॥ यद्यपि सामान्येन तरादिविधानं तथापि एकस्य द्वयोश्च प्रकर्षे तरीयसू । बहूनां तमेष्ठाविति विवेकः । पाचकादिभ्यस्तु ईयस्विष्ठौ नानभिधानात् ॥ १६९ ॥

(ईयस्विष्ठौ ङितौ (क)) अतिशयेन लघुर्लघीयान् । लघिष्ठः ॥१७०॥

(सु०) ईयस्विष्ठौ ङितौ ॥ एतौ ङित्संज्ञिकौ स्तः ॥ अतिशयेन लघुः ईयसौ टिलोपे उदित्त्वान्नुम् । 'नूसम्महतः' इति दीर्घः । सिलोपसंयोगान्तलोपौ । लघीयान् ॥ लघिष्ठः । इष्ठः ॥ १७० ॥

(गुर्वादेरिष्ठेमेयःसु गरादिष्टयलोपश्च) (ख) गुरोर्भावो गरिमा । अतिशयेन गुरुर्गरिष्ठः गरीयान् ॥ प्रियस्य भावः प्रेमा । अतिशयेन प्रियः प्रेष्ठः प्रेयान् ॥ अतिशयेन स्थूलः स्थविष्ठः स्थवीयान् ॥ अतिशयेन प्रशस्यः श्रेष्ठः श्रेयान् ॥ दीर्घः द्राघिष्ठः द्राघीयान् ॥ स्थिरः स्थेष्ठः स्थेयान् ॥ स्फिरः स्फेष्ठः स्फेयान् ॥ उरुः वरिष्ठः वरीयान् ॥ बहुलः बंहिष्ठः बंहीयान् ॥ वृद्धः वर्षिष्ठः वर्षीयान् ॥ तृप्रः त्रपिष्ठः त्रपीयान् ॥ वृन्दारकः वृन्दिष्ठः वृन्दीयान् ॥ दूरः दविष्ठः दवीयान् ॥ युवा यविष्ठः यवीयान् ॥१७१॥

(सु०) गुर्वादेरिष्ठेमेयःसु गरादिष्टयलोपश्च ॥ गुरु १ प्रिय २ स्थूल ३ प्रशस्य ४ दीर्घ ५ स्थिर ६ स्फिर ७ गुरु ८ बहुल ९ वृद्ध १० तृप्र ११ वृन्दारक १२ दूर १३ युवन् १४ अल्प १५ ह्रस्व १६ क्षिप्र १७ क्षुद्र १८ अन्तिक १९ बाढ २० गुर्वादयः । गर् रान्तः । प्र अदन्तः । स्थो ओदन्तः । श्र अदन्तः । द्राघ अदन्तः । स्थ अदन्तः । स्फ अदन्तः । वर् रान्तः । बंह अदन्तः । वर्ष् षान्तः । त्रप् पान्तः । वृन्द अदन्तः । दो ओदन्तः । यो ओदन्तः । अल्प् पान्तः । ह्रस् सान्तः । क्षेप् पान्तः । क्षोद् दान्तः । नेद अदन्तः । साध अदन्तः । एते गरादयः ॥ एषामेकस्वराणां टिलोपो

(क) ईयसुश्च इष्ठश्च तौ ईयस्विष्ठौ ङित्संज्ञकौ स्त इत्यर्थः ।

(ख) गुर्वादेरिति । टेरलोपष्टयलोपः । ईयस्विष्ठयोर्ङित्त्वाट्टिलोपे प्राप्तेऽयं निषेधः ।

यस्य लोप इत्यलोपश्च न। द्विस्वराणां तु यस्य लोप इत्यलोपो भवत्येव ॥ गरिमा। इमन्। गरिष्ठः। इष्ठः। गरीयान्। ईयसुः। स्त्रियां तु ऋन्नित इतीप्। गरीयसी ॥ प्रेमा। इमन्। प्रेष्ठः। इष्ठः। प्रेयान्। ईयसुः ॥ स्थविष्ठः। इष्ठः। स्थवीयान्। ईयसुः ॥ श्रेष्ठः। इष्ठः ॥ श्रेयान्। ईयसुः ॥ द्राघिष्ठः। यस्य लोप इत्यलोपः। इष्ठः। द्राघीयान्। ईयसुः। स्थेष्ठः। इष्ठः। स्थेयान्। ईयसुः ॥ अतिशयेन स्फिरः 'भूर्यदभ्रं पुरु स्फिरम्' इति हैमः ॥ स्फेष्ठः। इष्ठः। स्फेयान्। ईयसुः ॥ अतिशयेन उरुः। वरिष्ठः। इष्ठः। वरीयान्। ईयसुः ॥ अतिशयेन बहुलः। यस्येत्यलोपः। बंहिष्ठः। इष्ठः। बंहीयान्। ईयसुः ॥ अतिशयेन वृद्धः वर्षिष्ठः। इष्ठः। वर्षीयान्। ईयसुः ॥ अतिशयेन तृप्रः पुरोडाशः तृप्तं दुःखं त्रपिष्ठः। इष्ठः। त्रपीयान्। ईयसुः ॥ अतिशयेन वृन्दारकः। 'वृन्दारकौ रूपिमुख्यौ' इत्यमरः ॥ यस्येत्यलोपः। वृन्दिष्ठः। इष्ठः। वृन्दीयान्। ईयसुः ॥ अतिशयेन दूरः दविष्ठः। इष्ठः। दवीयान्। ईयसुः ॥ अतिशयेन युवा यविष्ठः। इष्ठः। यवीयान्। ईयसुः ॥ १७१ ॥

(त०) टयलोपश्चेति ॥ टेरलोपष्टयलोपः ईयस्विष्ठयोर्डित्वाट्टिलोपे प्राप्ते निषेधः। गुर्वादिप्रपञ्च एवैतानीति बोध्यम् ॥ १७१ ॥

(युवाल्पयोः कन् वा) (क) कनिष्ठः। कनीयान् ॥ अल्पिष्ठः। अल्पीयान्। कनिष्ठः। कनीयान्। ह्रस्वः। ह्रसिष्ठः। ह्रसीयान् ॥ क्षिप्रः क्षेपिष्ठः। क्षेपीयान् ॥ क्षुद्रः क्षोदिष्ठः। क्षोदीयान् ॥ अन्तिकः। नेदिष्ठः। नेदीयान् ॥ बाढः साधिष्ठः साधीयान् ॥ १७२ ॥

(सु०) युवाल्पयोः कन्वाः ॥ एतयोः कनादेशो वा स्यात् इष्ठेयस्वोः परतः ॥ कनिष्ठः। इष्ठः। कनीयान्। ईयसुः। अतिशयेनाल्पः। अल्पिष्ठः। इष्ठः। अल्पीयान्। ईयसुः। कनिष्ठः। कनीयान् ॥ अतिशयेन ह्रस्वः। ह्रसिष्ठः। इष्ठः। ह्रसीयान्। ईयसुः ॥ अतिशयेन क्षिप्रः क्षेपिष्ठः। इष्ठः। क्षेपीयान्। ईयसुः ॥ अतिशयेन क्षुद्रः क्षोदिष्ठः। इष्ठः। क्षोदीयान्। ईयसुः ॥ अतिशयेनान्तिकः। यस्येत्यलोपः। नेदिष्ठः। इष्ठः। नेदीयान्। ईयसुः ॥ अतिशयेन बाढः यस्येत्यलोपः। साधिष्ठः। इष्ठः। साधीयान्। ईयसुः ॥ १७२ ॥

(वृद्धप्रशस्ययोर्ज्या) ॥ १७३ ॥

(सु०) वृद्धप्रशस्ययोर्ज्या ॥ ज्या स्यादिष्ठेयस्वोः परतः ॥ १७३ ॥

ईलोपो ज्याशब्दादीयसः ॥ ज्याशब्दात्परस्येयस ईकारस्य लोपः(ख) ॥ अतिशयेन वृद्धः प्रशस्यो वा ज्यायान्। ज्येष्ठः ॥ १७४ ॥

(सु०) ईलोपो ज्याशब्दादीयसः ॥ ईयसः किम्। ज्येष्ठः ॥ प्रियोरुबहुलगुरुदीर्घाणां लोहितादित्वादिमन्। प्रेमेत्यादि ॥ १७४ ॥

(त०) ईलोपो ज्याशब्दादिति ॥ आदेशादित्यर्थः प्रकरणात् ॥ १७४ ॥

(क) अतिशयेन युवा अल्पो वा कनीयान् कनिष्ठः। पक्षे यविष्ठः अल्पिष्ठः ॥
(ख) ईलोपो ज्याशब्दादिति। प्रकरणादादेशादित्यर्थो लभ्यते।

बहोरिष्ठेयिः ॥ बहोरुत्तरस्येष्ठस्येकारस्य यिरादेशो भवति ॥१७५॥

(सु०) बहोरिष्ठेयिः ॥ इष्ठेति लुप्तषष्ठीकं पदम् बहुशब्दादिष्ठप्रत्ययेकारस्य यिः स्यात् ईयसुप्रत्यये परे ईकारस्य लोपश्च ॥ १७५ ॥

(त०) बहोरिति ॥ इष्ठेति लुप्तषष्ठीकमित्याशयेनाह-बहोरुत्तरस्येष्ठस्येकारस्येति ॥ १७५ ॥

(बहोर्भूश्च) भूयिष्ठः । भूयान् ॥ १७६ ॥

(सु०) बहोर्भूश्च ॥ बहोः स्थाने भूः स्यादिष्ठेयस्वोः परतः ॥ अतिशयेन बहुः भूयिष्ठः । इष्ठः । भूयान् । ईयसुः ॥ १७६ ॥

(विन्मतोर्लुक्) ॥ १७७ ॥

(सु०) विन्मतोर्लुक् ॥ विनो मतोश्च लुक् स्यादिष्ठेयस्वोः परतः॥ मतुग्रहणं वतोरप्युपलक्षणं बोध्यम् ॥ अतिशयेन स्रग्वी स्रजिष्ठः । स्रजीयान् । अतिशयेन त्वग्वान् त्वचिष्ठः । त्वचीयान् ॥ १७७ ॥

(किमोऽव्ययादाख्याताच्च तरतमयोराम्वद्रव्यप्रकर्षे) (क)किंतराम् । किंतमाम् । कुतस्तराम् । कुतस्तमाम् । उच्चैस्तरां गायति । उच्चैस्तमाम् । पचतितराम् । पचतितमाम् । पठतितराम् । पठतितमाम् । द्रव्यप्रकर्षे तु । उच्चैस्तमस्तरुः ॥ १७८ ॥

(सु) किमोऽव्ययादाख्याताच्च तरतमयोराम्वद्रव्यप्रकर्षे ॥ किमव्ययाख्यातेभ्यः परौ यौ तरतमौ तदन्तेभ्य आम् स्यात् । न तु द्रव्यप्रकर्षे ॥ वकार उच्चारणार्थः ॥ निरनुबन्धकग्रहणे न सानुबन्धकस्येति परिभाषया तुड्विधौ नास्य ग्रहणम् । अन्यथा पचतितराणामिति स्यात् ॥ १७८ ॥

(त०) किम इति ॥ आमन्तस्य कस्वाद्यन्तत्वादव्ययत्वं बोध्यम् । तेन पचतितरामित्यादौ विभक्तेर्लुक् ॥ १७८ ॥

(प्रमाणे दघ्नद्वयसट्मात्रटः) (ख) जानुदघ्नम् । शिरोद्वयसम् । पुरुषमात्रम् ॥ १७९ ॥

(सु०) प्रमाणे दघ्नट्द्वयसट्मात्रटः ॥ प्रथमान्तान्नाम्नः तत्प्रमाणमस्येत्यर्थे एते स्युः । "आयामस्तु प्रमाणं स्यात्" इति नेह गृह्यते किन्तु प्रमाणमिह परिच्छेदकमात्रम् । तत्र मात्रट् । आद्यौ तूर्ध्वमान एव भवतः । तथैव वृद्धैः स्वीकृतत्वात् । टित्वात् ङीप् इति स्त्रियामीप् । जानु प्रमाणमस्य जानुदघ्नम् । शिरः प्रमाणमस्य शिरोद्वयसम् । पुरुषः प्रमाणमस्य पुरुषमात्रं जलम् ॥ १७९ ॥

(क) अद्रव्यप्रकर्ष इति । उदाहरणं सारस्वते कतरतरां परमाणवः । कुतस्तमां तेषामारम्भकत्वम् । इति । उच्चैस्तरस्तरुः । एषां सद्भावे प्रमाणाभावात्तवारम्भकत्वेनाभिमताः परमाणवोऽतिशयेन कुतः । एवं परमाणूनामसत्त्वात्तेषां पृथिव्यादिचतुष्टयारम्भकत्वमतिशयेन कुत इत्यर्थः ।

(ख) प्रमाणे इति । परिमाणे इति पाठान्तरम् । वस्तुतस्तु प्रमाण इति टीकाकारसंमतत्वात् सम्यक् । दघ्नट्द्वयसटौ ऊर्ध्वे माने । मात्रस्तु अविशेषेण । इति प्रसादः ।

(त०) प्रमाणे इति ॥ अत्र च प्रमाणशब्देन परिच्छेदकमात्रं तत्र मात्रट् । द्वयस ट्दघ्नटौ तूर्ध्वमान एव न तु तिर्यङ्मानादाविति विवेकः ॥ १७९ ॥

(पुरुषहस्तिभ्यामण् च) पौरुषम् । हास्तिनम् (क) ॥ १८० ॥

(सु०) पुरुषहस्तिभ्यामण् च ॥ आभ्यां प्रमाणेऽर्थेऽणपि स्यात् ॥ १८० ॥

(त०) हास्तिनमिति ॥ हस्ती प्रमाणमस्येति विग्रहः । नो वेत्यत्र वेत्यस्य व्यवस्थितत्वाट्टिलोपादि न ॥ १८० ॥

(वत्वन्तात्स्वार्थे द्वयसट्मात्रटौ) तावद्द्वयसम् । तावन्मात्रम् ।१८१।

(त०) वत्वन्तात्स्वार्थे ॥ द्वयसट्मात्रटौ ॥ वतुप्रत्ययान्तात्प्रकृत्यर्थे एतौ स्तः ॥ तावदेव तावद्द्वयसम् ॥ १८१ ॥

(त०) तावद्द्वयसमिति ॥ तावदेवेत्यर्थः ॥ १८१ ॥

(द्वयोर्बहूनां चैकस्य निर्द्धारणे किमादिभ्यो डतरडतमौ) भवतोः काण्वः कतरः । भवतां तान्त्रिकः कतमः । भवतोर्यतरस्तार्किकस्ततर उद्गृह्णातु (ख) ॥ १८२ ॥

(सु०)द्वयोर्बहूनां चैकस्य निर्द्धारणे किमादिभ्यो डतरडतमौ ॥ किम्यत्तदेकेभ्यो द्वयोर्मध्ये एकस्य निर्द्धारणे डतरः । बहूनां मध्ये एकस्य निर्द्धारणे डतमश्च स्यात् ॥ द्वयोर्बहूनामिति निर्द्धारणे षष्ठी । निर्द्धार्यमाणवाचिभ्य एवैतावभिधानस्वभावात् ॥ कतरः काण्व इति जात्या निर्द्धारणम् ॥ तन्त्रमधीते वेत्ति वा तान्त्रिकः कतम इति गुणेन निर्द्धारणम् तर्कमधीते वेत्ति वा तार्किको यतर इति गुणेन निर्द्धारणम् । ततरस्तर्कमुद्गृह्णातु ॥ कतरोऽध्यापक इति क्रियया निर्द्धारणम् ॥ कतरो देवदत्त इति संज्ञया निर्द्धारणम् ॥ एवं यतमः ततमः । अनयोरेकतरो मैत्रः । एषामेकतमः ॥ पक्षे किम्शब्दस्य कः। यच्छब्दस्य यः । तच्छब्दस्य सः । आख्यातात्प्रयेत्यकप्रत्यये तु किमः कः । यकः । सकः । कक इति तु नोक्तमकसहितस्यापि किमो भाष्ये कादेशविधानात् ॥ १८२ ॥

(त०) द्वयोरित्यादि ॥ द्वयोर्मध्ये एकस्य निर्द्धारणे डतरः । बहूनां मध्ये एकस्य निर्द्धारणे डतम इत्यर्थः ॥ कतर इति ॥ डित्वाट्टिलोपः ॥ १८२ ॥

(संख्येयविशेषावधारणे द्वेस्तीयः) द्वयोः पूरणो द्वितीयः ।१८३।

(सु०) संख्येयविशेषावधारणे द्वेस्तीयः ॥ संख्यातुं योग्यः संख्येयः । विशेषेणावधारणम् । विशेषावधारणम् । संख्येयस्य विशेषावधारणं संख्येयविशेषावधारणं तस्मिन्नर्थे द्विशब्दात्तीयप्रत्ययः स्यात् ॥ पूरणे इत्यधिकारोऽयम् ॥ १८३ ॥

(त०) संख्येयेति ॥ संख्यातुमर्हं संख्येयम् । तस्य विशेषस्तत्पूरकस्तस्यावधारणे इत्यर्थः ॥ १८३ ॥

(त्रेस्तृ च) तृतीयः ॥ १८४ ॥

(क) नोवेति वाशब्दव्यवस्थया टिलोपाभावे हस्ती प्रमाणमस्येति हास्तिनमिति ।

(ख) उद्गृह्णातु । उद्गृह्णातु इति पाठान्तरम् । स्वसिद्धान्तावलम्बने प्रथममुपन्यस्यत्वित्यर्थः ।

(सु०) त्रेस्तृ च ॥ त्रिशब्दात्तीयः स्यात् त्रः स्थाने तृ चादेशः ॥ त्रयाणां संख्यानां पूरणः तृतीयः ॥ १८४ ॥

(त०) त्रेस्तृ चेति ॥ सम्प्रसारणमिति विहाय तृ चेत्युक्तिस्तु लाघवाय । वस्तुतस्तु तृ चेत्युक्तौ ऋ इत्यस्य प्रत्ययान्तरत्वशङ्कानिराकरणाय तदुक्तिः ॥ १८४ ॥

(षट्कतिकतिपयचतुर्भ्यस्थट्) षष्ठः । कतिथः । कतिपयथः । चतुर्थः(क) ॥ १८५ ॥

(सु०) षट्कतिकतिपयचतुर्भ्यस्थट् ॥ एभ्यस्थट् स्यादुक्तेऽर्थे ॥ षण्णां पूरणः षष्ठः ॥ कतीनां पूरणः कतिथः । कतिपयानां पूरणः कतिपयथः ॥ चतुर्णां पूरणः चतुर्थः॥ टित्वात् स्त्रियामीप् ॥ युष्मदस्मदोः षष्ठीचतुर्थीति निर्देशात् षष्ठे षकारस्य जश्त्वं चतुर्थे रेफस्य विसर्गश्च न ॥ १८५ ॥

(त०) षष्ठ इति॥ कत्यादित्वाड्डत्वाभावः । एवं चतुर्थ इत्यत्रापि विसर्गाप्रसङ्गः।१८५।

(चतुरो येयौ चस्य च लोपः) तुर्यः । तुरीयः ॥ १८६ ॥

(सु०) चतुरो येयौ चस्य च लोपः ॥ चतुर्शब्दात् य ईय एतौ स्तः । चकाराकारयोर्लोपश्च ॥ चतुर्णां पूरणः तुर्यः । तुरीयः ॥ १८६ ॥

(त०) तुर्य इति ॥ चतुर्णां पूरण इति विग्रहः ॥ १८६ ॥

(पञ्चादेर्मट्) (ख)पञ्चमः । सप्तमः ॥ १८७ ॥

(सु०) पञ्चादेर्मट् ॥ पञ्चप्रभृतिभ्यो मट् स्यात् ॥ पञ्चानां पूरणः नाम्नो नो लोपश्चेति नलोपः । पञ्चमः ॥ सप्तानां पूरणः सप्तमः ॥ अष्टानां पूरणः अष्टमः ॥ नवानां पूरणः नवमः ॥ दशानां पूरणः दशमः । टित्वात् स्त्रियामीप् । दशमी ॥ १८७ ॥

(एकादशादेर्डट्) एकादशः ॥ १८८ ॥

(सु०) एकादशादेर्डट् ॥ एकादशशब्दप्रभृतिभ्यो डट् स्यात् ॥ डित्वाट्टिलोपः । टित्वादीप् ॥ एकश्च दश चेति सहादेरात्वम् । एकादशानां पूरणः एकादशः ॥ द्वौ च दश चेति द्व्यधिका दशेति वा ॥ १८८ ॥

(त०) एकादश इति ॥ एकादशादेरिति निर्देशादेकशब्दस्यात्वम् ॥ १८८ ॥

(द्व्यष्टनोरात्वं संख्यायामुत्तरपदे) द्वादशः ॥ अष्टादशः ।१८९।

(सु०) द्व्यष्टनोरात्वं संख्यायामुत्तरपदे ॥ एतयोरात्वं स्यात् ॥ बहुव्रीहौ अशीतिपरे च न ॥ द्वादशः । बहुव्रीहौ तु द्विरावृत्ता दशेति सुप्रत्ययार्थे बहुव्रीहिः । द्विदशाः । डप्रत्ययः ॥ अशीतिपरे च द्व्यशीतिः ॥ प्राक् शताद्वक्तव्यम् । नेह । द्विशतम् । द्विसहस्रम् । द्वादशानां पूरणः द्वादशः ॥ अष्टादशानां पूरणः अष्टादशः ॥ १८९ ॥

(क) षष्ठः, चतुर्थ इति । अत्र वासुदेवः । षण्णां चतुर्णां सङ्ख्यापूरण इति विग्रहे षस्य षत्वमास्थातादौ डत्वनिषेधार्थमत्यत्रापि थविधानसामर्थ्यात्‘षोड’ इति डत्वाप्रसङ्गः । सोर्विसर्ग इत्यत्र इ-स्त्रोवेति मण्डूकप्लुतिन्यायेन वानुवृत्तेर्व्यवस्थया विसर्गाप्रसङ्गः । इति ।

(ख) सङ्ख्येयविशेषावधारणे इति सर्वत्रानुवर्तते । पञ्चादेर्दशपर्यन्तान्मट्प्रत्यय इत्यर्थः ।

(त्रेस्त्रयस्) (क)त्रयोदशः । चतुर्दशः । पञ्चदशः । षोडशः । सप्तदशः ॥ १९० ॥

त्रेस्त्रयस् ॥ त्रिशब्दस्य त्रयस् स्यात् ॥ बहुव्रीहौ अशीतिपरे च न ॥ त्रयश्च दश चेति त्रयोदशः । बहुव्रीहौ तु त्रिर्दशेति त्रिदशाः । सुप्रत्ययार्थे बहुव्रीहिः ॥ अशीतौ तु त्र्यशीतिः ।। प्राक् शतादित्येव । त्रिशतम् । त्रिसहस्रम् ।। त्रयोदशानां पूरणः त्रयोदशः । चतुर्दशानां पूरणः चतुर्दशः ॥ पञ्चदशानां पूरणः पञ्चदशः ॥ षोडशानां पूरणः षोडशः ॥ सप्तदशानां पूरणः सप्तदशः ॥ १९० ॥

(विंशत्यादेर्वा तमट्) विंशतितमः । एकेन ऊना विंशतिः एकोनविंशतिः । एकोनविंशतेः संख्यापूरक एकोनविंशतितमः ॥ * ॥

(सु०) विंशत्यादेर्वा तमट् ॥ विंशतिप्रभृतिभ्यो वा तमट् स्यात् । पक्षे एकादशादेरिति डट् । टित्वाद्दीप् ॥ डट्प्रत्यये तु एकोनविंशतेः पूरणः ॥ * ॥

(विंशतेस्तिलोपो डिति) एकोनविंशः । विंशः । त्रिंशत्तमः । त्रिंशः । द्वाभ्यामधिका अशीतिर्द्व्यशीतिः । द्व्यशीतेः संख्यापूरको द्व्यशीतितमः । द्विचत्वारिंशत्तमः । पञ्चाशत्तमः । षष्टेः सङ्ख्यापूरणः षष्टितमः । सप्ततितमः । नवतितमः ॥ १९१ ॥

(सु०) विंशतेस्तिलोपो डिति ॥ विंशतिशब्दस्य ति इत्यस्य लोपः स्यात् डिति प्रत्यये ॥ एकोनविंशः । तमटि एकोनविंशतितमः ॥ विंशतेः पूरणः विंशतितमः । डति तु विंशः ॥ एकविंशतेः पूरणः एकविंशतितमः । एकविंशः ॥ एवं द्वाविंशतितमः । द्वाविंशः ॥ त्रयोविंशतितमः । त्रयोविंशः ॥ चतुर्विंशतितमः ॥ चतुर्विंशः ॥ पञ्चविंशतितमः । पञ्चविंशः ॥ षड्विंशतितमः । षड्विंशः ॥ सप्तविंशतितमः । सप्तविंशः ॥ अष्टाविंशतितमः । अष्टाविंशः ॥ किञ्च षङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतमेते निपातेन सिद्धाः ॥ एकोनात्रिंशतः पूरणः एकोनत्रिंशत्तमः । एकोनत्रिंशः ॥ त्रिंशतः पूरणस्त्रिंशत्तमः । त्रिंशः ॥ एवम् एकत्रिंशत्तमः । एकत्रिंशः ॥ द्वात्रिंशत्तमः ॥ द्वात्रिंशः ॥ त्रयस्त्रिंशत्तमः । त्रयस्त्रिंशः ॥ चतुस्त्रिंशत्तमः । चतुस्त्रिंशः ॥ पञ्चत्रिंशत्तमः ॥ पञ्चत्रिंशः ॥ षट्त्रिंशत्तमः । षट्त्रिंशः ॥ सप्तत्रिंशत्तमः । सप्तत्रिंशः ॥ अष्टात्रिंशत्तमः । अष्टात्रिंशः ॥ एकोनचत्वारिंशत्तमः । एकोनचत्वारिंशः । चत्वारिंशत्तमः । चत्वारिंशः ॥ एकचत्वारिंशत्तमः । एकचत्वारिंशः ॥ एवं सर्वत्र डट्तमटौ ॥ द्व्यष्टनोरात्वं त्रेस्त्रयश्च वा चत्वारिंशत् प्रभृतौ परे ॥ द्विचत्वारिंशत् । द्वाचत्वारिंशत् । त्रिचत्वारिंशत् । त्रयश्चत्वारिंशत् चतुश्चत्वारिंशत् ॥ पञ्चचत्वारिंशत् ॥ षट्चत्वारिंशत् ॥ सप्तचत्वारिंशत् ॥ अष्टचत्वारिंशत् । अष्टाचत्वारिंशत् ॥ एकोनपञ्चाशत् ॥ पञ्चाशत् ॥ एकपञ्चाशत् । द्विपञ्चाशत् । द्वापञ्चाशत् । त्रिपञ्चाशत् । त्रयःपञ्चाशत् ॥ चतुष्पञ्चाशत् ॥ पञ्च-

---

(क) त्रयश्च दश चेति त्रयोदशः । बहुव्रीहौ तु त्रिदशेति त्रिदशाः । अशीति परे तु त्रिशब्दस्य न त्रयस् । त्र्यशीतिः ।

पञ्चाशत् ॥ षट्पञ्चाशत् ॥ सप्तपञ्चाशत् । अष्टापञ्चाशत् ॥ अष्टपञ्चाशत् ॥ एकोनषष्टिः ॥ षष्टिः ॥ एकषष्टिः ॥ द्वाषष्टिः । द्विषष्टिः ॥ त्रिषष्टिः । त्रयःषष्टिः ॥ चतुःषष्टिः ॥ पञ्चषष्टिः । षट्षष्टिः ॥ सप्तषष्टिः ॥ अष्टषष्टिः । अष्टाषष्टिः ॥ एकोनसप्ततिः ॥ सप्ततिः ॥ एकसप्ततिः ॥ द्विसप्ततिः ॥ द्वासप्ततिः ॥ त्रिसप्ततिः । त्रयःसप्ततिः ॥ चतुःसप्ततिः ॥ पञ्चसप्ततिः ॥ षट्सप्ततिः । सप्तसप्ततिः ॥ अष्टसप्ततिः । अष्टासप्ततिः ॥ एकोननवतिः ॥ नवतिः ॥ एकनवतिः ॥ द्विनवतिः । द्वानवतिः ॥ त्रिनवतिः ॥ त्रयोनवतिः ॥ चतुर्णवति ॥ पञ्चनवतिः ॥ षण्णवतिः ॥ सप्तनवतिः ॥ अष्टनवतिः । अष्टानवतिः ॥ एकोनशतम् ॥ शतम् ॥ शतस्य पूरणः शततमः ॥ १९१ ॥

(शतादेर्नित्यम्) शततमः ॥ १९२ ॥

(सु०) शतादेर्नित्यम् ॥ शतप्रभृतिभ्यस्तमडेव स्यात् । न डट् । असंख्यादेः षष्टिशब्दाच्च नित्यं तमट् । षष्टितमः । संख्यादेः षष्टेस्तु डट्तमटौ । एकषष्टः । एकषष्टितमः॥१९२।

(संख्यायाः प्रकारे धा) द्विधा । त्रिधा । चतुर्धा । दशधा ॥१९३॥

(सु०) संख्यायाः प्रकारे धा ॥ संख्यावाचिशब्दात्प्रकारेऽर्थे धाप्रत्ययः स्यात् ॥ द्वौ प्रकारौ द्विधा ॥ त्रयः प्रकारास्त्रिधा ॥ चत्वारः प्रकाराश्चतुर्धा ॥ दश प्रकाराः दशधा॥ क्त्वाद्यन्तं चेत्यव्ययत्वाद्विभक्तेर्लुक् ॥ १९३ ॥

(द्वित्रिभ्यामेधाधमुञौ धा) (क)द्वेधा । त्रेधा । द्वैधम् । त्रैधम् ।१९४।

(सु०)द्वित्रिभ्यामेधाधमुञौ वा ॥ आभ्यामेतौ स्तः प्रकारेऽर्थे पक्षे धा ॥ द्वौ प्रकारौ यस्य लोप इतीकारलोपः । द्वेधा । धमुञ उकार उच्चारणार्थः । द्वैधम् । द्विधा ॥ त्रयः प्रकाराः त्रेधा । त्रैधम् । त्रिधा ॥ १९४ ॥

(एकाद्ध्यमुञ्वा) ऐकध्यम् । एकधा ॥ १९५ ॥

(सु०) एकाद्ध्यमुञ्वा ॥ एकशब्दात् ध्यमुञ् वा स्यात् ॥ उकार उच्चारणार्थः । पक्षे धा ॥ एकः प्रकारः ऐकध्यम् । एकधा ॥ १९५ ॥

(एकादाकिन्नसहाये) (ख)एकाकी ॥ १९६ ॥

(सु०) एकादाकिन्नसहाये ॥ असहायवाचिन एकशब्दादाकिन् स्यात् ॥ 'यस्य लोपः' इत्यल्लोपः' एकाकी । कप्रत्ययोऽपि । एककः ॥ १९६ ॥

(क्रियाया आवृत्तौ कृत्वसु) पञ्चकृत्वः । सप्तकृत्वः ॥१९७॥

(सु०) क्रियाया आवृत्तौ कृत्वसु ॥ संख्यावाचिशब्दात् क्रियाया आवृत्त्यर्थे कृत्वसु प्रत्ययः स्यात् ॥ पौनः पुन्येन गणनमावृत्तिः । पञ्च वारान् पञ्चकृत्वः । सप्तवारान् सप्तकृत्वः । क्त्वाद्यन्तं चेत्यव्ययत्वाद्विभक्तेर्लुक् ॥ वारशब्दस्य क्रियोत्पत्त्याधारकालवाचित्वात्कालाध्वनोरिति द्वितीया । संख्यायाः किम् । भूरि वारान् भुङ्क्ते । भूरिशब्दस्य लौकिकसंख्यावाचित्वेऽपि नेह ग्रहणम् ॥ १९७ ॥

(क) द्वित्रिभ्यामेधा–धमुञौ वा स्तः प्रकारेऽर्थे । पक्षे धा । क्त्वाद्यन्तं चेत्यव्ययत्वाद्विभक्तेर्लुक् ।

(ख) असहायवाचिन एकशब्दादाकिन् प्रत्ययः स्यादित्यर्थः । कप्रत्यये एककः ।

(द्वित्रिचतुर्भ्यः सुः) द्विः । त्रिः । चतुः ॥ १९८ ॥

(सु०) द्वित्रिचतुर्भ्यः सुः ॥ एभ्यः सुप्रत्ययः स्यात् क्रियाया आवृत्तौ गणने ॥ उकार उच्चारणार्थः । कृत्वसोऽपवादोऽयम् ॥ द्वौ वारौ द्विः ॥ त्रीन् वारान् त्रिः ॥ चतुरो वारानिति रात्सस्येति सलोपः । चतुः । कस्वाद्यन्तं चेत्यव्ययत्वाद्विभक्तेर्लुक् ॥ बहोर्वा धाऽऽसन्नकाले । पक्षे कृत्वस् बहुधा बहुकृत्वो वा दिवसस्य भुङ्क्ते ॥ आसन्नकाले किम् । बहुकृत्वो मासस्य भुङ्क्ते ॥ दिवसस्येति सम्बन्धे षष्ठी ॥ १९८ ॥

(एकस्य सकृदादेशश्च) एकवारं सकृत् ॥ १९९ ॥

(सु०) एकस्य सकृदादेशश्च ॥ एकशब्दस्य स्थाने सकृदित्यादेशः स्याच्चात्सुप्रत्ययः संयोगान्तस्येति सुलोपः । गुरुत्वात्सर्वस्यादेशः । एकवारमिति सकृत् ॥ १९९ ॥

(बह्वल्पार्थात्कारकाच्छस्) (क)बहुशः । अल्पशः ॥२००॥

(सु०) बह्वल्पार्थात्कारकाच्छस् ॥ बहु चाल्पं च बह्वल्पे बह्वल्पे अर्थौ यस्य तद्बह्वल्पार्थं तस्माद्बह्वल्पार्थात् कारकात् शस् स्यात् ॥ बहुभ्य इति बहुशः । अल्पेभ्य इत्यल्पशः । दानपात्रे चतुर्थी । बह्वल्पार्थात्किम् । गां ददाति ॥ अर्थग्रहणात्पर्यायेभ्यो विशेषेभ्यश्च शस् । भूरिशो ददाति । त्रिशः ॥ कारकात्किम् । बहूनां स्वामी । अल्पानां स्वामी ॥ २०० ॥

(त०) कारकादिति ॥ तेन बहूनां स्वामीत्यत्र न ॥ २०० ॥

(संख्यापरिमाणाभ्यां वीप्सायाम्) (ख) द्वौ द्वौ इति द्विशो ददाति । प्रस्थशः । माषशः ॥ २०१ ॥

(सु०) संख्यापरिमाणाभ्यां वीप्सायाम् ॥ संख्यापरिमाणवाचककारकाभ्यां वीप्सायामर्थे शस् स्यात् ॥ द्वौ द्वाविति द्विशः ॥ प्रस्थं प्रस्थमिति प्रस्थशः ॥ माषं माषमिति माषशः ॥ संख्यापरिमाणाभ्यां किम् । घटं घटं ददाति । वीप्सायां किम् । द्वौ ददाति ॥ कारकात्किम् । द्वयोर्द्वयोः स्वामी ॥ २०१ ॥

(त०) संख्यैकवचनाभ्यां (परिमाणाभ्या) मिति ॥ संख्या च एकवचनं च संख्यैकवचने ताभ्याम् । प्रस्थश इति ॥ प्रस्थं प्रस्थमित्यर्थः ॥ एकवचनग्रहणेन कृत्स्नावेकार्थता नियता । परिमाणशब्दा एव ग्राह्यास्तेनेह न । घटं घटमिति । घटादयो हि जातिशब्दा नैकार्था भवन्ति । जातियोगस्यैकानेकसाधारणत्वात् ॥ केचित्तु कुम्भशो ददातीति प्रयुञ्जाना जातिशब्देभ्योऽपि मन्यन्ते । एकैकश इत्यादिप्रयोगास्तु प्रामादिका एव । शस्प्रत्ययेनैव वीप्सावगतेः । स्वार्थिकशसा तु न क्षतिः । "अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम् । सहस्रशः समेतानां परिषत्त्वं न विद्यते ॥" इत्यत्र तु सहस्रं सहस्रं ये समवेतास्तेषामपि परिषत्त्वं नेत्यर्थः । इति समवायक्रियां प्रति सहस्रस्य कर्तृत्वं वीप्साऽस्त्येवेति ॥ २०१ ॥

(क) कारकादिति कथनात् 'बहूनां स्वामी' इत्यत्र न शस् । षष्ठ्या अकारकत्वात् ।

(ख) संख्यापरिमाणाभ्यामिति । प्रमाणैकवचनाभ्यामिति क्वचित् पाठः ।

(तयडयटौ संख्याया अवयवे) (ग) द्वाववयवौ यस्य द्वितयम्। त्रितयम्। चतुष्टयम्। चतुष्टयी ॥ २०२ ॥

(सु०) तयडयटौ संख्याया अवयवे ॥ अवयवे वर्तमाना या संख्या तद्वाचिनः प्रथमान्तात् षष्ठ्यर्थे तयडयटौ स्तः ॥ टकारः ङीबर्थ इतोऽर्थः ॥ द्वितयम् ॥ यस्येतीलोपः ॥ द्वयम् ॥ त्रयोऽवयवा यस्य त्रितयम्। त्रयम् ॥ उभाववयवौ यस्य उभयम् ॥ नित्यमयट् ॥ चत्वारोऽवयवा यस्याः सा रेफस्य विसर्गे सत्वे षत्वे च ष्टुत्वम्। चतुष्टयी ॥२०२॥

(त०) तयडयटाविति ॥ तयट् च अयट् च तयडयटौ ॥ टित्त्वमीबर्थम् ॥ यत्तु प्राचा तयायटाविति पठितम्। यच्च तद्व्याख्यातृभिर्वासुदेवादिभिरुक्तं द्वितयोत्यत्र नदादित्वादीप्। द्वयीत्यत्र तु टित्त्वादिति तत्रेपो द्विहेतुकत्वेन गौरवादुपेक्षितम् ॥ चतुष्टयमिति ॥ चत्वारोऽवयवा अस्येति विग्रहः। रेफस्य विसर्गे तस्य सत्वे षत्वे ष्टुत्वाद्रूपसिद्धिः ॥२०२॥

(स्त्रीपुंसाभ्यां नञ्स्नञौ) स्त्रियां भवः स्त्रैणः। पुंसि भवः पौंस्नः ॥ २०३ ॥

(सु०)स्त्रीपुंसाभ्यां नञ्स्नञौ ॥ आभ्यामेतौ स्तः भवाद्यर्थे ॥ स्त्रैणः। संयोगान्तस्येति सलोपः। पौंस्नः ॥

अथ विभक्तिनामकप्रत्यया उच्यन्ते। इह वक्ष्यमाणप्रत्ययानां विभक्तिसंज्ञा बोध्या॥ इदम इश् विभक्तौ। शित्त्वात्सर्वादेशः। इदम एतेतौ स्तो रथयोः। इशोऽपवादोऽयम्। एतदः अश् विभक्तौ। एतद् एतेतौ स्तो रथयोः। अशोऽपवादोऽयम्॥ सर्वस्य सो वा दे। किमः कुः तहयोः॥ पञ्चम्यर्थे किंसर्वादिबहुभ्यस्तस् वाऽद्व्यादिभ्यः। अद्व्यादिपर्युदासात् किमः पृथग्ग्रहणम्। कस्मादिति तसि कुः। कुतः॥ यस्मादिति तसि त्यदादेरित्यः। यतः॥ तस्मादिति ततः॥ अस्मादिति तसि इश्। इतः॥ एतस्मादिति तसि अशादेशः। अतः॥ अमुष्मादिति अदसस्तसित्यदाद्यत्वे मत्वे उत्वे च अमुतः॥ बहोरिति बहुतः॥ द्व्यादेस्तु द्वाभ्यामित्यादि॥ सर्वोभयार्थाभ्यां पर्यभिभ्यां तस्। परितः सर्वत इत्यर्थः॥ अभितः। उभयतः इत्यर्थः॥ सप्तम्यर्थे किंसर्वादिबहुभ्यस्त्रोऽद्व्यादिभ्यः॥ इदमः सप्तम्यर्थे हः॥ त्रस्यापवादः। इशादेशः। अस्मिन्निति इह॥ किमः सप्तम्यर्थे त्रः। कस्मिन्निति कुत्र॥ किमः कश्च। यस्येत्यलोपः। क॥ छन्दसि किमो हः सप्तम्यर्थे। कुह॥ एतस्मिन्निति एतदोऽश। अत्र पञ्चमीसप्तमीतरविभक्त्यन्तादपि तसादयो दृश्यन्ते भवदादियोगे एव। सभवान्। ततोभवान्। तत्रभवान्। तम्भवन्तन्। ततोभवन्तम्। तत्रभवन्तम्। इत्यादि॥ एवं दीर्घायुः। देवानांप्रियः। आयुष्मान्। एतैर्योगेऽपि॥ सर्वैकान्यकियत्तद्भ्यः कालार्थेभ्यः सप्तम्यर्थे दा। सर्वस्मिन् काले इति सादेशो वा। सदा सर्वदा। एकस्मिन्काले इति एकदा। अन्यस्मिन् काले इति अन्यदा। कस्मिन् काले इति। त्यदादेरित्यत्वम्। कदा।

(ग)तयडयटाविति। सङ्ख्यायां तयायटाविति सारस्वते पाठः। इदं तत्र व्याख्यानम्। तयप् अयट् च तौ संख्याया अवयवत्वविवक्षायां भवत इत्यर्थः। द्वितयी त्रितयीत्यत्र नदादित्वादीप्। द्वयी त्रयीत्यत्र यटष्टित्वात् 'ष्ट्रित्' इतीप्। केचित्तु तयायटो इति पठित्वा डित्वाट्टिलोपे नदादित्वादेवेप् इत्याहुः। तदसत्। यस्य लोप इत्येव सिद्धे डित्त्ववैयर्थ्यप्रसङ्गात्।

यस्मिन् काले इति यदा । तस्मिन् काले इति तदा ।। कालार्थेभ्य इति किम् । सर्वत्र देशे । अस्मिन् काले इति कालवाचकादिदमः सप्तम्यर्थे र्हिप्रत्ययः । हप्रत्यय-स्यापवादोऽयम् । एतादेशः । एतर्हि ।। काले इति किम् । इह देशे ।। कालवाचका-दिदमः सप्तम्यर्थेऽधुनादानींप्रत्ययौ च । इशादेशः । यस्य लोप इति लोपः । अ-धुना । इशादेशः । इदानीम् ॥ कालवाचकात्तदः सप्तम्यर्थे दानींप्रत्ययश्च । त-स्मिन्काले त्यदादेरित्यत्वम् । तदानीम् ।। किंयत्तदेतद्भ्योऽनद्यतनकालवाचके-भ्यः सप्तम्यर्थे र्हिप्रत्ययो वा । कस्मिन् काले इति इति त्यदादेरित्यत्वम् । कर्हि । पक्षे दा । कदा । यस्मिन् काले यर्हि । यदा । तस्मिन् काले तर्हि । तदा । एतस्मिन्काले एतादेशः । एतर्हि ।। समानेऽह्नि इति सहादेरित्यनेन समानस्य सः । समानशब्दात् सप्तम्यन्तस्याहन् शब्दस्यार्थे द्यस निपात्यते । सद्यः ।। पूर्वस्मिन् वत्सरे इति-पूर्वतरे वत्सरे इति च सहादेरित्यनेन पूर्वपूर्वतरयोः पर इत्यादेशो निपात्यते संवत्सरेऽर्थे । पूर्वपूर्वतरशब्दाभ्यां उत् आरि-प्रत्ययौ । यस्येत्यलोपः । परुत् । परा-रि ।। अस्मिन् संवत्सरे इति संवत्सरेऽर्थे इद-शब्दात् समसण्प्रत्ययः । इशादेशः । आदिवृद्धिः । षत्वम् । ऐषमः ॥ परस्मिन्नहनीति परशब्दादहनि इत्यर्थ एद्यविप्रत्ययो निपातनात् । परेद्यवि ॥ अस्मिन्नहनीति इदम्शब्दात् द्यप्रत्ययो निपा-तनादशादेशश्च । अद्य ॥ पूर्वअन्यअन्यतरअपरअधरउभउत्तर इत्येतेभ्योऽहनी-त्यर्थे एद्युस्प्रत्ययो निपातनात् । यस्येत्यलोपः । पूर्वस्मिन्नहनीति पूर्वेद्युः । अन्य-स्मिन्नहनीति अन्येद्युः । अन्यतरस्मिन्नहनीति अन्यतरेद्युः । इतरस्मिन्नहनीति इतरेद्युः । अपरस्मिन्नहनीति अपरेद्युः । अधरस्मिन्नहनीति अधरेद्युः । उभयोरह्नोरिति उभयेद्युः । उभयाद् द्युः प्रत्ययः । उभयद्युः ॥ अद्व्यादिभ्यः सर्वादिबहुभ्यः प्रकारेऽर्थे वर्त-मानेभ्यः स्वार्थे था प्रत्ययः । सामान्यस्य भेदको विशेषः प्रकारः यथा ॥ किमि-दमेतद्भ्यः प्रकारेऽर्थे वर्तमानेभ्यः स्वार्थे थम्प्रत्ययः । थाप्रत्ययस्यापवादोयम् । केन प्रकारेण त्यदादेरित्यः । कथम् । अनेन प्रकारेण एतेन प्रकारेण वा इदमेत-दोरित् इत्थम् । अव्ययत्वाद्विभक्तेर्लुक् सर्वत्र ।। इति विभक्तिनामकाः प्रत्ययाः ।।

दिग्देशकालवृत्तिभ्यो दिशि रूढेभ्यः शब्देभ्यः सप्तमीपञ्चमीप्रथमाविभक्त्यर्थेऽस्ता-त्प्रत्ययः । पूर्वाधरावरेभ्योऽसिप्रत्ययोऽपि । पुरधावादेशाश्च । अस्तादसोः परयोः। पूर्वस्यां पूर्वस्याः पूर्वा वा दिक् पुरः । असिप्रत्ययः । पुरस्तात् । अस्तात्प्रत्ययः । पूर्व-शब्दादतस् प्रत्ययः पुरादेशश्च वा । पुरतः । 'स्यात्पुरः पुरतोऽग्रतः' इत्यमरः॥ 'पु-रतः प्रथमे चाग्रे' इति विश्वश्च ॥ अधरस्याम् अधरस्या अधरा वा अधः । असि । अध-स्तात् । अस्तात् प्रत्ययः ॥ अवरस्याम् अवरस्याः अवरा वा अवः । असि । अवस्तात् । अस्तात् । अवरस्यास्तात्परेऽव् वा । अवस्तात् । अवरस्तात् ।। एवं देशे काले च ।। दिशि रूढेभ्यः किम् । ऐन्द्र्यां वसति ।। सप्तम्याद्यर्थे किम् । पूर्वं ग्रामं गतः ।। दिगादि-वृत्तिभ्यः किम् । पूर्वस्मिन् गुरौ वसति ।। दक्षिणोत्तराभ्यामतस् । अस्तात्प्रत्ययस्याप-वादः । दक्षिणस्यां दक्षिणस्याः दक्षिणा वा दिक् दक्षिणतः । उत्तरस्याम् उत्तरस्याः उ-त्तरा वा उत्तरतः । अतस् ।। पराऽवराभ्यामतस् वा । पक्षेऽस्तात् । परस्यां परस्याः

परा वा परतः । अवरस्याम् अवरस्याः अवरा वा अवरतः । अतस् । पक्षेऽस्तात् । परस्तात् । अवरस्तात् ॥ **अञ्चत्यन्ताद् दिक्शब्दादस्तातप्रत्ययस्य लुक्** । तद्धितलुकि स्त्रीप्रत्ययस्य लुग् वाच्यः । प्राच्यां प्राच्याः प्राची वा दिक् प्राक् । उदक् ॥ एवं देशे काले च ॥ **ऊर्ध्वशब्दाद् रिरिष्टात्प्रत्ययावस्तात्विषये** । ऊर्ध्वस्योपादेशश्च ॥ ऊर्ध्वम् ऊर्ध्वात् ऊर्ध्वो वेति । उपरि । उपरिष्टाद्वा ॥ **अपरशब्दादात्प्रत्ययोऽपरस्य पश्चादेशश्चास्तात्विषये** । अपरस्मिन् अपरस्मात् अपरो वेति पश्चात् ॥ **उत्तराधरदक्षिणादात्प्रत्ययोऽस्तात्विषये** । उत्तरात् । अधरात् । दक्षिणात् । **अदूरे वर्तमानेभ्यः उत्तराधरदक्षिणेभ्य एनप्रत्ययो वा सप्तमीप्रथमाविभक्त्यर्थे** । उत्तरस्मिन् उत्तरो वेति उत्तरेण । अधरस्मिन् अधरो वेति अधरेण । दक्षिणस्मिन् दक्षिणो वेति दक्षिणेन । पक्षे उत्तरात् । अधरात् । दक्षिणात् । आत् प्रत्ययः ॥ उत्तरतः । अधः । अधस्तात् । दक्षिणतः ॥ केचिद्दिक्शब्दमात्रादेनप्रत्ययमाहुः । पूर्वेण ग्रामम् । अपरेण ग्रामम् । **दक्षिणशब्दादाप्रत्ययः सप्तमीप्रथमाविभक्त्यर्थे** । दक्षिणस्यां दक्षिणा वेति दक्षिणा । दक्षिणोत्तराभ्यां दूरेऽर्थे आआहिप्रत्ययौ । दक्षिणस्यां दिशि दूरे इति दक्षिणाहि । दक्षिणा । उत्तरस्यां दिशि दूरे इति उत्तराहि । उत्तरा । अव्ययत्वाद्विभक्तेर्लुक् सर्वत्र ॥ २०३ ॥ इति सुबोधिन्यां तद्धिताः ॥ १८ ॥

(त०) पौरन इति ॥ संयोगान्तस्येति सलोपः ॥ २०३ ॥

इति तद्धितप्रकरणम् ॥ १८ ॥

अथ द्विरुक्तप्रक्रिया ॥ १९ ॥

(वीप्सायां पदं द्विः) वृक्षं वृक्षं सिञ्चति । ग्रामो ग्रामो रमणीयः ॥ १ ॥

(सु०) अथ सर्वं पदं द्विरुच्चारयेदित्यधिकारोऽयम् ॥ वीप्सायां पदं द्विः ॥ व्याप्तुमिच्छा वीप्सा व्याप्तिप्रतिपिपादयिषेति यावत् (क) । व्याप्तिः कार्त्स्न्यं तच्चाधिकारकम् । सर्वे ब्राह्मणा आमन्त्रिता इत्यादौ यथा । न हि जगतीतले विद्यमाना ब्राह्मणाः सर्वेऽपि केनचिदामन्त्रयितुं शक्यन्ते इति स्वग्रामस्थस्वजातीयब्राह्मणानां सङ्कोचो यथाभ्युपेयते तथात्रापि सकलवृक्षसेचनसामर्थ्यं कस्यापि मनुष्यस्य नास्तीति यत्र वाटिकादौ वृक्षसेचनार्थमधिकारस्तद्वाटिकास्थवृक्षाणामेव कार्त्स्न्यं वृक्षं वृक्षं सिञ्चतीत्यादौ गम्यते इत्यभ्युपेयम् । यत्र तु सङ्कोचे कारणं नास्ति तत्रासङ्कोच इष्ट एव । यथा जातो जातो निधनमुपैतीति ॥ तस्यां वीप्सायां वाच्यायामेकस्य पदस्य स्थाने द्वे पदे समुदिते युगपदादेशत्वेन विधीयेते इत्यर्थः । वृक्षं वृक्षमित्यत्र प्रत्येकनिष्ठमेकत्वमेव हि प्रतिभासतेऽतो न बहुवचनप्रसङ्गः(ख) ॥ १ ॥

(क) व्याप्तिप्रतिपिपादयिषेति । सा च प्रयोक्तृधर्मः । आबाधवत् । गतगता इत्युक्ते प्रियस्य चिरगमनादिना पीडितो वाक्यं प्रयुक्ते इति यथा प्रतीयते तथा वृक्षं वृक्षं सिञ्चतीत्यादावपि व्याप्तिं बुबोधयिषोरिदं वाक्यमित्यवगमात् ।

(ख) अत्र मनोरमा । "बहूनां भानेऽपि बहुत्वसंख्यायास्तत्राभानात् वृक्षं वृक्षमित्यादौ न बहुवचनप्रसङ्गः । प्रत्येकनिष्ठमेकत्वमेव हि तत्र भासते" इति । केचित्तु—वृक्षं वृक्षमिति समुदायस्य तु प्रातिपदिकत्वाभावात् बहुवचनस्य प्रसङ्ग एव नास्ति । इति वदन्ति । विस्तरस्तु तत्त्वबोधिन्यादाववगन्तव्यः ।

(त०) वीप्सायामिति ॥ व्याप्तुमिच्छा वीप्सा व्याप्तिप्रतिपिपादयिषेति यावत्। व्याप्तिश्च कार्त्स्न्यम् ॥ वृक्षं वृक्षं सिञ्चतीति ॥ सेकक्रियायाः सकलवृक्षे अन्वयः। बहुवचनप्रसङ्गस्तु बहूनां भानेऽपि बहुत्वसंख्याया अभानादेव न। प्रत्येकनिष्ठमेकत्वमेव हि तत्र भासते ॥ १ ॥

(परेर्वर्जने वा द्वित्वम्) परि परि वङ्गेभ्यो वृष्टो देवः। परि वङ्गेभ्यो वृष्टो देवः। वङ्गान्परिहृत्येत्यर्थः ॥ २ ॥

(सु०) **परेर्वर्जने वा द्वित्वम्** ॥ वर्जनार्थवाचिनः परेर्वा द्वित्वं स्यात् ॥ परि परि वङ्गेभ्य इत्यत्र परियोगे पञ्चमी। वाग्रहणात्परि हरेः संसार इति ॥ २ ॥

(त०) परेर्वर्जन इति ॥ अत्र वाशब्दस्य व्यवस्थितत्वात्समासे न। तेन परि त्रिगर्तं वृष्टो देव इत्यादौ न ॥ २ ॥

(उपर्यध्यधसः सामीप्ये द्विः) उपर्युपरि ग्रामम्। ग्रामस्योपरिष्टात्समीपदेश इत्यर्थः। अध्यधि सुखम्। सुखस्योपरिष्टात्समीपदेश इत्यर्थः॥३॥

(सु०) **उपर्यध्यधसां सामीप्ये द्विः** ॥ सामीप्यार्थवाचिन एते द्विः स्युः ॥ सामीप्यं प्रत्यासत्तिस्तच्च कालकृतं देशकृतं वा। कालकृतस्य सामीप्यस्योदाहरणमध्यधि सुखमिति। अन्यद्द्वयं देशकृतस्य सामीप्यस्योदाहरणम् ॥ ३ ॥

(त०) उपरीति ॥ उपरि शिरसो घटं धारयतीत्यत्र तु औत्तराधर्यमात्रविवक्षणेन सामीप्याभावान्न द्वित्वम् ॥ ३ ॥

(वाक्यादेः सम्बोधनस्यासूयासम्मतिकोपकुत्सनभर्त्सनेषु) असूयायामुदाहरणम्। सुन्दर सुन्दर वृथा ते सौन्दर्यम् ॥ संमतौ। देव देव वन्द्योऽसि ॥ कोपे। दुर्विनीत दुर्विनीत इदानीं ज्ञास्यसि ॥ कुत्सने। धानुष्क धानुष्क वृथा ते धनुः ॥ भर्त्सने। चोर चोर घातयिष्यामि त्वाम्(क)॥४

(सु०) **वाक्यादेः सम्बोधनस्याऽसूयासंमतिकोपकुत्सनभर्त्सनेषु** ॥ एष्वर्थेषु विद्यमानस्य वाक्यादिस्थितस्य सम्बोधनस्य द्वित्वं स्यात् ॥ ननु कोपासूयाभ्यां पृथक् कुत्सनभर्त्सनग्रहणमपार्थकम्। नाऽसूयां विना कुत्सयते नाप्यकुपितो भर्त्सयति। इति चेन्न्रा :। गुरवो हि हितैषित्वादकुपिता अपि भर्त्सनं कुर्वन्ति। विनाप्यसूयया कुत्सां वेन्त्यतः पृथक् तयोर्निर्देशः ॥ संमतिः पूजा ॥ ४ ॥

(त०) वाक्यादेरिति ॥ वाक्यादेः सम्बोधनस्यासूयाद्यर्थेषु द्विरित्यर्थः। गुणेषु दोषारोपोऽसूया ॥ ४ ॥

(द्विरुक्त एकशब्दो बहुव्रीहिवत्) तेन विभक्तिलोपपुंवद्भा-

(क) वाक्यादेरिति। द्वे स्त इति शेषः। यद्यपि कोपाद्भर्त्सनम्। असूयया कुत्सनम्। तथापि विनापि कोपासूये भर्त्सनकुत्सनयोः शिष्यादौ सम्भवात् पृथग् ग्रहणमिति भाष्ये स्पष्टम्। सुन्दरेति। सौन्दर्यमसहमानस्येदं वाक्यम्। देवेति। तव वन्दनं सम्मतमित्यर्थः। दुर्विनीतेति। क्रोधाविष्टस्य वाक्यम्। ज्ञास्यसीति। दुर्विनयस्य फलमिति शेषः। धानुष्केति। युद्धासमर्थं प्रति निन्देयम्। चोरेति। चोरं प्रति अवाच्यवादोऽयम्।

वौ । एकैकमक्षरम् । एकैकयाऽऽहुत्या । इह पूर्वभागे पुंवद्भावादवग्रहे विशेषः। पदविभागोऽवग्रहः । एकैकया इत्यादौ विशेषः । एकैकस्मै देहि ॥ ५ ॥

(सु०) द्विरुक्त एकशब्दो बहुव्रीहिवत् ॥ बहुव्रीहौ यत्कार्यमुक्तं तद् द्विरुक्ते एकशब्दे भवतीत्यर्थः ॥ बहुव्रीहिसमासवत्त्वात् समासप्रत्यययोरिति विभक्तिलोपः। पुंवद्वेति पुंवद्भावश्च । एकमेकमित्यत्र द्वयोरपि विभक्त्योर्लुकि कृते बहुव्रीहिसमासवद्भावादेव कृत्तद्धितसमासाश्चेत्यनेन समुदायात्स्याद्युत्पत्तिः । अन्तरङ्गैकसंख्यावच्छब्दो द्विरुक्तार्थः संख्यान्तरे निराकाङ्क्ष एव इत्युक्तत्वादेकवचनमेव । एकैकयेत्यत्र सर्वादेः समासादाविति पूर्वभागे पुंवद्भावः । एकस्मै एकस्मै इत्येकैकस्मै ॥ ५ ॥

(त०) अवग्रहे इति ॥ वैदिकानां पदपाठे इत्यर्थः ॥ ५ ॥

(पीडायां द्योत्यायां द्वे स्तो बहुव्रीहिवच्च) गतगतः । विरहात्पीड्यमानस्येयमुक्तिः । गतगता ॥ ६ ॥

(सु०) पीडायां द्योत्यायां द्वे स्तो बहुव्रीहिवच्च ॥ पीडार्थद्योतकं पदं द्विः स्यात् ॥ गतः गत इति बहुव्रीहिवद्भावाद्विभक्तेर्लुक् । गतगतः । गता गतेति पुंवद्वेति पुंवद्भावः । गतगता ॥ ६ ॥

(त०) गतगतेति ॥ इह पुंवद्भावः पूर्वपदस्य बहुव्रीहिवद्भावान्नोत्तरपदस्येति भावः ६

(सादृश्ये द्योत्ये गुणवचनस्य द्वे स्तो बहुव्रीहिवच्च)

पटुपट्वी । पटुपटुः । पटुसदृशः । ईषत्पटुरिति यावत् ॥ गुणोपसर्जनद्रव्यवाचिनः केवलगुणवाचिनश्चेह गृह्यन्ते । शुक्लशुक्लः पटः । शुक्लशुक्लं रूपम् ॥७॥

(सु०) सादृश्ये द्योत्ये गुणवचनस्य द्वे स्तो बहुव्रीहिवच्च ॥ तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं सादृश्यम् । पट्वी पट्वीति पुंवद्वेति पुंवद्भावः । पटुः पटुरिति बहुव्रीहिवद्भावाद्विभक्तेर्लुक् । पटुपटुः । 'गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति' इत्युक्तत्वात् । यत्र शुक्लादयः शब्दा द्रव्यवाचकास्तत्र गुणा उपसर्जनीभूता एव सन्ति । अतोऽत्र द्रव्यवाचकशुक्लादिपदस्य गुणवाचकशुक्लादिपदस्य च ग्रहणम् । शुक्लः शुक्ल इति बहुव्रीहित्वाद्विभक्तेर्लुक् । शुक्लशुक्लः पटः । गुणोपसर्जनद्रव्यवाचिन उदाहरणम् । शुक्लं शुक्लमिति समासवत्त्वाद्विभक्तेर्लुक् । शुक्लशुक्लं रूपम् । केवलगुणवाचि न उदाहरणम् ॥ ७ ॥

(त०) पटुपट्वी ॥ इति ॥ बहुव्रीहिवद्भावात्पूर्वभागे सिलोप पुंवद्भावौ । 'नवं नवं प्रीतिरहो करोति' इत्यत्र वीप्सायां द्वित्वम् । अनेन द्वित्वे सिलुक् स्यात् । कथं 'भीतभीत इव शीतमयूखः' इति भारविः ॥ इवशब्देन सादृश्यस्योक्ततया सादृश्ये द्वित्वायोगात् । सत्यम् । भीतेभ्यो भीत इति व्याख्येयम् । तेनातिभीत इति फलितम् । "खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपभुज्य" इति मेघदूते एकस्यापि खेदस्यावस्थासु भेदं प्रकल्प्य वीप्सा बोध्या ॥ 'मन्दं मन्दं नुदति' इत्यत्र तु मन्दं स्वतो मन्दगामिनं मन्दं नुदतीत्यन्वयो बोध्यः ॥ ७ ॥

(अनुक्रमे द्योत्ये द्वे) मूले मूले स्थूलो वृक्षः(क) ॥ ८ ॥

(क) मूले मूले इति । पूर्वपूर्वो मूलभागः उत्तरोत्तरमूलभागापेक्षया स्थूल इति यावत्।

(सु०) अनुक्रमे द्योत्ये द्वे ॥ अनुक्रमद्योतकं पदं द्विः स्यात् ॥ वीप्सा भावाद्यमारम्भः । एकस्य वृक्षादेरेकमेव मुख्यं मूलमग्रं च भवति । इतरेषां भागानामापेक्षिकोऽग्रमूलव्यपदेशः स्थौल्यसौक्ष्म्ये अपि नैकरूपे । यथा मूलं स्थूलं यथाऽग्रं सूक्ष्मं तथा नेतरे भागा इति वीप्साया असम्भवः । मूले मूले स्थूलस्तथाऽग्रेऽग्रे सूक्ष्मः ॥ ८ ॥

(सम्भ्रमेण प्रवृत्तावनेकधा प्रयोगः) सर्पः सर्पः सर्पः बुध्यस्व बुध्यस्व बुध्यस्व (क) ॥ ९ ॥

(सु०) संभ्रमेण प्रवृत्तावनेकधा प्रयोगः ॥ सम्बोध्यो हि यावद्भिः शब्दैः प्रयोजनमेति तावन्तः प्रयोगा वाच्या इत्यर्थः ॥ ९ ॥

(क्रियासमभिहारे द्वे) लुनीहि लुनीहि इत्येवायं लुनाति(ख) ॥१०॥

(सु०) क्रियासमभिहारे द्वे ॥ पौनः पुन्यं भृशार्थश्च क्रियासमभिहारस्तत्र पदं द्विः स्यात् ॥ पौनःपुन्यम् । आख्यातकृदन्तयोरेव यथा । पचति पचति । भुक्त्वा भुक्त्वा ॥ भृशाऽर्थे यथा लुनीहि लुनीहीति ॥ १० ॥

(त०) क्रियासमभिहारे इति ॥ पौनःपुन्ये भृशार्थे चेत्यर्थः ॥ १० ॥

(कर्मव्यतिहारे सर्वादेर्द्वित्वं समासवच्च बहुलम्) बहुलग्रहणादन्यपरयोर्न समासवत् । इतरशब्दस्य नित्यं समासवत्(ग) ॥११॥

(सु०) कर्मव्यतिहारे सर्वादेर्द्वित्वं समासवच्च बहुलम् ॥ क्रियाविनिमयेऽर्थे सर्वादिगणस्य द्वित्वं स्यात् । नित्यमेवेदं द्वित्वम् । बाहुलकं तु समासवद्भावस्यैव । तेनान्यपरशब्दयोः समासवद्भावो न । इतरशब्दस्य च नित्यमेव समासवद्भावो भवतीत्यर्थः ॥

(त०) कर्मव्यतिहारे इति ॥ क्रियाविनिमये इत्यर्थः ॥ ११ ॥

(असमासवद्भावे पूर्वपदस्थाया विभक्तेः सिरादेशो वाच्यः) अन्योऽन्यौ । अन्योऽन्यान् । अन्योऽन्येन कृतम् । अन्योऽन्यस्मै दत्तमित्यादि । 'अन्योऽन्येषां पुष्करैरामृशन्तः' इति माघः । एवं परस्परम् । वाचस्पत्यादित्वात्सः ॥ इतरेतरम् । इतरेतरेणेत्यादि ॥ १२ ॥

(सु०) असमासवद्भावे पूर्वपदस्थाया विभक्तेः सिरादेशो वाच्यः ॥ पूर्वपदस्य प्रथमादिविभक्तीनां स्थाने सिरेव भवत्यसमासवद्भावे ॥ अन्यः अन्य इति अन्योऽन्यः । अन्यौ अन्याविति अन्योऽन्यौ । अन्ये अन्ये इति अन्योऽन्ये । अन्यमन्यमिति अन्योऽन्यमित्यादिषु सर्वत्र पूर्वपदस्थविभक्तेः सौ कृते ततो विसर्गः । अतोऽत्युरित्युत्वे 'उ ओ' इत्योत्वे एदोतोऽत इत्यलोपे च रूपसिद्धिः । एवं परः पर इति परस्परः । परौ पराविति परस्परौ । परे परे इति परस्परे । परं परमिति परस्परमित्यादि । इतरशब्दस्य तु समासवद्भावात् समासप्रत्यययोरिति विभक्तेर्लुक् । इतर इतर इति इतरेतरः । इतरौ

(क) सम्भ्रमेणेति । सम्भ्रमो भयादिकृता त्वरा । तेन प्रवृत्तौ गम्यमानायां यथेष्टमिच्छानुसारेण अनेकधा शब्दः प्रयोक्तव्यः । इति वक्तव्यमित्यर्थः ।

(ख) पौनः पुन्यं भृशार्थं च क्रियासमभिहारः । लुनीहि । अतिशयितलवनमिति फलितोऽर्थः ।

(ग) कर्मव्यतिहारः क्रियाविनिमय इत्यर्थः । तस्मिन् गम्ये सर्वादेर्द्वे स्तः ।

इतराविति इतरेतरौ । इतरे इतरे इति इतरेतरे । इतरमितरमिति इतरेतरमित्यादि॥ १२॥

(स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेराम्भावो वा) अन्योऽन्याम् अन्योऽन्यम् परस्पराम् परस्परम् इतरेतरामितरेतरं वा इमे ब्राह्मण्यौ कुले वा भोजयतः ।

"दलद्वयेऽप्याबभावः क्लीबे ह्रस्वविरहः स्यमोः ।
समासे सेरलुक् चेति सिद्धं बाहुलकाश्रयम् ॥"

समासे सेरलुक् चेत्यस्योदाहरणं तु अन्योऽन्याश्रयः परस्पराक्षिसादृश्यमित्यादिकं बोध्यम्(क) ॥ १३ ॥

(सु०) स्त्रीनपुंसकयोरुत्तरपदस्थायां विभक्तेराम्भावो वा ॥ स्त्रियां क्लीबे चोत्तरपदस्थविभक्तीनामामादेशो वा भवति ॥ स्त्रियां यथा । अन्या अन्येति पूर्वपदस्थविभक्तेः सिः परपदस्थविभक्तेश्चाम् । अन्योऽन्याम् । आमभावपक्षे अन्योऽन्यम् । बहुलग्रहणात् स्त्रियामित्याप्प्रत्ययाभावो दलद्वये । अन्ये अन्ये इति अन्योन्याम् अन्योन्यौ । अन्या अन्या इति अन्योन्याम् अन्योन्याः । अन्यामन्यामिति अन्योन्याम् अन्योन्यमित्यादि ॥ एवं परस्परां परस्परः । परस्परां परस्परौ । परस्परां परस्परे । परस्परां परस्परमित्यादि ॥ एवमितरेतराम् इतरेतरः । इतरेतराम् इतरेतरौ । इतरेतराम् इतरेतरे । इतरेतराम् इतरेतरमित्यादि । क्लीबे तु अन्यत् अन्यदिति अन्योन्याम् । अन्योन्यम् । स्यमोः प्रत्ययोः स्थाने ह्रस्वन्यादेरिति ह्रस्वादेशाभावो बाहुलकादेव । इमे कन्यौ इमे कर्तृणी वा अन्यामन्यामन्यदन्यद्वा भोजनं कारयतः ॥ ननु अन्योन्यं परस्परमित्यादौ केवलपूर्वपदविभक्तीनां स्यादेशविधानस्य चरितार्थत्वमस्ति । 'अन्योऽन्यसंसक्तमहस्त्रियामम्' इति । अन्योन्याश्रय इति । परस्पराक्षिसादृश्यमिति । अदृष्टपरस्परैरित्यादौ समासप्रत्ययोरित्यनेन पूर्वपदविभक्तीनां स्यादेशस्य कथं लुग् न स्यादिति चेदत्राहुः । बाहुलकात्समासविषये पूर्वपदविभक्तीनां स्यादेशस्य लुग् न भवतीत्यर्थः ॥ १३ ॥

(त०) दलद्वये इत्यादि ॥ दलद्वये आबभावः आपः अभावः अन्योऽन्यं परस्परमित्यत्र दलद्वयेऽपि आप् प्राप्तः स नेत्यर्थः । अन्योऽन्यमित्यत्र ह्रस्वन्यादेरिति ह्रः प्राप्तः स नेत्यर्थः । अन्योन्याश्रय इत्यत्र समासे सेर्लुक् नेत्यर्थः ॥ १३ ॥

(अकृच्छ्रे प्रियसुखयोर्वा द्वित्वम्) प्रियप्रियेण ददाति प्रियेण वा । सुखसुखेन ददाति सुखेन वा । अतिप्रियमपि वस्त्वनायासेन ददातीत्यर्थः(ख) १४

(सु०) अकृच्छ्रे प्रियसुखयोर्वा द्वित्वम् ॥ अनयोर्द्वित्वं समासवच्च वा स्यात् ॥ द्विवचने समासवद्भावात् स्यादिलुकि कृते पुनः कृत्तद्धितसमासाश्चेत्यनेन स्यादिः ॥१४॥

(क) दलद्वय इत्यादि । दलद्वये आबभावः । आपः अभावः । अन्योऽन्यं परस्परमित्यत्र दलद्वयेऽपि आप् प्राप्तः स नेत्यर्थः । अन्योन्यमित्यत्र ह्रस्वन्यादेरिति ह्रः प्राप्तः स नेत्यर्थः । अन्योन्याश्रय इत्यत्र समासे सेर्लुक् नेत्यर्थः ।

(ख) अकृच्छ्रे इति । कृच्छ्रं कष्टम् । अकृच्छ्रमनायासः । तस्मिन् वर्तमानयोः प्रियसुख इत्यनयोर्द्वे वा स्तः ।

(यथास्वे यथायथम्) यथाशब्दस्य द्वित्वं क्लीबत्वं च भवति ॥ यथास्वमिति वीप्सायामव्ययीभावः । यो य आत्मा यच्चात्मीयं तद्यथास्वम् । यथायथं ज्ञाता । यथास्वभावमित्यर्थः । यथात्मीयमिति वा(क) ॥ १५ ॥

(सु०) **यथास्वे यथायथम्** ॥ यथास्वे इति स्वं स्वमिति यथास्वम् । वीप्सार्थेऽव्ययीभावः । यो य आत्मेत्यादि । "स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने" इत्युक्तत्वादात्मीययोरपि स्वशब्दवाच्यत्वमस्ति । आत्मात्मीययोरर्थयोर्विवक्षायामस्य यथाशब्दस्य द्वित्वं नपुंसकत्वं च भवति । नपुंसकत्वान्नपुंसकस्येति ह्रस्वः । यथायथं ज्ञातेत्यत्र कर्तृकार्ययोरक्तादाविस्यनेन कर्मणि षष्ठी न । तृन्प्रत्ययस्य क्तादिषु गणनात् । "आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च" इत्यमरोक्तत्वात् यथायथम् यथास्वभावमर्थः ॥ १५ ॥

(द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु) एष्वर्थेषु द्विशब्दस्य द्विर्वचनं पूर्वपदस्याम्भावोऽत्वं चोत्तरपदस्य नपुंसकत्वं च निपात्यते(ख) ॥ तत्र रहस्यं द्वन्द्वशब्दस्य वाच्यम् । इतरे तु विषयभूताः ॥ द्वन्द्वं मन्त्रयते रहस्यमित्यर्थः ॥ मर्यादा स्थित्यनतिक्रमः । आचतुरं हीमे पशवो द्वन्द्वं मिथुनायन्ते । माता पुत्रेण मिथुनं गच्छति । पौत्रेण प्रपौत्रेणापीति मर्यादार्थः ॥ व्युत्क्रमणं पृथगवस्थानम् ॥ द्वन्द्वं व्युत्क्रान्तः । द्विवर्गसम्बन्धेन पृथगवस्थितः ॥ द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति ॥ द्वन्द्वं संकर्षणवासुदेवौ ॥ अभिव्यक्तौ साहचर्येणेत्यर्थः ॥ चार्थे द्वन्द्व इति निपातनात्पुंस्त्वमपि ॥ १६ ॥

(सु०) **द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु** ॥ एष्वर्थेषु द्विशब्दस्य द्वित्वं समासत्वमेकवद्भावश्च भवति ॥ तथाहि । द्वि औ द्वि औ इति स्थिते समासवद्भावात् विभक्तिलुकि कृते पूर्वपदावयवेकारस्याम्भावः उत्तरपदावयवेकारस्यात्वं क्लीबत्वैकवद्भावौ च निपातनात् । एकवद्भावादतोऽमित्यमादेशे द्वन्द्वमिति ॥ रहसि निर्वृत्तमिति रहस्यम् । द्वन्द्वं मन्त्रयते । द्वौ द्वौ भूत्वा मन्त्रयते इत्यर्थः ॥ एतदेव द्विरहस्यम् ॥ मार्यादायां यथा । चतुरो मर्यादीकृत्येति आचतुरम् । अव्ययीभावे टप्रत्ययः । चतुर्शब्दोऽत्र चतुर्णां पूरणेऽस्ति । आचतुर्थादित्यर्थः । 'स्त्रीपुंसौ मिथुनं द्वन्द्वं युग्मं तु युगलं युगम्' इत्यमरः ॥ मिथुनमिवाचरन्तीति मिथुनायन्ते ॥ यज्ञपात्रप्रयोगे यथा । पात्राणि द्वन्द्वं प्रयुनक्ति । आसादयतीत्यर्थः ॥ 'संकर्षणः सीरपाणिः' इति 'वासुदेवस्त्रिविक्रमः' इति चामरः ॥ अभिव्यक्तौ तु द्विशब्दस्य स्वार्थे द्वित्वमेकवद्भावादिकं तु पूर्ववदेव ॥ १६ ॥

(शेषा निपात्याः कत्यादयः) का संख्या येषां ते कति । दाविकः ।

(क) वीप्सायामिति । कार्त्स्न्येन सम्बन्धो वीप्सा । स्वशब्दार्थगतकार्त्स्न्ये द्योत्ये यथाशब्दस्य स्वशब्देनाव्ययीभाव इत्यर्थः

(ख) अत्वमिति । उत्तरपदस्य अकारोऽन्तादेश इत्यर्थः।

शांशपः । दात्यौहः । दार्घसत्रः । आयसः इति ॥१७॥ द्विरुक्तप्रक्रिया ॥१९॥

इति श्रीरामाश्रमाचार्यविरचितायां सिद्धान्तचन्द्रिकायां पूर्वार्द्धं सम्पूर्णम् ॥

(सु०) शेषा निपात्याः कत्यादयः ॥ कत्यादयः शब्दा निपात्यन्ते संख्याप्रमाणे कर्तव्ये ॥ यः प्रश्नस्तत्र वर्तमानात् किम्शब्दाद्वा डतिप्रत्ययः । पक्षे वतुः । का संख्या येषां ते कतीरति जसो लुक् । कति । कियन्तः ॥ देविका शिंशपादित्यवाड्दीर्घसूत्रश्रेयसां पञ्चानां वृद्धौ प्राप्तायामादेः स्वरस्यात्वं निपात्यते ञिति णिति च ॥ देविकायां भवो दाविकः । 'देविकायां सरय्वां च भवेद् दाविकसारवौ' इत्यमरः ॥ अण् ॥ शिंशपाया विकारः शांशपश्चमसः । अण् ॥ दित्यौहोऽयं दात्यौहः । वाहो वौ इत्यौत्वम् । आत्वं निपातनात् । अण् ॥ दीर्घसत्रे भवः दार्घसत्रः। अण् ॥ श्रेयसि भवः आयसः अण् ॥१७॥

इति द्विरुक्तप्रक्रिया ॥ १९ ॥

श्रीमत्पावकवर्यभक्तिविनया विख्यातकीर्तिप्रभा
राजेन्द्रैः परिपूजिताः सुकृतिनः पुंभाववाग्देवताः ।
मन्तारो जगतां पति गुणगणैर्विभ्राजमानाः सनत्
संवेगादियुजो जयन्तु सततं षट्शास्त्रविद्याविदः ॥ १ ॥
तेषां शिष्यः सदानन्दस्तदनुग्रहभूषितः ।
सिद्धान्तचन्द्रिकावृत्तिं पूर्वार्द्धेऽवकरोदिमाम् ॥ २ ॥

इति श्रीसिद्धान्तचन्द्रिकाव्याख्यायां सदानन्दकृतौ पूर्वार्द्धं समाप्तिमगात् ॥

(त०) तद्धितप्रत्ययानामनन्तत्वात्कात्स्न्येनाभिधातुमशक्यत्वादनुक्तसिद्ध्यर्थमाह-शेषा इति ॥ उक्तेभ्योऽन्ये शेषाः । निपातनात्साधवो निपात्याः ॥ किमः संख्यापरिप्रश्ने डतिः ॥ दाविक इति ॥ देविकायां भव इति विग्रहः । कारकादित्यण् । एकारस्यात्वं निपात्यते ॥ शांशप इति ॥ शिंशपाया विकारः । अत्राप्यादेः स्वरस्यात्वं निपात्यते ॥ दात्यौह इति ॥ दित्यौहोऽयमिति विग्रहः । इदमर्थेऽण् । अत्राप्यादेरात्वं निपात्यते । प्रकृतिस्तु दित्यवाह इति । तत्र वाहो वौ इति वा इत्यस्यौत्वम् ॥ दीर्घसत्रे भवः दीर्घसत्रः । अत्रापि कारकादित्यण् । आदिस्वरस्यात्वं निपात्यते ॥ आयस इति॥ श्रेयसि भव इति विग्रहः । अत्राप्यादिस्वरस्यात्वं निपात्यते ॥ १७ ॥

श्रीनायकरपौत्रेण लोकेशकरशर्मणा । कृतायामिह टीकायां द्विरुक्तव्याकृतिर्गता ॥ १ ॥
सिद्धान्तचन्द्रिकाव्याख्या या त्वियं तत्त्वदीपिका । तत्पूर्वार्धमभूत्पूर्णं तेन तुष्यतु पार्वती ।२।

इति श्रीलोकेशकरविरचितायां तत्त्वदीपिकायां सिद्धान्तचन्द्रिकाव्याख्यायां पूर्वार्धं समाप्तम् ॥

इति सिद्धान्तचन्द्रिकायाः पूर्वार्धं समाप्तम् ॥

नाना टीकां समालोच्य गुरूणां विमलां गिरम् ।
स्मृत्वा चक्रधरां नाम्ना विदधौ टिप्पणीमिमाम् ।

इति श्रीकवितार्किकवैयाकरण-श्रीनवकिशोरकरकृतौ चक्रधराख्यटिप्पण्यां तद्धितप्रकरणं समाप्तम्

श्रीगणेशाय नमः ।

अव्ययं चिद्घनं ध्यात्वा व्ययं नानाविभूतिभिः ।
ग्रथ्यतेऽव्ययमालेयं सुखार्थज्ञानदायिका ॥ १ ॥

अव्ययानि, अर्थाः

अ—अभावभेदाप्रधान्येषत्साहश्यविरोधेषु ।

अकस्मात्—अकारणं, हठात् ।

अग्रतस्—प्रथमे, सम्मुखे ।

अघोस्—भोः, सम्बोधने ।

अङ्ग—भोः, सम्बोधने पुनरर्थे च ।

अचिरात्—शीघ्रम् ।

अञ्जसा—शीघ्रम्, तत्त्वं च ।

अट्टट्ट— उच्चशब्दे ।

अतस्—अतएव ।

अतीव—अतिशयः, अधिकम् ।

अत्र—अस्मिन् ।

अथ—मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येषु ।

अथकिम्—स्वीकारे ।

अथो—मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येषु अधिकारप्रतिज्ञासमुच्चयेषु च ।

अद्धा—सत्यं, यथार्थम् ।

अद्य—अस्मिन् दिने, इदानीम् ।

अधरात्—नीचार्थे ।

अधरेण—नीचार्थे ।

अधस्—नीचार्थे, निम्नार्थे च ।

अधस्तात्—„ „

अधुना—इदानीम् ।

अनुपदम्—तदनन्तरम् ।

अन्ततस्—शेषार्थे, न्यूनकल्पे च ।

अन्तर्—मध्ये शेषे, अन्तःकरणे च ।

अन्तरा—व्यतिरेकेण, मध्ये ।

अन्तरेण—विना ।

अन्यत्—अन्यप्रकारम् ।

अन्यतरेद्युस्—द्वयोर्म , एकदिने ।

अन्यतस्—अन्यत्र, अन्यप्रकारेण

अन्यत्र—अन्यस्थाने, अन्यविषये ।

अन्यथा—अन्येन प्रकारेण ।

अन्यदा—अन्यस्मिन् समये ।

अन्येद्युस्— अस्मिन्दिवसे ।

अपरेद्युस्—अपरदिने ।

अभितस्—सर्वस्यां दिशि समीपे ।

अव्ययानि, अर्थाः ।

अमा—सहार्थे चन्द्रकलायाञ्च ।

अमुत्र—परलोके ।

अयि—कोमलसम्बोधने प्रश्ने च ।

अये—सम्बोधने स्मरणे च ।

अरे—नीचसम्बोधने ।

अरे रे—„ „

अर्वाक्—पूर्वे, पश्चात्, वक्रार्थे च ।

अलम्—व्यर्थसमर्थयोः, भूषणे च ।

अवश्यम्—निश्चये ।

असि—त्वमर्थे ।

अस्तम्—अदर्शने, नाशे ।

आस्त—भवत्यर्थे, तिष्ठत्यर्थे च ।

अस्तु—भवतु ।

अस्मि—अहमर्थे ।

अहह—खेदे, आश्चर्ये च ।

अहहा—„ „

अहो—आश्चर्य ।

अहोवत—कारुण्ये ।

अह्नाय—शीघ्रम्, तत्क्षणात् ।

अति—निर्भरं पूजने च ।

अद्यत्वे—इदानीमित्यर्थे ।

अनुकम्—वितर्के ।

अधरेद्युः—अधरस्मिन् अहनि ।

अन्यतरेद्युः—अन्यतरस्मिन्नहनि ।

अन्यत्—अन्यार्थे ।

अन्ततः—शेषतः ।

अनेहा—विस्मयविषादशोकजुगुप्सार्तिषु ।

अवदत्तम्—उपसर्गप्रतिरूपकोऽयम् ।

अवस—बाह्ये ।

अभीक्ष्णम्—पौनः पुन्ये ।

अहम्—सुबन्तप्रतिरूपकमव्ययमहंकारे ।

अम्—शीघ्रेऽल्पे च ।

अह—पूजायाम् ।

अहम्—अस्मदर्थे ।

आ—स्मरणे, पर्यन्तार्थे च ।

आम्—स्मरणे, स्वीकारे च ।

अव्ययानि, अर्थाः ।
आः—विरक्तौ पीडायां च ।
आरात्—दूरे समीपे च ।
आविस्-प्रकाशे ।
आहो—सन्देहे, प्रश्ने च ।
आहोस्वित्-प्रश्ने, सन्देहे च
आकिम्—
आत—शंकायाम ।
आतः—इतोऽपीत्यर्थे ।
आदह—उपक्रमहिंसाकुत्सनेषु ।
आय—प्रतिबन्धे ।
आशु—शीघ्रे ।
आंसि—वाक्यालंकारयोः ।
आस—बभूवेत्यर्थे ।
आह—उवाचेत्यर्थे ।
इ—खेदेकोपे च ।
इतरेद्युस्—अन्यदिने ।
इति—इदमर्थे, शेषे अतएव अतःकारणात् ।
इतिह—परम्परायाम् ।
इत्थम् —अनेनप्रकारेण ।
इदानीं—अधुना ।
इव-सदृशार्थे, वाक्यालंकारे च ।
इस्—खेदे, विस्मये च ।
इतः—अस्मादिति ।
इद्धा—प्राकाश्ये ।
ई—भर्त्सने ।
ईषत्—स्वल्पे ।
उ—वितर्के, पादपूरणे च ।
उच्चकैस् उच्चे, अधिके च ।
उच्चैस्— „ „
उतरे-संशये, समुच्चये च ।
उताहो—प्रश्ने, विकल्पे च ।
उताहोस्वित्—„ „
उत्तरतस्—उत्तरे ।
उत्तरात्—„
उत्तरेण —„
उत्तरेद्युस्—परदिने ।
उदक्—उत्तरस्यांदिशि ।
उपजोषम्— } आनन्दे सन्तोषे च ।
उपयोषम्— }
उपांशु - निर्जने ।
उभयतस्-उभयतः, उभयेन प्रकारेण ।

अव्ययानि, अर्थाः
उभयेद्युस्-उदयदिने ।
उम्—क्रोधे, प्रतिज्ञायाम् ।
उररी-स्वीकारे ।
उरी-„
उहरी-„
उ-कोपनोक्तौ ।
उम् संतर्कसम्बोधनपूरणेषु ।
उत्तराहि-उत्तरस्यां दिशि दूरे ।
उत्तरा-उत्तरस्यां दिशे । दूरे
उध्वांत्-ऊर्ध्वमुर्ध्वो वा ।
उपधा-भेदे ।
उपांशु-अप्रकाशोच्चारणरहस्ययोः ।
उपरिष्टात्— } ऊर्ध्वमिति ।
उपरि— }
उभयेद्युः-उभयस्मिन्नहनि ।
उषा-रात्रेरवसाने ।
उषा-रात्रौ ।
ऊ-दुःखे प्रश्ने च ।
ऊम्-गर्वे, क्रोधे च ।
ऊररी-स्वीकारे ।
ऊररी—„
ऊरी—„
ऊर्ध्वम् । उपरि ।
ऋते-विना ।
ॠ-गानसमूहे ।
ऋ-गानसमूहे ।
ऋधक्-सत्ये ।
ऌ-गानसमूहे ।
ॡ-गानसमूहे ।
ए-स्मरणे, सम्बोधने च ।
एकदा-एकस्मिन् समये ।
एतर्हि-इदानीं । अतःकारणात् ।
एव-अवधारणे ।
एवम्-अनेनप्रकारेण, सम्मता च ।
एकपदे-अकस्मादित्यर्थे ।
एततः-एतस्मादिति ।
ऐषम-वर्त्तमानेऽब्दे ।
ऐ-स्मरणे, सम्बोधने च ।
ओ-स्मरणे, सम्बोने च ।
ओम्—प्रणवे, स्वीकारे च ।
औ—सम्बोधने ।
कच्चित्-प्रश्ने, इच्छाप्रकाशे च ।

अव्ययानि अर्थाः

कति-कियति ।

कथम्-केनप्रकारेण ।

कदा-कस्मिन् समये ।

कदाचन-कस्मिंश्चित् समये ।

कदाचित्- ,,

कम्—वारिमूर्द्धनिन्दासुखेषु ।

किमु- वितर्के ।

कर्हि कदाचित् ।

कर्हिचित्-कस्मिंश्चित्समये ।

कामम्-यथेष्टं पर्याप्तम् ।

किञ्च-अपि च ।

किञ्चन-किञ्चित्, स्वल्पे, कियदंशे च ।

किञ्चित्-स्वल्पे ।

किन्तु-परन्तु ।

किन्नु-संशये ।

किम्-कुत्सितार्थे प्रश्ने, वितर्के च ।

किम्-सम्भावनायां वितर्के च ।

किमुत- ,, ,,

किस्वित्- ,, ,,

किम्वा-अथवा ।

किल-निश्चितार्थे, अलीके सम्भावनायां वार्त्तायां च ।

कु-कुत्सिते, पापे, मन्दे, अमङ्गले च ।

कुतस्-कस्मात्स्थानात् किंनिमित्तम् ।

कुत्र-कस्मिन्स्थाने, कस्मिन्विषये

कुत्रचित्-कस्मिंश्चित्स्थाने ।

कुवित्—भूर्यर्थे प्रशंसायां च ।

कुह—कस्मिंश्चित्यर्थे ।

कूपत्—प्रश्न प्रशंसायां च ।

क्षमा—क्षान्तौ

केशाकेशि-केशेषुकेशेषु गृहीत्वायद्युद्धम् ।

क्व-कुत्र ।

क्वचन-कुत्र, कस्मिंश्चित्समये ।

खलु—निषेधवाक्यालङ्कारेषु निश्चये च ।

च-समुच्चयान्वाचयेतरेतरयोगसमाहारेषु ।

चटु-प्रियवाक्ये ।

चन-साकल्ये ।

चाटु-प्रियवाक्ये ।

चतुर्धा-चतुः प्रकारेण ।

चिरम्—
चिरेण—
चिराय—
चिररात्राय } चिरकाले, बहुकालेऽर्थे च ।
चिरात्—
चिरस्य—
चिरे—

अव्ययानि, अर्थाः ।

चेत्—यदि

चण्-यद्यर्थे ।

चित्-साकल्ये ।

ज्योक्-कालभूयस्त्वे प्रश्ने शीघ्रार्थे संप्रत्यर्थे च ।

जातु—कदाचित् ।

जोषम्—तुष्णीम्, सुखे च ।

झटिति—शीघ्रम्-

तत्—तस्मात्, तन्निमित्तम् ।

ततस्—तस्माद्धेतोः, तदनन्तरम् ।

तत्र—तस्मिन् स्थाने ।

तथा—तेन प्रकारेण ।

तदा—तस्मिन् समये ।

तदानीम्— ,,

तावत्—साकल्ये, वाक्यालंकारे तत्परिमिते च-

तिरस—अप्रकाशार्थे, वक्रार्थे च ।

तिर्यक्—वा—वक्रार्थे, पार्श्वे च

तु—किन्तु, पुनः ।

तुष्णीम्—मौनिनि, स्थिरे च ।

त्रेधा—
त्रैधम्— } त्रिप्रकारम् ।

तर्हि-तस्मिन् काले ।

तत्र भवान्-
ततो भवान्- } पूजार्थे ।

तथाहि निदर्शने ।

तुम-तुंकारे ।

तूर्णम-शीघ्रगे ।

तूष्णीकम्-मौने ।

त्वै-विशेषवितर्कयोः ।

दक्षिणतस्—
दक्षिणात्— } दक्षिणस्यां दिशि ।
दक्षिणेन—

दण्डादण्डि—दण्डेन दण्डेन आक्रम्य यद् युद्धम् ।

दिवा—दिने ।

दिष्ट्या—भाग्येन ।

द्राक्-शीघ्रम् ।

द्विधा—
द्वेधा— } द्विवारं, द्विप्रकारम् ।

अव्ययानि, अर्थाः

दक्षिणाहि— } दक्षिणस्यां दिशि दूरे ।
दक्षिणा— }
दिष्टया—आनन्दे ।
दुःषमम्-निगर्ह्ये
दुष्टु-निन्दायाम् ।
दोषा-रात्रौ
द्वै-वितर्के ।
धिक्—निन्दायाम् ।
न— } निषेधे ।
नञ्— }
नक्तम्—रात्रौ ।
नमस्—नमस्कारे, प्रमाणे च ।
नवशिवस्—नवशिवारम् ।
नहि— } निषेधे ।
ना— }
नाना—बहुविधेषु ।
नाम—आख्यायां, सम्भावनायां, प्रकाशे ।
नास्ति—न भवतीत्यर्थे ।
निकषा—निकटे ।
नितराम्—अवश्यम् अत्यन्तम् ।
नित्यदा—सर्वदा ।
निचकैस्— } क्षुद्रे, स्वल्पे, निम्ने च ।
निचैस्— }
नूनम्—निश्चये वितर्के च ।
नो—निषेधे ।
न्यक्—नीचे घृण्ये च ।
नकिः-वर्जने ।
ननु-विरोधोक्तौ प्रश्ने च ।
निःषमम्-गर्ह्ये ।
नह-प्रत्यारम्भे ।
नेत्-शङ्कायां प्रतिषेधविचारसमुच्चयेषु च ।
न्वौ—विशेषवितर्कयोः ।
पञ्चधा—पञ्चभिः प्रकारैः ।
परम्—केवलम्, अनन्तरम् ।
परश्वस्- } आगामिनि दिने ।
परःश्वस्- }
पराक्—वक्रे कुटिले च ।
परितस् । चतुर्दिशि ।
परत्-
परेद्यवि- } परदिने
परेद्युस्- }

व्ययानि, अर्थाः

पश्चात्-परे, पश्चिमे च ।
पुनःपुनर्-वारंवारम् ।
पुनर्-अप्रथमे ।
पुरतस्-सम्मुखे ।
पुरस्— } पूर्वस्यां दिशि, प्रथमे, स-
पुरस्तात्— } म्मुखे च ।
पुरा-पूर्वास्मिन् । काले, निकटे च ।
पूर्वेण-पूर्वस्यां दिशि, पूर्वकाले च ।
पूर्वेद्युस्-पूर्वदिने ।
पृथक्-भिन्ने ।
पृष्ठतस्-पश्चाद्भागे ।
प्रकामम्-यथेष्टं, यथेच्छम् ।
प्रगे-प्रत्यूषे ।
प्रत्यक्-पश्चात्, पूर्वे, पश्चिमे च ।
प्रत्यहम्-प्रतिदिनम् ।
प्रत्यूत वैपरीत्ये ।
प्रसह्य—हठात्, बलपूर्वकम् ।
प्राक्—पूर्वम् ।
प्रातर्—प्रभाते ।
प्रादुस्—व्यक्तार्थे ।
प्राध्वम्—आनुकूल्ये ।
प्रायशस्—बाहुल्यरूपेण ।
प्रायस्—बाहुल्येन ।
प्राह्णे—प्रभाते ।
प्रेत्य—परलोके, परकाले च ।
परमम्—मते ।
परारि—पूर्वतरे वर्षे (गतवर्षात्पूर्ववर्षे)
परुत्—पूर्वाब्दे (गतेवर्षे) ।
पशु—सम्यगर्थे ।
प्रवाहुकम्—समानकाले । ऊर्ध्वार्थे च । प्रवा-
हिकेति पाठान्तरम् ।
प्रताम्—ग्लानौ ।
प्रशान्—समानार्थे ।
प्रतान्—विस्तारे ।
पाट्—सम्बोधने ।
प्याट्—संबोधने ।
फट्—यन्त्रांशविशेषे, अस्त्रमन्त्रे, अनुका-
रशब्दे च ।
बहुधा—बहुरूपेण, बाहुल्यरूपेण ।
ब्रूहि—प्रेषानुज्ञावसरेषु ।
बलवत्—निर्भरे ।
बहुशः—बहोरित्यर्थे ।

अव्ययानि,	अर्थाः ।
भगोस्—सम्बोधने, भगवन् ।	
भूयस्—बाहुल्ये, वारंवारम् ।	
भूरि—बहुशः, बहु ।	
भूरिशस्—बहुवारं, बहुशः ।	
भृशम्—अतिशयः, बहुवारम् ।	
भो— भोस्—	सम्बोधने ।
भुवः—अन्तरिक्षे ।	
भूः—पृथिव्याम् ।	
मङ्क्षु—शीघ्रमतिशयश्च ।	
मत्—मदीयार्थे ।	
मनाक्—ईषत् ।	
मम—ममतायाम् ।	
मा—निषेधे, निन्दायाञ्च ।	
मिथस्—परस्परं, रहसि च ।	
मिथ्या—निष्फले, असत्ये च ।	
मुधा—वृथा, निष्फले ।	
मुहुस्—वारं वारम् ।	
मृषा—मिथ्या ।	
माङ्—निषेधाशङ्कयोः ।	
मध्यतः—मध्ये ।	
माकिः—वर्जने ।	
माकीम्—वर्जने ।	
मास्म—वारणे ।	
मिथु—द्वावित्यर्थे ।	
मिथो—रहस्सहार्थयोः ।	
यत्—यस्माद्धेतोः, यथाविधे च ।	
यतः— „ „	
यत्र—यस्मिन् स्थाने ।	
यथा—येन प्रकारेण ।	
यथातथम्— यथायथम्— यथार्हम्— यथावत्— यथास्वम्—	यथायोग्ये यथार्थे च ।
यदा—यस्मिन् समये ।	
यदि—सम्भावनायां	
यावत्—साकल्ये, परिमाणे, पर्यन्ते च ।	
युगपद्—एककालीनम् ।	
यथाकथा च—अनादरे ।	
यथार्थम्—सत्ये ।	
यर्हि—यस्मिन् काले ।	

अव्ययानि,	अर्थाः
युत्र—कुत्सायाम् ।	
रहस्—निर्जने ।	
रहसि—एकान्ते ।	
रे—नीचामन्त्रणे ।	
रै करोति—ददातीत्यर्थः ।	
रात्रौ—निशि ।	
बत—खेदे, विस्मये, हर्षे च ।	
वरम्—उत्कृष्टे ।	
वषट्— वौषट्—	आहुतिमन्त्रे ।
वहिस्—वहिर्भागे ।	
वा—विकल्पे, वितर्के, उपमायां, वाक्यपूरणे च ।	
विधिवत्—यथाविधि ।	
विना—व्यतिरेकेण ।	
विष्वक— विष्वक—	सर्वत्र, सर्वव्यापिनी ।
व—इवार्थे—पादपूरणे च ।	
वत्—तुल्ये ।	
वदि—कृष्णपक्षे ।	
वरम्—ईषत् ।	
वा—निश्चये ।	
वाम्—युवामित्यर्थे ।	
विहायसा—वियदर्थे ।	
विषु—ननार्थे ।	
वृथा—व्यर्थके ।	
वै—श्लोकचरणपूर्णतायाम् । पादपूरणे, विशेषे निश्चये च ।	
शनैः—क्रमशः ।	
शश्वत्—निरन्तरं, वारंवारम् ।	
शान्तं—निवृत्तं, वारितम् ।	
श्रत्—श्रद्धायाम् ।	
श्वस्—आगामिनि दिने ।	
शम्—सुखे ।	
शंवट्—अन्तःकरणे, आभिमुख्ये च ।	
शीघ्रम्—तूर्णम् ।	
शुकम्—शैघ्र्ये ।	
श्रौषट्—देवहविर्दाने ।	
संवत्—वत्सरे ।	
सकृत्—एकवारम् ।	
सत्रा—सहितम् ।	
सदा—सर्वदा ।	

अव्ययानि, अर्थाः

सद्यस—तत्क्षणे ।
समन्ततस्—सर्वतः ।
समन्तात्—चतुर्द्दिशि, सर्वतः ।
समम्—सह, एकदा ।
समया—समीपे।
समुपयोषम्—हर्षे, भाग्ये च ।
सम्यक्—सत्यम्, सर्वतोभावेन, साकल्येन ।
सर्वतस्—सर्वप्रकारेण, सर्वस्यां दिशि ।
सर्वत्र—सर्वस्थाने ।
सर्वदा—सर्वस्मिन् समये ।
सर्वथा—सर्वप्रकारेण ।
सहसा—हठात्, अतर्कितम् ।
साकम्—सह ।
साक्षात्—प्रत्यक्षम्
साचि—वक्रे, नते च ।
सामि—क्रियदंशे ।
साम्प्रतम्—उचितं, सम्प्रति ।
सायं—सन्ध्याकाले ।
सार्द्धम्—सह ।
सुचिरं—बहुकालम् ।
सुतराम्—अगत्या, अवश्यम्, अत्यन्तम् ।
स्थाने—उचितम् ।
स्म—अतीते ।
स्वधा—मन्त्रविशेषे ।
स्वयम्—निजे, आत्मावच्छेदे ।
स्वर्—स्वर्गे ।
स्वस्ति—शुभे, मङ्गले ।
स्वाहा—मन्त्रविशेषे ।
स्वित्—प्रश्ने, वितर्के संशये च ।
सम्प्रति—अस्मिन्काले ।
स्म—अतीते पादपूरणे च ।
सह—सहार्थे ।
सना—नित्ये ।
सनत्—नित्ये ।
सत्यम्—प्रश्नप्रतिषेधसत्येषु ।
संप्रति—इदानीमित्यर्थे ।
सपदि—द्रुते । तत्काले
सनुतर्—अन्तर्द्धाने ।

अव्ययानि, अर्थाः ।

सनात्—नित्ये ।
साय—सायें ।
सु—पूजायां भृशार्थानुमतिकृच्छ्रसमृद्धिषु ।
निभरेच ।
सुष्ठु—निर्भरे प्रसंशायां च ।
सुदि—शुक्लपक्षे ।
स्वधा—पितृदाने ।
स्राक्—झटित्यर्थे ।
ह—सम्बोधने, पादपूरणे च प्रसिद्धौ ।
हंहो—सम्बोधने ।
हंजे—नीचां प्रति सम्बोधने ।
हंडे—चेटिं प्रति सम्बोधने ।
हन्त—खेदे, हर्षे च ।
हला—सखिं प्रति सम्बोधने ।
हा—विषादे, शोके, पीडायां च ।
हिरुक—भिन्ने मध्ये च ।
हिहि— }
ही— } हास्ये हास्यशब्दे, आह्लादे च ।
हांहा— }
हुम्— }
हूम्— } स्वीकारे ।
हे— }
हहे— } सम्बोधने ।
हो— }
है—सम्बोधने
ह्यस्—परदिने ।
हिरुक्—सामीप्ये ।
हि—पादपूरणे । यतः यस्मात्कारणादित्यर्थे ।
हांहां—विस्मयहास्ययोः ।
हुंम्—भर्त्सने ।
हो—विचारे ।
हेतौ—निमित्ते ।
हुम्—विचारे ।
हलम्—प्रतिषेधविवादयोः ।
हन्त—हर्षे, विषादे, अनुकम्पायां, वाक्यारम्भे च ।

प्रादय उपसर्गा अव्ययशब्दाः । एतदतिरिक्तान्यप्यव्ययानि सन्ति ।
इहातिप्रसिद्धानि प्रदर्शितानि ।

इति श्रीनवकिशोरकरप्रथिताऽव्ययमाला ।

॥ श्रीः ॥

सिद्धान्तचन्द्रिकापूर्वार्धसूत्रसूची ।

पृष्ठाङ्काः ।	सूत्राणि
९	अ इ उ ऋ ऌ समानाः
३२	अ इ ए
३३६	अइकौ च मत्वर्थे
२८९	अकतद्धिताभ्यां कोप०
३८३	अकृच्छ्रे प्रियसुख०
२६	अक्षादेरूहिन्यादाव०
३१८	अग्नेरिदूवृद्धौ
२७६	अग्न्यादेः सोमादीनां०
३२२	अग्रादिपश्चादन्ताडिमः
२१२	अङ्गगात्रकण्ठपुच्छाच्च
२८४	अचाऽनुशासनार्थ०
१५२	अचेर्दीर्घश्च
१२८	अचाल्स्थनां शसादौ
१९७	अजादेश्च
३३९	अजाविभ्यां थ्यः
३०२	अजिरादेर्न
१९२	अ[illegible]पुंसि पञ्चसुनुम्
३३०	अर्णानयोर्युष्मदस्म०
८१	अतः
३११	अत इञनृषेः
३६४	अतिथेर्ण्यः
९६	अतोऽत्युः
२४०	अभिनिपूर्वस्य विशेः
१२३	अतोऽम्
१६२	अतोऽमनतः
१९९	अत्वसोः सौ
६९	अद्रि
२४०	अधिपूर्वाणां
१३९	अन टौसोः
१३२	अनडुहश्च
२०३	अनन्त्यवयोवाचिनो०
२६०	अनादराधिक्ये०
३००	अनीबन्तस्य स्त्री०
३६१	अनुक्रमे घोत्ये द्वे
३०७	अनो नलोपो द्विगोर्न
१३	अन्त्यस्वरादिष्टिः
१४	अन्त्यात्पूर्व उपधा
२२०	अन्नन्ताद्बहुव्रीहेर्न
३१९	अन्यस्य दक्
१२६	अन्यादेर्लोपो न
२८२	अन्यार्थे
३४२	अन्येभ्योऽपि
२९७	अन्योक्ते प्रथमा
२७३	अन् स्वरे
३१०	अपत्येऽण्
३०६	अपथं तत्पुरुषे क्लीबम्
३१७	अपोनपादपान्नपातो०
१७०	अप्क्ष्योराम्नित्यम्
३९	अप्लुतवदितौ
२४०	अभिनिपूर्वस्य विशेः
२६६	अमदौ तत्पुरुषः
११२	अम्बार्थानां ह्रस्व
६६	अमूक्षसोरस्य
१२	अरेदो नामिनो गुणः
३४२	अर्णसो लोपश्च
३०६	अर्धर्चादयः क्लीब
२०६	अर्यक्षत्रियोपाध्या
१४२	अर्वणस्त्रसावनञः
३३१	अर्हऽपि
३२६	अलाबूतिलोमा
२९८	अलुक् क्वचित्
८८	अल्लोपः स्वरेऽम्ब
८०	अवकुप्वन्तरेऽपि
२६४	अवधारणार्थं यावति
८	अवजो नामिनः
३४	अवर्णादृते परे तृतीया
३३	अवर्णान्तादुपसर्गा
३२७	अवात्कुटारकटा
६१	अविभक्ति नाम
३१९	अवेर्दुग्धे सोढदूसम०
११६	अव्ययाद्विभक्तेर्लुक्
२६१	अव्ययीभावात्
२४३	अशिष्टव्यवहारे दाणः
३०६	अश्ववडवयोर्द्वन्द्वः
२००	अष्टका श्राद्धे
१४७	अष्टनो डौ
३६२	असमासवद्भावे पूर्व
३०१	अस्तोश्च
३३९	अस्त्यर्थं मतुः
३४३	अस्मायामेधास्त्रग्भ्यो
२१०	अस्वाङ्गपूर्वपदाद्वा
५९	अहन्
१६९	अह्नः
३२९	आख्याताव्ययसर्वा
४६	आङ्माङ्भ्यां नित्यम्
२०५	आचार्यादणत्वम्
८९	आतो धातोर्लोपः
५६	आद्वे लोपश्च
१३४	आदिजबानां झभा
३१०	आदिस्वरस्य ञ्णिति
३०३	आदेश्च द्वन्द्वे
१०	आद्यन्ताभ्याम्
२३९	आधार सप्तमी
९७	आगमजमनित्यम्
१११	आपः
११६	आबतः स्त्रियाम्
३०७	आबन्तोत्तरपदात्
११८	आवृधि
२११	आमन्त्रणे च
२४३	आमयस्य दीर्घश्च
१७२	आमौ
११२	आम् केः
११०	आऽम्शसि
१७४	आम्स्मौ
३९१	आयुक्तकुशलाभ्यां योगे
१३	आरै औ वृद्धिः
३४४	आलाटौ कुत्सितभाः
१४४	आ सौ
३६६	इतो आतार्थे
१४३	इतोऽत्पञ्चसु
२१६	इतो मनुष्यजातेरीप्
३९	इतो वा उम्
३०१	इत्येऽभ्यासस्य

३६१ इदम् इश् वतोर्वस्य
१४० इदमेतदोरन्वादेशे
१३८ इदमोऽयम् पुंसि
३२८ इनपिटकाःप्रत्यया
११९ इदुश्याम्
१४९ इनां षौ सौ
२९ इन्द्राक्षयोः परतो
२०४ इन्द्रादेरानीप्
१६३ इयं स्त्रियाम्
२१ इ यं स्वरे
३०० इष्टकेषीकामालानां
३२८ इष्टादिभ्य इनिरनेने·
२७६ ईदग्नेः सोमवरुणयो
१९ ईदूदन्तस्येयुवस्थान·
३३९ ईमसश्च
१२४ ईमौ
३४१ ईयस्विष्ठौ डितौ
३६० ईलोपौ ज्याशब्दादौ
३४४ ईषदसमाप्तौ कल्पदे
३२ उ ओ
२१७ उत ऊः
४९ उदः स्तास्तम्भोस·
१०८ उद्गातॄनप्तॄनेष्टृत्व०
२०१ उपधान्तोविना बहु०
२१३ उपमानात्पक्षपुच्छा०
३६८ उपर्यध्यधसः सामी०
३०२ उपसर्गस्य घञ्यमनु०
१८८ उपसर्गस्वरविभक्ति०
२९८ उपपदविभक्तेः कार०
३०८ उपज्ञोपक्रमान्तस्त०
१२६ उपाधिभ्यामासञ्ञा०
२५० उपान्वध्याङ्पूर्वस्य०
२९४ उभयप्राप्तौ कृति क०
२९६ उभयप्राप्तौ कृत्ये०
८ उभये स्वराः
१३७ ऊ रसे
२४ उ वम्
१६० उशनसाम्
१६० उशनसो धौ नान्त०
९८ उषसो बुधे
३०१ उष्णभद्रयोः करणे
३०८ उपज्ञोपक्रमान्तस्त०
३३९ उषसो नङ्
२०४ ऊधोऽन्तस्य बहुव्री०
२८३ ऊप्रत्ययान्तस्य न
२१० ऊरूत्तरपदादौपम्ये
३४० ऊर्णाहंशुभंभ्यो युः
२७१ ऊर्ध्वाद्वा शुः
४४१ ऊषशुषिमुष्कमधुख०
३२ ऋ अर्
३१२ ऋदुरणि
७ ऋलृवर्णौ च
९९ ऋदृहे
३०३ ऋतां द्वन्द्वे
२४७ ऋते आदियोगे पञ्च०
९१ ऋतो ङ उः
१९३ ऋतो दीर्घो न
३३ ऋदौ नामधातौ वा
३३३ ऋ र इर्मनि
२४ ऋ रम्
३० लृ अल्
३४ लृदादौ नामधातौ
२५ लृ लम्
२४ ए अय्
३३ ए ऐ ऐ
७ ए ऐ ओ औ संध्यक्ष
७० ए ओ जसि
१२६ एकतरस्य चतुर्नं
६६ एकत्वद्वित्वबहुत्वेषु
३३१ एकत्वे तवकममकौ
२७७ एकत्वे द्विगुद्वन्द्वौ
३९६ एकस्य सकृदाशश्चरे
१६३ एकादशादेर्डट्
३०९ एकादाकिन्नसहाये
३९९ एकाद्ध्यमुञ् वा
१७९ ए टाङ्योः
३४२ एतत्किमिदंयत्तद्भ्यः
१८३ एतेऽनन्वादेशे वा
३१ एत्येधत्योर्न
२७ एदोतोऽतः
३० एदोदादौ धातौ
३१ एदोदादौ नामधातौ
१६२ एरो बहुत्वे
३१ एवेऽनवधारणे
७१ एस्मि बहुत्वे
२५ ऐ आय्
२१९ ऐ च सम्बादे
१४ ऐ सख्युः
२४ ओ अव्
३० ओ औ औ
३० ओत्वोष्ठयो समासे
३७ ओदन्तो धौ
३७ ओदन्तो निपातश्च
११० औरो
७२ ओसि
१११ औ
२९ औ आव्
३६ औ निपातः
२४३ औष्ठ्यग्रे दन्तादुरः
१० औ यू
२४२ कंचित्प्रकारं प्राप्तस्य
३४१ कच्छ्वा ह्रस्वत्वं च
२१३ कबरमणिविषशरेभ्यः
२२९ कर्तरि करणे च
२५३ कर्तृकार्ययोरक्तादौ
३२४ कर्मण उकञ्
३२८ कर्मणष्ठो घटत इत्यर्थे
३३० कर्मण्यपि
२९२ कर्मधारयस्तुल्या
२९३ कर्मधारये पूर्वं पुंवत्
३२३ कर्मन्दकृशाश्वादिनिः
३६२ कर्मव्यतिहारे मर्यादे
१५८ कलोपे कुत्वमसिद्धम्
३१४ कल्याण्यादेरिनङ् च
११९ काव्यतः
३२० कारकात् क्रियायुक्ते
३०० कारे सत्यागदस्ये
१० कार्यायेत्
२३९ कालाध्वनोर्व्याप्तौ
३४० कासूगोणीभ्यां ष्टरः
३४३ किमः किर्वतोर्वस्य
३७० किमोऽव्ययाद्वाक्या
२८४ कुक्कुट्यादीनाम
९१ कुकटुवर्जितस्य विभ
१२ कुचुटुतपु वर्गाः
३४९ कुटीशमीशुण्डाभ्यो
३४९ कुत्वा डुपः
३४६ कुत्सायां पाशः
९२ कुप्वोः≍क≍पौ

३३८ कुमुदनडवेतसभ्योड्
२५५ कृत्यानां कर्तरि वा
२१५ कृदिकारादक्त्यर्थात्
३४२ कृष्यादीनां वले दीर्घः
३१४ केनेयेकाः
३४२ केशादिभ्यो वः
२५२ क्तस्येन्नन्तस्यकर्मणि
२११ क्तान्तादल्पत्वे
१९५ क्त्वाद्यन्तं च
२५३ क्यब्लोपे कर्मण्या
२५ क्रयार्थं प्रसारितं
२३२ क्रियया यमाप्नोति
३५५ क्रियाया आवृत्तौ
२३५ क्रियालक्षणं भावस्त
३६२ क्रियासमभिहारे द्वे
२१० क्रीतान्तात्करणादेः
३३१ क्रुञ्चा ह्रस्वत्वं च
३२८ क्रुधद्रुहेर्ष्यासूयार्थानाम्
३४६ क्लिन्नस्य चिल्पिल्०
२७० क्वचित्षष्ठी न समस्य
२५ क्वचित्स्वरवद्यकारः ते
२६४ क्वचिदनव्ययपूर्वपदोऽ
२७० क्वचिद्समाद्यन्तस्य पर
३१७ क्वचिद्वृद्धयोः
३२५ क्वचिद्यलोपः
२०० क्वचिद्वा
२१६ क्वचिद्वा
२६५ क्वचिद्वा
२७१ क्वचिद्वा
२८१ क्वचिद्वा
२०८ क्वचिन्न
२७६ क्वचिन्न
२७९ क्वचिन्न
२८१ क्वचिन्न
७३ क्विलात्षः स कृतस्य
२५ क्षय्यं जय्यं शक्यार्थे
१९९ क्षिकादीनां न
५३ खपरे शसे विसर्गस्य
२१५ खसंयोगोपधान्न
३३४ खलगोरथेभ्य इनित्र
४७ खसे चपा झसानाम्
१०५ खीतीभ्यां कृतयादेश
४८ ख्याधातौ वा
२७८ गवयहयमुकयमनुष्य·
३०१ गिलगिले च
३०१ गिलेऽगिलस्य
२५४ गुणकर्मणि वा
३९ गुरोरनृतोऽनन्त्यस्या
३४९ गुर्वादेरिष्ठेमेयःसु
२८६ गोः
३६५ गोः पुरीषे
३१५ गोध्यादेरारणेरणौ
२४ गोरवा पदान्ते स्वरे
१८ गोर्वा
३२६ गोष्ठादयः स्थानादिषु
१४६ घसंयोगे णत्वं न
१६६ ङसिभ्यसोः स्तुः
७१ ङसिरत्
९२ ङस्य
७२ ङस् स्य
११२ ङितां यट्
१०१ ङितामट्
९२ ङिति
८१ ङि स्मिन्
७० ङे अक्
९२ ङेरौ ङित्
१०७ ङौ
४६ ङ्णनो ह्रस्वाद्वृद्धिः
३२६ चञ्चुचणौ वित्तेः
३१७ चटकादेरैरण्
१२७ चतुराम् शौ च
३७२ चतुरो येयौ चस्य च
४० चपा अबे जबाः
४१ चपाच्छः शः
१८४ चादिभिश्च
१८७ चादिनिपाताः
२७४ चार्थे द्वन्द्वः
२२२ चिरपरुत्परारिभ्य
१४९ चोः कुः
४७ छः
३२३ छगलिनो णेयिनः
११४ छशषराजादेः षः
३०८ छायान्ता पूर्वपदा
१४१ जम्बोर्ङ्शः
२४८ जनिकर्तुः प्रकृतिः
८६ जरायाःस्वरादौ जरस्
२६६ जराया जरस्
१२४ जश्शसोः शिः
१४६ जश्शसोर्लुक्
७८ जसी
२१० जातान्नाश्च
२८६ जातिवाचिनः स्त्रीप्र
२०७ जातेरयोपधात्
२०९ जानपदादिभ्योऽर्थे
३४० ज्योत्स्नादिभ्योऽण्
२२ झबे जबाः
३८ झपादुङो वो वा स्वरे
२३ झपाद्यवला द्विर्वाच्याः
४१ झम झमा वा
६१ टनात्सस्य वा धुट
२६६ टाडकाः
१२९ टादावुक्तपुंस्कं पुंवद्वा
१०८ टादौ स्वरे क्रोष्टुश·
९० टा नाऽस्त्रियाम्
६९ टेन
४४ टोरन्त्यात्
१११ टौसोरेः
९८ डतेः
२०२ डाब् वा
९३ डिति टेः
१५६ ड्णः
३१८ णितो वा
३१३ ण्यायनणेयण्णीया
१५१ तः
३३९ तः पर्वमरुद्भ्याम्
१०५ तकारस्थानजाद्गुणाद्
३३७ तक्षिलादिभ्यश्च
११५ तदव्ययम्
१५ तपरः
३५७ तयडयटौ संख्याया
२८३ तरतमचरट्कल्पदेशव
२९९ तरतमरूपकल्पचेल
३४८ तरतमयेस्विष्ठाः प्रकर्षे
१७७ तवमम ङसा
६४ तस्मात्
२५२ तादर्थ्ये चतुर्थी

१९९ तारका ज्योतिषि
१६३ तिरश्चादयः
३२० तिलाग्निष्फलाल्पि
२०९ तिष्यपुष्ययोर्नक्षत्राणि
८९ तीयस्य ङित्सु वा
३४२ तुन्दिवलिवटेर्भः
१७९ तुभ्यंमह्यं ङया
२९३ तुमोऽप्रयुक्तस्य कर्मणि
२४३ तुल्यार्थयोगे
८९ तृतीयासमासे तृतीया
४४ तोर्लि लः
३२१ त्यतनौ
९७ त्यदादेष्टेरः स्यादौ
३२३ त्रपुजतुनोः षण् विकारे
११६ त्रिचतुरोः स्त्रियां
२०४ त्रिचतुर्भ्यां हायनस्य
९७ त्रेस्त्रय्
३६२ त्रेस्तृ च
३६२ त्रेस्त्रयस्
२८४ त्वतलोर्गुणवचनस्य
१७३ त्वन्मदेकत्वे
१७१ त्वमहं सिना
१८२ त्वामाऽमा
१४३ थो नुट्
३२९ दक्षिणापश्चात्पुरस
१३८ दस्य मः
१३४ दादेर्घः
२३१ दानपात्रे चतुर्थी
३०४ दिक्संख्ये संज्ञायाम्
११३ दिक्समासे बहुव्रीहौ
२४३ दिवः करणम्
१३६ दिव औ
१४१ दिशाम्
४७ दीर्घाच्च
२९६ दूरनिकटार्थयोगे षष्ठी
२९६ दूरनिकटार्थेभ्यो
३८ दूराद्धाने टेः प्लुतः
२४९ दूरान्तिकयोर्योगे
२७९ देवताद्वन्द्वे पूर्वपद
३४९ देवताभ्यस्तदर्थो यः
३१६ देवतेदमर्थे
३२२ देवस्वराजजनपराणां
३३० देवासः
१९७ दोषाम्
३४१ द्युद्रुभ्यां मः
२९६ द्यूतार्थस्य क्रयविक्रय
१३६ द्रुहादेर्वा
३६४ द्वन्द्वं रहस्यमर्यादा
३०९ द्वन्द्वतत्पुरुषयोः
२७९ द्वन्द्वेऽल्पस्वरप्रधाने
८४ द्वन्द्वे सर्वादीनां न
२७९ द्वन्द्वे स्वराद्यदन्तस्य
३९० द्वयोर्बहूनां चैकस्य
३४७ द्वारादीनां च
३०९ द्विगुप्राप्तापन्नालंपूर्व
३९६ द्वित्रिचतुर्भ्यः सुः
३९९ द्वित्रिभ्यामेधाधमुञौ
३२७ द्वित्वे गोयुगः
३६० द्वित्वे एकशब्दो
१९५ द्वित्वानां जक्षादीनां
२९९ द्विषः शतुर्वा
३९३ द्व्यष्टनोरात्वं संख्या
२८१ धर्मादन्
२४६ धारेरुत्तमर्णे
१३३ धावम्
१११ धिगीः
३०१ धेनोर्भव्यायाम्
१०७ धेरर्
१० धौ
१४४ धौ नपुंसकानां नस्य
१०० धौ ह्रस्वः
४९ नः सक् छवे
१७२ नकारान्तसंख्यायाः
२१३ न क्रोडादिबहुस्वरात्
२११ नखमुखात्संज्ञायाम्
२७२ नञि
२८१ नञ् दुःसुभ्यः प्रजा
३३८ नडशादाड्ड्वलः
३३९ नडादीनामीये कुक्
११७ न तिसृचतसॄणां नामि
२०१ नदादेः
९१ न पदान्ते
१२७ नपुंसकस्य
१२७ नपुंसकात्स्यमोर्लुक्
२७१ नपुंसकोऽभर्द्धशब्दो
४९ न प्रशानः
२४४ नमआदियोगे चतुर्थी
४४ नवतिनगार्योश्च
३९४ नवस्य नू आदेशस्त्न
४३ न शात्
१९६ नशेः
४८ नश्चापदान्ते झसे
४४ न षि
१४७ न संधिय्वोर्युट्
३०१ नाहवृतिवृषिव्यधि
१६२ नहो धः
१८३ नादौ
२४१ नाभुक्त्यर्थस्य
७३ नामि
१२८ नामिनः स्वरे
९८ नामिनो रः
३४ नामी
२९४ नाम्नश्च कृता समासः
८८ नाम्नो नो लोपशधौ
२७३ ना
३२७ नासिकाया नते
२१२ नासिकोदरौष्ठजङ्घा
२९६ निमित्तपर्यायप्रयोगे
२९२ निमित्तात्कर्मयोगे
१०३ नियः
२७३ निरनुबन्धकस्य तु
२४९ निर्धारणे षष्ठीसप्तम्यौ
७२ नुडामः
१२४ नुमयमः
१०७ नुर्वा नामि दीर्घः
२१८ नृनरयोर्वृद्धिश्च
३२७ नेर्बिडबिरीसौ
१२९ नोपधायाः
१९२ नो लोपः
२११ नो वा
२०१ न्नण ईप्
१७० न्यपूर्वस्य शौ दीर्घः
१२६ न्सन्महतोऽधौ दीर्घः
९१ षकारे परे नकारस्य
२१७ पङ्क्तेश्च
३२६ पक्षात्तिमूके
१०७ पक्षसु
२४८ पञ्चमीयुक्ता
३९३ पञ्चादेर्मट्
१६ पतिः समासे हरिवत्

२१६ पत्न्यादयः
१४४ पथां टेः
४७ पदान्ताद्दीर्घाद्वा
३७ पदान्तानां समाना
२१९ पखल्यादिभ्यो वा
२७१ परिमाणवता सह
३६० परेर्वर्जने वा द्वित्वम्
३३४ पर्श्वा ड्वण्
२१० पाणिगृहीती भार्या
३११ पाण्डुकम्बलादिनिः
३१९ पाण्डोर्ड्यण्
२७२ पात्रेसमितादयो
८८ पाद्दन्तनासिका
३४७ पादार्घाभ्यां च
१९८ पादो वा ईप्
२०६ पालकान्ताच्च
३२५ पाराशर्यशिलालिभ्यां
३११ पितुर्भ्रातरि व्यः
३१९ पितृष्वस्रादेरयणि
३६१ पीडायां चोत्थायां
३२६ पाक्वादिकर्णादिभ्यः
२०६ पुंयोगे च
१८२ पुंवद्वा
४७ पुंसोऽम्परे खपे संयो
१९१ पुंसोऽसुङ्
३०७ पुण्यसुदिनाभ्यामह्नः
३०४ पुत्रे च
३४६ पुराणे प्राक्च
३९२ पुरुषहस्तिभ्यामण् च
१९२ पूजार्थाच्चातेर्न
२८३ पूरणार्थप्रत्ययान्ते
८२ पूर्वादीनां नवानां
२७१ पूर्वापराधरोत्तरा
२६० पूर्वेऽव्ययेऽव्ययीभावः
३४४ प्रकारे जातीयः
२४२ प्रकृत्यादिभ्यश्च
२४९ प्रतिः प्रतिनिधिप्रति
८९ प्रथमचरमतयाल्प
११ प्रत्ययादर्शनं लुक्
४१ प्रत्यये ञमे अव-
३९१ प्रमाणे द्वयसद्घ्न
२४४ प्रभृत्यादियोगे पञ्च्यपि
३३ प्रवत्सतरकम्बलवस
३४६ प्रशंसायां रूपः
११ प्रसक्तादर्शनं लोपः
२९१ प्रसितोत्सुकाभ्यां
३१ प्रत्याङ्घौयोर्न
११९ प्राग्धातोः
३४६ प्राचुर्यविकारप्राधा
१९१ प्रादिरुपसर्गः
२७१ प्राप्तजीविक
३१७ प्रावृष एण्यः
२४३ फलप्राप्तौ कालाध्व
३११ फलबर्हाभ्यामिनः
३३९ बलादूलः
३४४ बहुर्वा उक्तार्थं स च
२७९ बहुव्रीहिरन्यार्थे
२१० बहुव्रीहेर्जातिपूर्वात्
२१७ बहुव्रीहौ धनुषोऽनङ्
२८० बहुव्रीहौ विशेषण
१६६ बहूर्जो नुम्प्रतिषेधः
३९१ बहोरिष्ठेयिः
३९१ बहोर्भूश्च
३३३ बहोर्लोपो भू च बहोः
३९६ बह्वल्पार्थात्कारका
३१३ बाह्वादेश्च
६१ भ्यः
३२७ भवने क्षेत्रे शाकट
२४१ भीत्रार्थानां भयहेतौ
२९९ भविष्यत्यकस्य भवि
३३० भागरूपनामभ्यो
३३२ भावेऽणपि
३३१ भावे तत्त्वयणः
१६३ भि दपाम्
१४० भिस् भिस्
३४६ भूत पूर्वे चरट्
९७ भोसः
२२२ भोस् भगोस् अघोस्
१७६ भ्यम् स्भ्यम्
३०१ भ्राष्ट्राग्न्योरिन्धे
३०२ मत्वर्थे बहुस्वरस्य
२०८ मत्स्यस्य यलोपः
३२२ मध्यान्मः
२१६ मनोर औ वा
३२४ मनोर्जातावपत्ये
२०२ मन्नन्ताङ्ङेप्
३३९ मलादिनः
३३८ महिषाड्डमतुः
३११ मातुर्भ्रातरि डुलः
२०९ मातुलोपाध्याया
३११ मातृपितृभ्यां पितरि
१६१ मादू
३३८ मान्तोपधाद्वत्विनौ
१९ मुखनासिकावचनो
३२१ मुखपार्श्वतसोर्लोप
३३० मृदस्तिकः
४८ मोऽनुस्वारः
१३८ मो नो धातोः
५० मो राजि समः क्वौ
२८४ यङ्मानिनोः पुंवत्
११२ यटोऽच्च
२४८ यतश्चाध्वकालयो
३४३ यत्तदेतदामा वतौ
२६४ यथाऽसादृश्ये
३६४ यथास्वे यथायथम्
४१ यमा यपेऽस्य
२०५ यवनाल्लिप्याम्
५० यवलमनपरे हकारे
३२ यवलाश्यपो द्विर्वा
३३७ यवादेर्न
२०५ यवाद्दोषे
२०१ यस्य लोपः
१४१ युजेः पञ्चसु नुम् न
२८६ युटि सति पुंवत्
३९० युवाल्पयोः कन् वा
१७२ युवावौ द्विवचने
१८१ युष्मदस्मदोः षष्ठी
२१८ यूनस्तिः
१७३ यूयं वयं जसा
२४२ येनाङ्गविकारः
१२८ य्वृणां नपुंसके धौ
३७ य्वृणामसवर्णे स्वरे
३९ य्वे ह्रस्वे
१०२ य्वोर्धातोरियुवौ स्वरे
२६ य्वोर्लोपश् वा पदान्ते

१४१ ञ्वोर्बि हसे
१०२ ञ्वौ वा
९९ रः
१३७ रः संख्यायाः
३४२ रज:कृष्यासुतिपरि
२३ रहाद्यपो द्विः
३०८ राजपर्यायपूर्वो रक्षः
३०६ राज्ञाह्नाहान्ताः
३०२ रात्रेःकृति वा
९९ रि लोपो दीर्घश्च
२४९ रुच्यर्थधातुयोगे
९९ रेफप्रकृतिकस्य खपे
११० रै स्मि
९९ रोऽरात्रिषु
३३७ लक्ष्म्या अच्च
२११ लिङ्गार्थं प्रथमा
९८ लुकि न तन्निमित्तम्
३१९ लुग्बहुत्वे क्वचित्
३०१ लोकस्य पृणे
३३७ लोमपामपिच्छा
९९ लोम्नोऽपत्येषु बहु
३३२ लोहितादिडिमनूभावे
३३१ वत्सुलये
३५२ वत्वम्तास्स्वार्थे
३४९ वत्सोक्षाश्वर्षभेभ्य
१३८ वमयोश्च
२०४ वयोवाचिनो हाय
२२ वर्ग्यो वर्ग्येण सवर्णः
२४८ वर्जनेऽपपरिभ्यां
१९९ वर्णका तान्तवे
११ वर्णविरोधो लोपश्
२०० वर्तका शकुनौ
२९४ वर्तमानाधारार्थक्तस्य
१३३ वर्सा रसे
१९८ वसोर्व उः
३६० वाक्यादेः सम्बोधन
९४ वाचस्पत्यादयो
३४४ वाचो ग्मिनिः
८९ वा जसो
२६२ वा टाङ्योः
३४० वातातीसारपिशा
३३९ वातात्समूहे च
१६९ वाऽऽदीपोः शतुः
९० वा पदान्तस्य
११९ वाऽमूशसि
१२९ वाऽवसाने
१४८ वाऽऽसु
१३८ वाहो वौ शसादौ
३२३ विंशतिस्त्रिंशत्त्र्यां
३२३ विंशतेस्तिलोपो
३५४ विंशत्यादेर्वा तमट्
१८९ विद्यमानपूर्वकालप्रथ
२४८ विद्यास्वीकारे पञ्चमी
२९९ विनञ्भ्यां नानाञौ
२४७ विनापृथग्नाना वा
२३७ विनासहनमस्तेनि
३५१ विन्मतोर्लुक्
१८ विभक्त्यन्तं पदम्
१९ विरामोऽवसानम्
१८३ विशेष्यपूर्वं सम्बो
२३२ विश्लेषावधौ पञ्चमी
३३७ विष्वगित्युत्तरपद
१९० विश्वस्य वसुराटो
३२६ विसङ्कटोत्कटः कटः
१९७ विसर्गनुमस्थानिका
१४ विसर्गानुस्वारसंयोग
५२ विसर्जनीयस्य सः
३२७ विस्तारे पटः
३५९ वीप्सार्थापदं द्विः
३५० वृद्धप्रशस्ययोर्वा
२८९ वृद्धिहेतोस्तद्धित
३२६ वेः शालशङ्कटौ
८७ वेकयोः
१२० वेयुवः
२६६ वोपसर्गस्य
३११ वोऽव्ययस्वरे
२१३ वौगुणात्
३०० व्रितः परस्य वा
१४२ व्रितो नुम्
३६९ व्रातादेर्नित्यम्
३२३ शक्तियष्टयोरीकक्
३२३ शम्याः ष्लञ्
३०२ शरादेश्च
५३ शसपरे खसे विसर्ज
२८७ शसादौ स्वरे तद्धि
६८ शसि
२८४ शसि बह्वल्पार्थस्य
५१ शसे कृणोः कुक्कुटौ
५१ शसे चपस्य द्वितीया
५३ शसे वा
१७४ शसो नो वक्तव्यः
२१९ शाकपार्थिवादीनां
३३८ शिखाया वलः
३१२ शिवादेश्चाण्
३३९ शीतोष्णतृप्रेभ्यस्त
३३९ शुनो वस्य उवौ च
३३९ शृङ्गवृन्दाभ्यामारकः
४६ शे चर्वा
२२३ शेषाः कार्यं कर्तृसाध
३६४ शेषा निपात्याः
२६४ शेषे कृति वा
२१० शोणाद्वा
१२९ श्वन्यादेः
३४३ श्रद्धादेर्लुः
२४९ श्लाघह्नुङ्स्थाशापां
३२९ श्वसस्तिकण् वा
२१७ श्वशुरस्योकाराकार
१४१ श्वादेः
३५३ षट्कतिकतिपयचतु
३२७ षट्त्वे षड्गवः
२१६ षष उत्वं दतृदश
२९६ षष्ठी हेतुप्रयोगे
३४६ षष्ठ्या रूप्य च
११४ षो डः
४३ ष्टुभिः ष्टुः
२०१ ष्णिितः
१४७ ष्णः
७९ ष्णो णोऽमन्ते
२०४ संख्यादेर्दाम्न ईप्
३५६ संख्यापरिमाणाभ्यां
३०६ संख्यापूर्वरात्रम्
२७८ संख्यापूर्वो द्विगुः
३५५ संख्यायाः प्रकारे धा

८७ संख्याविसायपूर्वस्या
३०७ संख्याव्ययाभ्यां
२८७ संख्यातुष्ठ्याश्वादि
३५२ संख्येयविशेषावधा
३०८ संघातार्थं समान्तः
३२७ संघाते कटः
२८५ संज्ञापूरणार्थप्रत्यय
९७ संज्ञोपसर्जनयोर्नात्वम्
२३१ सम्बन्धे षष्ठी
३६० सम्भ्रमेण प्रवृत्तावने
१३२ संयोगान्तस्य लोपः
२१७ संहितशफलक्षणवाम
९४ सखिपत्योरीक्
२६१ स नपुंसकम्
३९ सप्तम्यर्थे ईत्संधि न
७९ समानाद्धेर्लोपो
१३३ सभिन्नस्य राज्ञ
२६० समासप्रत्यययोः
२५८ समाऽश्वान्वये ना
२७२ समासे क्वचिद्वैकपदं
२७७ समाहारे एकवद्भावः
२७८ समाहारेऽस्त ईव द्विगुः
३३३ समूहेऽर्थेऽपि
१६७ सयहन्तस्य वौ नुम्न
६६ सरूपाणामेकशेष एक
२८४ सर्वादेः समासादौ
८० सर्वादेः स्मट्
२५६ सर्वादेर्हेतुप्रयोगे हेतौ
२८ सवर्णे दीर्घः सह
६० सशब्दाद्विसर्गस्य
३३० सस्नौ प्रशंसायाम्
२१३ सहनञ्विद्यमानपूर्वाच्च
२४१ सहादियोगे तृतीया
२१९ सहादेः सादिः
१३६ सहेः साडि
३२८ साक्षाद्द्रष्टरि संज्ञायां
३६१ सादृश्ये चोत्ये गुणवच
२११ साधुनिपुणाभ्यां
२५२ साध्वसाधुप्रयोगे
१५७ सामाकम्
३०८ सामान्ये नपुंसकम्
२९ सारङ्गः पशुपक्षिणोः
१३२ सावनडुहः
६५ सि औ जस् अम् औ
३३८ सिध्मादेर्लः
७४ सिधिः
२९ सीमन्तः केशवेषे
८१ सुडामः
३१३ सुधातृव्यासवरुडनि
४४ सुपो न
२०८ सूर्यागस्त्ययोरीयेई
२०६ सूर्यादेवतायां चाप्
३०९ सेनासुराच्छायाशा
१०६ सेरा
१६१ सेरौः
९३ सेर्डाऽधे
६० सौवाद्धसे
६७ सो नः पुंसः
१६० सौ सः
१५० स्कोराद्योश्च
१०८ स्तुरार्
३३३ स्तेनाद्यो नलोपश्च
४२ स्तोः श्चुभिः श्चुः
१०१ स्त्रियां योः
३१६ स्त्रियामवन्तिकुन्ति
३६३ स्त्रीनपुंसकयोरुत्तर
३५७ स्त्रीपुंसाभ्याम्
११९ स्त्रीभ्रुवोः
३१९ स्त्र्यपत्ये लुक्
३२७ स्नेहे तैलः
२४६ स्पृहयतेरीप्सिते
१३९ स्म्यः
५१ स्रोर्विसर्गः
७६ स्वंविश्ववडभ
२५४ स्त्रीप्रत्यययोरकारयो
१२ स्वरानन्तरिता हसाः
५७ स्वरे यत्वं वा
२८६ स्वाङ्गादीपोऽमानि
२११ स्वाङ्गाद्वा
३४० स्वादामिन्मैधयं
२१० स्वाम्यादियोगे षष्ठी
३३० स्वार्थेऽपि
१४६ हनो घ्ने
९ हयवरल
५६ हवे
२९ हकादेरीषादौ टेर्लोपो
२२ हसात्परस्य मसस्य
१०० हसेपः सेर्लोपः
२२ हसेऽर्हं हसः
३३४ हिते च
३३९ हिमादेर्लुः
२०५ हिमारण्ययोर्महत्त्वे
३३१ हृदयादालुः
३१२ हेतुमनुष्येभ्यो वा
२४९ हेतौ तृतीयापञ्चम्यौ
३२२ हेमन्तस्य वातलोपो
३८ हैहप्रयोगे हैहयोः
४० हो ढभा
१३९ हो ढः
६ ह्रस्वदीर्घप्लुतभेदाः
१३१ ह्रस्वादेशे संध्यक्षरा
१४ ह्रस्वो लघुः
२०० ह्रस्वो वा

इति सिद्धान्तचन्द्रिकापूर्वार्धगतसूत्राणां सूची समाप्ता ।